॥ श्रीः ॥

# न्यायकुसुमाञ्जलिः

न्यायाचार्यश्रीमदुदयनाचार्यविरचितः ।

महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासित-
महामहोपाध्यायवर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः

# NYÂYA KUSUMÂNJALI,

BY

NYÂYÂCHÂRYA SRI UDAYANÂCHÂRYA,
With the Commentary of Mahâmaho-
pâdhyaya Varddhamanopâdhyâya,
And the Gloss
of Mahâmahopâdhyâya Ruchi datta,
Edited by
Pandit Laxman Shastri Dravid
Professor, Government Sanskrit College, Calcutta.

*Published and Sold by H. D. Gupta & Sons,*
PROPRIETORS,
THE CHOWKHAMBA SANSKRIT BOOK DEPOT.
BENARES CITY:
*Printed by Jai Krishna Das Gupta,*
*at the Vidya Vilas Press.*
BENARES.

1912

॥ श्रीः ॥

# न्यायकुसुमाञ्जलिः

न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः ।

महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासित-
महामहोपाध्यायवर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः

# NYÂYA KUSUMÂNJALI,

BY

NYÂYÂCHÂRYA SRI UDAYANÂCHÂRYA,
With the Commentary of Mahâmahopâdhyâya Varddhamânopâdhyáya,
And the Gloss
of Mahâmahopâdhyâya Ruchi datta,
Edited by
Pandit Laxman Shastri Dravid
Professor, Government sanskrit College, Calcutta.

*Published and Sold by H. D. Gupta & Sons,*
PROPRIETORS,
THE CHOWKHAMBA SANSKRIT BOOK DEPOT.
BENARES CITY:
*Printed by Jai Krishna Das Gupta,*
*at the Vidya Vilas Press.*
BENARES.

1912

# भूमिका ।

अहोधन्योऽस्तिसर्वनियंतासच्चिदानन्दघनः परमात्मासाक्षीचेताकेवलोनिर्गुणश्च सर्वपरिच्छेदवर्जितः पूर्णः स्वयंज्योतिः सर्वगन्धः सर्वरसः सर्वकर्त्ता स्वमाययाविवर्तभूतः सर्वप्रपञ्चोत्पादकः स्थितिकर्त्तासंहारकर्त्ताचाभिन्ननिमित्तोपादानकारणोलूतातन्तुरिव स्वप्नवच्च योगीवत्स्वेच्छयामायावीवासङ्कश्चयेनच सर्वमुमुक्षूपचिकीर्षया महर्षिद्वारानानाविधानिशास्त्राणिवेदावेदाङ्गाश्चेतिहासपुराणादीनिप्रकाशितानि तेपु च आत्मावारेश्रोतव्योमन्तव्येति श्रुतिस्मृतिसूत्रभाष्यानुसारार्थकतयामुमुक्षुबुद्धिवैशद्यार्थंतर्कशास्त्रं गौतमकणाद द्वारा प्रकाशितं शरीरादिभ्योभिन्नश्चात्मा ईश्वरश्चास्ति सर्वशक्तिमान् सर्वफलदाताचेत्यनुमानेनसाधितो नास्तिकपक्षनिरासायपरलोकसाधनभूतधर्माधर्मनिर्णयायचोद्देश्यलक्षणपरीक्षाद्वारापदार्थसाधर्म्यवैधर्म्य द्वाराचनिःश्रेयसाधिगमाय प्रमाणादयोऽर्थावात्स्यायनमहर्षिभिर्द्वाराप्रकाशिताः इत्यन्तं, तथाहि प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् । प्रमाणमन्तरेणनार्थप्रतिपत्तिः । नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम् । प्रमाणेनखल्वयंज्ञाता,ऽर्थमुपलभ्यतमर्थमभी प्सतिजिहासतिच । तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः । समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जिहाति वा । अर्थस्तुसुखंसुखहेतुर्दुःखहेतुश्च सोयं प्रमाणार्थः प्राणभृद्भेदस्यापाधिनाऽपरिसंख्यत्वाद् परिसंख्येयः । अर्थवति चप्रमाणे प्रमाताऽन्नः करणावच्छिन्नः प्रमेय प्रमितिरित्यर्थवन्ति भवन्ति, तस्मादन्यतमापायेऽर्थ-

स्यानुपपत्तेश्च तत्रयस्येप्साप्रयुक्तस्य प्रवृत्तिः, सप्रमाता चिद्रूपः। सयेनार्थं प्रमिणोति तत्प्रमाणं, प्रमायाः करणश्चक्षुरादयः च क्षुराद्यवच्छिन्न चैतन्येन योऽर्थः प्रमीयते तत्प्रमेयं यथार्थज्ञानविषयंपरमार्थ तोमिथ्याभूतमपि स्थूलाविचारिणां सत्यवद्भाति व्यावहारिकसत्यं प्रातीतिकंवा इतिवेदान्ते अत्रापितदेवार्थो गोतमाभिप्रेतः, तथा चोक्तं तद्विद्यैश्च सहमंयोगःइति सोपानारोहणन्यायेन सहकारितामेव निर्दिशेपशुद्धसच्चिदानन्दस्वरूपब्रह्म वादिनोभजन्तेसर्वे । ननुकथंसर्वेषांदर्शनानां निर्विशेषाद्वैतवादसहकारित्वं परस्परविरुद्धत्वात् इतिचेदित्थं तथाहि बन्धस्याज्ञानकार्यत्वंज्ञानैकनिवर्त्यत्वश्चेत्ययमेवार्थः परमसिद्धान्तत्वेन प्रतिपिपादयिषितोवेदान्तानां सर्वोपनिषदां सचसाक्षात्परम्परयावातदानुगुण्येन सर्वतीर्थकराणांमहर्षीणामभिप्रेतएवेतिसुस्पष्ट मेवावगम्यते, यथाह भगवानक्षपादाचार्यः सू० २ दुःखजन्मप्रवृत्तिदोषमिथ्याऽज्ञानाना मुत्तरोत्तराऽपाये तद नन्तरापायादपवर्गः इति । दुःखादिषुपूर्वपूर्वस्योत्तरोत्तर कार्यत्वान्मिथ्याऽज्ञानस्य संसारहेतुत्वं,तन्नाशे,(विवेकेनबाधे,) संसारबाध इति तुल्यमन्यत्राभिनिवेशात् । दोषनिमित्तस्यमिथ्याऽज्ञानस्य स्वरूपं सएवाह दोषनिमित्तंरूपादयोविषयाः सङ्कल्पकृता इति । तन्निमित्तंत्ववयव्यभिमान इति च, तन्नाशोपायमित्थं पुनरसूत्रयत् मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात्स्वप्नविषयोपलब्धि प्रणाशवत्प्रबोध इति, अत्ररूपादिविषयोपस्थापन द्वारा दोषादिजनकस्य सङ्कल्परूप मिथ्याज्ञानस्य निःसङ्कल्पतालक्षणेन ब्रह्मात्मैक्यज्ञानेनवा, तत्वज्ञानेननिवृत्तिर्बोध्यतेनिवृत्तिर्नाम ब्रह्मभिन्नस्यत्रैकालिकात्यन्ताभावनिश्चयलक्षणोबाधःइत्यभिप्रेतोऽस्ति तत्त्वदृशामिति।एवङ्कणभक्षपक्षेपिसवासनंमिथ्याऽज्ञानं संसारमूलं

दग्धेन्धनानलवत्तदु पशमोमोक्ष इति चतुल्यमेव सर्वेषांदर्शनानां वेदान्तसहकारित्वं वेदान्तस्यसर्वश्रेष्ठत्वं तथा चोक्तमुदयनाचार्य्येण। आत्म तत्वविवेके विज्ञानवादि दूषणोपसंहारे॥ नग्राह्यभेदमवधूयधियोस्तिवृत्ति स्तद्बाधकेवलिनिवेदनयेजयश्रीः। नोचेदनिन्द्यमिदमीदृशमेवविश्वं तथ्यं तथागतमतस्य तु कोऽवकाश इति, अस्यार्थः। ग्राह्यभेदं घटादि वाह्यार्थं तिरस्कृत्यघटादिरूपाकाराभिन्न रूपेण ज्ञानस्यवृत्तिः (संबंधः)कापिनास्तितद्बाधके घटादिवहिरर्थबाधकेऽद्वैत ब्रह्मरूपाधिष्ठानसाक्षात्कारे जातेतु बलिनि,सर्वेभ्योद्वैतवादिभ्योवलवति,(वेदनयेवेदान्तदर्शने )जयश्रीर्जयोत्कर्षकाष्ठा। बौद्धमतापेक्षया तार्किकमतेजयस्तदपेक्षयासांख्यमते जयस्तन्मते आत्मनोऽसङ्गत्वादिस्वीकारात्, तदपेक्षयापि वैदिकमतेयतो द्वैतमिथ्यात्वादिस्वीकारात्। अतोजयोत्कर्षकाष्ठा, यदितु निष्कामकर्माननुष्ठानाच्चित्तं नशुद्धं, तदा वेदान्तश्रवणादौ सत्यपितादृशसाक्षात्काराऽभावेन विश्वमनित्यतया प्रतीयमानमपि तथ्यमेवमनुतेऽविवेकीव्यावहारिकसत्यत्वात्, तत्रापाततस्तार्किकादिभिर्विश्वं ब्रह्मवत् परमार्थ सत्यमिति वक्तुं शक्यं,तथागतस्यतु बौद्धस्यतुमतस्य ज्ञानादत्यन्तभिन्नं जगदलीकमित्येवरूपस्य कोऽवकाश इति भावः। एवंपरमाणु भेदादिसत्यत्वेपि नतात्पर्यम्। यदर्थविज्ञानं सा प्रमितिः। चतसृषुचैवं विधास्वर्थतत्वं समाप्यतेऽन्येषाम्प्रमाणानामेष्वेवान्तर्भावः। किंपुन स्तत्त्वंतदाह सतश्च सद्भावोऽसतश्चाऽसद्भावः। सत्सदिति गृह्यमाणंयथा भूतमविपरीतं तत्वं भवति। असदसदितिगृह्यमाणम यथा भूतं विपरीतंमिथ्याभूतं तत्वं भवति, कथमुत्तरस्य प्रमाणेणोपलब्धिरिति सत्यप्युपलभ्यमाने, तदनुपलब्धेः,प्रदीपवत् यथा दर्शकेनदीपेन दृश्ये गृह्यमाणे, तदिवयन्न गृह्यते तन्नास्ति-

यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति । एवं प्रमाणेन सतिगृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति, तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति । सच्च खलु न्याय-मते प्राचीनतमेषोडशधाव्यूढमुपदिश्यते तासां खल्वासां सद्वि-धानान्तत्वज्ञाने ऽपवर्गोन्यायमते तथाहि प्रमाणप्रमेयसंशय प्रयोजनदृष्टान्त सिद्धान्तावयवतर्कनिर्णय वादजल्पवितंडा-हेत्वाभासच्छलजाति निग्रहस्थानानां तत्वज्ञानान्निः श्रेयसा-धिगमः इति । एतावंतोविद्यमानार्थाव्यावहारिकाः । विचारकाणा-मितिएषामविपरीतं ज्ञानार्थमिहोपदेशः । सोऽयमनवयवेनतन्त्रार्थ उद्दिष्टोवेदितव्यः । आत्मादेः प्रमेयस्यद्वादशविधस्य तत्वज्ञाना-न्निः श्रेयसाधिगमोन्यायशास्त्रे । हेयं तस्य निवर्त्तकं हानमा-त्यन्तिकं तस्योपायोऽधिगन्तव्य इत्येतानिचत्वार्य्यर्थ पदानि-सम्यग् बुध्वा तत्तच्छास्त्रेभ्यस्तद्गुरुसङ्गेन परम्परयासाक्षाद्वा-निःश्रेयसमधिगच्छतिमुख्यं परमार्थमोक्षस्तुसर्वदुःखनिवृत्तिःपरमा-नन्दावाप्तिश्चेतिसुस्पष्टं तत्र संशयादीनां पृथग् वचनमनर्थकं संशया-दयो यथा सम्भवं वेदान्ते प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्ते तथापि स्थूलदृष्ट्यापृथगुक्ताः । इमास्तुचतस्रो-स्पष्टमेवविद्याःपृथक् प्रस्थानाःप्राणभृतामनुग्रहाय परंपरयोपदिश्य-न्ते यासाश्चतुर्थीयमान्वीक्षिकीन्यायविद्या,तस्याः पृथक् प्रस्थानाः संशयादयः पदार्थाः । तेषां पृथग् वचनमन्तरेणाध्यात्मवि-द्यामात्रमियं स्याद् यथोपनिषद्ब्रह्मविद्या इति । तस्मात्सं-शयादिभिः पदार्थैः पृथक् प्रस्थाप्यते तत्र नानुपलब्धेरर्थो निर्णीयतेऽर्थेन्यायः प्रवर्तते एतेन तर्कोनस्वतन्त्रप्रमाणमिति ध्व-नितं, तत्वज्ञानदृढीकरणार्थम् । स एवन्यायः संशयितेर्थे प्रव-र्तते यथोक्तं विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति

विमर्शः संशयः । पक्षप्रतिपक्षौन्यायवृत्तिः । अर्थावधारणं निर्णयस्तत्त्वज्ञानमिति सचायं किं स्विदितिवस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः । प्रमेयेभवन्नेवमर्थं पृथगुच्यते स्पष्टार्थम् । प्रयोजनन्तु येन प्रयुक्तः प्रवर्तते तत् प्रयोजनम् । यमर्थमभिप्सन् जिहासन् वा कर्मारभते तेनानेन सर्वेप्राणिनः सर्वाणिकर्माणि सर्वाश्चविद्याव्याप्ताः तदाश्रयश्चन्यायः प्रवर्तते। कः पुनरयं न्यायः । प्रमाणैरर्थपरीक्षणं न्यायः प्रत्यक्षागमाश्रित मनुमानं सान्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तयाप्रवर्तत इत्यान्वीक्षिकी न्याय विद्या, न्यायशास्त्रम् । यत्पुनरनुमानं प्रत्यक्षागम विरुद्धं तन्न्यायाभासः स इति तत्रवादजल्पौ सप्रयोजनौ वितंडान् परीक्ष्यते, वितण्डया प्रवर्तमानो वैतण्डिको यथा वैतण्डकोपि ब्रह्माद्वैतंस्थायुक्तोहर्षमिश्रः परमार्थतत्त्ववित्पाण्डितोपि वैतण्डिकत्वेदविरुद्धजल्पक गर्वमर्दनायेति । स प्रयोजन मनुयुक्तोयदि प्रतिपद्यतेसोऽस्यपक्षः सोऽस्यसिद्धान्तइतिवैतण्डिकत्वं जहाति । अथ न प्रतिपद्यते । नायं लौकिकोन परीक्षक इत्या पद्यते, अथापिपरपक्षंप्रतिषेधकंप्रयोजनं ब्रवीति एतदपितादृगेव । यो ज्ञापयति योजानाति यच्चज्ञाप्यते एतच्चप्रतिपद्यते पर पक्ष प्रतिषेधज्ञापनं प्रयोजन मित्येतदस्य वाक्यमनर्थकं भवति । स्ववाक्यपर पक्षस्थापनाहीनो वितण्डा । तस्य यद्याभिधेयंप्रतिपद्यते सोऽस्यपक्षः स्थापनीयो भवति । अथ न प्रति पद्यते प्रलापमात्र मनर्थकंभवति वितण्डात्वं, निवर्तते, दृष्टान्तः-प्रत्यक्षविषयार्थः, यत्रलौकिक परीक्षकाणां दर्शनंनव्याहन्यते तत्प्रमेयं तस्यपृथग्वचनञ्च तदाश्रयावनुमाना गमौ ॥ तस्मिन् सतिस्यातामनु माना ग-

मावमति चनस्याताम् । तदाश्रयाचन्यायप्रवृत्तिः । दृष्टान्ताऽविरोधेन चपरपक्ष प्रतिषेधो वचनीयोभवति । दृष्टान्त समाधिनाचसपक्षः साधनीयोभवति, नास्तिकश्चदृष्टान्तमभ्युपगच्छ न्नास्तिकत्वंजहाति । अनभ्युपगच्छनकिंसा धयेत्परमुपालभेतेति, निरुक्तेन दृष्टान्तेनशक्यमभिधातुम् । साध्य साधर्म्यात् । तद्धर्मभावीदृष्टान्त उदाहरणंनद्विपरीताद्विपरीतमिति अस्त्ययमित्यनुज्ञायमानोऽर्थः सिद्धान्तः । सचप्रमेयं तस्यपृथग्वचनम् । सत्सुसिद्धान्तभेदेषुवादजल्प वितण्डाः प्रवर्तन्ते नातोऽन्यथेतिसाधनीयार्थोभवति शब्दसमूहे सिद्धिः परिसमाप्यंततस्यपञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्यावयवा उच्यन्ते तेषुप्रमाणसमवायै आगमः प्रतिज्ञाहेतुरनु मानम् । उदाहरणं प्रत्यक्षम् । उपनयनमुपमानं सर्वेषामेकार्थसमवायेसामर्थ्य प्रदर्शनं निगमनमिति सोऽयंपरमोन्याय इति एतेन वादजल्पवितण्डाः प्रवर्तन्ते नातोऽन्यथेति तदा श्रया च तत्वव्यवस्था तएतेऽवयवाः शब्द विशेषाः सन्तः, प्रमेयेऽन्तर्भूता एवमर्थाः पृथगुच्यन्त इतितर्कोन प्रमाण संगृहीतो नप्रमाणान्तरं प्रमाणानामनुग्राह कस्तत्वज्ञानायकल्पते तस्योदाहरणं किमिदंजन्मकृतकेनहेतुनानिर्वर्त्यते आहोस्विदकृतकेन अथाकस्मिकमिति एवमविज्ञातेऽर्थेकारणोपपत्त्या ऊहः प्रवर्तते यदि कृतकेनहेतुनानिवर्त्यतेहेतूच्छेदस्याशक्यत्वादनुपपन्नोयं जन्मोच्छेदः । अथा ऽकृतकेनहेतुनाततोहेतूच्छेदस्याशक्यत्वादनुपपन्नेदं जन्मोच्यते । अथाकास्मिकमतोऽकस्मान्निवर्त्यमानं नपुनर्निर्वर्त्यार्थस्य प्रतीति निवृत्तिकारणंनोपपद्यते तेन जन्मानुच्छेद इति । एतँस्मिस्तर्कविषयेकर्मनिमित्तजन्मेति प्रमाणानि वर्तमानानितर्काणामनुगृह्णन्तेतत्व ज्ञानविषयस्यावभागात्तत्वज्ञानायकल्पतेतर्क इति ।

सोयमित्थंभूतस्तर्कः प्रमाणसहितो वादे ( तन्व बुभुत्सुकथारूपे) साधनायोपालम्भायवार्थस्य भवतीत्येवमर्थं पृथगुच्यते प्रमेयान्तर्भूतोपीति । निर्णयस्तत्त्वज्ञानं प्रमाणानां फलन्तदवसानोवादः तस्य रक्षणार्थं जल्पवितण्डेतावेतौतर्कानिर्णयौ लोकयात्रां वहत इति सोयंनिर्णयः प्रमेयान्तर्भूत एवमर्थं पृथ गुद्दिष्ट इति वादः खलु नानाप्रवक्तृकः प्रत्यधिकरण साधनोऽन्यतराधिकरणनिर्णयावसानोवाक्यसमूहः पृथगुद्दिष्ट उपलक्षणार्थम् । उपलक्षितेन व्यवहारस्तत्त्वज्ञानायभवतीतितद्विशेषौजल्पवितण्डे तत्वाध्यवसाय संरक्षणार्थामित्युक्तम् । निग्रहस्थानेभ्यः पृथ गुद्दिष्टाहेत्वाभासा वादे चोदनीया भविष्यन्तीति । तेषांद्वाविं शतिर्भेदाः । जल्पावितण्डयोस्तु निग्रहस्थानानीति, छलजातिनिग्रहस्थानानां पृथ गुपदेश उपलक्षणार्थः । उपलक्षितात्स्ववाक्येपरिवर्जनं । छलजातिनिग्रहाणाम्परवाक्येपर्यनुयोगः । जातिश्चचतु र्विंशतिः । असदुत्तरं जातिः समानप्रसवावा । जातेश्चपरेण प्रयुज्यमानायाः सुलभः समाधिः स्वयश्चसुकरः प्रयोग इति । सेयमान्वीक्षिकीप्रमाणादिभिः पदार्थैर्विभज्यमाना प्रदीपः सर्वविद्याना मुपायः सर्वकर्मणाम् । आश्रयः सर्व धर्माणांविद्योद्देशप्रकीर्तिता,तदिदंतत्वज्ञानंनिः श्रेयसाधिगमार्थं यथाविद्यंतत्तद्गुरुभ्यो वेदितव्यम् । नवीनमतेद्रव्यगुणकर्म सामान्यविशेष समवायाभावाख्याः सप्तपदार्थाः पदार्थसाधर्म्य वैधर्म्य लक्षण परीक्षोद्देशद्वारानिरूपितामोक्षज्ञानायपरंपरया इति पृथिव्यादयोनव द्रव्याणि रूपादयोगुणाश्चतुर्विंशतिः । उत्क्षेपणादीनि पंचकर्माणिपरम परंच द्विविधं सामान्यंपरंसत्ता अपरंजातिः विशेषा स्त्वनंताः॥ सर्वनिर्वाहकाः नित्यसंबधः समवायस्त्वेकः संयोगादयो पिवोध्याः ॥ प्राग-

भावादि भेदेनाभवाश्चतुर्विधाः । एवं सर्वं न्यायरहस्य भूतोमतम तान्तरसहितो न्यायकुसमाञ्जलिनाम ग्रंथोहिपरमरमणीयोस्ति पद-वाक्यप्रमाण पारावारीण परमार्थ तत्त्वविद् उदयनाचार्य वर्य-विरचितः सर्वजनोप कारायमर्वो परिवरीवर्त्ति । तेनैवोक्ताः कुसुमाञ्जलौमत भेदाः स्वच्छतयावर्तन्ते तथाहि इहयद्यपि यंकम-पि पुरुषार्थमर्थयमानाः शुद्धबुद्धस्वभावा इत्यौपनिषदाः । आ-दि विद्वान् सिद्धइति, कापिलाः, क्लेशकर्मविपाका शयैरपरामृष्टो, निर्वाण कायमधिष्ठायसंप्रदाय प्रद्योतकोऽनुग्राहकश्चेतिपातञ्जलाः लोकवेद विरुद्धैरपिनिर्लेपः स्वतंत्रश्चेतिमहापाशुपताः, शिवइति शैवाः, पुरुषोत्तम इतिवैष्णवाः । पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, निरावरण इति दिगम्बराः। उपास्यत्वेन देशितइति मीमांसकाः। परमाणुसत्यवादिन इतिनैयायिकाः लोक-व्यवहारसिद्धइति चार्वाकाः, किंवहुना कारवोपियमपि किञ्च कर्मन्यु पासंते तस्मिन्नवजानि गोत्रप्रवर चरण कुलधर्मा दिवोदास मारं प्रसिद्धा नुभावेभगवति संदेह एवकुतः ? किं निरूपणीयमिति श्रुतोहि भगवान् वहुशः श्रुति स्मृती तिहास पुराणेष्विदानीं मन्तव्यो भवति श्रोतव्योमन्तव्य इति श्रुतेरिति ॥ सोयं कु-सुमाञ्जलिग्रंथः प्रकाशमकरंदव्याख्यायुतो नाद्यापि मुद्रितः सोयं परमपरिश्रमेण हरिदास श्रेष्ठि गुप्तात्मजनजय कृष्ण दासेन निज विद्याविलासमर्मरीजयंत्रा लयेमुद्रापयित्वा सर्वजन सौल-भ्यार्थं प्रकाशितोस्ति तस्मात्त्वरयन्तु न्याय शास्त्ररसिका अपूर्व ग्रंथप्राप्तयेति शमा शास्से

सर्वमुमुक्षुहितैषी

**प्रज्ञानानन्द सरस्वती स्वामी**

कैवल्यधामनिवासी

ब्रह्माघाट बनारस ।

कुसुमाञ्जलिप्रकरणीयकारिकानामकारादिक्रमेण

# प्रतीकसूची

इति कुसुमाञ्जलिकारिकासूची समाप्तिमगमत् ॥

---

श्रीशिवः शरणम् ।

## न्यायकुसुमाञ्जलिप्रकरणस्य प्रस्तावक्रमेण

## विषयसूची ।

### प्रथमस्तबके ।

## द्वितीयस्तबके ।

## तृतीयस्तबके ।



## चतुर्थस्तबके ।

पञ्चमस्तवके ।



इतिकुसुमाञ्जलिप्रकरणसूची समाप्ता ।

## कुसुमाञ्जलि-प्रकाशस्य सन्दर्भानुसारेण-विषयसूची ।

प्रथमस्तबके ।

## द्वितीयस्तबके ।

### तृतीयस्तबके ।



### चतुर्थस्तबके ।



### पञ्चमस्तबके ।



इति कुसुमाञ्जलिप्रकाशगतविषयसूची समाप्ता ।

## मकरन्दस्य ग्रन्थक्रमानुसारेण

## विषयसूची ।

### प्रथम स्तबके ।

## द्वितीयस्तबके ।



इति कुसुमाञ्जलिप्रकाशमक-

रन्दगतविषयसूची समाप्ता ।

प्रकाशसहितन्यायकुसुमाञ्जलिग्रन्थशुद्ध्यशुद्धीनां

# सूचीपत्रम् ।

| अशुद्धम् | शुद्धम् | पृ० | पं० |
|---|---|---|---|
| बहुलवञ्चनाद्वा | बहुलवञ्चनाद्वा | ४ | २४ |
| मनने श्रद्धा | मननं ऽश्रद्धा | ० | ४ |
| जन्यस्वविषयक | जन्यजन्यस्वविषयक | ११ | ६ |
| व्याप्यकालसम्बन्धित्वं | व्याप्यकालासम्बन्धित्वं | १४ | १६ |
| मुपादेत्त | मुपादत्से | १८ | ३० |
| युक्त, कारणगत्तैक | युक्तंकारणगतैक | २७ | २७ |
| लामादिहेतुत्वे | लाभादिहेतुत्वे | ३६ | २४ |
| सहकारि | सहकारि | ४१ | २७ |
| सहानस्थान | सहानवस्थान | ४४ | २३ |
| विशेपाणा | विशेषणा | ,, | ६ |
| प्रागाभावादि | प्रागभावादि | ४९ | ६ |
| मपूर्वणेत्यर्थः | मपूर्वेणेत्यर्थः | ६७ | ९ |
| तदुपग्रहणे | तदुपग्रहेण | ,, | १ |
| भिमानाव्या | भिमानव्या | ७० | १ |
| तद्धर्मिभेद | तद्धर्मिभेद | ८९ | १५ |
| यतिरका | व्यतिरेक | ८९ | १ |
| प्रामाप्रम | प्रमाप्रम | ७ | १ |
| ऽप्रमाण्य | ऽप्रामाण्य | ७ | १० |
| दशायमिति | दशायामिति | ९ | १८ |
| हेतुर्वि | हेतुर्वि | ९ | १३ |
| व्यघातात् | व्याघातात् | १४ | १ |
| तत्प्रमाण्य | तत्प्रामाण्य | १४ | ७ |

| | | | |
|---|---|---|---|
| प्रमाण्या | प्रामाण्या | १४ | ११ |
| ,, | ,, | ,, | २४ |
| तत्प्रमाण्यस्या | तत्प्रामाण्यस्या | ,, | २९ |
| परस्यरादि | परम्परादि | २९ | १ |
| गकास्य | गकारस्य | ३६ | ३१ |
| देर्वादेव | दर्वागेव | ४२ | १९ |
| देवाधि | वेदाधिक | ५० | १ |
| मापोह्ना | मावापोह्ना | ५५ | २८ |
| नतिक्रमणेति | नतिक्रमेणेति | ५७ | २४ |
| वृत्तिः | प्रवृत्तिः | १८ | २४ |
| कार्यात्मनौ | कार्यात्मानौ | २२ | २ |
| नोपलम्भाय | नोपालम्भाय | २१ | ७ |
| उपधेय | उपाधेय | ५१ | ३ |
| गोः | गौः | ५० | १५ |
| नच | नहि | ५५ | २३ |
| व्यपारवत्व | व्यापारवत्वं वा | ७४ | २२ |
| तद्बाधिका | तद्बाधिका | ९६ | १७ |
| निधि | विधि | १३६ | १९ |

इति शुद्धयशुद्धिपत्रं समाप्तम् ।

श्रीगणेशाय नमः ।

# न्यायकुसुमाञ्जलिः ।

## महामहोपाध्यायश्रीमदुदयनाचार्यविरचितः ।

### विद्वद्वरश्रीवर्द्धमानप्रणीतप्रकाशसहितः ।

---

## प्रथमः स्तबकः ।

**सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो**
**विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ॥**
**ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-**
**च्चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः ॥ १ ॥**

ॐ नमो गणेशाय ॥

भक्तानां कामदस्तुष्टो रुषा कामं दहन्नपि ॥
अपि ज्ञानमयः स्थाणुर्यस्तमीशं स्तुवीमहि ॥ १ ॥
यतः प्रकाशते ज्योतिरपि वाचामगोचरः ॥
कायेन मनसा वाचा परां वाचं नमामि ताम् ॥ २ ॥
न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्रभवते नमः ॥ ३ ॥

सदाचारानुमितश्रुतिबोधितकर्त्तव्यताकं प्रारिप्सितप्रतिबन्धकविघ्नविघानकमिष्टदेवताकीर्त्तनरूपं सच्छब्दप्रयोगरूपञ्च मङ्गलमाचरन्नेव प्रयोजनाभिधेयसम्बन्धानाह ॥ सत्पक्षेति ॥ एषोऽनघो वाक्यदोषरहितः । विषयाशुद्धेः पूर्वार्द्धेनैव निरासात् । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः समस्तरूपोपपन्नलिङ्गबोधकवाक्यजातम् । स एवाह्लादकतया प्रसूनम् । तदेवाऽवान्तरवाक्यघटितत्वेन अञ्जलिः । मम चेतः, अविघ्नं यथा स्यादेवं रमयतु दुःखसामग्रीहीनं करोतु । ईशस्य पदयुगे रमयतु तदेकाग्रं करोत्विति वा । मनः कीदृ-

शम् ? ॥ भृङ्गायमाणम् ॥ भृङ्ग इव मकरन्दे संसारिणां दुःखविगमोपाये सतृष्णम् ॥ भ्रमद् अनुसरत् ॥ दुःखविगमोपायम् इत्यर्थात् । तत्र सतृष्णस्य तदन्यानुसरणानौचित्यात् । तत्साधनानुसरणस्यापि तदर्थतया तदनुसरणरूपत्वात् । परदुःखं दृष्ट्वा दुःखितस्य कारुणिकस्य तन्निदानोच्छेदे तृष्णा भवत्येवेत्यनुभवसिद्धम् । यद्वा, मम चेतो रमयतु सफलयतु । परोपकारकरणाद्, भृङ्गायमाणमुपकारलुब्धम् । भ्रमत् दुःखिनमुपकर्तुं व्याप्रियमाणमित्यर्थः । तथापि भूयसो धूमादिविषयस्य न्यायस्य सत्त्वात् किमनेनेत्यत आह– ईशस्य पदयुगे, पद्यते ज्ञायतेऽनेनेति व्युत्पत्त्या प्रत्यायकयुगे प्रमाणतर्करूपे निवेशितस्तद्विषये उत्पादितः । अन्वयि व्यतिरेकि वा पदयुगम् । वेदस्य पौरुषेयत्वे केवलस्य व्यतिरेकिणोऽपि दर्शयिष्यमाणत्वात् । यद्वा, पदं ज्ञानं तद्युगं तदुभयोत्पादितम् । निमित्तसप्तम्या ज्ञानद्वयार्थमित्यर्थः । प्रमाणान्तरव्युत्पादनस्याप्यत्र तदर्थत्वादिति भावः । न तु शब्दानुमानरूपं पदयुगमत्र विवक्षितम् । श्रुतौ हि—इत्यादिना तदतीतत्वोपदर्शनविरोधात् । ग्रन्थे च शब्दोपदर्शनस्याऽनुमाने तदऽविरोधमात्रप्रदर्शनतात्पर्य्यकत्वात् ॥ अनघत्वं न्यायानामुपपादयन्नाह॥सत्पक्षेति॥सति प्रामाणिके,पक्षे सिषाधयिषितसाध्यधर्म्मके धर्म्मिणि, प्रकर्षेण सरो ज्ञानं यस्मात्।अनेनाश्रयासिद्धिबाधसिद्धसाधनस्वरूपासिद्धिभागासिद्धयो निरस्ताः । तर्कपक्षे, सन् निर्दोषः पक्षप्रसरः पक्षव्यापकोऽनिष्टप्रसञ्जनरूपस्तर्को यस्मात् । सतां परामर्शकुशलानां परितः सपक्षे सत्तया विपक्षे चासत्तया यो मलः सम्बन्धो व्याप्तिरूपस्तस्य यः प्रोद्बोधः अबाधितप्रतिबन्धनिश्चयः साध्यसाधनयोः, साध्याभावसाधनाभावयोर्वा, आपाद्यापादकयोश्च । तेन बद्धः स्थिरीकृत उत्सव आनन्दो येन स तथा । नित्यसापेक्षत्वादसमर्थेऽपि समासः । तेनान्वयव्यतिरेकिणि सपक्षासपक्षयोः सत्त्वासत्त्वे, केवलव्यतिरेकिणि च विपक्षासत्त्वं दर्शितमिति व्याप्यत्वासिद्धिसव्यभिचारविरुद्धनिरासः । विमर्दनं तद्विपर्य्यीभूतप्रमाणविरोधिप्रमाणप्रदर्शनम् । तेन न विम्लानो न कार्य्याक्षम इति सत्प्रतिपक्षविरहो दर्शितः ॥

ननु तथाविधप्रमाणव्युत्पादनं न स्वतः प्रयोजनं, प्रयोजनवत्सन्निधावश्रवणाच्च न तदङ्गमित्यत आह ॥ अमृतेति ॥ अमृतं मोक्षः । तत्र रस इच्छा । रस्यमानममृतमिति यावत् । कृदभिहितो भावो द्रव्य-

वत् प्रकाशते इति न्यायात् । तस्य प्रस्यन्दोऽसम्बद्धसम्बन्धोपहिता क्रिया।उत्पत्तिरिति यावत् । तदेव माध्वीकं मधु ।तस्य भूरुत्पत्तिस्थानम् । रसपदेन स्वरूपत इष्यमाणतां दर्शयता, दुःखाभावोऽपि नावेद्यः पुरुषार्थ इति निरस्तम् । माध्वीकपदेन चोत्कटेच्छाविषयत्वं दर्शयता, सुखहानावपि तुल्याऽऽयव्ययतया नायमऽपुरुषार्थ इति दर्शितम् । अमृतं मोक्षः । तस्य रस इच्छा । तस्य प्रस्यन्दः प्रवाह उत्तरोत्तराऽनुवृत्तिः । स एव माध्वीकम् । तस्य भूरुत्पत्तिस्थानम्—इति तु न व्याख्यानम् । मोक्षेच्छायाः पूर्वं मोक्षज्ञानादेव सञ्जातत्वाद्, उत्तरोत्तरानुवृत्तेरपि उत्तरोत्तरज्ञानसाध्यत्वात् । एतावता मोक्षजनकेश्वरविषयानुमितिकरणलिङ्गपरामर्शविषयलिङ्गप्रतिपादनद्वारा मोक्षानुकूलत्वमस्य दर्शितम् ॥

अथ च, न्याय इव प्रसूनाञ्जलिरञ्जलिस्थानि कुसुमानि । तत्रानघत्वं न्यायोपात्तत्वमपर्य्युषितत्वादि च । रूपकपक्षेऽपि न साधर्म्यं विना तदिति तदुभयसाधर्म्यमाह ॥ सत्पक्षेति ॥ पचि व्यक्तीकरणे इति धात्वनुसारात् पक्षशब्दो दलवचनः । सत्पक्षाणां प्रसरो यत्र । सतां पक्षेणानुकूलेन रविकिरणादिना विकाशो यस्येति वा । तेन हस्तादिना कलिकाप्रकाशो निषिद्धः । यद्वा, सत्पक्षप्रसरः सदनुकूलविकाशः । सतां सुकृतिनामनुपहतघ्राणानां, परिमलः सौरभविशेषः, तस्य यः प्रोद्बोधः प्रकृष्टज्ञानम् । तेन बद्धः स्थिरीकृत उत्सवो येन स तथा । विमर्दने करपुटसम्पर्के न विम्लानो नान्यथाभूतसंस्थानः । अमृतप्रायो रसः । तं प्रस्यन्दते इति प्रस्यन्दः । कर्मण्यण् । अमृतरसप्रस्यन्द एव माध्वीकम् । तस्य भूरुत्पत्तिस्थानम् । यद्वा, अमृतमिव रसो यस्य।प्रस्यन्दते इति प्रस्यन्दः।अनयोः कर्मधारयः ॥१॥

ननु कर्मसु विद्यमानेषु जन्मानुच्छेदात्, तेषां चाभुक्तानाम् अक्षयाद् भोगेन च तद्धेतुना पुनः कर्मान्तरार्जनात् क्वाशेषगुणोच्छेदो मोक्षः । नापीश्वरे प्रमाणव्युत्पादनस्य मोक्षहेतुत्वे मानमिति तन्निष्फलम् । किञ्च, ईश्वरमननस्य मोक्षहेतुत्वे मानाभावः । आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्त्तव्य इति श्रुतौ सामानाधिकरण्याद् यद्विषयकः साक्षात्कारो मोक्षजनकस्तद्विषयकं मननं मोक्षहेतुः । साक्षात्कारश्च न जीवात्ममात्रगोचरो, न वेश्वरविषयकस्तथा । मिथ्याज्ञानध्वंसद्वारा ह्यस्य तद्धेतुत्वम् । न च

भावेन परप्रकाश्यत्वानुपपत्तेः। एतदुभयं वेदान्तिसाधारणम् ॥ आदीति ॥ आदौ प्रथमतो विद्वांश्चिद्रूपः स्वभावतश्चेतनो, न तु प्रकृतिवच्चेतनोपरागादौपाधिकं चैतन्यं तस्येत्यर्थः । सिद्धो नित्यो, न तु बुद्ध्यादिवत् साध्यः। तेन कूटस्थनित्यो, न तु प्रकृतिवत् परिणामिनित्य इत्यर्थः। एतच्च सकलक्षेत्रज्ञसाधारणत्वान्न परमात्मोत्कर्षाभिधायकमित्यन्यथा व्याख्येयम्। आदौ सर्गादौ, विद्वान्। सिद्धो योगर्द्धिसम्पदुत्पादिताष्टविधैश्वर्य्यसम्पद्युक्त इत्यर्थः । यथोक्तं तत्त्वकौमुद्यां वाचस्पतिमिश्रैः– सर्गादावादिविद्वानऽनुभवन् कपिलो महामुनिर्धर्म्मज्ञानैश्वर्य्यसम्पन्नः प्रादुर्बभूवेति स्मरन्तीति ॥ क्लेशेति ॥ अविद्यास्मितारागद्वेषाभिनिवेशाःक्लेशाः। कर्म्म धर्म्माधर्म्महेतुर्भावनासाध्यं यागहिंसादि । विपाको जात्यायुर्भोगाः । फलपर्य्यन्तमाशेरत इत्याशया धर्म्माधर्म्माः। तैरपरामृष्टोऽसम्बद्ध इत्यर्थः। शरीरैकनिष्पाद्यवेदादिनिर्म्माणार्थं कायो निर्म्माणकायः। सम्प्रदीयते गुरुणा शिष्यायेति सम्प्रदायो वेदः। स चानादिरेव भगवता द्योत्यते। भगवतश्चादृष्टाभावेऽपि तच्छरीरसाध्यघटादिजन्यभोगजनकास्मदाद्यदृष्टैरेव तन्निष्पाद्यते ॥ अनुग्राहको घटादिनिर्म्माणे शिक्षाद्वारेत्यर्थः ॥ लोकेति ॥ लोकविरुद्धैः सर्प–दहनधारणादिभिः, वेदविरुद्धैर्दारुवनद्विजवधूविध्वंसनैरुपलक्षितः । इत्थम्भूतलक्षणे तृतीया। सोऽयमित्थम्भूतोऽपि निर्लेपः, पापरूपलेपरहित इत्यर्थः। करणे वा तृतीया। वेदविरुद्धहेतुक–भोगजनकविशेषगुणरहित इत्यर्थः । स च सुखं दुःखं धर्म्माधर्म्मौ चेति । मिथ्याज्ञानसलिलावसिक्तायामात्मभूमौ कर्म्मबीजं धर्म्माधर्म्माङ्कुरमारभते, न तु तत्त्वज्ञाननिदाघनिपीतसलिलतयोपरायामिति भावः ॥ स्वतन्त्रो जगत्कर्त्ता ॥ शिवो निस्त्रैगुण्यः। पुरुषोत्तमः सर्व्वज्ञत्वात्। पितामहो जनकस्यापि जनकः। यज्ञे प्रधानमिज्यं यज्ञपुरुषः। सर्वज्ञः क्षणिकसर्वज्ञः॥ निरावरण इति॥ आवरणमदृष्टमविद्या स्वकर्म्मोपार्ज्जितञ्च शरीरमस्य नास्तीत्यर्थः॥ उपास्यत्वेनेति॥ वेदोपदिष्टोपास्यभावः कश्चिन्मन्त्रादिरित्यर्थः॥ लोकेति॥ यथा लोके व्यवह्रियते चतुर्भुजाद्युपेतदेहवान्,तत्वदृश्य इत्यर्थः। यावदुक्तेति ॥ यावदुक्तेषु यदुपपन्नं युक्तिमत् सर्वज्ञत्वादि, तेनोपपन्नः सम्पन्न इति मध्यपदलोपी समासस्तत्पुरुषः । यावदुक्तेषु उपपन्नः प्रामाणिको धर्म्मो यस्येति बहुव्रीहिर्वा । न तु यावद्भिरुक्तैरुपपन्नः

सहित इत्यर्थः। अद्वैताद्यनङ्गीकारेण यावद्यथाव्याख्यातार्थस्य नैयायिकैरनङ्गीकारात्। यद्वा, सन्देह एव कुत इत्युपसंहारात् सर्वाण्येव दर्शनान्येकार्थपरतया व्याख्यायन्ते। शुद्धो दोषहीनः, बुद्धस्वभावो घटादिभिन्नत्वे सत्यौपाधिकचैतन्यरहितः, आदौ सर्गादौ, विद्वान् ज्ञानवान्, सिद्धो नित्यः, सम्प्रदायप्रद्योतको वेदं प्रणीय सर्गादिसमुत्पन्नाध्यापकः, अनुग्राहकः कुलालादिकृतेऽपि घटादौ सहकारीत्यादिक्रमेण। नचैवमैकमत्येन दर्शनभेदानुपपत्तिः। फलैकमत्येऽपि प्रकारभेदात् सर्वथा विरोधाभावे विचारोपयोगिसंशयस्याप्यभावप्रसङ्गात्। यद्यपि मीमांसकानीश्वरसांख्यमते नेश्वरे सम्प्रतिपत्तिः, तथाप्युपास्यत्वेन धर्म्मिणि सम्प्रतिपत्तिरस्त्येव। कारुः शिल्पी। विश्वं सर्व्वमुत्पत्तिमत् कर्म्म कार्य्यं यस्य स तथा। जातिर्ब्राह्मणादि। गोत्रं काश्यपादि। ऋषय एव यज्ञे व्रियमाणाः प्रवराः। चरणं शाखा। अनुभावोऽसाधारणं कार्यं वेदादि। अत एव, भवन्त्यस्मादिति भवः। तथाच, जातिगोत्रादिवत् संसारमभिव्याप्य श्रुत्यादिप्रमाणसिद्धे परमात्मनि न सन्देहोऽतस्तत्रेश्वरे किं निरूपणीयमित्यर्थः। तथापि धर्म्मिणि भगवति विहितमनने प्रकाराकाङ्क्षायां तत्र विप्रतिपत्त्या सन्देहोऽस्तीति मनसिकृत्य मननरूपोपासनैव क्रियते इति समाधत्ते॥ तथापीति॥

न्यायेन चर्चा न्यायचर्चा अनुमितिरूपा, उपासनैवेति सम्बन्धः। श्रवणानन्तरागतेत्यनेन श्रुतिप्रामाण्यग्राहकन्यायनिरूपणमपि सूचितम्। श्रवणानन्तरागतेति संगृहीतं विवृणोति॥ श्रुतो हीति॥ श्रुतिमूलकत्वात् स्मृतेरपि तत्समानविषयतया स्वबोधदार्ढ्यार्थं श्रवणे उपयोग उक्तः। उत्तमो योग आत्मसाक्षात्कारः। ननु भगवति सन्देहाऽभावेन सिद्धसाधनात् कथमनुमितिः ? । सिद्धसाधनं स्वार्थानुमाने न दोषः। प्रमाणसम्प्लवस्य संस्थापनादितिचेद्, न। विनिगमकाभावात्। ग्रन्थस्य परार्थानुमानरूपत्वाच्च। यथा अग्निहोत्रं जुहोति, यवागूं पचतीत्यत्रार्थेन क्रमेण शाब्दः क्रमो लङ्घ्यते। तथा, श्रोतव्यो मन्तव्य इत्यत्रापि मननानन्तरं श्रवणे श्रुतेस्तात्पर्य्यमिति चेद्, न। दृष्टान्ते, होमे द्रव्यान्तरसाधनत्वं यवागूपाकस्यादृष्टार्थत्वञ्च कल्प्यमिति गौरवात्तथाऽस्तु, प्रकृते त्वनुपपत्त्यभावः। श्रवणानन्तरं मननस्यान्यथोपपाद्यत्वात्। श्रवणानन्तरागतेति ग्रन्थविरोधाच्च। श्रोत-

ध्यः श्रुतिवाक्येभ्यइति बहुवचनं, कपिञ्जलानालभेतेतिवत् त्रित्वपरम्। अतो रूपान्तरेण मननमविरुद्धमिति चेन्न। श्रोतव्योमन्तव्य इति सामानाधिकरण्यश्रुतेर्लाघवाच्च येनैव रूपेण श्रवणं तेनैव रूपेण मननस्योचितत्वात्। न वा रूपान्तरेण श्रुतस्य रूपान्तरेण मनने श्रद्धामलक्षालनं शास्त्रव्यापारो निर्वहति। श्रुतस्यामननात्। अत एव,धर्मिस्वरूपे सन्देहाभावेऽपि क्षितिकर्तृत्वादौ धर्मे सन्देहात्तत्रानुमेत्यपास्तम्। तथापि धर्मिणि सन्देहानुपपादनाच्च। न वा, तद्रूपमस्तीश्वरे, यन्न वेदे श्रुतमस्ति। तथाच, श्रोतव्यः श्रुतिवाक्येभ्य इत्यत्रासङ्कोचादीश्वरपरसर्ववाक्येभ्य एव श्रवणे सति कथं मननम्। एतेन, भगवति भवे सन्देह एव किं निरूपणीयमिति,कुतः = पृथिवीतः कर्तृजन्यत्वसंशयात्तत्र संशय एवेत्यपि योजनामात्रमपास्तम्। यत्तु, श्रुतेऽपि भगवति श्रुतेः प्रामाण्यसन्देहात्तत्प्रतिपादितेऽपीश्वरे सन्देह इति। तन्न। श्रोतव्यो मन्तव्य इति सामानाधिकरण्यविरोधात्। मननस्य प्रामाण्यविषयकत्वात्। यदि च श्रुतिरनवधृतप्रामाण्यैव, तदा कथं ततः श्रवणेऽपि बह्वायाससाध्ये प्रवृत्तिः। तथात्वेऽपि वेदप्रामाण्यानुमानमात्रौचित्यादीश्वरानुमानानुपपत्तिः॥

अथ सिद्धसाधनं, न हेत्वाभासः। उभयथा हि हेत्वाभासता, करणविघटकत्वाद्विरुद्धानैकान्तिकयोरिव, तद्विघटनमकुर्वतः स्वत एव प्रतिबन्धकत्वाद्बाधप्रतिरोधवत्। सिद्धसाधनन्तु न व्याप्तिविघटकं, न वा स्वत एव प्रतिबन्धकम्। अतो न हेत्वाभासः। दूषकता त्वर्थान्तरान्तर्भावादिति मतम्। तन्न। व्याप्तिज्ञानस्येव पक्षधर्मताज्ञानस्यापि तत्कारणत्वात् तद्विघटकसिद्धसाधनस्यापि तदौचित्यात्। पक्षधर्मताज्ञानं न तत्करणं किन्तु व्याप्तिज्ञानमिति चेन्न। लाघवात् कारणमात्रस्य प्रयोजकत्वात्।श्रुतिबोधितेऽपि भगवति बहुविधकर्तृत्वकौटस्थ्यनिरञ्जनादिश्रुतेः, कुत्र श्रुतिर्मुख्यार्था, कुत्र वोपचरितार्थेति तात्पर्य्यसन्देहात् सन्देह इतिचेन्न। तथापि धर्मिस्वरूपे संशयानुपपादनात् तात्पर्य्यग्राहकन्यायाभिधानमात्रस्योचितत्वात्। कर्तृत्वादौ सन्देहादुत्कटकोटिको धर्मिण्येव सन्देहोऽन्यथा धर्मी क्वाऽपि संशयविषयो न स्यादिति चेन्न। श्रोतव्यो मन्तव्य इत्यत्रात्मज्ञानस्य मोक्षहेतुत्वं, न तु तद्धर्मिककर्तृत्वादिनिश्चयस्येति तत्सन्देहस्यानुच्छेद्यत्वात्। तथापि निर्धर्मकस्य तस्य ज्ञातुमशक्यत्वात्तद्धर्म-

निश्चयोऽप्यादरणीय इति चेन्न। परस्पराविरुद्धप्रकारेण तच्चिन्तनोपपत्तेरिति दिक् ॥

अत्रोच्यते। साध्यज्ञानं न स्वतः साध्यज्ञानविरोधि। धारावाहिकसत्त्वात्। नापि साध्यानुमितिविरोधि। प्रत्यक्षाधिगतस्याप्यनुमितिदर्शनात्। किन्तु सिषाधयिषाघटितपक्षत्वविघटनद्वारा। सिषाधयिषा च साध्यज्ञानेच्छा। सा च द्वयी साध्यज्ञानमात्रे तद्विशेषे च। तत्र या साध्यज्ञानमात्रेच्छा सा श्रौतज्ञानान्निवर्त्तताम्। यत्किञ्चिद्विशेषसिद्धैव हि सामान्येच्छाविच्छेदः। अन्यथा सकलविशेषसिद्धेरसम्भवेन तद्विच्छेदः क्वापि न स्यादेव। या त्वनुमितिरूपसाध्यज्ञानविशेषेच्छा सा कथं निवर्त्तेत। तद्विषयस्य ज्ञानविशेषस्यासिद्धेः। इच्छायाः स्वविषयसिद्धिनिवर्त्यत्वात्। अत्र च, श्रोतव्यो मन्तव्य इति श्रुत्या मननस्येष्टसाधनत्वावगतेः श्रौते ज्ञाने वृत्तेऽपि मननस्याऽसिद्धत्वात् तत्रेच्छा भवत्येवेति न सिषाधयिषाविघटनद्वारकदूषणभावस्यसिद्धसाधनस्यावकाशः। इच्छाविषयत्वावच्छेदकरूपतत्सिद्धेः सिद्धपदेन विवक्षितत्वात्। अत एव सिद्धसाधनं दशाविशेषे दोषः, पृथक् च न दूषणम्। असिद्ध्युपजीव्यत्वेऽपि बाधवत् स्वतो दूषकत्वाभावात्, किन्तु दूषकतायामुपाधेरिव परमुखनिरीक्षकत्वात्। भवेदेवं यदि सिषाधयिषाघटितं पक्षत्वम्। तदेव न। तस्य विशेषणतोपलक्षणतयोरुभयत्रापि दोषात्। योग्यतायाश्च तदवच्छेदकरूपपरिचेयत्वादिति चेन्न। सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावस्य तत्त्वात्। स च विशिष्टाभावो यत्र साधकप्रमाणसिषाधयिषे स्तः तत्र विशेषणाभावात्। यत्रोभयाभावस्तत्र विशेष्याभावात्। यत्र साधकप्रमाणाभावे सिषाधयिषामात्रमस्ति तत्र द्वयाभावात् सर्वत्राविशिष्टः। यत्र साधकप्रमाणे सत्यपि सिषाधयिषाया अभावस्तत्र नास्तीत्यस्मत्पितृचरणाः। तथापि संशयं विना कथं न्यायावतार इति चेदित्थम्। संशयो हि न्यायाङ्गं न तावद् न्यायकारणतया। तस्य लिङ्गपरामर्शात्मनः संशयं विनाऽपि सम्भवात्। कारणत्वासिद्धौ फलवैजात्यस्यापि कल्पने मानाभावात्, अन्योन्याश्रयाच्च। नापि सहकारित्वेन। तद्धि न साक्षात्। लिङ्गपरामर्शादिना तन्नाशात्। शाब्दलिङ्गपरामर्शे तत्कारणत्वाभावाच्च संशयस्य कारणत्वासिद्धौ तत्कल्पनेऽपि मानाभावात्। अत एव परम्परयाऽपि सहकारित्वमपा-

स्तम्। नाप्याश्रयावच्छेदकत्वेन। पर्वतत्वादेरेव तथात्वात्। अन्यथा पक्षतावच्छेदक-धर्म-साध्ययोः सामानाधिकरण्यभाननैयत्येन पर्वतत्वादेरिव सन्दिग्धत्वस्याप्यनुमितौ भानापत्तेः। अथ संशयेन स्वयोग्यतोपलक्षणात् साधकबाधकमानाभावो न्यायाङ्गमिति चेन्न। तथापि संशयस्यातत्त्वात्। संशययोग्यतायास्तदङ्गत्वाद् विशिष्टस्य तद्ग्राहकमानेन विशेषणस्यापि तत्त्वं विषयीकृतमिति चेन्न। मिलिताभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात्। प्रत्येकञ्च न योग्यता। केवलान्वयिनि बाधकाप्रसिद्धेश्चेत्यन्यत्र विस्तरः। तथापि, संशयस्यानुमितिमात्राहेतुत्वेऽपि जिज्ञासितार्थानुमितौ जिज्ञासाद्वारा संशयस्यानुमितिहेतुत्वम्। यद्वा, शङ्कुकतानिवृत्तये न्यायोपासने संशयोऽङ्गमिति संशयं विना यो न परितुष्येत् तं प्रति, श्रोतव्यो मन्तव्य इति श्रुतेरनन्यगत्या भिन्नविषयक एव धर्मविशेषसंशयो धर्मिविषयक न्यायप्रवृत्तिहेतुरित्यास्थेयमिति विभावयंस्तत्कारणं विशेषविप्रतिपत्तिमादर्शयति—

**तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः। अलौकिकस्य परलोकसाधनस्याभावात्। अन्यथापि परलोकसाधनानुष्ठानसम्भवात्। तदभावावेदकप्रमाणसद्भावात् सत्त्वेऽपि तस्याप्रमाणत्वात्, तत्साधकप्रमाणाभावाच्चेति ॥**

**तत्र न प्रथमः कल्पः। यतः।**

**सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः ॥**
**प्रत्यात्मनियमाद् भुक्तेरस्ति हेतुरलौकिकः ॥ ४ ॥**

**न ह्ययं संसारोऽनेकविधदुःखमयो निरपेक्षो भवितुमर्हति। तदा हि स्यादेव न स्यादेव वा, न तु कदाचित् स्यात्। अकस्मादेव भवतीति चेन्न।**

तदिहेति ॥ तदिति वाक्योपक्रमे। संक्षेपोऽवान्तरविप्रतिपत्त्यविवक्षा। विरुद्धा प्रतिपत्तिर्नानमतोऽभिलापो वा विप्रतिपत्तिः। विप्रतिपत्तौ

विषयिण्यां विषयस्य प्रयोजकत्वं विवक्षित्वा पञ्चमीनिर्देशः । तत्राऽलौकिके तावत्, साक्षात्कारकारणेन्द्रियसन्निकर्षाश्रयत्वं प्रमेयत्वव्यापकं, न वा ? इन्द्रियस्य तु न सन्निकर्षाश्रयत्वं, किन्तु प्रतियोगित्वमिति न विप्रतिपत्तिः । य एव चक्षुषा रूपस्य संयुक्तसमवायः स एव गुरुत्वस्यापीति तस्यापि लौकिकत्वापत्तेः । किन्तु सामान्यलक्षणप्रत्यासत्त्यजन्ययोगजधर्माजन्यस्वविषयकसविकल्पकाजन्यजन्यसाक्षात्कारविषयत्वं प्रमेयत्वव्यापकं न वा ? अभावसमवाययोस्तादृशप्रतियोगिसंबन्धिसविकल्पकजन्यसाक्षात्कारविषयत्वेऽपि प्रत्यक्षत्वात् तत्संग्रहार्थं स्वविषयेति विशेषणम् । अत्र यद्यपि घटोऽयमिति सविकल्पके घटत्वस्य तत्कारणज्ञानविषयताऽस्ति, तथापि तज्ज्ञानाऽजन्यनिर्विकल्पकविषयताऽप्यस्ति । न हि तज्ज्ञानजन्यज्ञानगोचरत्वं तज्ज्ञानाजन्यज्ञानगोचरताविरोधि । एकत्र ज्ञानद्वयस्य भावादित्याहुः ॥

अलौकिकविशेषे त्वदृष्टे प्रयत्नकारणात्मविशेषगुणनिरुपाधिविषयकारणात्मविशेषगुणत्वं मानसप्रत्यक्षाविषये वर्त्तते नवा ? यद्वा, लौकिकप्रत्यक्षाविषयगुणत्वसाक्षाद्व्याप्यजात्यधिकरणत्वमात्मगुणे वर्त्तते, न वा ? भावनात्वन्तु न गुणत्वसाक्षाद्व्याप्यमदृष्टत्वन्तु न जातिः ॥

परलोके तु, समानकालीनानेकावृत्ति शरीरवृत्तिजातित्वं दुःखावच्छेदकत्वासमानाधिकरणवृत्ति न वा ? इति स्वर्गे । नरके तु दुःखपदस्थाने सुखपदप्रक्षेपात् संशयः । तादृशी च जातिर्बाल्यादिशरीरवृत्तिरसाधारणी चैत्रत्वादिः प्रसिद्धेति विशेषतः । परलोकमात्रे तु सुखदुःखोभयजनक–मच्छरीरातिरिक्तशरीरवानहं न वेति संशयः । चैत्रस्तथा प्रसिद्धः ॥

साधने तु प्रागभावत्वाद्यप्रतियोगि कार्यं प्रतियोगित्वप्रागभावान्यप्रागभावाविषयप्रतीत्यविषयप्रतियोगि, न वा ? यद्वा, कार्य्यप्रतियोगित्वं प्रतियोगित्वप्रागभावान्यप्रागभावाविषयबुद्ध्यविषयवृत्ति न वा ? द्वयोरपि प्रागभावत्वे प्रसिद्धिः । यद्वा, कार्य्यपूर्ववर्त्तिनि तन्नियतत्वं वर्त्तते, न वा ? यद्वा, तज्जातीयोत्पत्तिप्राक्क्षणत्वप्रतियोगिव्यापकतावच्छेदकत्वमत्यन्ताभावप्रतियोगिवृत्ति न वा ? ॥

विशिष्टे तु, अलौकिके परलोकसाधनत्वं वर्त्तते, न वा ? परलोकसाधनेऽलौकिकत्वं वर्त्तते न वेति विप्रतिपत्तिः । तथाच कार्य्यकारण-

भावाभावे क्षित्यादिकर्त्तृत्वान्नेश्वरसिद्धिः। परलोकाभावे च तत्साधनयागादिद्रष्टुरभावे तदुपदेशकतयाऽपि नेश्वरसिद्धिः। अदृष्टाऽसिद्धौ तदधिष्ठातृतयाऽपि नेश्वरसिद्धिरिति चार्वाकाभिप्रायः॥

अन्यथेति॥अदृष्टादिसत्त्वेऽपि वेदानामाप्तोक्तत्वेन प्रामाण्यावधारणं विना तद्बोधितस्वर्गादिसाधनयागादौ बहुवित्तव्ययायाससाध्ये न प्रवृत्तिरित्याप्तो वेदकारः सिद्ध्यतीति नास्ति, अन्यथाऽपि वेदानां नित्यनिर्दोषत्वेन स्वतः प्रामाण्यावधारणात्। परतः प्रामाण्येऽपि कर्मयोगसिद्धसर्वज्ञपूर्वकत्वात्तेषां परलोकसाधनयागाद्यनुष्ठानसम्भवादित्यर्थः॥ तदभावेति॥ भवतु वेदानां पौरुषेयत्वाद् योगसिद्धसर्वज्ञपूर्वकत्वेनाश्वासाच्चाप्तोक्तत्वम्। तथापि तत्र, क्षित्यादेः कर्तृजन्यत्वे च प्रत्यक्षादिबाधान्न तत्सिद्धिरित्यर्थः॥ सत्त्वेऽपीति॥ बाधकाभावात्तत्सिद्धावपि स न प्रमाणम्। प्रमाणपदं हि भावकरणकर्त्तृव्युत्पत्त्या प्रमातत्साधनतदाश्रयेषु वर्त्तते। यथार्थानधिगतार्थाधिगतिश्च प्रमा। तथा च यदीश्वरः कर्त्ता स्यात् प्रमावांस्तत्करणेन्द्रियादिमांस्तत्समवायिकारणञ्च स्यात्। न चायं तथेति विपर्य्ययानुमानादित्यर्थः। अप्रमाणपुरुषस्य वचः कः श्रद्धास्यतीति भावः॥तत्साधकेति॥कार्यत्वादेरुपाधिदुष्टत्वात् क्षितिवेदादेः कर्त्तृजन्यत्वसाधकमेव नास्तीत्यर्थः॥

तत्र चार्वाकस्यायं भावः। कार्य्यकारणभावे प्रत्यक्षं न तावन्मानं, धर्मिस्वरूपप्रत्यक्षेऽपि तत्र संशयात्। नचान्वयव्यतिरेकानुविधानज्ञानसहकारिविरहात् स इति वाच्यम्। तन्मात्रस्य व्यभिचारिसाधारण्यात्। नियमानन्यथासिद्ध्योश्च शङ्काकलङ्कितत्वेनानवधारणात्। नाप्यनुमानं, तस्य मया मानत्वेनानभ्युपगमात्। तत्साधने क्वचिद्ऽसिद्धावन्वयिनोऽसम्भवात्। तदप्रसिद्धौ व्यतिरेकाज्ञानात् केवलव्यतिरेक्यनवतारात्। मम त्वप्रमितस्यासत्ख्यात्यभ्युपगमान्न निषेध्याप्रसिद्धिरित्यत आह ॥ तत्रेति॥ तेषु मध्ये न प्रथमः पक्षः कल्पो यतः, कल्पनाऽसत्ख्यातिस्तद्विषयः। तथाहि, कार्य्यकारणभावानभ्युपगमे परप्रतिपत्तिफलकवचनप्रयोगानुपपत्तेः। यथा यथा तन्निराकरणाय प्रयत्नस्तथा तथा तस्यैवापत्तेरिति व्याघात एवेत्यर्थः।

तथापि साधकं विना न तत्सिद्धिरिति चेत्, तत्राह॥ सापेक्षत्वादिति॥ विवादपदस्य सापेक्षत्वात् सहापेक्षया वर्त्तमानत्वात् कादाचित्कत्वादित्यर्थः। तच्च किञ्चित्कालासंबन्धित्वे सति किञ्चित्काल-

संबन्धरूपं कार्य्याणां प्रत्यक्षसिद्धमित्यनन्यथासिद्धमेतत् । अस्माद-नन्तरमिदं भवत्येतदभावे नेति प्रत्यक्षमेव कार्य्यकारणभावे मानम् । अत एव प्रागभावस्य कादाचित्कत्वेऽपि न तत्र तत्सिद्धिः । प्राग-सत्त्वस्य विवक्षितत्वाद्वा । अपि च, इदमस्मान्नियतपूर्वसदित्यपि प्र-त्यक्षं तत्र मानम् । प्रत्यक्षे चानन्यथासिद्धिनियमांशाऽवधारणहेतु-शङ्कानिवर्त्तकस्तर्को दर्शयिष्यतेइतिभावः। यद्वा, प्रत्यक्षसहकारित्वेना-ऽनुमानमेवोपन्यस्तम् । यद्वा, प्रथमतोऽनुमानप्रामाण्यं प्रसाध्य कार्य्यं सहेतुकं कादाचित्कत्वात् । यन्नैवं, तन्नैवम् । यथाऽऽकाशम् । न च साध्याप्रसिद्धिः । कियद्भागे प्रत्यक्षेणैव तत्सिद्धौ तदविषयेऽनुमाना-त् । नचोत्पत्तेः कादाचित्कत्वेऽपि न सहेतुकत्वम् । तथात्वे वोत्पत्तिम-त्त्वापत्तावनवस्थेति वाच्यम् । कार्य्यस्याद्यक्षणेन सह स्वरूपसंबन्ध एव ह्युत्पत्तिः । कार्य्यक्षणस्वरूपयोश्चोत्पत्तिमत्त्वेन हेतुमत्त्वात् । यद्वा, उत्पत्तिगर्भः किञ्चित्समयसंबन्धः कादाचित्कत्वम् । अत एव न प्रागभावे व्यभिचारः । न चोत्पत्तेरुत्पत्तिमत्त्वेन हेतुमत्त्वात् स इति न तया व्यभिचारः । एतेनानुमानपक्षे, हेतुरस्ति सापेक्षत्वाद्– इत्यत्र हेतोरसिद्धावाश्रयासिद्धिः । सापेक्षत्वस्य कार्य्यधर्मत्वेन हेताववृत्तौ स्वरूपासिद्धिश्च । कार्य्यस्यैव पक्षत्वे, सापेक्षत्वादित्यस्य हेतुमत्वा-दित्यर्थे साध्याविशेषः । कादाचित्कत्वादित्यर्थे च प्रागभावेन व्यभि-चार इत्यपास्तम् ॥

ननु हेतुरपि यदि सदातनस्तदा तत्सापेक्षस्य कार्य्यस्यापि तथा-त्वापत्तिरिति कादाचित्कत्वमहेतोरिवाकाशादेः सहेतोरपि सपक्षात् व्यावृत्तमित्यसाधारणं स्यादिति हेतुः कादाचित्को वाच्यः । तथा च तस्यापि कादाचित्कत्वं हेत्वपेक्षयेत्यनवस्थापत्तिः । अहेतुकत्वे च तद्वदेव कार्य्यमप्यहेतुकं कादाचित्कं स्यादित्यत आह ॥ अनादित्वा-दिति ॥ हेतोरपि कादाचित्कत्वं स्वहेतुकादाचित्कत्वादेव । प्रामाणि-की चेयमनवस्था बीजाङ्कुरवन्न दोषायेत्यर्थः ॥

ननु कारणमात्रसिद्धावप्येकमेकजातीयं वा कारणमस्तु कार्य्य-जातस्य । तच्चास्मदादिनैव शक्यज्ञानमिति न तदर्थमुपदेशो, न वा विलक्षणसामग्रीजन्यं कार्य्यं सिद्ध्यतीत्यत आह ॥ वैचित्र्यात् ॥ भिन्न-जातीयकारणानन्तरं तथाभूतकार्य्यविषयकं प्रत्यक्षमेव विचित्रे साधने मानमुपन्यस्तम् । यद्वा, वैचित्र्यं कार्य्यस्य विचित्रहेतुकत्वे

लिङ्गमेव । उभयत्राप्यभिन्नत्वाभिन्नजातीयत्वयोर्हेत्वोः कार्य्यस्य भेद-विजातीयत्वे आकस्मिके स्यातामिति तर्कः सहकारीत्यर्थः ॥

तथापि दृश्यमानविचित्रहेतुकमेव कार्य्यमस्त्विति नादृष्टसिद्धि-रित्यत आह ॥ विश्ववृत्तितः ॥ विश्वेषां प्रेक्षावतां परलोकार्थितया यागादौ प्रवृत्तिः प्रेक्षावत्प्रवृत्तित्वेन सफला । फलसाधनत्वञ्च यागा-देराशुविनाशित्वेन न स्यादिति तज्जन्यफलानुकूलमदृष्टं कल्प्यते इत्यर्थः ॥

तथापि तददृष्टं भोग्यनिष्ठमुत भोक्तृनिष्ठम्? । अन्त्येऽपि किं प्रतिभोक्तृनियतं, साधारणं वा? इत्यत आह ॥ प्रत्यात्मेति ॥ भुक्तेः सुखदुःखसाक्षात्कारस्य प्रत्येकात्मनियतत्वाल्लाघवाच्च तदुपपादकं प्रतिभोक्तृ नियतमेवादृष्टं कल्प्यते इति, अस्ति हेतुरलौकिक इत्याद्य-स्तवकार्थसंग्रहः ॥

यथोक्तप्रत्यक्षानुमानयोरन्यथासिद्धिनिरासाय तर्कमाह ॥ न ह्य-यमिति ॥ अनेकविधेति ॥ मुमुक्षुवैराग्यार्थं कार्य्यवैचित्र्यस्फोरणार्थं वा । तच्च विचित्रादृष्टसाधनोपयुक्तम् । निरपेक्षत्वञ्च किञ्चित्पदार्था-ऽवधिकोत्तरत्वव्याप्यकालसम्बन्धित्वम् । न च प्रतियोग्यप्रसिद्धिः । तस्यासत्ख्यातिवादिनः सांव्यवहारिकस्य सापेक्षत्वस्यापि स्वीकारात्॥

ननु, निरपेक्षत्वेनैकेन व्याप्येन स्यादेव, न स्यादेवेतिरूपं व्यापक-द्वयं विरुद्धं कथमापाद्यते । न ह्येकं मिथोविरोधिद्वयव्याप्यम् । तु-शब्दश्चासङ्गतः । कादाचित्कत्वाभावस्य स्वतन्त्रस्यैवानिष्टापादनार्थ-त्वात् । अत्राहुः । निरपेक्षत्वेन कादाचित्कत्वव्यतिरेक एवापाद्यः । स च स्यादेव, न स्यादेवेति पक्षद्वये पर्य्यवस्यति । अत एव तुशब्दोऽपि सङ्गच्छते । यद्वा, कार्य्यं यदि निरपेक्षं स्यात्, स्यादेव नित्यं स्यादा-काशवदिति स्वमते । तन्मते तु न स्यादेव केवलान्वय्यत्यन्ताभाव-प्रतियोगि स्यात् खपुष्पवत् । उभयत्र तु कादाचित्कत्वं न स्यादिति। यद्वा, एतदुत्तरकालानुत्पत्तिकोऽयं घटो यद्येतदुत्तरकालानुत्पत्तिकत्वे सत्येतत्पूर्वकालोत्पत्तिकानपेक्षोत्पत्तिकः स्यादेतत्पूर्वकालवृत्तिः स्या-त् । यद्वा, यद्ययमेतत्कालीनोत्पत्तिको घटः सहेतुको न स्यादेतत्पूर्व-कालीनः स्यात् । यद्वा, घटो यदि घटव्यवहितकालानधिकरणपदा-ऽर्थाधिकरणक्षणोत्तरत्वव्याप्योत्पत्तिर्न स्याद्, घटव्यवहितकालःस्यात् तत्कालवृत्तिघटादिवदिति तत्र तत्र सत्त्वापादनं स्यादेवेत्यस्यार्थः ।

अन्यकालानुत्पत्तिकोऽयं घटो यद्येतत्पूर्वकालानपेक्षोत्पत्तिकः स्यादेतत्कालोत्पत्तिको न स्यात् ।
यद्वा, सकलकालावृत्तिरयं घटो यदि निरपेक्षः स्यात् किञ्चित्कालाऽवृत्तित्वे सति किञ्चित्कालवृत्तिर्न स्यात् । तेन पक्षविशेषणमहिम्नाऽलीकत्वं सिद्ध्यति । यद्वा, एतावत्कालपूर्वापरकालावृत्तिर्घटो यद्येतावत्कालपूर्वकालावृत्तित्वे सति एतत्कालाव्यवहितपूर्वकालवृत्तिपदार्थाधिकरणक्षणोत्तरत्वव्याप्यकालो न स्यादेतावत्कालवृत्तिर्न स्यादिति, न स्यादेवेत्यस्यार्थः । अत एव कालान्तरावृत्तित्वे सत्येतत्कालवृत्ति स्यादिति कादाचित्कत्वाभावापादनमपीति सम्प्रदायविदः ॥

कार्य्यकारणभावग्राहकमाने, कादाचित्कभावो निर्हेतुको भावत्वाद् व्योमवदिति सत्प्रतिपक्षं शङ्कते ॥ अकस्मादिति ॥ अत्र किंशब्दो यदा हेतुमात्रपरस्तदा तस्य नञा सम्बन्धाद्धेत्वभावे भवनं लभ्यते । यदा तु भवनक्रियाया नञा सम्बन्धस्तदा प्रसज्यप्रतिषेधे भवननिषेधोऽर्थः । किंशब्द—समस्यमानेनापि नञा भवतीत्यस्यान्वयात् । असामर्थ्येऽप्यसूर्य्यम्पश्या राजदारा इतिवत् समासः । अ—शब्दस्यैव वाऽयं समासं विना प्रयोगः । अ मा नो ना प्रतिषेधवचना इति कोषात् ॥

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ॥
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

हेतुनिषेधे भवनस्यानपेक्षत्वेन सर्वदा भवनमऽविशेषात् । भवनप्रतिषेधे प्रागिव पश्चादप्यभवनमविशेषात् । उत्पत्तेः पूर्वं स्वयमसतः स्वोत्पत्तावप्रभुत्वेन स्वस्मादिति पक्षानुपपत्तेः । पौर्वापर्य्यनियमश्च कार्य्यकारणभावः । न चैकं पूर्वमपरञ्च । तत्त्वस्य भेदाऽधिष्ठानत्वात् । अनुपाख्यस्य हेतुत्वे प्रागपि सत्त्वप्रसक्तौ पुनः सदातनत्वापत्तेः ॥

स्यादेतत् । नाकस्मादिति कारणनिषेधमात्रं वा,

भवनप्रतिषेधो वा, स्वात्महेतुकत्वं वा, निरुपाख्य-हेतुकत्वं वाऽभिधित्सितमपि त्वनपेक्ष एव कश्चिन्नि-यतदेशवन्नियतकालस्वभाव इति, ब्रूमः। निरवधित्वे अनियतावधिकत्वे वा कादाचित्कत्वव्याघातात्। न ह्युत्तरकालसिद्धित्वमात्रं कादाचित्कत्वं, किन्तु प्राग-ऽसत्त्वे सति। सावधित्वे तु स एव प्राच्यो हेतुरित्यु-च्यते। अस्तु प्रागभाव एवाऽवधिरितिचेन्न। अन्येषा-मपि तत्काले सत्त्वात्। अन्यथा तस्यैव निरूपणा-नुपपत्तेः। तथाच न तदेकावधित्वमविशेषात्। इत-रनिरपेक्षस्य प्रागभावस्यावधित्वे प्रागपि तदवधेः कार्य-सत्त्वप्रसङ्गात्। सन्तु ये केचिदवधयो, न तु तेऽपेक्ष्य-न्ते इति स्वभावार्थ इति चेत्। नापेक्ष्यन्ते इति कोऽर्थः। किं न नियताः, आहोस्विन्नियता अप्यनुप-कारकाः?। प्रथमे धूमो दहनवद्गर्दभमप्यवधीकुर्य्यात्, नियामकाभावात्। द्वितीये तु किमुपकारान्तरेण, नियमस्यैवापेक्षाऽर्थत्वात्, तस्यैव च कारणात्मत्वा-त्, ईदृशस्य च स्वभाववादस्येष्टत्वात्। नित्यस्वभा-वनियमवदेतत्। न ह्याकाशस्य तत्त्वमाकस्मिकमिति सर्वस्य किं न स्यादिति वक्तुमुचितमितिचेन्न। सर्वस्य भवतः स्वभावत्वानुपपत्तेः। न ह्येकमनेकस्वभावं नाम। व्याघातात्। नन्वेवमिहापि सर्वदा भवतः कादाचित्कत्वस्वभावव्याघातइति तुल्यः परिहारः। न तुल्यः। निरवधित्वे अनियतावधित्वे वा कादाचित्क-त्वव्याघातात्। नियतावधित्वे हेतुवादाभ्युपगमात्॥

तदुभयं निरस्यति॥ हेतुभूतीति॥ अथ हेतुभवनयोर्निषेधस्य

शेषाभ्यनुज्ञाफलकत्वात् पर्य्युदासनञा हेतुव्यतिरिक्ताद्भवनं लभ्यते। अहेतुश्च कार्यस्वरूपमवस्तु च तदा स्वानुपाख्यविधिः । तं निषेधति ॥ स्वानुपाख्येति ॥ स्वं कार्य्यम् ॥ अनुपाख्यो निर्द्धर्म्मकोऽलीकः । अथाश्वकर्णादिवदव्युत्पन्न एवायमकस्माच्छब्दः, किंशब्दोऽस्वभावपरो वा । तदा स्वभावादेव कार्य्यस्य कादाचित्कत्वमित्यर्थः । तत्राह ॥ स्वभावेति ॥ सर्वत्र हेतुमाह ॥ अवधेरिति ॥ नियतावधिसम्बन्धित्वेनैव विवादपदस्य कादचित्कस्य कार्यस्य सतर्केण प्रत्यक्षेण विषयीक्रियमाणत्वादित्यर्थः। क्रमेण तर्कमेवाह ॥ हेत्विति ॥ भवनस्य सत्त्वस्याविशेषात् सदातनत्वे कार्य्यस्य कादाचित्कत्वव्याघात इत्यर्थः ॥ भवनेति॥ भवनस्योत्पत्तेः सदा प्रतिषेधे प्राक् पश्चादिव मध्येऽप्यभवनप्रसङ्गात् कदाचिद्भवनग्राहिप्रत्यक्षबाध इत्यर्थः ॥ उत्पत्तेरिति ॥ स्वोत्पत्तेः पूर्वं यदि स्वं भवेत्, तदा नियतकालोत्पत्तौ हेतुः स्यात् ॥ न चैवम् । असतोऽपि हेतुत्वे प्राक् पश्चादपि कार्य्यसत्त्वप्रसङ्गेन तदनुपलब्धिविरोध इत्यर्थः। कार्यकारणयोरभेदे विरोधान्तरमाह॥ पौर्वापर्य्येति॥ पटार्थिनः पटमेव नोपाददते,किन्तु तत्पूर्वकालवर्त्तिनस्तन्तूनिति लोकव्यवहारसिद्धकार्य्यकारणभावविरोध इत्यर्थः॥ तत्त्वस्य–पौर्वापर्यस्येत्यर्थः॥अनुपाख्यस्यार्थक्रियाजनकत्वाभावेऽप्यनिष्टप्रसङ्गान्तरमाह ॥ अनुपाख्यस्येति ॥ एतत्पटानुत्पत्तिक्षणो यद्येतत्पटोत्पादकानुपाख्योत्तरक्षणः स्याद् एतत्पटाधिकरणं स्यादित्यर्थः । यद्यपि स्वभावः कार्य्यं तद्धर्म्मो वा । आद्यः, अकस्मादिति निरासेनैव निरस्तः । अन्त्ये धर्म्मस्य कारणत्वमङ्गीकृतमेव । तथापि यथा परमाणुतत्कारणयोरकारणत्वेऽपि स्वभावादेव नियतदेशवृत्तित्वं, यथा वा कारणत्वाविशेषेऽपि पटस्य तन्तुदेशवृत्तित्वं, न तु वेमादिदेशवृत्तित्वमिति स्वभावादेव नियमः । तथा कार्य्यस्याहेतुकत्वेऽपि तत्तत्कारणत्वाभिमतनियतोत्तरकालवृत्तित्वं, न तु कालान्तरवृत्तित्वमिति स्वभावादेव कादाचित्कत्वं स्यादिति शङ्कते ॥ अपि त्विति ॥ ये ये निरवधयो दृष्टास्तेषां नियमेन कादाचित्कत्वस्वभावविरहान्निरवधिकत्वकादाचित्कयोर्विरोधान्निरवधित्वे कादाचित्कत्वस्वभाव एव न निर्वहेदित्यभिप्रेत्य परिहरति ॥ निरवधित्वे इति ॥ अयं क्षणो यद्येतत्पटध्वंसानाश्रयः सन्नेतत्पटप्रागभावाश्रयो न स्यादेतत्पटाऽधिकरणं स्यादिति भाव इत्यन्ये ॥

ननूत्तरकालसंसर्गित्वं कादाचित्कत्वम् । तच्च निरवधित्वेऽप्या- ऽऽकाशवत् स्यादित्यत आह ॥ न हीति ॥ तथा सति घटाकाशयोः कादाचित्कत्वाकादाचित्कत्वलोकव्यवहारविरोध इति भावः । न च सावधित्वेऽपि न हेतुमत्त्वस्वीकारः । पर्य्यायत्वादनयोरित्याह ॥ साव- धित्वे त्विति ॥ नन्वेतावताऽपि प्राचीनोऽवधिः प्रागभाव एव, न तु भावोऽपीति स एव हेतुर्न भाव इति न प्रागभावातिरिक्ते कारणत्वं वर्त्तते इति शङ्कते ॥ अस्त्विति ॥ किं प्रागभावकाले भावस्यासत्त्वादे- वानवधित्वं कार्य्येणानपेक्षितत्वाद्वा ? । आद्यं परिहरति ॥ अन्येषाम- पीति ॥ भावानामपि अनन्यथासिद्धान्वयव्यतिरेकवत्तया प्रागभाव- तुल्यत्वादवधित्वमन्यथा प्रागभावस्यापि तन्न स्यादितिभावः । अन्य- थेति ॥ अनिरूपितस्य प्रागभावस्य प्रतिपादयितुमशक्यत्वादवश्यं घटादिप्राक्कालेऽनन्यथासिद्धान्वयव्यतिरेकिणः कपालादयस्तन्निरूप- काः स्वीकार्य्या इत्यर्थः । ननु प्रागभावनिरूपकस्य चक्षुरादेर्न कारण- त्वं यथा तथा तन्निरूपकभावान्तरस्याऽपि । न च प्रागभावः प्रति- योगिसमवायिकारणमात्रनिरूप्यस्तच्च कारणमेवेति युक्तम् । शब्दा- ऽभावप्रत्यक्षतायां तस्य निरस्यत्वात् । मैवम् । चक्षुरादेरधिकरणग्रह एवान्यथासिद्धत्वात् । चक्षुरादिव्यापाराभावेऽप्यनुमितेऽधिकरणे प्रागभावप्रतीतेरिति भावः । अत्रैवार्थे कादाचित्कत्वव्याघातं प्रागुक्तं विपक्षबाधकं स्मारयति ॥ इतरेति ॥ यद्ययं घटः प्रागभावान्यावधि- को न स्यात् सकलकालीनः स्यादित्यर्थः । द्वितीयं शङ्कते ॥ सन्त्वि- ति ॥ प्रागभावादन्येषाम् अवधित्वेऽपि तैर्घटादिसत्ताया अनियमना- न्न तानि कारणानीत्यर्थः ॥ प्रथम इति ॥ ननु यो दहनव्यभिचारी स रासभानन्तरं भवतीत्यत्रापादकाभावः । स्वयमपि व्याप्तेरनभ्युपगमा- त् । न च धूमत्वं यदि दहनव्यभिचारिवृत्ति स्याद् दहनासमवहित- सामग्र्युत्तरकालोत्पत्तिकवृत्ति स्यादित्यर्थः । परस्येष्टापत्तेः । मैवम् । धूमो यदि रासभसमवधानोत्पत्तिकतावच्छेकरूपवान् स्याद् रासभ- समवधानानन्तरोत्पत्तिकः स्यात् । धूमत्वं वा यदि दहनव्यभिचारि- वृत्ति स्याद् दहनासमवहितदेशवृत्ति स्याद् इत्यापादनार्थत्वात् । वस्तुतो यद्यग्निर्धूमकारणं न स्यात्, तदा कथं धूमार्थी नियमतो- ऽग्निमुपादेत्त, न रासभमिति तद्ग्राहि प्रत्यक्षव्याघात इति भावः ॥ द्वितीये त्विति ॥ न ह्युपकारव्याप्ता कारणता येन तदभावे न स्यात् ।

उपकारेऽपि कर्त्तव्ये उपकारान्तरापेक्षयाऽनवस्थितेः । किन्तु स्वरूपविशेषव्याप्ता, तन्निवृत्तावेव निवर्त्तते इत्यर्थः ॥ नियमस्यैवेति ॥ नियतान्वयव्यतिरेकवज्जातीयस्यैवापेक्षणीयपदवाच्यतया लोकप्रसिद्धत्वादित्यर्थः ॥ नित्यस्वभावेति ॥ यथा नित्यस्याकाशस्य यः स्वभावो धर्मः शब्दाश्रयत्वमात्मनश्चात्मत्वमाकस्मिकमिति सर्वस्य तदन्यस्याऽपि धर्मः कुतो न स्यादिति न वक्तुमुचितमप्रामाणिकत्वात् । तथा आकस्मिकत्वाविशेषेऽपि सदातनत्वमाकाशादीनां, कादाचित्कत्वं घटादीनां स्वभावो, न त्वन्यस्य धर्मोऽन्यस्येत्यर्थः । यथाऽऽहुः—

नित्यसत्त्वा भवन्त्येके नित्यासत्त्वाश्च केचन ।
विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः ॥
वह्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः ।
केनेदं रचितं तस्मात् स्वभावात्तद्व्यवस्थितिः, इति ॥ न च

नियतदेशवन्नियतकालस्वभाव इत्यनेनास्य पौनरुक्त्यम् । पूर्वं हि सापेक्षत्वादित्यत्र यथा परमाणुतत्परिमाणादीनां निरपेक्षत्वेऽपि नियतदेशवृत्तित्वं तथा घटादीनां नियतकालत्वं स्यादित्यप्रयोजकत्वमुक्तम् । सम्प्रति तु कादाचित्कत्वस्वभावो निर्हेतुकः, स्वभावनियतत्वात् । नित्यस्वभाववदिति सम्प्रतिपक्षत्वमुक्तमित्यर्थभेदात् । पूर्वं यन्नियतं तन्न कारणनियम्यं, यथा जातेः क्वाचित्कत्वमित्युक्तम् । सम्प्रति तु स्वभावो न नियम्य इत्युच्यते, इत्यपौनरुक्त्यमित्यन्ये ॥ न सर्वस्येति ॥ एकनियतो धर्मः स्वभाव इत्युच्यते । तद् यदि सर्वस्य सम्भवेत् तदा स्वभावत्वमसाधारणत्वं नोपपद्यते सत्तादेरिवेति स्वभावत्वव्याघात इत्यर्थः ॥ नन्वेवमिति ॥ यथाकाशस्याकाशत्वं न सर्वस्य तत्त्वव्याघातादिति विपरीतमनाशङ्कनीयं, तदा कादाचित्कत्वस्वभावस्याहेतुकत्वे सदातनत्वमप्यनाशङ्कनीयम् । कादाचित्कत्वस्वभावभङ्गप्रसङ्गादित्यर्थः । कादाचित्कत्वस्वभावसिद्धौ तद्विपरीतकल्पनायां व्याघातः स्यात् । तत्सिद्धिश्च निरवधित्वस्वभावत्वे वा सावधित्वस्वभावत्वे वा प्रकारान्तराभावात् । द्वितीयेऽप्यनियतावधित्वे तद्विपर्यये वा । तत्र प्रथमद्वितीययोराह ॥ निरवधित्व इति ॥ ये ये निरवधयोऽनियतावधयश्च भावा दृष्टास्तेषां नियमतः कादाचित्कत्वस्वभावविरहाद् निरवधिस्वभावस्य अनियतावधिस्वभावस्य वा कादाचित्कत्वस्वभावविरोधः । न हि विरुद्धयोरुष्णशीतयोरेकस्वभावत्व-

म् । तथा च कादाचित्कत्वव्याघातस्तत्स्वभावत्वव्याघात इत्यर्थः ॥

तृतीयमाशङ्क्य सम्प्रतिपत्तिमुत्तरमाह ॥ नियताऽवधित्व इति ॥ वस्तुतोऽस्मिन् सतीदं भवति, असति न भवतीति प्रत्यक्षेण नियतपूर्वभावस्य ग्रहात् प्रत्यक्षमेव कारणत्वे मानम् । तस्य चानन्यथासिद्धत्वग्राहकस्तर्कः, स्यादेवेत्यादिना दर्शित इति रहस्यम् ॥

ननु कादाचित्कत्वं सापेक्षनिरपेक्षाभ्यां व्यावृत्तत्वेनासाधारणम् । तथा हि । न सामग्रीनिरपेक्षं कार्यं, सदातनत्वापत्तेः । नापि तत्साऽपेक्षं, सामग्र्यपि हि न तन्निरपेक्षा । तत्सदातनत्वे तत्कार्यसदातनत्वापत्तेः । नाऽपि तत्सापेक्षा, अनवस्थानात् । ततः प्रागभाववद् यथा सामग्री निरपेक्षाऽपि कदाचित्की तथा भावोऽपि घटादिः स्यादित्याशयवानाह—

स्यादेतत् । उत्तरस्य पूर्वः पूर्वस्योत्तरो मध्यमस्य उभयमवधिरस्तु । दर्शनस्य दुरपह्नवत्वात् । त्वयाऽप्येतदभ्युपगन्तव्यम् । न हि भाववदभावेऽप्युभयाऽवधित्वमस्ति । तद्भावेष्वप्यनुपलभ्यमानैककोटिषु स्यात् । न स्यात् । अनादित्वात् ॥

प्रवाहोऽनादिमानेष न विजात्येकशक्तिमान् ॥
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥ ६ ॥

प्रागभावो ह्युत्तरकालावधिरनादिः, एवं भावोऽपि घटादिः स्यात् । अनुपलभ्यमानप्राक्कोटिकघटादिविषयं नेदमनिष्टमिति चेन्न । तावन्मात्रावधिस्वभावत्वे तदऽह्रवत् पूर्वेद्युरपि तमवधीकृत्य तदुत्तरस्य सत्त्वप्रसङ्गात् । अपेक्षणीयान्तराभावात् । एवं पूर्वपूर्वमपि । भावे, तदेव सदातनत्वम् । तदहरेवानेन भवितव्यमित्यस्य स्वभाव इति चेन्न । तस्याप्यहः पूर्वन्यायेन पूर्वमपि सत्त्वप्रसङ्गात् । तस्मात् तस्यापि तत्पूर्वकत्वमेवं तत्पूर्वस्यापीत्यनादित्वमेव ज्यायो, न त्वपूर्वानुत्पादे कस्यचि-

दपूर्वस्य सम्भव इति। तथापि व्यक्त्यपेक्षया नियमोऽस्तु, न जात्यपेक्षयेतिचेन्न । नियतजातीयस्वभावताव्याघातात् । यदि हि यतःकुतश्चिद् भवन्नेव तज्जातीयस्वभावः स्यात्, सर्वस्य सर्वजातीयत्वमेकजातीयत्वं वा स्यात् । एवं तज्जातीयेन यतःकुतश्चिद्भवितव्यमित्यस्य स्वभावः । तदाऽपि सर्वस्मात् सर्वजातीयमेकजातीयं वा स्यात् । कथं तर्हि तृणारणिमणिभ्यो भवन्नाशुशुक्षणिरेकजातीयः ? । एकशक्तिमत्त्वादिति चेन्न । यदि हि विजातीयेष्वप्येकजातीयकार्यकारणशक्तिःसमवेयाद्, न कार्यात् कारणविशेषः क्वाप्यनुमीयेत । कारणव्यावृत्त्या च न तज्जातीयस्यैव कार्य्यस्य व्यावृत्तिरवसीयेत। तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसम्भवात् । यावद्दर्शनं व्यवस्था भविष्यतीतिचेन्न । निमित्तस्यादर्शनाद् दृष्टस्य चानिमित्तत्वात् । एतेन सूक्ष्मजातीयादिति निरस्तम् । अवह्नेरपि तत्सौक्ष्म्याद् धूमोत्पत्त्यापत्तेः । कार्य्यजातिभेदाभेदयोः समवायिभेदाभेदावेव तन्त्रं, न निमित्तासमवायिनी इतिचेन्न । तयोरकारणत्वप्रसङ्गात् । न हि सति भावमात्रं तत्, किन्तु सत्येव भावः । न च जातिनियमे समवायिकारणमात्रं निबन्धनमपि तु सामग्री । अन्यथा द्रव्यगुणकर्म्मणामेकोपादानकत्वे विजातीयत्वं न स्यात् । न च कार्यद्रव्यस्यैषा रीतिरिति युक्तम् । आरब्धदुग्धैरेवावयवैर्दध्यारम्भदर्शनात् ॥

स्यादेतदिति ॥ उत्तरस्य ध्वंसस्य पूर्वो घट एवावधिर्न तु ध्वंसः। पूर्वस्य तु प्रागभावस्य उत्तरः प्रतियोग्येवावधिर्न तु प्रागभावः । मध्यमस्य तु घटादेः प्रागभावो ध्वंसश्चेत्युभयमवधिर्निरूपकोऽस्त्वि-

त्यर्थः ॥ दर्शनस्येति ॥ सर्वलोकसिद्धत्वादित्यर्थः । दर्शनेन चेत्कारणं सिद्ध्यति, तदा क्षित्यादौ कर्तुरदर्शनाद्धर्माद्देश्चादर्शनात्तदसिद्धौ न तदधिष्ठातृसिद्धिरिति निगर्वः । अनङ्गीकारे दण्डमाह ॥ न हीति ॥ अन्यथा प्रागभावप्रध्वंसयोरप्यनुपलभ्यमानपूर्वोत्तरावधिकल्पनप्रसङ्ग इति भावः ॥ तद्वदिति ॥ तथाचावधिसिद्धावपि न तत्प्राच्यत्वनियमसिद्धिरिति न तावतैव कारणसिद्धिरंशतः सिद्धसाधनं चेति भावः ॥

प्रवाह इति ॥ एष कार्यकारणप्रवाहोऽनादिमान् तत्तत्सामग्रीमान् तत्तत्सामग्र्यपि स्वसामग्रीपरम्पराऽधीनेति न तज्जन्यकार्यस्यानादित्वप्रसङ्गः । न चानवस्था । बीजाङ्कुरवदनादितया प्रमाणिकत्वादित्यर्थः । प्रागभावध्वंसयोस्तु पूर्वोत्तरकोटिकल्पने भावोन्मज्जनमेव बाधकमिति भावः । अनादित्वं च ध्वंसव्याप्यप्रागभावप्रतियोगित्वम् । तथापि यद्व्यक्तितो यत्कार्यं सैव व्यक्तिस्तत्र कारणं,न तु तज्जातीयमिति नैतावता कार्यजातीये कर्तृजातीयं कारणम् । अव्यवहितप्राक्कालीनव्यक्तेरेव कारणत्वापत्तौ यागादीनामकारणत्वाच्चालौकिकसाधनसिद्धिः । अतो न क्षित्यादिकर्तृत्वेनादृष्टाधिष्ठातृत्वेन वेश्वरसिद्धिः । न चैवं नियतजातीयकार्यानुत्पत्तिः । एकजातीयकार्यानुकूलशक्तिमत्त्वेन तदुपपत्तेः । अत्राह ॥ न विजातीति॥विलक्षणजातीयेष्वेका या शक्तिस्तद्वांश्च प्रवाह इति सम्बन्धः । विजातिर्विरुद्धजातिरेकशक्तिमांश्चेति वा । वक्ष्यमाणयुक्तेरित्यर्थः । तर्हि तृणादौ व्यभिचारेणाग्निकारणत्वं कथं ग्राह्यमिति । तत्राह ॥ तत्त्व इति ॥ सामान्यविशेषाक्रान्तगोचरयोरन्वयव्यतिरेकयोस्तत्त्वनियतत्वेग्राह्ये यत्नवतापुरुषेण भाव्यमित्यर्थः ॥

प्रागभावो हीति ॥ यद्यदृष्टप्राक्कोटितयैव भावरूपमपि कार्यं पूर्वाऽवधिशून्यं स्यादिति शेषः । अत्रेष्टापत्तिमाह ॥ अनुपलभ्यमानेति ॥ यत्र प्राक्कोटिः सामग्री नोपलभ्यते, तत्रानादित्वमिष्टमेवेत्यर्थः ॥ तावन्मात्रेति ॥ अदृष्टपूर्वकोटित्वेनानादिभावमात्रावधिस्वभावत्वे यथा तत्र दिवसे तस्य सत्त्वं तथा गतदिवसेऽपि तदित्यनादिभावोत्तरस्य तत्कार्यस्य सत्त्वप्रसङ्गः । एवं तत्पूर्वपूर्वदिनवृत्त्यपि तत्कार्यं स्यादित्यर्थः । तथाचागन्तुकादेव तस्मात् कार्यस्य कादाचित्कत्वं निर्वहतीति भावः ॥ तदहर्वदिति, समासान्तविधेरनित्यत्वात् समाधेयम् । तदवधिस्वभावत्वे यत्र दिनेऽयमध्यक्षस्तत्रैवानेनोत्पत्तव्यमित्येषोऽपि तस्य स्वभाव इति शङ्कते ॥ तदहरेवेति ॥ अत्राहःपदेन कालमात्रमभिप्रे-

तम् । तदनादित्वे तावन्मात्रावधेर्घटादेरप्यनादित्वप्रसङ्गादित्यनाद्य-नित्यप्रवाहसिद्धये तथाविध एव कालोपाधिर्वाच्यः । तथाच तस्याऽप्यनादिरूपादृष्टावधिस्वभावत्वे तदुत्तरस्यापिदिनस्यानादित्वप्रसङ्गो घटस्येवेति परिहृति ॥तस्यापीति॥ वस्तुतस्तु,उत्पत्तिगर्भकादाचित्कत्वानुरोधादवधिस्वीकारः । न चोत्तरेण उत्पत्तिर्नियम्यत इत्यवधेः प्राच्यत्वनियतत्वसिद्धौ कारणत्वं सिद्धम् । तथाचोत्पत्तिर्यदि किञ्चिदुत्तरत्वनियता न स्यादनादिः स्यादिति निगर्वः ॥ न त्वपूर्वेति ॥ आगन्तुककारणघटितसामग्र्यजन्यं कार्यं नियतकालोत्पत्तिकं न स्यादित्यर्थः ॥तथापीति॥ जात्यपेक्षया कारणत्वे निरस्ते व्यक्त्यपेक्षया व्यभिचारेण तत्सुनिरसमिति पूर्वोक्त एवाभिसन्धिः ॥ नियतेति ॥ कार्यनियतजातीयत्वे कारणजातिनियमस्य हेतुत्वादित्यर्थः ॥
अथ स्वभावादेव कार्यं नियतजातीयं स्यात्, तत्राह ॥ यदि हीति ॥ किमयं कार्यस्यैव महिमा, यद्भिन्नजातीयेभ्योऽपि जायमानं सजातीयमेव भवति, हेतोरेव वा यद्भिन्नजातीयमपि सजातीयमेव जनयति ? । आद्ये कार्यपक्षकं तर्कद्वयमाह॥यदि हीति॥अयं घटो यदि पटजनकयावज्जन्यः स्यात् पटजातीयः स्यात् । एवं, यदि यावद्धूमजनकजन्यः स्याद् धूमजातीयः स्यात् । एवमन्यजातीयत्वमप्यापाद्यम् । पटादावपि तत्तज्जातीयत्वमापाद्यमिति सर्वजातीयत्वापादनार्थः । घटभिन्नं कार्यं यदि यावद्घटजनकजन्यं स्याद् घटजातीयं स्यादित्येकजातीयत्वापादनार्थः ॥

द्वितीये कारणपक्षकं तर्कद्वयमाह ॥ एवमिति ॥ घटसामग्री यदि पटप्रयोजकयावद्रूपवती स्यात् पटजातीयजननी स्यात् । एवं धूमादिजातीयजनकत्वमप्यापाद्यम् । घटान्यकार्यसामग्री यदि घटप्रयोजकयावद्धर्मवती स्याद् घटजातीयजनिका स्यादिति क्रमेणापादनीयम् । ननु, यद्येकजातीयकारणनियमात् कार्यजातिनियमस्तर्हि भिन्नजातीयेभ्यः कारणेभ्यो नाभिन्नजातीयं कार्यं जायेतेत्याह ॥ कथमिति॥ अत्र मीमांसकमुत्तरयति ॥ एकेति ॥ कार्यानुपलब्धिलिङ्गकानुमानद्वयभङ्गप्रसङ्गेन तन्निराकरोति ॥ यदि हीति॥ यावदिति ॥ यत्र क्लृप्तकारणभावं विनाऽप्यन्यस्मादेकजातीयं दृश्यते तत्र विजातीयेष्वेककार्यानुकूला शक्तिः कल्प्यते,न त्वन्यत्रापि । ततो नोक्तदोष इत्यर्थः ॥ निमित्तस्येति ॥ तृणादिषु कारणतावच्छेदकरूपस्यादर्शनात् ॥ न च शक्तिरेव

तथा। अन्योन्याश्रयात्। कारणत्वग्रहे तत्कल्पनम्। अन्यथा रासभेऽपि तदापत्तेः। तत्कल्पनेन च कारणत्वग्रहः। तस्यान्वयव्यतिरेकावच्छेद्यत्वात्, दृष्टस्य च तृणत्वादेरनिमित्तत्वात्कारणतानवच्छेदकत्वादित्यर्थः। तृणादिषु व्यभिचारम् अग्निकुर्वद्रूपत्वादतीन्द्रियजातिविशेषाद्ये परिहरन्ति, तेऽप्यतएव निरस्ताइत्याह ॥एतेनेति॥ ननु, तृणादयोऽग्नौ निमित्तकारणानि। न च तत्साजात्यवैजात्याभ्यां कार्यसाजात्यवैजात्ये, किन्तु समवायिनस्तथात्वात्। तच्चाग्नावस्त्येवेति शङ्कते ॥ कार्येति ॥ तथापि तृणादेर्व्यभिचारेण कारणत्वं न स्यादिति परिहरति ॥ तयोरिति ॥ न हीति ॥ व्यभिचारिणोऽपि कारणत्वापातादिति भावः ॥ किन्त्विति ॥ तृणादौ चैकैकाभावेऽप्यग्नेर्भावात् कारणत्वं न स्यादित्यर्थः। न च समवायिकारणसाजात्यादिकमपि कार्यस्य तथात्वे तन्त्रम्। तदभावेऽपि कार्यवैजात्यदर्शनादित्याह ॥ न चेति ॥
अपि त्विति ॥ सामग्री च तृणादिघटिता भिन्नैवेति भावः ॥ अन्यथेति ॥ न च समवायिनो द्रव्यस्याभेदेऽपि कारणतावच्छेदकधर्मभेदाद् द्रव्यादीनां जातिभेदः स्यात्। तथा हि द्रव्यजनने स्पर्शवत्त्वमवच्छेदकं, गुणकर्मजनने तु द्रव्यत्वमूर्तत्वे तथेति वाच्यम्। द्रव्यत्वेनैकेनैव रूपेण संयोगविभागौ प्रति कारणत्वेऽपि तयोर्जातिभेदात्, कारणतावच्छेदकस्याकारणत्वाच्चेति भावः। न च कार्यमात्रगीतिरेषा, अपि तु द्रव्यस्य सतः। अतो न द्रव्यादिभिः समानोपादानैर्व्यभिचार इत्याह ॥ न चेति ॥ एवं सति समवाय्यभेदे कार्यद्रव्यं दधिदुग्धरूपं न भिद्येत क्षीरपरमाणवएवाम्लसंयोगान्नष्टकार्यद्रव्या दध्यारभन्ते। अत एव, क्षीरं नष्टं दधि जातमितिलौकिकोऽयमनुभवइत्याह ॥ आरम्भेति ॥

नन्वतीन्द्रियेषु परमाणुषु दर्शनाभावाद् दध्यारम्भको योग्योऽवयवो वाच्यः। तत्र च क्षीरत्वं योग्यानुपलब्धिबाधितम्।प्रत्युतावयवावयविवृत्तिजातित्वेन पृथिवीत्ववद् दधित्वस्य परमाणुवृत्तित्वमनुमेयम्।न च तन्तुत्वेन व्यभिचारः। तस्य पटावयवेअंश्ववयविनि वृत्तेरिति वाच्यम्। तदवयविवृत्तित्वे सति तदवयववृत्तित्वस्य विवक्षितत्वात्। द्व्यणुकवृत्तिजातित्वस्य लिङ्गत्वाद्वा। न च दधित्वं न परमाणुवृत्ति पृथिवीत्वव्याप्यजातित्वात् पटत्ववदितिवाच्यम्। व्यञ्जकाऽभावस्योपाधित्वात्।पटत्वव्यञ्जकसंस्थानविशेषस्य परमाणावभावाद्दधित्वव्यञ्जकरसविशेषस्य च तत्र सत्त्वात्। न च रसविशेषवदवय-

वित्वं तद्व्यञ्जकं, गौरवात् । गन्धवदवयवित्वस्य पृथिवीत्वव्यञ्जकत्वे तस्यापि परमाणावनुवृत्त्यापत्तेश्च । यद्वा, दधिद्व्यणुकं दधित्वाश्रयोपादानकं, कार्यत्वे सति दधित्वात् । स्थूलदधिवत् । न च कार्यत्वं व्यर्थं, स्वतोऽनैकान्तिकपरिहारार्थत्वात् । दधिद्व्यणुकोपादानं वा न क्षीरारम्भकं, दध्यवयवत्वात् । दध्यारम्भकदध्यवयववत् ॥

अत्रोच्यते । क्षीरपरमाणूनां तत्रावश्यकत्वाद् य एवावयवाः क्षीरमारब्धवन्तस्त एव सहकारिविशेषाद्दध्यारभन्ते, लाघवात् । अनुमाने चानुकूलतर्काभावः । दधित्वं यदि पार्थिवपरमाणुवृत्तिजातिः स्यात् पटवृत्ति स्यादिति प्रतिकूलतर्कप्रतिहतत्वं च । न च लाघवोपकार्यमानाभावः । दध्यारम्भकः परमाणुर्न दधित्वाश्रयः । नित्यपार्थिवत्वात् । पटारम्भकपरमाणुवदित्यनुमानस्य सत्त्वात् । न च व्यञ्जकाऽसत्त्वमुपाधिः । दधित्वाश्रयपरमाणौ च रसविशेषवत्त्वं दधित्वव्यञ्जकमस्तीति वाच्यम् । प्रतिकूलतर्केण रसविशेषवदवयवित्वस्य तद्व्यञ्जकत्वात् । किञ्चैवं दुग्धोत्कर्षापकर्षयोर्दध्युत्कर्षापकर्षप्रयोजकत्वानुपपत्तिः । अनुपादानोत्कर्षादेरनुपादेयोत्कर्षाद्यप्रयोजकत्वात् । न चेन्धनोत्कर्षादिना वह्नेस्तथात्वेन व्यभिचारः । यस्योद्भूतरूपस्योत्कर्षार्थं तद्वृत्तिद्रव्यत्वव्याप्यजातीयं यदुपादीयते, तत् तदुपादानोपादेयमिति व्याप्तेः । इन्धने तु तद्वृत्तिद्रव्यत्वव्याप्यजातेरभावः । उद्भूतरूपस्येति विशेषणाच्चानुद्भूतरूपवह्न्युत्कर्षार्थमुपात्तवह्न्युत्कर्षेण व्यभिचारः । उपादेयता च साक्षात्परम्परासाधारणी विवक्षितेति न पटोत्कर्षार्थोपात्ततन्तूत्कर्षेण व्यभिचारः । न च यद्दधि न तद् दुग्धारभ्यमिति स्थूले दर्शनाद्दधिद्व्यणुकं न दुग्धत्वाश्रयपरमाण्वारभ्यमिति वाच्यम् । दधिद्व्यणुकारम्भके परमाणौ दुग्धत्वस्याऽवृत्तेः । सत्ताऽन्यद्रव्यत्वसाक्षाद्व्याप्यजातेरेव परमाणौ वृत्तेः, द्रव्यत्वस्यापि द्रव्यत्वसाक्षाद्व्याप्यजातित्वात् । तद्भिन्नतद्व्याप्याव्याप्यत्वे सति तद्व्याप्यत्वस्यैव साक्षाद्व्याप्यत्वरूपत्वात् । नचान्ये परमाणवस्तत्रादृष्टाकृष्टा दध्यारम्भकाः । तदुत्कर्षाद्यनुविधानानुपपत्तेरुक्तत्वात् । दध्यर्थं दुग्धोपादानानुपपत्तेश्च । अपि च, यद्द्रव्यध्वंसजन्यं यद्द्रव्यं भवति तत्तदुपादानोपादेयं यथा महापटध्वंसजन्यः खण्डपट इति नियमाद् दुग्धध्वंसजन्यं दधि दुग्धोपादानोपादेयम् । न च प्रतिबन्धकद्रव्यध्वंसजन्यद्रव्येण व्यभिचारः । ध्वंसत्वेन कारणत्वस्य

विवक्षितत्वात्। प्रतिबन्धकाभावस्य च संसर्गाभावत्वेन हेतुत्वात्। न च स्थूलदुग्धध्वंसजन्यं दधि न तदवयवजन्यमिति व्यभिचारः। परमाणुश्च न तदवयव इति वाच्यम्। साक्षात्परम्परासाधारणोपादेयत्वस्य विवक्षितत्वात्॥

रत्नकोषकृतस्तु, रसविशेषवृत्तिरेव दुग्धत्वादिजातिः। द्रव्यवृत्तित्वेऽपि तद्व्यञ्जकस्य रसस्यावश्यकत्वात्। द्रव्यत्वादिसामानाधिकरण्यबुद्धिश्च परम्परासम्बन्धात्। तथाच दुग्धारम्भका एवावयवाः पाकजरसविशेषशालिनो दध्यारम्भका इति न विरोध इत्याहुः॥

तृणादेरग्निं प्रति तृणाद्यन्यान्यत्वेन कारणत्वं गृह्यते, इति न व्यभिचार इति व्यावृत्तिपदार्थवादिना यत् समाहितं, तत्राप्यनुमानभङ्ग इत्यतिदिशति॥

एतेनाऽपोहवादे नियमो निरस्तः। कार्यकारणभावाद्येत्यादिविप्लवप्रसङ्गात्। तस्मान्नियतजातीयतास्वभावभङ्गेन व्यक्त्यपेक्षयैव नियम इति फूत्कारेण तृणादेरेव, निर्मन्थनेनारणेरेव, प्रतिफलिततरणिकिरणैर्मणेरेवेति प्रकारनियमवत्तैनैव व्यज्यमानस्य कार्यजातिभेदस्य भावात्। दृश्यते च पावकत्वाविशेषेऽपि प्रदीपः प्रासादोदरव्यापकमालोकमारभते, न तथा ज्वालाजालजटिलोऽपि दारुदहनो, न तराञ्च कारीषः॥

यस्तु तं नाकलयेत्, स कार्यसामान्येन कारणमात्रमनुमियादिति किमनुपपन्नम्। एवं तर्हि धूमादावपि कश्चिदनुपलक्षणीयो विशेषः स्याद् यस्य दहनाऽपेक्षेति, न धूमादिसामान्याद्वह्निसामान्यादिसिद्धिः। एतेन व्यतिरेको व्याख्यातः। तथा च कार्यानुपलब्धिलिङ्गभङ्गे स्वभावस्याप्यसिद्धेर्गतमनुमानेनेतिचेत्, प्रत्यक्षानुपलम्भगोचरो जातिभेदो न कार्यप्रयोजक इति वदतो बौद्धस्य शिरस्येष प्रहारः। अस्माकन्तु य-

त्सामान्याक्रान्तयोर्ययोरन्वयव्यतिरेकवत्ता तयोस्तथैव हेतुहेतुमद्भावनिश्चयः। तथाचावान्तरविशेषसद्भावेऽपि न नो विरोधः। किं पुनस्तार्णादौ दहनसामान्यस्य प्रयोजकम्? तृणादीनां विशेष एव नियतत्वादितिचेत्, तेजोमात्रोत्पत्तौ पवनो निमित्तम्। अवयवसंयोगोऽसमवायी,तेजोऽवयवाः समवायिनः। इयमेव सामग्री गुरुत्ववद्द्रव्यसहिता पिण्डितस्य। इयमेव तेजोगतमुद्भूतस्पर्शमपेक्ष्य दहनं, तत्रापि जलं प्राप्य दिव्यं, पार्थिवं प्राप्य भौमम्, उभयं प्राप्यौदर्यमारभते इति स्वयमूहनीयम् ॥

एतेनेति ॥ नियमोऽविनाभावः । वह्निं विना तदन्यस्मादपि धूमसम्भवेन ततो वह्न्यनुमानाभावापातात्,तृणादिवदतद्व्यावृत्त्या तत्रापि कारणत्वग्रहसम्भवादित्यर्थः। कार्यकारणभावासिद्धौ स्वभावनियमोऽपि दुरवगमः । कार्यानुपलब्धिप्रसङ्गरूपविपक्षबाधकसाध्यत्वात्तस्येति भावः। तदेवं गत्यन्तराभावाद् व्यक्तीनामेव कारणत्वमित्युपसंहरति॥ तस्मादिति ॥ वह्न्यवान्तरजातीयेतृणादीनां प्रत्येकं कारणत्वस्वीकारादेव सर्वं समञ्जसमित्याह ॥ फूत्कारेणेति ॥ प्रकारानियमः। सहकारिनियमः। वह्न्यनुकूलशक्तिमत्त्वेन कारणत्वे मणिफूत्कारादिस्तोमादपि कार्योपपत्तेरित्यर्थः । न चानुपलब्धिबाधितं वैजात्यमित्याह ॥ तेनेति ॥ विवादपदम् अग्नयो वह्नित्वव्याप्यजातिमन्तः । नियतसहकार्यनुप्रवेशेन जायमानवह्नित्वात् । प्रदीपदारुदहनवदिति कारणविशेषसंबन्धव्यङ्ग्यत्वात्तज्जातीनामित्यर्थः। न च दृष्टान्तः साध्यविकल इत्याह ॥ दृश्यते चेति ॥ तत्र तैलादिकारणविशेषव्यङ्ग्यत्वं यथा जातीनां, तथाऽत्रापीति नादृष्टचरकल्पनमित्यर्थः। यद्यपि दुरूहत्वान्नैष विशेष आपाततः स्फुरति, तथापि विशेषानाकलनेऽपि तदनुकूलकारणमात्रमनुमीयते। तदाकलने तु विशेषोऽप्यनुमीयत एवेत्याह ॥ यस्त्विति ॥ नन्वग्न्यवान्तरजातीये तृणादीनां कारणत्वं न युक्तं, कारणगतैकशक्तिरूपमपहाय कार्यगतबहुतरजातिकल्पने गौर-

वात् । तृणादिजन्याग्निष्ववान्तरजातेर्योग्यानुपलम्भबाधितत्वात् । यत्र च तत्तत्कारणप्रयोज्यं प्रदीपादौ वैजात्यमनुभूयते । तत्रैकशक्तिमत्त्वमपि कारणे नास्ति । अत एवानुमानमप्रयोजकम् । अथास्ति तृणादीनां फूत्कारादिसहकारिता । तत्र फूत्कारादीनां सहकारित्वं तृणत्वाद्यवच्छिन्नं प्रति स्यात् ? तृणादिसाधारणैकशक्तिमन्तं प्रति वा । नाद्यः । तृणत्वाद्यवच्छिन्नस्य प्राक्कालनैयत्याभावेन कारणत्वाऽभावात् तत्सहकारित्वस्य दूरनिरस्तत्वात् । नान्त्यः । तृणादिवाऽरणेरपि फूत्कारसमवहितादग्न्युत्पत्त्यापत्तेः । न च फूत्कारादिविशिष्टे तृणादौ शक्तिर्न केवले इति वाच्यम् । तस्य तृणादिभिन्नत्वे तृणादीनामजनकत्वापत्तेः । तदभिन्नत्वे च यत् तृणं फूत्कारेणोपधीयते, तत्र वा शक्तिः, फूत्कारसमवधाने सति वा ? । नाद्यः । फूत्काराद्यसमवधानेऽपि तस्मात् तृणादेरग्न्युत्पत्त्यापत्तेः । नापरः । तथा सति सैव शक्तिस्तृणे फूत्कारादरणौ निर्मन्थनादिति शक्त्यानियतहेतुकत्वापत्तेः । तत्राप्येकशक्तिमत्त्वेन हेतुत्वेऽनवस्थापत्तेरिति ॥

मैवम् । यथा ह्यन्वयव्यतिरेकाभ्यां तृणफूत्कारयोरन्योन्यसहकारित्वं तथैव तच्छक्तयोरपि परस्परसहकारित्वेन वह्न्यनुकूलत्वम् । तथैव कार्यदर्शनात् । न तु मणिफूत्कारयोः सहकारित्वमिति, न तच्छक्तयोरपि परस्परसहकारित्वम् । कार्यविशेषात् कारणविशेषानुमानं तु वह्निवृश्चिकादौ इष्यत एव । निरूपितनियतवह्न्यादिकारणके धूमादौ अनुमानं स्यादेव । अन्यथा कार्य्यवैजात्येऽपि वह्नित्वेन धूमविशेष एव कारणत्वं, नधूममात्रइतिशङ्कया तत्राप्यनुमानं न स्यादिति॥

अत्रास्मत्पितृचरणाः । तृणारणिमणिफूत्कारादिव्यक्तीनामनन्तत्वेन प्रतिव्यक्ति भावहेतुजानित्यानन्तशक्तिस्वीकारे गौरवम् । तावदनन्तव्यक्तिजन्यानन्तवह्निव्यक्तिषु जातित्रयकल्पने लाघवमिति तदेव कल्प्यते । न च जातौ योग्यानुपलब्धिबाधः । गोमयवृश्चिकप्रभववृश्चिकयोरीषच्छ्यामत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात् । तृणादिजन्याग्निष्वपि तृणजन्यत्वज्ञानानन्तरं मणिजन्यव्यावृत्तानुगतबुद्धेर्जातिविषयत्वाद् बाधकाभावात् । ननु तृणादीनामग्नौ कारणत्वग्रहे शक्तिवैजात्ययोरन्यतरकल्पनम् । तद्ग्रहश्च नान्वयव्यतिरेकाभ्याम् । व्यभिचारात् । अथारणिमण्यभाववति स्तोमविशेषे तृणं विना न वह्निः । तृणान्वयेऽवश्यं वह्निरित्यन्वयव्यतिरेकाभ्यां, तत्रैव

स्तोमे इतरकारणसमवधाने तृणान्वयेऽवश्यं वह्निरिति नियतेनान्वयेन वा, रासभव्यावृत्तेन तृणादिकारणताग्रह इतिचेन्न । तृणं विनाऽपि वह्निरिति ज्ञाने सति वह्निनियतपूर्ववर्तित्वस्य कारणत्वस्य ग्रहीतुमशक्यत्वात् । अबाधिताभावग्रहे भावग्रहस्याभावात् ॥

नैवम् । उक्तग्राहकैर्वह्निनिष्ठकार्यतानिरूपितकारणतावच्छेदकरूपवत्त्वं तृणस्य । तृणनिष्ठकारणतानिरूपितकार्यतावच्छेदकरूपवत्त्वं वह्नेर्वा अकार्यकारणव्यावृत्तं परिच्छिद्यते, न तु तृणत्वेन कारणत्वं, वह्नित्वेन कार्यत्वं वा । तच्चोभयथाऽपि सम्भवति । वह्नित्वेन कार्यत्वमेकशक्तिमत्त्वेन कारणतया वा, तृणत्वेन कारणता वह्निविशेषत्वेन कार्यतया वा । तत्र च विनिगमकमुक्तमेव । एतेन मण्याद्यजन्यवह्नौ तृणादीनां हेतुत्वं गृह्यते इत्यपास्तम् । अन्योन्याश्रयाच्च । मणिजन्यत्वग्रहे हि तदजन्यत्वग्रहः, तृणजन्यत्वेन च तद्ग्रह इति । तथापि यत्र कार्ये वैजात्याभावः सामग्रीभेदश्च तत्र का गतिः । यथा द्रव्यनाशः क्वचित् प्रतियोग्याश्रयनाशात्, क्वचिदसमवायिकारणनाशात् । नचाश्रयनाशाजन्यद्रव्यध्वंसत्वावच्छिन्नं प्रत्यसमवायिनाशस्य नियतत्वात् कारणत्वग्रहः । उक्तरीत्याऽन्योन्याश्रयात् । उच्यते । निमित्तकारणेतरकारणनाशत्वेन कारणत्वम् । यद्वा, विद्यमानाश्रयद्रव्यनाशे असमवायिनाशो हेतुरेवं साऽसमवायिकारणकद्रव्यनाशे प्रतियोग्याश्रयनाशः । तथाप्युभयजन्ये द्रव्यनाशे का गतिः? आश्रयनाशाजन्यद्रव्यनाशं प्रत्यसमवायिनाशस्य हेतुत्वात् तस्य चाश्रयनाशाजन्यत्वात् । अत्राहुः । तत्रेतरसमवधाने तदुभयभावाभावाभ्यां व्यक्तिविशेषभावाभावाद् व्यक्तिविशेषं प्रति तदुभयव्यक्त्योरनन्यथासिद्धयोः कारणत्वं गृह्यते इत्येषा दिक् ॥

ननु, कार्यवैजात्ये तृणस्य वह्निविशेष इव वह्नित्वेन धूमविशेष एव कारणत्वं, न धूममात्रे इति शङ्कया न कार्यात् कारणं क्वाप्यनुमीयेत । यदि चोपस्थितरूपे व्यभिचाराभावात्तेनैव रूपेण कार्यत्वग्रहस्तर्हि कारणतायामपि यत्रोपस्थितरूपे व्यभिचारस्तत्रैव रूपान्तरेण कारणताग्रह इति तुल्यमित्याह ॥ एवं तर्हीति ॥ एवं वह्नेर्धूमविशेष एव प्रयोजकत्वाद् वह्निमात्रव्यतिरेकाद् धूममात्रव्यतिरेको नानुमीयेतेत्याह ॥ एतेनेति ॥ निषेध्यतयेति शेषः । तथा चेति ॥ विपक्षबाधकमानवेदनीयो हि स्वभावनियमो बौद्धानाम् । बाधकं च

कार्यानुपलब्धी । ततस्तद्भङ्गे कथमनुपायकः सिद्ध्येदित्यनुमानमात्र-विलयस्त्रिधैव तदुपगमादित्यर्थः । तदेतद् दूषणं बीजत्वसामान्यं प्रत्यक्षसिद्धम् अङ्कुरे न प्रयोजकं, किन्तु तद्विशेषःकुर्वद्रूपत्वमतीन्द्रिय-मिति वदतो बौद्धस्य, नास्माकमित्याह ॥ प्रत्यक्षेति ॥ अप्रामाणिक-बीजकुर्वद्रूपत्ववदप्रामाणिक एव कार्यविशेषो यस्य कारणविशेषा-पेक्षेति बौद्धस्य दोष इत्यर्थः । अस्माभिस्त्वप्रामाणिको विशेषो नो-पेयते इति भावः । अस्माकं त्विति ॥ यत्र कारणसामान्यं कार्यसामा-न्यं व्यभिचारि दृश्यते, तत्रैव विशिष्यकारणताग्रहः । यत्र तु स न दृश्यते तत्रोपस्थितसामान्येनैव कार्यकारणताग्रहः । यदि च तृणा-दिवह्निविशेषाद् धूमविशेषः स्यादित्युच्यते, तदा नेदमनिष्टमित्यर्थः॥

नन्, कार्यकारणभावग्रहो न तावद्व्यक्त्योरेव । स हि व्यक्तिमात्र-मपेक्ष्य ? तद्विशेषं वा ? । नाद्यः । यदि घटो यावत्पटजातीयापेक्षणी-यापेक्षः स्यात् पटजातीयः स्याद्, घटजातीयो न स्यादित्यत एव बाधकात् । विशेषोऽपि पूर्ववर्त्तित्वमात्रं वा ? तत्तद्व्यक्तित्वं वा ? । नाद्यः । यावत्पटादिजनकजन्यत्वे घटादिव्यक्तीनामभेदाद्वैजात्यापत्तेः । रासभादिसाधारण्याच्च । अत एव नान्त्यः । व्यक्त्योरेव कार्यकारण-भावे पूर्वं तदनिश्चये प्रवृत्त्याद्यनुपपत्तेश्च । नाऽपि जात्यपेक्षया । भक्षितविनष्टबीजादिव्यक्तिष्वप्यापत्तेः । न चेष्टापत्तिः । तस्य सर्वथा कार्याजननाच्छिलाशकलतुल्यत्वात् ॥ मैवम् । बीजादिव्यक्तीनामेव बीजत्वादिना सामान्येनानन्यथासिद्धान्वयव्यतिरेकवत्त्वेन कारण-त्वात् । क्वचित् कार्यव्यतिरेकश्च सहकारिवैकल्यात् । अत एव शिलाशकलवैषम्यम् । न हि यस्मिन् सति कार्यं भवत्येव तत्कारण-म् । अपि तु यस्मिन् सत्येव भवति । एतच्च भक्षितविनष्टेऽपि सा-मान्यतोऽस्त्येव । न च सामान्येनापि रूपेण या व्यक्तिः कार्यं जनय-त्येव सा कारणं, न त्वन्येति वाच्यम् । यागादौ बहुवित्तव्ययायास-साध्ये, यागत्वेऽपि किमियं व्यक्तिः स्वर्गजनिका, न वेति संशये प्रवृत्त्यभावापत्तेः । यदि सा पापव्यक्तिर्नरकजनिका, तदा कृतेऽपि प्रायश्चित्ते नरकं जनयिष्यत्येव । अन्यथा तु प्रायश्चित्तं विनाऽपि न नरकमित्युभयथाऽपि प्रायश्चित्ते प्रवृत्त्यनुपपत्तेश्चेति ॥ किं पुनरिति॥ दहनगतं सामान्यं दहनसामान्यं तेजस्त्ववह्नित्वादि । तेन नोत्तर-विरोधः ॥ तृणादीनामिति ॥ तथा च सामान्यमाकस्मिकं स्यादिति

भावः ॥ तेजोमात्रेति ॥ तेजःपदं कार्यतेजःपरम् । न च सूर्यालोके व्यभिचाराद् न पवनस्तेजोमात्रे निमित्तमिति वाच्यम् । निर्वातस्थितस्य दीपस्य वातं विना नाशादर्शनेन तत्र पवननिमित्तकत्वनिश्चयादन्यत्रापि तेजस्त्वेन पवनजन्यत्वानुमानात् । न च वह्नित्वमुपाधिः । तैजसशरीरस्य पाञ्चभौतिकत्वेन पवनजन्यतया तत्र साध्याव्यापकत्वात् । आगमोऽप्यत्रास्त्येवेत्येके । पवनोत्कर्षेण वह्न्युत्कर्षदर्शनात् तेजोमात्रे तस्य निमित्तत्वं, न वह्निमात्रे। सामान्यस्य सामान्यं प्रति प्रयोजकत्वे विशेषस्योपाधितायामतिप्रसङ्गादित्यन्ये ॥ पिण्डितस्य सुवर्णस्य ॥ दिव्यमिति दृष्टान्तार्थम् । तत्राप्रश्नात् ॥

एतावता कारणमात्रे सिद्धेऽपि सापेक्षत्वादित्यत्र सिद्धसाधनं शङ्कते ।

तथाप्येकमेकजातीयमेव वा किञ्चित् कारणमस्तु, कृतं विचित्रेण । दृश्यते ह्यविलक्षणमपि विलक्षणाऽनेककार्यकारि । यथा प्रदीप एक एव तिमिरापहारी, वर्त्तिविकारकारी रूपाऽन्तरव्यवहारकारीति चेन्न । वैचित्र्यात् कार्यस्य ॥

एकस्य न क्रमः क्वापि वैचित्र्यञ्च समस्य न ॥
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥ ७ ॥

न तावदेकस्मादनपेक्षादनेकम् । अक्रमात् क्रमवत्कार्यानुपपत्तेः । क्रमवत्तावत्कार्यकारणस्वभावत्वात्तस्य तत्तथा यौगपद्यवदितिचेत् । अयमपि क्षणभङ्गे परिहारो, न तु सहकारिवादे । पूर्वपूर्वानपेक्षायां क्रमस्यैव व्याहतेः । क्रमनियमे त्वनपेक्षाऽनुपपत्तेः ॥

नाप्यनेकमविचित्रम् । यदि ह्यन्यूनमनतिरिक्तं वा दहनकारणमदहनस्यापि हेतुर्नासावदहनो दहनो वा स्यादुभयात्मको वा स्यात् । न चैवम् । शक्तिभेदादयमदोष इतिचेन्न । धर्म्मिभेदाभेदाभ्यां तस्यानुपप-

**स्तेः । असङ्कीर्णोभयजननस्वभावत्वादयमदोष इति चेद्, न । न हि स्वाधीनमस्यादहनत्वम्, अपि तु तज्जनकस्वभावाधीनम् । तथाच तदायत्तत्वाद्दहनस्यापि तत्त्वं केन वारणीयम् । न हि तस्मिञ्जनयितव्ये नासौ तत्स्वभावः । तस्माद्विचित्रत्वात् कार्यस्य कारणेनापि विचित्रेण भवितव्यम् । न च तत्स्वभावतस्तथा । ततः सहकारिवैचित्र्यानुप्रवेशः । न तु क्षणोऽपि तदनपेक्षस्तथा भवितुमर्हतीति ॥**

तथापीति ॥ एकमिति त्रिदण्डिमतसमुत्थानम् । तेषां ब्रह्मण एव सकलकारणत्वात् । एकजातीयमिति साङ्ख्यमतम् । तेषां पुरुषाणां भेदात् प्रति पुरुषं च महत्तत्त्वानां भेदेऽपि प्रकृतिविकारत्वात् प्रकृतेश्चैकत्वादेकजातीयत्वात् । तथाच कारणस्यैकव्यक्तित्वेनैकजातीयत्वेन वा नेश्वरसिद्धिरस्मदादिनाऽपि तद् द्रष्टुं शक्यत्वादिति प्रकृतसङ्गतिः । न चाविचित्रात् कारणाद्विचित्रं कार्यमदृष्टचरमित्याह ॥ दृश्यते हीति ॥ तिमिरमालोकाभावः । तदपहार आलोकः । तत्कारी दीपः पिण्डितरूपः । रूपान्तरं घटादिरूपम् । प्रदीपे च न स्वरूपभेदसहकारिभेदावित्यर्थः।तथाच तद्दृष्टान्तेनान्येषामपि विचित्रकार्याणामविचित्र-कारणजन्यत्वमनुमेयमिति भावः ॥ न वैचित्र्यादिति ॥ दृष्टान्तेऽप्यविचित्रकारणजन्यत्वमसिद्धमिति भावः ॥

एकस्येति ॥ एकस्य कारणस्य सम्बन्धी न क्रमः कार्याणाम् । समस्यैकजातीयस्य च कारणस्य सम्बन्धि न वैचित्र्यं कार्याणाम् । शक्तिविशेषो न कार्यवैचित्र्यहेतुः । धर्म्यभिन्नो यतः । चो हेत्वर्थे । विचित्रकार्यजननस्वभावादपि न कार्यवैचित्र्यमुपपाद्यम् । एकत्र कार्ये यत्स्वभावो जनकस्तदितरकार्यजननेऽपि तत्स्वभावो वाच्यः । अन्यथैकस्य स्वभावभेदादेकत्वादिहानिप्रसङ्ग इत्येकस्वभावजन्यत्वेन विजातीयकार्याणामप्यैकजात्यं स्यादित्यर्थः ॥ अक्रमादिति ॥ क्रमप्रयोजकसहकारिविधुरादित्यर्थः ॥ क्रमवदिति ॥ सहकारिविरहेऽपि क्रमिककार्यार्जनशीलत्वादक्रमस्यापि क्रमिककार्यजनकत्वं स्यादित्यर्थः ॥ यौगपद्यवदिति सप्तमीसमर्थाद्वतिः । यथा कार्ययौगपद्ये अयुग-

यत्स्वभावोऽपि दीपः कारणमेवमक्रमोऽपि क्रमिककार्य्येषु कारणं स्यादित्यर्थः ॥ तत् = कार्यम् ॥ तथा – क्रमवदित्यर्थः ॥ अयमपीति ॥ समर्थस्य बिलम्बानुपपत्तेरनेकानि क्रमिकाणि कार्याण्युत्पत्त्यन्तरमेव कुर्यादित्यत्र समर्थोऽपि न तथा । क्रमवत्तावत्कार्यकरणस्वभावस्योत्पादादिति न विरुद्धधर्माध्यास इति क्षणभङ्गपक्षे परिहारः सम्भवी । स्थैर्य्यपक्षे तु क्रमिकसहकार्यपेक्षां विना तादृशः स्वभाव एव न स्यादित्यर्थः ॥

पूर्वपूर्वक्रमिककार्यानपेक्ष उत्तरकार्योत्पादः ? तत्सापेक्षो वा ? । आद्ये, पूर्वेति ॥ विलम्बे हेत्वभावादित्यर्थः । अन्त्ये, क्रमेति ॥ तस्यैव द्वितीयस्य कारणस्यापेक्षणादित्यर्थः । एकजातीयं कारणं दहनजनकैकस्वभावं वा ? अदहनजनकैकस्वभावं वा ? उभयजनकस्वभावं वा ? । आद्ये दोषमाह ॥ नाऽसाविति ॥ कारणाभावादित्यर्थः । भवन् वा दहनात्मको भवेदित्याह ॥ दहनो वेति ॥ इतरदहनवत्तद्धेतुस्वभावप्रसूतत्वादित्यर्थः । दहनजनकैकस्वभावस्य अदहनजनकत्वे व्याघातोऽपीति भावः । द्वितीये तु यथाव्याख्यातवैपरीत्यं फक्किकार्थः । नाऽसौ दहनोऽदहनो वा स्यादिति, कृत्वा । तृतीये, उभयात्मक इति ॥ अत्र च पटो यदि यावद्दहनजनकजन्यः स्यात् पटो न स्याद्, दहनो वा स्यादित्यदहनदहनत्वयोरापादनम् । अदहनो वा यदि तथा स्याद् दहनः स्यादित्युभयापादनमिति नाप्रसिद्धिः । ननु, दहनजनकस्यैव धर्मभेदमुपादायादहनजनकत्वान्नोक्तदोष इति शङ्कते ॥ शक्तिभेदादिति ॥ स धर्मभेदो न धर्म्यभिन्नः । तथा सति धर्मिणोऽभिन्नत्वात्तदभिन्नस्य शक्तिरूपधर्मस्य भेदानुपपत्तेः । नापि धर्मिभिन्नः । तस्यैव कारणान्तरत्वे प्रतिज्ञातैकजातीयकारणत्वव्याघातापत्तेः । नाऽपि धर्मिणोऽभिन्नाभिन्नो विरोधादिति परिहरति ॥ धर्मिभेदाभेदाभ्यामिति ॥ परस्परविलक्षणानेकजनकस्वभावस्य कारणत्वमिति नोभयात्मकत्वमेकस्येत्याह ॥ असङ्कीर्णेति ॥ जनितादहनस्य दहनेऽपि जनयितव्ये अदहनजनकस्वभावत्वमनुवर्त्तते ? न वा ? । आद्ये, न हीति ॥ अस्य अदहनत्वेनाभिमतस्य । अन्त्ये पुनरेकजातीयकारणव्याघातः । तस्यैवादहनजनकस्वभावत्वमतिक्रम्य स्वभावान्तरेण दहनजनकत्वादिति भावः ॥ तथा चेति ॥ दहनो यद्यदहनजनकस्वभावजन्यः स्याददहनः स्यादिति । एवं विपरीतमप्यापाद्य-

मित्यर्थः॥विचित्रकार्याणां विचित्रकारणजन्यत्वे प्रत्यक्षानुमाने प्रमाणमुपसंहरन्नेवाह ॥ तस्मादिति ॥ ननु स्वरूपमेव विचित्रमस्तु कृतं सहकारिवैचित्र्येणेत्यत आह ॥ न चेति ॥ ननु सहकारिवैचित्र्यानुप्रवेशं विनैव तथोत्पन्नक्षणस्वरूपमुपादाय कार्यवैचित्र्यमुपपत्स्यत इत्यत आह ॥ न त्विति ॥ तदनपेक्षः सहकार्यनपेक्षः । तथा विचित्रकार्याऽजकः । बौद्धमते सहोत्पन्नविचित्रसहकारिसहितस्यैव विचित्रकार्यजनकत्वादित्यर्थः । तदेवं विलक्षणसामग्री विचित्रकार्यजनिकेति प्रसाधितम् ॥

सम्प्रति दृष्टकारणमेलकात्मिकैव सा तथा, तदधिष्ठानं चास्मदादिभिरेव शक्यमिति पुनरपि सिद्धसाधनमित्याक्षिपति—

अस्तु दृष्टमेव सहकारिचक्रं किमपूर्वकल्पनयेति चेन्न । विश्वप्रवृत्तितः ॥

विफला विश्ववृत्तिर्नो न दुःखैकफलाऽपि वा ॥
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥ ८ ॥

यदि हि पूर्वपूर्वभूतपरिणतिपरम्परामात्रमेवोत्तरोत्तरनिबन्धनं, न परलोकार्थी कश्चिदिष्टापूर्त्तयोः प्रवर्त्तेत । न हि निष्फले दुःखैकफले वा कश्चिदेकोऽपि प्रेक्षापूर्वकारी घटते, प्रागेव जगत् । लाभपूजाख्यात्यर्थमिति चेद्, लाभादय एव किन्निबन्धनाः ? । न हीयं प्रवृत्तिः स्वरूपत एव तद्धेतुः । यतो वाऽनेन लब्धव्यं, यो वैनं पूजयिष्यति । स किमर्थम् । ख्यात्यर्थमनुरागार्थञ्च । जनो दातरि मानयितरि च रज्यते । जनानुरागप्रभवा हि सम्पद इतिचेद्, न । नीतिनर्मसाचिवेष्वेव तदर्थं दानादिव्यवस्थापनात् । त्रैविद्यतपस्विनो धूर्त्तबका एवेतिचेन्न । तेषां दृष्टसम्पदं प्रत्यनुपयोगात् । सुखार्थं तथा करोतीतिचेन्न । नास्तिकैरपि

तथा करणप्रसङ्गात् । सम्भोगवत् । लोकव्यवहार-सिद्धत्वादफलमपि क्रियते वेदव्यवहारसिद्धत्वात् । संध्योपासनवदितिचेद्, गुरुमतमेतन्न तु गुरोर्मतम् । ततो नेदमनवसर एव वक्तुमुचितम् । वृद्धैर्विप्रलब्ध-त्वाद् बालानामितिचेन्न । वृद्धानामपि प्रवृत्तेः । न च विप्रलम्भकाः स्वात्मानमपि विप्रलभन्ते । तेऽपि वृद्ध-तरैरित्येवमनादिरितिचेत् । न तर्हि विप्रलिप्सुः क-श्चिदत्र, यतः प्रतारणशङ्का स्यात् । इदम्प्रथम एव कश्चिदनुष्ठायापि धूर्त्तः पराननुष्ठापयतीतिचेत् । कि-मसौ सर्वलोकोत्तर एव, यः सर्वस्वदक्षिणया सर्व-बन्धुपरित्यागेन सर्वसुखविमुखो ब्रह्मचर्य्येण तपसा श्रद्धया वा केवलपरवञ्चनकुतूहली यावज्जीवमात्मान-मवसादयति । कथञ्चैनमेकं प्रेक्षाकारिणोऽप्यनुविद-ध्युः । केन वा चिह्नेनायमीदृशस्त्वया लोकोत्तरप्रज्ञेन प्रतारक इति निर्णीतः? । न ह्येतावतो दुःखराशेः प्रतारणसुखं गरीयः । यतः पाखण्डाभिमतेष्वप्येवं दृश्यते इतिचेद्, न । हेतुदर्शनादर्शनाभ्यां विशेषात्। अनादौ चैवम्भूतेऽनुष्ठाने प्रतार्यमाने प्रकारान्तरमा-श्रित्यापि बहुवित्तव्ययायासोपदेशमात्रेण प्रतारणा स्याद्, न त्वनुष्ठानागोचरेण कर्मणा। अन्यथा प्रमाण-विरोधमन्तरेण पाखण्डित्वप्रसिद्धिरपि न स्यात् ॥

अस्त्विति ॥ विश्ववृत्तितः विश्वेषां लोकानां वृत्तेः प्रवृत्तेरदृष्टं सिद्ध्यतीत्यर्थः । तदेव प्रपञ्चयति ॥ विफलेति ॥ भूतचैतन्ये भूता-नामेव परिणतिभेदाद्वासनात एवांसरकार्यमिति न परलोकसिद्धिरि-त्यत्र दोषमाह ॥ यदि हीति ॥

इष्टं यागादि, पूर्त्तं तडागादि ॥ न हीति ॥ बलवदनिष्टाननुबन्धीष्ट-

साधनताज्ञानजन्यत्वात् प्रवृत्तेरिति भावः ॥ प्रागेवेति ॥ निपात-समुदायोऽतिशयार्थः ॥ लाभेति ॥ तथाच दृष्टेष्टसाधनताज्ञानादेव तत्र प्रवृत्तिर्न पारलौकिकेष्टसाधनताज्ञानादिति भावः ॥ न हीति ॥ चिरातीतायामेव यागादिक्रियायां लाभाद्युत्पादादिति भावः। यद्वा, स्वरूपतो लाभादिहेतुत्वे, नास्तिकैरपि तत्करणप्रसङ्गादिति भावः ॥ यतो वेति ॥ लाभाद्युद्दिश्य यागादौ प्रवर्त्तमानाय परेण धनदानमदृष्टार्थमेवेति तन्सिद्धिरित्यर्थः ॥ ख्यात्यर्थमिति ॥ दृष्टार्थमेव तद्दानमिति नादृष्टमुद्देश्यमिति भावः ॥ नीतिनमेति ॥ राजादिभिः प्रयोजनमुद्दिश्यैव दानाद्वनस्थतपस्विभ्यः प्रयोजनाननुसन्धानेन दानाभावादित्यर्थः ॥ त्रैविद्येति ॥ त्रिवेदीविदोऽपि तपस्विनः परप्रतारणार्थं तपसि प्रवर्तन्त इत्यर्थः ॥ तेषामिति ॥ दृष्टप्रयोजनमुद्दिश्यैव परप्रतारणात् तेषाञ्च दृष्टे निस्पृहत्वात् तदसम्भवः। प्रच्छन्नमपि परोपनीतधननिःस्पृहैस्तपःकरणादित्यर्थः ॥ वेदेति ॥ सन्ध्योपासनप्रकरणे निन्दोपदेशात् प्रायश्चित्तोपदेशाच्च नित्यम्। नित्ये च यदि फलार्थिनः प्रवृत्तिः स्यात् तदा यागवन्नित्यताभङ्गप्रसङ्ग इत्यफलैव तत्र प्रवृत्तिः। कार्यताज्ञानं हि तत्र प्रवर्तकम्। तच्च लोके पाकादाविष्टसाधनताज्ञानात् कार्यताऽनुमित्या निर्वहति। वैदिके च नित्ये कार्यताज्ञानं वेदाधीनमिति किमिष्टसाधनताज्ञानेन। न च नित्यापूर्वमेव फलं, तथापि नित्यताभङ्गात्। काम्यस्थले धर्मिग्राहकमानात् काम्यसाधनत्वेनैव सिद्धेर्गौणप्रयोजनतया स्वतःप्रयोजनत्वाभावाच्च। लोके प्रवृत्ताविष्टज्ञानान्वयव्यतिरेकाविष्टसाधनताज्ञानजननद्वारा कार्यताज्ञान एवोपक्षीणाविति फलज्ञानं न प्रवृत्तिहेतुः। न चान्यत्राऽपि निष्फले प्रवृत्तिप्रसङ्गः। वेदस्येष्टसाधनत्वस्य वा लिङ्गस्य कार्यज्ञानहेतोरभावादिति जरन्मीमांसकमतं दृष्टान्त इत्यर्थः। अत्र सोपहासमाह ॥ गुरुमतमिति ॥ गुरोः प्रभाकरगुरोः, गुरु महद्वा मतमेतद्, न त्वस्मद्गुरोर्म्मतमित्यर्थः। निष्फले प्रेक्षावतां प्रवृत्तेरनुत्पादनियमात्। प्रयोजनज्ञानस्य प्रवृत्तिहेतुत्वेन निष्फले कार्यत्वस्यायोग्यतया वेदेन बोधयितुमशक्यत्वात् प्रवर्त्तकस्य कार्यत्वज्ञानस्यासम्भवात्। अत एव नेष्टज्ञानं कार्यताज्ञान एवोपक्षीणम्। अनन्यथासिद्धत्वादिति भावः ॥ वृद्धेङ्गितेति ॥ तथाच निष्फल एवान्यैः प्रतारणादाकुमारं प्रवृत्तिरिति न तत्र प्रयोजनगवेषणमिति भावः। विप्रलिप्सुरन्यथा-

ज्ञातमर्थमन्यथा बोधयति, भ्रान्तो वा ? । आद्ये, वृद्धानामिति ॥ अन्त्ये, कथं चैनमिति ॥ प्रत्युतानादिप्रवृत्तितया दृष्टफलनिरपेक्षतया चादृष्टफलत्वमेवानुमेयमिति भावः ॥ यत इति ॥ एवं पाखण्डप्रवृत्तिरपि दृष्टफलनिरपेक्षा परलोकसाधनं स्यात् । अन्यथाऽयं परिशेषस्तत्रैव व्यभिचरेदित्यर्थः ॥ हेत्विति ॥ हेतुदर्शनेन कर्मलाघवादिना तादृशी तत्प्रवृत्तिरन्यथासिद्धा । अत्र तु ब्रह्मचर्यादिदुःखमयकर्म्मप्रधानतया न तत्सम्भव इत्यादेर्द्वितीयस्तबके वक्ष्यमाणत्वादित्यर्थः । नन्विष्टापूर्तादीनां हेतुदर्शनशून्यत्वेऽपीदम्प्रथम एव प्रतारकस्तद्बोधकागमस्य प्रामाण्यं भ्रमेण ग्राहयित्वा प्रेक्षावतः प्रवर्त्तयेदित्यत आह ॥ अनादाविति ॥ एवम्भूतेऽनादौ अविगीते परलोकसाधने ॥ प्रकारान्तरं = सादित्वं विगीतत्वञ्च । यदि वैदिकव्यवहारातिरिक्तोऽनादिरविगीतश्च व्यवहारः प्रामाणिकः स्यात्, तदाऽयमाधुनिको वैदिकव्यवहारः परप्रतारणपर इति व्यवतिष्ठेत । यथाऽनादिसिद्धः पिपासोपशमनं तोयपानमिति व्यवहारः । अन्नभक्षणं पिपासोपशमनमित्याधुनिक उपदेशः परप्रतारणपर इति निश्चीयते । न त्वेवमित्याह ॥ न त्विति ॥ तस्मादयमेव व्यवहारः प्रामाणिको, न परप्रतारणपर इत्यभ्युपेयमिति भावः । अनभ्युपगमे त्वप्रामाणिकत्वाविशेषात् पाखण्डापाखण्डमतभेदो न स्यात् । तथाच प्रमाणेन खण्डिताः पाखण्डा इत्यपि न स्यादित्याह ॥ अन्यथेति ॥

अस्तु दानाध्ययनादिरेव विचित्रो हेतुर्जगद्वैचित्र्यस्येतिचेन्न। क्षणिकत्वादपेक्षितस्य कालान्तरभावित्वात् ॥

चिरध्वस्तं फलायालं न कर्मातिशयं विना ॥
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥९॥

तस्मादस्त्यतिशयः कश्चित् । ईदृशान्येवैतानि स्वहेतुबलायातानि, येन नियतभोगसाधनानीति चेत् । तदिदममीषामतीन्द्रियं रूपं सहकारिभेदो वा ?। न तावदैन्द्रियकस्यातीन्द्रियं रूपम् । व्याघातात् ।

द्वितीये त्वपूर्वसिद्धिः । सिद्ध्यतु भूतधर्म एव गुरुत्वादिवदतीन्द्रियः । अवश्यं त्वयाऽप्येतदङ्गीकरणीयम् । कथमन्यथा मन्त्रादिभिः प्रतिबन्धः । तथाहि । करतलानलसंयोगाद् यादृशादेव दाहो दृष्टः, तादृशादेव मन्त्रादिप्रतिबन्धे सति दाहो न जायते । असति तु जायते । तत्र न दृष्टवैगुण्यमुपलभामहे । नापि दृष्टसादृगुण्ये अदृष्टवैगुण्यं सम्भावनीयम् । तस्यैतावन्मात्रार्थत्वात् । अन्यथा, कर्मण्यपि विभागः कदाचिन्न जायेत । न च प्रतिबन्धकाभावविशिष्टा सामग्री कारणम् । अभावस्याकारणत्वात् । तुच्छो ह्यसौ । प्रतिबन्धकोत्तम्भकप्रयोगकाले च तेन विनापि कार्योत्पत्तेः । प्राक्प्रध्वंसादिविकल्पेन चानियतहेतुकत्वापातात् । अकिञ्चित्करस्य प्रतिबन्धकत्वायोगात् । किञ्चित्करत्वे चातीन्द्रियशक्तेः स्वीकारात् । मन्त्रादिप्रयोगे चेतरेतराभावस्य सत्त्वेऽपि कार्यानुदयात् । अतोऽतीन्द्रियं किञ्चिद्दाहानुगुणमनुग्राहकमग्नेरङ्गीक्रियते, यस्यापकुर्वतां प्रतिबन्धकत्वमुपपद्यते । यस्मिन्नऽविकले कार्यं जायते । यस्यैकजातीयत्वादनियतहेतुकत्वं निरस्यते इति ॥

आस्त्विति ॥ न तु तज्जन्यमदृष्टमित्येवकारार्थः । तथाचादृष्टाऽधिष्ठातृत्वेन ईश्वरानुमानमाश्रयासिद्धमिति भावः॥क्षणिकत्वादिति ॥ आशुतरविनाशित्वादित्यर्थः ॥ चिरध्वस्तमिति ॥ फलस्य स्वर्गादेः कालान्तरभावितया न तत्राशुविनाशिनः साक्षात्साधनत्वमिति प्रतीतसाधनत्वानुपपत्त्या तज्जन्यापूर्वकल्पनमित्यर्थः । अतिशयं विना चिरध्वस्तं कर्म्म न फलायालं समर्थमिति योजना । साक्षात्साधनत्वाभावेऽपि साधनत्वस्य फलसमयपर्यन्तस्थायिव्यापारव्याप्तत्वा-

दिति भावः । ननु चादृष्टसिद्धावपि भूतधर्म्म एव तदस्त्वित्यत आह ॥ सम्भोगः समीचीनो नियतो भोगो निर्विशेषाणामदृष्टरूपविशेषरहितानामात्मनां न स्यात् । संस्कृतानां भूतानां साधारणत्वादित्यर्थः । अत्र स्वहेतुबलोत्पन्नस्वरूपविशेषवन्ति शरीरादीनि नियताऽऽत्मभोगसाधनानि सन्त्विति शङ्कते ॥ ईदृशानीति ॥ एतद्विकल्प्य व्याघाताभिमतसिद्धिभ्यां परिहरति ॥ तदिदमिति ॥ रूपं स्वरूपम्, अतीन्द्रियस्वभावत्वमित्यर्थः । सहकारिभेदोऽतीन्द्रियसहकारी । यद्वा, रूपं धर्मो जातिरूपोऽजातिरूपो वा ? । आद्ये, न तावदिति ॥ व्यक्तियोग्यतयैव जातेर्योग्यत्वादित्यर्थः । अन्त्यं शङ्कते॥सिद्ध्यत्विति ॥ नैतावताऽप्यात्मधर्मापूर्वसिद्धिः । भूतवृत्त्यतीन्द्रियधर्मादेवोपपत्तेरिति भावः ॥ गुरुत्वादिवदित्यादिपदेन मीमांसकाभिमतशक्तिर्गृह्यते । तत्र शक्तावर्थापत्तिं प्रमाणयति ॥ तथाहीति ॥ शक्तौ विप्रतिपत्तिः । कारणानि स्वजन्यानुकूलाद्विष्टातीन्द्रियभावभूतधर्मवन्ति, न वा ? आत्मन्यदृष्टं तथा प्रसिद्धम् । यद्वा, कारणतावच्छेदकत्वमतीन्द्रियत्वव्याप्यं न वेति सामान्यतः । विशिष्य तु, वह्निर्दाहानुकूलाद्विष्टातीन्द्रियभावभूतधर्मवान्न वा ? करतलानलसंयोगो वा तादृशधर्मसमवायी न वा ? । आत्मा तथा प्रसिद्धः । अनुकूलत्वञ्च कार्याभावव्याप्याभावप्रतियोगित्वं कारणतदवच्छेदकोभयसाधारणम् इति नापसिद्धान्ताप्रसिद्धी । अर्थापत्तौ दृष्टादृष्टान्यतरवैगुण्येनान्यथोपपत्तिं निराकरोति ॥ तत्रेति ॥ दाहकोष्णस्पर्शस्य पूर्ववत् सत्त्वादित्यर्थः । न च मन्त्रादिना स एव नाश्यते । पुरुषान्तरेणौष्ण्यानुभवादिति भावः ॥ तस्येति ॥ अदृष्टस्य दृष्टसाकल्यमात्रार्थत्वादित्यर्थः ॥

ननु परमाणुकर्मणि, अध्ययनतुल्यत्वेऽप्येकत्र फलाभावे, वन्ध्यासम्प्रयोगे चादृष्टविलम्बो दृष्टोपसंहारे सत्यपि । मैवम् । अदृष्टविलम्बो हि न तावन्नाशानुत्पादौ । मण्याद्यपसारणानुपदं दाहाभावापत्तेः । अदृष्टोत्पादकस्य तत्राभावात् । अदृष्टजनकशौचाचमनादेः साधारणस्याप्यत्रान्वयापत्तेः । अशुचेरेव च तदुत्पादे शौचे सति तदभावापत्तेः । अदृष्टात्यन्ताभावस्य च तत्राभावात् । कदाचिद्दाहात् । दाहादिकार्यविशेषे यावद्दृष्टसमवधानेऽवश्यमदृष्टसद्भावात्तदभिप्रेत्य एतदुक्तमित्यन्ये ॥

ननु मण्यादिना दाहप्रतिपक्षस्यादृष्टभेदस्योत्पादनाद्दाहस्याभावः स्या-

त् । न चाग्न्यन्तरेणापि तस्य दाहाभावापत्तिः । प्रतिनियताग्निसाध्य-दाहप्रतिपक्षस्यैवादृष्टस्यानेन जननात् । औषधिलिप्तकाष्ठादिषु लेपकारिपुरुषनिष्ठस्य तस्योत्पादनात् । अदृष्टविशेषार्जितप्रतिपक्षसमवधानस्य वा प्रतिबन्धकत्वम् । स च दाहाभावकल्प्यः । मैवम् । तस्योत्तेजकाभावविशिष्टमण्यजन्यत्वे नियमेनादाहार्थिनस्तत्राप्रवृत्त्यापत्तेः । तज्जन्यत्वे तु प्रथमोपस्थितोपजीव्यत्वेन तदुत्पादकस्यैव हेतुत्वौचित्यात् । प्रतिबन्धकाभावहेतुत्वस्य तथाप्यभ्युपगमात् ॥

अन्यथेति ॥ अविनश्यदवस्थकर्मण्यपीत्यर्थः । अतो यदभावात् कार्याभावस्तद्वह्न्यादावभ्युपेयम् । तेन विना तदभावाधीनदाहाद्यऽभावानुपपत्त्याऽर्थापत्तेः शक्तिसिद्धिरिति भावः । ननु यत्किञ्चिद्दाहप्रयोजकाभावस्तत्र सिद्ध्यति, न तूक्तरूपः । यद्भावे दाहाभावस्तदभाव एव प्रयोजकोऽस्तु । अन्वयाद्यनुविधानादुभयसिद्धत्वाच्चेत्यत आह ॥ न चेति ॥ तुच्छो हीति ॥ तुच्छत्वं विधिरूपरहितत्वम् । अत्र कारणत्वं विधित्वव्याप्यमित्याशयात् । न त्वलीकत्वम् । मीमांसकैस्तथाऽनङ्गीकारात् । एतच्चाग्रे स्फुटम् । व्यतिरेकव्यभिचारमाह ॥ प्रतिबन्धकेति ॥ एकप्रतिबन्धकसत्त्वे तदन्यप्रतिबन्धकाभावे कार्यानुदयादन्वयव्यभिचारोऽपीति भावः । सामान्यतो व्यतिरेकव्यभिचारमुक्त्वा विशिष्य तमाह—

प्रागिति ॥ परस्परव्यभिचारेण प्रतिबन्धकाभावहेतुत्वस्य ग्रहीतुमशक्यत्वाद् न तेनान्यथोपपत्तिरित्यर्थः । तावतामुपसंग्राहकश्चैक उपाधिर्नास्तीत्यभिमानः । अत्र प्रागभावेनि वक्तव्ये प्रध्वंसपदगम्याभावविशेषणतया प्रागभावस्य प्राप्तेः प्रागित्येतावन्मात्रमुक्तम् । प्रतिबन्धकत्वान्यथानुपपत्तिरूपामप्यर्थापत्तिमाह ॥ अकिञ्चिदिति ॥ प्रतिबन्धजननं विना प्रतिबन्धकत्वानुपपत्तेरित्यर्थः । अथ शक्तिनाशरूपप्रतिबन्धजनकत्वात्तत्त्वं तत्राह ॥ किञ्चित्करत्व इति ॥ प्रतिबन्धकाभावमात्रकारणत्वे दूषणान्तरमाह ॥ मन्त्रादीति ॥ यदि प्रागभावादिष्वनुगमकमभावत्वमेव, तदाऽन्योन्याभावेऽपि तदस्तीति प्रतिबन्धकसत्त्वेऽपि तदन्योन्याभावमादाय कार्योत्पत्तिप्रसङ्गः । संसर्गाभावत्वञ्च तद्व्यावृत्तं निर्वक्तुमशक्यमित्यर्थः । सिद्धमर्थमुपसंहरति ॥ अतीन्द्रियमिति ॥

ननु अनुगुणत्वं कार्याभावव्याप्याभावप्रतियोगित्वं सहकारिणोऽप्य-

स्तीति शक्तेः सहाकारित्वाभ्युपगमेऽपसिद्धान्तः । शक्तिमत्कारणं न शक्तिरिति स्वीकारादिति विशिनष्टि ॥ अनुग्राहकमिति ॥ कारणतावच्छेदकमित्यर्थः ॥ यस्यापकुर्वतामिति ॥ कर्म्मणः कारकस्यैव सम्बन्धमात्रविवक्षया षष्ठी । यस्येत्यनन्तरं स्वरूपमिति शेष इत्यन्ये । तथाच कारणतावच्छेदकशक्तेः प्रतिबन्धकेन नाशात् सति प्रतिबन्धके कार्याभाव उपपद्यते । नित्यानित्यघटितसामग्र्यां नित्यकारणशक्तेरनुत्पन्नभावत्वेनानाशेऽप्यनित्यकारणशक्तिनाशात् कार्याऽभावः । नचैवं पुरुषान्तरस्यापि ततोऽग्नेर्दाहानुत्पत्तिः । प्रतिनियतकरतलानलसंयोगगतदाहानुकूलशक्तेर्नाशादिति भावः।शक्तेः प्रदेशाऽन्तरेऽप्युपयोगमाह ॥ यस्येति ॥ तृणादीनां व्यभिचारात्कारणत्वमनुपपद्यमानमनुगतसामर्थ्यमतीन्द्रियं कल्पयतीत्यर्थः ॥

अत्रोच्यते ॥

भावो यथा तथाऽभावः कारणं कार्यवन्मतः ॥
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः ॥ १० ॥

न ह्यभावस्याकारणत्वे प्रमाणमस्ति। न हि विधिरूपेणासौ तुच्छ इति स्वरूपेणापि तथा, निषेधरूपाऽभावे विधेरपि तुच्छत्वप्रसङ्गात्। कारणत्वस्य भावत्वेन व्याप्तत्वात्तन्निवृत्तौ तदपि निवर्त्तते इति चेन्न। परिवर्त्तप्रसङ्गात् । अन्वयव्यतिरेकानुविधानस्य च कारणत्वनिश्चयहेतोर्भाववदभावेऽपि तुल्यत्वात् । अभावस्यावर्ज्जनीयतया सन्निधिर्न तु हेतुत्वेनेति चेत्, तुल्यम् । प्रतियोगिनमुत्सारयतस्तस्यान्यप्रयुक्तः सन्निधिरिति चेत्, तुल्यम् । भावस्याभावोत्सारणं स्वरूपमेवेति चेदभावस्यापि भावोत्सारणं स्वरूपान्नाऽतिरिच्यते । तस्माद्यथा भावस्यैव भावो जनक इति नियमोऽनुपपन्नः, तथा भाव एव जनक इत्यपि । को ह्यनयोर्विशेषः । प्रतिबन्धकोत्तम्भकप्रयागकाले तु

व्यभिचारस्तदा स्यात्, यदि यादृशे सति कार्यानुदय-स्तादृश एव सत्युत्पादः स्यात् । न त्वेवं तदाऽपि प्रतिपक्षस्याभावात् । असत्प्रतिपक्षो हि प्रतिबन्धकाभिमतो मन्त्रः प्रतिपक्षः । स च तादृशो नास्त्येव । यस्त्वस्ति, नासौ प्रतिपक्षः । तथापि विशेष्ये सत्येव विशेषणमात्राभावस्तत्र स चोत्तम्भकमन्त्र एवेत्यन्यैव सामग्रीति चेत् । न । विशिष्टस्याप्यभावात् । न हि दण्डिनि सत्यऽदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैव केवलस्येति युक्तम् । यथा हि केवलदण्डसद्भावे उभयसद्भावे द्वयाभावे वा केवलपुरुषाऽभावः सर्वत्राविशिष्टः, तथा केवलोत्तम्भकसद्भावे प्रतिबन्धकोत्तम्भकसद्भावे द्वयाभावे वा केवलप्रतिबन्धकाभावोऽविशिष्ट इत्यवधार्यताम् । अथैवम्भूतसामग्रीत्रयमेव किं नेष्यते? कार्यस्य तद्व्यभिचारात् । जातिभेदकल्पनायाश्च प्रमाणाभावात् । यथोक्तेनैवोपपत्तेः । भावे वा काममस्तु, का नो हानिः । प्राक् प्रध्वंसविकल्पोऽपि नानियतहेतुकत्वापादकः, यस्मिन् सति कार्यं न जायते तस्मिन्नसत्येव जायते इत्यत्र संसर्गाभावमात्रस्यैव प्रयोजकत्वात् ॥

भावो यथेति ॥ यथा येन प्रकारेणान्वयाद्यनुविधानेन कारणत्वग्राहकेन भावः कारणं मतः, तेनैवाभावोऽपि कारणम् । तथात्वेऽपि भावत्वव्याप्तं कारणत्वमिति यदि ब्रूयात्तत्राह ॥ कार्यवदिति ॥ तर्ह्यभावो नियतोत्तरवर्त्तित्वेन कार्योऽपि न स्यात् । भावत्वव्याप्यत्वात् कार्यत्वस्य । अथ वैपरीत्यस्यापि सुवचत्वान्न तथा, एवमभावः कारणमपि तत्त्वस्य भावत्वव्याप्यत्वे मानाभावादित्यर्थः । द्वितीयामर्थापत्तिं दूषयति ॥ प्रतिबन्ध इति ॥ सामग्र्यन्तर्गतमन्त्राद्यभावविनिगमक एव

प्रतियोगिरूपः प्रतिबन्धः । तत्कारणञ्च प्रतिबन्धकः पुरुषो, न तु मण्यादिः । स च किञ्चित्कर एवेत्युभयसिद्धमित्यन्यथोपपत्तिरित्यर्थः । ननु तुच्छत्वमेव तत्र मानमुक्तमित्यत आह ॥ न हीति ॥ तुच्छत्वं हि भावनिषेधरूपत्वमुक्तम् । तच्चाप्रयोजकम् । अन्वयादिरहितत्वस्योपाधित्वात् । न चान्यनिषेधरूपत्वेनैवाकारणत्वं, भावस्याप्यभावनिषेधरूपत्वेनाकारणत्वापातात् । अथाकारणत्वे तन्त्रमस्वरूपत्वम् । भावश्च स्वरूपमेवेति मतं, तर्ह्यभावेऽपि तुल्यमित्यर्थः ॥ परिवर्त्तेति ॥ कारणत्वमभावत्वव्याप्यमिति भावः । कारणं न स्यादित्यर्थः । नियतपूर्ववर्त्तित्वमात्रं कारणत्वं, तच्चाभावेऽप्यस्तीति भावः । कारणत्वग्राहकमप्युभयसाधारणमित्याह ॥ अन्वयेति ॥ न च सत्ताविशिष्टस्य कारणत्वं, जात्यादेरप्यतत्त्वापातादित्यर्थः ॥

अभावस्येति ॥ अन्वयाद्यनुविधाने तुल्येऽप्यभावसन्निधिराकाशस्येवाऽन्यथासिद्ध इत्यर्थः ॥ तुल्यमिति ॥ अभावस्यैव कारणत्वे भावसन्निधिस्तथेत्येव किन्न स्यादित्यर्थः ॥ प्रतियोगिनमिति ॥ विध्युत्सारणप्रयुक्तसान्निधिरभावस्येत्यन्यथासिद्ध इत्यर्थः ॥ तुल्यमिति ॥ भावस्याप्यभावोत्सारणप्रयुक्तः सोऽप्यन्यथासिद्धः स्यादित्यर्थः ॥ अभावस्यापीति ॥ भावाभावयोः स्वरूपमेव मिथोविरोधो, न तूत्सारणमन्यदित्युभयसमानमित्यर्थः । वस्तुतस्तु कुड्यसंयोगाभावस्य गतौ, अनुपलब्धेश्चाभावज्ञाने, विहिताकरणस्य प्रत्यवाये, निर्दोषत्वस्य वेदप्रामाण्यज्ञाने जनकत्वस्य मीमांसकैरपि स्वीकारादभावस्य कारणत्वानभ्युपगमेऽपसिद्धान्त इति रहस्यम् ॥ अनुपपन्न इति ॥ प्रमाणाभावादिति शेषः ॥ प्रतिबन्धकेति ॥ तत्रापि प्रतिबन्धकस्याऽभावो, न तु तत्सद्भाव इति, न व्यतिरेकव्यभिचार इत्यर्थः । ननु प्रतिबन्धकोत्तम्भकसत्त्वे कथं प्रतिबन्धकस्याभाव इत्यत आह ॥ असत्प्रतिपक्षो हीति ॥ उत्तम्भकाभावविशिष्टो यः प्रतिबन्धकस्तस्याभावः कारणम् । स चोभयसद्भावेऽप्यस्तीत्यर्थः ॥ प्रतिबन्धकाभिमत इति ॥ प्रतिबन्ध एव प्रतिबन्धकः । स्वार्थे कः । तत्त्वेनाभिमत इत्यर्थोऽतो न विरोधः ॥ यस्त्विति ॥ कार्याभावोन्नेयं प्रतिपक्षत्वं कार्यसत्त्वे नास्तीत्यर्थः ॥ तथापीति ॥

यत्रोत्तम्भकाभावे सति प्रतिबन्धकस्याभावस्तत्र विशेष्यप्रतिबन्धकस्यैवाभावः कारणम् । यत्र तु प्रतिबन्धकसद्भावे सत्युत्तम्भकसद्भा-

वात् कार्य, तत्रोत्तम्भकाभावस्य विशेषणस्याभाव एव कारणमिति सामग्रीभेद इत्यर्थः ॥ विशिष्टस्यापीति ॥ विशेषणाद्यभावे सर्वत्र विशिष्टाभावोऽप्यस्तीति स एवानुगतः कारणमित्यर्थः । तदेवोदाहरणेनोपपादयति ॥ न हीति ॥ दण्डिनि सत्यऽदण्डानां दण्डाभाववतामन्येषामभावः, किन्तु दण्डाभावस्यैवेति न, किन्त्वभावोऽस्त्येवान्येषामपीति लोकसिद्धमित्यर्थः । तदेव स्पष्टयति ॥ यथा हीति ॥ पुरुषे दण्डाभाववैशिष्ट्यं कैवल्यम् । प्रतिबन्धके तूत्तम्भकाभाववैशिष्ट्यम् । यथा केवलदण्डसद्भावे विशेषणविशेष्योभयाभावाद्दण्डपुरुषसद्भावे विशेषणदण्डाभावविरहादुभयाभावे विशेष्यपुरुषाभावात् कैवल्यविशिष्टपुरुषाभावोऽनुगतोऽबाधितव्यवहारबलात् सर्वप्रतीतिसिद्धः, तथा केवलोत्तम्भकसद्भावे विशेषणविशेष्यद्वयाभावादुत्तम्भकप्रतिबन्धकसद्भावे विशेषणोत्तम्भकाभावविरहादुभयाभावे च विशेष्यप्रतिबन्धकाभावाद् उत्तम्भकाभावविशिष्टप्रतिबन्धकाभावोऽनुगतो विशेषणाद्यभावव्यापको दाहकारणमित्यर्थः ॥

ननु विशिष्टं नार्थान्तरं, येन तदभावोऽनुगतः स्यात् । किन्तु विशेषणविशेष्यसम्बन्धा इति तेषां प्रत्येकाभावस्य कारणत्वे सामग्रीभेदस्तदवस्थः । न च व्यासज्यप्रतियोगिकोऽन्य एवायमभावः, केवलप्रतिबन्धकसत्त्वेऽपि तदभावाद्दाहापत्तेः । एकसत्त्वेऽपि द्वयमिह नास्तीति प्रतीतेः । तस्य समुदायविरोधिनो यावत्समुदायिसत्त्वे एव विरहात् । तादृशाभावानभ्युपगमाच्च । व्यासज्यवृत्तिधर्मसमानाधिकरणप्रत्येकपर्यवसितप्रतियोगिकाभावादेव तज्जन्यप्रतीत्युपपत्तेः ॥

अथ विशिष्टविरोधित्वमेवानुगतं विशेषणाद्यभावानां कारणतावच्छेदकम् । यत्र विशिष्टं न तत्र तदभाव इति सहानवस्थाननियमस्य विरोधस्यानुभवसिद्धत्वादितिचेन्न । स हि परस्पराभावरूपतया, परस्पराभावव्याप्यतया वा, तदाक्षेपकतया वा ? । नाद्यः । विशेषणाद्यभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशेषणादेर्विशिष्टत्वापत्तेः । तदभावाभावस्य तत्त्वात् । न चोभयाभावाभाव एवोभयं विशिष्टम् । तथा सत्यऽभावद्वयस्य विशिष्टाभावत्वे प्रत्येकाभावाद्विशिष्टाभावव्यवहारानापत्तेः । नान्त्यौ । विशेषणाद्यभावस्य विशिष्टाभावत्वे तदव्याप्यत्वात्, तदनाक्षेपकत्वाच्च । अभेदे तयोरभावात् ॥

अथ विशिष्टानतिरेकेऽपि प्रतियोगिभेदादिव प्रतियोगितावच्छेदकविशेषणभेदादप्यभावो भिद्यते । यथा वायौ पृथिव्यादित्रयप्रत्येकरूपाभावे निश्चितेऽपि रूपत्वावच्छिन्नस्य तस्याभावानिश्चयाद्वायौ रूपं न वेति संशयः । एवमुत्तम्भकाभाववत्त्वेन मण्यादीनामभावः प्रतिबन्धकसत्त्वेऽप्युत्तम्भकाभावविरहादस्त्येवेति स एवानुगतो हेतुः स्यादिति चेत् । न । एवं क्षणरूपातीतविशेषणावच्छिन्नरूपत्वेन प्रतिक्षणं घटादिनाशे क्षणभङ्गापत्तेः प्रत्यभिज्ञानानुपपत्तेश्च । दण्डित्वावस्थायां केवलोऽयमासीत् पुरुष इत्यादौ विशेष्यवति, सविशेषणे हीति न्यायेन कैवल्याद्यभावस्यैव प्रतीतेः । अत एव विशेषणावच्छिन्नप्रतियोगिको विशेष्याभाव एव विशिष्टाभावः प्रत्येकाभावानुगतो हेतुरित्यपास्तम् ॥

अत्रास्मत्पितृचरणाः– विशेषणविशेष्ययोःसम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहारः । यतो यद्व्यवहारस्तदभावात्तदभावव्यवहारस्योचितत्वात् । अत एव यत्र यस्य सम्बन्धः स एव तत्र तस्य वैशिष्ट्यमिति नाननुगमः । तदिह प्रतिबन्धकोत्तम्भकाभावयोः सम्बन्धाभावः प्रत्येकाभावव्यापकोऽनुगतो दाहादिहेतुः । सर्वत्र प्रतिबन्धकोत्तम्भकाभावयोः सम्बन्धो नास्तीति प्रतीतेः । न चैवं प्रतिबन्धकोत्तम्भकाभावौ यत्र तत्रापि दाहापत्तिः । अभावाधिकरणयोरतिरिक्तसम्बन्धाभावादिति वाच्यम् । तदभावेऽपि स्वरूपसम्बन्धस्य भावात् । अथ तदुभयस्वरूपाभावस्य हेतुत्वे तदुभयाभावोत्तम्भकसत्त्व एव दाहः स्यात् । प्रतिबन्धकाभावोत्तेजकयोरेव तदुभयाभावरूपत्वादिति चेन्न । सम्बन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यत्वस्य स्वरूपसम्बन्धत्वात् तदभावस्य च प्रतिबन्धकाभावे प्रतिबन्धकोत्तम्भकसद्भावे तदुभयाभावे वाऽविशिष्टत्वात् ॥

ननु उत्तम्भकप्रयोगे मणेरभावो न प्रागभावप्रध्वंसात्मा । तयोः प्रतियोग्यसमानकालत्वात् । न चोत्तम्भकाभावप्रध्वंसप्रयुक्तेनोत्तम्भकाभाववत्त्वेन मणेर्ध्वंस एवेति वाच्यम् । क्षणभङ्गापत्तेरुक्तत्वात् । ध्वंसस्यानन्तत्वेनोत्तम्भकापनयेऽपि दाहप्रसङ्गाच्च । नाप्यत्यन्ताभावः । कादाचित्कत्वात् । न च विशेषणाद्यभावप्रत्यासत्तिकादाचित्कत्वात् कादाचित्कप्रतीतिकार्यानुदयाविति वाच्यम् । प्रत्यास-

त्तित्वावच्छेदकानुगतधर्माभावात् । विशिष्टविरोधित्वस्य च निरस्तत्वात् । मण्यादेः स्वावयववृत्तितया करादौ तदत्यन्ताभावस्य सदातनत्वात् । मणिसमवधानेऽपि दाहापत्तेश्च । मैवम् । क्लृप्तसंसर्गाभावत्रयवैधर्म्येऽप्यबाधितप्रतीतेस्तुरीयस्यैव तस्य सिद्धेः । क्लृप्तविशेषबाधतः सामान्यबाधे क्लृप्तानादिसंसर्गाभाववैधर्म्याद् ध्वंसस्याप्यसिद्ध्यापत्तेः । अबाधितसामान्यबुद्धेर्विशेषान्तरमादाय पर्यवसानमिति तु तुल्यम् । यद्वा । इह भूतले घटो नास्तीतिवत् संसर्गाऽवच्छिन्नप्रतियोगिकाभावविशेषस्य सति प्रतिबन्धके तत्राभावः । स च समवायावच्छेदेन संसर्गितयाऽत्यन्ताभाव एव । तादृशश्च मण्याद्यभावो घटाभाव इव भूतले करेऽपि वर्त्तते । नचैवं प्रागभावप्रध्वंसयोरप्यसिद्धिरत्यन्ताभावेनैव कालभेदात् कपाले घटो नास्तीति तज्जन्यबुद्ध्युपपत्तेरिति वाच्यम् । अत्यन्ताभावस्य घटसत्त्वकालेऽपि सत्त्वात्[illegible]ऽपि घटो भविष्यतीति घटसत्त्वविरोधिबुद्ध्यापत्तेः, प्रतियोगिसत्त्वविरोध्यभावस्वीकारात् । न च मणिसंयुक्तकरेऽपि तत्संयोगात्यन्ताभावोऽस्त्येव तस्याव्याप्यवृत्तित्वादिति तत्रापि दाहापत्तिः । समानाधिकरणप्रतियोगिसत्त्वविरोधिनस्तस्य हेतुत्वात् । प्रहरं मा दहेत्यत्र सावधिमन्त्रपाठे तु मन्त्रनाशेऽप्युद्देश्यत्वज्ञानाहितसंस्कारविषयकालस्य प्रतिबन्धकत्वमिति ॥ अथेति ॥ विशेषणाद्यभावत्रयघटितं सामग्रीत्रयमेव दाहहेतुरस्तु, किमनुगतेन विशिष्टाभावेनेत्यर्थः ॥ कार्यस्येति ॥ अन्योन्यव्यभिचारेणान्वयव्यतिरेकयोरशक्यग्रहत्वादित्यर्थः । ननु तत्तत्कारणप्रयोज्यो दाहे जातिभेद इति न व्यभिचार इत्यत आह ॥ जातिभेद इति ॥ दाहे वैजात्यस्य योग्यानुपलब्धिबाधितत्वाद् योग्यव्यक्तौ चायोग्यजात्यभावादित्यर्थः । ननु तृणादिजन्याग्निष्विव कारणभेदव्यङ्ग्यो जातिभेदः स्यादित्यत आह ॥ यथोक्तेनेति ॥ गौरवादिति भावः । तत्सत्त्वेऽपि न सिद्धान्तक्षतिरित्याह ॥ भावे वेति ॥ विशेषव्यभिचारमपाकरोति ॥ प्रागिति ॥ प्रतिबन्धकसंसर्गाभावसत्त्वस्योपाधेरनुगताननतिप्रसक्तस्य सत्त्वादित्यर्थः॥

नन्वन्योन्याभावव्यावृत्तस्य संसर्गाभावत्वस्योपाधेरभावात् प्रतिबन्धकसत्त्वेऽपि तदन्योन्याभावात् कार्यं स्यादित्यत आह–

यस्तु संसर्गाभावतादात्म्यनिषेधयोर्विशेषमना-

कलयन् इतरेतराभावेन प्रत्यवतिष्ठते, स प्रतिबोधनीयः । तथाप्यभावेषु जातेरभावात् कथं त्रयाणामुपग्रहः स्यात्, अनुपगृहीतानाञ्च कथं कारणत्वावधारणामिति चेत् । माभूज्जातिः । न हि तदुपगृहीतानामेव व्यवहाराङ्गत्वम् । सर्वत्रोपाधिमद्व्यवहारविलोपप्रसङ्गात् । एतेन प्रतिबन्धके सत्यपि तज्जातीयान्यस्याऽभावसम्भवात् कार्योत्पादप्रसङ्गोऽनुत्पादे वा ततोऽप्यधिकं किञ्चिदपेक्षणीयमस्तीति निरस्तम् । यथा हि तज्जातीये सति कार्यं जायते अर्थादसति न जायते इति स्थिते तद्भावेऽपि तज्जातीयान्तराभावान्न भवितव्यं कार्येणेति, न तथैतदपि । अनुकूलवत् प्रतिकूलेऽपि सति तज्जातीयान्तराभावानामकिञ्चित्करत्वादिति । यत्त्वकिञ्चित्करस्येति । तदप्यसत् । सामग्रीवैकल्यं प्रतिबन्धपदार्थो मुख्यः । स चात्र मन्त्रादिरेव, न त्वसौ प्रतिबन्धकः । ततः किं तस्याकिञ्चित्करत्वेन तत्प्रयोक्तारस्तु प्रतिबन्धारः । ते च किञ्चित्करा एवेति किमसमञ्जसम् ॥

ये तु व्युत्पादयन्ति, कार्यानुत्पाद एव प्रतिबन्ध इति । तैः प्रतिबन्धमकुर्वन्त एव प्रतिबन्धका इत्युक्तं भवति । तथाहि, कार्यस्यानुत्पादः प्रागभावो वा स्यात्, तस्य कालान्तरप्राप्तिर्वा ? न पूर्वः । तस्यानुत्पाद्यत्वात् । न द्वितीयः, कालस्य स्वरूपतोऽभेदात् । तदुपाधेस्तु मन्त्रमन्तरेणापि स्वकारणाधीनत्वात् । प्रागभावावच्छेदककालोपाधिस्तदपेक्ष इतिचेन्न । मन्त्रात् पूर्वमपि तस्य भावात् ॥

यस्त्विति ॥ प्रतिबोधनीयः प्रतिबन्धा बोधनीय इत्यर्थः । तथाहि अन्वयव्यतिरेकाभ्यां व्याप्तिकारणत्वयोर्ग्रहे मीमांसकैरपि संसर्गाभावस्य कारणत्वाङ्गीकारः । अन्यथा व्यापकसामग्र्याः सत्त्वेऽपि तदन्योन्याभावाद् व्याप्यकार्याभावापत्तेः । तत्रापि प्रतिबन्धकाभावेऽपि शक्तिरस्तीति प्रतिबन्धकसत्त्वे तदन्योन्याभावमादाय शक्तिसत्त्वप्रसङ्गश्चेति भावः ॥ मा भूदिति ॥ जात्यभावेऽपि संसर्गाभावत्वरूपैकोपाधिनैव कारणत्वमित्यर्थः । न च तद् निर्वक्तुमशक्यम् । अधिकरणे प्रतियोगिनमारोप्य यत्र निषेधबुद्धिस्तत्र संसर्गाभावो, यत्र तु प्रतियोगितावच्छेदकमारोप्य निषेधधीस्तत्र सोऽन्योन्याभाव इत्यऽस्मद्गुरवः ॥

ननु प्रतिबन्धकाभावो न हेतुः । एकदण्डान्वये घटोत्पत्तिवदेकप्रतिबन्धकसत्त्वेऽपि तदन्योन्याभावात् कार्योत्पत्त्यापत्तेः । न हि यावत्कारणत्वावच्छिन्नं तावदन्वये कार्यमित्यत आह ॥ एतेनेति ॥ अभावकारणत्वाङ्गीकारेण । यथा बीजजातीये सत्यपि बीजान्तराणामभावादङ्कुरेण न भाव्यमित्ययुक्तं, तथेदमपीत्यर्थः । प्रतिबन्धकत्वावच्छिन्नप्रतियोगिकः प्रतिबन्धकसामान्याभावः कारणम् । स च यावद्विशेषाभावनियत इति नैकप्रतिबन्धकसत्त्वे तदन्याभावात् कार्योत्पत्तिः । यद्वा, प्रतिबन्धकाभावत्वेन न कारणत्वम् । अन्योन्याश्रयात् । कारणीभूताभावप्रतियोगित्वस्य प्रतिबन्धकत्वात् । किन्तु मण्याद्यभावकूटस्य । स च तत्र नास्त्येवेति भावः ॥ मुख्य इति ॥ प्रतिबन्धपदस्य सामग्र्यन्तर्गतकारणविगमार्थत्वादित्यर्थः ॥

ये त्विति ॥ तथाच कार्यानुत्पादहेतुतया मन्त्रादिरेव प्रतिबन्धक इत्यस्त्वित्यर्थः ॥ कालस्येति ॥ कालप्रागभावस्वरूपातिरिक्तायास्तत्प्राप्तेरभावात्, स्वरूपस्य च तदजन्यत्वादित्यर्थः । प्रागभावावच्छेदकेत्यत्र कर्मधारयः । कालोपाधिमात्रस्य मन्त्राद्यजन्यत्वेऽपीति शेषः ॥

लोके कारणाभावात् कार्याभाव इति हेतुपञ्चमीप्रयोग औपचारिक इत्याह—

**तस्मात्, सामग्रीतत्कार्ययोः पौर्वापर्यनियमासद्भावयोरपि पूर्वापरभाव उपचर्यते । वस्तुतस्तु तुल्यकालत्वमेवेति नायं पन्थाः । न चेदेवं, शक्ति-**

स्वीकारेऽपि कः प्रतीकारः । तथाहि । प्रतिबन्धकेन शक्तिर्वा विनाश्यते, तद्धर्म्मो वा, धर्म्मान्तरं वा जन्यते, न जन्यते वा किमपि? इति पक्षाः। तत्राकिञ्चित्करस्य प्रतिबन्धकत्वानुपपत्तेः । विपरीतधर्म्मान्तरजनने तदभावे सत्येव कार्यमित्यभावस्य कारणत्वस्वीकारः प्रागभावादिविकल्पावकाशश्च । तद्विनाशे तद्धर्म्मविनाशे वा पुनरुत्तम्भकेन तज्जननेऽनियतहेतुकत्वं, पूर्वं स्वरूपोत्पादकादिदानीमुत्तम्भकादुत्पत्तेः । न च समानशक्तिकतया तुल्यजातीयत्वान्नैवमिति साम्प्रतम् । विजातीयेषु समानशक्तिनिषेधात् । न च प्रतिबन्धकशक्तिमेवोत्तम्भको विरुणद्धि, न तु भावशक्तिमुत्पादयति इति साम्प्रतम् । तदनुत्पादप्रसङ्गात् । कालविशेषात्तदुत्पादे तदेवानियतहेतुकत्वमिति ॥

तस्मादिति ॥ मुरारिमिश्रास्तु— न प्रतिबन्धकाभावः कारणं, न वा शक्तिः । किन्तु तत्तत्कालीनदाहविशेषं प्रति तत्तत्कालप्रतिबद्धेतरवह्नेः कारणत्वमिति प्रतिबन्धकाभावः कारणतावच्छेदको दण्डत्ववत्, न कारणम् । आकाशादौ त्वेकव्यक्तिके क्वचित् प्रतिबन्धेऽप्यन्यत्र शब्दोत्पत्तेरतथात्वेऽपि भेर्यादेरेव तथात्वेन कारणत्वमित्याहुः ॥ तन्न । दण्डसंयुक्तचक्रत्वेन कारणत्वे सहकार्य्युच्छेदापत्तेः । अन्वयव्यतिरेकतौल्येनोभयस्यापि हेतुत्वं विनिगमकाभावादित्यस्यापि तुल्यत्वात् । यद्धर्मवत्त्वमवगम्यैव यत्र यदवगमस्तत्र तस्य तदवच्छेदकत्वात् । प्रतिबन्धकाभावमनवगम्यापि वह्नेर्दाहहेतुत्वावगमात् । अन्यथा शक्तिस्वीकारेऽपि त्वदुक्तदोष इत्याह॥ न चेदेवमिति॥तदभावे विपरीतधर्मान्तराभावे ॥ पूर्वमिति ॥ नित्ये नित्यैव सा शक्तिरनित्ये भावहेतुजा * इति पराभ्युपगमादित्यर्थः ॥ विजातीयेष्विति ॥ शक्त्यनुकूलशक्त्यन्तरपरम्परानुसरणेऽनवस्थानञ्चेति भावः ॥ तदनुत्पादेति ॥ प्रतिबन्धकेन वह्निशक्तिनाशादुत्तेजकेन प्रतिबन्धकशक्तिनाशेऽपि

पुनर्वह्नौ शक्तिर्न स्यात्।पूर्वस्यानाशादन्यस्याश्च हेतोरभावादित्यर्थः॥

नन्वनुमानमस्तु शक्तौ मानम्। तथाहि। कारणानि स्वजन्यानुकूलाद्दिष्टभावभूतातीन्द्रियधर्मवन्ति। कारणत्वात्। आत्मवत्। तत्राद्दष्टं तथा सिद्धम्। नचात्मत्वमुपाधिः। अन्त्यशब्दध्वंसकारणकालाकाशयोः साध्याव्यापकत्वात्। तत्रान्त्यशब्दस्यैव तथात्वादिति सामान्यतः। विशिष्य तु, पिण्डीभूतो वह्निः कार्यानुकूलाद्दिष्टाऽतीन्द्रियधर्मसमवायी। जनकत्वात्। आत्मवत्। नचात्मत्वं नित्यत्वं वोपाधिः। स्पर्शैकत्वादिमति द्व्यणुके साध्याव्यापकत्वात्। करवह्निसंयोगो वा पक्षः। नचात्मत्वं द्रव्यत्वं वोपाधिः। द्व्यणुकैकत्वस्पर्शादौ साध्याव्यापकत्वात्। मण्यादिसमवहितो वा वह्निर्दाहजनकदशावृत्तिदाहानुकूलभावभूतधर्मशून्यः। दाहाजनकत्वात्। दाह्यासंयुक्ताग्निवत्। अत्रानुकूलत्वं न स्थितिस्थापकेनार्थान्तरवारणाय। तत्र तदभावात्। क्रियाया वेगेनाद्दष्टवदात्मसंयोगेन वोत्पत्तेः। किन्तु तथाभूतो धर्मः सिद्ध्यत्वित्येतदर्थम्।तच्च कारणतदवच्छेदकसाधारणं निरुक्तम्। अद्दष्टवदात्मसंयोगवारणार्थमद्दिष्टेति। न च तज्जनकत्वे मानाभावः। कार्यस्याद्दष्टजन्यतया व्यधिकरणगुणजन्यत्वात्। तस्य तत्समानाधिकरणगुणजन्यत्वव्याप्तत्वात्। स्पर्शवद्वेगवद्द्रव्याभिघातजन्यक्रियायां तथा दर्शनात्। उष्णस्पर्शव्यावर्तनायातीन्द्रियेति। तत्त्वं च साक्षात्कारनियामकप्रत्यासत्त्यनाश्रयत्वम्। प्रतिबन्धकाऽभावनिवारणाय भावभूतेति॥

उच्यते॥ अनुमानानां विपक्षबाधकाभावेनाप्रयोजकत्वम्। उभयसिद्धप्रतिबन्धकाभावेनैवोपपत्तेः।न च सहचारदर्शनव्यभिचारादर्शनाभ्यामेव व्याप्तिग्रहः। साध्ये शक्त्यतिरिक्तेतिविशेषणात्तेनैव हेतुना तत्सिद्धावेवं तत्तदतिरिक्तेतिविशेषणपरम्परातःन्ताद्दशानन्तधर्मसिद्ध्यापत्तेः। न च घटवत् क्षितिः क्षितिवद्धट इतीश्वरानन्त्यवच्छक्त्यानन्त्यम्। कार्यमात्रे नेश्वरत्वेन द्विकर्तृकत्वेन वा कारणता, गौरवात्। किन्तु कर्तृत्वेनेति तदापादकाभावः। प्रतिकूलतर्कप्रतिघातश्च। शक्तेर्भावहेतुत्वे शक्त्यनुकूलाऽप्यन्या शक्तिरेवं तत्तदनुकूलाऽप्यन्याऽन्येत्यनवस्थापातात्। भावभूतेति च व्यर्थम्। न च व्यापके न व्यर्थविशेषणता। व्याप्यताग्राहक इव व्यापकताग्राहकेऽपि लाघवस्य सहकारित्वात्। द्वितीयाद्यनुमानेषु बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः।

तुल्ययोगक्षेमत्वेऽपि सन्दिग्धोपाधित्वात् ॥

अस्मत्पितृचरणास्तु, जनकत्वस्य केवलान्वयित्वेन व्यतिरेकाप्रसिद्ध्या नान्वयव्यतिरेकत्वम् । न च शक्तावेव तत्प्रसिद्धिरन्योन्याश्रयात् । नाऽपि पण्डापूर्वपरार्द्धसङ्ख्ययोस्तत्प्रसिद्धिः । अप्रत्यक्षयोः शब्दैकवेद्ययोस्तयोर्व्याप्तिग्राहकेण प्रत्यक्षेण साध्यहेतुव्यतिरेकस्य ग्रहीतुमशक्यत्वादित्याहुः ॥

स्यादेतत् । मा भूत् सहजशक्तिराधेयशक्तिस्तु स्यात् । दृश्यते हि प्रोक्षणादिना व्रीह्यादेरभिसंस्कारः । कथमन्यथा कालान्तरे तादृशानामेव कार्यविशेषोपयोगः । न च मन्त्रादीनेव सहकारिणः प्राप्य ते कार्यकारिण इति साम्प्रतम् । तेषु चिरध्वस्तेष्वपि कार्योत्पादात् । नाऽपि प्रध्वंससहायास्ते तथा । एवं हि यागादिप्रध्वंसा एव स्वर्गादीनुत्पादयन्तु, कृतमपूर्वकल्पनया । तेषामनन्तत्वादनन्तफलप्रवाहः प्रसज्ज्यते इति चेत्, अपूर्वेऽपि कल्पिते तावानेव फलप्रवाह इति कुतः । अपूर्वस्वाभाव्यादिति चेत्तुल्यमिदमिहाऽपि । तावताऽपि तत्प्रध्वंसो न विनश्यतीति विशेषः ॥

प्रोक्षणजन्यः कालान्तरकार्यानुकूलोऽतीन्द्रियो धर्मोऽस्तीत्युभयसिद्धम् । स व्रीहिसमवेतो न वेति नाधेयशक्तौ संशयः । ग्रन्थे प्रथमं संस्कारसाधनस्यार्थान्तरतापत्तेः । किन्तु प्रोक्षणं व्रीहिनिष्ठातीन्द्रियधर्मजनकं, न वा ? । व्रीहिगुरुत्वजनके तज्जनकत्वं प्रसिद्धम् । तत्राधायकं शक्तावाह ॥ दृश्यते हीति ॥ ननु व्रीहीन् प्रोक्षतीत्येतावन्मात्रं श्रूयते, न तु प्रोक्षणस्य संस्काराधायकत्वमपीत्यत आह ॥ कथमिति॥ कालान्तरेऽवघातादौ प्रोक्षितस्यैव व्रीहेर्विनियोगो न स्यादित्यवश्यं प्रोक्षणजन्यः संस्कारो व्रीहिनिष्ठः स्थिरोऽभ्युपगन्तव्य इत्यर्थः । नन्वऽवघातादौ कथं प्रोक्षितस्यैव व्रीहेरन्वयः । व्रीहीनवहन्तीत्यस्य व्रीहिमात्रान्वयेऽप्युपपत्तेः । अथावघाते व्रीहिविशेषाकाङ्क्षायां प्रोक्षितानामेवान्वयो व्यक्तिवचनानां सन्निहितविशेषपरत्वमिति न्यायात् । अ-

न्यथा प्रकरणोपस्थितहाने तदन्योपस्थितिकल्पने च गौरवमिति चेत्। तर्ह्येकस्य द्वयं यत्र प्रोक्षणं तत्रावघातो, न तु प्रोक्षणविशिष्टे इति तस्य कारणत्वज्ञानान्न तज्जन्यातिशयकल्पनम्। प्रोक्षिता व्रीहयोऽवघाताय कल्पन्ते इति वाक्यशेषादिति चेत्। न। तेनाप्यतीतप्रोक्षणे व्रीहावववघातान्वयो बोध्यते इति प्रोक्षणध्वंसस्य हेतुतापत्तेः। मैवम्। प्रोक्षणमवघातजनकं प्रमाणतस्तदर्थमुपादीयमानत्वाद् व्रीहिवत्। न च हेत्वसिद्धिः। अप्रोक्षितेऽवघातासम्भवादिति भावः॥

एतावता तज्जन्यव्यापारमात्रसिद्धावपि न संस्कारः सिद्ध्यति, ध्वंसेनैवोपपत्तेरित्याशङ्क्य निराकरोति॥ नापीति॥ तेषामिति॥ ननु ध्वंसव्यापारत्ववादिनां व्यापारस्य यावत्सत्त्वं फलोत्पादकत्वाप्रसिद्धिः। न च व्यापारकालस्य फलपूर्वत्वनियमेन फलानन्त्यापत्तिः। उत्तरकालीनकीर्त्तनादिनाऽप्यपूर्वे व्यभिचारात्॥ मैवम्॥ विवादाध्यासितः कालो यदि चैत्रस्वर्गोत्तरत्वे सति तत्स्वर्गजनकयागव्यापारवान् स्यात् तत्स्वर्गाधारः स्यादित्यापादनार्थत्वात्॥ अपूर्वेति॥ प्रतिनियतकालावच्छिन्नस्वर्गजनकस्वभावत्वादित्यर्थः॥ तुल्यमिति॥ तर्हि तद्ध्वंसस्यापि स एव स्वभाव इत्यग्रे सन्नपि न स्वर्गोत्पादक इत्यर्थः। अथ यागध्वंसो न व्यापारः, प्रतियोगिध्वंसयोरेकत्राजनकत्वादुपजीव्ययागकारणत्वभङ्गापत्तेः। प्रत्युत प्रतिबन्धकत्वापत्तिः। कारणीभूताभावप्रतियोगित्वादिति मतम्। तदपि तुल्यमिति भावः।

स्यादेतत्। उपलक्षणं प्रोक्षणादयो, न तु विशेषणम्। तथाचाविद्यमानैरपि तैरुपलक्षिता व्रीह्यादयस्तत्र तत्रोपयोक्ष्यन्ते। यथा गुरुणा टीका कुरुणा क्षेत्रमिति चेत्। तदसत्। न हि स्वरूपव्यापारयोरभावेऽपि उपलक्षणस्य कारणत्वं कश्चिदिच्छति, अतिप्रसङ्गात्। व्यवहारमात्रन्तु तज्ज्ञानसाध्यं, न तु तत्साध्यम्। तज्ज्ञानमपि स्वकारणाधीनं, न तु तेन निरन्वयध्वस्तेन जन्यते। अस्तु वा तत्राप्यतिशयकल्पना, किन्नश्छिन्नम्!!॥ यद्वा, यागादेरप्युपलक्षणत्वमस्तु

तदुपलक्षितः कालो यज्वा वा स्वर्गादि साधयिष्यति, कृतमपूर्वेण । न च देवदत्तस्य स्वगुणाऽऽकृष्टाः शरीरादयो भोगाय, तद्भोगसाधनत्वात् स्रगादिवदित्यन्वयिबलादपूर्वसिद्धेर्नाविशेष इति साम्प्रतम् । इच्छाप्रयत्नज्ञानैर्यथायोगं सिद्धसाधनात् । न च तद्रहितानामपि भोग इति युक्तिमद्, येन ततोऽप्यधिकं सिद्ध्येत् । नाऽपि स्वगुणोत्पादिता इति साध्यार्थः । मनसाऽनैकान्तिकत्वात् । नाऽपि कार्यत्वे सतीति विशेषणीयो हेतुः । तथाप्युपलक्षणैरेव सिद्धसाधनात् । असतां तेषां कथमुत्पादकत्वमिति चेत्, तदेतदभिमन्त्रणादिष्वपि तुल्यम् । तस्माद्भावभूतमतिशयं जनयन्त एव प्रोक्षणादयः कालान्तरभाविने फलाय कल्पन्ते । प्रमाणतस्तदर्थमुपादीयमानत्वात् । यागकृषिचिकित्सावदिति । अन्यथा कृष्यादयो दुर्घटाः प्रसज्ज्येरन् । बीजादीनामापरमाण्वन्तभङ्गात् तेषु चावान्तरजातेरभावाद् नियतजातीयकार्यारम्भानुपपत्तेः ॥

स्यादेतदिति ॥ यथाऽन्यत्रातीतेनाप्युपलक्षणेनोपलक्ष्यव्यावृत्तिबुद्धिस्तथा प्रोक्षणेनापि व्रीहेरिति तादृशानामेवोपयोगोऽन्यथासिद्ध इत्यर्थः ॥ न हीति ॥ अन्यत्राप्यतीतेनोपलक्ष्यव्यावृत्तबोधो न जन्यते । स्वरूपव्यापारयोरसत्त्वात् । किन्तु तज्ज्ञानेनेत्यर्थः । तर्हि तज्ज्ञानमेव, तज्जन्यं स्यादित्यत आह ॥ तज्ज्ञानमपीति ॥ ननु स्वकारणमपि तदेवेत्यत आह ॥ न त्विति ॥ अनुत्पादितव्यापारध्वस्तेनेत्यर्थः ॥ तत्रापीति ॥ उपलक्षणाभिमतेऽपीत्यर्थः । स्रगादिस्तन्निर्मितो दृष्टान्तः ॥ स्वगुणाकृष्टा इति ॥ स्वगुणसहकारिण इत्यर्थः, स्वगुणोत्पादिता इति वा । आद्ये, इच्छेति ॥ अन्त्यमाशङ्क्य निराचष्टे ॥ नाऽपीति ॥ उपलक्षणैरिति ॥ जन्मान्तरीयज्ञानेच्छाप्रयत्नैरित्यर्थः । सिद्धसाधनपदमत्रेष्टहानिपरम् । यथाश्रुतेऽपसिद्धान्तापातात् ॥ तस्मादिति ॥ यद्यपि पुरुष-

निष्ठातिशयेन सिद्धसाधनम्, तथापि व्रीह्यादिगतेति साध्यं विशेषणीयम्। यो यदुद्देशेनोपादीयते स तत्रातिशयजनक इति व्याप्तिरिति संप्रदायविदः॥

अस्मत्पितृचरणास्तु– सोऽतिशयो लाघवात् फलसमानाधिकरण इति व्रीहिनिष्ठ एव। तेन तत्समवहितत्वं व्रीहेः साक्षात् सम्बन्धात्। पुरुषनिष्ठत्वे व्रीहीणां साक्षात् सम्बन्धाभावात् परम्परासम्बन्धे गौरवं च। न च विहितत्वेन पुरुषनिष्ठातिशयजनकत्वमनुमेयम्। अप्रयोजकत्वात्। चिकित्सादिना व्यभिचाराच्चेत्याहुः। दृष्टान्तस्य साध्यवैकल्यमपाकरोति॥ अन्यथेति॥

प्रोक्षणादिजन्यातिशयसिद्धावपि तस्य व्रीहिनिष्ठत्वं न सिध्यतीत्याह—

अत्रोच्यते—

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः॥
स्वगुणाः परमाणूनां विशेषाः पाकजादयः॥ ११॥

यथा हि देवताविशेषोद्देशेन हुताशने हविराहुतयः समन्त्राः प्रयुक्ताः पुरुषमभिसंस्कुर्वते, न वह्निं नापि देवताः। तथा व्रीह्याद्युद्देशेन प्रयुज्यमानः प्रोक्षणादिः पुरुषमेव संस्कुरुते, न तम्। यथा च कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचां सञ्चरणजलक्षरणरूपा क्रिया, तथा व्रीह्यादीनां तत्तदुत्तरक्रियाविशेषाः। यथा चैकत्र कर्तृकर्मसाधनवैगुण्यात् फलाभावस्तथा परत्रापि। आगमिकत्वस्योभयत्रापि तुल्यत्वात्॥

न तर्हि बर्हिष इव व्रीह्यादेः पुनरुपयोगान्तरं स्यात्, उपयोगे वा तज्जातीयान्तरमप्युपादीयेत, अविशेषात्। न। विचित्रा ह्यभिसंस्काराः केचिद्व्याप्रिय-

**माणोद्देश्यसहकारिण एव कार्ये उपयुज्यन्ते । किमत्र क्रियतां, विधेर्दुर्लङ्घ्यत्वात् । यथा चाभिचारसंस्कारो यं देहमुद्दिश्य प्रयुक्तस्तदपेक्ष एव तत्संबद्धस्यैव दुःखमुपजनयति, नान्यस्य । न वा तदनपेक्षः । एवमभिमन्त्रणादिसंस्कारा अपि भवन्तो न मनागपि नोपयुज्यन्ते । कथं तर्हि व्रीह्यादीनां संस्कार्यकर्मतेति चेत्, प्रोक्षणादिफलसम्बन्धादेव ॥**

संस्कार इति ॥ अतिशयधर्मिग्राहकमानादेव लाघवसहकृतात् स एक एव सिद्ध्यति, पुरुषनिष्ठश्च । तथाहि । व्रीहिगतत्वे न तावत्सकलव्रीहिनिष्ठ एक एव । एकव्रीहिनाशे तन्नाशापत्तेः । न च यावदाश्रयनाशात्तन्नाशः । लाघवादाश्रयनाशस्यैव तन्त्रत्वात् । वृक्षादौ किञ्चिदाश्रयनाशात्तन्नाशेऽपि खण्डपटन्यायेन पुनरुत्पत्तिरित्यनेको वाच्यः । नचैवमेकव्रीहिनाशे फलानुदयः । तावत्संस्काराणामभावादिति वाच्यम् । संस्कारत्वेनैव प्रयोजकत्वात् । किञ्चित्तत्समवधानेऽपि दण्डादिवत्कार्यसत्त्वादिति गौरवम् । न च विनिगमकाभावः । प्रोक्षणमपूर्वजनकं, दृष्टद्वाराभावे सति कालान्तरभाविफलजनकतया विहितत्वात् । यागवत् । न चाऽप्रयोजकत्वम् । यागादीनामपूर्वजनकतायामुक्तरूपस्यैव प्रयोजकत्वात् । अन्यस्याननुगतत्वादिति भावः । कृष्यादिना व्यभिचाराभावं परोक्तदृष्टान्तस्यासिद्धिं चाह ॥ स्वगुणा इति ॥ तत्र दृष्टद्वारस्यैव सम्भवान्न व्यभिचारः । न वा तत्र परमाणौ अतिशय इति दृष्टान्तः साध्यविकल इत्यर्थः । यद्यपि पाकजा रूपादयोऽपि तन्निष्ठातिशया एवेति न साध्यवैकल्यं, तथाप्याधेयशक्त्यऽभावमात्रे तात्पर्यम् । न चाधेयशक्तिपाकजयोरतीन्द्रियत्वाविशेषात् कल्पनायामविशेषः । परमाणाववयविरूपादिसजातीयपाकजरूपाद्युत्पत्तेरावश्यकत्वात् । तत एव नियतकार्यजननोपपत्तौ शक्त्याधानकल्पने गौरवादिति भावः ॥

यो यदुद्देशेनोपादीयते इत्यत्र परोक्तानुमाने व्यभिचारमाह ॥ यथा हीति ॥ देवतायाः सिद्धत्वे यथा प्रीतिभागितयोद्देश्यत्वं तथा व्यापारभागितया व्रीहेरपीत्यर्थः । न च यद्गतफलार्थितया यत्क्रियते

तत् तद्गतमेव तदनुकूलमतिशयञ्जनयतीति व्याप्तेरनुमानं स्यादिति वाच्यम्। शत्रुवधमुद्दिश्य प्रवर्तितेन श्येनयागेन व्यभिचारादिति भावः। अथात्मनिष्ठसंस्कारस्य व्रीहिणा सम्बन्धाभावान्न मिथः सहकारित्वं स्यादित्यत आह ॥ यथा चेति ॥ संस्कारवदात्मसंयोगे मेघस्येव व्रीहेरपि तुल्य इत्यर्थः ॥

न च परम्परासम्बन्धे गौरवम्। प्रामाणिकत्वादिति भावः। नन्वात्मनोऽनधिकृतस्यापि सम्भवान्न तन्निष्ठः संस्कारः सम्भवतीति व्रीहिनिष्ठ एव स स्यादित्यत आह ॥ यथा चेति ॥ कर्तृवैगुण्ये संस्कारो नोत्पद्यते। तत्साद्गुण्यस्यापि हेतुत्वादित्यर्थः। नचाग्रे प्रधानयागाद्यभावाद् यत्र प्रधानापूर्वाभावस्तत्र प्रोक्षणजन्यापूर्वस्य कथं नाशः। तस्य भोगेतरनाश्यत्वादिति वाच्यम्। इतराङ्गापूर्वतुल्यत्वादिति भावः ॥ बर्हिष इवेति ॥ उत्पादिताङ्गापूर्वस्य बर्हिर्यागस्येव विनियुक्तविनियोगविरोधादित्यर्थः। यद्वा। बर्हिस्तृणानि बर्हिषि हविरासादयतीति वचनाद्यथा बर्हिषः पुनरुपयोगो, न तथा व्रीहेरिति व्यतिरेके दृष्टान्तः। ननु व्रीहिभिर्यजेतेति यागसाधनत्वेन व्रीहीणां विधानात्तत् स्यादित्यत आह ॥ उपयोगे वेति ॥ विचित्रा हीति ॥ संस्कारमाहात्म्यमेवेदं यन्निष्ठव्यापारेण पुरुषसंस्कारो जनितस्तस्य व्रीह्यादेः संस्कारः सहकारी, नान्यस्येत्यर्थः ॥ विधेरिति ॥ व्रीहीनवहन्तीति विधेः पूर्वोक्तन्यायेन प्रोक्षितव्रीहिष्वेव तात्पर्यादित्यर्थः। प्रोक्षिता व्रीहयोऽवघाताय कल्पन्ते इति वाक्यशेषसहितस्यैव विधेर्दुर्लङ्घ्यत्वादित्यर्थः। व्याप्रियमाणोद्देश्यसहकारित्वं संस्कारस्य नाऽस्माकमिष्टिकामित्याह ॥ यथा चेति ॥ ननु, व्रीहीन् प्रोक्षतीति द्वितीयाश्रुतेः क्रियाजन्येष्टफलभागित्वं व्रीहीणां प्रतीयते। न चापूर्वस्य व्रीहिवृत्तित्वं, साक्षात्सम्बन्धस्यौत्सर्गिकत्वादित्याह ॥ कथमिति ॥ प्रोक्षणक्रियाजन्यजलसंयोगेन धात्वर्थावच्छेदकफलेन साक्षात्सम्बन्धाद् व्रीहेः कर्मत्वमित्याह ॥प्रोक्षणादीति॥ न च जलसंयोगस्य कृत्स्नव्रीहिस्वभावः, कपिञ्जलन्यायेन व्रीहित्रयजलसंयोगेनैव बहुवचनोपपत्तेः। कालान्तरे कृत्स्नोपादानस्य च कृत्स्नोद्देश्यतामात्रप्रयुक्तत्वात्। अन्यथा शक्त्याधानपक्षेऽपि तुल्यत्वात्। न च विध्यपेक्षितफलभागित्वं द्वितीयाऽर्थः। तदव्युत्पत्तेः। ग्रामं गच्छतीत्यादौ तदभावात्। संयोगस्यापि विध्यपेक्षितत्वाच्च। अन्यथा तदनुपयोगापत्तेः। न च

जलसंयोगावच्छिन्नक्रियाविशेषः प्रोक्षणमिति कथं तदेकदेशस्य तन्साध्यताऽन्वय इति वाच्यम् । संयोगस्योपलक्षणत्वेनापदार्थत्वात् । अन्यथा यत्र नाधेयशक्तिः, सक्तून् प्रोक्षतीत्यादौ, तत्र का गतिः । वस्तुतो ज्ञानविषययोरिव व्रीहिपुरुषसंस्कारयोः स्वरूपमेव साक्षात्सम्बन्धो, न तु समवाय इति भावः ॥

पराभिप्रेतमनुमानमुद्भाव्यानैकान्तिकत्वं स्फुटयति—

**ननु यदुद्देशेन यत् क्रियते तत्तत्र किञ्चित्करम् । यथा पुत्रेष्टिपितृयज्ञौ । तथा चाभिमन्त्रणादयो व्रीह्याद्युद्देशेन प्रवृत्ता इत्यनुमानमितिचेत्, तन्न।हविस्त्यागादिभिरनैकान्तिकत्वात् । न हि ते कालान्तरभाविफलानुगुणं किञ्चिद् हुताशनादौ जनयन्ति । किं वा न दृष्टमिन्द्रियलिङ्गशब्दव्यापाराः प्रमेयोद्देशेन प्रवृत्ताः प्रमातर्येव किञ्चिज्जनयन्ति, न प्रमेये इति ॥ कृषिचिकित्से अप्येवमेव स्यातामिति चेन्न । दृष्टेनैव पाकजरूपादिभेदेनोपपत्तावदृष्टकल्पनायां प्रमाणाभावात् । तथा च लाक्षारसावसेको व्याख्यातः । अत एव बीजविशेषस्यापरमाण्वन्तभङ्गेऽपि परमाणूनामवान्तरजात्यभावेऽपि प्राचीनपाकजविशेषादेव विशिष्टाः परमाणवः, तं तं कार्यविशेषमारभन्ते । यथा हि कलमबीजं यवादेः, नरबीजं वानरादेः, गोक्षीरं माहिषादेर्जात्या व्यावर्त्तते, तथा तत्परमाणवोऽपि मूलभूताः पाकजैरेव व्यावर्त्तन्ते । न ह्यस्ति सम्भवो गोक्षीरं सुरभि मधुरं शीतं, तत्परमाणवश्च विपरीताः । तस्मात्तथाभूताः पाकजा एव परमाणवो यथाभूतैरेव आद्यातिशयोऽन्त्यातिशयोऽङ्कुरादिर्वेति किमत्र शक्तिकल्पनया ? । कल्पादावप्येवमेव ।**

इदानीं बीजादिसन्निविष्टानामस्मदादिभिरुपसंपादनं तदानीन्तु विभक्तानामदृष्टादेव केवलान्मिथः संसर्ग इति विशेषः । न च वाच्यमिदानीमपि तथैव किं न स्यात् ? यतः कृष्यादिकर्म्मोच्छेदे तत्साध्यानां भोगानामुच्छेदप्रसङ्गात् । अव्यवस्थाभयाच्च अदृष्टानि कर्म्माणि दृष्टकर्म्मव्यवस्थयैव भोगसाधनानीत्युन्नीयते । तस्मात्, पाकजविशेषैः संस्थानविशेषैश्च विशिष्टाः परमाणवः कार्यविशेषम् आरभन्ते । ते च तेजोऽनिलतोयसंसर्गैर्विशेषैः, ते च क्रियया, सा च नोदनाभिघातगुरुत्ववेगद्रवत्वाऽदृष्टवदात्मसंयोगेभ्यो यथायथमिति न किञ्चिदनुपपन्नम् । निमित्तभेदाश्च पाके भवन्ति । तद् यथा । हारीतमांसं हरिद्राजलाऽवसिक्तं हरिद्राग्निप्लुष्टम् उपयोगात् सद्योव्यापादयति । दशरात्रोषितं कांस्ये घृतश्चापि विषायते । ताम्रपात्रे पर्युषितं क्षीरमपि निःक्षायते इत्यादि । यत्र तर्हि तोये तेजसि वायौ वा न पाकजो विशेषस्तत्र कथमुद्भवानुद्भवद्रवत्वकठिनत्वादयो विशेषाः ? कथं वा पार्थिवे प्रतिमाऽऽदौ प्रतिष्ठाऽऽदिना संस्कृतेऽपि विशेषाभावात् पूजनादिना धर्मो,व्यतिक्रमे त्वऽधर्मोऽप्रतिष्ठिते तु न किञ्चित् ? ।न च तत्र यजमानधर्मेणान्यस्य साहायकमाचरणीयम् । अन्यधर्मस्यान्यं प्रत्यनुपयोगात् । उपयोगे वा साधारण्यप्रसङ्गात् ॥

नन्विति ॥ पुत्रेष्टीति ॥ वैश्वानरं द्वादशकपालं चरुं निर्वपेत् पुत्रे जाते इति पुत्रजन्मनिमित्तको यागो यस्यायमर्थवादो यस्मिञ्जाते एतामिष्टिं निर्वपति स पूत एव तेजस्वी अन्नादः पशुमान् भवतीति ॥ पितृयज्ञः—

पितृश्राद्धादि ॥ ननु ताभ्यां पितृपुत्रगतमेवापूर्वं जन्यते । विहितक्रियाया यागस्येव कर्तृगताऽपूर्वजनकत्वात् । न च मुक्ते कर्तरि तदृष्टनाशात् पुत्रादौ फलाभावोपपत्तिरिति वाच्यम् । अदृष्टस्य फलनाश्यत्वात् पुत्रादिफलाभावेनादृष्टानाशात् । अत्राहुः । फलोपपादकमदृष्टं फलाश्रये कल्प्यते । तस्य प्रथमोपस्थितत्वात् । साक्षादुपपादकत्वाच्च । मुक्ते च पितरि श्राद्धेन दोषाभावान्नादृष्टं जन्यते । न चैवं साङ्गश्राद्धस्य निष्फलत्वापत्तिः । अदृष्टोत्पत्तौ स्वरूपसतो दोषस्याङ्गस्य वैकल्यात् । अत्र किञ्चित्करत्वमात्रं साध्यम् । अतीन्द्रियत्वेन विशेषितं वा ? । आद्ये संयोगजननेन सिद्धसाधनमन्त्ये च यद्वावपूर्वहेतुहविःसंयोगेन हविस्त्यागेनानैकान्तिकमित्याह ॥ हविरिति ॥

किं वा नेति ॥ प्राभाकरं प्रत्यनैकान्तिकत्वम् । भाट्टानां प्रमेये ज्ञातताजननात् ॥ कृषीति ॥ प्रोक्षणवदपूर्वद्वारेणानागतकार्यहेतू स्याताभित्यर्थः ॥ दृष्टेनैवेति ॥ पाकजानामावश्यकतया तत एव नियतकार्योपपत्तेरित्यर्थः । ननु बीजपूरलाक्षारसावसेकस्याशु तरुविनाशिनः कालान्तरीयारुणकुसुमजनकत्वं तदाधेयशक्त्या विना न निर्वहतीत्यत आह ॥ तथा चेति ॥ तत्रापि तत्साहित्येनोत्पन्नपाकजादेरावश्यकत्वात् तथेत्यर्थः । अत एव शाल्यादिनियतकार्यारम्भान्यथाऽनुपपत्त्या परमाणावपि न तत्कल्पनमित्याह ॥ अत एवेति ॥ कार्यसजातीयपाकजवत्त्वं परमाणूनामप्यावश्यकमिति न तत्कल्पनं, येन कल्पनायामविशेषः स्यादित्याह ॥ न ह्यस्तीति ॥ शीतमित्युपष्टम्भकजलाभिप्रायम् । सौरभशैत्ययोरेकाधारत्वाभावात् । आद्यातिशयो द्व्यणुकम्, अन्त्यातिशयोऽङ्कुरादिरित्यभेदेनान्वयः । अन्त्यातिशयो वाऽङ्कुरादिरिति पाठेऽन्त्यातिशयोऽङ्कुरादिसमवायिकारणमित्यर्थः । यद्वा । आद्यातिशयो बीजस्योच्छूनत्वमन्त्यातिशय उच्छूनतरत्वम् । प्रलये कार्यद्रव्याभावेऽपि परमाणुषु नियतकार्योचितस्वभावानां पाकजानामात्मन्यदृष्टस्यैव सद्भावात्तत एव सर्गादावपि नियम इत्याह ॥ कल्पादाविति ॥ उपसंपादनं सहकारिसमवधानोत्पादनम् ॥ न चेति ॥ यदस्मदादिव्यापारं विना सर्गादावङ्कुरोत्पत्तिरिति शेषः ॥ यत इति ॥ यद्यपि कृष्यादिसाध्यभोगहेत्वदृष्टबलात् कृषिसंभवेऽपि सर्गादाविवेदानीमपि कृष्यादि विनाऽङ्कुरः स्यादेव, तथापि तथादर्शनबलात् कृष्यादिहेत्वदृष्टस्यैव तत्प्रतिबन्धकत्वमुन्नीयते । यद्वा, सर्गाद्यङ्कुर-

विजातीय एवेदानीमङ्कुरो यस्य कृष्याद्यपेक्षा । अत एव वैजात्याभावे दूषणमाह ॥ अव्यवस्था इति ॥ व्यभिचारेण कृष्यादीनां कारणत्वव्यवस्थैव न स्यादित्यर्थः । यद्वा भोगानियमप्रसङ्गश्चेत्यर्थः ॥ अदृष्टानीति ॥ कृष्यादिजन्याङ्कुरजनकमदृष्टं दृष्टकृष्यादिद्वारैव हेतुरित्यर्थः ॥ संस्थानेति ॥ संस्थानपदं संयोगमात्रपरम् । परमाणावचयवसंयोगाभावादित्येके । क्वचित् पाकविशेषं, क्वचित्परम्पराजन्ये समानजातीयरूपादौ शरीरादौ संस्थानविशेषमपेक्षन्ते परमाणव इत्यन्ये । एतच्च उभयमुपलक्षणम् । तुल्यपाकजसंस्थाने ब्राह्मणादावदृष्टविशेषस्यापि नैरपेक्षणात् । तर्हि पाकजोत्पत्त्यर्थमग्नावाग्नेयशक्तिरभ्युपेयेत्यत आह ॥ ते चेति ॥ ननु हारीतमांसं हरिद्राजलाद्यसिक्तं हरिद्रानलप्लुष्टं सद्यो भोक्तारं व्यापादयतीत्युभयवादिसिद्धम् । तत्रावश्यं तेन शक्तिराधेया । नचावश्यकात् पाकजादेवोत्पत्तिः । तस्य पीलालानलसाधितस्याव्यापादनेनानैकान्तादित्यत आह ॥ निमित्तेति ॥ पाकजभेदमात्रं न हेतुः, किं तु निमित्तभेदेनास्मादिनः पाकजविशेष इत्यर्थः । अग्नौ सहकारित्वमुक्त्वा सौरालोके तदाह ॥ दशरात्रेति ॥ ताम्रपात्र इत्यनेन पाकजविशेषस्य प्रत्यक्षत्वं वदता शक्त्यपेक्षया तत्र विनिगमकमुक्तम् ॥

उद्भवानुद्भवौ विशेषगुणप्रत्यक्षत्वाप्रत्यक्षत्वप्रयोजकौ तद्वन्निजातिभेदौ । पाकजवत्त्यवान्तरविशेषानुपपत्त्या शक्तिरास्थेयेत्यत आह ॥ पार्थिवेति ॥ नन्वन्यधर्मस्यान्यत्र सहकारित्वम् । यथा पात्राय दानेऽधिकपुण्यम् । धर्मविशेषवत्त्वमस्य पात्रत्वादित्यत आह ॥ उपयोगे चेति ॥ यजमानधर्मस्य भोगादिना क्षये पूजकस्य धर्मानुत्पादप्रसङ्गात् । तत्सत्त्वेऽपि चण्डालादिस्पर्शेनेनापूज्यत्वाच्चेति ॥

अत्रोच्यते—

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ॥
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥ १२ ॥

उपनायकादृष्टविशेषसहाया हि परमाणवो द्रव्यविशेषमारभन्ते । तेषां विशेषादुद्भवविशेषाः प्रादुर्भ-

वन्ति । तथा स्वभावद्रवा अप्यापो निमित्तभेदप्रतिबद्धद्रवत्वाः कठिनं करकाद्यमारभन्ते, इत्यादि स्वयमूहनीयम् । प्रतिमाऽऽदयस्तु तेन तेन विधिना सन्निधापितरुद्रोपेन्द्रमहेन्द्राद्यभिमानिदेवताभेदाः, तत्र तत्राऽऽराधनीयतामासादयन्ति । दष्टमूर्च्छितं राजशरीरमिव विषापनयनविधिनाऽऽपादितचैतन्यम् । सन्निधानञ्च तत्र तेषामहङ्कारममकारौ, चित्रादाविव स्वसादृश्यदर्शिनो राज्ञ इति नो दर्शनम् । अन्येषान्तु पूर्वपूर्वपूजितप्रत्यभिज्ञानाविषयस्य प्रतिष्ठितप्रत्यभिज्ञानविषयस्य च तथात्वमवसेयम् । एतेनाभिमन्त्रितपयःपल्लवादयो व्याख्याताः ॥

घटादिषु का वार्त्ता ? । कुशलैवेति चेन्न । नहि सामग्री दृष्टं विघटयति, नाप्यदृष्टं, ज्ञापकत्वात् । नाप्यदृष्टमुत्पादयति धर्मजनने सर्वदा विजयप्रसङ्गात् । विपर्यये सर्वदा भङ्गप्रसङ्गात् ॥

अत्रोच्यते—

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम् ॥
परीक्ष्यसमवेतस्य परीक्षाविधयो मताः ॥ १३ ॥

यद्यपि धर्माद्यभिमानिदेवतासन्निधिरत्रापि क्रियते ताश्च कर्मविभवाऽनुरूपं लिङ्गमभिव्यञ्जयन्तीत्यस्माकं सिद्धान्तः, तथापि परविप्रतिपत्तेरन्यथोच्यते । तेनापि हि विधिना तदेव जयस्य पराजयस्य वा निमित्तमभिव्यक्तं कार्यमुन्मीलयति । कर्मणश्चाऽभिव्यक्तिः सहकारिलाभ एव । तच्च सहकारि, सोऽहमनेन विधिना तुलामधिरूढो योऽहं पापकारी नि-

**ऽपापो वेति प्रत्यभिज्ञानम् । यदाहुः । तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः ॐ । अथवा । प्रतिज्ञाऽनुरूपां विशुद्धिमपेक्ष्य तेन धर्मो जन्यते । निमित्ततो विधानाद्विजयफलश्रुतेश्च । अविशुद्धिञ्चापेक्ष्याधर्मः । पराजयलक्षणानपेक्षितफलोपदर्शनेन फलतो निषेधात् ॥**

निमित्तभेदेति ॥ यद्यप्युद्भूतानुद्भूतपरमाणुरूपादेव तत्कार्य्यमुद्भूतमनुद्भूतं चोत्पद्यते इति निमित्तभेदस्तत्राप्रयोजकस्तथापि साक्षात्कारप्रयोजकतयोद्भूतत्वकल्पनात् परमाणुगुणेषु तदभावात् तन्नास्तीत्यदृष्टविशेषादेवानुद्भूतरूपादप्युद्भूतरूपं जायते इत्यभ्युपेयम् । न च याऽवयविरूपवृत्तिजातिः सा परमाणुरूपवृत्तिरिति व्याप्तिः । चित्रत्वजातौ व्यभिचारात् । उद्भवानुद्भवादय इत्यतद्गुणसंविज्ञानबहुव्रीहिणा कठिनकरकाविद्युदादीनां संग्रह इत्यप्याहुः । देवता इत्यत्राराधनीयतामासादयन्तीत्यध्याहार्यम् ॥ उपनायकेति ॥ परमाणुक्रियाजनकमदृष्टमित्यर्थः ॥

अहङ्कारेति ॥ न च देवतानां विशेषदर्शनवत्त्वान्न भ्रम इति वाच्यम् । अभिमानीत्यनेनाहार्यारोपरूपत्वस्य दर्शितत्वात् । ज्ञानस्य नाशेऽपि तज्जन्यसंस्कारस्य सत्त्वात् । अस्पृश्यस्पर्शादिना च तन्नाशात् । अचेतनदेवतापक्षे त्वाह ॥ अन्येषामिति ॥ आद्यपूजायां न पूजितप्रत्यभिज्ञानमित्यत उक्तं— प्रतिष्ठितेति ॥ अत्राप्यस्पृश्यस्पर्शनादिसंसर्गाभावसहकृतस्येति द्रष्टव्यम् । प्रतिष्ठितं पूजयेदिति विधिबलात् तज्ज्ञानस्यावश्यकत्वात् । अत एव तदभावे पूजा निष्फलैवेति भावः ॥

घटस्तुला ॥ न हीति ॥ सामग्री परीक्षासामग्री ॥ अवनतिहेतोर्दृष्टस्यादृष्टस्य वा विघटने संदेयोन्नमनप्रसङ्गादित्यर्थः । तस्माद्भूताऽर्थपरिच्छेदिका शक्तिस्तुलादिसामग्रीजन्येत्यभ्युपेयमिति भावः ॥

जयेतरेति ॥ जयभङ्गनिमित्तस्य परीक्ष्यात्मसमवेतस्यादृष्टस्य वृत्तिः स्वकार्यजननाभिमुख्यं, तल्लाभायैवेत्यर्थः ॥ यद्यपीति ॥ पापवान् पुण्यवान् वाऽयमनेन विधिना तुलामारूढ इति यद्देवताज्ञानं, स एव देवतासन्निधिरतः परीक्षाविधिरविशेषेऽपि कर्मोन्नायकं नमना-

दिकं लिङ्गमभिव्यञ्जयन्ति । तादृशञ्च ज्ञानं न परीक्षाविधिं विनेति सोऽपि प्रयोजक इत्यर्थः । परविप्रतिपत्तिर्दैवताचैतन्ये ॥ सोऽहमिति॥ ननु यत्र पापविस्मरणान्निष्पापत्वप्रत्यभिज्ञानं, तत्र कुतो न जयः । न च सत्यं तादृशं प्रत्यभिज्ञानं जयहेतुः, तथापि भङ्गहेतुपापवत्त्वप्रत्यभिज्ञानाभावेन भङ्गानुपपत्तेः । न च स्वरूपसदेव पापवत्त्वं भङ्गहेतुः । तस्यैव प्रयोजकत्वे परीक्षाविधेरतत्त्वापत्तेः । मैवम् । पापतदभावयोः स्वरूपसत्त्वे सति, योऽहं पापवत्त्वादिना सन्दिह्यमानः सोऽहमनेन विधिना तुलामारूढ इति तस्य प्रत्यभिज्ञानस्य तन्त्रत्वात् । तच्च न परीक्षाविधिं विनेति तस्यापि तत्त्वात् । यत्र तु सभाक्षोभादिना तादृशप्रत्यभिज्ञानाभावस्तत्र गत्यन्तरमाह ॥ अथवेति ॥ तेन परीक्षाविधिना । ननु तादृशविधिवाक्याभावात् परीक्षाविधेर्धर्मजनकत्वे मानाभाव इत्यत आह ॥ निमित्तेन इति ॥ साक्षात्तादृशविधिवाक्याभावेऽप्यभिशापनिमित्तकत्वात् परीक्षाविधेरितरनैमित्तिकवदभिशप्तः सत्यप्रत्यभिज्ञो जयकामस्तुलामारोहेदिति विधिकल्पनमित्यर्थः ॥ विजयेति ॥ कालान्तरभाविजयसाधनताऽनुपपत्तेरपूर्वकल्पनाश्चेत्यर्थः ॥ पराजयेति ॥ भङ्गलक्षणानिष्टफलसाधनत्वेन निषेधविधेरुन्नयनाद्भङ्गफलश्रुतेश्चाधर्मजनकत्वं कल्प्यत इत्यर्थः । यद्यपि तुलारोहणादेरधर्मजनकत्वे मानाभावः। पूर्वाधर्मादेवावनमनोपपत्तेस्तथापि परीक्षाविधिं विनाऽवनमनेऽपि भङ्गाभावान्नियमेन तस्याधर्महेतुत्वम् ॥

जल्पकथामाश्रित्य पृच्छति—

अथ शक्तिनिषेधे किं प्रमाणम् ? । न किञ्चित् । तत् किमस्त्येव? बाढम् । न हि नो दर्शने शक्तिपदार्थ एव नास्ति । कोऽसौ तर्हि ? कारणत्वम् । किं तत् ? पूर्वकालनियतजातीयत्वं,सहकारिवैकल्यप्रयुक्तकार्याऽभाववत्त्वं वेति । ततोऽधिकनिषेधे का वार्त्ता ? । न काचित् । तत् किं विधिरेव ? एतदपि नास्ति।प्रमाणाभावात् । सन्देहस्तर्हि ? । कथमेवं भविष्यति, अनुपलब्धचरत्वात् । विवादस्तर्हि ? कुत्र । ? अनुग्राहक-

त्वसाम्यात् सहकारिष्वपि शक्तिपदप्रयोगात्। सह-कारिभेदे तत्रापि दहनादेरनुग्राहकोऽधिकोऽस्त्येव।यः प्रतिबन्धकैरपनीयते इति यदि, तदा न विवदामहे। अस्मदभिप्रेतस्य चाभावादेरनुग्राहकत्वमङ्गीकृत्य निःसाधना मीमांसका अपि न विप्रतिपत्तुमर्हन्ति। ततोऽभावादिरनुग्राहक इत्येके, नेत्यपरे, इति विवाद-काष्ठायां व्युत्पादितश्चैतस्यानुग्राहकत्वम्। किमपरमव शिष्यते यत्र प्रमाणमभिधानीयमित्यलमतिविस्तरेण॥

तथापि चेतन एवायं संस्क्रियते, न भूतानीति कुतो निर्णय इति चेत्। उच्यते। भोक्तॄणां नित्यविभूनां सर्वदेहप्राप्तावविशिष्टायां विशिष्टैरपि भूतैर्नियामकाभावात् प्रतिनियतभोगासिद्धेः। न हि तच्छरीरं तन्मनस्तानीन्द्रियाणि विशिष्टान्यपि तस्यैवेति नियमः। नियामकाभावात्। तथाच साधारणविग्रहवत्त्वप्रसङ्गः। न च भूतधर्म एव कश्चिच्चेतनं प्रत्यसाधारणः।विपर्ययदर्शनात्। छित्वादिवदिति चेन्न,तस्यापि शरीरादितुल्यतया पक्षत्वात्। नियतचेतनगुणोपग्रहेणैव तस्यापि नियमो, न तु तज्जन्यतामात्रेण। स्वयमविशेषात्॥

अथेति॥ उत्तरं— नेति॥ शक्तिपदार्थमेव न निषेधाम इत्यर्थः। तर्हि स्वीकार एव शक्तेः स्यादित्यभिप्रेत्याह॥ कोऽसाविति॥ पूर्वकालेति॥ ननु पूर्वत्वं प्रागभावावच्छिन्नकालत्वम्। प्रागभावश्च न प्रतियोगिजनकोऽभावः। अन्योन्याश्रयात्। नापि विनाश्यभावः। नाशस्य प्रागभावनिरूप्यत्वात्। उत्पत्तिमानभावो ध्वंस इति चेत्। काऽसावुत्पत्तिः। आद्यसमयसम्बन्धः सेति चेत्। किमाद्यत्वम्। स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसम्बन्ध इति चेन्न।

परस्पराश्रयात्। नाऽपि प्रतियोग्यन्यूनानतिरिक्तकालीनाऽधिक-सामयिकयावत्परत्वाश्रयसमानकालीनकादाचित्काभावः। प्रलयका-लीनपरमाणुक्रियाप्रागभावाव्याप्तेः। न च तदाऽपि ब्रह्माण्डान्तरवर्त्ति-द्रव्येणापरत्वाश्रयेण परत्वनिरूपणम्। तस्य विशिष्याज्ञानात्। नियतत्वमपि व्यक्त्यपेक्षया, जात्यपेक्षया वा ?। नाद्यः। वह्निव्यक्तेः पूर्वं रासभस्यापि भावात्। अत एव नान्त्यः। न हि क्वापि वह्निजातीय-पूर्वकाले न रासभसत्त्वम्। देशतोऽपि नियम इति चेत्। सोऽपि सं-योगः समवायी वा प्रत्यासन्नमात्रं वा ? आद्ये गुणादीनामकारणत्व-प्रसङ्गः। द्वितीये धूमं प्रति वह्नेरकारणत्वप्रसङ्गः। तयोरेकदेशसमवा-यित्वाभावात्। अन्त्ये व्योम्नः कार्यमात्रं प्रति कारणत्वप्रसङ्गः। अन्य-थासिद्धत्वे असतीतिचेन्न। कारणेतरत्वेन तत्सिद्धेः कारणज्ञानापेक्षि-त्वात्। नाऽपि कार्याभावव्यापकाभावसमूहैकदेशप्रतियोगित्वं कारण-त्वम्। व्योमादेः कार्यमात्रे तत्त्वापत्तेः। नाऽपि सामग्र्येकदेशत्वं कारणत्वं, कारणसमूहस्यैव सामग्रीत्वात्। उच्यते। गन्धानधिकरण-कालावृत्तिरभावः प्रागभावः। न च तत्र मानाभावः। गन्धत्वं स्वा-धिकरणानधिकरणकालवृत्ति कार्यमात्रवृत्तिजातित्वात्। घटत्ववत्। स एव सर्वमुक्तिकालः। अन्यथासिद्धिश्च पञ्चधा। येन सहैव यस्य यं प्रति पूर्ववर्त्तित्वज्ञानम्। यथा घटं प्रति दण्डरूपस्य। अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववर्तित्वज्ञानम्। यथा शब्दं प्र-ति पूर्ववर्तित्वे ज्ञात एव घटं प्रत्याकाशस्य। अन्यत्र क्लृप्तपूर्ववर्तिन एव कार्यसम्भवे तत्सहकृतत्वम्। यथा गन्धवति गन्धानुत्पादाद् गन्धं प्रति गन्धकादाचित्काभावस्य नियतपूर्ववर्तित्वकल्पनाद् गन्धं प्रति पाकजस्थले रूपप्रागभावादीनाम्। यत्र जन्यपूर्वभावे ज्ञाते जनकस्य पूर्वभावो ज्ञायते, तत्र जन्येन जनकमन्यथासिद्धम्। यथा कुम्भकारेण कुम्भं प्रति तत्पिता। यमादायैव यस्यान्वयव्यतिरेकौ तेन तदन्यथासिद्धम्। यथा दण्डेन दण्डत्वम्। एतावदन्यथासिद्ध्य-ऽभावे सति यस्य नियतपूर्ववर्तित्वं, तत् कारणम्॥ सहकारीति॥ नन्वत्रात्माश्रयः, सहकारित्वस्य कारणत्वात्। प्रयुक्तत्वं च न जन्यत्वं, प्रागभावस्याजन्यत्वात्। नाऽपि जनकत्वमसम्भवात्। नाऽपि व्याप-कत्वम्। शिलाशकलेऽपि तादृशाभावस्य सत्त्वेन तत्रातिव्याप्तेः। नाऽपि व्याप्यत्वम्। कार्यसंसर्गाभावमात्रस्य सहकार्यभावाव्याप्य-

त्वात्। शिलाशकलादौ कार्याभावे सत्यपि सहकार्यभावस्यासत्त्वात्। न च कार्यप्रागभावस्तद्व्याप्यः। निमित्तासमवायिनोः कार्यप्रागभावाभावेन तदव्याप्तेः। उच्यते। यस्य कार्याभावव्याप्यत्वमितराभावावच्छिन्नं, तत्कारणम्। बीजेऽङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते, इतरसमवधाने सति बीजादङ्कुरसत्त्वात्। किन्त्वितराभावेनावच्छिद्यते। इतराभावे बीजेऽङ्कुराभावनियमात्। शिलायां तु तत्,शिलात्वेनैवावच्छिद्यते। यद्वा, अन्यासमवधानावच्छिन्नकार्यानुत्पत्तिव्याप्यत्वं कारणत्वम्। रासभादेश्च स्वत एव कार्याभावव्याप्यतयाऽन्याऽसमवधानस्य वैयर्थ्येनाव्यवच्छेदकत्वादिति॥ततोऽधिकेति॥ कारणत्वस्योभयसिद्धत्वात् तदन्यशक्तिनिषेधकमित्यर्थः॥ अनुग्राहकत्वेति॥ कारणत्वस्य शक्तिपदवाच्यत्वेऽपि अनुग्राहकत्वस्य कारणत्वसहकारिसाधारणत्वात् सहकारिष्वपि शक्तिपदप्रयोगः। यत्समवधाने नियतं कार्यं, तस्यैवानुग्राहकत्वादित्यर्थः॥ तत्र इति॥ मन्त्रादिप्रयोगे किं भावरूपोऽनुग्राहको नास्त्यभावरूपो वेति विप्रतिपत्त्या कथायामभावस्यानुग्राहकत्वे व्युत्पादिते क्वान्यत्र प्रमाणं वाच्यमित्यर्थः॥

भोक्तृणामिति॥ भोक्तृप्रत्यासत्तेरविशेषात् किञ्चिच्छरीरं कस्यचिदेव भोगं जनयतीति प्रतिनियतभोगान्यथानुपपत्त्या प्रतिनियतभोक्तृकर्मोपार्जितत्वं शरीरादावभ्युपेयमित्यर्थः। विशिष्टैरित्यभ्युपगमवादः॥ असाधारण इति॥ प्रतिनियतभोगजनक इत्यर्थः॥ विपर्ययेति॥ भूतधर्मस्य नीलादेस्तथात्वादर्शनादित्यर्थः॥ द्वित्वादीति॥ यथा भूतधर्मोऽपि द्वित्वादि यस्यैवापेक्षाबुद्ध्या जनितं तस्यैव भोगजनकं, तथा अपूर्वमपि तद्धर्मः स्यादित्यर्थः। द्वित्वादेरप्यसाधारणत्वं नियतचेतनगुणोपग्रहेणैवेत्याह॥ तस्यापीति॥

ननु भूतधर्मान्तरस्य साधारण्येऽप्यपूर्वं तद्धर्मस्तत्कार्यत्वमात्रेणैवासाधारणं स्यादित्यत आह—

**तथापि तज्जन्यतयैव नियमोपपत्तौ विपक्षे बाधकं किमिति चेत्, कार्यकारणभावभङ्गप्रसङ्गः। शरीरादीनां चेतनधर्मोपग्रहेणैव तद्धर्मजननोपलब्धेः। तद् यथा। इच्छोपग्रहेण प्रयत्नो, ज्ञानोपग्रहेणेच्छादयः,**

तदुपग्रहणे सुखादय इत्यादि । प्रकृतेऽपि चेतनगता एव बुद्ध्यादयो नियामकाः स्युरिति चेद्, न । शरीरादेः प्राक् तेषामसत्त्वात् । तथाच निरतिशयाश्चेतनाः साधारणानि भूतानीति न भुक्तिनियम उपपद्यते । एतेन सांख्यमतमपास्तम् ॥

तथापीति ॥ कार्यकारणभावमेवाह ॥ शरीरादीनामिति ॥ प्रकृतेऽपीति ॥ यथा शरीरादीनां चेतनगुणबुद्ध्यादिसहितानां नियतभोगजनकत्वं, तथा प्रकृतेऽपि तेषां तत्सहितानामेव तज्जनकत्वमस्त्विति कृतमपूर्वेणेत्यर्थः ॥ शरीरादेरिति ॥ न शरीराद्युत्पत्तेः पूर्वं बुद्ध्यादिसम्भव इति तदन्यचेतनगुणापूर्वसिद्धिरित्यर्थः । देवदत्ताद्यशरीरं स्वाव्यवहितप्राक्कालवर्तिदेवदत्तसमवेतविशेषगुणजन्यम् । कार्यत्वे सति तद्भोगसाधनत्वात् । तन्निर्मितस्रग्ववत् । घटादीनां पक्षसमत्वाद् न तैर्व्यभिचारः। न च संस्कारेणार्थान्तरं,तस्य भोगजनकत्वेनाकल्पनात् । संस्काराजन्यत्वेन पक्षविशेषणाद्वेति भावः । ननु चेतने न भोगो नाप्यदृष्टम् । तस्य कूटस्थत्वात्, किन्तु बुद्धाविति चेतनधर्मस्य नियामकत्वमयुक्तमिति सांख्यमतं दूषयति ॥ एतेनेति ॥ चेतने अपूर्वानाधाने साधारणविग्रहवत्त्वप्रसङ्गेनेत्यर्थः ॥

शिष्यहितैषितया तन्मतं प्रपञ्चयति—

एवं हि तत् । अकारणमकार्यः कूटस्थचैतन्यस्वरूपः पुरुषः । आदिकारणं प्रकृतिरचेतना परिणामिनी । ततो महदादिसर्गः । न हि चितिरेव विषयबन्धनस्वभावा, अनिर्मोक्षप्रसङ्गात् । नापि प्रकृतिरेव तदीयस्वभावा, तथापि नित्यत्वेनानिर्मोक्षप्रसङ्गात् । नापि घटादिरेवाहत्य तदीयः, दृष्टादृष्टत्वानुपपत्तेः । नापीन्द्रियमात्रप्रणाडिकया, व्यासङ्गायोगात् । नापीन्द्रियमनोद्वारा, स्वप्नदशायां वराहव्याघ्राद्यभिमानिनो नरस्यापि नरत्वेनात्मोपधानायोगात् । नाप्यह-

ङ्कारपर्यन्तव्यापारेण सुषुप्त्यवस्थायां तद्व्यापारविरमेऽपि श्वासप्रयत्नसन्तानावस्थानात् । तद् यदेतास्ववस्थासु संव्यापारमेकमनुवर्त्तते, यदाश्रया चानुभववासना, तदन्तःकरणमुपारूढोऽर्थः पुरुषस्योपधानीभवति । भेदाग्रहाच्च निष्क्रियेऽपि तास्मिन् पुरुषे कर्तृत्वाभिमानस्तस्मिन्नचेतनेऽपि चेतनाभिमानः । तत्रैव कर्मवासना । पुरुषस्तु पुष्करपलाशवन्निर्लेपः । आलोचनं व्यापार इन्द्रियाणां, विकल्पस्तु मनसः, अभिमानोऽहङ्कारस्य, कृत्यध्यवसायो बुद्धेः । सा हि बुद्धिरंशत्रयवती । पुरुषोपरागो, विषयोपरागो, व्यापारावेशश्चेत्यंशाः । भवति हि मयेदं कर्त्तव्यमिति । तत्र मयेतिचेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः । इदमिति विषयोपराग इन्द्रियप्रणाडिकया परिणतिभेदो दर्पणस्येव निःश्वासाभिहतस्य मलिनिमा पारमार्थिकः । एतदुभयायत्तो व्यापारावेशोऽपि । तत्रैवंरूपव्यापारलक्षणाया बुद्धेर्विषयोपरागलक्षणं ज्ञानम् । तेन सह यः पुरुषोपरागस्यातात्त्विकस्य सम्बन्धो दर्पणप्रतिबिम्बितस्य मुखस्येव मलिनिमा, सोपलब्धिरिति । तदेवमष्टावपि धर्मादयो भावा बुद्धेरेव, तत्सामानाधिकरण्येनाध्यवसीयमानत्वात् । न च बुद्धिरेव स्वभावतश्चेतनेति युक्तं, परिणामित्वात् । पुरुषस्य तु कूटस्थनित्यत्वादिति । तदेतदपि प्रागेव निरस्तम् ॥

एवं हीति ॥ अकारणमित्यनेन प्रकृतेर्भेदः । अकार्य इत्यनेन चरमपरिणतिघटादेर्भेदः । ननु बुद्ध्याद्यकारणत्वे तस्य तत्र मानाभाव इ-

स्यत आह ॥ कूटस्थेति ॥ अकारणत्वादेव कूटस्थोऽनित्यधर्मानाश्रयः, कार्यत्वाभावान्न स्वरूपतो नाशः । अकारणत्वाच्च कार्यकारणयोस्तादात्म्यात्तदात्मतयापि न नाशः । अत एवापूर्वं न तस्य गुणः । चैतन्यस्वरूपत्वमपि धर्मधर्मिणोस्तादात्म्यात् कूटस्थत्वेन चैतन्येन निरूप्यत इति न तत्र मानाभाव इत्यर्थः । बुद्धिगतचैतन्याभिमानान्यथाऽनुपपत्त्या तत्कल्पनादिति भावः । आत्मनोऽकारणत्वेऽपि सर्गमुपपादयति ॥ आदीति ॥ आदिपदाद् महदादिव्यवच्छेदः । तस्य प्रकृत्यनन्तरमुत्पादात् । कारणमिति पुरुषव्यवच्छेदः । पुरुषाद्भेदकमाह ॥ अचेतनेति ॥ तत्र हेतुमाह ॥ परिणामिनीति ॥ अनित्यधर्माश्रयस्ततः कार्यधर्मात्मतया नश्यति । ततो घटादिवदचेतनेत्यर्थः ॥ तत इति ॥ प्रकृतेर्महत्तत्त्वमन्तःकरणं बुद्ध्याख्यम् । प्रकृतेर्महान् महतोऽहङ्कारस्तस्मात्पञ्चतन्मात्राणीति सांख्याः । ननु किमर्थं महदादिसर्गो मन्तव्यो नित्यचैतन्यमेव विषयप्रकाशस्वरूपमस्त्वित्यत आह ॥ न हीति ॥ चितिः पुरुषचैतन्यम् । विषयबन्धनं विषयावच्छेदः । चैतन्यविषयावच्छेदस्येष्टानिष्टोपलब्धिरूपस्य हेतुसापेक्षत्वे हेतोरिन्द्रियादेरङ्गीकारापत्तिः । निरपेक्षतया सर्वदा तस्य भावादनिर्मोक्षः पुंसः स्यादित्यर्थः । तर्हि प्रकृतिरेव साक्षाद्विषयबन्धनस्वभावाऽस्त्वित्यत आह ॥ नापीति ॥ प्रकृतेः साक्षाद्विषयप्रकाशकस्वभावत्वे तस्याः सदातनत्वे पुनरप्यनिर्मोक्षः पुंसः स्यादित्यर्थः । ननु विषयस्यैव चैतन्यसम्बन्धित्वं स्वभावः । तथाच विषयनाशे पुंसो मोक्षः स्यादित्यत आह ॥ नापीति ॥ विषयस्य परम्परया चैतन्यसम्बन्धित्वे द्वारीभूतस्येन्द्रियादेरङ्गीकारापत्तिरिति साक्षात् तद्वाच्यम् । तथाचेदं दृष्टमिदमदृष्टमिति न स्यात्, व्यवहितस्यापि विषयस्य यावत्सत्त्वमवभासप्रसङ्गादित्यर्थः । नन्विन्द्रियमात्रद्वारा विषयस्तदीयः स्यात्, किं मनःकल्पनयेत्यत आह ॥ नापीति ॥ व्यासङ्गेति ॥ इन्द्रियसम्बन्धेऽपि व्यासङ्गेन दर्शनाभावादित्यर्थः । ननु व्यासङ्गानुरोधान्मनःसंयुक्तेन्द्रियसम्बद्धविषयस्य चैतन्यावच्छेदकत्वमस्तु, किमहङ्कारेणेत्यत आह ॥ नापीति ॥ यदीन्द्रियमनोभ्यामेव विषयाः सम्बध्यन्ते, तदा शयानो नरो यथा वराहोऽहमिदं प्रत्येमीति अभिमन्यते, तथा नरोऽहमिदं प्रत्येमीति नरत्वेनाप्यात्मोपधानं स्यादस्ति हि तत्र नरत्वं सन्निहितमस्ति चेन्द्रियमनसोरपि व्यापारोऽन्यथाऽऽलोचनविकल्पयोरनुत्पादप्रसङ्ग

इति तद्भिन्नोऽहङ्कारोऽनियतविषयाभिमानाव्यापारो मन्तव्य इत्यर्थः। बुद्धितत्त्वं साधयति ॥ नाऽपीति ॥ पूर्वेषां व्यापाराभावेऽपि यद्व्यापारादुच्छ्वासादि तद्बुद्धितत्त्वं कल्प्यमित्यर्थः। उपसंहरति ॥ तद्यदिति ॥ अवस्थासु जाग्रत्स्वप्नसुषुप्तिषु ॥ अनुभवरूपा वासना संस्कारोऽनुभववासना सांख्यैस्तथाऽङ्गीकारात् ॥ तदन्तःकरणमिति ॥ तस्मिन्नन्तःकरणे बुद्धिरूपे अर्थो घटादिरुपारूढो ज्ञानरूपतत्परिणामविषयतया सम्बद्धः पुरुषस्यात्मन उपधानीभवति । उपधायको व्यवधायकः स्वरूपतिरोधायक इति यावत् । यत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ व्यवह्रियेते इत्यर्थः। तर्हि कर्ता चेतन इति कृतिचैतन्ययोः कथं सामानाधिकरण्यानुभव इत्यत आह ॥ भेदाग्रहाच्चेति ॥ निष्क्रिये अकर्त्तरि ॥ तस्मिन् बुद्धितत्त्वे ॥ बुद्धिपुरुषयोर्भेदाग्रहाच्चैतन्यकृत्यभिमानौ । यथा भवतां गौरोऽहं सुखीत्यर्थः। कर्मवासना कर्मजनितमपूर्वम्। ननु पुरुषधर्म एव किन्नापूर्वमित्यत आह ॥ पुरुषस्त्विति ॥ नापूर्वतत्फलाभ्यां लिप्यते कौटस्थ्यादिश्रुतेरित्यर्थः। इन्द्रियादीनां मिथोभेदकमसाधारणं व्यापारमाह ॥ आलोचनमिति ॥ निर्विकल्पकमित्यर्थः। ननु बुद्धेः कृत्यध्यवसायो न व्यापारः, कृतिविषयस्य घटादेर्जडायां बुद्धौ प्रतिभासासम्भवात् । न च कर्त्तव्येन घटादिना सम्बन्धान्तरमस्ति । न चासम्बन्धे, करोमीत्यादिव्यवसायोऽतिप्रसङ्गादित्यत आह ॥ सा हीति ॥ चेतनोपरागवशेन जडाया अपि बुद्धेरिन्द्रियप्रणालिकया परिणतिभेद एव ज्ञानरूपः कर्त्तव्येन घटादिना सम्बन्ध इत्यर्थः ॥ पुरुषेति ॥ बुद्धिचेतनयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः।नीलेन्द्रियसन्निकर्षान्नीलाकारज्ञानरूपपरिणतिभेदोत्पादः पारमार्थिको विषयोपरागस्ताभ्यां कर्तव्यविषयस्य प्रतिभासात्सम्बन्धः करोमीत्यध्यवसायो व्यापारावेश इत्यर्थः ॥ दर्पणस्येवेति ॥ दर्पणप्राया बुद्धिः। बुद्धितो ज्ञानोपलब्ध्योर्भेदमाह ॥ तत्रैवमिति ॥ विषयोपरागो विषयेन्द्रियसम्बन्धे बुद्धेर्विषयाकारः परिणतिभेदोऽयं घट इत्यादिः ॥ तेनेति ॥ तेन ज्ञानेन चेतनोऽहमिदं जानामीत्येवमाकारो बुद्धावारोपितस्य चैतन्यस्य यः सम्बन्धोऽतात्त्विकः सोऽयमुपलब्धिरित्यर्थः। एवं व्यवस्थिते सिद्धमर्थमाह ॥तदेवमिति॥ ज्ञानवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेवेत्यर्थः । संस्कारस्य साङ्ख्यैरनभ्युपगमाज्ज्ञानस्यैव स्मृतिहेतोरनभिव्यक्तयाऽनुवृत्तेरिति

स नोक्तः ॥ तत्सामानाधिकरण्येनेति ॥ कृतिसामानाधिकरण्येनेत्यऽर्थः । यद्यप्यदृष्टस्यायोग्यतया तत्सामानाधिकरण्यं न प्रत्यक्षं, तथाऽपि धार्मिकोऽहमित्यनुव्यवसायादुपनीतस्य प्रत्यक्षत्वमिति भावः । परिणामित्वादिति ॥ अनित्यधर्माश्रयत्वादित्यर्थः ॥

तथाहि—

कर्त्तृधर्मा नियन्तारश्चेतिता च स एव नः ॥
अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवः ॥१४॥

कृतिसामानाधिकरण्यव्यवस्थितास्तावद्धर्मादयो नियामका इति व्यवस्थितम् । चेतनोऽपि कर्त्तैव । कृतिचैतन्ययोः सामानाधिकरण्येनानुभवात् । नायं भ्रमो, बाधकाभावात्। परिणामित्वाद्घटवदिति बाधकमिति चेत् । न । कर्त्तृत्वेऽपि समानत्वात् । तथाच कृतिरपि भाविकी महतो न स्यात् । दृष्टत्वादयमदोष इति चेत्, तुल्यम् । अचेतनकार्यत्वं बाधकं, कार्यकारणयोस्तादात्म्यादिति चेद्, न । असिद्धेः । न हि कर्तुः कार्यत्वे प्रमाणमस्ति । प्रत्युत "वीतरागजन्मादर्शनात्"( न्या० ३अ० १आ० २५सू० ) इति न्यायादनादितैव सिद्ध्यति । यद् यच्च कार्ये रूपं दृश्यते तस्य तस्य कारणात्मकत्वे रागादयोऽपि प्रकृतौ स्वीकर्त्तव्याः स्युः । तथाच सैव बुद्धिर्न प्रकृतिः, भावाष्टकसम्पन्नत्वात् । स्थूलतामपहाय सूक्ष्मतया ते तत्र सन्तीतिचेत्, चैतन्यमपि तथा भविष्यति।तथाप्यसिद्धो हेतुः।तथा सति घटादीनामपि चैतन्यप्रसङ्गस्तादात्म्यादितिचेद् रागादिमत्त्वप्रसङ्गोऽपि दुर्वारः । सौक्ष्म्यं च समानमिति । तस्माद्, यज्जातीयात् कारणाद् यज्जातीयं कार्यं दृश्यते, तथाभूतात्तथाभूतमात्रमनु-

मातव्यं, न तु यावद्धर्मकं कारणं तावद्धर्मकं कार्यं व्यभिचारादिति किमनेनाप्रस्तुतेन ?। यदि च बुद्धिर्नित्या, अनिर्मोक्षप्रसङ्गः। पुंसः सर्वदा सोपाधित्वे स्वरूपेणानवस्थानात्। अथ विलीयते, ततो नाऽनादेर्विलय इत्यादिमत्त्वे तदनुत्पत्तिदशायां को नियन्ता ? प्रकृतेः साधारण्यात्। तथा चासंसारः पूर्वपूर्वबुद्धिवासनाऽनुवृत्तेः साधारण्येऽप्यसाधारणीति चेत्। बुद्धिनिवृत्तावपि तद्धर्मवासनाऽनुवृत्तिरित्यपदर्शनम्। सौक्ष्म्यान्न दोष इति चेत्। मुक्तावपि पुनः प्रवृत्तिप्रसङ्गः। निरधिकारत्वान्नैवमिति चेत्। तर्हि साधिकारा प्रसुप्तस्वभावा बुद्धिरेव प्रकृतिरस्तु, कृतमन्तरा प्रकृत्यहङ्कारमनःशब्दानामर्थान्तरकल्पनया ?।
सैव हि तत्तद्व्यवहारगोचरा तेन तेन शब्देन व्यपदिश्यते शारीरवायुवदित्यागमोऽपि सङ्गच्छते इत्यतोऽपि हेतुरसिद्धः। अधिकारनिवृत्त्या बुद्धेरप्रवृत्तिरपवर्गः, वासनायोगश्चाधिकारः, ततः संसारः। धर्मधर्मिणोरत्यन्तभेदे च कौटस्थ्याविरोधः। भेदश्च विरुद्धधर्माध्यासलक्षणो घटपटादिवत् प्रत्यक्षसिद्धः। न च सामानाधिकरण्यादभेदोऽपि, तद्धि समानशब्दवाच्यत्वम्, एकज्ञानगोचरत्वम्, एकाधिकरणत्वम्। आधाराधेयभावः, विशेष्यत्वं, सम्बन्धमात्रं वा, भेद एव। भेदेऽपि चोपपद्यमानं नाभेदं स्पृशतीति सर्वमवदातम्॥

कर्तृधर्मा इति॥ यत्र कृतिस्तददृष्टस्य तत्रैव भोगजनकत्वमित्यत्राविवादे कृत्याश्रय एव चेतनः, तद्भिन्ने तत्र मानाभावादित्यर्थः॥ अन्यथेति॥ बुद्धेर्नित्यत्वे मोक्षाभावः। आत्मनो बुद्ध्युपधानस्यैव

संसारत्वात् । अनित्यत्वे च तदुत्पत्तेः पूर्वं प्रकृतेः साधारण्यान्नियामकाभावेन संसाराभाव इत्यर्थः। ननु कर्तृबुद्धितत्त्वस्य धर्मो नियन्तार इति सांख्याभिमतमेव इत्यत आह ॥ चेतनोऽपीति ॥ चेतनोऽहं करोमीत्यनुभवादित्यर्थः ॥ कर्तृत्वेऽपीति ॥ बुद्धिर्न कृत्याश्रयः परिणामित्वाद् घटादिवदित्यपि स्यादित्यर्थः ॥ भाविकी स्वाभाविकी ॥ यदि ज्ञानाश्रयस्य कृत्याश्रयत्वेनानुभवात्तद्बाधान्नानुमानं, तदा चेतनोऽहङ्करोमीत्यनुभवाद् बाधस्तुल्य इति शङ्कोत्तराभ्यामाह ॥ दृष्टत्वादिति ॥ अचेतनायाः प्रकृतेः कार्यं बुद्धितत्त्वं, कार्यकारणयोश्च तादात्म्यमिति चैतन्ये तस्य बाधकमित्याह ॥ अचेतनेति ॥ प्रत्युतेति ॥ जातमात्रस्य स्तनपाने प्रवृत्ती रागजनकेष्टसाधनताज्ञानाधीनेति तदनुमानार्थं जन्मान्तरानुभूतव्याप्तिस्मरणमावश्यकमेवं तत्पूर्वजन्मनीत्यनादितेत्यर्थः ॥यद्यदिति॥ यथा प्रकृतौ रागाद्यभावेऽपि तत्कार्यबुद्धौ रागादिस्तथा प्रकृतेरचैतन्येऽपि सा चेतना स्यादित्यर्थः ॥ तथाचेति ॥ प्रकृतौ रागादिस्वीकारे तद्भिन्नबुद्धितत्त्व एव मानाभावाद् इत्यर्थः ॥ तथेति ॥ प्रकृतावपि सूक्ष्मं चैतन्यमित्यर्थः ॥ असिद्ध इति ॥ अचेतनकार्यत्वादित्यत्र विशेषणासिद्धेरित्यर्थः ॥

तथा सतीति ॥ बुद्धेश्चैतन्ये तज्जन्यघटादेरपि तत् स्यादित्यर्थः ॥ रागादीति ॥ घटादे रागादिमद्बुद्धिजन्यत्वादित्यर्थः ॥सौक्ष्म्यं चेति॥ घटादौ रागादेरिव चैतन्यस्यापि सूक्ष्मत्वादित्यर्थः ॥

पुंसः सर्वेदति ॥ पुरुषस्य निरुपाख्यचस्थानात्मको मोक्षो न स्यात् । बुद्धेर्नित्यत्वेन सदा तदुपधानादित्यर्थः ॥ अथेति ॥ बुद्धेरनुत्पन्नाया न ध्वंस इति तदुत्पत्तिकाले नियामकाभावान्नियतबुद्ध्युत्पाद एव न स्यादिति न संसार इत्यर्थः । ननु प्रकृतेः साधारण्येऽपि पूर्वप्रध्वस्तबुद्धिवासनायोगादसाधारणी नियामिका स्यादित्याह ॥ पूर्वेति॥ सांख्यमते धर्मधर्मिणोरभेदादस्माकं चाश्रयनाशस्य कार्यनाशकत्वाद्धर्मिनाशेऽपि न धर्मावस्थानमित्याह ॥ बुद्धीति ॥ सौक्ष्म्यादिति ॥ सूक्ष्मबुद्धिरनुवर्तत एवेति न तन्नाश इत्यर्थः ॥ मुक्तावपीति ॥ बुद्धेः सूक्ष्माया अनुवृत्तेः संसारापत्तिरित्यर्थः । यावत्संसारं विलीनाया अपि बुद्धेर्वासनाऽनुवृत्तिलक्षणोऽधिकारोऽस्ति । मुक्तौ तु सोऽपि नास्तीति न पुनः संसार इत्याह ॥ निरधिकारित्वादिति ॥ यद्येवं, तदा संसारिदशायां साधिकारा, मुक्तौ तु प्रसुप्तस्वभावा प्रवृत्त्यजनिका

बुद्धिरेव ज्ञानाद्याश्रयभूता प्रकृतिपदवाच्याऽस्तु, कृतं प्रकृत्याद्यर्थान्तरकल्पनयेत्याह ॥ तर्हीति ॥ एवं सति प्रकृत्यादिप्रतिपादकमागमं सङ्गमयति ॥ सैव हीति ॥ तत्तद्व्यापारयोगादादिकारणत्वाभिमानकारणत्वादियोगात्तेन तेन प्रकृत्यादिशब्देन बुद्धिरेकैवोच्यते इत्यर्थः॥ शारीरेति ॥ यथैक एव शारीरो वायुरूर्ध्वाऽधोगत्यादियोगात् प्राणापानसमानादिशब्दवाच्य इत्यर्थः ॥ अतोऽपीति ॥ पूर्वं नित्यत्वेनाचेतनकार्यत्वमसिद्धमुक्तम् । अधुना तु बुद्धिरेव प्रकृतिपदवाच्येति प्रकृतिकार्यत्वं बुद्धेरसिद्धमित्युच्यते इत्यर्थः ॥

एवं सत्येकस्य क्रमेण संसारापवर्गौ सांख्यमतेन समञ्जसयति ॥ अधिकारेति ॥ वासना धर्माधर्मौ ॥ ननु बुद्धेश्चैतन्ये चेतनकौटस्थ्यश्रुतिविरोध इत्यत आह ॥ धर्मेति ॥ कौटस्थ्यं हि नित्यत्वम् । तत्र धर्मस्योत्पादविनाशेऽपि न धर्मिणस्तावित्यविरुद्धम् । अभेदे हि धर्मधर्मिणोस्तद्विरोधः । स च नास्त्येवेत्यर्थः । कथं नास्तीत्यत आह ॥ भेदश्चेति ॥ अहं जानाम्यहमज्ञासिषमहं ज्ञास्यामीत्यनुभवाज्ज्ञानातीतत्वादिग्रहेऽपि अहमास्पदस्याबाधितप्रत्यक्षेण स्थैर्य्यानुभवादित्यर्थः । ननु धर्मधर्मिणोरत्यन्तभेदोऽसिद्धः । नीलः पट इति सामानाधिकरण्यबुद्धिरतिभिन्नाभिन्नाभ्यां व्यावर्तमाना धर्मधर्मिणोर्भेदाभेदौ साधयति । अन्योन्याभावत्वमव्याप्यवृत्तिवृत्ति । सदातनाभावमात्रवृत्तित्वात् । अत्यन्ताभावत्ववदित्यनुमानमप्यत्रेत्यत आह ॥ न चेति॥ आद्यं द्वयं सामानाधिकरण्यं भेदेऽपि, अन्त्यत्रयं भेद एव, सम्बन्धमात्रमपि यद्येककारणकत्वादि तदा भेदेऽपि, नोचेद्भेद एव उपपद्यत इति नाभेदस्ततः सिद्ध्यतीत्यर्थः । अथ नीलपटयोरभेदबुद्धिरेव सामानाधिकरण्यधीस्तदाऽसिद्धिः । नीलः पट इति प्रतीत्या तयोः सम्बन्धस्यैव विषयीकरणात् । अन्यथा नीलिमा पट इत्यपि बुद्ध्यापत्तिः । शब्दप्रयोगस्यापि मतुब्लोपादभेदोपचाराद्वोपपत्तेः । वस्तुतो विरुद्धयोरेकत्र भावाभावाववच्छेदभेदेनैव प्रतीयेते । न चात्र सोऽस्ति । अनुमानमप्यनुकूलतर्काभावेन व्याघातरूपप्रतिकूलतर्केण च प्रतिहतमिति संक्षेपः ॥

स्यादेतत् । नित्यविभुभोक्तृसद्भावे सर्वमेतदेवं स्यात् । स एव कुतः । भूतानामेव चेतनत्वात् । काया-

कारपरिणतानि भूतानि तथा, अन्वयव्यतिरेकाभ्यां तथोपलब्धेः । कर्मज्ञानवासने तु सर्वत्र प्रतिभूतनियते अनुवर्त्तिष्येते, यतो भोगप्रतिसन्धाननियम इति चेत् । उच्यते—

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ॥
वासनासंक्रमो नास्ति न च गत्यन्तरं स्थिरे ॥ १५ ॥

न हि भूतानां समुदायपर्यवसितं चैतन्यम् । प्रतिदिनं तस्यान्यत्वे पूर्वपूर्वदिवसानुभूतस्यास्मरणप्रसङ्गात् । नापि प्रत्येकपर्यवसितं, करचरणाद्यवयवापाये तदनुभूतस्य स्मरणायोगात् । नापि मृगमदवासनेव वस्त्रादिषु संसर्गादन्यवासनाऽन्यत्र संक्रामति । मात्राऽनुभूतस्य गर्भस्थेन भ्रूणेन स्मरणप्रसङ्गात् । न चोपादानोपादेयभावनियमो गतिः । स्थिरपक्षे परमाणूनां तदभावात् । खण्डावयविनं प्रति च विच्छिन्नानामनुपादानत्वात् । पूर्वसिद्धस्य चावयविनो विनाशात् ॥

अस्तु तर्हि क्षणभङ्गः । न चातिशयोऽप्यतिरिच्यते किन्तु सादृश्यतिरस्कृतत्वाद् द्रागेव न विकल्प्यते, कार्यदर्शनादध्यवसीयते अन्त्यातिशयवत् । तथाच भूतान्येव तथा तथोत्पद्यन्ते, यथा यथा प्रतिसन्धाननियमादयोऽप्युपपद्यन्ते । क्षणिकत्वसिद्धावेवमेतत्, तदेव त्वन्यत्र विस्तरेण प्रतिषिद्धम् ॥

स्यादेतदिति ॥ भूतचैतन्येऽपि प्रकृतसिद्धौ नित्यविभुभोक्तृनिरासपरेयं शङ्केति ॥ अथैवं घटादिरपि चेतनः स्यादित्यत आह ॥ कायेति ॥ अन्वयेति ॥ अन्वयव्यतिरेकाभ्यां शरीरस्य ज्ञानहेतुत्वे सिद्धे समवायिकारणमपि तदेव कल्प्यते । तदन्यस्मिन् मानाभावाद्, गौरो-

ऽहं जानामीत्यनुभवाच्चेति भावः। ननु शरीरस्याऽनुभवितृत्वे कर्तृत्वे च तन्नाशादन्यस्य भोक्तृत्वे प्रतिसंधातृत्वे चातिप्रसङ्ग इत्यत आह॥ कर्मज्ञानेति॥ कर्मज्ञानाभ्यां जनिते वासने अदृष्टसंस्कारौ॥यत इति॥ यत्कायसन्ताने कर्म, तत्कायसन्ताने भोगो, यत्कायसन्तानेऽनुभवस्तत्कायसन्ताने स्मृतिरित्यर्थः॥ नान्यदृष्टमिति॥ एवं बालशरीरेणाऽनुभूतस्य युवशरीरेण स्मरणं न स्यात्। तयोर्भेदात्। अन्यानुभूतस्यान्येन स्मरणे अतिप्रसङ्गात्। न च बाल्ययौवनयोरेकं भूतं शरीरम्। अपक्रमाच्छिनश्वरस्वभावत्वात्। न चान्यवासनाऽन्यत्र संक्रामति। अतिप्रसङ्गादित्यर्थः। ननूपादानवासनाया उपादेये संक्रमः स्यादित्यत आह॥ न चेति॥ स्थिरपक्षे परमाणूनामनुपादेयत्वाद् विच्छिन्नकरादीनां खण्डावयविनं प्रत्यनुपादानत्वादित्यर्थः॥ प्रतिदिनमिति॥ आहारपरिणतिविशेषस्य तद्धेतोरन्यान्यत्वादित्यर्थः। ननु करे मे सुखं पादे मे दुःखमित्यनुभवाद् अनुभवव्यधिकरणस्य सुखादेरनभ्युपगमात् कराद्येवानुभवितृ स्यादित्यत आह॥ नापीति॥ कराद्यपाये तदनुभूतास्मरणापातादित्यर्थः॥ मात्रेति॥ मातृगर्भस्थयोर्मिथः संसर्गादित्यर्थः। ननु उपादानं यदनुभवितृ तद्वासना तदुपादेये संक्रामतीति करादिवासना तदपगमे तदुपादेये संक्रामति। न च मातृभ्रूणयोस्तथात्वमित्यत आह—

न चेति॥खण्डेति॥ अवस्थितावयवसंयोगेभ्य एव खण्डावयव्युत्पादादित्यर्थः। न च परमाणूनामेव चैतन्यं, तद्गुणानामतीन्द्रियत्वेन ज्ञानादेरप्यतीन्द्रियत्वापत्तेः। शरीरान्वयादेश्च कारणत्वमात्रं सिद्ध्यति, न समवायिकारणत्वम्। तदेवं विपक्षबाधकाच्छरीरं न चेतनम्। भूतत्वात्। घटवदित्यर्थः॥ अस्त्विति॥ तत्र पूर्वोत्तरशरीरयोरुपादानोपादेयभावाद् वासनासंक्रमात् प्रतिसन्धाननियम उपपद्यत इति भावः। क्षणिकत्वे विप्रतिपत्तिः। सत्स्वोत्पत्त्यव्यवहितोत्तरकालवृत्तिध्वंसप्रतियोगि न वा?। तत्र स्थैर्ये प्रसङ्गविपर्ययाभ्यामर्थक्रियाव्यापकक्रमयौगपद्याभावात्तदभावेऽर्थक्रियाकारित्वरूपसत्त्वानुपपत्तौ, यत् सत् तत् क्षणिकं यथा घटः। संश्च विवादास्पदीभूतः शब्दादिरिति पराभिप्रेतं मानम्। ननु क्षणभङ्गे पूर्वक्षणिकभावादग्रिमो भावः सातिशयो जायते, यतः कार्योत्पादः। सहकारिसहितस्यैव तद्धेतुत्वे क्षणभङ्गानुपपत्तेः। तथाच सातिशयव्यक्त्युत्पादो गृह्येत। न चैवमिति,

न तत्सिद्धिरित्यत आह ॥ न चेति ॥ अतिरिच्यते—विविच्य न गृह्यते ॥ असमर्थस्वभावादित्यर्थः ॥ किं त्विति ॥ सादृश्यवशात्तथाभूतोऽपि न तथात्वेनापाततो निश्चीयत इत्यर्थः । तत् किमनिश्चय एव, नेत्याह ॥कार्येति॥ स्थैर्ये सहकार्यपेक्षाऽनुपपत्तेः पूर्वापरकालयोः कार्यदर्शनादर्शनाभ्यामतिशयोऽवसीयत इत्यर्थः । अन्त्यातिशयः सामग्री । सामग्रीवत् कार्यैकसमधिगम्यत्वान्नानुपलम्भमात्रेण निराक्रियत इति भावः । प्रकृतेन सङ्गमयति ॥ तथाचेति ॥

अपि च,

न वैजात्यं विना तत्स्यान्न तस्मिन्ननुमा भवेत् ॥
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥१६॥

न हि करणाऽकरणयोस्तज्जातीयस्य सतः सहकारिलाभालाभौ तन्त्रमित्यभ्युपगमे क्षणिकत्वासिद्धिः । तथैकव्यक्तावप्यविरोधात् । तद्वा तादृग्वेति न कश्चिद्विशेष इति न्यायात् । ततस्तावन्मात्रस्य वैजात्यमप्रामाणिकमेवाभ्युपेयम् । एवञ्च कारणवत् कार्य्येऽपि किञ्चिद् वैजात्यं स्याद् यस्य कारणापेक्षा, न तु दृष्टजातीयस्येतिशङ्कया न तदुत्पत्तिसिद्धिः। दृष्टजातीयमाकस्मिकं स्यादिति चेन्न । तत्राऽपि किञ्चिदन्यदेव प्रयोजकं भविष्यतीत्यविरोधात् । न कार्य्यस्य विशेषस्तत्प्रयुक्ततयोपलभ्यते । नापि कार्य्यसामान्यस्याऽन्यत् प्रयोजकं दृश्यते इति चेत् । तत् किं कारणस्य विशेषः स्वगतस्तत्प्रयोजकतयोपलब्धः, कारणसामान्यस्य वाऽन्यत् प्रयोज्याऽन्तरं दृश्यते, यतो विवक्षितसिद्धिः स्यात् । शङ्का तूभयत्रापि सुलभेति । कार्यजन्माजन्मभ्यामुन्नीयते इति चेत् । न । सहकारिलाभालाभाभ्यामेव उपपत्तेः । उन्नीयतां वा,

**कार्य्येषु शङ्किष्यते । निषेधकाभावात् । न हि धूमस्य विशेषं दहनप्रयोज्यं प्रतिषेद्धुं स्वभावानुपलब्धिः प्रभवति । कार्य्यैकनिश्चयस्य तदनुपलब्धेरेवानिश्चयोपपत्तेः । कार्य्यस्य चातीन्द्रियस्यापि सम्भवात् । अत एवानुपलब्ध्यन्तरमपि निरवकाशमिति ॥**

न वैजात्यमिति ॥ असमर्थव्यावृत्तकुर्वद्रूपत्वं विना न तत् क्षणिकत्वम् । अन्यथा समर्थस्यैव सतः कार्यजननाजननयोः सहकारिसाहित्यतदभावाभ्यामेवोपपत्तेः । वैजात्ये च सति क्वाप्यनुमितिर्न स्यात् उपस्थितं कारणगतरूपं परिहृत्यानुपलभ्यमानरूपान्तरेण कारणत्वे, कार्येऽप्युपस्थितरूपमपहायानुपलभ्यमानरूपान्तरेण कार्यत्वशङ्कया कार्यकारणभावाग्रहात् । तेन चानुमानेन विना न तत्सिद्धिः, क्षणिकत्वसिद्धिरित्यर्थः । न च प्रत्यक्षादेव क्षणिकत्वसिद्धिरित्याह ॥ नाध्यक्षमिति ॥ अध्यक्षं निर्विकल्पकम् ॥ निश्चयः सविकल्पकम् ॥ क्षणिकत्वानिश्चयाभावान्न तदुन्नेयं क्षणिकत्वनिर्विकल्पकमित्यर्थः ॥ तज्जातीयस्येति ॥ पूर्वाविशिष्टतज्जातीयस्यैवेत्यर्थः ॥ तथैकेति ॥ यैव पूर्वव्यक्तिः सहकारिवैधुर्यात् कार्यं मा कार्षीत् सैव तत्प्राप्तौ करोतीत्यत्र विरोधाभावादित्यर्थः । ननु दृष्टतज्जातीयाऽपि व्यक्तिस्तदन्यैवेत्यत आह ॥ तद्धेति ॥ तद् यदेव पूर्वकालवृत्ति तदेवोत्तरकालवृत्ति । तादृग्वैजात्यशून्यमन्यादित्यर्थः । ननु दृष्टजातीयस्य कारणं विना भवत आकस्मिकत्वं स्यात् । तथाच कादाचित्कत्वव्याघात इत्यत आह ॥ दृष्टेति ॥ कारणं विना कार्यस्योक्तदोषो, न तु दृष्टजातीयं विनेति तत्र कारणान्तरं स्यादित्याह ॥ तत्रापीति ॥ न कार्यस्येति ॥ कारणविशेषप्रयोज्यं कार्यस्य वैजात्यं, दृष्टजातीयस्य च प्रयोजकान्तरं योग्यानुपलब्धिबाधितमित्यर्थः ॥ तत्किमिति ॥ कुर्वद्रूपत्वमपि न कार्यं प्रति कारणतावच्छेदकं दृष्टं, न चोपस्थितकारणतावच्छेदकरूपस्य प्रयोज्यान्तरमिति तदपि तथेत्यर्थः । न चेष्टापत्तिः । तेन रूपेणार्थक्रियारहितत्वात् त्वन्मते प्रामाणिकत्वं न स्यादित्यर्थः । अथ निश्चयेन नोच्यते, अपि तु शङ्क्यते । तत्राह ॥ शङ्का त्विति ॥ ननु न कारणवैजात्यं शङ्क्यते, येन तत्कार्येऽपि वैजात्यशङ्का स्यात् । किं

त्वनुमानसिद्धम् । तथाहि । यदि यः प्रागजनकः स एवोत्तरकालम- नुवर्तते तदा कथं ततः कार्यजन्म । जनकस्य वा तत्पूर्वं सत्त्वे कथं पूर्वमजननमिति कार्यजननाजननाभ्यां पूर्वोत्तरयोर्वैजात्यमनुमीयत इति शङ्कते ॥ कार्येति ॥ जननाजननयोरन्यथाऽप्युपपत्तेर्नानुपलभ्य- मानवैजात्यानुमानमिति परिहरति ॥ सहकारीति ॥ निषेधकेति ॥ साधकस्येव बाधकस्याप्यभावादित्यर्थः । नन्वनुपलब्धिरेव बाधिके- त्याह ॥ न हीति ॥ स्वभावानुपलब्धिर्योग्यानुपलब्धिः । वैजात्यस्या- ऽयोग्यत्वादित्यर्थः ॥ कार्यैकेति ॥ सतोऽपि वैजात्यस्य व्यञ्जकतत्कार्या- नुपलब्धौ वाऽनुपलब्ध्युपपत्तेः । कार्यानुपलब्ध्या हि कारणं न निश्री- यते, न तु तदभावो निश्चीयते व्यभिचारादिति भावः । ननु धूमकार्य- दर्शनेऽपि न धूमवैजात्यं दृश्यते इत्यत आह ॥ कार्यस्य चेति ॥ धूम- कार्यमैन्द्रियकमेवेत्यत्र नियामकाभावादतीन्द्रियमपि तदस्तीति तत्प्र- योजकधर्मवैजात्यशङ्का स्यादित्यर्थः ॥ अत एवेति ॥ व्यापकानुपल- ब्धिरपि न तन्निषेधिकेत्यर्थः । उक्तशङ्कया तदुत्पत्त्याद्यनिश्चयेन व्या- पकत्वानिश्चयादिति भावः ॥

वैजात्ये जातिसङ्करं बाधकान्तरमाह—

एवं, विधिरूपयोर्व्यावृत्तिरूपयोर्वा जात्योर्विरोधे सति न समावेशः। समाविष्टयोश्च परापरभावनियमः। अन्यूनाऽनतिरिक्तवृत्तिजातिद्वयकल्पनायां प्रमाणा- ऽभावात् । व्यावर्त्यभेदाभावेन विरोधानवकाशे भे- दानुपपत्तेः । परस्परपरिहारवत्योश्च समावेशे गोत्वा- ऽश्वत्वयोरपि तथाभावप्रसङ्गात्।सामग्रीविरोधान्नैव- मिति चेत्, एतत् कुतः ? परस्परपरिहारेण सर्वदा व्यवस्थितेरिति चेद्, नेदमप्यध्यक्षम् । एकदेशसमा- वेशेन तु सामग्रीसमावेशोऽप्युन्नीयते । यावत् कार्य- योः परस्परपरिहृतिस्वभावत्वादिति चेत् । तर्हि कम्प- शिंशपयोः परस्परपरिहारवत्योर्न समावेशः स्यात् ।

**दृश्यते तावदिदमिति चेत्। गोत्वाऽश्वत्वयोरपि न द्रक्ष्यते इति का प्रत्याशा ?। तथाच गतमनुपलब्धिलिङ्गेनाऽपि। क्वचिदपि विरोधाऽसिद्धेः। ततो विपक्षे बाधकाभावात् स्वभावहेतुरप्यपास्तः॥**

एवमिति॥ विधिरूपयोरिति स्वमते। व्यावृत्तिरूपयोरिति परमते। विरोधः परस्पराभावसहवृत्तित्वम्। कुर्वद्रूपत्वस्य शालित्वव्याप्यत्वे यवबीजे तदभावः। व्यापकत्वे कुशूलस्थशालौ तदभावः स्यादिति परस्परव्यभिचारे तयोरेकत्र समावेशो न स्यादित्यर्थः॥ अन्यूनेति॥ पर्यायशब्दोच्छेदप्रसङ्गाद् बाधकाचेति भावः। प्रमाणाभावमेवाह॥ व्यावर्त्यैति॥ यथा वृक्षत्वशिंशपात्वयोर्व्यावर्त्यभेदाद्विरोधः। एकस्य हि वृक्षमात्रं व्यावर्त्यम्, अन्यस्य वृक्षविशेषोऽपि पनसादिः। न तथा बुद्धित्वज्ञानत्वयोर्व्यावर्त्यभेद इत्यर्थः॥

ननु समाविष्टयोर्जात्योर्न परापरभावनियमः। घटत्वसुवर्णत्वयोर्व्यभिचारात्। नचोपष्टम्भकपार्थिवभागवृत्त्येव घटत्वं, न सुवर्णवृत्तीति वाच्यम्। एवमपि काष्ठपाषाणघटादावप्रतीकारात्। नाऽपि– मार्दे एव घटे घटत्वम्, अन्यत्र तु तथाविधसंस्थानवत्त्वगुणयोगाद्गौणो घटव्यवहारः। मुख्यत्वस्य विनियन्तुमशक्यत्वात्। अथ संस्थानवृत्त्येव घटत्वं, न द्रव्यवृत्तीति न तयोः समावेशः। संस्थानं हि अवयववृत्तिः संयोग एव। युक्तं चैतत्। कथमन्यथा तस्मिन्नेव सुवर्णे तत्संस्थानसत्त्वासत्त्वाभ्यां घटतदभावव्यवहार इति।तन्न।तत्राप्यन्यतरकर्मजत्वादिना सङ्करप्रसङ्गात्। गुणजातौ न साङ्कर्यदोष इति मतन्निर्बीजमेव॥

अत्राहुः॥ सुवर्णत्वादिव्याप्यं नानेव घटत्वम्। न चैवं सुवर्णादिघटेष्वनुगतव्यवहारो न स्याद्, घटत्वस्य प्रत्येकविश्रान्तत्वेन व्यक्तिस्थानीयत्वादिति वाच्यम्। भिन्नजातीयघटेषु तादृशसंस्थानवत्त्वेनोपाधिना तथा व्यवहारात्। तर्हि संस्थानवृत्त्येवान्यतरकर्मजत्वादिव्याप्यं नानैव घटत्वमस्तु। तन्नानात्वस्यावश्यकल्प्यत्वात्। एतावता संस्थानविशेषान्वयव्यतिरेकानुविधानमपि घटव्यवहारस्य सङ्गच्छत इतिचेत्। न। महान् नीलो घटश्चलतीति परिमाणरूपविशेषकर्मसामानाधिकरण्यप्रतीतेः॥ न च संस्थाने गुणे तत्संभवः।

यद्वा, संस्थानविशेषैकार्थसमवायिद्रव्यत्वमुपाधिर्घटत्वम् ॥

ननु क्वचिदसमावेशदर्शनादस्त्वनयोर्विरोध इत्याह ॥ परस्परेति॥ विरोधे क्वचित्समावेशो न स्यादन्यथाऽतिप्रसङ्ग इत्यर्थः । सामग्रीति ॥ गोत्वाश्वत्वव्यञ्जकव्यक्तिसामग्र्योर्विरोधात्तयोरसमावेश इत्यर्थः ॥ कुत इति ॥ एतद्विरोधस्वरूपम् । सामग्र्योरेव विरोधः कुतो मानात् सिद्ध इत्यर्थः । परस्तत्र मानमाह ॥ परस्परेति ॥ अतीन्द्रियसामग्र्योरन्योन्यं सहानवस्थाननियमो नासर्वज्ञाध्यक्षगम्य इत्याह ॥ नेदमिति ॥ प्रत्युत सामग्र्येकदेशकालदिगादिरूपसमावेशेन यदेव गोरश्वस्य च कारणं दृष्टं, तस्यैव पशुजनकत्वमिति स्वरूपेण गवाश्वसामग्र्योरप्येककार्यजनकत्वरूपः समावेश एव कल्प्यत इत्याह॥एकदेशेति ॥ कार्ययोरिति ॥ कार्ययोर्विरोधात्तत्सामग्र्योर्विरोधः कल्प्यत इत्यर्थः ॥ कम्पेति ॥ सौगतैः कर्म्मण आश्रयभिन्नस्यास्वीकारात् कम्पत्वशिंशपात्वजात्योर्न समावेशः स्यात् । चलपिप्पले निश्चलशिंशपायाश्च परस्परपरिहारेण स्थितेरित्यर्थः । दर्शनादर्शनकृत एव समावेशासमावेश इत्याह ॥ दृश्यत इति ॥ यथा तयोरन्योन्यपरीहारस्थितयोरपि क्वचित्समावेशस्तथा तादृशयोर्गोत्वाश्वत्वयोरपि समावेशः स्यादित्याशङ्क्येत्याह ॥ गोत्वेति ॥ गोत्वाश्वत्वयोः समावेशे दूषणमाह ॥ तथा चेति ॥ गोत्वाश्वत्वयोः समावेशेन विरोधासिद्धौ गोत्वस्याश्वत्वविरुद्धस्योपलब्ध्याऽश्वत्वाभावानुमानं न स्यात् । तथा च कार्यलिङ्गकमनुमानं गतमिति प्रागुक्तं, स्वभावेनापि गतमित्यर्थः ॥ क्वचिद्दर्शनेति ॥ अन्यत्र समावेशसंशयादिति भावः । एवञ्च वृक्षं विना शिंशपाऽनुपलब्धिरूपविपक्षबाधकानिश्चये शिंशपाया वृक्षस्वभावत्वमपि न निर्धार्येत । शिंशपात्वमपि वृक्षत्वं व्यभिचरेदिति शङ्कायाः सत्त्वादित्याह ॥ तत इति ॥

विपक्षे बाधकान्तरमाह—

नन्वस्ति तत् । तथाहि । वृक्षजनकसामग्र्यन्तर्भूता शिंशपासामग्री, सा वृक्षमनिपत्य भवन्ती स्वकारणमेवातिपतेत् । एवं, शाखादिमन्मात्रानुबन्धी वृक्षव्यवहारस्तद्विशेषानुबन्धी च शिंशपाव्यवहारः,

स कथं तमतिपत्यात्मानमासादयेदिति चेत् । एवं तर्हि शिंशपासामग्र्यन्तर्भूता चलनसामग्री, ततस्तामतिपत्य चलनादिरूपता भवन्ती स्वकारणमेवातिपतेत् । तथा, शाखादिमद्विशेषानुबन्धी शिंशपाव्यवहारस्तद्विशेषानुबन्धी च चलनव्यवहारः । स कथं तमतिपत्यात्मानमासादयेदिति तुल्यम् ॥

नोदनाद्यागन्तुकनिबन्धनंचलनत्वं, नतुतद्विशेषमात्राऽधीनमिति चेत् । यदि नोदनादयः स्वभावभूतास्ततस्तद्विशेषा एव । अथास्वभावभूतास्ततः सहकारिण एव । ततस्तानासाद्य निर्विशेषैव शिंशपा चलनस्वभावत्वमारभते इति । तथाच कुतः क्षणिकत्वसिद्धिः ? । स्वभावभूता एवागन्तुकसहकार्यनुप्रवेशाद्भवन्तीतिचेत् । एवन्तर्हि वृक्षसामग्र्यामागन्तुकसहकार्यनुप्रवेशादेव शिंशपाऽपि जायते इति न कश्चिद्विशेषः । एवमेतत् । किन्तु शिंशपाजनकास्तरुसामग्रीमुपादायैव, चलनजनकास्तु न तामेव किन्तु मूर्त्तमात्रम् । तथा दर्शनादिति चेत् । मैवम । कम्पजनकाः शिंशपाजनकविशेषा अपि सन्तस्तानतिपतन्ति, न तु वृक्षजनकविशेषाः शिंशपाजनकास्तानिति नियामकाभावात् । शिंशपाजनकास्तद्विशेषा एव कम्पकारिणस्तु न तथा, किन्त्वागन्तवः सहकारिण इति चेत् । एवन्तर्हि तानासाद्य सदृशरूपा अपि केचित् कम्पकारिणोऽनासादितसहकारिणस्तु न तथा । तथाच तद्वा तादृग्वेति न कश्चिद्विशेषः स्यात् । तस्माद्विरुद्धयोरसमावेश एव, समाविष्टयोश्च परापर-

भाव एव । अनेवम्भूतानां द्रव्यगुणकर्म्मादिभावेन उपाधित्वमात्रम् । तेषान्तु विरुद्धानां न समावेशो व्यक्तिभेदात् । जातीनाञ्च भिन्नाश्रयत्वात् । तथा-च कुतः क्षणिकत्वम् ? । वैजात्याभ्युपगमे च कुतो-ऽनुमानवार्त्ता ? । मा भूदनुमानमिति चेन्न । तेन हि विना न तत्सिद्ध्येत् । न हि क्षणिकत्वे प्रत्यक्षमस्ति । तथा निश्चयाभावात्, गृहीतानिश्चित एवार्थे तस्य प्रा-माण्यात्, अन्यथाऽतिप्रसङ्गात् ॥

नन्वस्तीति ॥ तद् विपक्षे बाधकम् ॥ शिंशपात्वेन वृक्षत्वं साध्यं, वृक्षव्यवहारो वा ? उभयत्र कार्यकारणभावो विपक्षे बाधक इत्यर्थः । तथाच्च चलपत्रता शिंशपात्वं, तद्व्यवहारश्च शिंशपाव्यवहारं न व्यभिचरेदित्याह ॥ एवं तर्हीति ॥ न च शिंशपासामग्र्यन्तर्वर्त्तिन्येव चलपत्रतासामग्री, किन्तु तद्भिन्नैवेत्याह ॥ नोदनेति ॥ नोदनादयः किं शिंशपाविशेषा एव, तद्विशेषजनका वा ? द्वयमपि नास्तीत्याह ॥ यद्यीति ॥ तथाच्च तेषां तथाभूतानामेव शिंशपाव्यभिचारे शिंशपा वृक्षं व्यभिचरेदिति भावः । ननु सहकारूपेषु उपादानकारणेषु सत्सु सम्भूयमात्रकारिणो नोदनादय इत्यत आह॥अर्थेति ॥ भावस्य समर्थैक-स्वभावत्वेऽपि कार्यकरणाकरणयोः सहकारिलाभालाभप्रयुक्तत्वात् प्रसङ्गतद्विपर्यययोरभावे प्रतिबन्धासिद्धेरनुमानात् कुतः क्षणिकत्व-मित्याह ॥ तथाच्चेति ॥ शिंशपायाः स्वभावभूता अपि नोदनादय आगन्तुकसहकार्यनुप्रवेशाज्जायमानाः शिंशपां विना भविष्यन्ती-त्याह ॥स्वभावेति॥ एवं वृक्षस्वभावभूता शिंशपाऽऽगन्तुकसहकारि-वशेन जायमाना वृक्षं विनाऽपि स्यादिति गूढाशय आह ॥ एवं तर्हीति ॥ आशयमविद्वान् शङ्कते ॥ एवमिति ॥ किन्त्विति ॥ आग-न्तुका अपि तद्व्याप्या एवेत्यर्थः ॥ तामेव–शिंशपासामग्रीमेवेत्यर्थः ॥ आशयमुद्घाटयति ॥ कम्पजनका इति ॥ शिंशपाजनकानां कारणानां विशेषाः तान् शिंशपाजनकान्, वृक्षजनकानां कारणानां विशेषाः तान् वृक्षजनकानित्यर्थः ॥ तद्विशेषाः–वृक्षजनकविशेषा इत्यर्थः॥ एवं

तर्ह्रीति॥तज्जातीय एव सहकारिलाभालाभाभ्यां कार्यजननाजनने इति कुतः क्षणिकत्वमित्यर्थः । वैजात्यनिराकरणमुपसंहरति ॥ तस्मादिति ॥ अनेवमिति ॥ येषां न विरोधो न वा परापरभावः, तेषां सहभावमात्राद् व्यवस्थितानां भूतत्वकार्यत्वमूर्तत्वानां द्रव्यादिभावेन द्रव्यादिरूपतया उपाधिमात्रत्वं, न तु जातिरूपत्वमित्यर्थः ॥

ननु द्रव्यत्वगुणत्वकर्मत्वादीनां कथमित्यत आह ॥ तेषामिति ॥ तेषां द्रव्यत्वादीनां कुतो न समावेश इत्यत आह ॥ व्यक्तिभेदात् ॥ व्यञ्जकाश्रयभेदादित्यर्थः । एतदेव स्पष्टयति ॥ जातीनां चेति ॥ द्रव्यादिव्यक्तिगतत्वेनैकाश्रयत्वाभावादित्यर्थः ॥ तथा चेति ॥ परापरभावाभावेन वैजात्याभावादित्यर्थः । तथापि तत्स्वीकारे दण्डमाह ॥ वैजात्येति ॥ तथेति ॥ नीलमिदमितिवत् क्षणिकमिति निश्चयाभावादित्यर्थः । तथाप्यव्यक्तं निर्विकल्पकं तथा स्यात् तत एव प्रकृतसिद्धेरित्यत आह ॥ गृहीतेति ॥ निर्विकल्पकस्य सविकल्पकोन्नेयत्वात् तदसिद्धौ निर्विकल्पकसत्तायां मानाभावादित्यर्थः ॥

नन्वयं घट इत्यनुभवोऽस्ति । स च घट इति धर्मिणम्, अयमिति वर्तमानत्वं विषयीकरोतीति वर्तमानत्वनिश्चय एव क्षणिकत्वनिश्चय इति तदुल्लेखप्रत्यक्षमस्त्येवेत्यत आह–

ननु वर्त्तमानः क्षणोऽध्यक्षगोचरः । न चाऽसौ पूर्वाऽपरवर्त्तमानक्षणात्मा । ततो वर्तमानत्वनिश्चय एव भेदनिश्चय इति चेत् । किमत्र तदभिमतमायुष्मतः ? यदि धर्म्येव नीलादिर्न किञ्चिदनुपपन्नम् । तस्य स्थैर्याऽस्थैर्यसाधारण्यात् । अथ धर्म्मः । तद्भेदनिश्चयेऽपि धर्म्मिणः किमायातं ? तस्य ततोऽन्यत्वात् । वर्त्तमानावर्त्तमानत्वमेकस्य विरुद्धमिति चेत् । यदि सदसत्त्वं तत् तन्न । अनभ्युपगमात् । ताद्रूप्येणैव प्रत्यभिज्ञानात् । सदसत्संबन्धश्चेत्, किमसङ्गतं ? ज्ञानवत्तदुपपत्तेः । क्रमेणानेकसंबन्ध एकस्यानुपपन्न इति चेत् । न । उपसर्पणप्रत्ययक्रमेणैव तस्याऽप्युपपत्तेः ।

प्रत्यभिज्ञानमप्रमाणमिति चेत्। अस्ति तावदतो निरूपणीयं, क्षणप्रत्ययस्तु भ्रान्तोऽपि नास्तीति विशेषः॥

स्यादेतत्। मा भूदध्यक्षमनुमानं वा क्षणिकत्वे, तथापि सन्देहोऽस्तु। एतावताऽपि सिद्धं समीहितं चार्वाकस्येति चेत्। उच्यते—

स्थैर्यदृष्ट्योर्न सन्देहो न प्रामाण्ये विरोधतः॥
एकतानिश्चयो येन क्षणे तेन स्थिरे मतः॥ १७॥

न हि स्थिरे तद्दर्शने वा स्वरसवाही सन्देहः। प्रत्यभिज्ञानस्य दुरपह्नवत्वात्। नाऽपि तत्प्रामाण्ये। स हि न तावत् सार्वत्रिको, व्याघातात्। तथा हि। प्रामाण्यासिद्धौ सन्देहोऽपि न सिद्ध्येत्, तत्सिद्धौ वा तदपि सिद्ध्येत्। निश्चयस्य तदधीनत्वात्। कोटिद्वयस्य चादृष्टस्यानुस्मरणे कः सन्देहार्थः? तद्दर्शने च कथं सर्वथा तदसिद्धिः?। एतेनाप्रामाणिकस्तद्व्यवहार इति निरस्तम्। सर्वथा प्रामाण्यासिद्धौ तस्याप्यसिद्धेः। प्रकृते प्रामाण्यसन्देहो लूनपुनर्जातकेशादौ व्यभिचारदर्शनादिति चेत्। न। एकत्वनिश्चयस्य त्वयाऽपीष्टत्वात्। अनिष्टौ वा न किञ्चित् सिद्ध्येत्। सिद्ध्यतु यत्र विरुद्धधर्मविरह इति चेत्, तेनैव स्थिरत्वमपि निश्चीयते। स इह सन्दिह्यते इति चेत्, तुल्यमेतत्। क्वचिन्निश्चयोऽपि कथञ्चिदिति चेत्, समः समाधिः॥

नन्विति॥ वर्तमानत्वं किं घट एव, तद्धर्मो वा?। आद्ये तदवच्छिन्न एव कालस्तस्य वर्तमानः कालः। स च तस्य स्थैर्येऽपि सम्भवति। एकक्षणात्मकत्वं तस्य घटस्यासिद्धमेव। अन्त्ये, धर्मभेदेऽपि न तद्धर्मिभेद इत्याह॥ किमत्रेति॥ ताद्रूप्येणैवेति॥ द्वितीयादिक्षणेऽपि

प्रत्यभिज्ञानाद् वर्तमानत्वमेवेत्यर्थः। ननु पूर्वापराभ्यां सदऽसत्क्षणाभ्यां सम्बन्ध एकस्य विरुद्ध इत्याह ॥ सदसदिति ॥ सदसद्विषयैकज्ञाने तदुभयसम्बन्धो यथा न विरुध्यते तथा बाह्येऽपीत्याह ॥ ज्ञानवदिति ॥ ज्ञाने तदुभयसम्बन्ध एकदैवेति न विरुद्धः। क्रमिकस्तु विरुद्ध इत्याह ॥ क्रमेणेति ॥ तत्सम्बन्धकारणक्रमादेव सोऽप्यविरुद्ध इत्याह ॥ उपसर्पणेति ॥ प्रत्ययः कारणम्। ताद्रूप्येणैव प्रत्यभिज्ञानादित्याक्षिपति ॥ प्रत्यभिज्ञानमिति ॥ विरुद्धधर्मवद्विषयत्वादिति भावः ॥ परिहरति ॥ अस्तीति प्रमाणत्वाप्रमाणत्वाभ्यामिति शेषः। वस्तुतो विरुद्धधर्माध्यासाभावात् प्रमाणत्वमपि निरूपितमेवेति भावः। तदनेन स्थैर्ये प्रमाणमुक्तम् ॥

*सिद्धमिति* ॥ क्षणिकत्वसन्देहेऽपि चार्वाकमतसिद्धेरित्यर्थः। अत्र सन्देहः स्थैर्ये, तद्दर्शने वा, प्रामाण्ये वा ? तृतीयेऽपि प्रामाण्यमात्रे, प्रत्यभिज्ञानप्रामाण्ये वा ?। नाद्यावित्याह ॥ स्थैर्येति ॥ प्रत्यभिज्ञानानुव्यवसायाभ्यां स्थैर्यतज्ज्ञाननिश्चयादित्यर्थः। वादिविप्रतिपत्त्या सन्देहो न स्वारसिक इति भावः। न तृतीयः। क्वचिदपि प्रामाण्याप्रसिद्धा तत्कोटिकसंशयस्याप्यभावादित्याह ॥ न प्रामाण्य इति ॥ न चतुर्थः। एकत्र क्षणे येन विरुद्धधर्मसंसर्गाभावेनैकत्वनिश्चयस्तेनैव स्थिरेऽपि तन्निश्चयादित्याह ॥ एकत्वेनेति ॥ तथाहीति ॥ सन्देहीत्यनुव्यवसायमानकत्वात् तस्येत्यर्थः ॥ तत्सिद्धौ – सन्देहसिद्धौ ॥ तदपि प्रामाण्यम् ॥ निश्चयस्येति ॥ निश्चयस्य सन्देहाधीनत्वात् सन्देहव्यापकत्वात् तेन विना सन्देहानुपपत्तेरित्यर्थः।यद्वा,सन्देहनिश्चयस्याऽपि तदनुव्यवसायप्रामाण्यनिश्चयाधीनत्वादित्यर्थः॥ तद्दर्शने चेति ॥ प्रामाण्यदर्शने चेत्यर्थः ॥

प्रकृते स्थैर्यसाधकप्रत्यभिज्ञाने ॥ न किञ्चिदिति ॥ क्षणिकोऽप्येको न स्यादित्यर्थः ॥ तुल्यमिति ॥ क्षणिकस्याप्येकत्वे सन्देह इत्यर्थः॥ क्वचिदिति ॥ यत्र न विरुद्धधर्मसंसर्ग इत्यर्थः ॥ सम इति ॥ स्थिरेऽपि तदभाव एवेत्यर्थः ॥

तदेवमलौकिकं परलोकसाधनं सिद्धम्। तत्र शङ्कते–

**नन्वेतत् कारणत्वं यदि स्वभावो भावस्य नीलादिवत्तदा सर्वसाधारणं स्यात्। न हि नीलं किञ्चित्**

प्रत्यनीलम् । अथौपाधिकं, तदा उपाधेरपि स्वाभाविकत्वे तथात्वप्रसङ्गः । औपाधिकत्वे त्वनवस्था । अथाऽसाधारणत्वमप्यस्य स्वभाव एव, तत उत्पत्तेरारभ्य कुर्यात्, स्थिरस्यैकस्वभावत्वादिति चेत् । उच्यते—

हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तु सत् ॥
तद्युक्तं तत्र तच्छक्तामिति साधारणं न किम् ॥१८॥

सर्वसाधारणनीलाऽऽदिवैधर्म्येण कात्पनिकत्वं कार्यकारणभावस्य व्युत्पादयता नीलादि पारमार्थिकमेवाभ्युपगन्तव्यम् । अन्यथा, तद्वैधर्म्येण हेतुफलभावस्यापारमार्थिकत्वानुपपत्तेः । न च कार्यकारणभावस्याऽपारमार्थिकत्वे नीलादि पारमार्थिकं भवितुमर्हति । नित्यत्वप्रसङ्गात् । तस्मादस्य पारमार्थिकत्वेऽपरमपि तथा, न चोभयमपीति कथमेकमनेकं परस्परविरुद्धं कार्यं कुर्यात् । तत्स्वभावत्वादिति यदि तदोत्पत्तेरारभ्य कुर्यादविशेषादित्यपि न युक्तं, तत्तत्सहकारिसान्निध्ये तत्तत्कार्यं करोतीति स्वभावव्यवस्थापनात् । इदश्च साधारणमेव, सर्वैरेव तथोपलम्भात् । न हि नीलादेरप्यन्यत् साधारण्यमिति ॥

नन्विति ॥ यथा नीलं सर्वेण निरूप्यमाणं नीलं, तथा सर्वेण निरूप्यमाणं कारणं स्यादित्यर्थः ॥ तथात्वं सर्वसाधारण्यम् ॥ औपाधिकत्वे इत्यत्रोपाधेरित्यनुषञ्जनीयम् ॥ अथेति ॥ नियतकार्यप्रतियोगिककारणत्वमेव स्वभाव इत्यर्थः ॥ तत इति ॥ यस्य स्वाभाविकं तत्तदुत्पत्तित एवारभ्येति बीजस्य बीजत्वमिवाङ्कुरकारित्वमप्युत्पत्तित एव स्यादित्यर्थः। ततः कारणत्वमस्य न साधारणमसाधारणं वेति भावः ॥

परस्य कार्यकारणभावस्य साधारणत्वापादनेन हेतुशक्तिरेव नि-

रस्यत्वेन मता। तथाच नीलाद्यपि परमार्थसच्च स्यात्। नित्यत्वप्रसङ्गात्। ततो वैधर्म्यदृष्टान्ताभावात्त्वत्पक्षो न सिद्ध्यतीत्याह ॥ हेतुशक्तीति ॥ तद्युक्तमिति ॥ सहकारियुक्तम् ॥ तत्र कार्ये तत् कारणं शक्तं निर्वर्तकमिति सर्वैरेव प्रतीयत इति सर्वसाधारण्यमस्त्येव। नीलादेरपि तदेव सर्वसाधारण्यमित्यर्थः ॥ अस्य – नीलादेः ॥ अपरमपि–कार्यकारणस्वरूपमपि ॥ इदञ्चेति ॥ तथा चेष्टापादनमिति भावः ॥

नन्वेवमदृष्टस्यात्मवृत्तित्वेऽपि नात्मा समवायिकारणं, नाप्यन्यदिति तदभावादसमवाय्याद्यपि न कारणमिति तन्नित्यत्वेन न यागादिजन्यत्वं, नाऽपि भोगनियामकत्वमित्यभिप्रेत्याह–

**स्यादेतत्। अस्तु स्थिरं, तथापि नित्यविभोर्न कारणत्वमुपपद्यते। तथा ह्यन्वयव्यतिरेकाभ्यां कारणत्वमवधार्यते, नान्वयमात्रेण। अतिप्रसङ्गात्। न च नित्यविभूनां व्यतिरेकसम्भवः। न च सोपाधेरसावस्त्येवेति साम्प्रतम्, तथाभूतस्योपाधिसम्बन्धेऽप्यनधिकारात्। जनितो हि तेन स तस्य स्यात्, नित्यो वा? न प्रथमः, पूर्ववत्। नापि द्वितीयः, पूर्ववदेव। तथापि चोपाधेरेव व्यतिरेको न तस्य, अविशेषात्। तद्वत इति चेत्। न। न चोपाधिश्चेत्यतोऽन्यस्य तद्वत्पदार्थस्याभावात्। भावे वा, स एव कारणं स्यात्॥**

स्यादेतदिति ॥ न चेति ॥ नित्यत्वेन न कालतो व्यतिरेको, विभुत्वेन न देशत इत्यर्थः। ननु केवलस्य व्यतिरेकाभावेऽपि शरीराद्युपहितस्य तस्य स्यादित्याह ॥ न च सोपाधेरिति ॥ नित्यविभोस्तद्योग्यत्वादित्यर्थः ॥ तत्र विकल्प्य हेतुमाह ॥ जनितो हीति ॥ अन्योऽपि व्यापकोऽव्यापको वेति द्रष्टव्यम् ॥ पूर्ववदिति ॥ उपाधिजनकत्वग्राहकव्यतिरेकाभावस्तुल्य एवेत्यर्थः। द्वितीयस्याद्ये दोषमाह ॥ पूर्ववदिति ॥ नित्यविभोरुपाधेरपि व्यतिरेकाभाव इत्यर्थः। नित्याव्यापकोपाधिपक्षे दोषमाह ॥ तथापि चेति ॥ विशेष्यवति

विशिष्टाभावस्य विशेषणाभावे पर्यवसानादित्यर्थः ॥ तद्वत उपाधि-मतः ॥ स एव विशिष्ट एव, न तु विशेष्यात्मेत्यर्थः ॥

अत्रोच्यते—

पूर्वभावो हि हेतुत्वं मीयते येन केनचित् ॥
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि ॥१९॥

भवेदेवं यद्यन्वयव्यतिरेकावेव कारणत्वम् । किन्तु कार्यान्नियतः पूर्वभावः । स च क्वचिदन्वयव्यतिरेकाभ्यामवसीयते, क्वचिद्धर्मिग्राहकात् प्रमाणात् । अन्यथा कार्यात् कारणानुमानं क्वाऽपि न स्यात् । तेन तस्यानुविधानानुपलम्भात् । उपलम्भे वा, कार्यलिङ्गानवकाशात्, प्रत्यक्षत एव तत्सिद्धेः । तज्जातीयानुविधानदर्शनात् सिद्धिरन्यत्रापि न वार्यते । तथापि कोष्ठगत्यानुविहितान्वयव्यतिरेकमेव कार्यात् कारणं सिद्ध्येत्, अन्यत्र तथा दर्शनादिति चेन्न । बाधेन सङ्कोचात् । विपक्षे बाधकाभावेन चाऽव्याप्तेः । दर्शनमात्रेण चोत्कर्षसमत्वात् । अस्य च ईश्वरे विस्तरो वक्ष्यते । सर्वव्यापकानां सर्वान् प्रत्यन्वयमात्राविशेषे कारणत्वप्रसङ्गो बाधकमिति चेत् । न । अन्वयव्यतिरेकवज्जातीयतया विपक्षे बाधकेन च विशेषेऽनतिप्रसङ्गात् । तथाहि, कार्यं समवायिकारणवद्दृष्टमित्यदृष्टाश्रयमपि तज्जातीयकारणकम्, आश्रयाभावे किं प्रत्यासन्नमसमवायिकारणं स्यात्, तदभावे निमित्तमपि किमुपकुर्यात् ? । तथाचाऽनुत्पत्तिः सततोत्पत्तिर्वा सर्वत्रोत्पत्तिर्वा स्यात् । एवमपि निमित्तस्य सामर्थ्यादेव नियतदेशोत्पादे

स एव देशोऽवश्यापेक्षणीयः स्यात् । तथा च सामान्यतो देशसिद्धावितरपृथिव्यादिबाधे तदतिरिक्तसिद्धिं को वारयेत् । एवमसमवायिनिमित्ते चोहनीये ॥

इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो
मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता ॥
देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात्साक्षितयामनस्यभिरतिंबध्नातुशान्तो मम ॥ २०

## इति श्रीन्यायकुसुमाञ्जलौ प्रथमः स्तबकः ॥ १ ॥

येन केन चिदिति ॥ नान्वयव्यतिरेकाभ्यामेवेत्यर्थः ॥ व्यापकस्यापीत्यत्र हेतुत्वमनुषञ्जनीयम् । तन्निश्चये हेतुमाह ॥ धर्मिधीरिति ॥ बुद्ध्यादिभिः कार्यैः समवायिकारणतयाऽऽत्मादयोऽवगम्यन्ते इति धर्मिग्राहकमानादेव तेषां कारणत्वग्रह इत्यर्थः ॥तेनेति॥ कार्यव्यक्त्याऽनुमेयकारणव्यक्तेरन्वयाद्यनुविधानादर्शनादित्यर्थः । अथ कार्यकारणव्यक्त्योरन्वयव्यतिरेकाभ्यान्न तयोः कारणत्वं गृह्यते । तत्तज्जातीयस्यान्वयव्यतिरेकाभ्यामिति स्वगुणान् प्रति घटादेरन्वयव्यतिरेकज्ञाने घटत्वादिकं न प्रयोजकम् । किन्तु द्रव्यत्वमेव । तर्ह्यन्वयव्यतिरेकवज्जातीयत्वं गुणान् प्रति नित्यविभोरप्यस्तीत्याह ॥ तज्जातीयेति ॥ बाधेनेति ॥ धर्मिग्राहकमानेनात्मादीनां स्वानिष्ठकार्यगुणेषु कारणत्वग्रहाद् बाधोन्नीतपक्षेतरत्वोपाधेर्व्याप्त्यभावादिति भावः ॥ विपक्षेति ॥ दृष्टान्ते तथात्वदर्शनेऽपि तद्रूपं न प्रयोजकं गौरवादित्यर्थः । अन्यत्र तथा दर्शनादित्यत्राह ॥ दर्शनमात्रेणेति ॥ नन्वबाधकाद् गुरोरपि प्रयोजकत्वमित्याशयेन बाधकमाह ॥ सर्वेति ॥ व्यतिरेकाऽसम्भवेऽन्वयमात्रस्यैव कारणताग्राहकत्वे तदविशेषात् सर्वत्र कार्ये नित्यविभोः कारणत्वप्रसङ्ग इति व्यतिरेकोऽपि तत्प्रयोजक इत्यर्थः ॥ अन्वयेति ॥ रूपादिकार्यं प्रति घटादि अन्वयव्यतिरेकवद्दृष्टं, तज्जातीयश्चात्मा ज्ञानादिकं प्रति, समवायिकारणजातीय इति यावत् । यद्वा । अन्वयव्यतिरेकवति कारणे सहकारिसाकल्यासाकल्याभ्यां कार्य-

करणाकरणे दृष्टे। तद्वदत्राप्यन्वयव्यतिरेकवज्जातीयत्वम्। न चैवमति-प्रसङ्गः। व्योमादेर्ज्ञानासमवायित्वात्। तथात्वे चाकाशविशेषगुण-तया ज्ञानस्य श्रौतत्वप्रसङ्गात्। दिक्कालविशेषगुणत्वे चाप्रत्यक्षत्व-प्रसङ्गः। अत एव तत्र कार्याजनने सहकारिवैकल्यमतन्त्रम्। न चैव-मपि व्योमादेः कार्यमात्रे निमित्तत्वापत्तिः। अन्यथासिद्धत्वात्। शब्दं प्रति पूर्ववर्त्तित्वग्रह एवान्यकार्यं प्रति तद्ग्रहात्। अन्यं प्रति पूर्व-वर्त्तित्वग्रह एव यस्य यं प्रति तद्ग्रहः, तदन्यथासिद्धमिति प्रागुक्त-मित्यर्थः॥ विपक्षेति॥ यदीदं कार्यमेतदाश्रयोत्पत्तिप्रयोजकजन्यं न स्यादन्यदेशं स्यादेवं कालेऽपीति सर्वत्रोत्पत्तिसततोत्पत्तिशब्दवाच्येन तर्केणेत्यर्थः। उभयं क्रमेण विवृणोति॥ तथाहीति॥ आश्रयाभाव इति॥ समवायिकारणवृत्तेरेवासमवायिकारणत्वादित्यर्थः। ननु निमित्तवति नियतदेश एव कार्योत्पत्तिरिति किं समवायिनेत्यत आह॥ एवमपीति॥ आश्रयदेशस्यैव समवायित्वादित्यर्थः। तथापि समवायिविशेषसिद्धिः कुत इत्यत आह॥ तथाचेति॥ प्रसिद्धसम-वायिवृत्तित्वबाधकसहकृतं समवायिवृत्तित्वसाधकमेवाप्रसिद्धसम-वायि विषयीकरोति। सामान्यग्राहकस्यापि मानस्य सहकारिविशे-षाद् विशेषे पर्यवसानदर्शनादित्यर्थः। यदा तु समवायिवृत्तित्वानु-मानानन्तरं बाधकावतारः, तदा केवलव्यतिरेकिणस्तत्सिद्धिरिति भावः॥ एवमिति॥ तदन्यतराभावेऽपि कार्योत्पत्तिप्रसङ्गेनेत्यर्थः। वस्तुतः समवायिकारणत्वग्रहे अन्योन्याभावरूपव्यतिरेक एव प्रयो-जको, न तु संसर्गाभावग्रहः। निमित्तसाधारणत्वात्। यत् कपालं तत्र घटो, यत्र कपालं तत्र नेतिवद् य आत्मा तत्र ज्ञानादि, यत्रात्मा तत्र तद् नेति तद्ग्रहस्य सत्त्वात्। तथापि घटादिकं प्रति आत्मनो निमित्तकारणत्वग्रहः कुतः। तत्रोक्तगत्यभावात्। इत्थं, प्रयत्नवदात्म-संयोगश्चेष्टाद्वारा घटहेतुरिति प्रयत्नवदात्माऽपि तद्धेतुः। न चैवमपि संयोगो हेतुर्नात्मेति वाच्यम्। संयोगमात्रस्याहेतुत्वेन संयोगिविशेषि-तस्यैव हेतुत्वात्। अन्यथा दण्डसंयोगस्यैव घटहेतुत्वेन दण्ड-स्यातत्त्वप्रसङ्गात्। अथात्मसंयोगोऽपि हेतुरसिद्धः। तदभावेन कार्याभावादर्शनादिति चेन्न। व्यधिकरणगुणजन्यकार्यत्वेन तत्सा-मानाधिकरण्यगुणजन्यत्वानुमानात्। स्पर्शवद्वेगवद्द्रव्याभिघात-जक्रियायां तथादर्शनात्। न च मूर्त्तमात्रसमवेतासमवायिकारण-

कत्वमुपाधिः। कार्यकारणभावेन हेतोः साध्यव्याप्यतया तद्व्यापकतयोपाधेः साध्याव्यापकत्वात् ॥

साधनमात्रसमर्थनेऽपि प्राधान्याददृष्टं स्तबकार्थमुपसंहरन् मायिकाद्यागमाविरोधमाह ॥ इत्येषेति ॥ प्रथम इतिशब्द उपसंहारे। यस्य देवस्य एषा अदृष्टरूपा सहकारिशक्तिः सहकारिकारणम् असमा मायेत्युदिता। यन्मायाप्रभवं विश्वमित्यत्र मायाशब्देनादृष्टस्याभिधानात्। असमत्वे हेतुः—दुरुन्नीतितः ॥ अदृष्टमाययोर्महाविचारोन्नेयत्वात्। प्रकृतिप्रभवं विश्वमित्यत्राप्यागमेऽदृष्टरूपा शक्तिरेव प्रकृतिरुदिता। कुतः ?। मूलत्वात् ॥ मूलकारणमेव प्रकृतिशब्दार्थः। अदृष्टञ्च तथा। अविद्याप्रभवत्वागमे सैवाविद्येत्युदिता। यतः प्रबोधात्तत्त्वज्ञानादुभयोरपि भीतिः। अविद्यावत्तज्जनकादृष्टस्यापि ततो भयात्। तत्त्वज्ञाने तदनुत्पत्तेः ॥ प्रपञ्चः प्रतारणा, तद्रचनायाः कल्लोलः परम्परा, तस्य कोलाहलः किंवदन्ती स विरतो यस्य, स शान्तो द्वेषादिहीनो मम मनस्यभिरतिं विजातीयज्ञानानन्तरितचिन्तां स्वविषयां साक्षात् साक्षितया तत्र प्रत्यक्षेण साक्षीभवन् बध्नातु दृढीकरोत्वित्यर्थः॥

इति श्रीमहामहोपाध्यायश्रीवर्द्धमानविरचिते न्यायकुसुमाञ्जलिप्रकाशे प्रथमः स्तबकः ॥ १ ॥

श्रीगणेशाय नमः ।

अथ न्यायकुसुमाञ्जलिप्रकाशव्याख्या

# मकरन्दः

पण्डितप्रवरश्रीरुचिदत्तोपाध्यायविरचितः ।

---

भूतप्रभूतविकटध्वनिभीतिमत्या
मानग्रहं मनसि धर्तुमपारयन्त्या ॥
आलिङ्गितो गिरिजया चिरमस्मदादे-
रङ्गेषु मङ्गलमनङ्गरिपुर्दधातु ॥ १ ॥

कुसुमाञ्जलिमकरन्दः श्रीरुचिदत्तेन भण्यते कृतिना ॥
स्तबकोपमर्दभाजां बुधमधुपानां विनोदाय ॥ २ ॥

पृ. पं. १.११.

कामं दहन्नपि कामद इति विरोधाभासः । कामः काम्यम्, अर्शआदित्वात् कर्मणि प्रत्ययाद्वा । स्थाणुः स्थिरः । अथ च स्थाणोर्दारुविशेषस्य ज्ञानसम्बन्धो विरुद्ध इति विरोधाभासः । यद्यपि वृक्षादेरपि चेतनत्वं, तथापि दारुविशेषे न तथात्वम् । यद्वा ज्ञानमय इत्यभिव्याप्तौ मयट्, भगवज्ज्ञानस्य व्याप्यवृत्तित्वादिति विरोधाभासः ॥

अनघत्वमपापत्वमत्राप्रकृतमित्यत आह ॥ वाक्यदोषेति ॥ वाक्येति स्वरूपनिर्वचनम् । तथाच दोषराहित्यमात्रमत्र विवक्षितम् । तत्र दोषो द्विविधो वाक्यस्य अर्थगतो वाक्यगतश्च । तत्र पूर्वार्द्धश्लोकेन आद्ये निरस्तेऽपि अन्यो न लभ्यते इत्यर्थः । नन्वेवमर्थदोषनिबन्धनदोषविशेषाभावे लब्धेऽपि तत्सामान्याभावो न लब्धः । शब्ददोषाऽऽत्मकविशेषाभावस्याप्राप्तत्वादित्यत आह ॥ नीयत इति । तथाच बोधकत्वेन सोऽपि सूचित इति भावः । नचैवं समस्तेत्यादिना विषयशुद्धेरपि लब्धत्वात् पूर्वार्द्धवैयर्थ्यम् । तत्त्वेन बोधकस्याभाससाधारणस्य विवक्षितत्वादिति भावः । केचित्तु एकविशेषाभावस्य पूर्वाऽर्द्धेनैव लब्धत्वादपरविशेषाभावमात्रलाभार्थं वाक्यपदम् । नचैवमनघत्वमित्याद्यग्रिमग्रन्थविरोधः।अनघपदेन विषयाशुद्धेरप्रतिपादित-

त्वात् । अर्थदोषनिरासार्थमित्यस्यैव वक्तुमौचित्यात् । शब्ददोषद्वै-विध्येनार्थदोषनिबन्धनशब्ददोषाभावस्य ततः सम्भवादित्याहुः । अनघत्वपदं यत् कवित्वेऽस्ति तद्भिन्नमनघत्वं स्वातन्त्र्येण लिखितं परग्रन्थे । तत्रापि सामान्यशब्दस्यानघत्वमित्यस्य वक्ष्यमाणस्यार्थ-दोषरहितत्वमिति विशेषपरत्वादित्यर्थः । अवान्तरघटितत्वमात्रं प्र-योजकं, वाक्येति प्रकृताभिप्रायकम् ॥

विशिष्टस्य प्रसूनाञ्जलावभावाद् रागित्वनिरासार्थमाह॥दुःखेति॥

१. ३. तर्हि तत्साधनं नानुसरेदित्यत आह ॥ तत्साधनेति ॥ननु तर्कविषयो न न्याय इत्यरुचेराह ॥ अन्वयीति ॥ वेदस्येति ॥ इदञ्च सम्भव-सौकर्यादुक्तम् । वस्तुतोऽन्वयव्यतिरेकिणोऽपि उदाहरणादिभेदेन न्यायभेदस्य सर्वसम्मतत्वादिति वदन्ति । तच्चिन्त्यम् । एवमपि विषयिणो भेदेऽपि विषयस्यैक्यमेवेति युगत्वानुपपत्तेः । व्यक्तिभेदवि-वक्षया तथात्वेऽप्यनुपपत्तेः । आनन्त्यात् ॥ निमित्तेति ॥ न च कर्म-योगाभावान्नेयं सप्तमी साधुरिति वाच्यम् । निवेशितो निवेशनां प्रा-पित इत्यन्तर्भूतकर्मतया तद्योगबलादुपपत्तेरित्याहुः ॥ प्रामाणिक इति ॥ पक्षतावच्छेदकवर्तीत्यर्थः । तेन पक्षविशेषणाप्रसिद्ध्याऽऽश्रया-ऽसिद्धिः परिहृता । अन्यथाऽव्यावर्तकताऽऽपत्तेः । अप्रामाणिकपक्षत्वे-ऽपार्थकतयाऽनघपदादेव व्यावृत्तेः । प्राचीनमतेनेदमित्यन्ये ॥

२.१७. सिद्धसाधनवारणायाह ॥ सिषाधयिषितेति ॥ सिषाधयिषितं साध्यं धर्मो यस्येति बाधव्युदासः । धर्मिणि हेतुभूतधर्मवतीति स्व-रूपासिद्धिव्युदासः । प्रकर्षेण व्याप्त्या, तेन भागासिद्धिव्युदासः । ज्ञानं हेतोरित्यर्थात् । न चाबाधितेऽपि बाधावतारात् तन्न्यायाभास-स्य न व्युदास इति वाच्यम् । व्यतिरेकनिश्चये सिषाधयिषाविरहेण पक्षपदादेव तन्निरासात् । तस्य न्यायत्वादेव वा ॥

निर्दोष इति ॥ नचाग्रे आपाद्यापादकव्याप्तिप्रदर्शनेन मूलशैथि-ल्यस्य विमर्दनाभावेन मिथोविरोधस्य च निरसनात् पुनरुक्तिरिति वाच्यम् । विशेषाभावस्य सामान्याभावोपपादकतया हेतुहेतुमद्भा-वेनान्वयादित्येके । निर्दोषपदं तदतिरिक्तदोषाभाववत्परमित्यन्ये । एतावता पर्यवसितमर्थमाह ॥ अबाधित इति ॥ अन्यथा प्रतिबन्ध-पदानन्वयापत्तेः ॥

नित्येति ॥ सामर्थ्ये समासात् सापेक्षमसमर्थं भवतीति यद्यपि

सापेक्षे न समासस्तथापि नित्यसापेक्षे तदनिषेधादस्य च तथात्वाद-त्र समास इत्यर्थः ॥ कृदभिहित इति ॥ कृदभिहितो भावो द्रव्यवत् २.३१. प्रकाशते कृदभिहितद्रव्यवद् भासते । तेन रस्यमानमऽमृतमिति यथा कृदभिहितद्रव्ये प्रत्ययस्तथा द्रव्यसमभिव्याहृतकृदाभिहितभावेऽपी-त्यर्थः । इदञ्च तात्पर्य्यवशादित्यवधेयमित्याहुः ॥

असम्बद्धेति ॥ आद्यक्षणेत्यर्थः । इहापि कृदभिहित इति न्याया- ३. १. त् प्रस्यन्दमानेत्यर्थः । तेन तस्य माध्वीकपदादुत्कटेच्छाविषयत्व-मिति नाग्रिमग्रन्थविरोधः । अन्यथोत्पत्तेरुत्कटेच्छाविषयत्वप्रदर्शन-प्राप्तौ तद्विरुद्धेतेत्यवधेयम् ॥ रसपदेनेति ॥ एतच्चोपलक्षणम् । प्रस्यन्द-पदेनोत्पन्नत्वं दर्शयताऽत्यन्ताभावत्वादिना अपुरुषार्थत्वशङ्का निरा-कृतेत्यपि बोध्यम् । संयुक्तकरद्वयात्मकस्याञ्जलेर्माध्वीकोत्पत्तिस्थान-कत्वादिकमसम्भवीत्यत आह ॥ अञ्जलिस्थानीति ॥ किञ्चेति ॥ तथा-चेश्वरमननद्वाराऽपि तद्व्युत्पादनं न मोक्षप्रयोजनमिति भावः ॥

ननु प्रमाणव्युत्पादनरूपग्रन्थस्य शब्दात्मकस्येश्वरानुमितिजन-कत्वे जातिसङ्कर इत्यत आह ॥ प्रमाणव्युत्पादने चेति ॥ तमेवेति ॥ ४.११. प्रकरणादीश्वरस्यैव तत्पदादुपस्थितेरिति भावः । ननूक्तयुक्त्येश्वर-ज्ञानस्य मुक्तिहेतुत्वेनायोग्यतया तदपरामर्शे स्वात्मैव तेन परामृश्य-त इति यदि ब्रूयात्तत्राह ॥ द्वे इति ॥ नन्वेवमपि मननं नायातमि-त्यत आह ॥ वेदनमात्रस्येति ॥ वेदनसामान्यस्येत्यर्थः । नन्वनुपदं स्वात्मसाक्षात्कारानुत्पत्तेरदृष्टद्वारा तद्धेतुत्वं तस्य वाच्यमेवञ्च तद्द्वारा मुक्तावेव तद्धेतुत्वमस्तु लाघवात् । तदुपकारश्च तत्सहकारितया-ऽप्युपपद्यते इत्यरुचेराह ॥ यद्वेति ॥ केचित्त्विति ॥ उक्तबाधकान्मुक्त्य-सम्भव इत्याशङ्कायां नैवं समाधानमित्यस्वरसो बोध्यः ॥

तस्येति ॥ ननु श्तिपस्तत्र न लक्षणा । तस्य प्रकृतिस्वपरत्वतात्पर्य- ४.२५. ग्राहकत्वमात्रेणोपपत्तावुपसर्गवदशक्तत्वात् । किञ्च, तस्यार्थशक्त-त्वे किं लक्षणया । शब्दशक्तत्वे तस्योपासपदादेव स्वलक्षणया लाभे तच्छक्त्यकल्पनात् । अन्यथा पौनरुक्त्यापत्तेः । तत्तद्धातुसमभिव्याहारे तत्तदनन्तशक्त्यापत्तेश्च । नचोपासपद एव लक्षणा । तस्योपासना-रूपार्थशक्तत्वादेव । प्रत्युत स्वलक्षणाभ्युपगमादिति चेत् ॥

अत्राहुः । उपास्तीत्यादिना उपासधातुरित्यादिप्रत्ययाद् धातु-त्वेन धातौ श्तिपः शक्तिः । तदिदमुक्तं, धातुरूपशब्दाभिधायकत्वे-

ऽपीति। तथाच न शक्त्यानन्त्यादिदोषः। अन्यथा धातुत्वप्रकारक-प्रत्ययानुपपत्तेः। न च धातुत्वं नानुगतमिति वाच्यम्। क्रियावाचि-त्वस्य तथात्वात्। नचैवं यागपाकपदादपि तत्प्रयोगापत्तिः। केवल-स्यासाधुत्वात्। धातुसमभिव्याहारे च तत्तद्धात्वन्वयबोधजननिय-मेन तदप्रतिपादकत्वात्। अत एव परमते कार्यत्वं लिङः प्रवृत्तिनि-मित्तम्। अस्तुवा क्रियावाचित्वे धर्ममात्र एव शक्तिः। धर्मिणः प्रकृति-लभ्यत्वात्। एवञ्च प्रकृतिप्रत्ययाभ्यां स्वलक्षणया शक्त्या च उपास-धातुरिति विशिष्टानुभवे जनिते स्वज्ञाप्यधातुत्वविशिष्टोपास-सम्बन्धिनि उपासनारूपेऽर्थे गभीरनदीनीरे तीरपदस्येव शितपदे लक्षणा। ज्ञाप्यसम्बन्धमात्रस्य लक्षणात्वात्। एवञ्च धातुशक्तत्वे-ऽपि लक्षणया धात्वर्थमात्रलाभः स्यान्न तूपासनारूपार्थलाभ इति निरस्तम्। नचैवमेकलक्षणैव, न तु लक्षितलक्षणेति द्विरेफपददृष्टा-न्तोपादानमसङ्गतमिति वाच्यम्। शब्दोपस्थापकस्यार्थे लक्षणेत्यत्र दृष्टान्तात्। किञ्च, द्विरेफपदेऽप्येकलक्षणैव परम्परासम्बन्धेनार्थोप-स्थापिका। यदि च तत्र भ्रमरपदं लक्षयित्वाऽर्थो लक्ष्यते इति लक्ष-णाद्वयं, तदा प्रकृतेऽप्युपासपदं लक्षयित्वैवार्थो लक्ष्यते इति तुल्यम्। इयांस्तुविशेषो यत्तत्रैकमेवोभयलक्षकमत्र तु न तथेति। न हि सर्वप्र-कारेण दृष्टान्तत्वमसम्भवात्। नन्वान्यपदार्थोपस्थितभ्रमरपदादेव भ्रमरपदार्थोपस्थितिसम्भवे द्विरेफपदे कथमर्थलक्षणेति वाच्यम्। तथात्वे द्विरेफपदोत्तरविभक्त्यर्थस्य तत्रानन्वयापत्तेरिति दिक्॥

५.२२. ननु माऽस्तु सन्देह इत्यत आह॥ न्यायेति॥ त्रिदण्डिमतमेक-दण्डिमतञ्चेत्युभयम्। बुद्ध्यात्मनोरेकत्वेन ज्ञानमस्मिनेत्येके। अहङ्कार इत्यन्ये। वेदे नित्यपाल्यत्वमुच्चार्यत्वं, न तूत्पाद्यत्वम्। स चेत्याद्य-ग्रिमग्रन्थानुरोधात्। ननु लेपशब्दस्य पापपरत्वे तृतीयायाः करणा-ऽर्थत्वमयुक्तम्। लोकविरुद्धहेतुकलेपस्याप्रसिद्धेरित्यत आह॥ उप-

६.१८. लक्षित इति॥ लेपपदे दुःखसाधारणतया व्याख्याते लोकविरुद्धकरणक-लेपत्वं दुःख एव प्रसिद्धमित्याह॥ स चेति॥

कर्मधारये उत्तमपदस्य विशेषणपदतया पूर्वनिपातापत्तिः। षष्ठी-समासश्च न निर्द्धारणे इति निषिद्ध एवेति सप्तमीसमासमालम्बते॥ पुरुषेष्विति॥ यद्यपि षष्ठीसप्तम्योरभेदात् सोऽपि निषिद्ध एव। अन्यथा तत्र तत्र सप्तमीसमासेनैवोपपत्तौ षष्ठीसमासनिषेधवैयर्थ्या-

पत्तेः । तथापि निर्द्धारणस्याऽविवक्षायामयं समास इति ऋजवः । वस्तुतो जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम् । यथा नराणां क्षत्रियः शूरतम इत्यत्र । तच्चात्र नास्तीति न निषेधः । तथाच समुदायसमुदायिवाचकपदयोः समासनिषेधस्यैव तत्सूत्रार्थत्वान्न निर्द्धारणप्रयोजकगुणादिविशेषवाचिपदसमासनिषेधोऽपीति तात्पर्य्यम् । एवञ्च षष्ठीसमासेऽप्यदोष इत्यवधेयम् ॥

इज्यत्वमात्रमतिप्रसक्तमत आह ॥ प्रधानमिति ॥ न्यायमतसाधारण्यमपाकरोति ॥ क्षणिकेति ॥ एकार्थेति ॥ अविरुद्धार्थेत्यर्थः । घटादिभिन्नत्वसमानाधिकरणौपाधिकचैतन्यशून्यत्वं विशिष्टाऽभावस्तन्मते उभयाभावादस्मन्मते विशेष्याभावादिति वदन्ति । तच्चिन्त्यम् । तथा सति विशेष्याभावस्यैवोभयमतसाधारणत्वे विशेषणवैयर्थ्यापत्तेः । यत्तु घटाद्यतिप्रसङ्गवारणार्थमेव सत्यन्तमिति । तच्चिन्त्यम । तदतिप्रसङ्गस्यादोषत्वात् । अन्यथा दोषहीनत्वनित्यत्वादावपि तथात्वप्रसङ्गादिति ॥ ६.२५.

फलैक्येति ॥ उक्तप्रकारावच्छिन्नधर्मिण्यैक्यमप्येऽपि प्रकारान्तरभेदेन दर्शनभेदादित्यर्थः ॥ तदेवोपपादयति ॥ सर्वथेति ॥ श्रुतिमूलकत्वादिति ॥ एतच्च श्रोतव्यः श्रुतिवाक्येभ्य इति नियमविध्यवष्टम्भेन उक्तम् । वस्तुतस्त्वात्मप्रतिपादकप्रमाणवाक्यपरमेव श्रुतिपदम् । अन्यथा अदृष्टार्थकतापत्तेः । पूर्वपूर्वप्रतिपत्तौ हि उत्तरोत्तरप्रतिपत्तिद्वारकता । सा च श्रुतिमात्रजनितश्रवणसाध्यतायां नियमापूर्वकल्पनया भज्येत । द्रष्टव्य इति अदृष्टद्वारकताभयेन पाठिकक्रमोल्लङ्घनमपि नोचितं तस्य स्यादिति पुराणस्मृत्यादिना श्रुते मननादभिमतसिद्धिर्भवत्येवेत्याहुः ॥ ७.७.

ननु योगो निदिध्यासनमेवेत्यनन्वय इत्यत आह ॥ उत्तम इति ॥ विनिगमकेति ॥ सिद्ध्यभावरूपायाः पक्षताया अनुमितिहेतुत्वे तदभावादनुमित्यभावस्य उभयत्र तुल्यत्वादित्यर्थः । ननु नोक्तरीत्या सिद्धसाधनस्य दोषत्वं, किन्त्वर्थान्तरतया । तच्च शाब्ददोषतया स्वाऽर्थानुमाने न दोष इति यदि ब्रूयात्, तत्राह ॥ ग्रन्थस्येति ॥ क्रमे शाब्दत्वं पाठिकत्वं, न तु शब्दप्रतिपाद्यत्वम् । क्रमप्रतिपादकाभावात् ॥ ७.२३.

ननु सिद्धसाधनान्मननानुपपत्तिरेवेत्यत आह ॥श्रवणेति॥ अन्यथेति ॥ सिषाधयिषयेत्यर्थः । ननु सिद्धसाधनात् कथमनुमितिरिति ७.३०.

८. १. स्वपक्षः साधु समर्थित इत्यरुचेराह ॥ श्रवणेति ॥ कपिञ्जलेति ॥ यावत्परत्वासंभवेन कतिपयपरतया बहुवचनस्य प्रथमोपस्थितत्रित्वपरत्वं यथा, तथा, प्रकृतेऽपीत्यर्थः । धर्मिमात्रविषयतयाऽपि सामानाधिकरण्यसम्भव इत्यरुचेराह ॥ लाघवाच्चेति ॥ श्रवणप्रकारस्योपस्थितत्वेनानुपस्थितप्रकारकल्पनायां गौरवादिति भावः ॥

ननु सिद्धसाधनादेव प्रामाणिकं गौरवं न्याय्यमित्यत आह ॥ न-
८. ५. वेति ॥ अत एवेति ॥ श्रुतस्यामनने उक्तशास्त्रव्यापारानिर्वाहादेवेत्यर्थः ॥ तथापीति ॥ तथा च परमात्मा निरूप्यते इत्यसङ्गतमेवेति भावः । ननूक्तधर्मिनिरूपणस्यैव पक्षीभूतेश्वरविषयतां विनाऽसम्भवान्नासङ्गतिरित्यत आह ॥ न वेति ॥ तथा च धर्मेऽपि न सन्देह इति भावः ॥ तथा चेति ॥ कपिञ्जले यावत्परत्वासम्भववदत्रासम्भवाभावेन त्रित्वपरत्वाभावादिति भावः ॥ एतेनेति ॥ उक्तरीत्या धर्मिणि धर्मे वा सन्देहाभावेनेत्यर्थः ॥

ननु कथं सन्देह इत्यत आह ॥ कुत इति ॥ अत्र मात्रपदेनापदार्थव्याख्यानं सूचितम् । मूले, इति कुत इति पदाभावाद् योजना कृता न तु संशयोपपादकं किञ्चिदुक्तमिति तेन सूचितमित्यन्ये ॥ श्रोतव्य इति ॥ ननु संशयस्योभयत्र तुल्यतया श्रुतिबलेन ईश्वरविषयकमेव मननं स्यान्न तु प्रामाण्यविषयकमतो नोक्तविरोध इति चेन्न । प्रामाण्यसंशये जागरूके कुतोऽपि न विषयसंशयव्युदासः । तन्निदानानुच्छेदादिति प्रामाण्यानुमानानुसरणावश्यंभावादनन्तरञ्च तत एव विषयनिश्चयात् किं पुनर्विषयनिरूपणेनेति भावः ॥ श्रवणेऽपीति ॥ श्रोतव्य इत्यादिश्रुतावपि प्रामाण्यसन्देहसम्भवादित्यर्थः । यद्यपि श्रुतिभेदादन्यत्र तन्निश्चयेऽप्यन्यत्र संशयो नासम्भवी, तथापि प्रवृत्तिसंवादाद्यभावे आप्तोक्तत्वमेव तन्निश्चायकं, तच्चोभयत्राविशिष्टमिति भावः ॥

वस्तुतस्तु एतदस्वरसादेव प्रागुक्तं सामानाधिकरण्यविरोधं
८. १५. स्मारयति ॥ तथात्वेऽपीति ॥ विरुद्धेत्युपलक्षणं, स्वरूपासिद्ध्यादेरपि द्रष्टव्यम् ॥ अत एवेति ॥ साक्षादित्यर्थः ॥ अर्थान्तरेति ॥ तच्च पुरुषदोषो न हेतुदोष इति न्यायोपदेष्टरि सापराधेऽप्यात्ममननासिद्धिरप्रत्यूहैवेति भावः ॥ पक्षधर्मतेति ॥ यद्यपि पक्षधर्मतायाः स्वातन्त्र्येण पृथक्कारणत्वात् तद्विघटकत्वेऽपि न ज्ञानविघटकत्वं, तथापि यः पक्षस्त-

द्धर्मताज्ञानत्वेन हेतुत्वमिति पक्षतायाअवच्छेदकत्वाभ्युपगमेन यादृशाज्ञानस्य हेतुत्वं तादृशाज्ञानस्य विघटकत्वमस्त्येवेति भावः ॥

कारणमात्रस्येति ॥ तथाच पक्षतायाः पृथक्कारणत्वपक्षे तद्विघटकतयाऽपि तदौचित्यमित्यपि ध्वनितम् । न च ज्ञायमानप्रतिबन्धकत्वाभावान्न सिद्धसाधनं हेत्वाभास इति वाच्यम् । प्राचीनमतेऽनुमित्यसाधारणदोषस्यैव तथात्वात् । एवमपि साध्यज्ञानमादाय साध्यस्य तथात्वे बाधकाभावाच्चेति भावः ॥ ८.२४.

तात्पर्य्येति ॥ यत्र सन्देहस्तत्रैव न्यायाभिधानस्योचितत्वादित्यर्थः । तात्पर्यसन्देहादपि धर्मसन्देहो न धर्मिणीति तत्र न्यायाभिधानमनुचितमेवेति भावः॥परस्परेति ॥ तथात्र न संशयः, विरुद्धप्रकारकस्यैव संशयत्वादिति भावः । न चासंकोचादीश्वरपरसर्वश्रुतिबोधिततावत्प्रकारेण मननं मोक्षहेतुः । तत्र च विरोधप्रतिसन्धाननिबन्धनसंशयावश्यम्भावान्मननमस्त्विति वाच्यम् । अविरुद्धप्रकारे संशयाभावादेवमपि तावत्प्रकारकमननासम्भवात् । एतदेवाभिसन्धायोक्तं, दिगिति ॥ ९. १.

इच्छाया इति ॥ ननु विपर्यासिद्धिनिवर्त्त्या नेच्छा, किन्तु तद्धीनिवर्त्त्या । अन्यथा प्राप्तधनस्यापि तत्प्राप्तिमजानतस्तदिच्छाविच्छेदापत्तेः । एवञ्च सिद्धसाधनस्थलेऽप्युत्पन्नसिद्धेरग्रहे तदिच्छाया अनिवृत्तेः पक्षता स्यादिति चेत् । ९.११.

अत्राहुः । विषयसिद्धिः साक्षान्नेच्छानिवर्त्तिका । उत्पन्नायास्तस्याविरोधिगुणनिवर्त्यत्वात् । तस्मात्तद्धेतोरसिद्धत्वज्ञानस्य विघटनद्वारा इच्छान्तरोत्पत्तिप्रतिबन्धकत्वेन तथात्वं वाच्यम् । ततः प्रकृते सिद्ध्युत्पादमात्रेणैव सिद्धौ सत्यां तदसिद्धत्वभ्रमसंशयाभावात् । धनादिस्थले च तत्सम्भवेन ज्ञप्तिपर्यन्तानुसरणमिति ॥

इच्छेति ॥ न चैवं निरन्तरानुमितित्वेनेच्छायां निरन्तरानुमित्यापत्तिः, इष्टत्वात् । न चानुमित्यानन्त्यम् । तृतीयक्षणे परामर्षस्यैव विनाशात् । न च लिङ्गोपधानमतेऽनुमित्यात्मकपरामर्षमादाय तदापत्तिः । सिषाधयिषानाशादेव तथात्वात् । यत्तु विषयान्तरसञ्चारसामग्रीबलवत्त्वान्न तथाऽनुमितिरिति।तच्चिन्त्यम् । भिन्ने विषये प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वात् । अत एव परामर्षानन्तरं न परामर्षान्तरं, तदनुव्यवसायो वा । अन्यथा सिद्धसाधनस्थले

तत्सामग्र्या एव प्रतिबन्धकत्वसम्भवे सिद्धेरप्रतिबन्धकत्वे तदभाव-रूपपक्षताया हेतुत्व एव मानाभावात् ॥

९.१५. अत एवेति ॥ दूषणत्वप्रयोजकसिषाधयिषाविघटनस्यासार्वदिकत्वादेवेत्यर्थः । द्वितीये हेतुमाह ॥ असिद्धीति ॥ वस्तुतो ज्ञायमान-प्रतिबन्धकत्वाभावादेव न हेत्वाभासत्वम् । साध्यश्च न यथा हेत्वा-भासस्तथोक्तमनुमानप्रकाशे ॥ विशेषणेति ॥ लिङ्गदर्शनादिना तन्ना-शाद् न विशेषणत्वं, सिद्धसाधनस्थलेऽप्यतिप्रसङ्गाच्चोपलक्षणत्वमि-त्यर्थः ॥ साधकप्रमाणपदं सिद्धिपरम् । तेन घनगर्जितस्थले परामर्शा-त्मकसाधकप्रमाणमादाय नाव्याप्तिः । सिद्ध्युपहितप्रमाणपरं तदि-त्यन्ये।सिषाधयिषायाश्च विशेषणत्वमेव,तदुत्तरस्मरणलक्षणपरामर्शा-दनुमितौ विनश्यदवस्थसिषाधयिषायास्तथात्वात् ॥

ननु सिषाधयिषा तत्पुरुषीयतया तत्कालीनतया तत्साध्यीय-त्वादिना चावश्यं विशेषणीया। अन्यथा व्यधिकरणामन्यकालीनामन्य-साध्यलिङ्गपक्षीयाञ्च सिषाधयिषामादाय पक्षतासत्त्वे सिद्धसाधने-ऽप्यनुमित्यापत्तिः । एवञ्च तादृशसिषाधयिषाया घनगर्जितस्थलादा-वप्रसिद्धेः कथं तद्घटिता तत्र पक्षतेति चेन्मैवम् । व्यधिकरणाया अन्यकालीनायाश्च तस्यास्तदा तत्पुरुषे विरह एवेति तामादायातिप्र-सङ्गाभावात्तल्लिङ्गकतत्साध्यकतत्पक्षकानुमितिगोचरेच्छाया एव वि-वक्षितत्वात् । तादृश्याश्च घनगर्जितस्थलेऽपीश्वरेच्छाया एव प्रसिद्ध-त्वात् । तादृशानुमित्यसम्भवे पक्षत्वाभावेऽपि न क्षतिः। नन्वेवं बाधा-देरनुमितिप्रतिबन्धकत्वं न स्यात्,तत्र तादृशानुमित्यसम्भवे पक्षता-विरहादेव तदनुत्पत्तेरिति वाच्यम् । बाधाद्यनवतारदशायामन्यदा तादृशानुमितिसम्भवे तद्घटितपक्षतासत्त्वे तदा बाधादेरेव प्रतिबन्ध-कत्वात् ॥

ननु तत्कालिकत्वेनाप्यनुमितिरवश्यं विशेषणीया । अन्यथाऽन्य-कालिकानुमितिगोचरेच्छामादायातिप्रसङ्गादितिचेत्।अस्त्वेवं,तथापि पक्षताविरहेऽपि बाधादेरेव तत्रोपजीव्यत्वात् । अन्यथाऽनुमितिसत्त्वे तद्घटितपक्षताया अप्यावश्यकत्वात् । पक्षताविरहादेवानुमित्यभावे-ऽन्योन्याश्रयात् । एतेन सिषाधयिषा न सिद्धित्वप्रकारिकेच्छा, प्र-कृते तदभावात् । नापि सिद्धिविषयेच्छामात्रम्, प्रत्यक्षेण जानीयामि-तीच्छायामपि तदापत्तेः । नाऽप्यनुमितित्वप्रकारिकेच्छा । एकलिङ्गा-

चगतेलिङ्गान्तरेणानुमित्सायांतदनापत्तेरित्याद्यपास्तम्।निरुक्तानुमिति-गोचरेच्छाया एव विवक्षितत्वात् । अधिकमनुमानप्रकाशे विपञ्चितम्॥

सत्यसति वेति ॥ समीचीनेऽसमीचीने वेत्यर्थः। सतीति शेषः । ९.१८.
तथाच भ्रमप्रमासाधारणसिद्धिमात्रस्य प्रतिबन्धकतया तस्मिन् सति यत्र सिषाधयिषाया अभावस्तत्र नास्तीति भावः। यत्तु सत्यपदं स्वरूपार्थकमिति स्वरूपसतीत्यर्थ इति। तन्न। वाशब्दस्यासङ्गतत्वापत्तेः ॥

तस्येति ॥ यद्यपि न्यायो न लिङ्गपरामर्शात्मा, किन्तु पञ्चावयववाक्यम् । तथापि तत्रापि तद्धेतुत्वे मानाभावात् परामर्शपरत्वाभिप्रायेण दूषितमिति मन्तव्यम् ॥ तदिति ॥ तत्सहकारित्वासम्भवादित्यर्थः । तस्यैवासत्त्वेनेति भावः ॥ अत एवेति ॥ व्यभिचारादेवेत्यर्थः॥

परामर्शादिना तन्नाशादित्यत्र शङ्कते ॥ अथेति ॥ उक्तबाधका- १०.३.
देव संशयस्यात्र न विशेषणत्वं, किन्तूपलक्षणत्वमिति दोषे सत्येवाऽऽह ॥ मिलितेति ॥ ननु प्रत्येकाभावद्वयं योग्यता, तच्च प्रत्येकसत्त्वे नास्तीत्यत आह ॥ प्रत्येकमिति ॥ प्रत्येकाभावद्वयमित्यर्थः । साधकमानाभावमात्रस्य तथात्वे लाघवादिति भावः । अन्यथा पक्षताविरहादेवानुमितिप्रतिबन्धे बाधो हेत्वाभासो न स्यादित्यपि बोद्धव्यम् ॥
केवलेति ॥ साध्याभावसाधकस्य बाधकत्वमित्यभिप्रायेणेदम् । यद्यपि पक्षनिष्ठात्यन्ताभावप्रतियोगित्वग्राहकमानाविषयत्वं बाधकाभाव इति विवक्षितं तत्र नाप्रसिद्धिः, तथापि लाघव एव तात्पर्यम् । एतदेवाभिसन्धायोक्तम्, अन्यत्रेति ॥

संशयवाञ्छिजिज्ञासाऽपि न तावत्कालस्थायिनीति मतान्तरमाह ॥
यद्वेति ॥ तथा च निवर्त्यत्वेन संशयस्य न्यायाङ्गत्वमिति ॥ य इति ॥ १०.१०
तथाच प्रबोधनार्थं संशयबीजविप्रतिपत्तिप्रदर्शनम् । न तु तद्विना मननासम्भव एवेति तात्पर्यम् ॥ प्रयोजकत्वमिति॥ शब्दात्मकविप्रति- ११.१.
पत्तौ विषयस्य हेतुत्वाभावादिति भावः । यस्या अविवक्षा, तामवान्तरविप्रतिपत्तिमाह ॥ साक्षादिति ॥ अलौकिकपरमाण्वादावतिप्रसक्तिर्व्यतिरेके च बाध इत्यत उक्तं, साक्षात्कारकारणेति ॥ संयोगाद्यन्यतमप्रत्यासत्तिजन्यसाक्षात्कारकारणेत्यर्थः । न च तन्मते व्यावर्त्याप्रसिद्धिः । पक्षे उपरञ्जकस्यापि दानात् । अत एव साक्षात्कारत्वपर्य्यन्तमपि तज्जातित्वे वैयर्थ्यमपि नेति ध्येयम् ॥

न च गर्भवर्तिनष्टे व्यभिचारादिदमुक्तमिति वाच्यम् । तन्मते

मनेनोपलक्षितमित्यन्ये ॥

विकल्प इति ॥ धारावाहिक इत्यर्थः । प्राथमिकसविकल्पकस्याऽजनकत्वान्निर्विकल्पक इत्युपलक्षणम् । प्राथमिकसविकल्पक इत्यपि द्रष्टव्यम् ॥ प्रयत्नेति ॥ यत्नकारणात्मविशेषगुणाविच्छाद्वेषौ तयोर्निरुपाधिविषयौ सुखदुःखे तत्कारणत्वविशिष्टात्मविशेषगुणत्वं लौकिकमानसप्रत्यक्षाविषये वर्त्तेत, न वेत्यर्थः । न च मानसेति व्यर्थम् । मानसप्रत्यक्षपदेन मनःप्रयोज्यजातिविशेषाश्रयस्योक्तत्वात्तस्य व्यर्थत्वाभावाद्खण्डाभावे वा न वैयर्थ्यम् । लौकिकपदञ्चाप्रसिद्धिवारणार्थम् । अत्र प्रयत्नकारणं गुण ईश्वरज्ञानादिस्तन्निरुपाधिविषयो विशिष्टप्रत्यक्षं तत्कारणात्मविशेषगुणत्वं तादृशनिर्विकल्पके वर्त्तेत एवेति सिद्धसाधनमत आह, प्रथमात्मविशेषपदम् । आत्मविशेषस्य संसार्यात्मनो गुण इत्यर्थः । ज्ञानमादाय पूर्वोक्तसिद्धसाधनतादवस्थ्यादाह ॥ प्रयत्नकारणेति ॥ प्रयत्नसाक्षात्कारणेत्यर्थः । तेन न दोषतादवस्थ्यम् ॥

ननु साक्षाज्जनकत्वं यदि व्यक्तेस्तदा इच्छाद्वेषयोरप्युपायेच्छाद्वेषद्वारा जनकत्वादित्यसम्भवः । तज्जातीयस्य चेत्तदा ज्ञानेऽप्यतिप्रसङ्गः । ज्ञानादिजातीयस्य साक्षात्प्रयत्नहेतुत्वादिति चेत् । न । फलेच्छायाः स्वरूपसत्याः साक्षादेव प्रयत्नहेतुत्वेन व्यक्तिपक्षस्यैव क्षोदक्षमत्वात् । विजातीयाव्यापारकजनकजातीयस्यैव वा साक्षाज्जनकत्वेन विवक्षितत्वादित्याहुः ॥ तच्चिन्त्यम् ॥ फलेच्छायाः प्रयत्नजनकत्वाभ्युपगमेऽपि साक्षाज्जनकत्वे मानाभावात् । चिकीर्षादिसत्त्वे तां विना तदुत्पत्तौ विलम्बाभावात् । चिकीर्षोपादानप्रत्यक्षाभ्यां सह युगपदनवस्थानाच्च । क्षणत्रयमात्रस्थायित्वात् । चिकीर्षाद्वारेणैव उपपत्तौ समूहालम्बनकल्पने प्रमाणाभावाच्च । भावे वा तद्विषयत्वे न प्रयत्नजनकत्वं, गौरवान्मानाभावाच्च । अन्यथोपादानप्रत्यक्षेऽपि उपनीतविशिष्टप्रत्यक्षविषयत्वमस्मदादिनिर्विकल्पकमादाय दोषापत्तेः । फलेच्छां विनोपायचिकीर्षाविरहात्तद्धेतुत्वस्यावश्यकत्वात् ॥

वस्तुतस्तु न तस्याः प्रयत्नं प्रति जनकत्वं, किन्त्ववच्छेदकत्वमित्युक्तमस्माभिरन्यथाख्यातिवादे । विजातीयेत्याद्यप्ययुक्तम् । साक्षाज्जनकत्वेनैव विजातीयाव्यापारकं यद् उपादानप्रत्यक्षं तज्जातीयं ज्ञानमादायोक्तसिद्धसाधनतादवस्थ्यात् । न च विजातीयव्यापार-

११.१४

जनकजातीयभिन्नत्वं विवक्षितं, ज्ञाने च विजातीयेच्छाव्यापारकत्वमे-वेति वाच्यम्। ज्ञानादीनामदृष्टद्वारा कार्यमात्रहेतुत्वाभ्युपगमेनेच्छाया विजातीयव्यापारकप्रयत्नजनकजातीयत्वात्। किञ्च द्वेषस्य प्रयत्नकारण-त्वे मानाभावः। यथा चैतत्तथा प्रपञ्चितमनुमानप्रकाशे। मूले त्व-ऽप्रेतनं प्राचीनमतमनुपादेयम्। चिन्तामणिस्वरसोऽप्येवमेव ॥

यच्चोक्तं निरुपधिपदं सोपाधीच्छाविषयकामिनीविशिष्टज्ञानकारणा-ऽऽत्मविशेषगुणत्वस्योक्ते सत्त्वेन सिद्धसाधनवारकमेव। अग्रिमात्म-विशेषगुणपदयोः कामिनीरूपात्ममनोयोगादिवृत्तित्वेन सिद्धसाधन-वारणे तात्पर्य्यमिति। तदपि चिन्त्यम्। निदिध्यासनजन्यभावना-तत्त्वसाक्षात्कारद्वारा इच्छा निरुपधिविषयदुःखाभावरूपमोक्षहेतुरिति तामादाय सिद्धसाधनतादवस्थ्यात्। न च निदिध्यासनजन्यमदृष्टमेव, दृष्टेनैवोपपत्तेः। न च तज्जन्यत्वे स्मृतित्वापत्तिः। स्वसमानविषयक-संस्कारत्वेनैव हेतुत्वे तथात्वात्। अत्र चात्मविषयकभावनात्वेनैव हेतुत्वात्। तत्त्वसाक्षात्कारस्य विश्वविषयकत्वाच्च। अन्यथा संस्कार-ध्वंसे का गतिः। अत एव मूले वक्ष्यति. अतीन्द्रियार्थदर्शनाभ्युपाये भावनेत्यभ्युपगमेऽपि नाम्ना सत्यमेव साक्षात्कारमुत्पादयतीति अदृष्टवत् तस्यापि प्रत्यासत्तित्वे विरोधाभावः ॥

अस्तु वा तथा। तथापि देवप्रतिमादिदर्शनत्वेनैव स्वर्गहेतुत्व-श्रुतेस्तन्निर्विकल्पकस्यापि तथात्वाविशेषात्तमादाय सिद्धसाधनम्। सुखदुःखकारणाऽऽत्मविशेषगुणत्वम् ईश्वरज्ञानादावपीति तदादाय सिद्धसाधनम्। न ह्यग्रिमात्मपदमपि संसारिपरतया व्याख्यानम्। तत्परत्वेऽपि पूर्वदोषानुद्धारात्। जीवनयोनियत्नमादाय सिद्धसाधन-तादवस्थ्याच्च। न च तस्य न सुखदुःखजनकत्वं, किन्तु जनकजनक तेति वाच्यम्। अन्वयव्यतिरेकाभ्यां तद्धेतुत्वात्। अन्यथा प्राणा-देरपि तथात्वे तद्धेतुत्वं न स्यात्। एतेन प्रयत्नेत्यादिना विषयान्तेन सुखदुःखयोरेव विवक्षितत्वात् सुखदुःखान्यतरकारणात्मविशेषगुण-त्वे तात्पर्यमित्यपास्तम ॥

अत्र ब्रूमः। सुखदुःखान्यतरकारणात्मविशेषगुणत्वं लौकिकमानस-प्रत्यक्षविषयजातीयभिन्ने वर्त्तते न वेति विवक्षितम्। साजात्यञ्च गुणत्वसाक्षाद्व्याप्यजात्या। धर्माधर्मोभयसाधारण्यार्थमुभयगर्भ-त्वम्। यथाश्रुतेऽपि सुखदुःखयोरनुगमे तदेव बीजम्। प्रत्येकगर्भ-

तया प्रत्येकं विप्रतिपत्तिद्वयमेव वा विवक्षितम् । एवञ्चेश्वरज्ञानादिकं निर्विकल्पकं जीवनयोनियत्नञ्चादाय सिद्धसाधनानवकाशः । सर्वेषां तज्जातीयत्वात् । धर्माधर्मौ तु न तथा । न चैवं विशेषपदवैयर्थ्यं, संयोगमात्रस्यैव तादृशप्रत्यक्षाविषयतयाऽऽत्ममनोयोगमादाय सिद्धसाधनापत्तेः । कामिनीरूपवृत्तित्वेन सिद्धसाधनवारणायात्मपदम् । भावनावृत्तित्वेन तद्वारणाय कारणान्तम् । यदि च निदिध्यासनजन्यभावना कायव्यूहादिद्वारा सुखादिकारणं, तदा तदन्यत्वमपि सुखदुःखविशेषणम् । नच लौकिकत्वं योगजधर्माद्यजन्यत्वगर्भं, तच्च तन्मतेऽप्रसिद्धम् । साध्ये उपरञ्जकस्याप्यदानाद्व्यर्थत्वञ्चेति वाच्यम् । संयोगाद्यन्यतमप्रत्यासत्तिजन्यत्वस्य विवक्षितत्वात् । अखण्डाभावे साध्ये चावैयर्थ्यादिति ॥

वस्तुतः पूर्वापरितोषादाह ॥ यद्वेति ॥ प्रत्यक्षाविषयत्वमप्रसिद्धमिति लौकिकत्वं विशेषणम् । परमते चोपरञ्जकमेतद्बोध्यम् । सुखत्वादिकमादाय सिद्धसाधनवारणायाविषयान्तम् । गुरुत्वादिना सिद्धसाधनवारणायात्मपदम् । गुणपदं स्पष्टार्थम् । साक्षात्पदव्यावर्त्यमाह ॥ भावनात्वन्त्विति ॥ नन्विदं बाधितं, धर्मत्वाधर्मत्वयोः परस्पराव्याप्यत्वाददृष्टत्वस्य च जातित्वाभावादित्यत आह ॥ अदृष्टत्वञ्चेति ॥ यत एवादृष्टत्वं न जातिरत एव तद्व्याप्यजात्यव्याप्यतया धर्माधर्मत्वे साक्षाद्व्याप्ये इति भावः ॥ ११.१५.

समानेति ॥ अत्र विधिकोटिर्नैयायिकानाम् । नेति बौद्धानाम् । यद्यपि तादृशजातिर्दुःखावच्छेदकत्वासमानाधिकरणेत्येतावतैव दुःखानवच्छेदकशरीरसिद्धाविष्टसिद्धिस्तथापि चैत्रत्वादेस्तादृशजातेः पक्षीकरणे बाधाद् अन्यस्याश्चाप्रसिद्धेरिति पक्षविकल्पभिया तादृशजातित्वं पक्षीकृतम् । दुःखावच्छेदकत्वासमानाधिकरणवृत्तित्वं दुःखावच्छेदकत्वानधिकरणाधिकरणवृत्तित्वं विवक्षितम् । एवञ्च सत्तावृत्तित्वेन सिद्धसाधनवारणार्थमाह, अवृत्त्यन्तम् । अनेकावृत्तिजातित्वमप्रसिद्धमिति समानकालीनपदम् । तदर्थश्च समानकालोत्पत्तिकत्वम् । एवञ्चात्मत्वमनस्त्वादिवृत्तित्वेन सिद्धसाधनवारणार्थं शरीरवृत्तीति ॥ ११.१८.

केचित्तु कारणविशेषप्रयोज्यशब्दवृत्तिजातेस्तथात्वेन सिद्धसाधनवारणाय शरीरवृत्तिपदमित्याहुः । यद्यपि जातिपदं व्यर्थम् ।

योगित्वेनार्थान्तरमिति बाधस्फोरणाय पक्षविशेषणमिति मन्तव्यम्॥

ननु प्रागभावत्वादेरिव प्रागभावप्रतियोगित्वस्यापि न प्रतियोगि कार्यं, किन्त्वाश्रयः। तथाच तमादाय सिद्धसाधनानवकाशात्तदन्यत्वं विशेषणमयुक्तम्। न हि प्रतियोगित्वं सम्बन्धित्वमात्रं विवक्षितम्। तथा सति परम्परासम्बन्धेन प्रागभावत्वादेरपि तथात्वात्तदन्यत्वमपि साध्यविशेषणं स्यात्। पक्षविशेषणं चासिद्धं स्यात्। तथाच स्वरूपसम्बन्धविशेषो वाच्यः। स च तत्र नास्ति। किञ्च कारणतया समं स्वरूपसम्बन्धविशेषोऽन्यः प्रागभावादिना च समं कार्यस्यान्यः स इति शब्दमात्रसाम्यादनुमानाप्रवृत्तिः। न च स्वरूपसम्बन्धत्वेनैवानुगम इति वाच्यम्। तस्य परम्परासम्बन्धसाधारण्येनैकदेशानिवृत्तेः। न च तत्र परम्परासम्बन्धस्यैव सत्त्वात् सम्बन्धान्तरमन्तरेणेत्यादिरूपं तत्र तत्रेति वाच्यम्। तस्य संयोगसमवायेतरेत्यर्थात्। अन्यथा परम्परासम्बन्धस्य सर्वत्र सत्त्वादसम्भवापत्तेरिति चेन्न। साक्षात् सम्बन्धित्वस्य विवक्षितत्वात्। न च कारणतया समं कार्यकारणघटक एव सम्बन्धस्तथा च बाध इति वाच्यम्। घटादाविवैव घटकारणतन्त्वत्रापि साक्षात्स्वरूपसम्बन्धानुभवात्। एवञ्च यद्यपि कारणताभिन्नं तादृशं प्रागभावगर्भं पूर्ववर्तित्वादिकं नानाधर्ममादायार्थान्तरं सिद्धसाधनं वा भवत्येव। तथापि तत्तद्रूपत्वेनापि तादृशप्रतीतिविषयो विशेषणीय इति [illegible]-मुपदध्यामः॥

कार्यप्रतियोगित्वादिति॥ यद्यपि पूर्वेण कार्यस्य प्रतियोगित्वमभिप्रेतमन्येन च कारणतायामपि साक्षात् सम्बन्धित्वमेव प्रतियोगित्वमभिप्रेतं तच्चोभयत्र तुल्यमित्यविरोध इति भावः। अत एव प्रागभावादिवृत्तित्वेन नार्थान्तरशङ्का, कार्यसाक्षात्सम्बन्धित्वस्य तत्र बाधात्। अन्यच्च पूर्ववत्॥ द्वयोरपीति॥ ननु प्रथमविप्रतिपत्तौ प्रागभावत्वमादाय प्रसिद्धिसम्भवेऽपि द्वितीयायासम्भवः। न हि प्रागभावत्वस्य प्रागभावत्वे वृत्तिरपि तु प्रागभाव एव। स च न प्रागभावान्य इति चेत्। प्रागभावत्वपदेन प्रागभावत्वत्वस्य विवक्षितत्वात्। तस्य च तादृशबुद्धिविषये प्रागभावत्वे वृत्तेः। तत्प्रतियोगित्वाश्रयत्वे। प्रागभावत्वपदेन प्रागभावधर्मः प्रमेयत्वादिर्विवक्षित इत्यन्ये॥

१२.२५.

यत्तु व्यासज्यप्रतियोगिकाभावाश्रयणे प्रतियोगित्वप्रागभावान्यः केवलः प्रागभावोऽपीति तद्वृत्तित्वेन यथाश्रुतमेव सम्यगिति । तत्तुच्छम् । प्रागभावमादाय सिद्धसाधनस्यैवमपरिहारात् । तथा च तदन्यत्वविशेषणं व्यर्थमापद्येत । वस्तुतस्तु कार्यपदं तद्विशेषपटादिपरम् । तथाच तत्प्रागभावतत्प्रागभावप्रतियोगित्वान्यप्रागभावाविषयप्रतीत्यविषयपटादिप्रागभाववृत्तित्वादिना प्रागभावत्वे प्रसिद्धिरिति यथाश्रुतमेव सम्यगिति ॥

कार्येति ॥ अनन्यथासिद्धकार्यपूर्ववर्त्तिनीत्यर्थः । विशिष्टस्याप्रसिद्धत्वेऽपि खण्डशः प्रसिद्धेरिति भावः । एवं ब्रह्मैव कारणमेकजा-
११.२८. तीयं प्रधानं वेत्यत्र संशयमाह ॥ यद्वेति ॥ तज्जातीयोत्पत्तिप्राक्क्षणत्वं यत्र, तत्र ब्रह्माधिकरणत्वं प्रधानाधिकरणत्वं वेत्यत्र व्यापकीभूताऽधिकरणत्वेऽवच्छेदकं विशेषणीभूतं ब्रह्मैव प्रधानं वा नात्यन्ताभावप्रतियोगि व्यापकं नित्यत्वादिति निषेधकोटिः परेषां, बाधकोटिरस्माकम् । अत्यन्ताभावप्रतियोगिनो दण्डादेरपि तादृशत्वाभ्युपगमादिति बोध्यम् । यद्यपि व्यापकानित्यत्वेऽप्याकाशवदत्यन्ताभावप्रतियोगित्वं ब्रह्मादेरविरुद्धं, तथापि तद्वदवृत्तित्वानभ्युपगमात् प्रत्युत सकलदेशकालवृत्तित्वादिदमध्यवसेयम् ॥

११.३०. विशिष्टे त्विति ॥ विप्रतिपत्तिरिति शेषः । एवं प्रागपि बोध्यम् । अविशिष्टप्रत्येकप्रसिद्धिदशायामेतदभिमतमिति प्रसिद्धिरिति भावः ॥ तदिति ॥ तत्साधनत्वेन यागादिदृष्टद्वारभाव इत्यर्थः ॥ प्रमाणपदं हीति ॥ तथाचाप्रमाणत्वादिति मूलोक्तस्य बहुव्रीहितत्पुरुषाभ्यां प्रमितिशून्यत्वात् तत्करणेन्द्रियादिशून्यत्वात् सत्समवायिभिन्नत्वादित्यत्र तात्पर्यम् ॥ तदिति ॥ तस्य साधनत्वसाधनेऽपीत्यर्थः ॥ तदिति ॥ कारणत्वासिद्धावित्यर्थः । प्रत्यक्षेण तद्ग्रहस्य निषिद्धत्वादिति भावः ॥

१२.२५. न प्रथमः पक्ष इति ॥ न प्रथमकल्प इति सामानाधिकरण्ये प्रथमकल्पस्य हेत्वभावरूपतया तदभावरूपस्य साध्यस्य हेतुरस्तीति पर्यवसाने यतो हेतुरस्तीत्यत्र साध्याविशेषेण हेतुत्वानुपपत्तिः स्यात् । यदि च न प्रथमः कल्प इत्यस्य हेत्वभावकल्पो न प्रामाणिक इत्यर्थः, तथापि यतो हेतुरस्तीति व्यधिकरणम् । तथाच हेत्वभावकल्पो न प्रामाणिकः । असत्ख्यातिविषयत्वादित्यत्र नोक्तदोष इति

तदर्थपरतया व्याख्यातमिति मन्तव्यम् । यद्यपि पक्षादेरप्रसिद्धौ नोक्तानुमानमपि सम्भवति, तथापि तन्मतेनैव तत्पक्षाभावसाधनमुपन्यस्तमिति मन्तव्यम् । यद्वा एतदस्वरसादेव व्याघातमालम्बते ॥ तथाहीति ॥

यत्तु, यतः सापेक्षत्वादिति पञ्चमीद्वयमसंलग्नमिति कुसृष्टिव्याख्यानमिति । तन्न । यतो हेतुरस्तीति हेतुहेतुत्वेन सापेक्षत्वादित्यस्य सङ्गतत्वात् । सुहृद्भावेनाह ॥तथापीति॥ एतावन्मात्रं प्रागभावसाधारणमतः प्रत्यक्षं विशिनष्टि ॥ एतस्मादिति ॥ तत्फलमाह ॥ अत एवेति ॥ उक्तप्रत्यक्षस्य तत्रासम्भवादेवेत्यर्थः । प्रत्यक्षपरतायां प्रागभावे कादाचित्कत्वस्य व्यभिचारेऽप्यदोषः । लिङ्गत्वेनाप्यग्रे तदभिधानात् । तदभिप्रायेणाह ॥ प्रागिति ॥ प्रकारान्तरेण प्रागभावव्यावृत्तं प्रत्यक्षमाह ॥अपिचेति॥ अनन्यथासिद्धनियतपूर्वमित्यर्थः । नियमानन्यथासिद्ध्योरित्यत्र समाधिमाह ॥ प्रत्यक्षे चेति ॥ ननु परं प्रति प्रत्यक्षमुपन्यासानर्हमेव । अनुमानच्छाययैव तत्र तस्य गमकत्वाङ्गीकारात् । किञ्च कादाचित्कत्वमुपन्यस्तमलग्नकमेवैवं स्यादित्यत आह ॥ यद्वा प्रत्यक्षेति ॥ १३. ४.

नन्वनुमानप्रामाण्ये किं सहकारितया । स्वतन्त्रस्यैव समर्थत्वात् । अप्रामाण्ये सहकारित्वमपि न स्यात् । किञ्चैवं प्रत्यक्षानुमितित्वयोः सङ्करापत्तिरित्याशयेनाह॥यद्वेति ॥ सूर्यस्पन्दात्मकक्षणेन समं घटादेः सम्बन्धाऽन्तराभावाद् आह ॥ स्वरूपेनि ॥ ननु यथाश्रुतं कादाचित्कत्वं प्रागभावे व्यभिचारि । प्रागसत्त्वविशेषितञ्च व्यर्थविशेष्यत्वग्रस्तमित्यरुचेराह ॥ यद्वेति ॥ नन्वेवमुत्पत्तिमात्रमेव हेतुरस्तु । अधिकस्य व्यर्थत्वादिति चेन्न । इष्टत्वात् । उत्पत्तिपदेनोत्पत्तिरूपत्वस्य विवक्षितत्वात् । तथाचाद्यसमयसम्बन्धस्य हेतुत्वपर्यवसानम् । यद्वा, उत्पत्तिगर्भ उत्पत्तिघटकः किञ्चित्समय आद्यसमयस्तत्सम्बन्ध इत्यर्थः । तत्रैव पर्यवसानं विसर्गशून्यपाठादित्याहुः ॥ १३. १२.

यद्यप्यत्रापि स्वरूपस्यैव तत्सम्बन्धत्वे तत्र पूर्ववदुत्पत्तिमत्त्वेन चोत्पत्तेरित्यग्रिमग्रन्थविरोधः, तथापि स्वरूपातिरिक्तसम्बन्धस्योत्पत्तिरूपत्वं, तत्र चात्माश्रयादनवस्थानाच्च नोत्पत्तिमत्त्वमिति मताऽभ्युपगमानुसारेणेदम् ॥

असाधारणं स्यादिति ॥ अगमकं स्यादित्यर्थः । ननु तद्ग्रहणा- १३. २२

ऽऽत्मकं प्रधानात्मकं वाऽतीन्द्रियं, नास्मदादीनां शक्यज्ञानमिति यदि
१३. २८. ब्रूयात्तदा दोषान्तरमाह ॥न वेति ॥ अभिन्नत्वेति ॥ हेतोरभिन्नजातीय-
१४. १५. त्वे चेत्यर्थः । हेतोरिति पाठेऽप्यर्थः स एवेति ध्येयम् ॥ किञ्चिदिति॥
अन्यथासिद्धकिञ्चित्पदार्थावधिकोत्तरत्वव्याप्यकालसम्बन्धित्वाभाव
इत्यर्थः ॥ न चेति ॥ परसिद्धमापादकं भवति । न च कारणत्वपर्यव-
सन्नप्रतियोगिनस्तन्मते प्रसिद्धिरित्यर्थः । स्वमते प्रत्यक्षेणैव तत्प्र-
सिद्धेरुक्तत्वादिति भावः । अत एव तन्मतेनैवोत्तरमाह ॥ तस्येति ॥
तुशब्द इति ॥ परस्पराकाङ्क्षिभावस्य तुशब्दार्थत्वादिति भावः ॥ पक्ष-
१४. २२. द्वय इति ॥ नित्यत्वालीकत्वान्यतरपक्ष इत्यर्थः ॥

नन्वस्मन्मते नित्यत्वपक्ष एव पर्य्यवस्यति, न त्वलीकत्वमस-
त्ख्यात्यनभ्युपगमे सांव्यवहारिकस्यापि तस्य तत्रानभ्युपगमादित्यरुचे-
१४. २६. राह ॥ यद्वेति ॥ एतदुत्तरकालेति ॥ एतत्तु पक्षविशेषणमुत्तरकालो-
त्पत्तिकघटांशे आपादकासिद्धिवारणाय । पूर्वकालीनघटेऽशतः सिद्ध-
साधनवारणायायमिति । पूर्वकालवृत्तिरित्यर्थः । एतत्कालवृत्तिसर्व-
पक्षत्वे आपादके व्यर्थविशेष्यता स्यात्, पक्षीयव्यभिचारवारणा-
ऽयोगादतो विशिष्य पक्षयति॥ घट इति ॥ उत्तरकालोत्पत्तिकव्यभि-
चारादाह, सत्यन्तम् । तद्घटसमसमयोत्पत्तिकघटादौ व्यभिचारादा-
ह ॥ एतत्पूर्वकालेति ॥ अव्यवहितपूर्वकालेत्यर्थः । तथा च चिरतर-
पूर्वकालोत्पन्नो दृष्टान्तः । अन्यथा यथाश्रुतस्याप्रसिद्ध्या तदसिद्धिरि-
त्यवधेयम् । तेनापि तादृशकालाद्यपेक्षणाद् दृष्टान्तासिद्धिरेवेत्यत
आह, प्रथममुत्पत्तिपदम् । चरममुत्पत्तिपदं चिन्त्यम् ॥

केचित्तु वृत्तिपदेन संयोगस्य, कालस्य कालावृत्तित्वात् तत्र व्य-
भिचारवारणाय तदुपादानम् । न चैवं प्रागुत्पन्नगुणादौ व्यभिचारः ।
आपादके द्रव्यत्वस्यापि विवक्षितत्वादित्याहुः । वस्तुतस्तु नञ्व्यत्या-
सेन एतत्पूर्वकालोत्पत्तिकसापेक्षोत्पत्तिकत्वाभावो विवक्षितः । तथा-
च नाव्यवहितत्वाविवक्षा, न वा अखण्डाभावे वैयर्थ्यशङ्का, न वा
नित्यस्य दृष्टान्तत्वे तदसिद्धिरिति ॥ यद्वयमिति पूर्वकालोत्पत्तिक
१४. २९. इष्टापत्तिवारणाय पक्षविशेषणम् ॥घटो यदीति ॥ घटव्यवहितकाला-
ऽनधिकरणत्वं घटाव्यवहितकालाधिकरणत्वं पर्य्यवस्यति । यत्तु आ-
काशादेरपि तथात्वे सदाद्यापादकासिद्धिः स्यादिति घटव्यवहित-
कालानधिकरणत्वं यथाश्रुतमेवाभिमतमिति । तन्न। अनन्यथासिद्ध-

त्वस्य पदार्थविशेषणस्यावश्यकत्वात् । अन्यथा दण्डरूपादिकमादाय दोषतादवस्थ्यापत्तेः । तस्मादुभयथाऽप्यदोष इति । रासभाद्युत्तरत्वसामानाधिकरण्याद्विपर्ययानुमाने कारणत्वं न सिध्येदिति व्याप्यत्वपर्य्यन्तम् । न चानन्यथासिद्धत्वेनैव तद्वारणमिति वाच्यम् । रासभादेरपि तथात्वात् । अन्यथा कारणतालक्षणे नियमांशोपादानमनर्थकं स्यात् । तत्र च तस्याविवक्षितत्वे प्रकृतेऽपि तथाऽस्त्विति । प्रतियोगी चासत्ख्यात्युपनीत इति स्मर्त्तव्यम् ॥ घटव्यवहितकालत्वं घटानधिकरणकालवृत्तित्वमापाद्यम् ॥ अन्येति, अन्यकालोत्पत्तिके इष्टापत्तिवारणाय पक्षविशेषणम् । उत्तरकालोत्पत्तिको दृष्टान्तः ॥ सकलेति ॥ एतच्च पक्षविशेषणं नित्यत्वेनेष्टापत्तिवारणाय । अलीकत्वेन तद्वारणायायमिति ॥ प्रमाणिक इत्यर्थः ॥ १५. १.

किञ्चित्कालवृत्तिर्न स्यादित्येव कृते व्योमादौ व्यभिचार इत्यत आह ॥ किञ्चिदिति ॥ प्राक्कालावृत्तित्वे सतीत्यर्थः । तेन न प्रागभावे व्यभिचारः । यद्यपि सत्यन्तमेव समर्थमिति व्यर्थविशेष्यत्वं, तथाऽप्यखण्डाभाव आपाद्य इति ध्येयम् ॥ तेनेति ॥ विशिष्टाभाव उभयथा सकलकालवृत्तितया सकलकालावृत्तितया च । तच्चाद्यस्य पक्षविशेषणमहिम्नाऽभावे द्वितीयस्य पर्यवसानम् । तच्चानिष्टमिति साऽपेक्षत्वासिद्धिरिति भावः ॥ १५. ४.

एतावदिति ॥ पूर्वापरकालमात्रवृत्तिघटांशे सिद्धसाधनवारणाय पक्षविशेषणम् । एतावत्कालवृत्तौ पूर्वकालोत्पन्ने व्यभिचारादाह, सत्यन्तम् । एतावत्पदं कालविशेषणमात्रासिद्धिवारकम् । एतत्कालीनोत्पन्ने घटादौ सत्यन्तमात्रं व्यभिचारीत्यत आह । एतत्कालाव्यवहितेत्यादि ॥ ननूत्तरकालोत्पत्तिक एव दृष्टान्तः, अन्यत्रापादकवैकल्यात् । तत्र चैतत्पूर्वकालवृत्तिनित्यदिगादिसापेक्षत्वादापादकवैकल्यमित्यत आह ॥ अव्यवहितेति ॥ नञ्व्यत्यासेन एतत्कालव्यवहितपूर्वकालावृत्तीत्यर्थः । नित्यन्तु व्यवहितेऽपि वर्त्तते इत्यदोष इति वदन्ति । तत्तुच्छम् । उत्तरकालोत्पन्नचरमकारणम् आदाय दोषतादवस्थ्यापत्तेः । वयन्तु, पूर्वकालवृत्तिपदं पूर्वकालोत्पत्तिकपरमिति न नित्यमादाय दृष्टान्तासिद्धिः । न च तादृशादृष्टादिसापेक्षत्वाद्दोषतादवस्थ्यम् । उत्तरकालोत्पन्नादृष्टसापेक्षस्य दृष्टान्तत्वे तथाप्यविरोधात् । अव्यवहितपदेनैव तद्वारणाद्वा । यदव्यवहितपूर्वकालोत्पत्ति- १५. ६

काद्दष्टेन नोत्तरकालीनकार्योत्पादनम्, एतत्कालपदेन तस्यैव कालस्य विवक्षितत्वात्। प्रथमकल्पेऽव्यवहितपदं स्फुटार्थमिति युक्तमुत्पश्यामः। व्याप्यत्वं पूर्वत्वञ्च विपर्यये नियमादिगर्भकारणत्वलाभाय। एवञ्चानन्यथासिद्धत्वमपि पदार्थे विशेषणमित्याहुः॥

१५. ८. अत एवेति॥ यत एव किञ्चित्कालावृत्तित्वे सतीत्यादौ न स्यादेवेत्यस्यैव कादाचित्कत्वाभावपदेन पर्य्यवसानम्। अत एव मूले कदाचित् स्यादिति मूलोक्तकादाचित्कत्वाभावापादनं साम्प्रदायिका अन्यादृशमाहुः। अन्यथा पौनरुक्त्यापत्तेरित्यर्थः। तत्र पक्षविशेषणमहिम्नाऽलीकत्वसिद्धिरित्येव भेदो नोक्तदोष इत्यमरसोद्भावनं सम्प्रदायेनेतीति वदन्ति। केचित्तु सम्प्रदायविद इति प्रकरणान्वयीत्याहुः॥

१६. २५. हेतुभवनयोरिति॥ यद्यपि हेतोर्यद्भवनं तस्यैव विशिष्टस्यैकस्य निषेधात्तल्लभ्यत इति द्विवचनमयुक्तं. तथापि विशिष्टमपि तदुभयात्मकमेवेति तथोक्तमिति ध्येयम्॥

१७. २. अहेतुश्चेति॥ हेतुव्यतिरिक्तश्चेत्यर्थः। हेतुनिषेधभवनमुत्पत्तिरूपमसम्भवीत्यत आह॥ तस्येति॥

१७. २२. अकारणकत्वेऽपीति॥ अकारणकत्वाविशेषेऽपीत्यर्थः॥ नियतेति॥ नियतदेशतद्वृत्तित्वमित्यर्थः। परमाणोर्देशत्वमपरस्य तद्वृत्तित्वमिति स्वभावादेव यथा यथा नियम इति भावः। नियतदेशवृत्तिनियतसम्बन्धित्वं विवक्षितमित्यन्ये। परमाणुपदं भावप्रधाननिर्देशेन परमाणुत्वपरमित्यपरे॥

१७. २७. ये ये निरवधय इति॥ अकादाचित्कत्वमाकाशादिषु न तत्तद्धर्माधीनमननुगमादिति निरवधित्वनिबन्धनमेव मन्तव्यमन्यस्यासम्भवादिति परस्परविरोधावधारणेन निरवधित्वे कादाचित्कत्वस्वभावविरोधे इत्यर्थः। अत एवाननुगमप्रदर्शनार्थं, ये ये इत्युक्तमिति वदन्ति॥

१७. २९. अयं क्षण इति॥ अत्र च कालत्वमापादकविशेषणम्। तेन घटरूपादौ न व्यभिचार इति ध्येयम्। अन्ये इत्यस्वरसोद्भावनम्। तद्बीजन्तूक्ततर्कावष्टम्भे यथोक्तमेव युक्तम्। तदनवष्टम्भे त्वेतदप्यप्रयोजकमित्याहुः॥ न हीतीति॥ भावकादाचित्कत्वमिति न प्रागभावा-

१८. २. ऽव्याप्तिर्दोषः। नन्वेवं गौरवमित्यत आह॥ तथा सतीति॥ अन्यथा द्वयोरपि कादाचित्कत्वे घटस्य कादाचित्कत्वव्यवहार आकाशस्याकादाचित्कत्वव्यवहारश्च लोकानां विरुध्येतेत्यर्थः। तथाच गौरवमपि प्रामाणिकमिति भावः॥ नन्विति॥ घटप्रागभावनिरूपकस्य

चक्षुरादेर्न घटकारणत्वं यथेत्यर्थः ॥ न च प्रागभाव इति ॥ अधिक- १८. १४.
बलत्वेन प्रागभावनिरूपकत्वं कारणत्वव्याप्यमिति भावः ॥ तस्येति ॥ १८. १६.
प्रतियोगिसमवायिकारणमात्रनिरूप्य इत्यस्येत्यर्थः ॥ चक्षुरादेरिति ॥
तथाच न तस्य प्रागभावनिरूपकत्वं, यस्य तु तन्निरूपकत्वं कपालादे-
स्तस्य हेतुत्वमेवेति नोक्तदोष इत्यर्थः ॥

नन्विदमनुपलब्धिगम्याभाववादिमतम्, अस्माकन्तु चाक्षुष एवाभाव इत्यपसिद्धान्तः। न च प्रागभावो न चाक्षुष इति न वयं ब्रूमः, किन्तु प्रागभावत्वप्रकारनिरूपणत्वावच्छिन्नं प्रत्यजनकं चक्षुर्व्यभिचारादिति। तदिह सामग्रीनिविष्टाधिकरणस्य परम्परानिरूपणकारणता प्रागभावप्रतियोगिजनकता चेति युक्तो नियम इति वाच्यम्। शब्दादिना तत्प्रकारकनिरूपणसम्भवेन व्यभिचारादधिकरणत्वस्याप्यतथात्वात्। प्रत्यक्षनिरूपणमादाय व्यभिचारश्च तुल्यः। चक्षुर्भिन्न व्यभिचारेऽपीन्द्रियत्वेनाव्यभिचाराद् विशिष्याधिकरणेऽपि व्यभिचारात्। अस्तु वैव, तथाप्यनन्यथासिद्धस्य प्रागभावनिरूपकस्याधिकरणग्रहादेर्यथा न घटकारणत्वं, तथाऽनादेरपि न तथात्वमिति दोषस्तदवस्थ एव। एतेन परमाश्रित्यैव चक्षुरनन्यथासिद्धत्वाभिधानमित्यपास्तम्। अधिकरणग्रहमादायोक्तदोषानिवृत्तेः। किञ्च यदि चक्षुरादिव्यापाराभावेऽपि तत्प्रतीतिस्तदन्यथासिद्धं, तदाऽधिकरणग्रहणमपि तथा स्यात्। शब्दादिना तद्विनाऽपि तत्प्रतीतेः। घटोऽप्येवं चाक्षुषो न स्यात् तद्व्यापाराभावेऽप्यनुमानादिना तत्प्रतीतेः। प्रतीतिविशेषे वा व्यभिचारस्तुल्य एवेति चेत्॥

अत्र ब्रूमः ॥ अधिकरणत्वेन प्रागभावनिरूपकस्य तत्प्रतियोगिजनकत्वमिति नियमः। कपालादेश्च तथात्वात्तज्जनकत्वं न चक्षुरादेरित्यत्र तात्पर्यम्। निरूपकञ्च प्रत्यक्षनिरूपण एवेत्यवधेयम्। न च तत्राप्यधिकरणस्य न निरूपकत्वं, किन्तु तद्बुद्धेरिति वाच्यम्। प्रयोजकत्वमात्रस्यैव विवक्षितत्वात्। न च प्रतियोगिसवायिभिन्नस्य देशकालादेरपि तन्निरूपकत्वाभ्युपगमाद्व्यभिचार इति वाच्यम्। तस्यापि हेतुत्वाभ्युपगमात्। ननु देशकालयोः का गतिरिति चेत्। न। तयोरपि स्वरूपयोग्यत्वात्। वस्तुतोऽधिकरणत्वेन निरूपकजातीयं किञ्चिदवश्यं कारणमिति नियम इति केचित्। उपस्थिते प्रागभावे घटकारणत्वग्रहः, उपस्थितिश्च तस्य न कपालाद्युपस्थिति-

मन्तरेणेति कारणताग्राहकमानेन प्रथमोपस्थितकपालादेरेव कारणत्वं गृह्यते, न तु प्रागभावस्यापि। उत्पन्नानुत्पत्त्या तु तस्य तथात्वग्रहो, न तु प्रत्यक्षात्। चक्षुरादिकञ्च न तदोपस्थितं, न वा कपालादिवदनन्यथासिद्धमिति न कारणमित्यत्र तात्पर्यम् । आपादके विशेषणमित्यन्ये । न च नित्यत्वमुपाधिः । तस्याप्यापाद्यत्वादिति भावः ॥ न च धूमत्वमिति ॥ न च परमाण्वादौ व्यभिचारः, जन्यवृत्तित्वे सतीत्यापादकाविशेषणादित्याहुः। तन्न। परमाणुधूमान्यतरत्वादौ व्यभिचारात्। तस्माद्दहनव्यभिचारिभूतजन्यवृत्तिः स्यादित्यापादकमतो नोक्तदोषः। दहनासमवहितत्वं तदसहकृतत्वं तदघटितत्वं वाऽभिप्रेत्याह ॥अपरस्येति॥ धूमो यदीति ॥ धूममात्रस्य पक्षत्वे आपादकासिद्धिः । धूममात्रस्य तत्समवधानोत्तरोत्पत्तिकत्वाभावेन धूमत्वादेस्तदनवच्छेदकत्वात् । रासभोत्तरभाविधूमस्य पक्षत्वे सिद्धसाधनं, तद्धूमत्वावच्छिन्नस्य तथाभावादिति चेद् मैवम्। धूमस्य समवधानोत्तरोत्पत्तिकत्वनियमेऽपि दहनस्य तदनियतत्वं परेणाभिप्रेतमिति तद्व्यभिचारित्वमेव तदुत्तरोत्पत्तिकतावच्छेदकत्वेन पराभिप्रेतमिति धूममात्रस्य पक्षत्वेऽप्यदोषादित्याहुः।

१८. २५.

स्वभावनियतत्वादिति ॥ अत्र नियतपदं चिन्त्यम् ॥ तत्त्वेति ॥ स्वभावत्वव्याघातादित्यर्थः । अनियतावधयश्चेति ॥ यद्यपि अवधित्वं कारणत्वम्। नियतस्यैवेत्यनियताऽवधित्वमप्रसिद्धं, प्रसिद्धत्वे वाऽऽकाशादेरवधित्वमात्रस्याभावाद्धटादावेव तदभ्युपगम इति तेषां कादाचित्कत्वस्वभावविरहादिति विरुद्धम् । तथापि नियताऽवधिशून्यत्वं तात्पर्यम् । विशिष्टाविशिष्टप्रतियोगिकत्वे च न भेद इत्याहुः । अनियताऽवधिपदेन शशशृङ्गादयस्तन्मतेनोक्ता इत्यन्ये ॥

१९. १६.

न हीति ॥ यद्यपि यथा विरुद्धयोरपि प्रमेयैकस्वभावत्वं तथा कादाचित्काकादाचित्कयोरपि निरवधिस्वभावत्वमविरुद्धं, तथापि तत्तत्कार्यार्थं तत्तत्कारणोपादानानुपपत्त्या सावधित्वसिद्धिरिति भावः ।

१९. ३१.

अनादित्वादित्यस्य परिहारस्यासङ्गतत्वनिरासार्थमाशयं पूरयति ॥ नन्विति ॥ तथाचाशयस्थितानवस्थापरिहारपरत्वेन तत्सङ्गतिरिति भावः । नन्वनवस्थाभयात् प्रागभाववन्निरपेक्षाऽपि सामग्री कादाचित्कीत्यनेन विपक्षगामितया साधारणानैकान्तिकप्रदर्शनात् कथमसाधारण्यम् ? । अत एव परिमले तदेवोक्तमिति चेत्। मैवम्। अनवस्थाभिया सामग्री निरपेक्षा आकाशादिवन्न कादाचित्की । त-

२०. ६.

थाच निरपेक्षसामग्रीरूपविपक्षाद्यावृत्तिरुक्ता । आकाशादिविपक्ष-व्यावृत्तेश्च स्फुटत्वादप्रदर्शनम् । निरपेक्षसामग्रीसापेक्षं कार्यमप्यकादाचित्कमिति सपक्षाद्यावृत्तं कादाचित्कत्वमसाधारणं स्यात् । तथाच तद्वयेन निरपेक्षस्यापि कादाचित्कत्वस्वीकारेण साधारणानैकान्तिकतया नायं हेतुः सापेक्षत्वसाधक इत्याशयवानाहेत्यत्र तात्पर्यात् । न च प्रागभावरूपविपक्षव्यावृत्तत्वाभावान्नासाधारण्यं स्यादिति वाच्यम् । प्रागसत्त्वादिघटितकादाचित्कत्वस्य प्रागेव निरुक्तेः । तद्विपक्षत्वानिश्चयदशायां वा तथात्वात् । यद्यप्येवं पक्षवृत्त्यपि न कादाचित्कत्वमित्यप्रसिद्धं, न त्वसाधारणं, तथापि विशेषादर्शनदशायां तदित्येके । अगमकत्वमेव तेनोपलक्षितमित्यन्ये । केचित्तु असाधारणमित्यत्र अ-पदं निषेधवाचकं विभिद्य व्यावृत्तिपदेन योजनीयम्, तथाच सपक्षविपक्षाभ्यामवृत्तेः साधारणमित्यर्थ । अत एव साधारण्यमेवाग्रे व्युत्पादितम् । तथाच परिमलसंवादोऽपीति वदन्ति । सामग्र्याः सापेक्षत्वेऽनवस्था, निरपेक्षत्वे व्यभिचारादसाधारणं न पक्षदृष्टान्तसाधारणमव्याप्यमिति यावदित्यर्थ इत्याहुः ॥

अंशत इति ॥ अवधेर्मयाऽपि स्वीकारेण तदंशस्य सिद्धस्यैव साधनादित्यर्थः ॥ तत्तदिति ॥ तथाच नासाधारण्यमित्यर्थः ॥ ननु बीजाङ्कुरादेः सादितया कथमनादित्वमित्यत आह ॥ अनादित्वञ्चेति॥ ध्वंसव्याप्यत्वं सजातीयध्वंसव्याप्यत्वम् । तथाच, तद्घटत्वेन सादित्वेऽपि घटत्वेन तद्घटस्याप्यनादित्वमिति ध्येयम् । व्याप्तिश्च कालगर्भा ॥ ननु घटादेः प्रागभाववत् तदुत्तरैकाऽवधित्वं परानभ्युपगतमेवेतिकथमापादनमित्यत आह॥यद्यदृष्टेति॥ तथाच तद्द्वावेष्वित्यादिना तदभ्युपगतमिति भावः ॥ अदृष्टपूर्वकोटित्वेनेति ॥ नन्वत्रेष्टापत्तिः । अदृष्टपूर्वकोटिकेऽनादित्वाभ्युपगन्तारं प्रत्येवापादनात् ।न च पूर्वदिने सत्त्वापादनेन प्रत्यक्षत्वापादनमभिमतमितिवाच्यम्।तथापि तस्योत्तरैकाऽवधित्वाभ्युपगमेन पूर्वावधिशून्यतयानादिभावमात्रावधिस्वभावत्व इत्यसङ्गतापातादिति चेन्मैवम् । दृष्टप्राक्कोटिकघटाभिप्रायेणैव प्रकृतापादनात् । नचादृष्टपूर्वकोटित्वेनेत्यसिद्धम् । अदृष्टपूर्वकोटित्वेनानादिर्यो भावः सामग्रीरूपस्तावन्मात्रावधिस्वभावत्व इत्यर्थात् । तथाच, नादृष्टप्राक्कोटितयैवानादित्वम् । अन्यथा, कस्याश्चिद् घटसामग्र्या अपि तथात्वेनानादितया तदुत्तरस्य घट-

२२. ६.

२२. २२.

२३. ३. स्यानादित्वं स्यादिति भावः ॥ अदृष्टावधीति ॥ अदृष्टप्राक्कोटिकाव-
धीत्यर्थः । घटसामग्रीवद्दिनसामग्रया अप्यदृष्टप्राक्कोटिकत्वेनाना-
दित्वसम्भवात् तदुत्तरदिनस्यानादित्वप्रसङ्ग इति भावः ॥

२३. १३. एवमित्यग्रेतनेन पौनरुक्त्यमाशङ्क्याह ॥ किमयमिति ॥ सर्वजातीय-
त्वाप्रसिद्धेरन्यथा तर्कमाह ॥अयमिति ॥ यद्यपि व्यक्त्यपेक्षया नियमे-
ऽपि पटजनकतद्व्यक्तिजन्यत्वस्य घटेऽनभ्युपगमादिदमयुक्तम् । तथापि
पूर्ववर्त्तिव्यक्तित्वेनैव तथात्वे घटपूर्ववर्त्तिपटजनक-वेमादिव्यक्तेरपि
घटजनकत्वाभ्युपगमादिदमिति ध्येयम् ॥ वैयधिकरण्यादाह ॥ घट-

२३. १९. भिन्नमिति ॥

२१. १०. अनुपलब्धिलिङ्गकमभावलिङ्गकम् । अत एव मूलं— कारण-

२४. १८ व्यावृत्त्या चेति ॥ कारणताऽवच्छेदकस्येति ॥ कारणभेदस्यैव तद्भेदप्र-

२४. २४. योजकत्वादिति भावः ॥ प्रत्युतेति ॥ तथाच तत्तत्परमाणुभिरेव त-
त्तदारम्भ इति नैकोपादानकत्वं तयोरिति भावः । अत्र च जातिपदं
द्वित्वादौ व्यभिचारवारणाय । न च कार्यकारणोभयवृत्तित्वादित्ये-
वास्तु कृतमवयवादिपर्यन्तेनेति वाच्यम् । रूपत्वादौ व्यभिचारात् ।
न चैवमपि समवायिकार्यवृत्तित्वादित्येवास्तु, तत्रैव तात्पर्यादित्याहुः ॥

दधि समवायिकारणकं भावकार्यत्वादित्यनुमानं लाघवाख्य-
तर्कसहकृतं दुग्धारम्भकपरमाणुमेव विषयीकरोति । अन्यथा गौरवा-
त् । दुग्धं विनाऽपि कदाचिद् दध्यापत्तेश्चेत्याशयवानाह ॥ क्षीर-

२५. ५. परमाणूनामिति ॥ अनुमाने पूर्वपक्षानुमाने ॥ दधित्वमिति ॥ जलत्वे
व्यभिचारादाह ॥ पार्थिवेति ॥ स्वमते दुग्धत्वे व्यभिचारादाह ॥
परमाण्विति ॥ परमाणुपरिमाणादौ व्यभिचारादाह,जातिपदम् ॥ न च
तादृशद्रव्यत्वसाक्षाद्व्याप्यजातित्वं पटवृत्तित्वप्रयोजकमिति वाच्यम् ।
साक्षात्त्वस्य गुरुत्वात् । सत्तायाः पटावृत्तित्वप्रसङ्गाच्च । नन्वेवमप्रयो-
जकतयाऽस्यैव तर्कस्य शिथिलमूलत्वमिति चेत् ॥अत्राहुः॥ न हि पर-
म्परया पटारम्भके परमाणौ दध्यारम्भकपरमाणुवृत्तिदधित्ववत्तया-
ऽपि जातिरङ्गीक्रियते । तस्या अपि पटे प्रत्ययापत्तेः । अवयवावयवि-
वृत्तिजातेरवयविवृत्तित्वनियमात् । तथाचान्यस्यावच्छेदकस्या-
भावात् पृथिवीपरमाणुत्वादिकमेव तत्तद्द्व्यणुकजनकतावच्छेदकम् ।
एवञ्च दधिद्व्यणुकाद्याश्रयपरमाणवोऽपि तत्र स्वरूपयोग्या इति नि-
त्यस्य सहकार्यवश्यम्भावे तैरपि पटजनने पूर्वोक्तयुक्त्या तज्जातेः पट-

मूर्त्तिताऽऽपत्तिरित्यत्र तात्पर्यमिति ॥ न चेति ॥ यद्यपि प्रमाणविषयी- २५. ९.
भूतविषयस्य लाघवस्य सहकारितया वक्ष्यमाणस्य न लाघवोप-
कार्यत्वं, तथाप्युक्तस्य भावकार्यस्य तथात्वम् । तथाच तेनैव तद्-
वयवतायां सिद्धायामेतस्य कथञ्चित्तदुपकार्यत्वम् । एवञ्च लाघवोप-
कार्योपकार्यमानाभावो न चेति फक्किकार्थ इत्याहुः ॥

नित्येति ॥ एतच्च दध्यवयविनि व्यभिचारवारणाय । काले
व्यभिचारवारणाय, पार्थिवत्वादिति ॥ न च समवायगर्भत्वमन्यथा
परम्परासंबन्धमादाय व्यभिचारापत्तेरिति वाच्यम् । एवमपि साक्षा-
त्सम्बन्धगर्भस्य निर्दोषत्वात् ॥ दधित्वाश्रयेति ॥ दधित्वाश्रयाभि-
मतपरमाणावित्यर्थः । अवयवित्वप्रवेशे गौरवादिति भावः ॥ प्रति-
कूलेति ॥ पूर्वोक्तप्रतिकूलतर्केणेत्यर्थः । तथाच गौरवमपि प्रामाणिक-
मिति भावः । अत एव गन्धवदवयवित्वस्य पृथिवीत्वव्यञ्जकत्वे तदपि
परमाणौ न वर्त्ततेति प्रतिबन्दिः परास्ता । तत्र गौरवस्य प्रामाणिक-
त्वाभावात् । किञ्चैवं गन्धसमवायिकारणतावच्छेदकपृथिवीत्वस्या-
भावे निर्गन्धत्वापत्तौ तदारब्धकार्यस्य निर्गन्धत्वप्रसङ्गात् । नचैवं
दधित्वव्यञ्जकरसविशेषसमवायिकारणतावच्छेदकतया दधित्वं पर-
माणावपि । अन्यथा परमाणौ तद्रसाभावेन तदारब्धदध्न्यपि तद्-
भावापत्तेरिति वाच्यम् । पृथिवीत्वस्यैव तदवच्छेदकत्वात् । घटा-
दौ सहकारिविरहे तदनुत्पादात् । तदारम्भकपरमाणौ च तदुत्पत्ति-
रिष्टैव । अत एव तेन कदाचिद् दध्यारम्भोऽपि । अत एव मधुरा-
ऽऽम्लरससमवायिकारणतावच्छेदकतया पृथिवीत्वसिद्धिरुक्ता वर्द्ध-
मानचरणैरिति दिक् ॥

तद्व्यञ्जकत्वादिति ॥ तथाच साधनव्यापकत्वमुपाधेरिति भावः ॥ २५. १४.
यस्येति ॥ वह्न्युत्कर्षार्थमुपादीयमानेन्धने व्यभिचारादाह ॥ तद्वृत्ती-
ति ॥ सत्तामादाय दोषतादवस्थ्यादाह ॥ द्रव्यत्वव्याप्येति ॥ व्याप्ति-
श्च भेदगर्भेति न द्रव्यत्वमादाय दोषतादवस्थ्यमिति भावः । तथा-
ऽपि तैलोत्थितोद्भूतरूपदहनार्थकेऽनुद्भूतरूपतैलस्थदहने व्यभि-
चारः । अनुद्भूतान्नोद्भूतमिति मतेनैवास्य कृतत्वादित्यत आह ॥
उपादीयत इति ॥ उपादानं प्रवृत्तिः । तस्य चाप्रत्यक्षत्वान्न तद्योग्य-
तेति न दोषः । अत एव घटाद्युत्कर्षार्थके मृदारम्भके परमाण्वा-
दौ न व्यभिचारः । न चैतन्मते अनुद्भूतरूपस्योद्भूतरूपार्थक-

त्वाभावादेव न व्यभिचार इति किं तद्वारणार्थं विशेषणोपादानेनेति वाच्यम् । नियमतो यदनन्तरं यद्भवति तस्यैव तदर्थकत्वेन विवक्षित-त्वात् । तस्य च तत्सहचरितावयवान्तरमादाय तत्रापि सत्त्वात् । अन्यथा दुग्धस्यापि दधिप्रतिबन्धकतया तथात्वं न स्यात् ॥ ननु धूमार्थोपादीयमानार्द्रेन्धनोत्कर्षे व्यभिचारः । न चाऽऽर्द्रत्वं जल-संबन्धो, न तद्विशिष्टे तद्वृत्तिद्रव्यत्वव्याप्यजातिरस्तीतिवाच्यम् । एव-मपि शरीरोत्कर्षार्थोपादीयमानभक्ष्योत्कर्षे व्यभिचाराऽवारणादित्या-शङ्क्य उपादेयतावच्छेदकधर्मावच्छेदेन तद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं विवक्षितम् । न च शरीरोत्कर्षार्थोपादीयमाने उपादेयतावच्छेदका-वच्छिन्नं पार्थिवमात्रम् । जलस्यापि तथाभावेनौदर्य्यानलदाह्यमात्रस्य रसवन्मात्रस्य तथाभावादिति समादधुः । तच्चिन्त्यम् । तत्र पक्षसमत्वेन व्यभिचाराभावाद्विवक्षाया वैयर्थ्यात् । आहारपरिणतिभेदेन शरीर-भेदाभ्युपगमाच्च । किञ्चैवमपि घटोत्कर्षार्थोपादीयमानदण्डोत्कर्षेण व्यभिचारः । यदि च योग्यताविवक्षायां दण्डारम्भकपरमाणुना कदा-चिद्धटारम्भात् साध्यसत्त्वेन व्यभिचारः, तदा भक्ष्यारम्भकपरमाणुना-ऽपि शरीरारम्भाविरोधः । अपि चालोकोत्कर्षार्थोपादीयमानो-त्कृष्टप्रदीपादौ व्यभिचारः । तस्मादुद्भूतस्पर्शस्येत्यपि विशेषणं देय-म् । यद्यपि योग्यताविवक्षायां दण्डघटवत् कदाचित् दध्नोऽपि दुग्धोपादानोपादेयत्वे विवक्षितसाध्यस्य फलोपधानगर्भस्य न सिद्धिः । तदविवक्षायां घटोत्कर्षार्थकदण्डोत्कर्षेण व्यभिचार एव । तथापि परिमाणोत्कर्षनिबन्धन एवोत्कर्षो विवक्षितः । घटे च स न दण्डोत्कर्षनिबन्धनः, किन्त्ववयवोत्कर्षनिबन्धन एवेत्येके । एतद-नुशयादेव यद्द्रव्येत्यादिकमित्यन्ये । यदर्थं यदुपादीयते तत्तदुपा-दानोपादेयमित्यत्र वैजात्यं गुणविरोधश्च बाधकमिति प्रकृते तदुभ-याभावोपवर्णनम् । उपलक्षणतया च बाधकाभावे सतीत्यत्र तात्पर्य-मिति न व्यभिचारशङ्केत्यप्याहुः ॥

२५. २२. न दुग्धत्वेति ॥ दुग्धत्वाश्रयस्य कालस्य जनकत्वाद् बाध इत्यत उक्तं, परमाण्विति ॥ एतेन, परमाणुग्रहणं स्वरूपकथनाय । न चाग्रेतन-सिद्धसाधनासम्भवः द्व्यणुकारम्भकस्य परमाणुत्वनियमेन तत्स-म्भवादित्यपास्तम् ॥ दधिद्व्यणुकेति॥तथाच प्रतियोग्यप्रसिद्ध्या साध्या-ऽप्रसिद्धिरिति भावः । सिद्धसाधनमिति भाव इत्यन्ये । तर्हि

द्रव्यत्वमपि तत्र न वर्त्ततेत्यत आह ॥ द्रव्यत्वस्यापीति ॥ तद्भिन्नेति॥ तद्व्याप्यत्वमात्रं परम्पराव्याप्येऽतिव्याप्तमित्यत उक्तं सत्यन्तम् । तथाऽपि तद्व्याप्याऽव्याप्यत्वमसम्भवि । पृथिवीत्वादेर्द्रव्यत्वादिव्याप्यीभूतद्रव्यत्वादिव्याप्यत्वात् । द्रव्यत्वादिव्याप्यीभूतपृथिवीत्वादिव्याप्यत्वाच्च । अभेदेऽपि व्याप्तिसत्त्वादित्यत उक्तं, तद्भिन्नेति ॥ साक्षाद्व्याप्यव्यापकाभिमतोभयभिन्नेत्यर्थः । सत्तादेरपि द्रव्यत्वादिसाक्षाद्व्याप्यत्वापत्तिरिति चरमं तद्व्याप्यत्वमुक्तम् । न च तदुभयभिन्नद्रव्यत्वादिव्याप्यगुणवत्त्वादिव्याप्यतया पृथिवीत्वादावसम्भव इति वाच्यम् । तद्भिन्नतद्व्याप्यजात्यव्याप्यत्वे सतीत्यर्थात् । नन्वेवं चरमजातेः स्वसाक्षाद्व्याप्यत्वं न स्यात् । स्वभिन्नस्वव्याप्यजात्यप्रसिद्धेः । न च स्वस्य स्वसाक्षाद्व्याप्यत्वं न विवक्षितमिति वाच्यम् । द्रव्यत्वस्यापि स्वसाक्षाद्व्याप्यत्वमित्युपक्रमविरोधादिति चेत् । मैवम् । द्रव्यत्वसाक्षाद्व्याप्यत्वमात्रस्यैव प्रकृतत्वेन लक्ष्यत्वादित्याहुः । वस्तुतस्तु, तद्भिन्नतद्व्यापकजात्यव्याप्यत्वे सति तद्व्याप्यत्वं विवक्षितम् । तच्च चरमजातावपीति नोक्तदोषः । अत्र चाद्यं तत्पदं साक्षाद्व्याप्यत्वाभिमतमात्रपरम् । अन्यच्च व्यापकत्वाभिमतपरमित्यवधेयम् ॥

यद्द्रव्येति ॥ घटध्वंसजन्ये घटरूपादिध्वंसे व्यभिचारादाह, चरमद्रव्यम् । यद्द्रव्याभावजन्यमिति कृते प्रतिबन्धकद्रव्यात्यन्ताभावजन्ये द्रव्ये व्यभिचारः स्यादिति ध्वंसपर्य्यन्तमुपात्तम् । न च तद्ध्वंसस्यापि जनकत्वाद्दोषतादवस्थ्यम् । ध्वंसत्वेन जनकत्वस्याग्रे विवक्षणात् । नन्वेवं दृष्टान्तासिद्धिः । महापटस्य प्रतिबन्धकतया तदभावस्य संसर्गाभावत्वेनैव हेतुत्वादिति वाच्यम् । महापटं विनाऽपि खण्डपटोत्पादापत्तेः । अत्यन्ताभावस्य नित्यस्य स्वरूपयोग्यस्य सहकार्यवश्यम्भावापत्तेश्च । नन्वेवं तत्प्रागभावस्याहेतुत्वे महापटोत्पत्तेः प्राक् खण्डपटो न स्यादिति तन्तुमात्रमुपलभ्येतेति वाच्यम् । इष्टापत्तेः । तथाविधसंस्थानयोगितया पटव्यपदेशः । यद्वा, द्वितन्तुकादिमहापटध्वंसजन्य एव त्रितन्तुकादिः पटो जायते । मूर्त्तानां समानदेशताविरोधेन वेमाद्यभिघाताद् द्वितन्तुकादिनाशे त्रितन्तुकाद्युत्पादाभ्युपगमात् । तत्र च सर्वतन्तुकमहापटप्रागभावः सन्नप्यन्यथासिद्ध एव । एवञ्च त्रितन्तुकादौ पटध्वंसजन्यपटत्वेन खण्डपटत्वं, पटजनकध्वंसप्रतियोगिपटत्वेन महापटत्वञ्च न विरुद्धम् । द्वितन्तुके

२५. २८.

च यदि खण्डपटव्यपदेशः, तदाऽग्रिमापेक्षया परिमाणापकर्षनिबन्धनो गौणः। वस्तुतः प्रथमपटन्यूनसमवायिकारणक एव खण्डपट इति त्रितन्तुकादीनामपि महापटत्वमेवेति तत्रापि गौण एव तद्व्यपदेश इति। द्रव्यप्रकाशे च संसर्गाभावत्वेन तस्य कारणत्वाभिधानं मतान्तरेणेति मन्तव्यम्। आद्यद्रव्यपदं किमर्थमित्यत्राशिष्यते। तत्र ब्रूमः। तत्त्वसाक्षात्कारजन्यमिथ्याज्ञानध्वंसस्य ध्वंसत्वेन कायव्यूहं प्रति जनकतया व्यभिचारवारणाय, तदिति॥ यत्तु प्रयागमरणस्य संयोगध्वंसात्मकस्य स्वर्गहेतुत्वश्रुतेः स्वर्गिशरीरजनकतया तत्र व्यभिचारवारणाय तदिति। तन्न। अदृष्टद्वारकत्वस्य साक्षाज्जनकत्वस्य वाऽवश्यं वाच्यतया तत एव तदुद्धारात्। अन्यथा ब्राह्मणशरीरशालग्रामध्वंसादेरधर्मद्वारा नारकिशरीरजनकतया व्यभिचारतादवस्थ्यापत्तेः। अन्ये तु प्रागभावध्वंसात्मककपालजन्यघटे व्यभिचारवारणाय तदुपादानम्। न च ध्वंसत्वेन जनकत्वविवक्षयैव तद्वारणमिति वाच्यम्। ध्वंसत्वेनेत्यस्य ध्वंसत्वानियताया जनकताया विवक्षितत्वादित्यर्थात्, तावतैव प्रतिबन्धकाभावजन्ये व्यभिचारस्य निरासात्। यद्यपि प्रागभावोपादानाप्रसिद्धा व्यभिचारोऽपि तत्राप्रसिद्ध इति कथं तद्वारणाय तत्, तथापि नियतसामानाधिकरण्यरूपव्याप्तिग्रहौपयिकतया सार्थकत्वम्। यद्वा, यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तदुभयमेकोपादानकमित्यत्र तात्पर्यम्। एकोपादानकत्वञ्चान्यत्र प्रसिद्धमिति तत्र व्यभिचारप्रसिद्धिरिति वदन्ति। यत्तु, अवयवसंयोगध्वंसजन्यखण्डपटे व्यभिचारवारणाय द्रव्यपदम्। न च तत्र साध्यमस्त्येवेति वाच्यम्। तत्संयोगाश्रयतन्तूनामपि नाशे तद्भिन्नमात्रसमवेतखण्डपटे तथापि व्यभिचारादिति। तत्तुच्छम्। तस्य महापटध्वंसोपक्षीणत्वेन खण्डपटं प्रत्यहेतुत्वात्। अन्यथा तन्तुनाशजन्यखण्डपटमादाय दोषतादवस्थ्यापत्तेः। एतेन जन्यत्वेन प्रयोज्यत्वमात्रं विवक्षितमित्यपास्तम्॥

२६. ७. तथाचेति॥ दुग्धरूपरसविशेषारम्भका एवावयवाः पाकजरसविशेषशालिनो यतोऽत एव दध्यारम्भकाः। तस्य रसविशेषात्मकत्वादित्यर्थः। यद्वा, दुग्धादिपदं द्रव्यपरमेव। दुग्धत्वादेः परम्परासंबन्धेन द्रव्यवृत्तित्वाभ्युपगमादिति॥ न विरोध इति॥ नैकोपादानकत्वविरोधः। रसविशेषात्मकयोर्दधिदुग्धयोरेकत्र प्रमाणसिद्धत्वा-

दित्यर्थः । अनभिमतिबीजञ्चात्र द्रव्यत्वादिसामानाधिकरण्यबुद्धेः साक्षात्संबन्धविषयकत्वे बाधकाभावान्न परम्परासंबन्धविषयत्वम् । अन्यथा पृथिवीत्वादेरप्यभिव्यञ्जकगन्धादिवृत्तितापत्तेरिति ॥

तदेवमिति ॥ नन्वेवं तथापि वह्निप्रयोज्यवैजात्यशङ्कया न धूम- २७.१५. सामान्यमग्निं गमयेत् । यदि चोपस्थितधूमत्वावच्छेदेन व्यभिचाराग्रहा- त्तेनैव रूपेण कार्यत्वग्रहः, तदा यत्रोपस्थितरूपे व्यभिचारस्तत्रैव रूपान्तरेण कारणत्वकल्पनमतो न रासभमन्तर्भाव्य तत्कल्पनम् । किञ्च, शक्तिवैजात्ययोरन्यतरकल्पनाऽवसरे तयोः कल्पनीयतया लाघवेन क्लृप्तान्यान्यत्वस्यैवावच्छेदकत्वकल्पनादिति । तत्र ब्रूमः । वै- जात्यस्यापि प्रमाणान्तरासिद्धतया तत्राप्यवच्छेदकत्वकल्पनैव । अन्यथा सहकारिनियमानुपपत्तेः । तदिदमुक्तं मूले, तेनैव व्यज्यमानस्येति ॥ न च सामग्रीत्रयकल्पने गौरवं, तस्यावश्यकत्वात् । अन्यथा सहकारि- नियमानुपपत्तिरेव । स हि कार्यतावच्छेदकभेदेन फलविरोधे सत्येव स्यात् । अन्यथा प्रत्यक्षादिप्रमाणानामपि जन्यज्ञानत्वावच्छिन्ने तद- न्यान्यत्वेन हेतुतापत्तेः । यदि च सहकारिनियमानुपपत्त्या सामग्री- भेद-फलवैजात्यावश्यकत्वे गौरवान्न तथा, तदा प्रकृतेऽपि तुल्यं, त- त्तत्सहकारिसम्बन्धानामपि तदन्यान्यत्वेन हेतुत्वान्नियमोपपत्तेरित्य- ऽपि तुल्यम् । यद्विशेषयोः कार्यकारणभावग्रह इत्यादिकमपि तुल्यम् । तेन रूपेणान्वयव्यतिरेकग्रहान्न तथेति च तुल्यम् । अपि चैवं भौम- त्वस्यापि विशेषतया गुरुत्वेन वह्नित्वसामान्यावच्छिन्ने औदर्यादिवह्नि- कारणमप्यन्तर्भाव्य तदन्यान्यत्वेन हेतुत्वापत्तिः । किञ्चैवं, जन्यता- वच्छेदकमपि तत् स्यादिति घटपटान्यान्यत्वावच्छेदेन दण्डवेमान्या- न्यत्वेन हेतुत्वापत्तिः । तथाचोक्तगौरवादतिप्रसङ्गाच्च न तदन्यान्य- त्वमवच्छेदकमिति दिक् । यत्तु, नैकं विरुद्धद्वयप्रयोज्यम् । भावाभाव- योरेककार्यजनकतापत्तेः । अत एव न यागध्वंसेनापूर्वस्यान्यथा- सिद्धिः । तदिह वह्नित्वं यदि तृणाद्यन्यान्यप्रयोज्यं स्याद् न स्यात्तदन्य- वह्न्यवयवादिप्रयोज्यं विरोधादिति । तच्चिन्त्यम् । एवं हि तृण- प्रयोज्यत्वेऽपि तदन्यवह्न्यवयवादिप्रयोज्यत्वं विरुध्येत । यदि च तयोः परस्परविरहरूपत्वाभावात्तदुभयप्रयोज्यत्वं न विरुद्धं, तदा तुल्यम् । वह्न्यवयवत्वेनैव तस्य प्रयोजकत्वं, न तु तृणाद्यन्यान्यत्वेने- त्यपि तुल्यमिति ॥

२७.२०. विवादपदमिति ॥ एतच्च प्रदीपादौ साध्यसिद्ध्या अंशतः सिद्ध-साधनवारणार्थम् ॥

नियतेति ॥ ननु वृश्चिकादौ हेतुसत्त्वेऽपि साध्यासत्त्वाद्व्यभिचार इति चेत् । मैवम् । नियतसहकारिप्रयोज्यजातिमत्त्वस्य साध्यत्वात् । प्रकृते च पक्षधर्मताबलेन वह्नित्वव्याप्यैव सा जातिः सिद्ध्यतीति तथा प्रतिज्ञानात् । न चैवमपि ध्वंसे व्यभिचारः । जातिपदस्य धर्ममात्र-परत्वात् । प्रदीपादिदृष्टान्तोपादाननिर्बन्धश्चातेजस्त्वादुपाधेः साध्या-व्यापकत्वप्रदर्शनार्थमित्याहुः । वस्तुतस्तु साध्यदृष्टान्तालोचनेन वह्नित्वादिति हेतुरभिमतः स्फुटत्वात् कण्ठरवेण नाभिहितः । नियते-त्यादिकञ्च विपक्षबाधप्रदर्शनपरमिति युक्तमुत्पश्यामः ॥

२८. ३. ननु प्रागुक्तसहकारिनियम एव विपक्षबाधक इत्याह ॥ अथेति ॥ तदभिन्नत्वे चेति॥फूत्कारप्राक्काल एव तृणे शक्तिस्तत्समवधाने तज्जन्या वेति विकल्पार्थः॥ तथैव तच्छक्त्योरपीति ॥ यद्यप्येवं कार्यवैजात्यमा-वश्यकम् । एकजातीयकार्ये सहकारिनियमानुपपत्तेः । तथापि तृण-फूत्कारसंबन्ध – तरणिकिरणमणिसंबन्धादिष्वप्येकजातीयशक्तिमत्त्वं कारणतावच्छेदकम् । तथा च तदन्यतमसंबन्धाभावे तृणनिर्मन्थन-

२८.२२. समवधानेऽपि नाग्न्युत्पत्त्यापत्तिरिति भावः ॥ तृणेति ॥ ननूक्तगौरवेण मा भूच्छक्तिकल्पना, जातिकल्पनाऽपि कुतः । यावता वह्न्यनु-विधायित्वमेव धर्मिकल्पनान इति न्यायेनावच्छेदकमस्तु । नचेदमेव वह्निजनकत्वं, येनात्माश्रयाद्नावच्छेद्यावच्छेदकत्वं, किन्त्वनन्यथा-सिद्ध्यादिघटितमितिचेन्न । तदनुविधायित्वस्य सहकार्यन्तरसाधारण-तया सत्सत्त्वे तृणाद्यन्यतमासत्त्वेऽपि वह्न्युत्पादापत्तेः । कारणता-वच्छेदकावच्छिन्नयत्किञ्चित्सत्त्व एव कार्योत्पादनात् ॥

२९. ५. उक्तग्राहकैरिति ॥ अन्वयव्यतिरेकाभ्यां नियतेनान्वयेन चेति बहु-वचनोपपत्तिः । अधिकश्चानुमानप्रकारो प्रपञ्चितम् ॥ एतेनेति ॥ व्यव-स्थापितजातीनामेव लाघवादवच्छेदकत्वेनेत्यर्थः ॥ अन्योन्याश्रया-च्चेति ॥ वह्नौ मणिजन्यत्वे गृहीत एव मणिजन्यवह्निभिन्नवह्नित्वेन तृणजन्यत्वग्रहः, तृणजन्यत्वे च वह्नौ गृहीत एव तृणजन्यवह्निभिन्न-वह्नित्वेन मणिजन्यत्वग्रह इत्यन्योन्याश्रयादित्यर्थः। अन्यथा वह्निमात्र-स्यैव तदजन्यत्वेनोपस्थितौ वह्नित्वावच्छिन्न इतरव्यभिचारादेव हेतु-त्वग्रहानुपपत्तेः। तथा च विशेषणोपादानाय।सोऽपि व्यर्थ इति भावः॥

निमित्तकारणेति ॥ न चेन्धननाशादपि वह्निनाशादननुगमः । तत्रेन्धननाशाद्वह्न्यन्तरं नोत्पद्यते । पूर्ववह्निस्त्ववयवविभागन्यायेनैव नश्यतीत्युपगमात् । एवं शरीरनाशोऽपि नादृष्टनाशजन्य इत्यभ्युपगमेनेदम् । ननु निमित्तकारणत्वं समवाय्यसमवायिभिन्नकारणत्वमिति कारणत्वान्तर्भावे गौरवम् । तदनन्तर्भावे तदन्यान्यत्वमवच्छेदकं पर्यवस्यति । तच्चानभ्युपगतमिति चेन्न । तदन्यान्यनाशत्वस्यात्र तत्पर्यवसानात् । तथाच प्रतियोग्यननुगमकतया तत्प्रवेशे तद्घटितस्यावच्छेदकत्वं, न तु तस्यैव । अनभ्युपगतञ्च तदिति भाव । केचित्तु, एतदस्वरसादेवाह-यद्वेति ॥ २९.१७.

तथापीति ॥ न चाश्रयनाशे तदाश्रितद्रव्यतदसमवायिनोर्युगपदेव नाशादिदमसम्भवीति वाच्यम् । समवायिनाशसमकालं विभागाद् यत्रासमवायिनाशस्तत्र तत्सम्भवात् ॥ आश्रयनाशाजन्येत्युपलक्षणम् । असमवायिनाशाजन्यद्रव्यनाशं प्रत्याश्रयनाशस्य हेतुत्वात्, तस्य चासमवायिनाशजन्यत्वादित्यपि द्रष्टव्यम् ॥ तत्रेतरेति ॥ २९.२१. नचाविद्यमानोभयकद्रव्यनाशत्वावच्छिन्ने असमवायिनाशसहितसमवायिनाशत्वेन हेतुत्वमस्तु । तथाच कथं व्यक्तिविशेषे व्यक्तिविशेषस्य हेतुत्वम् ? । अन्यथा अनन्तसामग्रीकल्पनापत्तेरिति वाच्यम् । तत्रैव तात्पर्यात् । नचात्राप्यन्यतरस्यावच्छेदकत्वे विनिगमकाभावः । असमवायिनाशत्वादिना तदुभयोरपि हेतुत्वादेव । अत एव साग्रीभेदः । अन्यत्रान्यतरस्यैव हेतुत्वात् । नचात्राप्यन्यतरस्यैव हेतुत्वमस्तु, कार्यतावच्छेदकभेदाच्च सामग्रीभेद इति वाच्यम् । विनिगमनाविरहेणोभयोरपि तुल्यत्वात् । वस्तुतस्तु समवायिकारणनाशाद् द्रव्यगुणकर्म्मणां नाशदर्शनात् तत्तन्नाशस्याननुगमादनुगतस्य सति सम्भवे त्यागायोगादविद्यमानाश्रयकासमवेतकार्यनाशत्वावच्छेदेनास्य हेतुत्वकल्पनाद् द्रव्यनाशेऽपि तथा । तथाच युगपत् समवाय्यसमवायिनाशयोरुत्पत्तावपि तन्निष्ठकार्यमात्रनाश एवाश्रयनाशो हेतुः । तथाच न सामग्रीभेदः । अत एव समवायिनाशस्थलेऽपि तज्जन्यासमवायिनाशस्यैव द्रव्यनाशकत्वं क्लृप्तत्वादित्यपास्तम् । गुणादिनाशे तस्यापि क्लृप्तत्वात् । किञ्चाविद्यमानाश्रयकद्रव्यनाशे आश्रयनाशो हेतुरविद्यमानासमवायिकारणकद्रव्यनाशेऽसमवायिनाशो हेतुरस्तु । तथाच क्लृप्तसामग्रीत एव प्रकृत-

कार्योपपत्तौ न सामग्रीभेदः । अविद्यमानता च द्रव्यनाशपूर्वक्षणे बोध्या। तेन सत्समकालाविद्यमानत्वमादाय न व्यभिचारइतिविद्वद्भिः परिचिन्तनीयमिति । एतत् सर्वमभिसन्धायोक्तं, दिगिति ॥

३०. १२. उभयत्र व्यक्तिमात्रापेक्षित्वेन यावत्पटापेक्षणीयापेक्षित्वं घटस्य बोध्यम् । एवं पूर्ववर्त्तिमात्रापेक्षित्वेन यावत्पटादिजनकजन्यत्वं घटादेर्बोध्यम् ॥ अत एवेति ॥ रासभादिसाधारण्यादेवेत्यर्थः ॥ यस्मिन् सत्येवेति ॥ यद्धर्मावच्छिन्ने सत्येव सहकारिसमवधानात् कार्य्यं भवति तदवच्छिन्नं कारणमित्यर्थः । तादिदमाह ॥ सामान्यत इति ॥ यागादौ बहुवित्तव्ययायाससाध्ये फलावश्यम्भावनिश्चये सत्येव प्रवृत्तेरिष्टापत्तिरिति यदि ब्रूयात्, तदा दोषान्तरमाह ॥ यदि सेति ॥ नचाजनकव्यक्तेरपि तज्जातीयतया द्वेषात्तन्नाशार्थं प्रवृत्तिरिति

३१. २. वाच्यम् । दुःखाजनकत्वे द्वेषस्याप्यभावात्, निष्प्रयोजने द्वेषमात्रात् कृतेरनुत्पत्तेश्चेतिभावः॥निर्वातस्थितस्येति॥ननु नैतावता कारणत्वम् । न हि कारणाभावेन कार्यध्वंसः । किन्त्वनुत्पाद इति चेन्न । नाशपदेन प्रवाहानुत्पादेनात्यन्तोच्छेदस्य विवक्षितत्वात् । तथाचाशुनाशितया पूर्वप्रदीपनाशेऽपि वातं विनाऽग्रिमतदनुत्पादादित्यत्र तात्पर्यम् ॥

३१. ४. तेजस्त्वेन कार्यतेजस्त्वेन॥न चेति॥ न च पवनध्वंसादिषु साध्याऽव्याप्तिः। साधनावच्छिन्नसाध्यव्यापकत्वादिति भावः । अत एवाह ॥ तैजसेति ॥ आगमोऽपीति ॥ ज्योतिरुत्पद्यते वायोरित्यादिविष्णुपुराणरूप इत्यर्थः । यद्विशेषयोरिति न्यायात्तावता वह्निसामान्यमात्रे तद्धेतुत्वं सिद्ध्यति, न तु तेजोमात्रे । अन्यथा द्रव्यमात्र एव तदापत्तेरित्यनुशयादाह ॥ अन्ये इति ॥ दिव्यमितीति ॥ यद्यपि दिव्यस्यापि दहनतया तद्गतसामान्यमपि प्रश्नविषयः, तथापि तार्णाऽऽदिदहनसामान्यस्य प्रश्नविषयत्वादस्यातथात्वमित्याशयः।यद्यप्येवं पिण्डितस्येत्यप्ययुक्तं, तस्याप्यप्रश्नात् । तथापि तदपि दृष्टान्तार्थमेव। एवञ्च पिण्डितस्य सुवर्णस्य दिव्यमिति दृष्टान्तार्थमित्येकग्रन्थो बोध्यः । दिव्यमितीत्युपलक्षणम्, उदर्यस्यापि दृष्टान्तत्वमित्येके । तार्णपदस्य

३२.११. पार्थिवेन्धनदहनपरतया तत्र प्रश्न एवेत्यन्ये॥ प्रकृतेश्चेति॥ तथाचैकप्रकृतिविकारत्वान्महत्तत्त्वादीनामेकजातीयत्वमित्यर्थः ॥ तद् द्रष्टुमिति ॥ तदित्यव्ययं षष्ठ्यन्तम् । तेन, तस्य द्रष्टुं शक्यत्वादित्यर्थः ॥

ननु तिमिरं तेजोऽभावः। तदपहार एव प्रदीपो, न तु तत्कारी ।

अभेदे जन्यजनकभावानुपपत्तेरित्यत आह ॥ तिमिरमिति ॥ तथाच व्यक्तिभेदमादायाविरोध इति भावः ॥ प्रदीपे चेत्यापाततः ॥ अत एव दूषयति ॥ दृष्टान्तेऽपीति ॥ एकस्य कारणस्य क्रमो न पराभ्युपगतोऽपीत्यनाक्षिप्तसमाधानमिति पूरयित्वा व्याचष्टे ॥ एकस्येति॥ एवमग्रेऽपि ॥ अक्रमादपि नित्यात् कालादेः क्रमेण कार्याणीत्यत आह ॥ क्रमप्रयोजकेति ॥

यथाश्रुते वैयधिकरण्यादाह ॥ अत्र चेति ॥ नाप्रसिद्धिरित्युपलक्षणं, नापि वैयधिकरण्यमित्यपि द्रष्टव्यम् ॥ भूतचैतन्य इति ॥ भूतस्य शरीरादेर्भस्मीभावादात्मनश्चानङ्गीकारात् कस्य परलोक इति न तत्सिद्धिरित्यर्थः ॥ ३३. १७. ३५. २२.

चिरेति ॥ तथाच तद्धेतुत्वमप्यदृष्टद्वारैव स्यादिति भावः॥ दानाभावादिति ॥ दानाभावापत्तेरित्यर्थः । दृष्टप्रयोजनस्य तत्राभावाददृष्टस्य चानभ्युपगमादिति भावः ॥ निष्फलत्वेऽपि तत्र प्रवृत्तिमुपपादयति ॥ सन्ध्योपासनमिति ॥ काम्यस्थले इति॥ अपूर्वस्येति शेषः। तथाच तद्वन्नित्यापूर्वस्यापि न स्वतः प्रयोजनत्वमिति भावः ॥

उपहासबीजमाह ॥ निष्फल इति ॥ अनन्यथासिद्धत्वादिति ॥ ३६. २९. यद्यपि फलेच्छाद्वारेष्टसाधनताज्ञानेऽपि तदन्यथासिद्धमित्युपपादितं प्रत्यक्षप्रकाशेऽन्यथाख्यात्यवसरे । त्रिसूत्रस्वरसोऽप्येवमेव । तथापि तस्य प्रवृत्तिप्रयोजकत्वान्निष्फलेऽपि प्रवृत्तिरिति मतानिराकरणमात्रे तात्पर्यम् । न चैवं नित्यताभङ्गप्रसङ्गः । त्रिकालकाम्यस्तवपाठवत् कामनाऽवश्यम्भावादिति भावः ॥

प्रत्युतेति ॥ क्वचिददृष्टफलत्वसिद्धावेव तत् । अन्यथा साध्याप्रसिद्धेरिति ध्येयम् ॥ अयमिति ॥ विफला विश्ववृत्तिरित्यादिरित्यर्थः ॥ आधुनिक इति ॥ सादिरुपदेश इत्यर्थः । अविगीतश्चेत्यपि द्रष्टव्यम् । यद्यपि वेदानिषिद्धत्वमविगीतत्वं न तत्र, तथापि शिष्टव्यवहाराविषयत्वमप्रामाणिकत्वं वा तदित्येके । परदुःखहेतुतया सामान्यतस्तत्रापि निषेध इत्यन्ये ॥

इत्यपीति ॥ असाधारण्येनेति शेषः । तथाचोभयस्यापि पाखण्डत्वमन्यतरस्यापि वा नेति भावः ॥ एकक्षणमात्रस्थायित्वमसिद्धमित्यत आह ॥ आशुतरेति ॥ फलसमयेति ॥ यद्यपि चिरध्वस्तकारणत्ववादिनः क्वचिदपि व्यापाराप्रसिद्धेर्व्याप्तिरन्यतरासिद्धा, तथापि चिरा- ३७. १९ ३८. २६

ऽतीतदण्डादिना घटाद्यजननात् परोऽपि तथाऽङ्गीकारयितव्य इति स्वमतावष्टम्भेनोक्तमिदम् ॥

३९. १३. कारणानीति ॥ वस्तुमात्रपक्षत्वे भागबाधादिरजनके पण्डापूर्वादौ तन्मते स्यादिति कारणानीत्युक्तम् । नचादृष्टस्थितिस्थापकगुरुत्वादिकमादायापि पृथिव्यादिष्वंशतः सिद्धसाधनम् । तद्भिन्नकारणस्यैव पक्षत्वात् । न च पक्षतावच्छेदकैक्ये तद्दोष एव नेति वाच्यम् । प्राचीनमतेनैवोक्तत्वात्, अन्यथा अद्विष्ठपदप्रक्षेपानुपपत्तेः । अत एव वक्ष्यमाणहेतुपक्षतावच्छेदकयोर्नाभेदः । स्वजन्यानुकूलत्वं ताद्रूप्यसिद्धये । यद्वा, स्थितिस्थापकवतोऽपि पक्षान्तर्भावात् तमादायांशतः सिद्धसाधनवारणार्थं तत् । तदर्थश्च स्वनिमित्तकारणकानुकूलत्वमित्याहुः । अद्विष्ठपदमदृष्टवदात्मसंयोगेन सिद्धसाधनवारणार्थमव्यासज्ज्यवृत्तिपरम् । अन्यथा अधिकरणभेदेनाभावभेदानभ्युपगमे तत एव प्रतिबन्धकाभावव्यवच्छेदे भावपदमनर्थकं स्यात् । उष्णस्पर्शादिना अंशतः सिद्धसाधनवारणायातीन्द्रियेति । न च तत एव प्रतिबन्धकाभाववारणे भावपदवैयर्थ्यं,भट्टमतेऽनुपलब्धिगम्यतया तस्याऽतीन्द्रियत्वात् । दुरदृष्टादिप्रतिबन्धकाभावस्याऽतीन्द्रियत्वाच्च । यथाकथञ्चित् सम्बन्धितयाऽदृष्टेनैवार्थान्तरवारणाय धर्मपदम् । न हि तदन्यधर्मस्तदनाश्रितत्वादित्याहुः ॥ यद्वेति ॥ न च प्रतिबन्धकाभावमादाय भट्टमतेऽर्थान्तरम् । धर्मपदस्य भावपरत्वादिति वदन्ति ॥ दाहानुकूलत्वमत्र ताद्रूप्यसिद्ध्यर्थमेव ॥ तादृशेति ॥ दाहानुकूलातीन्द्रियेत्यर्थः ॥ अत्र च संयोगत्वेनार्थान्तरवारणायातीन्द्रियेति ॥

नन्वनुकूलत्वं यदि जनकत्वं, तदा तन्मतेऽपसिद्धान्तः । अथाऽवच्छेदकत्वं, तदाऽस्मन्मतेऽप्रसिद्धिरित्युभयानुगतमाह ॥ कार्येति । व्याप्तिश्च कालिकी । न च प्रागभावगर्भतया नित्यशक्तावव्याप्तिः । अनित्यकारणमात्रपक्षत्वे तथाप्यदोषात् ॥ लेपेति ॥ दैववशादौषधलेपाद्वा अदाहप्रयोजके पुरुषे तदुत्पत्तिरिति भावः ॥

मीमांसकैरिति ॥ यद्यपि तैरभावो नाङ्गीक्रियत एव, तथाप्यधि-
४०. १४, करणात्मकस्यापि तस्याभ्युपगमादेतदुक्तमित्येके । तदेकदेशिमतेने-
४१. ८. दमित्यन्ये ॥ प्रतिनियतेति ॥ फलबलेन तथा कल्पनादिति भावः ॥

४४. १७. अन्य एवेति ॥ प्रत्येकोभयाभावादन्य एव प्रत्येकाभावव्यापकोऽयमभाव इत्यर्थः । व्यासज्ज्यवृत्तिधर्मावच्छिन्नोत्तम्भकाभावप्रति-

बन्धकप्रतियोगिकाभावत्वेन कारणत्वं ? तदुभयमात्रप्रतियोगिकतादृशाभावत्वेन वा ? । आद्ये दोषमाह ॥ केवलेति ॥ उत्तम्भकाभावविशिष्टमणिसद्भावेऽपि घटादिकमादाय तदुभयप्रतियोगिकतादृशाभावसत्त्वाद्दाहापत्तेरित्यर्थः । एवं द्वयम् इत्यनेकोपलक्षणम् । अत एव लीलावतीप्रकाशे त्रयमिति पाठः । अन्त्ये त्वाह ॥ तादृशेति ॥ यद्यपि सामान्याभाववदुभयासत्त्वे व्यासज्यप्रतियोगिकाभावोऽप्यभ्युपगन्तुमुचित एव । अन्यथा यावद्विशेषाभावैस्तदन्यथासिद्ध्यापत्तेः । तथापि तद्धेतुत्वे उत्तेजकविशिष्टमणिसत्त्वेऽपि दाहो न स्यादित्येव दूषणं द्रष्टव्यम् ॥

क्षणभङ्गेति ॥ यद्यपि तादृशक्षणभङ्गो न दोषावहः, किन्तु विशेष्यताऽवच्छेदकावच्छिन्नप्रतियोगिक एव तथा । तथापि प्रत्यभिज्ञानात् समवाय्यादिनाशाभावाच्च न घटादेर्नाशः, किन्तु विशेषणस्यैव । न च विशेषणनाशसामग्र्येव विशेष्यनाशिका । नित्यमात्रापलापापत्तेरित्यर्थः ॥

अत एवेति ॥ प्रतियोगितावच्छेदकभेदस्याभावभेदकत्वाभावादित्यर्थः । यद्यपि पूर्वभेदः, तथापि पूर्वं विशेष्यस्य सत एव विशेषणान्तरविरहादभाव इत्युक्तम् । संप्रत्यविद्यमानविशेष्यकाभिप्रायेणोच्यते इति न दोषः ॥ विशेषणविशेष्ययोरिति ॥ यद्यपि यत्किञ्चित्संबन्धाभावो न विशिष्टाभावोऽतिप्रसङ्गादिति विशेषणविशेष्योभयप्रतियोगिकसंबन्धाभावस्तथा वाच्यः,तदभावश्च विशेषणविशेष्योभयप्रतियोगित्वरूपविशेषणाभावात् क्वचिद् विशेष्याभावादित्यननुगमस्तदवस्थ एव।अधिकश्चानुमानप्रकाशे दूषणमुक्तम्।तथाऽपि विशेषणाऽवच्छिन्नविशेष्यात्यन्ताभावस्तथेति विपाञ्चितमनुमानप्रकाशे द्रष्टव्यम् । किञ्च, यदि संबन्धाभावो विशिष्टाभावस्तदा भूतलादौ दण्डिनि सत्यपि नेह दण्डीति प्रत्ययप्रसङ्गः । दण्डपुरुषसंबन्धस्य दण्डपुरुषोभयमात्रनिष्ठतया तत्र तदानीमपि तदभावात् । न च भूतलावच्छिन्ने पुरुषे विशेषणसंबन्धाभावः स इति भूतलस्याधिकरणकोटिप्रवेश इति वाच्यम् । तथा सति विशेष्याभावे तादृशबुद्ध्यनुदयप्रसङ्गात् । तस्माद्विशेषणविशेष्यतदुभयाभाव एव विशिष्टाभावः । तदनुगमकश्च विशिष्टधीविषयाभावत्वम् । विशिष्टधीविषयत्वस्य त्रितयानुगतत्वेन तदभावत्वेन तदभावानामप्यनुगतत्वसम्भवादित्याहुः ॥ अत एवे- ४५. ९.

ति ॥ लक्ष्यस्याप्यननुगतत्वमिति भावः ॥ तदभावेऽपीति ॥ अतिरिक्तसंबन्धाभावेऽपीत्यर्थः ॥ संबन्धान्तरं विनेति ॥ एतत् प्रत्यक्षप्रकाशे व्याख्यातम् । अस्यातिरिक्तसंबन्धरूपत्वे अपसिद्धान्तः । तदुपहितस्वरूपद्वयात्मकत्वे उक्तदोषतादवस्थ्यमिति चिन्त्यम् ॥

नन्विति ॥ यद्यपि संबन्धाभावस्य सिद्धान्तितत्वान्मण्यभावमादाय शङ्का न युक्ता, तथापि विशेषणावच्छिन्नविशेष्याभाव एव विशिष्टाभाव इति तात्पर्यविषयीभूतमते निर्भरतया तदभिप्रायेण शङ्क्यमिति बोध्यम् ॥ प्रत्यासत्तिस्त्वेति ॥ भावे वा विशेषणाभावादेरेव तेन रूपेण हेतुत्वमस्त्विति भावः ॥ तन्मताभिप्रायेणैव सिद्धान्तमाह ॥ क्लृप्तेति ॥ प्रकृते स्वरूपसंबन्धतया मणेरेव तत्संबन्धरूपत्वात्तदादाय शङ्कादिकमित्यप्याहुः ॥ क्लृप्तेनैवोपपत्तावक्लृप्तरूपकल्पने गौरवादित्यनुशयेनाह ॥ यद्वेति ॥ नचोभयपक्षेऽपि संसर्गाभावत्वेन तद्धेतुत्वमिति सिद्धान्तोऽनुपपन्नः । प्रागभावादेर्विशिष्टाभावत्वाभावादत्यन्ताभावत्वादिनैव तथात्वादिति वाच्यम् । यत्र प्रतिबन्धके उत्तेजकम् अप्रसिद्धं तदभावे विशिष्टाभावत्वाभावेन तथात्वसम्भवादिति भावः॥ समानाधिकरणेति ॥ प्रतियोगिवैयधिकरण्यावच्छिन्नस्येत्यर्थः॥ उद्देश्यत्वज्ञानाहितेति ॥ एतच्चानुमानप्रकाशे विपञ्चितम् ।

४८. ४. व्याप्यकार्येति ॥ नचान्योन्याभावमादायेष्टापत्तिरिति वाच्यम् । तथा सति व्यभिचारिणोऽपि तथात्वापत्तेः ॥

प्रतिबन्धकाभावे इति सति सप्तमी । वह्न्यादाविति शेषः॥संसर्गाभावलक्षणमनुमानप्रकाशे द्रष्टव्यम् ॥

४८. १९. कारणीभूतेति ॥ न च कार्यानुत्पादजनकत्वं तदिति नान्योन्याश्रय इति वाच्यम् । तस्यानुपदमेव दूष्यत्वादिति भावः ॥ मण्यादीति ॥ मणिमन्त्रादिसामान्याभावकूट इत्यर्थः । यद्यपि तत्तन्मण्यन्ताभावकूटस्यापि हेतुतया न क्षतिस्तथापि मणित्वावच्छिन्नप्रतियोगिकसामान्याभावस्यैकत्वेन लघुत्वाद्धेतुत्वमिति मन्तव्यम् ॥

४९. २१. यद्धर्मवत्त्वमिति ॥ एवं दृढदण्डत्वमपि सहकारि स्यादित्युक्तमनुमानप्रकाशे द्रष्टव्यम् ॥ कारणानीति ॥ तादृशधर्मवत्त्वेनानिश्चितानि नित्यकारणानीत्यर्थः ॥ शेषं प्रागेव व्याख्यातम् ॥ पिण्डीभूत इति ॥ कार्यानुकूलत्वं स्वकार्यानुकूलत्वम् । तदपि स्वनिमित्तकारणानुकूलत्वम् । तेन कर्मानुकूलस्थितिस्थापकेन नार्थान्तरम् । कर्मणि तु वह्निः

समवायिकारणमिति नोक्तदोषः। वह्नौ स्थितिस्थापकानभ्युपगमे उद्देश्य-सिद्ध्यर्थं तदिति ध्येयम्। अदृष्टवदात्मसंयोगोष्णस्पर्शप्रतिबन्धका-भावादिनाऽर्थान्तरवारणायाभिष्ठादिपदम्। यद्यपि गुरुमतेऽभावो-ऽधिको नास्त्येवेति समवायपदं व्यर्थं,तथापि परस्यार्थान्तरं स्यादिति तदुपात्तम् ॥

करवह्नीति ॥ अत्र चाविष्ठपदं साध्ये त्वाज्यम् ॥ द्व्यणुकैकत्वेति ॥ ५०. ९. तत्समवायित्वस्य तन्निरूप्यसमवायाश्रयत्वार्थकतया समवायिद्व्यणु-कमादाय तत्र साध्यवत्त्वं बोध्यम्। मण्यादिसमवहित इति ॥ आदि-पदात् प्रतिबन्धकाभावेतरसकलदाहकारणमभिमतमिति न तद्व्यतिरे-केणार्थान्तरम्। हेत्वसिद्धिबाधयोर्वारणाय, मणीति। वह्नौ तादृशा-त्यन्ताभावेनार्थान्तरप्रसक्तौ नेष्टसिद्धिस्तत्रेत्यत आह ॥ वृत्त्यन्तमि-त्येके। तच्चिन्त्यम्। भावभूतपदेनैव तन्निरासात्। केचित्तु संयोगद्वारा वह्निकर्मणोऽपि दाहानुकूलतया तस्य च पिण्डीभूतवह्नावभावादर्था-न्तरवारणाय तदिति। तस्य च संयोगनाश्यत्वेन तदानीमभावादि-त्याहुः। हेतुः फलोपधानाभाव इति नासिद्धिः। दृष्टान्ते दाह्यसंयोगा-भाव उभयसिद्धः ॥ तत्रेति ॥ पृथिव्यामेव तदुपगमादिति भावः। न च स्थितिस्थापकस्तु चतुर्षु वर्त्तमान इति गुणभाष्यविरोध इति वाच्यम्। वैशेषिकमते तथात्वादिति भावः ॥

कार्य्यस्येति ॥ ननु कार्यपदं यदि स्पन्दपरं तदा प्रकृतासङ्गतिः। स्पन्दस्यातथात्वात्। यदि च जन्यमात्रपरं तदा कपालरूपजन्ये घट-रूपे व्यभिचार इति चेन्न। यत् कार्यं यदीयगुणनिमित्तकारणकं तत् तदुभयसमानाधिकरणगुणजन्यमित्यत्र तात्पर्यात्। कपालरूपन्तु तत्रासमवायिकारणमिति नोक्तदोषः। नचाजसंयोगाभावेनेश्वरज्ञाना-दिजन्यसुखादिषु व्यभिचार इति वाच्यम्। मूर्त्तवृत्तित्वस्य कार्य-विशेषणत्वाद् घटादावीश्वरसंयोगहेतुत्वस्येष्टत्वात्। अत एव लीला-वतीप्रकाशे कण्ठरवेणैव तथोक्तम्। अत एव मन्त्रपाठजन्यविषचलने-ऽपि व्यभिचारो निरस्तः। अदृष्टाद्वारकत्वेन विशेषणाद्वा, मन्त्रस्या-ऽऽशुविनाशित्वेनादृष्टद्वारकत्वात्। नचात्र विपक्षबाधकाभावः। अप्रत्यासन्नस्य जनकत्वेऽतिप्रसङ्गादिति दिक्।

नन्वतीन्द्रियत्वं यदि साक्षात्काराविषयत्वं तदा अस्मन्मते अप्र-सिद्धिः। लौकिकत्वविशेषणे परस्य व्यावर्त्त्याप्रसिद्धिरित्यत आह ॥

५०. १९. तत्त्वञ्चेति ॥ संयोगाद्यन्यतमप्रत्यासत्त्यनाश्रयत्वमित्यर्थः। साक्षात्कारपदं विषयजन्यज्ञानपरम् । साक्षात्कारश्च सन्निकर्षविशेषणमिति न व्यर्थविशेषणतेत्यन्ये ॥ अतीन्द्रियप्रतियोगिकाभावाभिप्रायेणाह ॥ प्रतिबन्धकेति ॥ भट्टमतेन वा ॥

प्रथमानुमाने अतीन्द्रियस्यापि पक्षत्वादुपाधिः पक्षाव्यापकविप-
५०. ३१. र्यय इत्यत आह ॥ द्वितीयादीति ॥ न चात्रापि गुरुत्वस्थितिस्थापकादिकमादाय वृक्षादौ साध्याव्याप्तिः । कार्यानुकूलत्वेन दाहानुकूलत्वाभिधानात् । अगुरुत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वाद्वेत्याहुः ॥ नान्वयेति ॥ तन्मते केवलान्वयिनो हेत्वाभासत्वादिति भावः॥ अप्रत्यक्षयोरिति ॥ न च मानान्तरात्तद्ग्रहः । तद्धि न शब्दः । तस्य सिद्धार्थत्वात् । नाप्यनुमानम् । जनकत्वसत्त्वे तादृशधर्मवत्त्वस्याऽऽवश्यकतया जनकत्वाभावेन साध्याभावोऽनुमेयः।जनकत्वाभावानुमानञ्च तादृशधर्माभावेन तादृशधर्मस्य जनकतावच्छेदकस्य सत्त्वे जनकत्वस्यावश्यकत्वादित्यन्योन्याश्रयात् । अनवस्थानादित्यन्ये । उपमानस्य नियतविषयत्वादनभ्युपगमाच्चेति भावः । न च पण्डाऽपूर्वादौ स्वध्वंससाक्षात्कारजनकतया जनकत्वाभाव एव नेतिवाच्यम् अतीन्द्रियत्वेन योगिज्ञानस्य विषयाजन्यतया च साक्षात्कारोऽजनकत्वात् । तन्मते ध्वंसस्याधिकरणादिरूपतया तदसाध्यत्वाच्चेति भावः ॥ किन्त्विति ॥ जलसंयोगनार्थान्तरवारणायातीन्द्रियेति । न चादृष्टस्यापि स्वरूपसम्बन्धेन व्रीहिनिष्ठत्वाभ्युपगमात् सिद्धसाधनम् । व्रीहिसमवेतेत्यर्थात् ॥

५१. २२. तटस्थः शङ्कते ॥ नन्विति ॥ प्रोक्षणस्य कालान्तरभाविफलजनकत्वे मानाभावान्न व्यापारत्वेनातिशयकल्पनमिति भावः ॥ प्रमाणत इति ॥ प्रमाणमूलकावघातोद्देश्यकोपादानविषयत्वादित्यर्थः । ननु प्रमाणमिदमेव तदुपादानहेतुरन्यद्वा ? । नाद्यः । हेतुज्ञाने सत्येतत्प्रवृत्तिरेतत्प्रमाणप्रवृत्तौ च तद्घटितहेतुज्ञानमित्यन्योन्याश्रयात् । नाऽपरः । तदसत्त्वात् । सत्त्वे वा तन्न साक्षादुपादानहेतुः । प्रवृत्तेर्ज्ञानजन्यत्वात् । किन्तु प्रोक्षणमवघातजनकमिति ज्ञानद्वारा । तथाच सिद्धसाधनमिति । अत्र वदन्ति । प्रकरणादिसहकृतवेदस्यैवावघातजनकत्वबोधकत्वमिति सिद्धान्तानुसारादेतदुक्तम् । संसर्गविधया च ततस्तद्धेतुत्वावगम इति तत्प्रकारकबुद्ध्यभावान्न सिद्धसाधनाव-

काशः । शब्दादेरपि परं प्रति लिङ्गविधया प्रयोगाच्चेति । वस्तुतो व्यक्तिवचनन्यायेनावघाते प्रोक्षितव्रीहेरन्वये प्रोक्षणस्य बाधकं विना विशेषणत्वं, नोपलक्षणत्वमिति ॥ एतदभिप्रायेणाह ॥ अप्रोक्षित इति ॥

कीर्त्तनादीति ॥ न च शब्दबोधितनाशकानाश्यत्वं विशेषणम् । ५२. १२. प्रतिकृत्यापूर्वप्रतिरुद्धे कृत्यापूर्वे व्यभिचारात् । न च तत्र प्रतिरोधोनाशो वेति कथं निर्णय ? इति वाच्यम् । तथापि सन्दिग्धानेकान्तादिति भावः ॥ विवादाध्यासित इति ॥ उभयसिद्धचैत्रस्वर्गाधारकालोत्तरकाल इत्यर्थः । तेन कालमात्रपक्षत्वे स्वर्गकालभागे इष्टापत्तिः । तत्पूर्वकाले सत्यन्तापादकासिद्धिरिति दूषणमलग्नकं बोध्यम् । स्वर्गपूर्वकाले व्यभिचारादाह, सत्यन्तम् ॥ किञ्चित्स्वर्गोत्तरत्वं तत्रापीत्यत उक्तं, चैत्रेति ॥ तद्व्यापारजन्यस्वर्गोत्तरत्वे सतीत्यर्थः । स्वर्गान्तरजनकव्यापारान्तरवति स्वर्गपूर्वकाले व्यभिचारादाह ॥ तदिति ॥ तथा च फलोपहितयागव्यापारस्य यावत् सत्त्वं फलोपपादकत्वमिति नियमेन फलानन्त्यापत्तिरिति तात्पर्यम् । अन्यस्वर्गाधारत्वेनेष्टापत्तिवारणायापाद्ये, तदिति ॥ तद्व्यापारजन्यस्वर्गाधारः स्यादित्यर्थः । आद्यस्वर्गोत्तरतत्स्वर्गाधारकालो दृष्टान्तः ॥

जन्मान्तरीयेति ॥ निरन्वयध्वस्तस्यापि जनकत्वाभ्युपगमादिति ५३. २६. भावः ॥ संस्कारत्वेनेति ॥ न चैवमनेकव्रीह्युपादानानुपपत्तिः । होमादिनिर्वाहार्थं तदुपगमात् ॥ यद्यपि विनिगमकमुक्तमेव, तथाप्यपूर्वं तदित्यत्र विनिगमकाभावमाशङ्क्य निराकरोति ॥ न चेति ॥ दृष्टद्वारेति ॥ मङ्गलादौ व्यभिचारवारणाय सत्यन्तम् ॥ दृष्टत्वं क्लृप्तत्वम् ॥ तत्तद्दृष्टत्वं विशिष्यैव वक्तव्यमिति नान्यतरासिद्धिरित्यप्याहुः । मदुक्तमनुमानप्रकाशे द्रष्टव्यम् । साक्षात् पापध्वंससाधने प्रायश्चित्ते व्यभिचारवारणाय, कालान्तरेति ॥ कालान्तरत्वञ्च स्वानन्तरक्षणाऽन्यत्वम् । अन्यथा विहितपदवैयर्थ्यापत्तेः । एवञ्चापूर्व एव व्यभिचारवारणाय तत् । तच्च मन्मते कल्प्यमिति भावः । वस्तुतो धर्मजनकत्वमत्र साध्यम् । तथाच निषिद्धकर्मणि व्यभिचारवारणाय– तदिति ॥ कृष्यादिनेति ॥ न च विहितत्वाभावादेव न तत्र व्यभिचार ५५. १९. इति वाच्यम् । प्रत्येकवर्णोपायविभागविधिना वैश्यस्य कृषिविधानादिति भावः ॥

शत्रुवधमिति ॥ यद्यपि शत्रुवधो न शत्रुगत उद्देश्यः । तथा सति स्व-

वध एवोद्देश्यः प्रसज्येत । तस्यैव तच्छत्रुत्वात् । किन्तु स्वगत-शत्रुवधमुद्दिश्य श्येनः क्रियते।तथापि वधस्य संयोगध्वंसात्मकमरण-रूपस्य शत्रुनिष्ठतया तथोक्तम् । एतदपि परमते । अस्मन्मते श्येनापूर्वस्य शत्रुनिष्ठत्वमेव । फलोपपादकमपूर्वं फलाश्रये कल्प्यते इति वक्ष्यमाणयुक्तेरिति बोध्यम्।अस्मन्मते त्वप्रयोजकत्वे तात्पर्यम्॥

५६. २९. विध्यपेक्षितेति ॥ जलसंयोगभावघातविरोधितया न तथेति भावः ॥ संयोगस्यापीति ॥ तथा च प्रकृतावघातविशेषे तस्य न विरोधित्वं नियमतस्तदनन्तरमेव तद्भावादिति भावः ॥ संयोग-स्येति ॥ ननु फलस्योपलक्षणत्वे तत्तद्व्यापारमात्रस्यैव धात्वर्थत्वे त्यजगत्योः पर्यायताऽऽपत्तिः । अवच्छेदकीभूतफलयोर्विभागसंयोग-योर्धात्वर्थाप्रवेशे स्पन्दमात्रस्यैव धात्वर्थत्वादिति चेन्न । व्यापारे ह्युपलक्षणीभूतस्यापि फलस्य प्रतीतौ विशेषणत्वमेव । इष्टसाधनता-विधिपक्षे क्रियोपलक्षणस्यापीष्टस्य ज्ञानविशेषणतावत् । तदत्र फल-विशिष्टो व्यापारो यदि वाच्यस्तदा शब्दात् फलविशिष्टव्यापारप्रती-तिः । अपरथा फलोपलक्षितव्यापारधीरित्युभयथाऽपि फलांशेऽपि शक्तेः क्व प्रतीत्यविशेषो येन पर्यायता । विशेषणत्वे प्रकृते कर्मत्वानु-पपत्तिरिति । वस्तुतस्तु, त्यजेः स्पन्दमात्रं शक्यं, गमेः स्पन्दविशेष इति चिन्तामणिस्वरसात् स्पन्दत्वगमनत्वयोर्भेदे पर्यायत्वशङ्काऽपि न । गमनत्वं कर्मत्वव्याप्यसामान्यमिति लीलावतीस्वरसोऽपि तथा । अन्यथा उत्क्षेपणादेरपि गमनत्वे विभागव्याघातादिति॥वस्तु-

५७. ४. त इति ॥ तथा च परम्परासंबन्धगौरवमपि नेति भावः । नचैव-मदृष्टान्तरस्यापि तथात्वे अदृष्टवदात्मसंयोगो हेतुरिति न स्यादिति वाच्यम् । प्रोक्षणाद्यनन्तरं संस्कृतो व्रीहिरिति व्यवहारात् संस्कार-रूपादृष्टस्य तथात्वेऽपि अदृष्टान्तरस्य साक्षात् संबन्धत्वे मानाभावा-दिति भावः । अत एवोपनयनादिसंस्कारस्य माणवकशरीरनिष्ठत्वं, संस्कृत इति व्यवहारादिति बोध्यम् । प्रकृतसंलग्नतया पुत्रेष्टिपदं

५८. २३. जातेष्टिपरमित्याह ॥ वैश्वानरमिति ॥ तस्येति ॥ पितृस्वर्गकाम

५९. ५. इत्यादिना पित्रादेः प्रथमोपस्थितत्वादिति भावः ॥ साक्षादिति ॥ साक्षात् संबन्धेनोपपादकत्वादित्यर्थः ॥

५९. ३१. यद्वा सर्गादाविति ॥ तत्सामग्रीसत्त्वात् सर्गाद्यङ्कुरजातीयोऽपीदानी-मुत्पद्यतामित्यत्र नेदं बाधकम् । तथापीदानीन्तनाङ्कुरत्वावच्छेदेनैव

कृष्यादिहेतुत्वान्न तथेति भावः ॥ ननु मूले वैजात्यवार्त्ताऽपि नेति तत्परतया व्याख्यानमलग्नकमित्यपरितुष्यन्नाह ॥ यद्वेति ॥ कृष्यादिकं विना उत्पन्नाङ्कुरेणास्यैव भोगो जननीय इत्यत्र नियामकाभावादित्यर्थः । यद्यपि तददृष्टोत्पादितत्वमेव नियामकमन्यथा सर्गाद्यङ्कुरे का गतिः । तथापि पूर्वोक्ते तात्पर्यम् ॥ ६०. ३.

जातिभेदाविति,मतभेदेन । एकमते उभयजात्यनङ्गीकारात् ॥ यजमानेति ॥ तथाच प्रतिष्ठिताप्रतिष्ठितयोः साधारण्यप्रसङ्गः । चण्डालस्पृष्टास्पृष्टयोरपि स एव प्रसङ्ग इति मूलार्थः ॥तत्सत्त्वेऽपीति॥ तथाच तत्स्पर्शस्य तन्निष्ठाधेयशक्तिनाशकत्वमिति भावः॥ परमाणुगुणेष्वित्युपलक्षणं, द्व्यणुकगुणेष्वपीति द्रष्टव्यम् ॥ अनुद्भूतादपीति ॥ द्व्यणुकानुद्भूतरूपादपि त्र्यणुकोद्भूतरूपं जायते इत्यर्थः॥अत्रापीति॥प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शादीत्यर्थः ।अत्र विस्तरोऽनुमानप्रकाशे ॥ ६०. १९.

पापतदभावयोगिति ॥ सत्यन्तमात्रस्य तन्त्रत्वे परीक्षावैयर्थ्यमेवेति विशिष्टस्य तथात्वमुक्तमिति भावः ॥ भङ्गेति ॥ कालान्तरभाविभङ्गलक्षणफलश्रुतेरित्यर्थः । यद्यप्यकरणे प्रत्यवायाश्रुतेः परीक्षाविधेरभिशापनिमित्तकत्वाभावान्न विधिकल्पनं, न वा भङ्गलक्षणाऽनिष्टसाधनत्वेन निषेधविध्युन्नयनम् । व्यभिचारादप्रयोजकत्वाच्च । तथापि देवतासन्निधिपक्षे तात्पर्यम् । अत एवोक्तं मूले, इत्यस्माकं सिद्धान्त इति ॥ अधर्मजनकत्वे मानाभाव इति ॥ विजयपक्षे धर्मजननं भवतु । अगम्यागमनाद्यनाचरणस्य धर्महेतुत्वेन प्राक्तनधर्माभावादिति भावः ॥ तथापीति॥ तथाच परीक्षाविधिजन्यावनमनस्यैव भङ्गहेतुत्वम् । तस्य चाशुविनाशित्वेनाधर्मव्यापारकत्वमिति भावः । अगम्यागमनादिजन्याधर्माणामपि नरकफलश्रवणात् पराजयहेतुत्वे मानाभावाच्चेत्यपि द्रष्टव्यम् ॥ नाशस्येति ॥ प्रागभावप्रतियोग्यभावस्यैव नाशत्वादित्यर्थः ॥ किमाद्यत्वमिति ॥ किमाद्यसमयसम्बन्धत्वमित्यर्थः । तेन नोत्तरविरोधः ॥ स्वेति ॥ तथाच तादृशधर्मानाधारत्वमाद्यत्वं, तत्समयसम्बन्ध उत्पत्तिरिति भावः । प्रतिक्षणं कस्यचिदुत्पत्तिः कस्यचिन्नाश इति मतानुसारेणेदम् ॥ ६३. ६.

प्रतियोग्यन्यूनेति ॥ प्रतियोग्यवधिकेति कृते गुणादिप्रागभावाव्याप्तिः । तदवधिकपरत्वाभावात् । अपरत्वाश्रयस्यैव तथात्वादित्यत उक्तमन्यूनानतिरिक्तेति ॥ तथाच तादृशं द्रव्यमादाय तत्र लक्षण- ६५. १.

गमनमिति नोक्तदोषः । प्रतियोगिकालीनेत्येतावति कृते घटध्वंसा-व्यवहितपूर्वक्षणोत्पन्नं प्रतियोगिकालीनं द्रव्यान्तरमादाय तद्घटध्वंसेऽतिव्याप्तिः । तस्य तदवधिकयावत्परत्वाश्रयसमानकालीनत्वात्, परत्वापरत्वयोः परस्पराश्रयावधिकत्वस्वीकारेण तत्कालविद्यमानस्यैव तदवधिकपरत्वाश्रयत्वादिति विशिष्टमुपात्तम् । तदर्थश्च कालिकव्याप्त्या प्रतियोगिव्यापकत्वम् । तच्च द्रव्यान्तरं, न तद्घटव्यापकमिति नोक्तदोषः। एतेनान्यूनपदेनैव तद्दोषनिरासेऽनतिरिक्तपदं तथापि व्यर्थमेव । कारणनाश्यत्वेनान्त्यशब्दस्य क्षणिकतया तत्प्रागभावाव्याप्तिः । तदन्यूनानतिरिक्तकालीनद्रव्याप्रसिद्धेरित्यादि दूषणमपास्तम् । प्रतियोगिव्यापकञ्च किञ्चिदेव विवक्षितं, न तु यावत् । तेन तादृशव्योमाद्यवधिकपरत्वाप्रसिद्ध्या नासम्भव इति ध्येयम् । प्रतियोगिव्यापकावधिकदैशिकपरापरत्वाश्रयः प्रतियोग्यपि कदाचिद्भवतीति तत्प्रागभावस्य तत्समानकालीनत्वाभावादव्याप्तिरित्यत उक्तं, सामयिकेति ॥ समयपिण्डसंयोगासमवायिकारणकेत्यर्थः । प्रतियोगिव्यापकावधिकपरत्वाश्रयेण येनकेनचित् पर्वतादिना समानकालत्वाद् घटध्वंसेऽतिव्याप्तिरित्यत उक्तं, यावदिति ॥ प्रतियोगिन्युत्पन्ने ज्येष्ठे यत्परत्वमुत्पद्यते तत्समानकालीनत्वाभावात् तत्प्रागभावाव्याप्तिरित्यत उक्तमाश्रयेति ॥ न च यावत्परत्वानामाश्रयाप्रसिद्ध्याऽसम्भव इति वाच्यम् । प्रत्येकनिरूपिताश्रयस्यैव विवक्षितत्वात् । केचित्तु यावत्त्वमाश्रयविशेषणमेव । विशेषणस्य सावधिकत्वेन विशिष्टे तदऽवधिकत्वान्वय इत्याहुः । अत्यन्तान्योन्याभावयोरप्यऽनादितया तथात्वादतिव्याप्तेराह ॥ कादाचित्केति ॥ कादाचित्काभावस्यानादित्वानभ्युपगमेन व्यावर्त्त्याभावादभावपदं स्वरूपाख्यानपरमित्याहुः । न च महाप्रलयपूर्वक्षणभाविकर्मादिप्रागभावाव्याप्तिः । तदा ब्रह्माण्डान्तरस्याप्यभावादिति वाच्यम् । तदनभ्युपगन्तृमतेनैवास्योक्तत्वात् । अत एव लीलावतीप्रकाशे सिद्धान्तितमिदमेव लक्षणम् । ननु तथापि सर्गाद्यकालीनघटादिप्रागभावाव्याप्तिः । तत्र हि प्रतियोगिव्यापकं सर्गाद्यकालीनमेव स्याद् नित्यं व्योमादि वा ? तदऽवधिकञ्च परत्वमप्रसिद्धम् । नित्यस्य तदऽवधिकत्वाभावात् । अपरावधिकपरत्वस्य चाश्रयाभावादनुत्पत्तेः । न हि नित्यद्रव्यं तदाश्रयः । बहुतरतपनपरिस्पन्दान्तरितजन्मत्वाभावेन तत्र तदनभ्युपग-

मात् । नापि कार्यद्रव्यम् । तज्ज्येष्ठस्य तदानीमभावात् । सर्गान्तरे तत्सत्त्वेऽपि तदानीमवधेरेवानुत्पन्नतया तदवधिकपरत्वानुपपत्तेः । यदवधिकं यत्रापरत्वं तदवधिकमेव तत्र परत्वमित्यभ्युपगमादितिचेत् । मैवम् । जन्मांशस्यगुरुत्वेननित्यद्रव्येऽपितदभ्युपगमादित्याहुः । अवधिर्न परत्वकारणं, किन्तु तज्ज्ञानम् । तथाचानागतस्यैवावधेरीश्वरादीनां ज्ञाने सर्गान्तरद्रव्येषु तदुत्पाद इत्यप्याहुः । वस्तुतो ब्रह्माण्डान्तरद्रव्यमादाय अत्रापि समाधिसम्भवे प्रलयकालक्रियाप्रागभाववदत्राप्यव्याप्तिरभिप्रेतैवेति न दोषः । अत एव खण्डप्रलयपूर्वक्षणक्रियाप्रागभावाव्याप्तिशङ्काऽपि न दोषायेति मन्तव्यम् । वस्तुतस्तु प्रतियोगिव्यापकत्वविवक्षायामपि क्षणिकशब्दाऽऽदिध्वंसे पूर्वोक्तन्यायेनातिव्याप्तिरेवेति प्रतियोगिकालीनत्व एव तात्पर्यम् । परत्वाश्रयत्वयोग्यत्वाविवक्षया च नोक्तातिव्याप्त्यादिदोषः । एतन्मतेनैवाभावपदस्य स्वरूपाख्यानपरत्वमुक्तमन्यथा पर्वतादिकमादाय व्यावर्त्यसम्भवादित्यवधेयम् । नन्वेवमपि ध्वंसप्रागभावात्मनि घटादावव्याप्तिः, तन्न लक्ष्यमिति चेद्, भ्रान्तोऽसि । न हि प्रागभावलक्षणमिह प्रकृतं, किन्तु कारणत्वलक्षणम् । तच्च सामान्यत एव लक्ष्यं, मूलस्वरसात् । तथाच ध्वंसप्रागभावस्यालक्ष्यत्वे ध्वंसकारणसाधारणं लक्षणं, न स्यात् । किञ्चैवमनुगतं कारणत्वमपि न स्यादिति तदननुगमात् प्रवृत्त्यननुगम इति चिन्त्यम् ॥

अन्यथेत्यस्यार्थमाह ॥ कारणेतरत्वेनेति ॥ व्योमादेरिति ॥ तदभावस्य केवलान्वयित्वादिति भावः ॥ गन्धानधिकरणेति ॥ निर्गन्धान्योन्याभावादावतिव्याप्तेराह ॥ कालेति ॥ अभावपदञ्च घटादिवारणायेत्याहुः । तन्न । कारणत्वसामान्यलक्षणार्थं तस्य लक्ष्यतौचित्यमित्युक्तत्वात् । तस्मात् तत्प्रतियोगिकाभावलाभार्थमभावपदम् । न हि प्रागभावसामान्यगर्भं कारणत्वं, किन्तु तत्प्रतियोगिकप्रागभावावच्छिन्नसमयवृत्तित्वं तत्कारणत्वम् । तथाच तादृशकालावृत्तिस्तदभावस्तत्प्रागभाव इति पर्यवस्यति । ननु गन्धानाधारसमयो नास्तीति निर्णयवतो मीमांसकस्येष्टसाधनतालिङ्गककार्यताज्ञानेन प्रवृत्तिदर्शनान्नैतत्प्रागभावगर्भं कारणत्वम् । किञ्च, कारणत्वबोधकशब्दादिरेवैवं महाप्रलयकाले प्रमाणं स्यात् । तस्य तद्घटितत्वात् । तथाच तदनभ्युपगमोऽपि तस्य व्याहन्येतेतिचेत् । मैवम् । विशेषतो

६'१. ११.

बाधावतारेऽपि सामान्यतस्तस्य तद्ग्रहाभ्युपगमावित्येके। वस्तुत इदं कारणत्वं न प्रवृत्त्यनुकूलम्। अनन्यथासिद्धिघटितत्वेन गुरुत्वात्। तथाच स्वमतेन लक्ष्यतावच्छेदकतया निरुक्तं, वक्ष्यमाणं तदनुकूलं लाघवादिति। एतेन गन्धानाधारगर्भवन्नीलाधारगर्भत्वादिनाऽपि तन्निर्वचनात्तद्गर्भं कारणत्वमपि भिद्येत। तथाच विनिगमकाभावादुभयगर्भेष्टसाधनताज्ञानप्रवर्त्तकतायां प्रवृत्त्यननुगम इत्यपास्तम्। अन्ये तु आकाशादिपदात्। कदाचिच्छब्दाश्रयत्वेन कदाचिदष्टद्रव्यातिरिक्तद्रव्यत्वेनेतिवत् कदाचिन्नीलाधारत्वेनापि समयविशेषोपलक्षणान्न काऽपि क्षतिः। तत्समयविशेषावृत्त्यभावावच्छिन्नसमयत्वस्यैव हेतुत्वरूपतया च न प्रवृत्त्यननुगम इति वदन्ति स्वरूपसम्बन्धविशेषः कारणता प्रतियोगित्वान्निवत्। तत्परिच्चायक एवायं धर्मविशेष उक्त इत्याहुः॥

६५. १६. स्वाधिकरणेति॥ स्वाधिकरणतावच्छिन्नेत्यर्थः। अत एव गन्धवृत्तित्वेन सिद्धसाधनवारणाय, कालेति॥ आत्मत्वादौ व्यभिचारवारणाय, कार्येति॥ द्रव्यत्वादौ व्यभिचारवारणाय, मात्रेति॥ ध्वंसत्वादौ व्यभिचारवारणाय, जातीति॥ जातिपदार्थनिर्वचने यदि व्यर्थत्वशङ्का, तदा तावन्मात्र एव तात्पर्यम्। ननु कार्यत्वं प्रागभावप्रतियोगित्वमित्यन्योन्याश्रय इति चेन्न। प्रागभावसाधारणकृतिसाध्यत्वमात्रस्य तत्त्वेनाभिमतत्वादित्याहुः। खण्डप्रलयवृत्तितया घटत्वस्य दृष्टान्तत्वम्। तदसिद्धावपि चैत्रत्वादेर्दृष्टान्तत्वं बोध्यम्। ननु सिध्यतु गन्धानाधारसमयस्तथापि प्रागभावस्य तदनधिकरणत्वं कथं ग्राह्यम्? नहि तत्र प्रत्यक्षमागमो वा सम्भवति। अनुमानञ्च सम्भवेत् तत्प्रसिद्ध्युत्तरम्। तथाचानुमानप्रवृत्तौ प्रागभावत्वेन धीस्तस्याञ्चानुमानप्रवृत्तिरित्यन्योन्याश्रय इतिचेन्न।तादृशसमयो नाऽस्तीति निर्णयवतो मीमांसकस्य, भविष्यतीति बुद्धिर्निरुक्तातिरिक्तरूपेण प्रागभावस्यावश्यं तद्बुद्धिविषयत्वात्तेन रूपेण तद्बुद्धिविषयत्वेन वोपस्थितस्य प्रागभावस्य लिङ्गाभासादिनापि तादृशसमयानाधारत्वमिति सम्भवाद् गन्धस्यैव दृष्टत्वात्। यद्वा, कादाचित्काभावत्वेनैवोपस्थितस्य तदनुमानं ध्वंसांशे बाधादेवानुमानात्। तदनवतारे तदंशे भ्रमत्वेऽपि न क्षतिरिति॥

६५. १७. स एवेति॥ नन्वत्र मानाभावः, युगपन्नाशे मानाभावात्। तथाच

यावद्गन्धनाशानन्तरमपि वस्त्वन्तरसत्त्वसम्भावनया तत्प्रागभावस्य गन्धानाधारत्वसंशयेन तत्कारणेऽपि तद्गर्भकारणत्वलक्षणाऽव्याप्तिसन्देहः। एवञ्च व्यर्थविशेषणतासन्देहात्तद्वारणाय विशेषणमप्यदेयमिति। अत्राहुः । यावद्गन्धनाशो ह्यदृष्टाभावात् । अन्यथा संयोगविभागयोरन्योन्यनाश्यतयान्यतरावस्थितौ सर्वमुक्त्यनुपपत्तेः। तथाच सर्वादृष्टाभावाद् यावत्कार्याभावो वाच्य इति युगपदेव सर्वनाश इति ॥ कारणेतरत्वेनेत्यादिदोषभिया योगार्थमपहाय रूढमन्यथासिद्धिपदार्थमाह ॥ अन्यथासिद्धिश्चेति ॥

येन सहैवेति ॥ ननु शब्दादिना दण्डपूर्ववर्त्तित्वज्ञानं विनाऽपि तद्रूपपूर्ववर्त्तित्वग्रहसम्भवान्नियमोऽसिद्धः । न च प्रत्यक्षेणेति विशेषणीयम् । अतीन्द्रियान्यथासिद्ध्यव्याप्तेः । नियमाविवक्षायां दण्डरूपेणैव दण्डस्यान्यथासिद्ध्यापत्तेरितिचेन्न। रूपत्वमात्रस्यातिप्रसक्ततया दण्डरूपत्वेनैव पूर्ववर्त्तित्वग्रहो वाच्यः। तथाच साहित्यनियमात्। न चैवं द्रव्यत्वादेरतिप्रसक्ततया दण्डत्वेनैव दण्डपूर्ववर्त्तित्वग्रहात्तेन दण्डस्यान्यथासिद्धिरस्त्विति वाच्यम् । येन पृथगन्वयवता सहेत्यर्थात् । अत्रापृथगन्वयादिमत इत्यपि यस्येति विशेषणं देयम्। तेन दण्डेन दण्डसंयोगस्य नान्यथासिद्धिः । एतद्विशेषणद्वयमहिम्नैव यत्रोभयोरुभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानं, तत्र नैकेनापरस्यान्यथासिद्धिः । यथोद्भूतरूपतेजसोरिति । यत्रोभयविशेषणावच्छेदेनान्वयाद्यनुविधानं, तद्भिन्नत्वेन विशेषणान्न तादृशस्थलेऽतिप्रसक्त इत्यन्ये । ननु रूपवत् कुम्भकारपिताऽप्यत्रैवान्यथासिद्धावन्तर्भवति, कुम्भकारत्वेन तदनन्यथासिद्धत्वस्येष्टत्वात् कुम्भकारपितृत्वेनैव तदन्यथासिद्धित्वं वाच्यम् । नत्र तत्साहित्यनियमाद् अन्यं प्रतीत्यत्राप्यन्तर्भावयितुं शक्यते । कुम्भकारं प्रति पूर्ववर्त्तित्वे ज्ञात एव तत्पितृत्वेन घटपूर्ववर्त्तित्वग्रहात् । तथाच तत्संग्रहार्थमन्यथासिद्ध्यन्तरोपवर्णनमयुक्तम् । एवञ्च एतत्त्वेनान्यथासिद्धस्यापि कुम्भकारत्वेनैव दण्डरूपत्वेनान्यथासिद्धस्यापि रूपत्वादिनाऽनन्यथासिद्धत्वमस्तु। ननु तदतिप्रसक्तमितिचेत् । तत् किमातिप्रसक्तत्वमप्यन्यथासिद्धिः ? तथाचानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोरप्रतिक्षेपे किं तेन ? किञ्च, फलानुपहितवृत्तित्वस्यातिप्रसक्तत्वस्य दण्डत्वादिसाधारणत्वाद् एतादृशस्य चाभावात् । न च

६५. १७.

तेन रूपेणान्यत्र क्लृप्तेत्यत्रान्तर्भवतीति वाच्यम्। तर्हि दण्डरूपत्वेना-ऽपि तथाऽस्तु। एवञ्च दण्डसाहित्येनैव दण्डत्वेन घटपूर्ववर्त्ति-त्वग्रहाद्दण्डत्वमप्यत्रान्तर्भवति । यदि च रूपान्तरेण तस्य तद्ग्रहे साहित्यनियमाभावान्न तथा, तदा दण्डरूपेऽपि तुल्यम् । तथाच त-त्संग्रहार्थमपरान्यथासिद्धिनिर्वचनमप्यसङ्गतम् । अत एवावच्छेदक-जनकजनकयोरपि त्रयेणैव संग्रहसम्भवात् त्रिधैवान्यथासिद्धिरिति गङ्गेशः । न चोभयेनापि तत्संग्रहे को दोष इति वाच्यम् । कारणत्व-स्य तदभावगर्भत्वे गौरवादिति चिन्त्यम् ॥

६५. १८. अन्यं प्रतीति ॥ न चैवं संयोगादिकमपि प्रत्याकाशस्यान्यथा-सिद्धत्वप्रसङ्गः। आकाशत्वेनेष्टत्वात् । द्रव्यत्वेन शब्दपूर्ववर्त्तितामज्ञा-त्वाऽपि तत्पूर्ववर्त्तित्वग्रहात् । नन्वेवं यागादेरपूर्वेऽन्यथासिद्ध्यापत्तिः। स्वर्गं प्रति पूर्ववर्त्तित्वे ज्ञात एव तत्र तद्ग्रहादितिचेन्न। साक्षादिति पूर्ववर्त्तित्वविशेषणात् । तत्पूर्ववर्त्तित्वानुपपादकं यस्य पूर्ववर्त्तित्वं गृह्यते इत्यर्थादित्यन्ये । न च परत्वादिपूर्ववर्त्तित्वग्रहानन्तरमन्यकार्ये दिक्कालयोस्तद्वदित्यन्यथा सिद्ध्यापत्तिः । अधिकरणत्वेन तद्ग्रहं विनाऽपि कार्यमात्रे तद्ग्रहात् । नन्वन्यं प्रति पूर्ववर्त्तित्वे गृहीत एवेत्यत्र, किं येन केनचित् ? सर्वेण वा ? नाद्यः। दण्डादावतिप्रस-ङ्गात् । नान्त्यः। शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितोऽष्टद्रव्यानाश्रितत्वे सति गुणत्वादित्यनेनाकाशसिद्धौ शब्दपूर्ववर्त्तित्वाग्रहेऽपि घटं प्रति तद्ग्रहसम्भवात् । न च तत्रापि शब्दं प्रति कारणतामुपजीव्यैवा-काशसिद्धिः। शब्दनित्यत्वानित्यत्वसन्देहेऽपि तदाश्रयत्वेन तत्सिद्ध्य-ऽविरोधात् । अनुकूलतर्कान्तरसम्भवाच्च । वस्तुतः, शब्दनित्यत्व-निर्णयवतो मीमांसकस्य तत्पूर्ववर्त्तित्वमज्ञात्वैव घटादिपूर्ववर्त्तित्वग्रह इति नियमासिद्धिः। किञ्च, द्रव्यत्वेनैवाकाशस्य संयोग इव ज्ञानादौ हेतुत्वमस्तु । न च तत्र ग्राहकाभावेन नियतपूर्ववर्त्तित्वाग्रह इति वाच्यम् । ग्राह्यसत्त्वे ग्राहकाभावासत्त्वात् । न च तेनैव रूपेणान्यत्रे-त्यत्रान्तर्भवतीति वाच्यम् । तथा सत्याकाशत्वेनापि तथात्वापत्तेः। अपि चैवं शब्दसाक्षात्कारं प्रत्यपि तस्यान्यथासिद्धिः स्यात् । न च शब्दपूर्ववर्त्तितामज्ञात्वाऽपि इन्द्रियत्वेन तत्पूर्ववर्त्तित्वग्रह इति वा-च्यम् । श्रोत्रत्वेन तथाप्यन्यथासिद्ध्यापत्तेः । तस्याकाशघटितत्वादा-काशस्य च शब्दपूर्ववर्त्तित्वग्रहं विनाभ्युपगमात् । अन्यथा घटेऽपि

तस्यान्यथासिद्धत्वं न स्यात् । एवञ्च पाञ्चभौतिकं शरीरं प्रत्यपि तदन्यथासिद्धं स्यात् । किञ्चेश्वरज्ञानादेः क्षितिपूर्ववर्त्तित्वे ज्ञात एव घटपूर्ववर्त्तित्वग्रहात्तत्रान्यथासिद्ध्यापत्तिः । न च कार्यमात्रे कर्तृमात्रस्यैकदैव पौर्वापर्य्यग्रहान्नैवमिति वाच्यम् । प्रकृतेऽपि विभुमात्रस्यैकदैव पौर्वापर्यग्रहस्य शब्दादिना सम्भवादन्यथासिद्ध्यभावापत्तेः । विभुत्वेन पूर्ववर्त्तित्वमात्रं गृह्यते, न तु जनकत्वमिति चेत् । ततः किम् ? । न हि जनकत्वगर्भा प्रकृताऽन्यथासिद्धिरात्माश्रयापत्तेः । यत्तु अन्यमित्यस्य यमित्यर्थः । तेन यं प्रति पूर्ववर्त्तित्वे गृहीत एवेत्यर्थः । न च क्षित्यादिस्तथा । अन्यतमपूर्ववर्त्तित्वग्रहेणापि सम्भवेन नियमाभावात् । तत्र शब्दत्ववदत्राप्यनुगतपक्षतावच्छेदकस्याऽन्यतमत्वादेर्वा सम्भवादिति चिन्त्यम् ॥

अन्यत्रेति. प्रायिकम ॥ अवश्यकल्प्यं यल्लघु नियतपूर्ववर्त्ति, तत् ६५. २०. समवधाननियतत्वं तत्त्वमित्यत्र तात्पर्यम् । तेन गुणेन दोषाभावस्य महत्त्वेनानेकद्रव्यत्वस्यान्येषां वा गुरूणां पदार्थानामन्यथासिद्धिर्भवति । अत एव पञ्चम्या हेतुत्वाभिधानादात्माश्रय इत्यपास्तम् । पूर्ववर्त्तिन इत्यत्र पञ्चम्या अवधित्वेन तस्योक्तत्वादित्यन्ये । अत एव च रासभादेरपि यथाश्रुतान्यथासिद्धान्तर्भावेऽनन्यथासिद्धपदेनैव तद्वारणं नियतपदं व्यर्थमित्यपास्तम् । नन्वेवं दण्डरूपाकाशदण्डत्वानामप्यत्रैवान्तर्भावे तत्संग्राहकान्यथासिद्धीनामानर्थक्यम् । किञ्चावश्यकल्प्यत्वं नियतपूर्ववर्त्तित्वमात्रेण कारणतया वा ? नाद्यः । गन्धं प्रति रूपविशेषप्रागभावस्यापि तथात्वेन तेनैव गन्धप्रागभावाऽन्यथासिद्ध्यापत्तेः । नान्त्यः । आत्माश्रयात् । अपि च सहकारिणां परस्परस्य परस्परेणान्यथासिद्ध्यापत्तिः, द्वयोरप्यवश्यकल्प्यलघुनियतपूर्ववर्त्तित्वेन तत्समवधाननियतत्वात् । न च पृथगन्वयाद्यननुविधायित्वे सतीत्यपि विशेषणम् । तद्धि पृथगन्वयादिग्रहाविषयत्वं वा समनियतत्वं वा ? नाद्यः । रूपप्रागभावस्यापि शब्दादिना तादृशग्रहविषयत्वेन तथात्वापत्तेः। नान्त्यः । आलोकतद्रूपादेरीश्वरज्ञानादेश्चैवमपि परस्परमन्यथासिद्ध्यापत्तेः । एतेनावश्यकल्प्यपूर्ववर्त्तिन एव कार्यसम्भवे तन्नियतसहभूतत्वमित्यर्थः । पञ्चमी चावधित्वे, न हेतुत्वे इत्यपास्तमिति चिन्त्यम् ॥

गन्धकादाचित्काभावस्येति ॥ गन्धप्रागभावस्येत्यर्थः ॥ अत्र च ६५. २२

जन्येति॥अन्यजनकत्वं वास्तवं नियतपूर्ववर्त्तित्वमात्रं विवक्षितमिति नात्माश्रयः। इयञ्च तत्पितृत्वेनान्यथासिद्धिर्बोध्या। कुलालत्वेन तस्यापि हेतुत्वात्। अत्रापीदं चिन्त्यम्। पूर्वत्रैवास्यान्तर्भावे वैयर्थ्यमित्युक्तमेव। मननव्यापारकश्रवणत्वेन हेतुत्वमिति द्रव्यप्रकाशाविरोधश्च। यदि मननपूर्ववर्त्तित्वमज्ञात्वाऽपि, श्रोतव्य इत्यादिशब्दादिना श्रवणपूर्ववर्त्तित्वग्रहसम्भवो भिन्नग्रहसामग्रीकत्वादिति नैवं, तदा प्रकृतेऽपि तुल्यमिति ॥ यमादायेति ॥ न च येन सहेत्यनेनाभेद इति वाच्यम्। तत्र साहित्यप्रतियोगिना दण्डेनान्वयादिप्रतियोगिरूपमन्यथासिद्धमिति हि विवक्षितम्। अत्र च साहित्यप्रतियोगिदण्डत्वमेव दण्डेनान्यथासिद्धमिति भेदात्। अत्रापीदं चिन्त्यम्। पूर्वत्रैवास्यान्तर्भावे वैयर्थ्यम्। उद्भूतरूपतेजसोः परस्परमन्यथासिद्ध्यापत्तिः। इन्द्रियादेरिन्द्रियसंयोगादिनाऽन्यथासिद्ध्यापत्तिश्च। किञ्च दण्डत्वाद्यवच्छेदकसमनियतधर्म्मान्तरमादायापि शब्दादिनाऽन्वयादिग्रहसम्भवान्नियमासिद्धि। प्रत्यक्षपरत्वेऽतीन्द्रियावच्छेदकाऽव्याप्तिः। अन्यथा दण्डमादाय दण्डत्वेन तस्यान्वयादिग्रहात्तेन दण्डान्यथासिद्ध्यापत्तेरिति ॥

६५. २७. नियतेति ॥ ननु नियतत्वं देशमपेक्ष्य कालमपेक्ष्य वा ?। नाद्यः। रासभेऽपि गतत्वात्। घटपटादिपूर्वकाले रासभजातीयस्य नियमेन सत्त्वात्। नान्त्यः। साक्षात्सम्बन्धेनादृष्टादेर्घटादिदेशेऽनियतत्वात्। साक्षात्परम्परासाधारणसम्बन्धमात्रापेक्षया रासभे घटादिदेशनियतत्वेनातिप्रसङ्गादितिचेत्। मैवम्। साक्षात्परम्परासाधारणैकजातीयसम्बन्धेन देशनियतत्वस्य विवक्षितत्वात्। रासभादेरेकजातीयसम्बन्धेन घटादिदेशनियतत्वाभावात् घटादेरेकजातीयसम्बन्धेनाऽदृष्टादेर्नियतत्वादिति वदन्ति। तत्रेदं चिन्त्यम्। कियत्सु घटेषु रासभस्याऽप्येकजातीयसम्बन्धेन देशनियतत्वादतिप्रसङ्गः। कार्यतावच्छेदकावच्छेदेनादृष्टस्याप्यतथात्वम्। द्रव्यगुणाद्यनेककार्ये एकजातीयसम्बन्धाभावादिति ॥

६६. ३. यस्य कार्याभावव्याप्यत्वमिति ॥ इतराभावसहकारावच्छिन्नं तदवच्छिन्नं कारणमित्यर्थः। तेन बीजत्वस्य कार्याभावव्याप्यत्वस्य जनकत्वाभावान्नासम्भवः। न वा यत्र दण्डाभावत्वं तत्र घटाभाव इति दण्डाभावत्वनिष्ठव्याप्तौ दण्डाभावस्यैवावच्छेदकतयाऽजनके

दण्डाभावादौ चातिव्याप्तिः । तत्र दण्डाभावसहकृतत्वस्यानवच्छेदकत्वात् । एवञ्चाग्रे बीजत्वादिपदं तद्धर्मपरमिति । ननु कार्याभावस्तज्जनकत्वाभावो वा, तदभावमात्रं वा ? । आद्ये आत्माश्रयः । अन्त्ये शिलायामप्यङ्कुरस्य संयोगवृत्त्या सत्त्वेन तत्रापीतराभावसहकृतशिलात्वस्य कार्याभावव्याप्यत्वात् । किञ्च घटकारणे ज्ञानादौ कार्याभावव्याप्यत्वं ज्ञानत्वादिनैवावच्छिद्यते । दण्डाद्यभावसाहित्यस्य तत्र नीलधूम इव व्यर्थत्वादितिचेत् । अत्र वदन्ति । उत्पत्तिकालीनसम्बन्धावच्छिन्नकार्याभावव्याप्यत्वं विवक्षितम् । संयोगसम्बन्धस्योत्पत्त्यनन्तरकालीनतया तदवच्छिन्नाभावमादाय न शिलादौ प्रसङ्गः । उत्पत्तिकालीनसम्बन्धो द्वयमेव, कारणता समवायश्च । तदवच्छिन्नाङ्कुराभावश्च समवायिनि बीजादौ च । द्वयञ्च कारणमेव । न चैवं कारणतागर्भत्वेनात्माश्रयः । सम्बन्धत्वेनैव तज्ज्ञानादिति । अत्र वदन्ति । विषयविषयिभावसम्बन्धस्याऽप्युत्पत्तिकालीनतया तदवच्छिन्नकार्याभावत्वस्येतराभावावच्छेद्यतया वह्न्यादेरनुमितिजनकत्वापत्तिः । चरमकारणे कार्याभावाभावादव्याप्तिश्चेति । बीजादङ्कुर इति प्रतीतिबलादवध्यवधिमद्भावलक्षणः स्वरूपसम्बन्धविशेष एव विलक्षणः । कार्यकारणयोस्तत्सम्बन्धावच्छिन्नकार्याभावश्च कारणे इतराभावावच्छेदेन । स्वरूपायोग्ये च तादृशसम्बन्धाभावात् तदवच्छिन्नकार्याभावः स्वासाधारणशिलात्वादिधर्मावच्छेद्यः । एवञ्च तादृशसम्बन्धावच्छिन्नकार्याभावव्याप्यत्वं यत्र स्वासाधारणधर्मेतरावच्छिन्नं तदवच्छिन्नं कारणमित्यत्र तात्पर्यम् । चरमकारणे च यद्यपीतराभावो नावच्छेदकस्तथाप्युत्पादकाल एव तथा । उत्पादानन्तरमेव कार्योत्पादेन तदा कार्याभावात् । यद्वा परामर्शादौ चरमकारणेऽपि प्रतिबन्धकाभावविलम्बेन कार्योत्पत्तिविलम्बादितराभावावच्छिन्नमेव । यदि च क्वचिन्न तथात्वं, तदा तज्जातीयत्वं लक्षणं बोध्यम् । नचारण्यस्थदण्डे तद्दण्डत्वादिनैव तदवच्छेदादव्याप्तिरिति वाच्यम् । दण्डत्वमादाय लक्षणसत्त्वादिति ॥

अन्यासमवधानावच्छिन्नेति ॥ अन्यासमवधानावच्छिन्नं कार्यानुत्पत्तिव्याप्यत्वं यस्य, तदवच्छिन्नं कारणत्वमित्यर्थः । उत्पत्तिगर्भतया पूर्वस्माद्भेदः । शेषं पूर्ववत् ॥ कारणत्वसहकारीत्यत्र द्वन्द्वः ॥ ६६. ७.

देवदत्ताद्येति ॥ द्वितीयशरीरादेराद्यशरीरजन्यबुद्ध्यादिजन्यत्वेना- ६७. १०.

ऽर्थान्तरं स्यादित्याद्यपदम् । अन्यशरीरे बाधवारणाय पक्षे देवदत्त-पदम् । जन्मान्तरबुद्धिजन्यत्वेनार्थान्तरवारणाय वर्त्यन्तम् । ईश्वर-ज्ञानादिजन्यत्वेन सिद्धसाधनवारणाय, देवदत्तेति ॥ सङ्ख्यादिजन्य-त्वेनार्थान्तरवारणाय, विशेषेति ॥ मनसा व्यभिचारवारणाय सत्यन्तम् । अन्यशरीरादौ व्यभिचारवारणाय, तदिति ॥ तन्नि-

६७. १३. मितेति ॥ तद्भोगसाधनेत्यपि द्रष्टव्यम् ॥ तस्येति ॥ यद्यप्येवमपि शरीरजनकत्वे विरोधाभावस्तथापि तद्द्वारा भोगजनकत्वमाश्रित्ये-दमुक्तम् । यद्यपि, धर्मिकल्पनात इति न्यायेन भोगजनकत्वमपि त-स्यैव कल्पनार्हं, तथापि मानान्तरादप्यदृष्टसिद्धयवष्टम्भेनेदमुक्तमित्ये-के । संस्कारान्यत्वं गुणविशेषणमित्यन्ये ॥

६९. ८. भेदकमिति ॥ भेदकान्तरमित्यर्थः॥अनित्येति ॥ यद्यपि सर्वनित्य-तावादिनस्तस्य नानित्यं, न वा कार्यम् । तथाप्याविर्भावतिरोभावौ उत्पादविनाशाविति भावः ॥ कार्यधर्मेति ॥ कार्यकारणयोस्ता-

६९. ३१. दात्म्यादिति भावः ॥ अन्यथेति ॥ आलोचनं व्यापारः, इन्द्रियाणां विकल्पस्तु मनस इत्युपगमादिति भावः ॥

७४. ६. पूर्वं नित्यत्वेनेति ॥ यद्यप्यचेतनकार्यत्वादित्यत्र विशेषणासिद्धि-रिति व्याख्यानात् कार्यत्वासिद्धिर्नोक्ता, तथाप्यसिद्धिरित्यादिमूलेन कार्यत्वासिद्धेरप्युक्तत्वात्तदभिप्रायेणेदं मन्तव्यम् ॥सदातनाभावमात्र-वृत्तिधर्मत्वादिति ॥ ननु घटात्यन्ताभावत्वादौ व्यभिचारः । मात्र-पदञ्च व्यर्थम् । प्रमेयत्वादावपि साध्यसत्त्वात् । न च मात्रपदं न व्यवच्छेदार्थकं, किन्तु यावदर्थकम् । अत एव नोक्तव्यभिचारोऽपी-ति वाच्यम् । स्वरूपदृष्टान्तासिद्ध्यापत्तेः । अन्योन्याभावस्यात्य-न्ताभावेऽत्यन्ताभावस्यान्योन्याभावेऽवृत्तेः । सदातनेत्यपि व्यर्थम् । स्वरूपयोग्यप्रागभावध्वंसयोरप्यव्याप्यवृत्तित्वेन प्रागभावप्रध्वंसत्व-योरपि साध्यसत्त्वादिति चेन्मैवम् ।सदातनाभाववृत्त्यभावविभाजको-पाधित्वादिति विवक्षितत्वात् । नन्वेवमपि दृष्टान्तासिद्धिः । चतुर्द्धा अभावविभागस्य, स पुनश्चतुर्द्धेत्यनेन करणात् । संयोगप्रागभावादे-र्व्याप्यवृत्तित्वाभ्युपगमेन सदातनपदं, तदनभ्युपगमे त्वनादेयमेवेति तत्त्वम् ॥

७६. १०. स्थिरपक्ष इति ॥ क्षणिकतापक्षे बाल्ययुवशरीरयोः परमाणुपुञ्जा-त्मकतयोपादानोपादेयभावे तद्वासनासंक्रमः स्यात् । स्थिरपक्षे

तदभावान्न स्यादित्यर्थः ॥ विच्छिन्नेति ॥ तथाच तद्वासनासंक्रमाभावात्तदनुभूतं खण्डशरीरेण न स्मर्येतेत्यर्थः ॥ सदिति ॥ न चान्यशब्दांशे सिद्धसाधनमन्यथा साध्याप्रसिद्धेरिति वाच्यम् । सत्त्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् ॥ अर्थक्रियाव्यापकेति ॥ यद्यपि क्रमयौगपद्ययोः प्रत्येकं मिलिततया वा नार्थक्रियाव्यापकत्वं, तथापि तदन्यतरत्वेन व्यापकत्वम् । अर्थक्रियाकारिणि क्रमकारित्वयुगपत्कारित्वान्यतरनियमादिति बोध्यम ॥ अतिरिच्यत इत्यस्यैव विविच्य न गृह्यत इत्यर्थः। तत्र, न चेति सम्बन्धे विविच्य गृह्यत एवातिशाय इत्यर्थपर्यवसाने सातिशयव्यक्त्युत्पादो गृह्येतेत्यत्रेष्टापत्तिरिति भावः ॥ आपातत इति ॥ निश्चायकाभावादिति भावः ॥ सादृश्यस्याग्रेऽपि सत्त्वान्निश्चायकाभावस्तुल्य इत्याशयेनाह ॥ नत्किमिति ॥ ७७. ३.

तदपि तथेति ॥ कुर्वद्रूपत्वमपि योग्यानुपलब्धिबाधितमित्यर्थः ॥ ७८. २६.
न चेष्टापत्तिरिति ॥ उपस्थितबीजत्वाद्येवाङ्कुरादिप्रयोजकमस्त्वित्यर्थः ॥ तेनेति ॥ बीजत्वादिनेत्यर्थः । तथाच तादृशेष्टापत्तौ तवाऽपसिद्धान्त इति भाव । यद्वा कुर्वद्रूपत्वेनेत्यर्थः। तथा चानेन रूपेणार्थक्रियारहितत्वाभ्युपगमात् तव कुर्वद्रूपत्वं प्रामाणिकं न स्यादिति भावः ॥ ननु शालित्वकुर्वद्रूपत्वयोर्विरोध एव नास्ति, सामानाधिकरण्यादित्यत आह ॥ विरोध इति ॥ पर्यायेति॥सर्वत्र प्रवृत्तिनिमित्तभेदसम्भवेनैकप्रवृत्तिनिमित्तकत्वाभावादिति भावः । अनुगतबुद्धिबलात्तेषु नियामकं सिद्ध्यल्लाघवादेकमेव सिद्ध्यतीति नान्यूनानतिरिक्तव्यक्तिकजातिद्वयस्वीकार इत्यपि द्रष्टव्यम ॥ विरोध इति ॥ यद्यप्यत्र विरोधो न सामानाधिकरण्याभावो, नापि परस्परात्यन्ताभाववद्वृत्तित्वं, तयोर्व्याप्यव्यापकभावाभ्युपगमात्तथाप्यन्यूनानतिरिक्तव्यक्तिव्यतिरिक्तत्वाभाव एव स इह विवक्षित इति बोध्यम॥ नचोपष्टम्भकेति ॥ समाविष्टत्वमेव नानयोरिति भावः ॥ ननु संस्थानवृत्तित्वेऽपि कथं न द्रव्यवृत्तित्वमत आह ॥ संस्थानं हीति ॥ संस्थानवृत्तित्वे युक्तिमाह ॥ युक्तश्चैतदिति ॥ गुणजाताविति ॥ तद्दोषताप्रयोजकस्य बीजस्य तुल्यत्वादिति भावः ॥ तादृशेति ॥ यद्यप्यवयवसंयोगात्मकसंस्थानं नावयविनि, तथापि परम्परासम्बन्धेन तद्वत्त्वं बोध्यम् । अत एव तदेकार्थसमवायिद्रव्यत्वं तत्त्वामिति वक्ष्यतीति भावः । एवञ्च घटपदप्रवृत्तिनिमित्तमपि स एवोपाधिरन्यथा नाना- ८०. २४.

ऽर्थतापत्तेरिति ध्येयम् ॥ नन्वेवं घटत्वस्य जातित्व एव मानाभावः, कुतो नानात्वम् । अनुगतमत्यादिना हि तत् सिध्यति । तद्विषयश्चोपाधिरेवेति कथं तत्सिद्धिः । नचैवं तारत्वादिकमपि नानाजातिर्न स्यादिति वाच्यम् । उत्कर्षादेर्जातित्वनियमे जातिसङ्करादनन्यगत्या नानात्वाभ्युपगमात् । तत्रानुगतोपाधेरपि तज्जातिघटितत्वाच्चेत्यनु-
८१. १. शयात्तथैव सिद्धान्तमाह ॥ यद्वेति ॥ संस्थानविशेषवत्त्वं नावयविनीति तदेकार्थसमवायित्वमुक्तम् । कपालरूपादावतिप्रसङ्गवारणाय द्रव्यपदम् । ननु संस्थानविशेषस्याननुगतत्वात् कथं तद्घटितोपाध्यनुगमः ? । तद्विशेषत्वं हि घटावयवसंयोगत्वं वा, कपालद्वयसंयोगत्वं वा, अन्यद्वा ? नाद्यः । घटत्वस्याननुगमात् । उक्तोपाधिनैव तदनुगमेऽन्योन्याश्रयात् । नापि द्वितीयः । घटत्ववत् कपालत्वस्याप्यभावात् । तत्र तत्राप्येवमनुगमकोपाधिगवेषणे घटत्वधीस्तावद्विषयशतभारमन्थरा स्यात् । नान्त्यः । तदनिरुक्तेः । न च जातिविशेष एव तथेति वाच्यम् । अन्यतरकर्मजत्वादिना सङ्करप्रसङ्गात् । एवञ्चाद्यकल्पेऽपि तादृकसंस्थानवत्त्वेन कथमनुगम इति । नचैकव्यक्तिसंस्थानसदृशसंस्थानवत्त्वेनानुगम इति वाच्यम् । कस्यचित् काचिद्व्यक्तिर्बुद्धिविषयः कस्यचित् काचिदिति सकलानुगतबुद्धिविषयानुगतोपाध्यभावात् । अत एवाद्यकल्पे एकजातीयघटसंस्थानसदृशसंस्थानवत्त्वेनानुगम इत्यपास्तम् । अत्राहुः । आद्यकल्प एव साधुः । अनन्यगत्या घटपदस्य नानार्थत्वम् । अक्षादिपदवत् । उक्तोपाधेरनुगतत्वेऽपि तत्प्रकारकप्रतीतेः शाब्द्याः सन्दिग्धत्वेन नानाऽर्थत्वस्यैवोचितत्वात् । अन्यथा तावदन्यतमत्वाद्यनुगतोपाधिसत्त्वेऽक्षादिपदेऽपि तथात्वं न स्यात् । मार्द्दसौवर्णादिसाधारणी यद्यनुगतधीरस्ति, तदा तद्वदेव तत्पदवाच्यतयाऽस्तु । तद्घटजातीयसदृशसंस्थानवत्त्वेनैव वा तस्यानेकस्याप्यनुगतत्वसम्भवात्, विनिगमकाभावात्, तत्प्रकारकप्रतीत्यभावाच्च । तन्न तत्प्रवृत्तिनिमित्तमिति नानार्थत्वमिति । केचित्तु मार्द एव घटे घटत्वमन्यत्र तथाविधसंस्थानगुणयोगाद्गौणस्तद्व्यवहारः । मुख्यत्वे विनिगमकस्तु निरुपाधिप्रयोग एव, घटमानयेत्युक्ते मार्द्दव्यवहारात्, सुवर्णादिपदसमभिव्याहारात् सौवर्णादिव्यवहारः । अन्यथा प्रयोगस्य शक्याशक्यसाधारणत्वेन मुख्यत्वानिर्णयः क्वापि न स्यात् । अत एव सौवर्णादि-

गवादौ गोपदममुख्यम् । तदिदमुक्तं, पिष्टकमय्यो गाव इत्यत्र गवाकृतिसदृशाकृतौ, लक्षणेति ॥ ननु शाब्दो व्यवहारो यथा तथाऽस्तु । सौवर्णादिसाधारणी प्रत्यक्षानुगतधीः कथमिति चेन्न । सौवर्णादिगवादावपि तुल्यत्वात् । यदि च तत्र तत्साधारणी गवाकारानुगतमतिरसिद्धा, सिद्धौ वा तत्तुल्यसंस्थानवत्त्वोपाधिविषया, तदा प्रकृतेऽपि तुल्यम् । अन्यथा घटं दद्यादित्यत्र वेदे सौवर्णमार्द्रादिविषयतयाऽनध्यवसायः स्यात् । सौवर्णादिसत्त्वे मार्द्रं घटमानयेति तद्व्यावर्त्तकविशेषणोपादानं लाक्षणिकान्वयबोधशङ्कानिरासाय । सौवर्णादिगवादिसत्त्वे गवि तद्व्यावर्त्तकविशेषणोपादानवदिति वदन्ति॥

लिङ्गासङ्कतिमपाकरोति, विरोधस्वरूपमिति ॥ प्रत्युतेति ॥ उभयसामग्र्येकदेशसाधारणकारणकालदिगादेः समावेशेन परस्परसाहित्येनैककार्यजनकत्वेन दृष्टान्तेन तदुभयासाधारणकारणयोरप्येकपशुजनकत्वं स्यात् । तथाच तदुभयसामग्र्या अप्युक्तः समावेशः स्यात् । सामग्र्याः साधारणासाधारणकारणात्मकत्वादित्यर्थः । यद्वा, पशुजनकत्वं पशुजातीयजनकत्वम् । तथाच यथा एकजातीयजनकत्वं तथैककार्यजनकत्वमपि स्यादित्यर्थः ॥ गोत्वाश्वत्वयोरिति ॥ एवमुपाधिसाङ्कर्यमपि न दोषः स्यात् । परस्परात्यन्ताभावसमानाधिकरणोपाध्योः समावेशे विरुद्धोपाध्योरपि सङ्करशङ्कयाऽन्यतरेणान्यतराभावानुमानं न स्यादिति तुल्यत्वादिति प्रत्यक्षप्रकाशे विपश्चितमनुसन्धेयम् ॥　　८१. ६ / ८१. १७.

क्षणिकत्वसन्देहेऽपीति ॥ स्थैर्यानिद्धा चार्वाकाकाङ्क्षितसिद्धेरित्यर्थः ॥ वादीति ॥ स्वारसिकस्यैवात्र निषेध्यत्वात् । अत एवोक्तं मूले, न स्वरसवाही सन्देह इति ॥　　८६. ११.

अन्वयव्यतिरेकवज्जातीयत्वमतिप्रसक्तमित्यनुशयादाह ॥ यद्वा, अन्वयव्यतिरेकवतीति ॥ अत एवेति ॥ तथाच ज्ञानं प्रति व्योमादेर्न निरुक्तमन्वयव्यतिरेकवज्जातीयत्वमिति भावः ॥ समवायिकारणवृत्तेरेवेति ॥ स्वस्वाश्रयान्यतरसमवायिकारणवृत्तेरेवेत्यर्थः । तथा चोभयाश्रयान्तर्भाव इति भावः ॥ तथापीति ॥ असमवायिनोऽप्याधारत्वसम्भवादिति भावः ॥　　९०. २७

वस्तुत इति ॥ यद्यपि समवायित्वसमानाधिकरणं कारणत्वमेव समवायिकारणत्वम् । तच्च विशिष्टं न ग्राह्यं, किन्तु गोत्वादिसम-　　९१. २०

वायित्वसाधारणसमवायित्वग्राहकसमाजात्कारणत्वग्राहकादेवार्थ-समाजमहिम्ना विशिष्टसिद्धिः । अन्यथा समवायिकारणत्वस्यापि विशिष्टस्य ग्राह्यत्वे ग्राहकान्तरसम्बन्धमनुस्त्रियेत । न हि तत्र संसर्गाभावग्रहः प्रयोजको निमित्तसाधारणत्वात् । नाप्यन्योन्याभावग्रहः। तदधिकरणककार्यानुत्पादेन तस्य तत्राभावात् । यदि च कारणत्व-मात्रमेव ततो ग्राह्यं तस्य निमित्तसाधारणतया ग्राहकस्य निमित्त-साधारण्यं न दोषस्तदा प्रकृतेऽपि तुल्यम् । किञ्च संसर्गाभावग्रह-स्य निमित्तसाधारणतया यदि न तद्ग्राहकत्वं तदा निरुक्तस्यापि तथात्वं न स्यात् । तस्यापि देशकालरूपाधिकरणात्मकनिमित्तसा-धारणत्वात् । न च यत् कपालं तत्र समवायसम्बन्धेन घट इति विवक्षितमिति वाच्यम् । तर्हि समवायित्वं प्रथमत एव ग्राह्यमिति कारणत्वमात्रमेव तद् ग्राह्यमिति सिद्धं नः समीहितम् । सम्बन्धा-न्तरगर्भस्य च तस्य देशादिकारणत्वग्राहकत्वं कल्प्येत । तथापि विशिष्टं न ग्राह्यं, किन्तु समवायिनः कारणत्वमेवमपि ग्राह्यमित्यत्र पूर्वकल्प एव वा तात्पर्यम् ॥

९१. २७. नन्वेवं संयोगिनोऽवच्छेदकत्वमेवास्त्वित्यत आह ॥ अन्यथेति ॥ यद्यपि संयोगावच्छेदकत्ववादिनस्तुल्यमिदं, तथापि कारणसंयोगा-श्रयस्यावश्यं कारणत्वमिति नियमाभ्युपगमावष्टम्भेनेदम् ॥ व्य-धिकरणगुणेति ॥ एतच्च प्रागेव व्याख्यातप्रायम् ॥ न चेति ॥ साधन-व्याप्तिवारणाय, मात्रेति ॥ तथाच चेष्टादावेव साधनाव्यापकत्वमि-ति भावः । न च मात्रपदं विनाऽपीश्वरज्ञानादिरूपव्यधिकरणगुण-जन्यशब्दजशब्दे साधनाव्याप्तिरिति वाच्यम् । मूर्त्तवृत्तित्वस्य कार्य-विशेषणस्य प्रागेवोक्तत्वात् । अन्यथा तत्रैव व्यभिचारापत्तेरिति ॥

इति श्रीमहामहोपाध्यायदेवदत्तात्मजमहामहोपाध्यायश्रीरुचिदत्त-कृतौ कुसुमाञ्जलिमकरन्दे प्रथमः स्तबकः ॥१॥

श्रीगणेशाय नमः ॥

# अथ सप्रकाशे न्यायकुसुमाञ्जलौ

## द्वितीयस्तबकः ॥ २ ॥

---

द्वितीयां विप्रतिपत्तिमुत्थापयितुं भूमिकामारचयति—

तदेवं सामान्यतः सिद्धे अलौकिके हेतौ तत्साधनेनावश्यं भवितव्यम्। न च तच्छक्यमस्मदादिभिर्द्रष्टुम् । न चादृष्टेन व्यवहारः । ततो लोकोत्तरः सर्वानुभावी सम्भाव्यते। ननु नित्यनिर्दोषवेदद्वारको योगकर्मसिद्धसर्वज्ञद्वारको वा धर्मसम्प्रदायः स्यात, किं परमेश्वरकल्पनयेति चेत्। अत्रोच्यते–

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ॥
तदन्यस्मिन्ननाश्वासान्न विधाऽन्तरसम्भवः॥ १ ॥

तथाहि। प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वे सति तद्विशेषत्वात्। अप्रमावत् । यदि च तावन्मात्राधीना भवेदप्रमाऽपि प्रमैव भवेत्। अस्ति हि तत्र ज्ञानहेतुः। अन्यथा ज्ञानमपि सा न स्यात्। ज्ञानत्वेऽप्यतिरिक्तदोषानुप्रवेशादप्रमेतिचेत् । एवं तर्हि दोषाभावमधिकमासाद्य प्रमापि जायेत। नियमेन तदपेक्षणात्। अस्तु दोषाभावोऽधिको, भावस्तु नेष्यते इतिचेत्। भवेदप्येवं, यदि नियमेन दोषैर्भावरूपैरेव भवितव्यम् । न त्वेवम् । विशेषादर्शनादेरभावस्यापि दोषत्वात्। कथमन्यथा ततः संशयविप-

यैयौ। ततस्तदभावो भाव एवेति कथं स नेष्यते ॥

तदेवमिति। तस्य च जन्यतया तत्कारणयागादिदर्शी कश्चित् स्वीकर्त्तव्य इत्यर्थः॥ न चेति॥ यागादिस्वर्गसाधनत्वस्यातीन्द्रियत्वादित्यर्थः। तदस्याभावे दोषमाह॥ न चेति॥ व्यवहारश्च यागादिस्वर्गसाधनताबोधकशब्दरूपः, अदृष्टाधिष्ठानरूपश्च। तदुभयमदृष्टसाक्षात्कारं विना न सम्भवतीत्यस्मदादिविलक्षणः सर्वज्ञः कल्प्यते इत्यर्थः।वेदवाक्यजज्ञानस्य हि प्रामाण्यमनिश्चित्य बहुधनव्ययायाससाध्ये यागादौ प्रवृत्तिर्न स्यात्। प्रामाण्यं च गुणजन्यं, गुणश्च शाब्दे ज्ञाने प्रयोगहेतुवाक्यार्थयथार्थज्ञानवत्त्वमिति भावः। अत्रासिद्धिमाह॥ नन्विति॥ वक्तृदोषेणाप्रामाण्यशङ्कया निष्कम्पप्रवृत्तिर्न स्यात्। सा च नित्यत्वादवक्तृके वेदे नास्तीति तत एव प्रामाण्यं, किं वक्तृगुणेनेत्यर्थः। वक्तृगुणजन्यत्वेऽप्यन्यथासिद्धिमाह॥ योगेति॥ योगकर्मभ्यां ये सिद्धाः सर्वज्ञास्त एव वेदकारा अदृष्टाधिष्ठातारश्चेति न नित्यसर्वज्ञसिद्धिरित्यर्थः। यद्यप्यन्यथासिद्धिरपि प्रमाणाभाव एव पर्यवस्यति, तथापि साक्षात् प्रमाणाभावोऽग्रे दूष्योऽन्यथासिद्धिद्वारा त्वत्रेत्यर्थभेदः॥

प्रमामात्रे गुणजन्यत्वासिद्धौ शाब्दप्रमायामपि तज्जन्यत्वासिद्धिर्भविष्यतीत्याशयेनाह॥ प्रमाया इति॥ अनित्यप्रमाया इत्यर्थः। ननु नित्यत्वाद् वेदानां, कर्तृजन्यत्वेऽपि महाजनपरिग्रहात् प्रामाण्यं निश्चित्य यागादौ प्रवृत्तिर्भविष्यतीत्यत आह॥ सर्गेति॥ तथा च वेदमहाजनयोरभावात् केन कस्य परिग्रह इति भावः। द्वितीयामन्यथासिद्धिं निरस्यति॥ तदन्यस्मिन्निति॥ अनित्यज्ञानवत्त्वेन भ्रमादिशङ्काकलङ्कितत्वेन नित्यसर्वज्ञपूर्वकत्वाद् न प्रकारकान्तरसम्भव इत्यर्थः॥

प्रामाण्यस्य गुणजन्यत्वं साधयति॥ प्रमेति॥ हेत्वधीनत्वे ज्ञानहेत्वधीनत्वे च साध्ये सिद्धसाधनं स्यात्। अतो ज्ञानहेत्वतिरिक्तहेत्वधीनेति साध्यम्॥ ननु प्रमाया ज्ञानत्वेन तद्धेतुजन्यत्वेन बाधः, ज्ञानाजनकजन्यत्वे विरोधः। अप्रमायां तदसिद्धेर्दृष्टान्तासिद्धिः, व्यर्थविशेष्यत्वं च। घटादावपि साध्यसत्त्वेन कार्य्यत्वस्यैव व्याप्तिमत्त्वात्। व्यर्थविशेषणत्वं च, व्यावर्त्येश्वरज्ञानस्य परं प्रत्यसिद्धेः।

नापि ज्ञानसामान्यहेत्वन्यहेतुजन्येति साध्यम्, उक्तदोषात् । ज्ञानसामान्यं च ज्ञानत्वं वा सर्वज्ञानव्यक्तयो वा ? । आद्ये हेत्वसिद्धिः । अन्त्ये इन्द्रियादिभिः सिद्धसाधनम् । नापि ज्ञानत्वावच्छिन्नकार्यत्वान्यकार्यत्वप्रतियोगिककारणजन्येति साध्यम् । ज्ञानत्वस्य नित्याऽनित्यवृत्तितया कार्यत्वानवच्छेदकत्वात् । जन्यत्वेन ज्ञानविशेषणे प्रत्यक्षाद्यात्मकज्ञानविशेषजनकैरिन्द्रियादिभिः सिद्धसाधनम् । अत एव, प्रमात्वं ज्ञानत्वावच्छिन्नकार्यत्वनिरूपितकारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकं, ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वात्, अप्रमात्ववदिति निरस्तम् । प्रमात्वस्य नित्यानित्यवृत्तित्वात् । अनित्यप्रमात्वं कार्यतावच्छेदकं कार्यमात्रवृत्तिधर्मत्वात्, अप्रमात्ववदित्यपि नीलघटत्वादिनाऽनैकान्तिकम् । तत्र विशेषद्वयकारणेनान्यथासिद्धत्वात् । प्रमाऽप्रमाकार्यवैचित्र्यं च, यथैकजातीयसामग्रीव्यक्तिभेदाद् घटद्वयं जायते तद्वदेव ज्ञानसामग्रीव्यक्तिभेदादुपपन्नम् । वैजात्यमपि तुल्यजातीयसामग्रीजन्यत्वेऽपि यमजवैधर्म्यवत् स्यात् । न च प्रमात्वावच्छिन्नकार्यत्वं कथमननुगतहेतुकमितिवाच्यम् । उक्तयुक्त्या तस्य कार्यतानवच्छेदकत्वात् । अनित्यप्रमा प्रमाऽप्रमोभयहेतुभिन्नहेतुजन्या जन्यत्वादप्रमावदिति चेन्न । कारणव्यक्तिभेदजन्यत्वेन सिद्धसाधनाद्, अप्रमायां तदसिद्धेश्च । न चाप्रमायां दोषजन्यत्वात्तथा । दोषस्य पित्तादेः स्वविषयप्रमायामपि हेतुत्वात् । अनित्यप्रमा स्वविरोध्यनुभवप्रतिबन्धकजन्या अनित्यानुभवत्वात् । अप्रमावत् । यद्वा, अनित्यप्रमा प्रमाऽप्रमाऽन्यतरप्रतिबन्धकजन्या प्रमाऽप्रमाऽन्यतरत्वादप्रमावदिति चेद्, न । प्रमाजनकासाधारणव्यक्तिविशेषस्याऽप्रमाप्रतिबन्धकत्वं प्रमाजनकत्वं चेति सिद्धसाधनात् ॥

अत्रास्मत्पितृचरणाः । एवमप्रमाऽपि स्वत एव स्याद्, न परतः । प्रमावदसाधारणकारणादेव तदुत्पत्तौ दोषस्य तद्धेतुत्वापत्तेः । यदि च ज्ञानसामग्र्यां सत्यां विशेषादर्शनादेर्दोषस्यान्वयाद्यनुविधानाद्दोषो हेतुः, तर्हि विशेषदर्शनादेर्गुणस्यान्वयाद्यनुविधानात् प्रमायामपि गुणो हेतुरिति तुल्यम् । अपि च, यत्कार्यं यत्कार्यविजातीयं तत् तत्कारणविजातीयकारणजन्यं, यथा घटविजातीयः पटः । अन्यथा कार्यवैजात्याकस्मिकत्वापत्तेः । घटज्ञानमपि कार्यं तद्विजातीयकार्यकारणविजातीयकारणजन्यमिति न व्यभिचारः । एवं प्रागुक्ता-

ऽनुमानेष्वपि न सिद्धसाधनम् । अनुगतस्य प्रमाहेतुत्वेनासाधारण-व्यक्तिभेदस्याहेतुत्वात्।एवमनित्यप्रमात्वमनित्यज्ञानत्वावच्छिन्नकार्य-त्वप्रतियोगिककारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकम् । अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वाद् अप्रमात्ववदित्यनित्य-प्रमायामप्रमासाधारणहेतुव्यावृत्तानुगतहेतुसिद्धिः ॥ यदीति ॥ यद्य-प्यप्रमायां प्रमात्वापादने प्रमावृत्ति ज्ञानमात्रहेत्वधीनत्वं व्यधिकरणं, तथापि प्रमात्वं यदि ज्ञानसामग्रीमात्रप्रयोज्यवृत्ति स्याद् अप्रमावृत्ति स्याद् अप्रमात्ववदित्यापादनीयम् । अप्रमायाः प्रमित्यजनकदोष-जन्यत्वादापादकमसिद्धमित्याह ॥ ज्ञानत्वेऽपीति ॥ तर्हि प्रमात्व-मपि न ज्ञानमात्रसामग्रीप्रयोज्यम्, अतिरिक्तदोषाभावापेक्षणादित्याह एवन्तर्हीति ॥ युक्तञ्चैतत् । अन्यथा प्रमासामग्र्यामधिकदोषा-ऽनुप्रवेशादप्रमाऽपि प्रमाविशेषः स्यात्,वृक्षसामग्र्यामधिककारणा-ऽनुप्रवेशाच्छिंशपावृक्षविशेष इवेति भावः॥अस्त्विति॥ न चैवमप्रमि-त्यजनकजन्यत्वे परतस्त्वमिति वाच्यम् । आगन्तुकभावानपेक्षज्ञान-सामग्रीजन्यत्वमेव स्वतस्त्वमिति विवक्षितत्वात् । तथाच गुणा-जन्यत्वेन प्रमाया नेश्वरसिद्धिः ॥ भवेदप्येवमिति ॥ ननु पीतः शङ्ख इत्यत्र विशेषदर्शनेऽपि भ्रमाद्यभिचारेण न विशेषादर्शनं भ्रमहेतुः,यत्र वा विशेषदर्शनमपि भ्रमस्तत्र तज्जन्यज्ञानस्यापि भ्रमत्वान्न विशेष-दर्शनं प्रमात्वप्रयोजकम् । मैवं, यद्विशेषदर्शनं हि भ्रमविरोधि तद-भावोऽप्रमाहेतुः । प्रत्यक्षभ्रमे च प्रत्यक्षं विशेषदर्शनं विरोधि । दिङ्-मोहादौ गौरोऽहमिति भ्रमे च तथा दर्शनात्।तच्च दोषात् तत्र नास्ति, प्रमारूपमेव च विशेषदर्शनं गुण इति तदभाव एव दोषः ॥

ननु विशेषादर्शनं न दोषः, किन्तु विशेषदर्शनप्रतिबन्धकाः पित्तादयो दोषाः, आवश्यकत्वात् । नच तेषां नानात्वेन विशेषदर्शन-प्रतिबन्धकतयाऽनुगमे लाघवाद्विशेषादर्शनमेव हेतुरिति वाच्यम् । क्वचित् कश्चिद्दोष इत्यनुगमात्।अन्यथा पित्तादितोऽप्यप्रमा न स्यात्, अननुगमात् । पित्ताद्युत्कर्षेण भ्रमोत्कर्षाच्च । पित्तादेरदोषत्वे च विशेषप्रमैव कुतो न भवति । यदि च विशेषस्य विशेषान्तरादर्शना-त्, तदाऽनवस्था । किञ्च, विशेषदर्शनं न प्रमामात्रे, न वा प्रत्यक्ष-प्रमायां हेतुः, व्यभिचारात् । तत्रैव तद्धेतुत्वेनानवस्थानाच्च ।

मैवम् । प्रमामात्राहेतुत्वेऽपि संशयविपर्ययोत्तरप्रमायां तस्य

हेतुत्वात् ।तत्र विशेषादर्शनस्य दोषत्वेनान्यत्रापि तथात्वात् ।पित्ता-द्युत्कर्षस्यापि भूयोविशेषप्रतिबन्धकत्वेनान्यथासिद्धत्वात् ॥

ननु प्रत्यक्षप्रमादौ गुणजन्यत्वेऽपि वेदे भ्रमाद्यभावचतुष्टयं प्रमाहेतुः । लोके भ्रमाद्यभाव एव प्रमोत्पत्तेः । न तु वक्तृवाक्यार्थ यथार्थज्ञानवत्त्वादिर्गुण इत्याह—

स्यादेतत् । शब्दे तावद्विप्रलिप्सादयो भावा एव दोषाः । ततस्तदभावे स्वत एव शाब्दी प्रमेति चेन्न । अनुमानादौ लिङ्गविपर्यासादीनां भावानामपि दोषत्वे तदभावमात्रेण प्रमाऽनुत्पत्तेः । अन्यत्र यथा तथाऽस्तु, शब्दे तु विप्रलिप्साद्यभावे वक्तृगुणापेक्षा नास्तीतिचेन्न । गुणाभावे तदप्रामाण्यस्य वक्तृदोषाऽपेक्षा नास्तीति विपर्ययस्यापि सुवचत्वात् ।अप्रामाण्यं प्रति दोषाणामन्वयव्यतिरेकौ स्त इतिचेन्न । प्रामाण्यं प्रत्यपि गुणानां तयोः सत्त्वात् । पौरुषेयविषये इयमस्तु व्यवस्था, अपौरुषेये तु दोषनिवृत्त्यैव प्रामाण्यमितिचेन्न । गुणनिवृत्त्याऽप्रामाण्यस्यापि सम्भवात् । तस्या अप्रामाण्यं प्रति सामर्थ्यं नोपलब्धमितिचेत् । दोषनिवृत्तेः प्रामाण्यं प्रति क्व सामर्थ्यमुपलब्धम् ? । लोकवचसीतिचेत् । तुल्यम् । तदप्रामाण्ये दोषा एव कारणं, गुणनिवृत्तिस्त्ववर्जनीयसिद्धसन्निधिरितिचेत् । प्रामाण्यं प्रति गुणेष्वपि तुल्यमेतत् । गुणानां दोषोत्सारणप्रयुक्तः सन्निधिरितिचेद् दोषाणामपि गुणोत्सारणप्रयुक्त इत्यस्तु । निःस्वभावत्वमेवमपौरुषेयस्य वेदस्य स्यादितिचेत्, आत्मानमुपालभस्व । तस्माद्यथा द्वेषरागाभावाऽविनाभावेऽपि रागद्वेषयोरनुविधाननियमात् प्रवृत्तिनिवृत्तिप्रयत्नयो रागद्वेषकारणकत्वं,

न तु निवृत्तिप्रयत्नो द्वेषहेतुकः,प्रवृत्तिप्रयत्नस्तु सत्यपि रागानुविधाने द्वेषाभावहेतुक इति विभागो युज्यते, विशेषाभावात् । तथा प्रकृतेऽपि । तथापि वेदानामपौरुषेयत्वे सिद्धे, अपेतवक्तृदोषत्वादेव प्रामाण्यं सेत्स्यति । ततः सिद्धे प्रामाण्ये गुणाभावेऽपि तदिति दोषाभाव एव हेतुरकारणं गुणा इतिचेन्न। अपेतवक्तृगुणत्वेन सत्प्रतिपक्षत्वप्रसङ्गात् । स्वत एव प्रामाण्यनिश्चयः । किन्तु शङ्कामात्रमनेनापनीयते । दोषनिबन्धनत्वात्तस्य तदभावेऽभावात् । अतो नेदमनुमानवत् सत्प्रतिसाधनीकर्तुमुचितमिति चेत् । न । गुणनिवृत्तिनिबन्धनायाः शङ्कायाः सुलभत्वात् । तस्याः केवलाया अप्रामाण्यं प्रत्यनङ्गत्वान्न शङ्केतिचेद्, दोषनिवृत्तेरपि केवलायाः प्रामाण्यं प्रत्यनङ्गत्वान्न तया शङ्कानिवृत्तिरिति तुल्यमिति ॥

स्यादेतदिति ॥ लिङ्गसादृश्यादिभ्रमरूपदोषाभावमात्रान्नानुमित्यादिः प्रमेति लिङ्गसादृश्यादियथार्थज्ञानमपि गुणस्तद्धेतुरिति शाब्दप्रमायामपि दोषाभावे सति यथार्थवाक्यार्थज्ञानं गुणो हेतुरित्याह ॥ अनुमानादाविति ॥ ननु यथार्थवाक्यार्थज्ञानादौ गुणे सत्यऽपि करणापाटवाद् यत्रान्याभिधित्सिते अन्यद् ब्रूते तत्र वाक्यं न प्रमाणम् । दोषाभावस्य तु प्रमाहेतुत्वे करणापाटवान्न सोऽस्तीति तत्र न प्रामाण्यमुपपद्यते इति शङ्कते ॥ अन्यत्रेति ॥ वक्तृदोषे सत्यऽपि भ्रान्तविप्रलम्भकवाक्ये संवादात् प्रामाण्यदर्शनाद्दोषोऽपि नाऽप्रामाण्यप्रयोजकः । तात्पर्यविषये त्वप्रामाण्यमेवेति प्रामाण्येऽपि तुल्यमिति परिहरति ॥ गुणाभाव इति ॥ निःस्वभावत्वमिति ॥ वेदे प्रमाणत्वाप्रमाणत्वप्रयोजकगुणदोषयोरभावादित्यर्थः ॥ तस्मादिति॥ यथा प्रवृत्तौ द्वेषाभावहेतुकत्वे निवृत्तौ रागाभावहेतुकत्वे सत्यपि उपेक्षाज्ञानादपि प्रवृत्तिनिवृत्ती स्यातामिति रागद्वेषयोः प्रवृत्तिनिवृ-

सिद्धेतुत्वमित्येकैकाभावोऽन्यथासिद्धः, तथा प्रमाऽप्रमयोरपि गुणदोषौ, न तु दोषाभावगुणाभावावित्यर्थः । नन्वन्यत्र गुणस्य प्रमाहेतुत्वेऽपि वेदस्यापौरुषेयतया वक्तृगुणाभावाद्दोषाभावमात्रप्रयुक्तमेव प्रामाण्यमिति प्रामाण्ये गुणस्य व्यभिचाराद् न हेतुत्वं, किन्तु दोषाभावस्यैवेत्याह ॥ तथापीति ॥ सिद्धिर्ज्ञप्तिः ॥ सिद्धे निश्चिते ॥ वेदाः प्रमाणम् । अपेतवक्तृदोषत्वादित्यनुमानादित्यर्थः । अत्र वेदा न प्रमाणम्, अपेतवक्तृगुणत्वादिति सत्प्रतिपक्षमाह ॥ अपेतेति ॥ ज्ञानग्राहकादेव प्रमात्वं स्वीक्रियते, दोषाधीना तु शङ्का अपेतवक्तृदोषत्वादेव निरस्येत्याह ॥ स्वत एवेति ॥ तथापि गुणाभावहेतुकोऽप्रामाण्यसंशयस्तदवस्थ एवेत्याह ॥ गुणनिवृत्तीति ॥ तस्या इति ॥ दोषसहितगुणनिवृत्तेरेवाऽप्रमात्वहेतुत्वादित्यर्थः ॥ दोषेति ॥ गुणसहितदोषनिवृत्तेरेव प्रमात्वप्रयोजकत्वादित्यर्थः ॥

ननु तथापि शुकादिवाक्यं भ्रान्तप्रतारकवाक्यं च संवादि कथं प्रमाणं, गुणाजन्यत्वात् । धूमभ्रमाद्वह्निमत्येव वह्न्यनुमितिर्वा कथं प्रमा। यथार्थलिङ्गज्ञानाजन्यत्वात्। न च वह्न्यन्तरमेव तद्विषयः। प्रत्यभिज्ञानात् । गोत्वाद्येकव्यक्तिके तदभावाच्च । उच्यते । शुकादिवाक्ये भ्रान्तप्रतारकवाक्ये च प्रमाणशब्दत्वेनाप्तोक्तत्वाद्वेदवदीश्वरस्यैव यथार्थवाक्यार्थज्ञानं गुणो हेतुः । तस्य कार्यमात्रकर्तृत्वात् । शुकादिवाक्ये वेदतुल्यतया दोषाभावादिनाऽपि मन्तव्यत्वात् । न चैवं शब्दाभासोच्छेदः, तस्यापीश्वरकर्तृकत्वादिति वाच्यम्। तद्वाक्यार्थस्यासत्त्वेनेश्वरज्ञानाविषयत्वात् । एवं लिङ्गाभासजन्यप्रमायामपीश्वरस्यैव यथार्थलिङ्गज्ञानं गुणः ॥

एवं प्रमाया गुणजन्यतया शब्दप्रमाया अपि गुणजन्यतया वेदे वक्त्रन्तरस्याभावात् तदाश्रयेश्वरसिद्धिरित्युक्तम् । संप्रति प्रमात्वग्रहोऽपि न स्वतः,अपि तु परत इति वैदिकप्रमाया अपि तत्त्वमाप्तोक्तवाक्यजन्यत्वेन ग्राह्यमिति ततोऽपीश्वरः सिद्ध्यतीत्याह— •

**एवं प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् । अप्रामाण्यवत् । यदि तु स्वतो ज्ञायेत, कदाचिदपि प्रामाण्यसंशयो न स्यात् । ज्ञानत्वसंशय-**

वत् । निश्चिते तदनवकाशात् । न हि साधकबाधक-
प्रमाणाभावमवधूय समानधर्मादिदर्शनादेवासौ । त-
था सति तदनुच्छेदप्रसङ्गात् । अथ प्रमाणवदप्रमाणे-
ऽपि तत्प्रत्ययदर्शनाद्विशेषादर्शनाद्भवति शङ्केत्यभि-
प्रायः, तत् किं प्रमाणज्ञानोपलम्भेऽपि न तत्प्रामाण्य-
मुपलब्धं, प्रमाणज्ञानमेव वा नोपलब्धम् ? आद्ये, कथं
स्वतः प्रामाण्यग्रहः, प्रत्ययप्रतीतावपि तदप्रतीतेः ।
द्वितीये, कथं तत्र शङ्का । धर्मिण एवानुपलब्धेरिति ।
यदपि झटिति प्रचुरतरसमर्थप्रवृत्त्यन्यथाऽनुपपत्त्या
स्वतः प्रामाण्यमुच्यते, तदपि नास्ति । अन्यथैवोप-
पत्तेः । झटिति प्रवृत्तिर्हि झटिति तत्कारणोपनिपात-
मन्तरेणानुपपद्यमाना तमाक्षिपेत्।प्रचुरप्रवृत्तिरपि स्व-
कारणप्राचुर्यम्, इच्छा च प्रवृत्तेः कारणम् । तत्कारण-
मपीष्टाभ्युपायताज्ञानम् । तदपि तज्जातीयत्वलिङ्गा-
ऽनुभवप्रभवम् । सोऽपीन्द्रियसन्निकर्षादिजन्मा, न
तु प्रामाण्यग्रहस्य क्वचिदप्युपयोगः । उपयोगे वा
स्वत एवेति कुत एतत् ? । ततः समर्थप्रवृत्तिप्राचुर्य-
मपि प्रामाण्यप्राचुर्यात्तद्ग्रहणप्राचुर्याद्वा । स्वतस्त्वं
तु तस्य क्वोपयुज्यते । न हि पिपासूनां झटिति प्रचुरा
समर्था च प्रवृत्तिरम्भसीति पिपासोपशमनशक्ति-
स्तस्य प्रत्यक्षा स्यात् ॥

एवमिति ॥ अत्र यद्यपि ज्ञानप्रामाण्यं ज्ञानग्राहकसामग्रीग्राह्यं ? न वेति न संशयः । परतःपक्षेऽपि ज्ञानस्यापि पक्षतया प्रमात्वानुमिते-र्ज्ञानग्राहकत्वात् । अप्रामाण्यस्यापि स्वतोग्राह्यत्वापत्तेश्च । तथापि त-ज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यं न वेति संशयः । स्वतःपक्षे प्रामाण्य-वत एव ज्ञानस्य ग्रहात् । परतःपक्षे ज्ञात एव ज्ञानेऽनुमित्या प्रामाण्य

ग्रहात् तत्र तेनैव प्रामाण्यग्रह इति प्राभाकराः । ज्ञानस्यातीन्द्रियतया तदनुमित्या तद्ग्रह इति भाट्टाः । मनसैव ज्ञानस्वरूपवत् तत्प्रामाण्यग्रह इति मुरारिमिश्राः । त्रितयसाधारणं च स्वतस्त्वं निरुक्तमेव ॥

पूर्वपक्षस्तु, यद्यपि विशेष्यावृत्त्यप्रकारकत्वम् अगृहीतग्राह्यत्वं वा प्रभाकरपक्षे स्मृत्यन्यज्ञानत्वं विशिष्टज्ञानत्वं वा प्रामाण्यं नानुव्यवसायग्राह्यम् । विशेषणज्ञानं विना विशिष्टज्ञानाभावात् । तथापि तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यं ग्राह्यम् । निष्कम्पप्रवृत्त्यङ्गत्वाल्लाघवाच्च । तच्च ज्ञानग्राहकसामग्रीग्राह्यमेव । तथा हि । विशेष्ये तद्धर्मवत्त्वं तत्प्रकारकत्वं च व्यवसायस्यानुव्यवसायेन गृह्यते । ज्ञानस्य विषयनिरूप्यतया ज्ञानवित्तिवेद्यो विषय इति व्यवसाये भासमाने धर्मधर्मिवत्तद्वैशिष्ट्यमपि विषयः । व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् । अत एव रजतत्वेन पुरोवर्तिनं जानामीति तदाकारः । अन्यथा, पुरोवर्त्तिनं रजतञ्च जानामीति तदाकारापत्तिः । अप्रामाण्यं तु परतो ज्ञायते । तदभाववत्त्वस्य भ्रमानुल्लिखितत्वेनानुव्यवसायाविषयत्वात् । न चैवमनुव्यवसायस्य यावद्व्यवसायविषयविषयकत्वे भ्रान्तभ्रान्तिज्ञसङ्करः, भ्रमानवतारदशायामिष्टत्वात् तदवतारे तस्यैव प्रतिबन्धकत्वादिति

तत्र सिद्धान्तमाह ॥ एवमिति ॥ अनभ्यासदशायमिति भागासिद्धिवारणार्थम् । न तु व्यभिचारनिरासार्थम् । परतो ज्ञेयत्वस्य केवलान्वयित्वात् । ननु स्वस्याप्यन्यापेक्षया परत्वाद् भट्टमते ज्ञानाऽनुमितिग्राह्यत्वाच्च सिद्धसाधनम् । परतो ग्राह्यत्वेऽपि कदाचित् स्वतोग्राह्यत्वाविरोधाद् अर्थेन व्यभिचारश्च । तस्य तज्ज्ञानग्राह्यस्य ज्ञानप्रामाण्यसन्देहेन सन्दिह्यमानत्वात् । न च ज्ञानत्वेन हेतुर्विशेषणीयः । ज्ञानविषयकज्ञानप्रामाण्यसन्देहाहितज्ञानरूपार्थसन्देहेऽपि तस्य निश्चितत्वेन तथापि व्यभिचारात् । उच्यते । अनभ्यासदशोत्पन्नज्ञानप्रामाण्यं न स्वाश्रयग्राह्यं तदन्यग्राह्यं वा । स्वाश्रये सत्यपि तदुत्तरतृतीयक्षणवृत्तिसंशयविषयत्वात् । प्रामाण्यसंशयाजन्यसंशयविषयत्वाद्वा । अप्रामाण्यवत् । अर्थे निश्चितेऽपि न निश्चयानन्तरतृतीयक्षणेऽर्थसंशयो न वा प्रामाण्यसंशयं विनेति नार्थेन व्यभिचारः । स्वशब्दस्य सम्बन्धिशब्दत्वेन समभिव्याहृतपरत्वान्न स्वस्य परत्वम् । यच्चोक्तं यावद्व्यवसायोल्लिखितप्रकारविशिष्ट एव

धर्म्यनुव्यवसाये भासते। तन्न। तथाहीदं रजतञ्च जानामीति नानु-व्यवसायः। बहिर्विशेष्यके मनसोऽस्वातन्त्र्यात्। किं त्विदमिदन्त्वेन। रजतत्वेन जानामीति। तत्रेदन्त्वरजतत्वे प्रकारत्वेन, तत्प्रकारकज्ञान-वत्त्वञ्चात्मनि भासते, अन्यथा प्रकारवाचितृतीयाऽर्थासम्भवः। न च रजतत्ववैशिष्ट्यमेव तृतीयार्थः, व्यवसायेऽपि तदुल्लेखापत्तेः। अतः, इदन्त्वरजतत्ववैशिष्ट्यं पुरोवर्त्तिनो नानुव्यवसायविषय इति कुतः स्वतः प्रामाण्यग्रहः॥

ननु परतः प्रामाण्यपक्षेऽपि परस्य शब्दादेरभावेऽनुमानं वाच्य-म्। तच्च लिङ्गाभावादसम्भवि। समर्थप्रवृत्तिजनकत्वं लिङ्गमिति चेन्न। कारणतावच्छेदकरूपग्रहं विना तद्ग्रहात्। तद् यदि प्रमात्व-मेव, तदाऽऽत्माश्रयः। अन्यच्चेत्, तदेव प्रामाण्ये लिङ्गमस्तु। उप-जीव्यत्वात्। न च तृणारणिमणिन्यायेन व्यक्तावेव कारणत्वं गृहीत्वा समर्थप्रवृत्तिजनकत्वग्रहः। ग्राहकाभावात्। न च प्रत्यक्षमेव तद्-ग्राहकम्। तद्धि न बहिरिन्द्रियजन्यम्। आन्तरत्वात्। नापि मान-सम्। तद्धि समर्थप्रवृत्तेः प्रागुत्तरकालं वा?। नाद्यः। समर्थप्रवृत्ते-रभावात्तद्वैशिष्ट्याग्रहात्। नान्त्यः। ज्ञानस्य नष्टत्वेन मनसा प्रत्या-सत्त्यभावात्। नाऽपि तज्जातीयत्वं लिङ्गम्। तद्धि करचरणवति शरीरज्ञानत्वादि। तत्र करचरणाद्यन्तरवति करचरणाद्यन्तरवत्त्व-ज्ञाने व्यभिचारः। तत्रापि शरीरांशे प्रमात्वमेवेति चेत्। तर्हि, कर-चरणादीति व्यर्थम्। शरीरभ्रमेऽपि कस्याश्चिच्छरीरव्यक्तेर्भानात्, तत्र तस्य प्रामाण्यात्। अन्यथा शरीरत्वस्यैव भानायोगात्। कर-चरणादिशून्ये यच्छरीरत्वेन ज्ञानं तद्व्यावृत्त्यर्थं तदितिचेत्। कर-चरणादिमत्त्वमुपलक्षणं विशेषणं वा?। नाद्यः। व्यावृत्त्योपलक्ष्या-भावात्। नान्त्यः। विषयतया हि न ज्ञानविशेषणत्वं करचरणवत्त्व-प्रकारकज्ञानविषयत्वस्य व्यभिचारात्। अशरीरेऽपि तादृशभ्रम-सम्भवात्। शरीरज्ञाने तदसिद्धेश्च। विषयविशेषणत्वे च करचरण-वद्विषयकशरीरज्ञानत्वस्य व्यभिचारात्। शरीरभ्रमस्यापि वस्तुतः करादिमद्विषयत्वात्। न च करचरणशून्ये यच्छरीरत्वेन ज्ञानं न भवतीति विवक्षितम्। तृतीयार्थस्य विषयत्वे स्वरूपासिद्धेः। शरीर-ज्ञानस्य तच्छून्यशरीरत्वादिविषयकत्वनियमात्॥

अत्राहुः। समर्थप्रवृत्तिजनकत्वं प्रवृत्त्युत्तरकालं संस्कारोपनीत-

ज्ञाने प्रमेयत्वाभिधेयत्वव्याप्तिवद् गृह्यते । यद्वा । पूर्वं पृथिवीज्ञाने पृथिवीत्वप्रकारकनिश्चयत्वानुव्यवसितौ कदाचित् तत्रैव गन्धस्य तद्विरोधिविरहस्य साक्षात्कारे पुनः स्मृतिरूपे पृथिवीज्ञाने सति तत्सन्निकृष्टेन प्रत्यभिज्ञान इव विशेषणज्ञानजनितसंस्कारापेक्षेण मनसा गन्धवत्येवाऽयं निश्चय इत्याकारेण सुरभि चन्दनमिति चाक्षुषवज्ज्ञानजननाच्च ग्राहकाभावाद्धेत्वसिद्धिः । तज्जातीयत्वमपि करचरणवद्विशेष्यकशरीरत्वप्रकारकज्ञानकत्वादि । शरीरभ्रमे करचरणवतो विशेषणत्वात् । प्रथमं च प्रामाण्यानुमितिः केवलव्यतिरेकिणा ॥

ननु प्रामाण्यप्रसिद्धिं विना व्याप्त्यग्रहात् कथमनुमानम् ? अथ, व्याघातात् प्रमातद्विषयसिद्धौ सामान्यतः साध्यप्रसिद्ध्या न तदऽप्रसिद्धिः । विशिष्यानिर्णयाच्च नान्वयित्वासाधारणत्वे इति चेत् । तर्हि कस्यापि प्रथमं स्वार्थे प्रामाण्यानुमितिर्न स्यात् । प्रामाण्यनिषेधरूपस्य परकीयव्याघातस्य तदाऽनुपस्थितेः । स्वयं प्रामाण्यनिषेधस्य च तद्धीपूर्वकत्वात् । मैवम् । प्राग्भवीयसंस्काराद्विशेष्यावृत्त्यप्रकारकत्वं तद्वति तत्प्रकारकज्ञानत्वं वा प्रामाण्यमात्रं स्मृतं, पृथिवीज्ञानादौ साध्यमानं सर्वनाममहिम्ना पक्षधर्मताबलात् पृथिवीज्ञानस्य विशेष्यावृत्त्यकारकत्वादौ पर्यवस्यति । स्वतः प्रामाण्यनिषेधे प्राथमिकप्रामाण्यज्ञानस्यान्यथोपपादयितुमशक्यत्वादिति साम्प्रदायिकाः ।

अस्मत्पितृचरणास्तु– प्रथमं प्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यम् । तत एव निष्कम्पप्रवृत्तेरुपपत्तेः । तदेव वा सिद्ध्यत् पक्षधर्मताबलेन तद्वति तत्प्रकारकनिश्चयत्वादिकमादाय सिध्यति । तथाहि । अयं पृथिवीत्वेनानुभवो न पृथिवीत्वाभाववति पृथिवीत्वप्रकारकः । गन्धवद्विषयकप्रयत्नजनकपृथिवीत्वप्रकारकज्ञानत्वात् । यन्नैवं तन्नैवम् । यथा पृथिवीभ्रमः । एवञ्च पृथिवीभ्रमे पृथिवीत्वाभाववति पृथिवीत्वप्रकारकत्वसमर्थप्रवृत्तिजनकत्वाभावयोर्व्याप्तिग्रहादप्रामाण्यव्यापकहेत्वभावाभावरूपाद्धेतोरप्रामाण्याभावरूपं साध्यं सिद्ध्यति । यद्व्यापकतया हेत्वभावो गृहीतस्तदभाव एव हि हेतुना साध्यते । यत्र त्वभावव्यापकता हेत्वभावस्य ज्ञायते, तत्र साध्यप्रसिद्धिरनुमानाङ्गम् । तां विना तदभावात् । यत्र च भावव्यापकता हेत्वभावस्य, तत्र न साऽङ्गम् । तां विनाऽपि व्यतिरेकव्याप्तिग्रहात् ।

विशेषणज्ञानं विना कथं प्रामाण्यविशिष्टाऽनुमितिरितिचेत् । प्रथमं न कथञ्चित् । ज्ञाने प्रामाण्यमित्यनुमित्यनन्तरं तेनैव हेतुना तत्र प्रामाण्यविशिष्टानुमितिः । अभावविशेष्यकज्ञानानन्तरम् अभाववद् भूतलमितिज्ञानवत् । एवं तदभाववति तत्प्रकारकत्वव्यतिरेकः सिद्ध-स्तद्वति तत्प्रकारकत्वमादाय पक्षधर्मताबलेन सिध्यतीति तत्त्व-चिन्तामणावाहुः ॥कदाचिदपीति॥ प्रामाण्यग्रहोत्तरकालमिव तत्पूर्व-मपीत्यर्थः । न च ज्ञानत्वस्य साधारणधर्मस्य ज्ञानमात्रात् इत्याह ॥ न हीति॥प्रामाण्यज्ञानमात्रं न विरोधि,अपि तु प्रमाणमेवेत्यवधारणा-ऽऽत्मकमित्याशयेन शङ्कते ॥ अथेति ॥ निश्चयमात्रमेव संशयविरोधि, न तु तद्विशेषोऽवधारणमित्याशयेन परिहरति ॥तत्किमिति॥ प्रमाणे-ति ॥ प्रमाणरूपं ज्ञानमित्यर्थः ॥ तदप्रतीतेः – प्रामाण्याप्रतीतेः ॥

धर्मिण एवेति ॥ ननु धर्मिज्ञानं न संशयहेतुः । कोटिस्मरण-विशेषादर्शनधर्मीन्द्रियसन्निकर्षात् प्रामाण्यसंशयरूप एव ज्ञानग्रह उत्पद्यते । अन्यत्र विशिष्टज्ञाने विशेष्यज्ञानस्याहेतुत्वात् । अत्राहुः । तुरगादौ वेगेन गच्छतस्तद्विषयेन्द्रियसन्निकर्षेऽपि यावद्विषयाज्ञाने यदेव धर्मि ज्ञायते तत्रैव विशेषादर्शनादितः संशयो जायते, न त्वज्ञाते धर्मिणीति धर्मिज्ञानं तद्धेतुः । किञ्च, यद्धर्मिगतसाधारणधर्मस्य येन सह भूयः सहचारावसायस्तत्रोत्कटकोटिकता संशयस्य धर्मिज्ञान-स्याहेतुत्वे न स्यात् ॥

यदपीति ॥ प्रामाण्यस्यानुमेयत्वे लिङ्गपरामर्शापेक्षया विलम्बः स्यादित्यर्थः । तथाचार्थापत्त्या परतस्त्वसाधनं प्रतिबद्धमिति भावः ॥ अन्यथैवेति ॥ प्रवृत्तिमात्रे प्रामाण्यग्रहो न हेतुः, अर्थसन्देहादपि प्रवृत्तेरित्यन्यथोपपत्तेरित्यर्थः ॥ उपयोगे वेति ॥ झटित्यभ्यासापन्न-लिङ्गानुसन्धानादप्युपपत्तेरित्यर्थः ।।परमतेऽपि व्यभिचारमाह ॥ न ही-ति ॥ न ह्यविलम्ब इत्येव लिङ्गानपेक्षता । तथा सति पिपासोप-शमनशक्त्यनुभवस्याप्यलैङ्गिकत्वप्रसङ्ग इत्यर्थः ॥

**स्यादेतत् । प्रामाण्यग्रहे सति सर्वमेतदुपपद्यते । स च स्वतो यदि न स्याद्, न स्यादेव; परतः पक्षस्या-ऽनवस्थादुःस्थत्वादिति चेन्न । तदग्रहेऽप्यर्थसन्देहादपि**

सर्वस्योपपत्तेः । न चानवस्थाऽपि, प्रामाण्यस्यावश्य-ज्ञेयत्वानभ्युपगमात् । अन्यथा स्वतः पक्षेऽपि सा स्यात्। लिङ्गं निश्चितमेव निश्चायकम् । ततस्तन्निश्चयार्थमवश्यं लिङ्गान्तरापेक्षायामनवस्थेति चेत् । तत् किमनुपपद्य-मानोऽर्थोऽनिश्चित एव स्वोपपादकमाक्षिपति, येना-ऽनवस्था न स्यात् । प्रत्यक्षेण तस्य निश्चयात्तस्य च सत्त-यैव निश्चायकत्वान्नैवमिति चेत् । ममापि प्रत्यक्षेण लिङ्गनिश्चयात्तस्य च सत्तयैव निश्चायकत्वान्नैवमिति तुल्यम् । लिङ्गज्ञानस्य प्रामाण्यानिश्चये कथं तन्नि-श्चयः स्यादिति चेत् । अनुपपद्यमानार्थज्ञानप्रामाण्या-ऽनिश्चये कथं तन्निश्चय इति तुल्यम् । न हि निश्चयेन स्वप्रामाण्यनिश्चयेन वा विषयं निश्चाययति प्रत्यक्षम्, अपि तु स्वसत्तयेत्युक्तमितिचेत् । तुल्यम् । तथापि यदि तल्लिङ्गाभासः स्यात्तदा का वार्त्तेतिचेत् । अनुप-पद्यमानोऽप्यर्थो यद्याभासः स्यात् तदा का वार्त्तेति तुल्यम् । सोऽपि प्रामाण्यमाक्षिपतीत्युत्सर्गः । स च क्वचिद्बाधकेनापोद्यते इतिचेत् । लिङ्गेऽप्येवमिति तुल्य-म् । तर्हि प्रामाण्यानुमानेऽपि शङ्का तदवस्थैवेति नि-ष्फलः प्रयास इतिचेत् । एतदपि तादृगेव । अनुप-पद्यमानोऽर्थ एवासौ तथाविधः कश्चिद्, यः स्वप्नेऽपि नाभासः स्यात्ततो नाशङ्केतिचेत् । लिङ्गेऽप्येवमिति समः समाधिः । कः पुनरसावर्थो यः स्वप्नेऽपि नाभासः स्यात्, यदनुपलम्भे विभ्रमावकाशो यादृगुपलम्भे च तद्बाधव्यवस्था । अन्यथा हि, तथाभूतस्यापि व्यभि-चारे साऽपि न स्यात् । मा भूदितिचेन्न, भवितव्यं हि

**तत्त्वातत्त्वविभागेन । अन्यथा व्याघातात् । कथं हि नियामकनिःशेषविशेषोपलम्भेऽपि विपरीतारोपः ? तथा भावे वा तदतिरिक्तविशेषानुपलम्भे कथं बाधकम् । तदभावे त्वबाधस्य कथं भ्रान्तत्वमिति ॥**

सर्वमेतदिति॥झटिति प्रवृत्त्यादिकमित्यर्थः॥स चेति॥यद्यगृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यनिश्चायकमास्थेयं, तदा व्यवसायोऽप्यगृहीतप्रामाण्य एव विषयं निश्चाययतु, किं तत्प्रामाण्यग्रहेण । यदि च तस्याप्रामाण्यसंशयान्न तन्मात्रादर्थनिश्चयस्तर्हि प्रामाण्यानुमितेरप्रामाण्यसंशयान्न ततोऽपि प्रामाण्यनिश्चयः । ततस्तस्या अपि प्रामाण्यनिश्चयावश्यकत्वेनानवस्था । एवं, लिङ्गव्याप्त्यादिज्ञानानामपि प्रमाण्यानिश्चये हेत्वाद्यसिद्धिः, तन्निश्चये चानवस्था । न हि, न लिङ्गादिज्ञाने प्रामाण्यसंशयोऽनुभवविरोधात् । तथा च, परिशेषात् स्वतः प्रामाण्यग्रह इत्यर्थः॥तद्ग्रहेऽपीति॥न तज्ज्ञानप्रामाण्यनिश्चयादेवाऽर्थनिश्चयः, किन्तु न यत्राप्रामाण्यशङ्का करतलादिज्ञाने, तत्र व्यवसाय एवार्थनिश्चय इति तत एव निष्कम्पप्रवृत्त्युपपत्तिरिति न प्रामाण्यानुमितिलिङ्गादिज्ञानानामपि प्रामाण्यानुसरणमिति नानवस्थेत्यर्थः । तथाप्यनभ्यासदशापन्नज्ञानप्रामाण्यसंशयेनार्थनिश्चयस्य परिभवात् तत्प्रामाण्यानुसरणेऽनवस्थेत्यत आह॥न चेति॥अगृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यं निश्चाययति, अप्रामाण्यशङ्काकलङ्काभावात् । यत्र प्रामाण्यज्ञानेऽप्यप्रामाण्यशङ्कया प्रामाण्यसंशयः, तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः । एवं, यावद्ऽप्रामाण्यशङ्कं तज्ज्ञानप्रामाण्यनिश्चयादेव तन्निश्चयः । न चैवमनवस्था, चरमप्रामाण्यज्ञानस्य ज्ञानाभावाद्धर्मज्ञानाभावेन कोटिस्मरणाभावाद्विषयान्तरसञ्चाराद्वा प्रमाण्यसंशयानवश्यम्भावादित्यर्थः ॥ अन्यथेति ॥ भाट्टानां प्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वे तस्या अपि प्रामाण्यानुस्मरणेऽनवस्था । प्राभाकराणामपि प्रामाण्यस्य स्वग्राह्यत्वं, न स्वग्राह्यं, स्वग्राह्यत्वस्य स्वरूपप्रामाण्यान्यत्वादिति । परग्राह्यत्वेऽप्यनवस्थानात् परिशेषानुमानेन मानान्तरेण वा ग्राह्यम् । तथाच तत्प्रामाण्यस्यापि स्वग्राह्यत्वमन्येनेत्यनवस्थया विषयान्तरसञ्चारो न स्यादित्यर्थः । कारणमुखीमनवस्थामाह ॥ लिङ्गमिति ॥

प्रामाण्यसंशयेन लिङ्गस्य सन्दिग्धत्वान्न निश्चय इत्यर्थः । भट्टमते ज्ञाततारूपलिङ्गज्ञानस्य प्रामाण्यसंशयान्न तन्निश्चय इति तद्ग्राहकपरम्पराप्रामाण्यानुस्मरणेऽप्यनवस्थेत्याह ॥ तत्किमिति ॥ सोऽपीति ॥ मायालिङ्गिनि झटिति परिव्राजकबुद्धिवदप्रमाऽपि प्रमेत्येव गृह्यत इत्यर्थः । फलमुखीमनवस्थामाह ॥ तर्हीति ॥ यदनुपलम्भ इति ॥ यस्य विशेषस्य शुक्तित्वादेरनुपलम्भे शुक्तौ रजतभ्रमो यस्य तु शुक्तित्वादेरुपलम्भे भ्रमबाधो व्यवतिष्ठते, स लोकसिद्ध इत्यर्थः । यद्यपि यदुपलम्भ इति वक्तुमुचितं, तथापि वस्तुगत्या विशेषस्य ज्ञानं न भ्रमविरोधि, अपि तु विशेषत्वेनेति दर्शयितुं यादृगित्युक्तम् । एवमनभ्युपगमे लोकव्यवहारविरोध इत्याह ॥ अन्यथेति ॥ सा भ्रमबाधव्यवस्था । बाधकस्य व्यभिचारिजातीयत्वे बाध्यबाधकयोरविशेषाद् बाधकत्वमेव न स्यादित्यर्थः ॥ अन्यथेति ॥ लोकमर्यादाऽतिक्रमे किमपि न तत्त्वमित्यस्याप्यतत्त्वे कान्यस्यातत्त्वमिति बाधकस्य तत्त्वं बाध्यस्यातत्त्वमभ्युपेयमित्यर्थः ॥ तथाभावे वेति ॥ यदि नियामकनिःशेषविशेषोपलम्भेऽपि विपरीतारोपः स्यात् । तदा तस्यारोपत्वं न तावद् बाधकं विना निश्चेयम् । सर्वस्यारोपत्वप्रसङ्गात् । बाधकात्तन्निश्चये बाधकाभिमतस्यापि बाध्यतायामबाधकत्वप्रसङ्गात् । अबाध्यत्वे तु कथमशेषविशेषोपलम्भे समारोपसम्भव इति भावः। एवञ्च प्रामाण्यस्यानुमेयत्वे बहुवित्तव्ययायाससाध्येऽपि गृहीतप्रामाण्यं न ज्ञानं प्रवर्तकम् । तस्य प्रामाण्यानुमितेः प्रागेव नाशात् । किन्तु तज्ज्ञानसमानविषयमप्रामाण्यशङ्काशून्यं ज्ञानान्तरमेव । न चैवं प्रामाण्यानुमितिरफला, तां विना तत्समानविषयज्ञाने अप्रामाण्यसंशयादिति सारम् ॥

अस्तु सवक्तृकशब्दे प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च परतस्त्वम् । वेदे तु नित्यतया वक्तुरभावान्न तत्र गुणाधीनं प्रामाण्यम् । ज्ञप्तिरपि तस्याप्तोक्तत्वं विनाऽपि महाजनपरिग्रहादेव स्यादित्याह—

**स्यादेतत् । परतः प्रामाण्येऽपि नित्यत्वाद्वेदानामनपेक्षत्वं, महाजनपरिग्रहाच्च प्रामाण्यमिति को विरोधः ? । न । उभयस्याप्यसिद्धेः । न हि वर्णा एव**

**तावन्नित्याः । तथाहि । इदानीं श्रुतपूर्वो गकारो नास्ति । निवृत्तः कोलाहल इति प्रत्यक्षेणैव शब्दध्वंसः प्रतीयते । न हि शब्द एवान्यत्र गतः । अमूर्त्तत्वात् । नाप्यावृतः । तत एव संबन्धविच्छेदानुपपत्तेः । नाप्यनवहितः श्रोता । अवधानेऽप्यनुपलब्धेः । नाऽपीन्द्रियं दुष्टं, शब्दान्तरोपलब्धेः । नाऽपि सहकार्यन्तराभावः । अन्वयव्यतिरेकवतस्तस्यासिद्धेः । नाप्यऽतीन्द्रियम् । तत्कल्पनायां प्रमाणाभावात् । अन्यथा, घटादावपि तत्कल्पनाप्रसङ्गात् । न च शब्दनित्यत्वसिद्धौ तत्कल्पनेति युक्तम् । निराकरिष्यमाणत्वात् ॥**

स्यादेतदिति ॥ सर्गप्रलयसम्भवेन वेदस्य नित्यत्वं महाजनपरिगृहीतत्वञ्चासिद्धमित्याह ॥ उभयस्येति ॥ यद्यपि वर्णानां नित्यत्वेऽप्यर्थप्रत्ययानुकूलानित्यानुपूर्वीविशेषघटितत्वेन वेदोऽनित्य एवेति तत्र वक्तृगुणापेक्षाऽस्त्येव, तथापि वर्णस्यानित्यत्वव्युत्पादने तत्समूहविशेषवाक्यविशेषरूपस्य तस्य सुतरामनित्यत्वं सिद्ध्यतीत्याशयेन वर्णमात्रस्यानित्यत्वं साधयति ॥ तथाहीति ॥ अनभिव्यक्तवर्णत्वव्याप्यजातिविशेषो वर्णसमूह एव कोलाहलः । प्रत्यक्षमेव वर्णस्यानित्यत्वम् । योग्यानुपलब्धेः प्रत्यक्षप्रतियोगिकाभावत्वेनैव घटाभावस्येव तदभावस्य प्रत्यक्षत्वादित्यर्थः । प्रत्यक्षस्यान्यथासिद्धिं निराकरोति ॥ न हीति ॥ येन सन्नपि नोपलभ्यत इत्यर्थः ॥ तत एव– अमूर्तत्वादेव ॥ इन्द्रियसम्बन्धविच्छेदो ह्यावरणम् । स च शब्दस्य विभुत्वादाकाशविशेषगुणत्वे च श्रोत्रसमवायस्य नित्यत्वादयुक्त इत्यर्थः ॥ तत्कल्पनेति ॥ अतीन्द्रियशब्दोपलम्भककल्पनेत्यर्थः ॥

ननु प्रतियोगियोग्यता नाभावप्रत्यक्षत्वे तन्त्रं, किन्त्वधिकरणयोग्यताऽपि । सा च शब्दध्वंसे नास्तीति कथं प्रत्यक्षः सः । न चेन्द्रियविशेषणतया कस्यचिद् ग्रहो दृष्टोऽपि त्विन्द्रियसम्बद्धविशेषणतया, इत्यत आह—

**ये त्वेकदेशिनो नैवमिच्छन्ति, तान् प्रत्युच्यते ।**

विवादाध्यासितः शब्दप्रध्वंसः, इन्द्रियग्राह्यः। ऐन्द्रियकाभावत्वात्, घटाभाववत् । नैतदेवम् । इन्द्रियाऽसन्निकृष्टत्वादतीन्द्रियाधारत्वाच्चेतिचेन्न।इदं ह्युपाध्युद्भावनं वा स्यात्, व्यापकानुपलब्ध्या सत्प्रतिपक्षत्वं वा ? । न प्रथमः । स्वरूपयोग्यतां प्रति सहकारियोग्यताया अनुपाधित्वात्।तस्यास्तामपेक्ष्यैव सर्वदाव्यवस्थितेः । नाप्यैन्द्रियकाधारत्वप्रयुक्तमभावस्य प्रत्यक्षत्वम् । धर्माद्यभावस्यापि तथात्वप्रसङ्गात् । अत एव, नोभयप्रयुक्तम् । नाऽपि द्वितीयः । प्रथमस्यासिद्धेः । अस्ति हि श्रोत्रशब्दाऽभावयोः स्वाभाविको विशेषणविशेष्यभावः॥विशेष्यस्यानीन्द्रियत्वात् कथमैन्द्रियकविशिष्टज्ञानविषयत्वम् । तथा विशेष्यमव्यवस्थापयतश्च कथं विशेषणत्वमितिचेन्न । तथा विशेष्यव्यवस्थापनायाः फलत्वात् । न तु तदेव विशेषणत्वम्, आत्माश्रयप्रसङ्गात् । विशेषणभावेन समवायाभावयोर्ग्रहणं, तथा ग्रहणमेव च विशेषणत्वमिति ॥

ये त्विति ॥विवादेति॥ श्रूयमाणशब्दध्वंस इत्यर्थः। अतो नान्त्यशब्दध्वंसे भागासिद्धिः। तस्य साक्षात्कारकाले नाशादिति भावः ॥ ऐन्द्रियकेति ॥ ऐन्द्रियकप्रतियोगिकाभावत्वादित्यर्थः ॥ नन्विदं मूर्त्तवत्त्वाभावेऽनैकान्तिकं, भूतलस्य हि मूर्त्तवत्त्वं प्रत्यक्षम् । यत्किञ्चिन्मूर्त्तग्रहेऽपि तद्ग्रहात् । तदभावस्तु न प्रत्यक्षः । अयोग्यस्यापि मूर्त्तस्य सम्भवेन यावद्विशेषाभावाप्रत्यक्षतया मूर्त्तसामान्याभावस्याऽप्रत्यक्षत्वात् । न च प्रत्यक्षाशेषमूर्त्ताभावग्राहिणा प्रत्यक्षेण प्रत्यक्षेतरमूर्त्ताभावनिश्चयसहकारिणा सोऽपि गृह्यत एवेतिवाच्यम्। लिङ्गवत्त्वावगमसहकारिणा पक्षग्राहकप्रत्यक्षेणैव लैङ्गिकावगमेऽनुमानमात्रविलयापत्तेः । मूर्त्तवत्त्वसामान्यस्य योग्यायोग्यघटितत्वेना-

ऽयोग्यतया तदभावहेतोरग्रहात्। येन रूपेण प्रतियोगियोग्यता, तेनैव तदभावस्य योग्यतावगमात् । अत्राभावपदेन ध्वंस उक्त इति न व्यभिचार इत्येके । द्रव्यनिष्ठमूर्त्तत्वाभावस्याप्रत्यक्षत्वेऽपि गुणादौ स प्रत्यक्ष एवेत्यन्ये ॥ उपाध्युद्भावनमिति ॥ स्वव्यतिरेकेणेति शेषः। तेनेन्द्रियसन्निकृष्टत्वमैन्द्रियकाधारत्वञ्चोपाधिरित्यर्थः।न चैन्द्रियका-ऽऽधारत्वं नोपाधिः। धर्माभावस्यापि प्रत्यक्षतापत्तेरिति वाच्यम्। उपाधेरधिकदेशत्वेऽपि दूषकताबीजसाध्यव्यापकत्वानपायात् ॥

अथ नायमुपाधिः, व्यतिरेकोपसंहारसामर्थ्याभावात्। तथाहि। अभावत्वे सत्यतीन्द्रियाधारत्वादिति यद्यपि नैन्द्रियकाधारत्वस्य व्यतिरेकः, उभयाधारत्वेऽप्यविरोधात् । तथाप्यभावत्वे सत्यैन्द्रिय-काऽनाधारत्वादिति सम्भवति । किन्तु योग्यताविरहस्तत्रोपाधिः। न च साधनव्यापकत्वं, न ह्यतीन्द्रियाधारत्वमेव योग्यताविरहः। पृथिवीत्वाभावादेरयोग्यतापत्तेः । नाप्यैन्द्रियकाधारत्वाभावः सः। तदर्थासहिततदभावस्य योग्यतात्मकत्वे धर्माभावस्य योग्यतापत्तेः। मैवम्। ऐन्द्रियकाभावमन्तर्भाव्याभावस्य योग्यतेत्युक्तेऽपि साधन-व्यापकताया अपरिहारादिति भावः ॥ व्यापकेति ॥ प्रत्यक्षव्यापकै-न्द्रियकाधारत्वेन्द्रियसन्निकर्षानुपलब्धेरित्यर्थः। यद्यपि शब्दध्वंसो न प्रत्यक्षोऽतीन्द्रियाधारत्वादिति पृथिवीत्वादौ व्यभिचारि, तथा-प्यैन्द्रियकानाधारत्वादिति हेतुः कर्त्तव्यम् । तत्र प्रथममुपाधिन्निर-स्यति ॥ स्वरूपेति ॥ स्वरूपयोग्यतां प्रत्यक्षोपहितस्वरूपसम्पत्तिं प्रति, सहकारियोग्यतायास्तत्सम्पत्तेरिन्द्रियसन्निकर्षस्यानुपाधित्वा-त्। कुतः ? ॥ तस्या इति ॥ तस्याः प्रत्यक्षतायाः,तामिन्द्रियसन्निकर्ष-रूपसहकारियोग्यतामित्यर्थः । तथा च पक्षवृत्तित्वेन साधनव्या-पकत्वान्नोपाधिरिति भावः । यद्वा, स्वरूपयोग्यतारूपं साध्यं प्रति सहकारियोग्यता नोपाधिः,साध्याव्यापकत्वादित्यर्थः। द्वितीयमुपाधिं निरस्यति ॥ नापीति ॥ यद्यप्युपाधौ सति साध्याभावो न दोषाय, तथापि समव्याप्तोपाधिमभिप्रेत्योक्तम् । विषमव्याप्तोपाधिपक्षे तु त्र्यणुके साध्याव्यापकत्वम् । अभावत्वपक्षधर्मावच्छिन्नसाध्यव्याप-कत्वे तु नष्टाश्रयद्रव्याद्यभावे साध्याव्यापकत्वम् । किञ्च। प्रत्यक्ष-योग्यताऽत्र साध्या। सा चाभावस्य नैन्द्रियकाधारत्वमात्रं, धर्मा-भावस्य प्रत्यक्षतापत्तेः । नाप्यैन्द्रियकाधारत्वे सत्यैन्द्रियकप्रति-

योगिकाभावत्वम् । गौरवात् । तदिन्द्रियोग्राह्योऽप्यधिकरणे गन्धरस-भावयोर्घ्राणादिना ग्रहाच्च । न चेन्द्रियकप्रतियोगिकाभावत्वस्य योग्यतात्वे वायुस्पर्शध्वंसोऽपि प्रत्यक्षः स्यादिति वाच्यम् । तस्या-श्रयनाशजन्यस्य ग्राहकेन्द्रियसन्निकर्षाभावादिति भावः॥अत एवेति॥ इन्द्रियसन्निकृष्टत्वमैन्द्रियकाधारत्वं चेत्युभयम् । तत्प्रयुक्तमपि ना-भावस्य प्रत्यक्षत्वम् । धर्माभावस्य प्रत्यक्षतापत्तेरित्यर्थः । सत्प्रति-पक्षद्वये प्रथमस्यासिद्धिमाह ॥नापीति॥ अत्र स्थापनानुमाने योग्यत्वे साध्ये प्रत्यनुमाने तदभावः साध्यः । तत्र चेन्द्रियासन्निकृष्टत्वं व्य-भिचारि । इन्द्रियासन्निकृष्टेऽपि योग्यताया अनपायात् । तस्माद्यदा साक्षात्कारविषयत्वं साध्यं, तदा फलाभावे योग्यता व्यर्थेति तत्रा-ऽसिद्धिरुक्तेत्याहुः । ननु विशेषणत्वमभावस्य तदा स्याद्यदा श्रोत्रं शब्दध्वंसज्ञाने भासेत । न चैवम् । श्रोत्रस्यातीन्द्रियत्वात् । ततो न शब्दध्वंसस्य तद्विशेषणत्वम । स्वसम्बन्धेन विशेष्ये व्यावृत्तबुद्ध्य-ऽजनकत्वात् । नाऽपि श्रोत्रं विशेष्यं, व्यावृत्तबुद्ध्यविषयत्वादित्याह ॥ विशेष्यस्येति ॥ श्रोत्रस्यातीन्द्रियत्वेऽपि शब्दलिङ्गजश्रोत्रज्ञानसह-कारि-मनः-प्रसूतानुमितिविषयत्वं स्यादित्याभिप्रेत्याह ॥ तथेति ॥ विशेषणतासम्बन्धस्य हि विशिष्टज्ञानं फलं, न तु तदन्तर्भावेणैव स इत्यर्थः । आत्माश्रयमेवाह ॥ विशेषणभावेनेति ॥

तथापि सम्बन्धं विना कथं विशेषणत्वमित्युपसंहरन्नेव निरा-करोति—

**तस्मात्, संबन्धान्तरमन्तरेण तदुपश्लिष्टस्वभाव-त्वमेव हि तयोः। सैव च विशिष्टप्रत्ययजननयोग्यता विशेषणतेत्युच्यते। सा चात्र दुर्निवारा। प्रतियोग्य-ऽधिकरणेन स्वभावत एवाभावस्य मिलितत्वात्।तथा-ऽपि तया तथैव प्रतीतिः कर्त्तव्येति चेन्न। गृह्यमाण-विशेष्यत्वाऽवच्छिन्नत्वाद्व्याप्तेः। अन्यथा, संयुक्त-समवायेन रूपादौ विशिष्टविकल्पधीजननदर्शनाद् गन्धादावपि तथात्वप्रसङ्गात्।तथापि नेन्द्रियविशेषण-तया कस्यचिद् ग्रहणं दृष्टम्, अपि त्विन्द्रियसंबद्ध-**

विशेषणतया । सा चातो निवर्त्तते इति चेन्न । अस्य प्रतिबन्धस्य इन्द्रियसन्निकृष्टार्थप्रतिसंबन्धिविषयत्वात् । अन्यथा संयुक्तसमवायेन गन्धादावुपलब्धिदर्शनात् समवायेनादर्शनात् शब्दस्याग्रहणप्रसङ्गात् । नाऽप्यभावत्वे सतीन्द्रियाधारत्वात् सत्प्रतिपक्षत्वं, योग्यताविरहप्रयुक्तत्वाद्व्याप्तेः । न चाऽतीन्द्रियाधारत्वमेव तस्य योग्यताविरहः । तद्विपर्ययस्यैव योग्यतात्वापत्तेः । न चैवमेव, धर्मादिप्रध्वंसग्रहणप्रसङ्गात् । दृश्याधारत्वं दृश्यप्रतियोगिता चेति द्वयमप्यस्य योग्यतेतिचेन्न । उभयनिरूपणीयत्वानियमानभ्युपगमात् । प्रतियोगिमात्रनिरूपणीयो ह्यभावः । अन्यथेह भूतले घटो नास्तीत्येषाऽपि प्रतीतिः प्रत्यक्षा न स्यात् । संयोगो ह्यत्र निषिध्यते । तदभावश्च भूतलवद् घटेऽपि वर्त्तते । तत्र यदि प्रत्यक्षतया भूतलस्योपयोगो घटस्यापि तथैव स्यादविशेषात् । अथ घटस्याऽन्यथोपयोगः, भूतलस्याप्यन्यथैव स्यादविशेषात् । कथमन्यथेतिचेत् । प्रतियोगिनिरूपणार्थमभावसन्निकर्षार्थश्च । तत्र प्रतियोगिनिरूपणं स्मरणलक्षणमनुपलभ्यमानेनापीति, न तदर्थमध्यक्षगोचरत्वमपेक्षणीयमन्यतरस्यापि; कुत उभयस्य । सन्निकर्षस्तु भूतलघटसंयोगस्येन्द्रियेण साक्षान्नास्ति । येनास्ति, तेनापि यदीन्द्रियं न सन्निकृष्येत, कथमिव तं गमयेत् । न चोपलब्धोपलभ्यमानाभ्यामेवेन्द्रियं सन्निकृष्यते । इतरेतराश्रयप्रसङ्गात् ॥

तस्मादिति ॥ सम्बन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यत्वमेव

स्वरूपसम्बन्धोऽस्तीत्यर्थः । तथापि कथं विशेषणतेत्यत आह ॥ सैव चेति ॥ प्रतियोगीति ॥ प्रतियोगिनः शब्दस्याधिकरणेन श्रोत्रेण शब्दाभावस्य स्वभावसन्निकृष्टत्वादित्यर्थः ॥ तथापीति ॥ तया विशेषणतया, तथैव सन्निकर्षेण विशिष्टविशेष्यविषयैव बुद्धिः कर्तव्या। विशेष्यस्य श्रोत्रायोग्यतया च साऽत्र न सम्भवतीत्यर्थः ॥ गृह्यमाणेति ॥ तद्विशेष्यकप्रत्यक्षे तद्योग्यता प्रयोजिका । अत्र तु विशेष्यं श्रोत्रमयोग्यम् । अतो विशेष्यमविषयीकृत्य विशेषणतया प्रत्यासत्त्या शब्दध्वंसप्रत्यक्षं जन्यते इत्यर्थः ॥ अन्यथेति ॥ यदि नैवं, तदा स्वाश्रये गृह्यमाणे रूपादिप्रत्यक्षदर्शनादगृह्यमाणे वायावाश्रये तत्स्पर्शप्रत्यक्षं न स्यादित्यर्थः ॥ तथाऽपीति ॥ सम्बन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यतयेन्द्रियप्रत्यासत्त्या सम्बद्धविशेषणस्यैव प्रत्यक्षजननदर्शनान्नेन्द्रियविशेषणता प्रत्यासत्तिरित्यर्थः ॥ अस्येति ॥ इन्द्रियसन्निकृष्टोऽर्थो घटादिस्तस्य प्रतिसम्बन्धी द्वितीयः स तथेति, न विशेषणतामात्रमेवम्, अपि तु गृह्यमाणविशेष्यम् । साक्षात्सम्बन्धाभावे सत्येव हि परम्परासम्बन्ध आश्रीयते । अत्र तु साक्षादेव सम्बन्धोऽस्तीति न तदाश्रयणमित्यर्थः । द्वितीयं सत्प्रतिपक्षं निरस्यति ॥ नाऽपीति ॥ शब्देन व्यभिचारवारणार्थमभावत्वे सतीति ॥ योग्यतेति ॥ तथाचोपाधिमत्त्वेनातुल्यबलत्वादित्यर्थः ॥

ननु स्थापनानुमाने योग्यतायाः साध्यत्वात् प्रत्यनुमाने तदभावः साध्य इति स एव नोपाधिः । साधनव्यापकत्वात् । व्यभिचारानुमाने साध्याविशेषप्रसङ्गाच्च । न च योग्यतावच्छेदकरूपाभाव उपाधिः, योग्यतासाधके स्थापनानुमाने नैन्द्रियकाभावत्वमेव योग्यत्वं हेतुः, साध्याविशेषप्रसङ्गात्, अपि तु योग्यतावच्छेदकरूपवत्त्वमिति तदभावो नोपाधिः । पूर्वसाधनव्यतिरेकत्वात् । मैवम् । साध्यप्रयोजकत्वेन तादृशस्याप्युपाधित्वात् । न चैवं सत्प्रतिपक्षोच्छेदः । स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात् । यथा शब्दोऽनित्यो गुणत्वाद् इत्यत्र व्योमैकगुणत्वेन सत्प्रतिपक्षे अगुणत्वमुपाधिः । जलपरमाणुरूपादौ साध्याव्यापकत्वात् । पूर्वं योग्यताविशेषो हेतुरत्र योग्यतामात्रव्यतिरेक उपाधिरित्यन्ये ॥

प्रयोजकत्वमेवाह ॥ न चेति ॥ न ह्ययाधारत्वमात्रं योग्यता,

किन्तु दृश्यप्रतियोगिकत्वसहितम् । न चैतद् धर्मादिध्वंसस्यास्ती-त्याह ॥ दृश्येति ॥ तद्विरहश्च नोपाधिः, साधनव्यापकत्वात् । ना-ऽप्युभयस्य साध्यप्रयोजकत्वेनाप्रयोजकत्वम्।ऐन्द्रियकत्वरूपसाध्य-सामान्याव्यापकत्वेनानुपाधित्वादिति भावः । विपक्षे बाधकमाह ॥ अन्यथेति ॥ यद्युभाभ्यां प्रत्यक्षाभ्यामेवाभावः प्रत्यक्ष इत्यर्थः । ननु भूतलमात्रमत्राधारः । तच्च दृश्यमेवेत्यत आह॥संयोगो हीति। न चात्र मानाभावः । घटनिषेधे हि भूतले घटाभावो न प्रागभावध्वंसा-ऽऽत्मकः । प्रतियोगिसमानकालत्वात् । नाप्यत्यन्ताभावः।कदाचित् तस्य तत्र भावात् । तस्माद् घटसंयोगो निषिध्यते । स च संयोगो य एतद्घटस्य तत्र भावी तस्य प्रागभावः, अतीतस्य ध्वंसः, सर्व-दैवाऽभवतश्चात्यन्ताभावः ॥

ननु भूतले घटो नास्तीति घटप्रतियोगिकाभावोऽनुभूयते, सं-योगस्य तु प्रतियोगित्वे संयोगो नास्तीत्यनुभवापत्तिः । मैवम् । घटो नास्तीति बुद्धेरेव संयोगाभावविषयत्वात् । यथा हि भूतले घटास्तित्वबुद्धिस्तत्संयोगेन, तथा तदभावेन घटाभावबुद्धिः । यत्स-म्बन्धपुरस्कारेण यत्र यद्भावबुद्धिस्तदभावपुरस्कारेण तत्र तन्ना-स्तिताप्रतीतिः । केचित्तु, घटात्यन्ताभाव एव तद्विषयः । उत्पादवि-नाशधीस्तु, तत्सम्बन्धतथात्वप्रयुक्ता । स च तत्संयोगध्वंसरूपः । न चैवं घटात्यन्ताभावसम्बन्धस्य संयोगध्वंसरूपतया नित्यत्वाद् घटधीस्तत्र कदापि न स्यादिति वाच्यम् । न हि यत्र यत्संयोगो-ऽस्ति, तत्र तत्संयोगध्वंसः। सामान्यध्वंसस्य यावद्विशेषध्वंसव्याप्य-त्वादेकविशेषवति सामान्यध्वंसस्याभावेन तदुपपत्तेरित्याहुः । यथा प्रतियोगिभेदेनाभावभेदः, तथा तदवच्छेदकभेदेनाऽपीति सं-युक्तघटस्याभावस्तत्र । स चान्याविशिष्टाभाववदुत्पादविनाशशीलो-ऽन्य एवेत्यन्ये । यथाऽनादिसंसर्गाभाववैषम्येऽप्यभावबुद्धेरन-न्यथासिद्धत्वादुत्पादशीलो ध्वंसः स्वीकृतः, तथा तत एवोत्पादवि-नाशशीलस्तुरीयः संसर्गाभावो घटस्येत्यपरे । ननु घटसंयोगाभावो योग्यानुपलब्ध्या ग्राह्यः । सा च प्रतियोगितद्व्याप्येतरयावत्तदुप-लम्भकसत्त्वेऽनुपलब्धिः । अत्र च संयोगस्योपलम्भको घट एव ना-स्तीति न संयोगाभावः प्रत्यक्षः । मैवम् । यो ह्यनुपलम्भः प्रतियोगि-सत्त्वविरोधी, स एवाभावग्राहकः । अत एव पृथिवीत्वाभावो

जलपरमाणुषु न प्रत्यक्षः । प्रत्यक्षश्च वायौ रूपाभावः । रूपस्य महति वायौ सत्त्वेऽनुपलब्धिविरोधात् । स च शब्दाधाराप्रत्यक्षत्वेऽपि प्रकृतेऽस्तीति शब्दाभावः प्रत्यक्ष इति भावः ॥ कथमिति ॥ अन्यथेत्यत्र कोऽन्यः प्रकार इत्यर्थः । ननु संयोगाभावप्रतीतौ सन्निकर्षमात्रार्थे भूतलस्योपयोगे गन्धतदभावबुद्धौ द्रव्यग्रह इव नियमेन भूतलोपलम्भो न स्यात्। अतः सन्निकर्षवदस्योपलब्धिरभावप्रत्यक्षाऽङ्गमित्युपलब्धौ सत्यामेव सन्निकर्ष इत्यत्राह ॥ न चेति ॥ अत्रोपलब्धेनेत्यत्रेन्द्रियसन्निकर्षे भूतलोपलम्भस्तस्मिन् सतीन्द्रियसन्निकर्ष इति इतरेतराश्रयत्वम् । उपलभ्यमानेनेत्यत्र यद्युपलब्धिसम्बन्धिनेत्यर्थः । तदा पूर्ववदितरेतराश्रयत्वम् ॥

यदि तु सन्निहितोपलम्भकारणेनेत्यभिमतं, तदैकसामग्रीप्रसूतत्वेनाव्यभिचारेऽपि भावप्रतीत्यङ्गत्वमवर्जनीयसान्निधेरप्यन्यथासिद्धित्वादित्याह—

तस्मात् सन्निकर्षे सति योग्यत्वाद्भूतलमप्युपलभ्यते, न तु तस्योपलभ्यमानत्वमभावोपलब्धेरङ्गमिति युक्तमुत्पश्यामः । प्रकृते तु न प्रतियोगिनिरूपणार्थं तदुपयोगः । तस्य संयोगवदाधारानिरूप्यत्वात् । नाऽपि सन्निकर्षार्थं, तदभावस्य साक्षादिन्द्रियसन्निकर्षादिति । नन्वेवं, कुत एषा प्रतीतिरिदानीं श्रुतपूर्वः शब्दो नास्तीति । अनुमानादिति चेन्न । शब्दस्यैव पक्षीकरणे हेतोरनाश्रयत्वात् । अनित्यत्वमात्रसाधने अभावस्य नियतकालत्वासिद्धेः । आकाशस्य पक्षत्वे तद्वत्तयाऽनुपलभ्यमानत्वस्य हेतोरनैकान्तिकत्वात् । शब्दसद्भावकालेऽपि तस्य सत्त्वात् । एवं कालपक्षेऽपि दोषात् । अहमिदानीं निःशब्दश्रोत्रवान् । शब्दोपलब्धिरहितत्वात् । बधिरवदितिचेन्न । दृष्टान्तस्य साध्यविकलत्वाद्, व्याहतत्वाच्च। बधिरश्च श्रोत्रवाँ-

**श्रोति व्याहतम् । तस्यापि च श्रवसो निःशब्दत्वे प्रमाणं नास्ति ॥**

तस्मादिति ॥ न च शब्दध्वंसग्रहेऽपि शब्दनिरूपणार्थमाधारग्रहस्योपयोग इत्याह ॥ प्रकृते त्विति॥तस्य शब्दस्य ॥ संयोगवदिति व्यतिरेकदृष्टान्तः ॥ तदभावस्येति॥शब्दध्वंसस्य प्रतियोगिदेशाकाशे विशेषणत्वादित्यर्थः ॥ न चेदेवमिति ॥ यदि योग्यप्रतियोगिकत्वमात्रं नाभावयोग्यतावच्छेदकमित्यर्थः ॥ शब्दस्यैवेति ॥ शब्दं पक्षीकृत्य यदि ध्वंसवत्त्वं साध्यं, तदा शब्दसत्त्वकाले उपलभ्यमानत्वं हेतुः स्वरूपासिद्धः, तदसत्त्वकालत्वे तु हेतोः पक्षे वृत्तावपि साध्यस्य ध्वंसवत्त्वस्य तत्रावृत्तेर्बाधितविषयत्वेनापक्षधर्मत्वादित्यर्थः ॥

ननु ध्वंसप्रतियोगित्वे साध्ये न बाध इत्यत आह ॥ अनित्यत्वेति ॥ यदा कदाचित् ध्वंससिद्ध्याऽर्थान्तरत्वादित्यर्थः ॥ कालपक्षेऽपीति ॥ तद्देशेऽन्यत्र वा शब्दसत्त्वकालेऽपि तद्वृत्तया कालस्यानुपलभ्यमानत्वादित्यर्थः ॥ शब्दोपलब्धीति ॥ पूर्वोपलब्धत्वेन शब्दो विशेषणीयः । तेन ध्वंसः सिद्ध्यति । पश्चादुक्तमपि सन्निधानात् पूर्वं स्फुटयति ॥ बधिरश्रोत ॥ शब्दोपलम्भकादृष्टविशिष्टकर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं बधिरस्य नास्तीत्यर्थः । ननु चादृष्टविशेषः शब्दोपलब्धौ सहकारी, न तद्घटितं श्रोत्रमित्यतो दृष्टान्तस्य साध्यवैकल्यं विवृणोति ॥ तस्यापीति ॥ श्रोत्रस्यादृष्टघटितत्वसंशयेऽपि न साध्यसिद्धिरिति भावः ॥

ननु बधिरश्रोत्रे शब्दोत्पत्तौ स उपभुज्येत, उपभोगाभावाच्छब्दो नास्तीत्याह—

**अनुपभोग्यस्य उत्पादवैयर्थ्यं प्रमाणमितिचेन्न । आद्यादिशब्दवदुपपत्तेः। तेषां शब्दान्तरारम्भं प्रत्युपयोगोऽन्त्यस्य न तथेति चेन्न।अन्त्यत्वासिद्धेः। सर्वेषां चोत्पादवतां प्रयोजनतदभावयोरस्मादृशैरनाकलनात् । सुषुप्त्यवस्थायां श्वासप्रश्वासप्रयोजनवच्च तदुपपत्तेः। आरम्भे सति प्रयोजनमवश्यमिति व्याप्तेः । न त्वापाततः प्रयोजनानुपलम्भमात्रेणारम्भनिवृत्तिः ।**

तथा सति कर्णशष्कुल्यवच्छेदोत्पाद एव नभसस्तं प्रति निवर्त्तेत । बधिरस्य तेनानुपयोगात् । विवादकाले बधिरकर्णःशब्दवान्, योग्यदेशस्यानावृतकर्णशष्कुलीसुषिरत्वात् । तदितरकर्णशष्कुलीसुषिरवदिति ॥

निःशब्दाः पणववीणावेणवः । तदेकज्ञानसंसर्गयोग्यत्वस्य तदनुपलम्भेऽप्युपलभ्यमानत्वात् । यद् यदेकज्ञानसंसर्गयोग्यस्य अनुपलम्भेऽप्युपलभ्यते तत् तदभाववत् । यथा अघटं भूतलमितिचेन्न । एकज्ञानसंसर्गयोग्यत्वाभावात् । शब्दस्य श्रौत्रत्वाद्वीणादीनां चाक्षुषत्वात् । अभिमानमात्रादितिचेन्न, तथापि शब्दप्रध्वंसस्यातद्देशत्वाद्, अत्यन्ताभावस्य च कालाऽनियमात् ॥

अनुपभोग्यस्येति ॥ आद्यादिशब्दानामऽनुपभोग्यानामनुपभोग्यत्वमनैकान्तिकमित्याह ॥ आद्यादीति ॥ उपभोग्यशब्दान्तरारम्भकत्वेन परम्परयोपभोग्यत्वं तेषाम् । प्रकृतस्य तु शब्दान्तराजनकतया न तथात्वमित्याह ॥ तेषामिति ॥ प्रकृतस्याप्युत्पादकत्वेनान्त्यत्वासिद्ध्याऽनुपभोग्यत्वासिद्धिरित्याह ॥ अन्त्यत्वेति ॥ प्रत्युत बधिरश्रोत्रस्य शब्दसद्भाव एव मानमस्तीत्याह ॥ विवादेति ॥ यदा तद्देशवासिभिः श्रोत्रवद्भिरुपलभ्यते शब्दस्तदेत्यर्थः । धर्म्यन्तरं पक्षीकृत्य शब्दध्वंसानुमानमाह ॥ निःशब्दा इति ॥ एकज्ञानसंसर्गयोग्यत्वमात्रं घटादौ व्यभिचारीति नियमेन तथात्वं वाच्यं, तथाचासिद्धिरित्याह ॥ एकज्ञानेति॥ शब्दे भासमाने उपनीतो वीणादिरपि भासते इति तत्सिद्धिरित्याह ॥ अभिमानेति ॥ निःशब्दा इति, शब्दध्वंसवन्त इति साध्यं, शब्दसमवायित्वरहिता इति वा ? नाद्यो, बाधादित्याह ॥ तथापीति ॥ अतद्देशत्वाद्वीणाद्यदेशत्वादित्यर्थः । ध्वंसस्य प्रतियोगिसमानदेशत्वनियमादत्रापि नियमेनैकज्ञानसंसर्गयोग्यत्वमसिद्धमिति भावः । अन्त्ये नियतकालप्रतीत्यनुपपत्तिरित्याह ॥ अत्यन्तेति ॥ सिद्धसाधनञ्च द्रष्टव्यम् । एवमन्योन्याभावेऽपि साध्ये इति भावः ॥

उपाधौ विधिनिषेधावुपाधिमति भवत इति वीणादिदेशत्वमेव शब्दध्वंसस्येति शङ्कते–

स्यादेतत् । शब्दवदाकाशोपाधयो हि भेर्यादयः । तेन तेषु विधीयमानः शब्द आकाश एव विहितो भवति । प्रतिषिध्यमानश्च तत्रैव प्रतिषिद्धो भवति । शरीरे सुखादिवदितिचेन्न । तत्र सोपाधावात्मनि प्रत्यक्षसिद्धे सुखादिनिषेधस्यापि प्रत्यक्षसिद्धत्वात् । न चैवमिहापि, तदुपहितस्य नभसोऽप्रत्यक्षत्वादुपाधयस्तावत् प्रत्यक्षा इतिचेन्न । तैरभावानिरूपणात् । निरूपणे वा प्रत्यक्षेणापि ग्रहणप्रसङ्गात् । न चैवं सति पारमार्थिकाधिकरणनिरूपणीयत्वमभावस्य । न च तेऽपि प्रत्यक्षसिद्धाः । सर्वत्र शब्दकारणव्यवधानेऽप्युपलब्धस्य शब्दस्य नास्तिताप्रतीतेः। आनुमानिकैस्तैस्तथाव्यवहार इति चेन्न । हेतोस्तत्रतत्रतयाऽनुपलभ्यमानत्वस्यानैकान्तिकत्वात् । अभावप्रतीतिकाले सन्दिग्धाश्रयत्वाच्च । उपलभ्यमानविशेष्यत्वपक्षे चाऽसिद्धेः । इन्द्रियव्यवधानाच्छब्दलिङ्गस्य चानुपलम्भात् ॥

स्यादेतदिति ॥ उपाधिरवच्छेदकः । यद्यपि शरीरे गन्धविधौ विभुत्वनिषेधे चात्मनि तौ न भवत इति नायं नियमः, तथापि यदवच्छेदेन यद् वर्त्तते तत्रावच्छेदके विधिनिषेधधीरवच्छिन्नविधिनिषेधविषयेति नियम इति भावः। उपनीतशरीरावच्छेदेनाऽऽत्मनि योग्ये सुखाद्यभावग्रहेऽपि नाकाशे शब्दाभावग्रहः, उपाधिमतोऽपि तस्यायोग्यत्वादिति परिहरति ॥ तत्रेति ॥ तैरिति ॥ वीणादयः प्रत्यक्षा अपि न शब्दसमवायिन इति न तैः शब्दध्वंसो निरूप्यते इत्यर्थः ॥ निरूपणे वेति ॥ तथाच विवादाभावो हृस्याधारत्वहृस्यप्रातयोगित्वयोः सम्भवादिति भावः ॥ दूषणान्तरमाह ॥ न

चैवमिति ॥ मुख्यप्रतियोग्याधारविषय एवाभावनिरूपकत्वादित्यर्थः । यदि च मुख्यामुख्यसाधारणमाधारमात्रं तन्निरूपकं तत्राह ॥ न चेति ॥ अप्रत्यक्षे वीणादौ शब्दाभावप्रतीत्यनुदयापत्तेरित्यर्थः । व्यवहिते वीणादौ शब्दविशेषानुमिते शब्दध्वंसव्यवहार आनुमानिकः स्यादित्याह ॥ आनुमानिकैरिति ॥ वीणाया अश्रौत्रत्वेन सशब्दवीणा न श्रोत्रेणोपलभ्यते इति व्यभिचार इत्याह ॥ हेतोरिति ॥ सन्दिग्धेति ॥ यत्र शब्दविशेषेणानुमिता वीणा न प्रत्यक्षा, तत्र वीणायाः सत्त्वासत्त्वसन्देहादित्यर्थः । यद्यपि पक्षस्य लिङ्गविशिष्टज्ञानादेवानुमितिसंभवे सन्देहो नानुमितिविरोधी,तथापि प्रथमं वीणाध्वंससन्देहाच्छब्दध्वंसस्तत्र वर्तते इति धीर्न स्यात् । यद्वा, वीणाद्यनुमानेऽपि पक्षनिश्चयादनुमानाभावेऽपि शब्दस्यानुपलम्भादभावनिश्चयादित्येवम्परोऽयं ग्रन्थः । शब्दवत्तयाऽनुपलभ्यमानत्वे सत्युपलभ्यमानत्वादिति हेतुकरणान्नोक्तदोष इत्याह ॥ उपलभ्यमानेति ॥ असिद्धेः । उपलभ्यमानत्वस्येति शेषः । तत्र हेतुमाह ॥ इन्द्रियेति ॥ शब्दरूपस्य लिङ्गस्येत्यर्थः । आप्तोपदेशस्य चाभावादिति भावः । ननु शब्द एतत्कालप्रध्वंसप्रतियोगी, एतत्पूर्वकालत्वे सति शब्देतरयावत्तदुपलम्भकसत्त्वेऽप्यनुलभ्यमानत्वादित्यस्तु । मैवम् । एवं सति घटाभावस्याप्यनुमेयतायामभावमात्रस्याप्रत्यक्षतापत्तेः । यदि च योग्यानुपलब्धेस्तत्र सत्तयैव हेतुत्वान्नानुमानं, तर्हि प्रकृतेऽपि तुल्यमिति भावः ॥

अपि च । नष्टाश्रयाणां द्रव्यगुणकर्मणां नाशोपलम्भः कथम् ? । न कथञ्चिदिति चेदाश्रयनाशात् कार्यनाश इति कुत एतत् ? । अनुमानतस्तथोपलम्भादितिचेन्न । तुल्यन्यायेनोक्तोत्तरत्वात् । तन्तुषु नष्टेष्वपि यदि पटो न नश्येत्तदेवोपलभ्येतेतिचेत् । एतस्य तर्कस्यानुग्राह्यमभिधीयताम् । यदत्रोपलभ्यते न तत् कार्यपरम्परावत् । योग्यस्य तथानुपलभ्यमानत्वे सति उपलभ्यमानत्वादितिचेन्न । तन्त्ववयवानां पटानाधारत्वे साध्ये सिद्धसाधनात् । पटप्रध्वंस-

वत्त्वे साध्ये बाधितत्वात् । तस्य स्वप्रतियोगिकारणमात्रदेशत्वात् । ये पटध्वंसवन्तस्तन्तवस्तदभाववन्त एते अंशव इति साध्यमितिचेन्न । तन्तुनाशोत्तरकालं पटनाशात् तद्वत्तानुपपत्तेः । योग्यतामात्रसाधने च, पटप्रध्वंसासिद्धेः । तस्य नाशानाशयोः समानत्वात् । अनन्यगतिकतया विशिष्टनिषेधे कृते विशेषणानामप्यभावः प्रतीतो भवति । गुणक्रियावत्पटाधारास्तन्तवो न सन्ति स्वावयवेष्विति हि प्रत्यय इतिचेत् तथापि गुणकर्मणां पटस्य च प्रध्वंसः किमधिकरणः प्रतीयते इति वक्तव्यम् । अंश्वधिकरण एवेतिचेद्, भ्रान्तिस्तर्हीयम् । तस्यातद्देशत्वात् । आश्रयावच्छेदकतया तेषामपि अदूराविप्रकर्षेण तद्देशत्वम् । एवम्भूतेनापि देशेन तन्निरूपणं, योग्यताया अव्यभिचारादितिचेत् । न तर्हि प्रतियोगिसमवायिदेशेनैव प्रध्वंसनिरूपणमिति नियमः । प्रकारान्तरेणापि निरूपणात् । तस्माद् यस्य यावती ग्रहणसामग्री तं विहाय तस्यां सत्यां तदभावो यत्र क्वचिन्निरूप्यो देशे काले वा ॥

अपि चेति ॥ यदि प्रतियोग्याश्रयेणैवाभावो निरूप्यते इति शेषः ॥ तुल्यन्यायेनेति ॥ स्वरूपकालाकाशपक्षे आश्रयासिद्ध्यनैकान्तिकत्वात्, पटतदवयवादिपक्षत्वे बाधादित्यादिनेत्यर्थः ॥ तन्तुष्विति ॥ पटारम्भकतन्तुष्वित्यर्थः।प्रागुक्तदोषभिया पटध्वंसविशिष्टतन्तुध्वंसवत्त्वमंशुषु साध्यमाशङ्क्य प्रकारान्तरेण बाधसिद्धसाधने आह ॥ य इति ॥ तद्वत्ता, तन्तूनां पटध्वंसवत्ता॥नन्वेतेऽशवः पटध्वंससमानकालस्वजन्यतन्तुध्वंसवन्तस्तद्वत्तयाऽनुपलभ्यमानत्वादित्यनुमानं स्यात् । अत्र, यदाकदाचित् समानकालत्वविवक्षायाम् इदानीं नष्टः पट इति प्रतीत्यनुपपत्तिः । अथेदानीं तथात्वं विवक्षितं, तदा

हेतोरसिद्धिरित्येके । यत्र परस्परादिनोलभ्यते, तत्र कथमनुमानमित्यन्ये । ननु यत्र विशिष्टनिषेधे विशेष्यासिद्धौ मानं, तत्रैव तस्य विशेषणमात्रनिषेधपर्यवसायित्वम् । प्रकृते चातथात्वाद् गुणक्रियावत्पटाधारतन्तुनिषेधे गुणकर्मपटानामपि निषेधः स्यादिति शङ्कते ॥ अनन्येति ॥ अत्रापि बाध इत्यभिप्रेत्य परिहरति ॥ तथापीति ॥ तस्येति ॥ पटध्वंसस्यांशवनाधारत्वादित्यर्थः ॥ आश्रयेति ॥ गुणक्रियावत्पटाश्रयतन्त्ववच्छेदकानामंशूनामपि गुणादिदेशत्वमित्यर्थः ॥ तं विहायेति ॥ तं प्रतियोगिनम्, तद्ग्राह्यश्चेति द्रष्टव्यम् । शब्दस्य तु नाश्रयग्रहान्तर्भावेन ग्रहणसामग्री, येन तदग्रहे न गृह्येतेति भावः ॥ यत्रेति ॥ एतेन निरधिकरणाऽभावधीरिति सत्यं, किन्तु प्रतियोगिसमवायिदेशनिरूप्यतानियमो नास्तीत्युक्तम् ॥

नन्वेवं प्राङ्नास्तितायामप्यनुपलम्भानुमानं न स्यादित्यत आह-

इयांस्तु विशेषः । सा सती चेत्, प्रत्यक्षेण । असत्येव ज्ञाता चेत्, अनुमानादिनेति स्थितिः। एतेन सद्ग्राममभावो निरूप्यते-इत्यादिशास्त्रविरोधः परिहृतो वेदितव्यः । उभयनिरूपणीयप्रतियोगिविषयत्वादनुमानविषयत्वाच्च । अन्यथा, आश्रयासिद्धिप्रसङ्गात् । तत्रापि न ग्रहणे नियमो, ज्ञानमात्रन्तु विवक्षितम् । तावन्मात्रस्यैव तदुपयोगात् । क्वचिद्ग्रहणस्य सामग्रीसम्पातायातत्वात्। यदि चाधिकरणग्रहे शास्त्रस्य निर्भरः स्याद्, वह्नेर्दाह्यं विनाऽप्यनुविनाशवत्तद्विनाश (न्या० ४ अ० १ आ० २७ सू०) इति नोदाहरेत् । असिद्धत्वात् । न हि वह्निविनाशस्तदवयवपरम्परास्वनिरूप्यः । तासामनिरूपणात् । नाऽप्यन्यत्र गमनाभावादिना पारिशेष्यादनुमेयः। हेतोरेव निरूपयितुमशक्यत्वात् । आश्रयानुपलब्धेः। नापि निमित्तविनाशात् सर्वमिदमेकवारेण सेत्स्यती-

ति युक्तम् । तस्यानैकान्तिकत्वात् । तेजसा विशेषितत्वादयमदोष इतिचेन्न । व्याप्त्यसिद्धेः । न हि इन्धनविनाशात्तेजोद्रव्यमवश्यं विनश्यतीति क्वचित् सिद्धं, प्रत्यक्षवृत्तेरनभ्युपगमात् । तस्माद् यत्त्यागेनाऽन्यत्र गमनं न सम्भाव्यते, तेन निमित्तादिनाऽपि देशेन प्रध्वंसो निरूप्यते इत्यकामेनापि स्वीकरणीयम् । गत्यन्तराभावात् । अत एव तमसः प्रत्यक्षत्वेऽप्यभावत्वमामनन्त्याचार्याः । एतेन शब्दप्रागभावो व्याख्यातः ॥

इयांस्त्विति॥ प्रत्यक्षसामग्र्याः सतीत्वं योग्यानुपलम्भसहकृतत्वम् । यत्र तु प्राङ्नास्तितादावाधारेन्द्रियसन्निकर्षाभावात् तदभावस्तत्रासती । ज्ञाता चेदनुमानेन, स्मरणार्हस्यास्मरणादिना । आदिग्रहणादाप्तोपदेशेनापीत्यर्थः । स्थितिर्व्यवस्थितिः । प्रामाणिकत्वाच्छास्त्रस्य विशेषविषयत्वात् तद्विरोधोऽपि नास्तीत्याह ॥ एतेनेति ॥ सङ्ख्यां – प्रतियोग्यधिकरणाभ्याम् ॥ विशेषविषयत्वमाह॥ उभयेति ॥ उभाभ्यां संयोगिभ्यां संयोगो निरूप्यते इति तदभावोऽपि तथेत्यर्थः ॥ अनुमानेति ॥ यत्र व्यापकाभावेन व्याप्याभावोऽनुमीयते, तत्राश्रयग्रह उपयुज्यते इत्यर्थ ॥ अन्यथेति ॥ तत्राश्रयाग्रहादित्यर्थः॥ तत्रापीति ॥ उभयनिरूप्यप्रतियोगिविषयेऽपि नानुभवनियमः । स्मरणेनाप्याश्रयनिरूपणाल्लाघवाच्चेत्यर्थः । यत्तु क्वचिद्घटं भूतलमित्यत्र ग्रहणनियमः, सोऽन्यथासिद्ध इत्याह ॥ क्वचिदिति ॥ आश्रयग्रहणनियमश्च न सूत्रकारस्यापि सम्मत इत्याह ॥ यदि चेति ॥ दृष्टान्तस्य वह्निनाशस्याज्ञानादित्यर्थः । असिद्धत्वमेव व्युत्पादयति ॥ न हीति ॥ हेतोरेवेति ॥ अनुपलभ्यमानत्वादित्यस्य हेतोरभावाश्रयाप्रसिद्धेरपक्षधर्मतया येन रूपेण हेतुत्वं तेनानिरूपणादित्यर्थः ॥ नाऽपीति॥ वह्निनिमित्तेन्धननाशस्य प्रत्यक्षत्वात् ततोऽन्यत्र प्रतियोगिगमनाभावस्तत्प्रध्वंसश्चेति सर्वमित्यर्थः ॥ तस्येति ॥ निमित्तनाशेऽपि नैमित्तिकानामऽनाशादित्यर्थः ॥ तेजसेति ॥ निमित्तनाशे अग्निर्नश्यतीति व्याप्तेरित्यर्थः । गमनं, प्रतियोगिनः ॥ निमित्तादिनेति ॥

अत एव यत्र कपालादिपरम्परानाशाद् घटनाशस्तत्रापीह भूतले घटो नास्तीति धीः समर्थिता ॥ अत एवेति ॥ यत एव निमित्ता-दिनाऽपि देशे ध्वंसनिरूपणमित्यर्थः । अन्यथाऽऽलोकावयवानाम-ऽनिरूपणात्तदवयवविनाशात्मकं तमो न प्रत्यक्षं स्यादिति भावः ॥ एतेनेति ॥ प्रतियोगियोग्यतामात्रनिरूप्यत्वेन ॥ व्याख्यातः, प्रत्यक्ष-तया॥एतच्च संसर्गाभावविषयम् ।अन्योन्याभावस्यायोग्यप्रतियोगिक-स्य प्रत्यक्षत्वात् । कथमन्यथा स्तम्भः पिशाचो नेति धीः प्रत्यक्षा । प्रतियोगिसत्त्वविरोधिन एवानुपलम्भस्याभावप्रत्यक्षतायां तन्त्र-त्वात् । यदि हि स्तम्भः पिशाचः स्यात् स्तम्भात्मकतयोपलभ्येतेति न पिशाचानुपलम्भः स्यात् । ननु शब्दाभावो न योग्यानुपलम्भ-ग्राह्यः । तत्तद्याप्येतरतदुपलम्भकस्य वायोस्तत्राभावात् । तथाच सत एव शब्दस्य व्यञ्जकवायुविरहादनुपलब्धिमात्रं, न तु ध्वंसग्रहः। विनष्टधीरपि व्यञ्जकवायुध्वंसोपाधिकैव । अत एव यत्र यस्य सत्त्व-मनुपलब्धिविरोधि, तस्याभावस्तत्र गृह्यते इति योग्यानुपलब्ध्यर्थ इति पक्षेऽपि न शब्दाभावोऽध्यक्षः । व्यञ्जकाभावेन सतोऽपि शब्द-स्योपलब्धेरभावात् । मैवम् । वर्णा न प्रतिनियतव्यञ्जकव्यङ्ग्याः । एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वात् । पटैकत्व-परिमाणवदिति प्रतिनियतव्यञ्जकव्यङ्ग्यत्वानुपपत्त्या वायोर्व्यञ्जकत्व-निरासात् ॥

एवं स्थिते अनुमानमप्युच्यते । शब्दोऽनित्यः उत्पत्तिधर्मकत्वाद् घटवत् । न चेदं प्रत्यभिज्ञानबाधि-तम् । तस्य ज्वालादिप्रत्यभिज्ञानेनाऽविशेषात् । नैवमबाधितस्य तस्य स्वतः प्रमाणत्वादितिचेत्तुल्य-म् । ज्वालायां तन्नास्ति, विरुद्धधर्माध्यासेन बाधित-त्वात् । अन्यथा भेदव्यवहारविलोपप्रसङ्गो निमित्ता-भावात् । आकस्मिकत्वे वा अतिप्रसङ्ग इतिचेत्तुल्यं शब्देऽपि । तीव्रतीव्रतरत्वमन्दमन्दतरत्वादेर्भावात् । तदिह न स्वाभाविकमितिचेन्न । स्वाभाविकत्वाद-

धारणन्यायस्य तत्र तत्र सिद्धस्यात्रापि तुल्यत्वात्। न ह्यपां शैत्यद्रवत्वे स्वाभाविके तेजसो वा औष्ण्य-भास्वरत्वे इत्यत्रान्यत् प्रमाणमस्ति प्रत्यक्षाद्विना। तत्तथैव युज्यते। अन्यस्योपाधेरनुपलम्भान्नियमेन तद्गतत्वेन चोपलम्भादितिचेत्तुल्यमेतत्। तथाप्य-तीन्द्रियान्यधर्मत्वशङ्का स्यादितिचेदेतदपि तादृगेव। तत् किं यद्गतत्वेन यदुपलभ्यते, तस्यैव स धर्मः। नन्वेवं पीतः शङ्खो, रक्तः स्फटिको, नीलः पट इत्यपि तथा स्यादविशेषात्। न। पीतत्वादीनामन्यधर्मत्व-स्थितौ शङ्खादीनां च तद्विरुद्धधर्मत्वे स्थिते जवाकु-सुमाद्यन्वयव्यतिरेकानुविधानाच्च बाधेन भ्रान्तत्वाव-धारणात्। न चेह तारतारतरत्वादेरन्यधर्मत्व-स्थितिः। नाऽपि शुकसारिकादिगकाराणां तद्विरुद्ध-धर्मत्वं, नाप्यन्यस्य तद्धर्मिणोऽन्वयव्यतिरेकावनु-विधत्ते। तथापि शङ्का स्यादितिचेदेवमियं सर्वत्र। तथाच न क्वचित् किञ्चित् कुतश्चित् सिद्ध्येत्। न चैतच्छङ्कितुमपि शक्यते। अप्रतीते संस्काराभावात्। संस्कारानुपनीतस्य चारोपयितुमशक्यत्वात्। न च ध्वनिधर्मा एव गृह्यन्ते। स्पर्शाद्यनन्तर्भावेन भावेषु त्वगादीनामव्यापारात्। न च श्रवणेनैव तद्ग्रहणम्। अवायवीयत्वेन तस्य वायुधर्माग्राहकत्वात्। चक्षुर्व-त्। तारतारतरत्वादयो वा न वायुधर्माः। श्रावण-त्वात्। कादिवत्। वायुर्वा न श्रवणग्राह्यधर्मा मूर्त-त्वात्। पृथिवीवत्॥

एवमिति॥ प्रत्यक्षेणानित्यत्वे साधिते इत्यर्थः। उत्पत्तिमत्त्वात्,

स्वसमानकालीनप्रतियोगिध्वंसानाधारक्षणाधारत्वादित्यर्थः । भावत्वेन विशेषणाच्च ध्वंसेन व्यभिचारः ॥ न चेदमिति ॥ यद्यपि, स एवायं गकार इति प्रत्यभिज्ञानं नित्यत्वं न गोचरयति किन्त्वभेदमात्रं, तथापि नाशकत्वाभिमतशब्दानन्तरमपि शब्दं गोचरयत् नित्यतायामेव पर्यवस्यति । आश्रयनाशस्याभावादिति भावः ॥ स्वत इति ॥ स्वयमप्रामाण्यशङ्काविरहादित्यर्थः ॥ विरुद्धेति ॥ परिमाणभेदाध्यासेनेत्यर्थः ॥ अन्यधर्मत्वस्थितिः, शब्दं विहायेति शेषः ॥ तद्विरुद्धधर्मत्वं, तीव्रत्वादिविरुद्धधर्मत्वम् ॥तद्धर्मिणः, तीव्रत्वादिधर्मिणः । चार्वाकमतमालम्ब्याह ॥ तथापीति ॥ मीमांसकस्य तन्मतावलम्बनेऽनुमानप्रामाण्यस्वीकारे व्याघात इत्याह ॥ एवमिति ॥ न च शङ्काऽपि तत्र सम्भवतीत्याह॥ न चैतदिति ॥ ननु ध्वनिधर्मास्तारत्वादयो गृह्यमाणा एव शब्दे आरोप्यन्ते, न स्मर्यमाणा इत्यत आह ॥ न चेति ॥ ध्वनयो वायवीया एवेति तेषान्त्वगादिभिरग्रहे तद्धर्मास्तारत्वादयो न गृह्यन्ते इति न गृह्यमाणारोप इत्यर्थः । अग्रहे हेतुमाह ॥ स्पर्शादीति ॥ अवायवीयत्वेनेति ॥ श्रोत्रं न वायुमात्रधर्ममात्रग्राहकम् । अवायवीयबहिरिन्द्रियत्वाच्चक्षुर्वदित्यर्थः । अतो न सत्ताद्रव्यत्वग्राहकेण चक्षुषा मनसा वा व्यभिचारः॥

ननु चाप्रयोजकमिदम् । न हि यदिन्द्रियं यद्द्रव्यजातीयं तत् तज्जातीयस्यैव धर्मं गृह्णाति । तैजसेन चक्षुषा नीलाद्यग्रहप्रसङ्गात् । न यद्बहिरिन्द्रियं यद्विशेषगुणग्राहकं तत्तज्जातीयगुणवदेवेति नियमेन श्रोत्रस्य वायुगुणतारत्वादिग्राहकत्वे तद्गुणवत्त्वप्रसङ्गे वायवीयत्वप्रसङ्गात् ॥ श्रावणत्वात् ॥ श्रवणमात्रबहिरिन्द्रियग्राह्यत्वादित्यर्थः । तेन न सत्तायां व्यभिचारः॥श्रवणग्राह्येति॥ श्रवणमात्रग्राह्यधर्मेत्यर्थः॥

अत्र विपक्षे बाधकमाह—

यदि च नैवं, कादीनामपि वायवीयत्वप्रसङ्गः । ततः किम् ? अवयविगुणत्वेऽनित्यत्वं, परमाणुगुणत्वेऽग्रहणम् । द्वयमप्येतदनिष्टं भवतः । अवश्यञ्च श्रवसा ग्राह्यजातीयगुणवता भवितव्यम् । बहिरिन्द्रियत्वाद् घ्राणादिवत्।सन्तु ध्वनयोऽपि नाभसाः।

तथाच तद्धर्मग्रहणं अवसोपपत्स्यते इति चेन्न । तार-स्तारतरो वाऽयङ्कार इत्यत्र ध्वनीनामस्फुरणात् । न च व्यक्त्या विना सामान्यस्फुरणम् । कारणाभावा-त् । व्यक्तिस्फुरणसामग्रीनिविष्टा हि जातिस्फुरण-सामग्री । कुत एतत् ? । अन्वयव्यतिरेकाभ्यां तथा-ऽवगमात् । ऐन्द्रियकेष्वेव घटादिषु सामान्यग्रहणा-त् । अतीन्द्रियेषु च मनःप्रभृतिष्वग्रहणात् । स्वरूप-योग्यतैव तत्र निमित्तमकारणं व्यक्तियोग्यतेति चेत्। एवं तर्हि सत्ताद्रव्यत्वपार्थिवत्वादीनां स्वरूपयोग्य-त्वे परमाण्वादिष्वपि ग्रहणप्रसङ्गः । अयोग्यत्वे घटा-दिष्वपि तदनुपलम्भापत्तिरिति दुरुत्तरं व्यसनम् । तस्माद्व्यक्तिग्रहणयोग्यताऽन्तर्गतैव जातिग्रहणयोग्य-तेति तदनुपलम्भे जातेरनुपलम्भ एव । तथाच न तारत्वादीनामारोपसम्भव इति स्वाभाविकत्वस्थितौ विरुद्धधर्माध्यासेन भेदस्य पारमार्थिकत्वात् प्रत्यभि-ज्ञानमप्रमाणमिति न तेन बाधः ॥

नापि सत्प्रतिपक्षत्वं, मिथोविरुद्धयोर्वास्तवतुल्य-बलत्वाभावात् । एकस्यान्यतमाङ्गवैकल्यचिन्तायाम-मस्य वैकल्ये तस्यैवाङ्गाव्यत्वात् । अवैकल्ये त्वदी-येनैव विकलेन भवितव्यमिति हीनस्य न सत्प्रति-पक्षत्वम् । तथापि नित्यः शब्दोऽद्रव्यद्रव्यत्वादित्य-त्रापि साधनदशायां किञ्चिद्वाच्यमितिचेदसिद्धिः । द्रव्यं शब्दः साक्षात्सम्बन्धेन गृह्यमाणत्वाद् घटव-दिति सिद्ध्यतीतिचेन्न । एतस्याप्यसिद्धेः।न हि श्रोत्र-गुणत्वे द्रव्यत्वे वाऽसिद्धे साक्षात्संबन्धे शब्दस्य

प्रमाणमस्ति । परिशेषोऽस्ति । तथाहि । सदाद्यभेदेन सामान्यादित्रयव्यावृत्तौ मूर्त्तद्रव्यसमवायनिषेधेन कर्मत्वनिषेधाद् द्रव्यगुणत्वपरिशेषे संयोगसमवाययोरन्यतरः संबन्धइतिचेन्न । बाधकबलेन परिशेषे द्रव्यत्वस्यापि निषेधाल्लिङ्गग्राहकप्रमाणबाधापत्तेः । बाधके सत्यपि वा द्रव्यत्वाप्रतिषेधे कर्मत्वादीनामप्यप्रतिषेधप्रसक्तौ परिशेषासिद्धेः । तस्मादेकदेशपरिशेषो न प्रमाणं, सन्देहसङ्कोचमात्रहेतुत्वात् । अथ द्रव्यत्वे किं बाधकम् ? । उच्यते । शब्दो न द्रव्यं, बहिरिन्द्रियव्यवस्थाहेतुत्वात् । रूपादिवादीनि परिशेषाद् गुणत्वेन समवायिसिद्धौ लिङ्गग्राहकप्रमाणबाधितत्वाद् नाव्यवहितसंबन्धग्राह्यत्वेन द्रव्यत्वसिद्धिः । न चासिद्धेन सत्प्रतिपक्षत्वम् । असिद्धस्य हीनबलत्वात् ॥

यदि चेति ॥ श्रोत्रस्य नभस्त्वे मानमाह ॥ ग्राह्येति ॥ ग्राह्यजातीयविशेषगुणवत्त्वेत्यर्थः ॥ ध्वनीनामिति॥ ध्वनयो नाभसा विभुसमवायिकारणत्वाद् गुणा एव, तद्धर्माश्च तारत्वादयः सामान्यरूपाः स्युः । तथा च ध्वनीनां तारत्वादिसमवायिव्यक्तीनामज्ञाने गकारादिगतत्वेन न भासेरन्नित्यर्थः ॥ न चेति ॥ जातिज्ञाने व्यक्तिविषयत्वनियमादित्यर्थः । प्रत्यक्षोऽयं नियमोऽतो न जातिपदजन्यज्ञाने व्यभिचारः । जातिपदेनापि वा जातित्वज्ञानं व्यक्तिविषयकमेव जन्यते । नित्यानेकवृत्तित्वस्य जातित्वात् ॥ एवं तर्हीति ॥ ननु परमाणुवृत्तिसत्तादिकं गृह्यत एवेतीष्टापत्तिः । न च परमाणुगतत्वेन तद्बुद्धिरापाद्या । विशेषणज्ञानं विना विशिष्टज्ञानाभावात् परमाणोरयोग्यत्वेनाज्ञानात् । न । परमाणुघटितेनेन्द्रियसन्निकर्षेण पार्थिवाऽन्तरे चागृह्यमाणे सत्तादिर्गृह्येतेत्यर्थात् । न च योग्यव्यक्तिवृत्तिसन्निकर्षेण तद्ग्रहः, जातेर्योग्यव्यक्तिघटितसन्निकर्षेण ग्रहे योग्य-

व्यक्तिभानस्यावश्यकत्वात् ॥ तथाचेति ॥ न च स्मर्यमाणतारत्वाद्यारोपः। प्रथमतस्तारत्वाद्यग्रहापातात् बाधकाभावाच्च। अत एव यथा लोहितः स्फटिक इत्यत्र जपात्वेनाप्रतीतस्यापि लौहित्येनैव प्रतीयमानस्य जपापुष्पस्य लौहित्यमारोप्यते, तथा ध्वनित्वेनाप्रतीतावपि तारत्वेनैव ध्वनीनां स्फुरणं स्यादिति निरस्तम्। गकारगतत्वे-बाधकाभावात् ॥

ननु तारत्वादयो न गकारादिजातयः। गत्वादिना सङ्करप्रसङ्गात्। न च नानैव तारत्वम्। ताराकारानुगतप्रतीत्यभावापत्तेः। न च गतारत्वाद्येव जातिः। तारत्वनिश्चयेऽपि गत्वे संशयात्। तारत्वमन्दत्वे च न जाती। सप्रतियोगित्वात्। नाऽपि तयोर्विरोधः, य एव गकारस्तार आसीत् स एवेदानीं मन्द इति कालभेदेन वक्तृभेदेन च तयोरेकत्र प्रतीतेः। तारान्मन्दोऽन्य इत्यपि धीरस्तीतिचेन्न। अभेदेन धर्मिणि भासमाने विशिष्टभेदबुद्धेर्धर्मभेदविषयत्वात्। पाकरक्ते घटे रक्तोऽयं न श्याम इति धीवत्। न च तारमन्दककारयोरभिभाव्याभिभावकभावात् तयोर्भेदः। तद्व्यञ्जकवाय्वोरेव तथात्वेन मन्दस्याग्रहणादिति बाधकादेव स्मर्यमाणारोपः स्यात्। अस्तु वा गृह्यमाणारोपः। श्रोत्रेणैव तद्ग्रहात्। चक्षुरादिना यत्र न वायुधर्मग्रहस्तत्रायोग्यत्वमुपाधिः। अन्यथा श्रोत्रेण स्वगुणो न गृह्येत, इन्द्रियस्य स्वगुणाग्राहकत्वात्। सन्तु वा तारमन्दरूपाभिन्ना एव गकाराः। तत्प्रत्यभिज्ञाने बाधकाभावात् ॥

उच्यते। शुकशारिकामनुष्यप्रभवेषु स्त्रीपुंसतद्विशेषप्रभवेषु चेक्षुक्षीरादिमाधुर्यवत् स्फुटतरं वैजात्यमनुभूयते। न चेदमौपाधिकम्। तत्त्वं हि आनुभविकम्, औपपत्तिकं वा ?। नाद्यः। इन्द्रियासन्निकर्षेण स्त्रीपुंसतद्विशेषाननुभवेऽपि शब्दभेदप्रत्ययात्। यतः स्त्रीपुंसप्रभवत्वमनुमीयते। अन्यथाऽन्योन्याश्रयात्। स्त्रीप्रभवत्वे ज्ञाते भेदधीस्ततश्च तदनुमानात्। नान्त्यः। उपाधेरन्वयव्यतिरेकानुविधानाभावात्। न च व्यञ्जकवायुवैजात्यं गकारगतत्वेन भासते, वायोश्च ज्ञानं तेनैव रूपेणेति वाच्यम्। गकारगतत्वे बाधकाभावात्। न चाभेदप्रत्यभिज्ञानं बाधकम्। य एव शुकशब्दः स एव स्त्रीशब्द इत्यननुभवात्। तथात्वे वा भेदज्ञानाभावेन वक्तृविशेषाननुमानापत्तेः। अस्ति च कोऽपि गकारस्य विशेषो यतो दिग्विशेषप्रभवत्व-

मनुमीयते । अव्यपदेश्यत्वेऽप्यानुभविकत्वात् । तस्माद् गकारादौ भेदे भासमानेऽनुगतबुद्धेर्गत्वादिकञ्जातिः । तारत्वमपि गत्वादिव्याप्यं भिन्नम् । अनुगतव्यवहारश्च, सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकरूपादनुगतादुपाधेः । तदज्ञाने च तद्व्यवहारासिद्धेः । परैरपि शुकादिगकारादिव्यञ्जकवायूनां वैजात्यं वाच्यम् । तत्र यदि शुकवर्णाभिव्यञ्जकवायुत्वं गकारव्यञ्जकवायुत्वव्याप्यं, तदा शुकककारव्यञ्जकवायौ न स्यात् । अथ व्यापकं, तदा सर्व एव गकारव्यञ्जकवायवः शुकवर्णाभिव्यञ्जकवायवः स्युरिति वायुवृत्तित्वेऽपि वैजात्यञ्चैव ॥

तथापि यावद्वक्तृभेदं नित्या एव वर्णाः सन्तु, तत्प्रत्यभिज्ञाने बाधकाभावात् । मैवम् । अस्ति हि स एवायं गकार इति प्रत्यभिज्ञानम्, अस्ति च तत्रोत्पादविनाशधीः । न चानयोरन्योन्यं विहायाऽन्यद् बाधकमस्ति । न चानयोरेकं भ्रमः । एकानन्तरं विशेषदर्शनेन अपरोत्पत्त्यभावापत्तेः । अतस्तयोरवश्यं विषयभेदो वाच्यः । एकविषयत्वे विरोधेनैकोत्तरमपरानुत्पादापत्तेः । एवञ्च भेदे भासमाने प्रत्यभिज्ञानस्य तज्जातीयत्वं विषयः । न चैवं तज्जातीयोऽयमिति तदाकारापत्तिः । तज्जातीयत्वविषयाया अपि बुद्धेः सोऽयमित्याकारदर्शनात् । यथा, तानेव शालीनुपभुञ्जते, तानेव तित्तिरीनिति । यत्र च प्रथमं न भेदधीस्तत्र प्रत्यभिज्ञानं व्यक्त्यभेदविषयम् । तस्माद् यत्र भेदधीस्तादितरबाधकाबाध्या । तत्र प्रत्यभिज्ञानमेव न भवति, भवद्वा तज्जातीयत्वमालम्बते इत्यस्मत्पितृचरणाः ॥

सत्प्रतिपक्षत्वञ्च वस्तुतस्तुल्यबलेन, तत्तया प्रतिसंहितेन वा ? । नाद्य इत्याह ॥ मिथ इति ॥ तथात्वे वा वस्तुनो विरुद्धद्वैरूप्यापत्तेरिति भावः ॥ अङ्गं पक्षसत्त्वादि ॥ अस्य शब्दानित्यत्वसाधनस्य । द्वितीयं शङ्कते ॥ तथापीति ॥ न केवलं प्रतिपक्षतादशायां, साधनदशायामपीत्यपेरर्थः । न द्रव्यं समवायिकारणं यस्य तदद्रव्यम् । अद्रव्यत्वादित्युच्यमाने प्रागभावेन व्यभिचारः स्यादिति द्रव्यं विशेषणम् ॥ असिद्धिरिति । विशेषणविशेष्ययोरित्यर्थः । असिद्धस्य न सत्प्रतिपक्षत्वसाधनत्वे इति भावः । विशेष्यसिद्धौ मानमाह ॥ द्रव्यमिति ॥ संयोगसमवायान्यतरत्वं सम्बन्धे साक्षात्त्वम् । यद्यपि भट्टानां श्रोत्रेण शब्दस्याजः संयोगोऽन्येषां समवाय इति साक्षात्

सम्बन्धेन गृह्यमाणत्वं न कस्याप्यसिद्धं, तथापि शब्दस्य गुणत्वाऽनभ्युपगमे तत् प्रत्येतुमशक्यमित्युपजीव्यविरोध इत्याशयवानाह ॥ नहीति॥ सदादीति ॥ सत्तावत्त्वजातिमत्त्वादिनेत्यर्थः । इतरनिषेधकवद् द्रव्यत्वेऽपि निषेधकसत्त्वात्तन्निषेधे गुणत्वसिद्धौ द्रव्यत्वसाधकं बाधितमित्याह ॥बाधकेति॥ परिशेषसिद्धिमभ्युपेत्याह॥ तस्मादिति ॥ द्रव्यादिकोटिसंशयप्रवृत्तेरेकदेशे कर्मादिकोटौ संशयोच्छेदेऽपि द्रव्यगुणकोटिमादाय संशयस्य तादवस्थ्याद् द्रव्यत्वे बाधिते क तत्साधनत्वमित्यर्थः ॥ बहिरिन्द्रियेति ॥ चक्षुरग्राह्यबहिरिन्द्रियग्राह्यजातिमत्त्वाद्रसादिवदित्यर्थः । अथ परिशेषो नोपजीव्यस्तत्राह ॥ नन्वेति॥ अनेन द्रव्यत्वसाधनस्य प्रतिरुद्धत्वादद्रव्यद्रव्यत्वासिद्धौ न तेनाऽनित्यत्वसाधने सत्प्रतिपक्षत्वमित्यर्थः ॥

ननु गुणत्वेऽपि बाधकाद् न तत्सिद्धिस्ततो न आदिलिङ्गग्राहकमानबाध इत्याह—

ननु शब्दस्तावदश्रोत्रगुणो नैवेति त्वयैव साधितं प्रबन्धेन । न च श्रोत्रगुणः । तेन गृह्यमाणत्वात् । यद् येनेन्द्रियेण गृह्यते नासौ तस्य गुणः । यथा गृह्यमाणो गन्धादिः । श्रोत्रं वा न स्वगुणग्राहकम्, इन्द्रियत्वाद् घ्राणवदिति न गुणत्वसिद्धिरिति चेत् । ततः किम्? । न चैतदपि । घ्राणादिसमवेतगन्धाद्यग्रहे स्वगुणत्वस्याऽप्रयोजकत्वात् । अयोग्यत्वं हि तत्रोपाधिः । अन्यथा, सुखादिर्नात्मगुणः । तेन गृह्यमाणत्वाद् रूपादिवत् । न वा तेन गृह्यते, तत्समवेतत्वाददृष्टवत् । आत्मा वा न तद्ग्राहकः । तदाश्रयत्वाद्, गन्धाद्याश्रयघटादिवदित्याद्यपि शङ्केत । तस्मात् स्वगुणः परगुणो वाऽयोग्यो न गृह्यते । गृह्यते तु योग्यो योग्येन । तत् किमत्राऽनुपपन्नम् । अवश्यञ्च श्रोत्रेण विशेषगुणग्राहिणा भवितव्यम् । इन्द्रियत्वात् । अन्यथा तन्निर्माणवैय-

ध्यात् । तदन्यस्येन्द्रियान्तरेणैव ग्रहणात् । न च द्रव्यविशेषग्रहणे तदुपयोगः । विशेषणयोग्यतामाश्रित्यैवेन्द्रियस्य द्रव्यग्राहकत्वात्, न द्रव्यस्वरूपयोग्यतामात्रेण । अन्यथा चान्द्रमसं तेजः स्वरूपेण योग्यमिति तदप्युपलभ्येत । आत्मा वा मनोग्राह्य इति सुषुप्त्यवस्थायामप्युपलभ्येत । अनुद्भूतरूपेऽपि वा चक्षुः प्रवर्त्तेत । तस्माद् गुणयोग्यतामेव पुरस्कृत्येन्द्रियाणि द्रव्यमुपाददते, नातोऽन्यथेति स्थितिः । अत एव नाकाशादयश्चाक्षुषाः ॥

अस्तु तर्हि शब्दो नित्यः । नित्याकाशैकगुणत्वात् । तद्गतपरममहत्परिमाणवदिति प्रत्यनुमानमितिचेन्न । अकार्यत्वस्योपाधेर्विद्यमानत्वात् । अन्यथा,आत्मविशेषगुणा नित्याः,तदेकगुणत्वात् । तद्गतपरममहत्त्ववदित्यपि स्यात् । अस्य प्रत्यक्षबाधितत्वादहेतुत्वमितिचेन्न। निरुपाधेर्बाधानवकाशात् । स्वभावप्रतिबद्धस्य च तत्परित्यागे स्वभावपरित्यागप्रसङ्गात् । तस्माद् बाधेन वोपाधिरुन्नीयते,अन्यथा वेति न कश्चिद्विशेषः ॥

एनेन श्रावणत्वाच्छब्दत्ववदित्यपि परास्तम् । अत्रापि तस्यैवोपाधित्वात् । अन्यथा गन्धरूपरसस्पर्शा अपि नित्याः प्रसज्ज्येरन् । घ्राणाद्येकैकेन्द्रियग्राह्यत्वाद् गन्धत्वादिवदित्यपि प्रयोगसौकर्यात् ॥

विरोधव्यभिचारावसम्भावितावेवाऽत्रेत्यसिद्धिरवशिष्यते । साऽपि नास्ति । तथाहि । शब्दस्तावत् पूर्वन्यायेन स्वाभाविकतीव्रमन्दतरतमादिभावेन प्र-

कर्षनिकर्षवानुपलभ्यते । इयञ्च प्रकर्षनिकर्षवत्ता कारणभेदानुविधायिनी सर्वत्रोपलब्धा । अकारणका हि नित्याः प्रकर्षवन्त एव भवन्ति, यथाऽऽकाशादयः । निकृष्टा एव वा, यथा परमाण्वादयः । न तु किञ्चिद्‌तिशयानाः कुतश्चिदपकृष्यन्ते । तदियं नित्येभ्यो व्यावर्त्तमाना कारणवत्सु च भवन्ती जायमानतामादायैव विश्राम्यतीति प्रतिबन्धसिद्धौ प्रयुज्यते । शब्दो जायते, प्रकर्षनिकर्षाभ्यामुपेतत्वान्माधुर्यादिवत् । अन्यथा, नियामकमन्तरेण भवन्ती नित्येष्वपि सा स्यात् । नियमहेतोरभावात् । शब्दादन्यत्रेयं गतिरितिचेन्न । साध्यधर्मिणं विहायेति प्रत्यवस्थानस्य सर्वानुमानसुलभत्वात् । न चेद् व्यञ्जकतारतम्याद्व्यञ्जनीयतारतम्यम्, अस्वाभाविकत्वप्रसङ्गात् । व्यवस्थितञ्च स्वाभाविकत्वम् । न च व्यञ्जकोत्पादकाभ्यामन्यस्यानुविधानमस्ति । न च स्वाभाविकत्वौपाधिकत्वाभ्यामन्यः प्रकारः सम्भवति ॥

नन्विति ॥ गुणत्वासिद्धावपि द्रव्यत्वासिद्धौ न साक्षात्सम्बन्धेन गृह्यमाणत्वे प्रमाणमुक्तं स्यादित्याह ॥ तन इति ॥ ननु गुणत्वे निषिद्धे परिशेषाद् द्रव्यत्वं सेत्स्यतीत्यत आह ॥ न चेति ॥ प्रथमानुमाने श्रोत्रयोग्यगुणत्वव्याप्यजातिशून्यत्वमुपाधिरन्त्यानुमाने त्वयोग्यगुणत्वमुपाधिरित्यप्रयोजकत्वमुभयत्रेत्यर्थः । अत एवाप्रयोजकान्तरतुल्यत्वमाह ॥ अन्यथेति ॥ साक्षात्संबन्धेन गृह्यमाणत्वादित्यत्र प्राणेन्द्रियत्वावच्छिन्नसाध्यव्यापकं सावयवकत्वमुपाधि । ननु बाहिरिन्द्रियव्यवस्थापकत्वमप्यप्रयोजकमित्याशङ्क्य तत्र विपक्षबाधकमाह ॥ अवश्यञ्चेति ॥ अत्रापि विपक्षबाधकमाह ॥ अन्यथेति ॥ ननु स्वरूपयोग्यतैव द्रव्यप्रत्यक्षत्वे तन्त्रम्, अत एव विशेषगुणशून्यानां कालादीनां न प्रत्यक्षत्वमित्यत आह ॥ तस्मादिति ॥ न च नाद एव तस्य

विशेषगुणः स्यात् । ध्वन्यात्मकस्य नादस्याग्रहेऽपि वर्णसाक्षात्कारात् । नाऽपि तारत्वादिकं तेषामुत्कर्षादिरूपतया जातित्वात् । अत एव तस्य जातिरूपत्वेऽप्यवधिनिरूप्यत्वमिति भावः ॥ अत एवेति ॥ तद्विशेषगुणस्य चक्षुरग्राह्यत्वादित्यर्थः ॥

आकाशैकेति ॥ अनेकगुणेन संयोगादिना व्यभिचारवारणार्थमेकग्रहणम् । अत्र यद्यपि आकाशैकगुणत्वमाकाशमात्रवृत्तिगुणत्वं, तत्र गुणत्वं व्यर्थम् । तथापि ध्वंसानवच्छिन्नसत्तायोगित्वं साध्यम् । तत्र विशेषपदार्थेऽनैकान्तिकवारणार्थं गुणग्रहणमित्याहुः ॥ अकार्यत्वस्येति ॥ पूर्वसाधनव्यतिरेकोऽपि साध्यप्रयोजकतया यथोपाधिस्तथोक्तमधस्तात् । अपिचोपाधेर्नित्यदोषत्वात् साधनपौर्वापर्यस्य चानियतत्वाद्यदा तदेव साधनं स्थापनायां प्रयुज्यते तदा सोपाधिः, यदा तु दूषणतया तदेवोच्यते तदा पूर्वसाधनव्यतिरेकादकार्यत्वमनुपाधिरिति तदेव नित्यत्वेन व्याप्तमव्याप्तञ्चेति महद्वैशसमिति भावः । उपाधेः साध्यव्यापकताग्राहकं तर्कमाह ॥ अन्यथेति ॥ निरुपाधेरिति॥बाधे हि पक्षाभिमते व्यभिचारस्तत्र चावश्यमुपाधिरित्यर्थः । एतच्च जलह्रदो वह्निमान् धूमवत्त्वादित्यादावपक्षवृत्तिनि साधने नास्तीति पक्षधर्मे तत्र बोद्धव्यम् ॥ अन्यथा वेति॥ बाधमनुपजीव्येत्यर्थः ॥

श्रावणत्वादिति ॥ गुणवृत्तिजात्यनभ्युपगन्तृमते शब्दत्वं श्रोत्रग्राह्यत्वम् । तत्र न श्रावणत्वमिति कालस्य षडिन्द्रियवेद्यत्वात् स एव दृष्टान्त इति भावः ॥ तस्यैवेति ॥ अकार्यत्वस्यैवेत्यर्थः । शब्दो नित्यः पृथिवीतरनित्यभूतविशेषगुणत्वाद्, अपाकजनित्यभूतैकसमवेतत्वात् । जलपरमाणुरूपवत् । अव्यासज्ज्यवृत्तित्वे सत्यनात्मविभुगुणत्वाद्, विशेषगुणान्तरासमानाधिकरणैकवृत्तिगुणत्वात् । कालपरिमाणवदित्यत्राप्यकार्यत्वमुपाधिरिति भावः॥ पूर्वोक्तेति ॥ उपाधेरनुपलम्भेन तद्व्रततया चोपलम्भेन चेत्यर्थः ॥ प्रकर्षनिकर्षाभ्यामिति ॥ ननूत्कर्षापकर्षयोर्जात्योर्जातिसङ्करापत्त्या रसत्वशब्दत्वव्याप्यजात्योर्भिन्नत्वेन रसशब्दसाधारण्यं साधनावच्छिन्नसाध्यव्यापकस्य मूर्त्तगुणत्वस्य स्पर्शवत्समवेतत्वस्य चोपाधित्वञ्च । मैवम् । उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्तजातिमत्त्वादिति विवक्षितत्वात् । रसत्वादिव्याप्यजातिभेदेऽपि तादृशशब्दप्रवृत्तिनिमित्तत्वस्य साधारण्यात्,

सर्वत्र वर्णात्मकशब्दपक्षीकरणे चानित्यध्वनिषु व्योमगुणेषूपाधीनां साध्याव्यापकत्वात् पक्षमात्रव्यावर्त्तकविशेषणवत्त्वेन पक्षेतरत्वतुल्यत्वाच्चेति भावः ॥

विपक्षबाधकाभावेनोत्पत्तिमत्त्वमप्रयोजकमित्याह—

**स्यादेतत् । तथाप्युत्पत्तेर्नित्यत्वेन को विरोधो येन प्रतिबन्धासिद्धिः स्यात् ? । असिद्धे च तस्मिन्, भवतां व्यापकत्वासिद्धोऽस्माकमप्रयोजकः । सौगतानां सन्दिग्धविपक्षवृत्तिरयमुपक्रान्तो हेतुरितिचेन्न । इदं ह्युत्पत्तिमत्त्वं विनाशकारणसन्निधिविरुद्धेभ्यो नित्येभ्यः स्वव्यापकानिवृत्तौ निवर्त्तमानं विनाशकसन्निधिमन्ति विनाशीनि विश्राम्यतीति । विनाशकारणसन्निधानेनावश्यं जायमानस्य भावितव्यमिति कुतो निर्णीतमितिचेन्न । तदसन्निधानं हि न तावदाकाशादेरिव, स्वभावविरोधात् । उत्पत्तिविनाशयोः संसर्गदर्शनात् । अविरुद्धयोरसन्निधिस्तु देशविप्रकर्षाद् हिमवद्विन्ध्ययोरिव स्यात् । देशयोरपि विप्रकर्षो विरोधाद्वा हेत्वभावाद्वा । पूर्वोक्तादेव न प्रथमः। द्वितीयस्तु पटकुङ्कुमयोरिव स्यात् । यदि कुङ्कुमसमागमादर्वागिव प्रध्वंसकसंसर्गादर्वागेव पटो विनश्येत् । यथा हि विनाशकारणं विना न विनाशः,तथा यदि कुङ्कुमसमागमं विना न विनाशः पटस्येति स्यात् । कस्तयोः संसर्गं वारयेत् । तस्मादविरुद्धयोरसंसर्गः कालविप्रकर्षनियमेन व्याप्तः । स चातो निवर्त्तमानः स्वव्याप्यमुपादाय निवर्त्तते इति प्रतिबन्धसिद्धिः ॥**

तथापीति ॥ उत्पत्तिमदपि किञ्चिन्नित्यं स्यादित्यर्थः ॥ स्वव्यापकेति ॥ उत्पत्तिमत्त्वव्यापकं विनाशकारणं, तस्य निवृत्तावित्य-

ऽर्थः ॥ पूर्वोक्तादेवेति ॥ उत्पत्तिविनाशयोः संसर्गदर्शनादेवेत्यर्थः ॥ द्वितीयस्त्विति ॥ पटकुङ्कुमयोः संसर्गस्तावदविरुद्धोऽपि कस्यचित्पटस्यान्तरा ध्वंसान्न भवति । तद् यदि विनाशकसंसर्गं विनैव नाशः स्यात्तदा नाशकाऽसान्निधिः स्यात् । न त्वेवमित्यर्थः ॥ तस्मादिति ॥ यद्यपि अत्रापि व्याप्यभावप्रयोजकत्वशङ्का तदवस्थैव, तथापि भावानां नाशं प्रति स्वरूपयोग्यत्वमुत्पत्तिमत्त्वेनैवावच्छिद्यते इति न शङ्केति भावः ॥ स चेति ॥ स कालविप्रकर्षस्तदा स्याद्यदि नाशकसम्बन्धमनपेक्ष्यैव कार्यस्य नाशः स्यात् । न चैवमित्यर्थः । एवं, शब्दोऽनित्यः, व्यापकप्रत्यक्षविशेषगुणत्वात्, सुखवत् । बहिरिन्द्रियव्यवस्थाहेतुगुणत्वाद्, भूतप्रत्यक्षविशेषगुणत्वाद्, अस्मदादिप्रत्यक्षविशेषगुणत्वाद्, गन्धवदित्याद्यूहनीयम् । हेत्वाभासानां निरासादिति ॥

ननु वर्णानित्यत्वे गृहीतसङ्गतिकपदनाशे कालान्तरे पदादगृहीतसङ्गतिकादर्थप्रतीतिर्न स्यादित्यर्थप्रतीत्यन्यथानुपपत्त्या शब्दनित्यत्वं स्यादित्याह—

**स्यादेतत् । यद्येवमस्थिरः शब्दः कथमर्थेन सङ्गतिरस्योपलभ्यते इतिचेत् । यथैवार्थस्यास्थिरस्य तेन । जातिरेव पदार्थो, न व्यक्तिरितिचेन्न । शब्दात्तदलाभप्रसङ्गात् । आक्षेपत इतिचेत्, कः खल्वयमाक्षेपो नाम ? । न तावदनुमानम् । अनन्ताभिः सह सङ्गतिवदविनाभावस्यापि ग्रहीतुमशक्यत्वात् । शक्यत्वे वा, सङ्गतेरपि तथैव सुग्रहत्वात् । व्यक्तिमात्ररूपेणाऽविनाभाव इति चेन्न । व्यक्तित्वस्य सामान्यस्याभावात् । भावे वा, तदाक्षेपेऽपि विशेषानाक्षेपात् । वाच्यत्वमपि वा तथैवास्तु, किमाक्षेपेण ? । सङ्गतेरविरोधादिति । अर्थापत्तिराक्षेप इतिचेन्न । व्यक्त्या विना किमनुपपन्नम् ? । जातिरितिचेन्न । तन्नाशानुत्पाददशायामपि सत्त्वात् । तथापि न व्यक्तिमात्रं**

**विनेतिचेन्न । मात्रार्थाभावात् । व्यक्तिज्ञानमन्तरेण जातिज्ञानमनुपपन्नमितिचेन्न । तदभावेऽप्युत्पादात् । व्यक्तिविषयत्वं विना जातिविषयता तस्यानुपपन्नेति चेन्न । एवं तर्ह्येकज्ञानगोचरतायां किमनुपपन्नं किं प्रतिपादयेदिति । जातीनामन्वयानुपपत्त्या व्यक्तिरवसीयते इति चेन्न । परस्पराश्रयप्रसङ्गात् ॥**

यद्येवमिति ॥ तथा सति, गृहीतसङ्केतघटनाशे तदन्यघटव्यक्तेः पदात् प्रतीतिर्न स्यात् । अथानित्येऽपि घटादावेकधर्मोपग्रहेण शक्तिग्रहस्तर्ह्यनित्ये पदेऽपि स तथैवास्त्वित्याह ॥ यथैवेति ॥ तेन शब्देनेत्यर्थः ॥

ननु यद्यपि आनयनादिव्यवहाराद्, व्यक्तावेव शक्तिरुचिता, तथाप्यानन्त्यव्यभिचाराभ्यां शक्तिग्रहस्तत्र न सम्भवति । सर्वव्यक्तेः शक्यत्वे, गां दद्यादित्यादौ सर्वोपादानासामर्थ्यादननुष्ठानापत्तिरेकशक्यत्वेऽनध्यवसायः । नापि गोत्वेनोपलक्षिता व्यक्तिः शक्येति न शक्यानन्त्यव्यभिचारौ । रूपान्तरेण ज्ञातस्यैवान्येन रूपेण लक्ष्यत्वात् । काकेन गृहविशेषस्येव । न च व्यक्तीनाञ्जातिं विना रूपान्तरमस्ति । गोत्वविशिष्टे कार्यान्वयेन गोत्वस्य विशेषणत्वाच्च । न च व्यक्तिः शक्या गोत्वमवच्छेदकं, कारणत्वे दण्डत्ववत् । गोपदाद् गोत्वविशिष्टबुद्धेरनुत्पादापत्तेः । अत एव न जातिविशिष्टे शक्तिः । विशेष्यभेदाद्विशिष्टानन्त्यात् । तस्माज्जातिरेव पदानां शक्या, न व्यक्तिरिति नोक्तदोष इत्यभिप्रेत्याह ॥जातिरेवेति॥ तर्हि जातिशक्तात् पदाद् व्यक्त्युपस्थितिर्न स्यादित्याह ॥ शब्दादिति ॥ न पदात् तदुपस्थितिः, किन्त्वाक्षेपत इत्याह ॥ आक्षेपत इति ॥ ननु जातिव्यक्त्योरेकवित्तिवेद्यत्वादाक्षेपः । समानानां भावः सामान्यं, समानां व्यक्तिं विना न भासते इतिचेन्न । स्वरूपेणैव जातेः शक्यत्वात् । सामान्यत्वन्तु तद्धर्मो, न तु तत्स्वरूपम् । प्रत्यक्षादौ तु जातिज्ञानस्य व्यक्तिविषयतानियमो व्यक्तिज्ञानसामग्रीसमाजाधीनः । गोत्वं गवाविषयज्ञानविषयो जातित्वाद् गोभिन्नमात्रवृत्त्यादेरिति जातिमात्रधीसिद्धेश्च । अथ यद्यत्परतन्त्रं तत्तेनैकवित्तिवेद्यं, यथाऽर्थपरतन्त्रज्ञान-

मर्थेन, जातिश्च व्यक्तिपरतन्त्रेति व्यक्तौ भासमानायामेव भासते इति चेन्न। परतन्त्रत्वं हि न परसमवेतत्वं, शब्दादिना व्यभिचारात् । नापि तन्निरूपणाधीननिरूपणत्वम् । असिद्धेः । नापि परस्मिन् भासमान एव भासमानत्वम् । साध्याविशेषात् । तस्माद्गोत्वं व्यक्त्याश्रितं जातित्वादित्यनुमानाद्गोत्वाश्रयव्यक्तिज्ञानमिति भावः । व्याप्तिरपि शक्तिरिव व्यक्तीनामानन्त्यान्न ग्राह्या इत्याह ॥ अनन्ताभिरिति ॥ अथैकरूपावच्छेदेन व्याप्तिग्रहस्तदा शक्तिग्रहोऽपि तथैवास्त्वित्याह॥ शक्यत्वे वेति ॥ गोत्वस्य व्यक्त्याश्रितत्वव्याप्तेः पक्षधर्मताबलाद् गोव्यक्तिलाभः स्यादित्याह ॥व्यक्तिमात्रेति॥ व्यक्त्याश्रितत्वव्याप्तिरपि न व्यक्तित्वमनुगतं विना प्राप्नोति । न च तज्जातिः । जातेरपि व्यक्तित्वादित्याह ॥ व्यक्तित्वेति ॥ उपाधित्वे तस्य दोषमाह ॥ भावे वेति ॥ व्यक्तिमात्रलाभेऽपि व्यक्तिविशेषानाक्षेपात्तत्प्रतीत्यनुपपत्तिरित्यर्थः ॥

ननु पक्षधर्मताबलाद्व्यक्तिविशेषः सिद्ध्येदित्यभिप्रेत्याह ॥ वाच्यत्वमपीति ॥ यदि व्यक्तित्वेनोपस्थिते व्याप्तिस्तदा गोत्वेनोपस्थिते शक्तिग्रहोऽपि स्यादित्यर्थः। वस्तुतः पक्षधर्मताबलाद्विशेषस्य भानेऽपि विशेषत्वेनोपस्थितिर्न स्यादनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादिति भावः ॥

व्यक्तिं विना जातिरनुपपन्ना तामाक्षिपतीत्याह॥अर्थापत्तिरिति॥तन्नाशेति ॥व्यक्तिं विनाऽपि गोत्वस्योक्तरीत्या प्रतीतेर्नानुपपत्तिरित्यर्थः । यद्यप्येकव्यक्तिनाशानुत्पाददशायामपि जातिरस्ति, तथापि व्यक्त्यन्तरमस्त्येवेति न व्यक्तिमात्रं विना जातिरस्तीत्याह ॥ तथापीति ॥ मात्रार्थो हि नाऽशेषव्यक्तिः, एकव्यक्तिनाशेऽपि गोत्वादेर्नाशात् । नापि व्यक्तित्वं, तद्धि न जातिरुक्तदोषात् । उपाधित्वे तु व्यक्तित्वेन उपस्थितसर्वव्यक्त्यन्यथानुपपत्तिग्रहवच्छक्तिग्रहोऽपि स्यादित्याह ॥ मात्रार्थेति ॥ तदभावेऽपीति ॥ गोभिन्नभावत्वेन गां विनाऽपि त्वया गोत्वज्ञानाभ्युपगमादित्यर्थः ॥एवं तर्हीति॥ व्यक्तिं विना जातेरज्ञानात् केवला जातिर्नोपस्थितेति जातित्वविशिष्ट एव पदानां शक्तिः । विशिष्टानामानन्त्येऽप्येकत्र विशिष्टे तत्त्वं विहाय गोत्वमादाय गोत्वविशिष्टं शक्यमिति शक्तिग्रहात् सर्वत्रोदासीनगोः शक्यत्वाद्यत्किञ्चिदेकोपादानेऽपि गोरुपादानाच्चोपादानाशक्यत्वमेकोपादानेऽनध्यवसायो वा,व्यक्तिवाचकपश्वादिपदवदुपपत्तेः । वस्तुतो नानु-

मानार्थापत्तिभ्यां व्यक्तिलाभः । न हि यत्र यदा वा गोत्वं तत्र तदा वा, यद्गोत्वं सा व्यक्तिरिति वा व्याप्तिर्व्यभिचारात् । नापि जातित्वं व्यक्त्याश्रितत्वे लिङ्गम् । जातित्वस्य पदादनुपस्थितेः । तथात्वे वा, जातिरिति वेद्यैव व्यक्तिः, नित्यानेकसमवेतत्वस्य जातित्वात् । व्यक्तेश्चापदार्थत्वे विभक्त्यर्थसंख्याकर्मत्वादेर्व्यक्तावनन्वयः स्यात् । सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् । न च प्रकृतितात्पर्यविषये तदन्वयव्युत्पत्तिः । लक्षणोच्छेदापत्तेः । एवं तर्हि गामानयेत्यादौ जातेरानयनाद्यन्वयानुपपत्त्या जातिशक्तपदेन व्यक्तिर्लक्ष्यते । अत एव व्यक्तेः प्रकृतिप्रतिपाद्यत्वे विभक्त्यन्वयस्तत्र सङ्गच्छत इत्याह ॥ जातीनामिति ॥ जातिज्ञाने सति लक्षणया व्यक्तिज्ञानं, व्यक्तिमादाय जातिज्ञानमित्यन्योन्याश्रय इत्याह ॥ परस्परेति ॥ वस्तुतः स्वार्थादन्येन रूपेण ज्ञाते लक्षणा, तीरत्वेन ज्ञाते गङ्गापदस्येव । न च गोत्वादन्येन रूपेण व्यक्तेरुपस्थितिः, किन्तु गोत्वेनैव । न च व्यक्तित्वेन तदुपस्थितिः । गोपदाद् व्यक्तित्वप्रकारकबुद्ध्यापत्तेः । गां पश्य, गौरस्तीतिप्रतीत्यादौ जातेरप्यन्वययोग्यत्वे व्यक्तेरलाभप्रसङ्गश्च । तस्मादेकवित्तिवेद्यत्वान्न व्यक्तेराक्षेपः, किन्तु विशिष्टे शक्तिरेवेति भावः ॥

ननु जातिशक्ततया ज्ञातं पदं प्रथमं जातिं बोधयति, अनन्तरं स्वरूपसद्व्यक्तिशक्त्या व्यक्तिम् । एवञ्च जातौ ज्ञाता शक्तिर्बोधिका, व्यक्तौ तु स्वरूपसती । यथा लिङ्गं वह्निसामान्यव्याप्ततया ज्ञातं तद्विशेषव्याप्ततयाऽनवगतमपि वस्तुगत्या व्यापकं गमयतीत्याशयवानाह—

**स्यादेतत् । प्रतिबन्धं विनाऽपि पक्षधर्मताबलाद् यथा लिङ्गं विशेषे पर्यवस्यति, तथा सङ्गतिं विनाऽपि शब्दः शक्तिविशेषाद्विशेषे पर्यवस्यति । स एवाऽऽक्षेप इत्युच्यतेइतिचेद्, न तावत् प्रतीतिः क्रमेण । अपेक्षणीयाभावेन विरम्य व्यापारायोगात् । जातिप्रत्यायनमपेक्षते इति चेत्, कृतं तर्हि शब्दशक्तिकल्पनया । तावतैव तत्सिद्धेः । ओमितिचेन्न । व्यक्त्य-**

नालम्बनाया जातिप्रतीतेरसम्भवादित्युक्तत्वात् । प्रमाणान्तरापातप्रसङ्गाच्च । स्मरणं तदित्ययमदोष इति-चेन्न । अननुभूतानन्वयप्रसङ्गात् । अस्त्वेकैव प्रतीति-रिति चेत्, कृतं तर्हि शक्तिभेदकल्पनया । एवञ्च यथा सामान्यविषया शक्तिरेकैव तद्वति पर्यवस्यति, तथा सामान्याश्रया सङ्गतिस्तद्वति पर्यवस्येदिति ॥

स्यादेतदिति ॥ प्रतिबन्धं विना,प्रतिबन्धग्रहं विना । शक्तिविशेषात् स्वरूपसद्याक्तिशक्तेः । एवं पदाद् युगपदेव जातिव्यक्तिज्ञानं स्यादुभयज्ञानसामग्र्या वृत्तत्वादित्याह । न तावदिति । व्यक्तिज्ञाने कर्तव्ये जातिशक्ततया ज्ञातं पदं जातिज्ञानमपेक्षते इति क्रम इत्याह॥ जातीति ॥ यदि जातिज्ञानं व्यक्तिज्ञानहेतुस्तदा किं व्यक्तिशक्त्या? । जातिज्ञानादेव व्यक्तिशक्तिं विनाऽपि तज्ज्ञानोपपत्तेरित्याह ॥ कृत-मिति ॥ नास्त्येव व्यक्तौ शक्तिः, जातिज्ञानमेव व्यक्तिज्ञानहेतुरस्त्वि-त्याह ॥ ओमिति ॥ स्यादेवं यदि व्यक्त्यविषयं जातिज्ञानं स्यान्न त्वेवमित्याह ॥ व्यक्तीति ॥ किञ्चैवं व्यक्तिज्ञाने पदानामकरणत्वे जातिज्ञानं मानान्तरं स्यादित्याह ॥ प्रमाणेति ॥ जातिज्ञानकरणक-मपि व्यक्तिज्ञानं स्मरणं नानुभव इति, न तन्मानान्तरमित्याह ॥ स्मरणमिति॥एवं गामानयेति वाक्यादननुभूतगोव्यक्त्यननुभवप्रसङ्ग इत्याह ॥ अननुभूतेति ॥ अस्तु तर्हि जातिव्यक्तिविषयैकैव धीरुभय-शक्तिसाध्येत्याशङ्कते ॥ अस्त्विति ॥ उभयविषयैकशक्त्यैवैकज्ञानोप-पत्तौ शक्तिद्वयकल्पनं व्यर्थमिति परिहरति ॥ कृतमिति ॥ ननु मा भूच्छक्तिभेदकल्पनं भवतु सङ्गतिरप्येका तथापि कथं प्रकृतसिद्धि-रित्यत आह ॥ एवञ्चेति ॥ यथा पटत्वसामान्यविषया पटपदस्य शक्तिर्व्यक्तौ पर्यवस्यति, न तु यत्र पृथक्शक्तिस्तथा शब्दानित्यत्वेऽपि शब्दत्वसामान्यस्यैव शक्तिः पटशब्दे वाचकत्वव्यवहारं करो-ति, न तु पटशब्दस्य जातिवाचकत्वं पृथगित्यर्थः ॥

प्राभाकरास्तु– व्यक्तौ जातिरनुगमिका विशेषिकाऽवश्यवाच्या चेति नागृहीतविशेषणान्यायेन सैव वाच्या। न च जातावपि व्यक्ति-रेव विशेष इति नागृहीतविशेषणान्यायो व्यक्तावपीति वाच्यम् ।

जातेः स्वत एव व्यावृत्तत्वात् । अन्यथाऽन्योन्याश्रयात् । स्वतोव्यावृत्तत्वं च परेषामन्त्यविशेषस्येव स्वाश्रयवत् स्वस्मिन् व्यावृत्तधीजनकत्वम् । व्यक्तिधीस्तु जातिशक्तादेव पदात् । गोपदं हि नियमतो जातिव्यक्ती बोधयति । तत्रास्य जातिशक्तिज्ञानमेव सहकारि कल्प्यते । लाघवादावश्यकत्वाच्च । न तु व्यक्तिशक्तिज्ञानं, गौरवात् । जातिशक्तिज्ञाने सति तज्ज्ञानं विना व्यक्तिज्ञाने विलम्बाभावाच्च । यथा परेषां पदार्थशक्तादेव पदादन्वयधीः । यद्वा, जातिशक्तिज्ञानाज्जातिज्ञानं जायमानं व्यक्तिमपि विषयीकरोति । यद्येन विना न भासते, तज्ज्ञानहेतोस्तद्बोधकत्वनियमात् । अन्यथा, जातिमपि न बोधयेत् । तस्मादेकवित्तिवेद्यत्वनियमाज्जातिज्ञानार्थं क्लृप्ता शक्तिर्व्यक्तिमपि ज्ञापयति । न च,जातिं विनाऽपि प्रत्यक्षादिनाऽपि व्यक्तिज्ञानादन्यैव व्यक्तिज्ञानसामग्री । जातिविशिष्टज्ञानं चोभयज्ञापकसामग्रीसमाजादिति वाच्यम् । जातिव्यक्त्योः प्रत्यक्षादिना बोधे सामग्रीभेदेऽपि शाब्दव्यक्तिबोधे जातिशक्तिज्ञानस्यैव हेतुत्वात् । लाघवात् । तत्सत्त्वे तत्र विलम्बाभावेन सामग्र्यन्तराकल्पनाच्च । न चैवं व्यक्तिज्ञानस्य शाक्यत्वात्तद्विषयत्वाज्जातिवद् व्यक्तिरपि शक्या स्यात् । यद्विषयतया ज्ञाने ज्ञाता शक्तिरुपयोगिनी तस्यैव विषयतया शक्यतावच्छेदकस्य शक्यत्वात् । एवञ्च जातिव्यक्तिज्ञानजनकत्वादुभयत्रापि पदशक्तिः । जात्यंशे तु सा ज्ञाता हेतुः । परेणाऽप्यन्वये कुब्जशक्तिस्वीकारात् ॥

उच्यते । शक्यज्ञाने विषयतया जातेरवच्छेदकत्वं व्यक्तिमादायैव ज्ञायते, न तु केवलायाः । व्यक्तिं विना जातेरज्ञानादिति जातेरवच्छेदकत्वे नागृहीतविशेषणान्यायाद्व्यक्तेरवच्छेदकत्वमावश्यकमिति शक्यज्ञाने विषयतयाऽवच्छेदकत्वाज्जातिवद्व्यक्तिरपि शक्या । यद्वा, प्रथमं व्यवहारानुमितव्यक्तिज्ञाने पदानुविधानात् पदं शक्तमित्यवधारयति । न तु जातिज्ञाने, व्यवहाराहेतुत्वेन तदा तस्यानुपस्थितेः । पश्चाद्व्यक्तेर्व्यावृत्त्यर्थमनुगमार्थञ्च जातिरपि तद्विषय इति मानान्तरेण ज्ञात्वा जातिज्ञानेऽपि तत्पदस्य कारणतां प्रत्येति । तथा च व्यक्तिशक्तिज्ञानमपि कारणम् । न च जातिशक्तिज्ञानेनान्यथासिद्धिः । व्यक्तिज्ञानकारणतामुपजीव्य जातिज्ञानकारणताग्रह इति उपजीव्यविरोधात् । अपि च, पदस्य व्यक्तिज्ञानार्थं शक्यज्ञाने विषयतया

व्यक्तेरवच्छेदकत्वमात्रं कल्पयति । लाघवात् । जातिविषयत्वाद्यक्ति-विषयत्वस्य ज्ञानवित्तिवेद्यत्वेनावश्यं शीघ्रोपस्थितत्वात् । न तु जातौ शक्तिं तज्ज्ञानं कारणान्तरं वा तदवच्छेदकं कल्पयति गौरवात् । शक्तिग्रहकाले तेषां कल्पनीयोपस्थितिकत्वाच्चेत्यस्मत्पितृचरणाः ॥

इदानीं वर्णनित्यतापक्षेऽपि पदानित्यतया सङ्गतिरविशिष्टेत्याह—

**न च नित्या अपि वर्णाः स्वरानुपूर्व्यादिहीनाः पदार्थैः सङ्गम्यन्ते । न च तद्विशिष्टत्वमपि तेषां नित्यम् । तस्मात्तत्सजातीयक्रोडनिविष्टा एव पदार्थाः पदानि च संबध्यन्ते नातोऽन्यथेति, नैतदनुरोधेनापि शब्दस्य नित्यत्वमाशङ्कनीयमिति । यदा च वर्णा एव न नित्यास्तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानां, कुतस्तराञ्च तत्समूहरचनाविशेषस्वभावस्य वाक्यस्य, कुतस्तमां तत्समूहस्य वेदस्य । परतन्त्रपुरुषपराधीनतया प्रवाहाविच्छेदमेव नित्यतां ब्रूम इतिचेत् । एतदपि नास्ति । सर्गप्रलयसम्भवात् । अहोरात्रस्याहोरात्रपूर्वकत्वनियमात् कर्मणां विषमविपाकसमयतया युगपद्वृत्तिनिरोधानुपपत्तेर्वर्णादिव्यवस्थाऽनुपपत्तेः, समयानुपलब्धौ शाब्दव्यवहारविलोपप्रसङ्गाद्, घटादिसम्प्रदायभङ्गप्रसङ्गाच्च कथमेवमितिचेत् ॥**

न चेति ॥ स्वरो ध्वनिस्तन्मतेऽप्यनित्यः । न हि तावद्वर्णमात्रे शक्तिः, व्युत्क्रमेण ततोऽर्थप्रत्ययाभावादित्यानुपूर्वीविशेषविशिष्टे तत्र शक्तिः । सा चैकवर्णज्ञानानन्तरज्ञानविषयत्वमपरवर्णस्य । ज्ञानं चानित्यमिति तद्घटितं पदमपि तथेत्यर्थः । अभिमतमुपसंहरति ॥ तस्मादिति ॥ ननु कूटस्थनित्यतां वेदस्य न ब्रूमः, किन्तु प्रवाहाविच्छेदरूपामित्याह ॥ परतन्त्रेति ॥ तज्जातीयानुपूर्वीज्ञानजन्यत्वव्याप्यज्ञानविषयत्वं परतन्त्रपुरुषपारम्पर्याधीनत्वम् । तथा च कालत्वस्य

देवाधिकरणत्वव्याप्यत्वमेव वेदस्य नित्यतेत्यर्थः । प्रलये बाधकमाह ॥ अहोरात्रस्येति ॥ साम्प्रतिकाहोरात्रे तथा दर्शनादित्यर्थः । विपाकः सहकारिलाभः ॥ वर्णादीति ॥ वर्णा ब्राह्मणादयः, तेषां व्यवस्था ब्राह्मणादिमातापितृजत्वेन । सर्गादौ तदभावात् सा न स्यादित्यर्थः । आदिपदाद्रवादिर्गृह्यते ॥ समयेति ॥ सर्गादौ प्रयोज्यप्रयोजकवृद्धव्यवहाराभावाच्छब्दसङ्केतग्रहो न स्यादित्यर्थः । सर्वशब्दानामगृहीतसङ्केततयेश्वरेण शब्दतोऽपि व्युत्पादनस्याशक्यत्वादिति भावः ॥ घटादीति ॥ सम्प्रदायः प्रवाहस्तस्य भङ्गो विच्छेदः । यथा घटादिः क्रियते, तद्रूपस्यादर्शनादित्यर्थः ॥

उच्यते—

वर्षादिवद्भवोपाधिर्वृत्तिरोधः सुषुप्तिवत् ॥
उद्भिद्वृश्चिकवद्वर्णा मायावत् समयादयः ॥ २ ॥

तत्पूर्वकत्वमात्रे सिद्धसाधनाद्, अनन्तरतत्पूर्वकत्वे अप्रयोजकत्वाद्, वर्षादिदिनपूर्वकतद्दिननियमभङ्गवदुपपत्तेः । राश्यादिविशेषसंसर्गरूपकालोपाधिप्रयुक्तं हि तत् । तदभाव एव व्यावृत्तेः । तथेहापि सर्गानुवृत्तिनिमित्तब्रह्माण्डस्थितिरूपकालोपाधिनिबन्धनत्वात्तस्य तदभाव एव व्यावृत्तौ को दोषः । न च तदनुत्पन्नमनश्वरं वा । अवयवित्वात् ॥

वृत्तिनिरोधस्यापि सुषुप्त्यवस्थावदुपपत्तेः । न ह्यनियतविपाकसमयानि कर्माणीति तदानीं कृत्स्नान्येव भोगविमुखानि । न ह्यचेतयतः कश्चिद्भोगो नाम विरोधात् । कस्तर्हि तदानीं शरीरस्योपयोगः ? । तं प्रति न कश्चित् । तर्हि किमर्थमनुवर्त्तते । उत्तरभोगाऽर्थं, चक्षुरादिवत् । प्राणिति किमर्थम् । श्वासप्रश्वाससन्तानेनायुषोऽवस्थाभेदार्थम् । तेन भोगविशेष-

सिद्धेः । एकस्यैव तत् कथञ्चिदुपपद्यते, न तु विश्वस्येतिचेत् । अनन्ततया, अनियतविपाकसमयतया, उपमर्द्योपमर्दकस्वभावतया च कर्मणां, विश्वस्यैकस्य वा को विशेषो येन तन्न भवेत् । भवति च सर्वस्यैव सुष्वापः । क्रमेण, न तु युगपदितिचेन्न । कारणक्रमायत्तत्वात् कार्यक्रमस्य । न च स्वहेतुबलायातैः कारणैः क्रमेणैव भवितव्यम्, अनियतत्वादेव । सर्वग्रासवत् । ग्रहाणां ह्यन्यदा समागमानियमेऽपि तथा कदाचित् स्यात् । यथा कलाद्यनियमेऽपि सर्वमण्डलोपरागः स्यात् । त्रिदोषसान्निपातवद्वा । यथा हि वातपित्तश्लेष्मणाञ्चयप्रकोपप्रशमक्रमानियमेऽपि एकदा सन्निपातः स्यात्तदा देहसंहारः, तथा कालानलपवनमहार्णवानां सन्निपाते ब्रह्माण्डदेहप्रलयावस्थायां युगपदेव भोगरहिताश्चेतनाः स्युरिति को विरोधः ? । तथापि, विदेहाः कर्मिण इति दुर्घटमितिचेत् । किमत्र दुर्घटम् ? । भोगनिरोधवच्छरीरेन्द्रियविषयनिमित्तनिरोधादेव तदुपपत्तेः ॥

वृश्चिकतण्डुलीयकादिवद्वर्णादिव्यवस्थाऽप्युपपद्यते । यथा हि, वृश्चिकपूर्वकत्वेऽपि वृश्चिकस्य गोमयादाद्यः, तण्डुलीयकपूर्वकत्वेऽपि तण्डुलीयकस्य तण्डुलकणादाद्यो, वह्निपूर्वकत्वेऽपि वह्नेररणेराद्यः, एवं क्षीरदधिघृततैलकदलीकाण्डादयः । तथा मानुषपशुगोब्राह्मणपूर्वकत्वेऽपि तेषां प्राथमिकास्तत्तत्कर्मोपनिबद्धभूतभेदहेतुका एव । स एव हेतुः सर्वत्रानुगत इति सर्वेषां तत्सान्तानिकानां समानजातीयत्वमिति

**किमसङ्गतम् ? । गतं तर्हि गोपूर्वकोऽयं गोत्वादित्यादिना।न गतम् । योनिजेष्वेव व्यवस्थापनात् । मानसास्त्वन्यथाऽपीति । गोमयवृश्चिकादिवद् इदानीमपि किं न स्यादितिचेन्न । कालविशेषनियतत्वात् कार्यविशेषाणाम् । न हि घर्षासु गोमयाच्छालूक इति हेमन्ते किं न स्यात् ॥**

वर्षादिवदिति ॥ वर्षादौ वर्षादिनपूर्वकत्वे साध्ये यथा राश्यादिभेदसंसर्गभेद उपाधिस्तथाऽहोरात्रपूर्वकत्वेऽहोरात्रस्य साध्ये भवो ब्रह्माण्डस्य स्थितिकालः, स एवोपाधिरित्यर्थः। सुषुप्तौ यथा कर्मणां युगपन्निरोधस्तथा अन्यत्रापि स्यादित्याह ॥ वृत्तिरोध इति ॥ यथा तण्डुलीयवृश्चिकयोस्तत्पूर्वकत्वेऽपि आद्यौ तौ तण्डुलकणगोमयाभ्यां भवतस्तथा ब्राह्मणादीनां तत्पूर्वकत्वेऽपि सर्गादौ तज्जनककर्मोपगृहीतभूतभेदात् स्यादित्याह ॥ उद्भिदिति ॥ प्रयोज्यप्रयोजकाद्यधिष्ठातुरीश्वरस्यैव व्यवहारान्मायादिव्यवहारादिव तद्दर्शी व्युत्पन्नः स्यादित्याह ॥ मायावदिति ॥

विवादाध्यासिताहोरात्रस्याहोरात्रपूर्वकत्वं साध्यम् अव्यवहिताऽहोरात्रपूर्वकत्वं वा ? । नाद्य इत्याह ॥ तत्पूर्वकत्वेति ॥ पूर्वसर्गाहोरात्रपूर्वकत्वेन प्रलयेऽपि साध्यसिद्धेरित्यर्थः । नान्त्योऽप्रयोजकत्वादित्याह ॥ अनन्तरेति ॥ वर्षादीति । तद्दिनं वर्षादिनम् ॥ ननु, शरदाद्यादिनस्य वर्षादिनपूर्वकत्वं साध्यमस्ति । न च राशिविशेषावच्छेद इति साध्याव्यापकत्वम् । न । वर्षादिनत्वे सति यद्वर्षादिनपूर्वकंतद्राशिविशेषावच्छिन्नमितिसाधनावच्छिन्नसाध्यव्यापकत्वात् तथापि राशिविशेषावच्छिन्नत्वं वर्षादिनत्वस्य साधनस्य व्यापकम्। अत्र, यदा दिनत्वेन वर्षाद्यदिनस्य वर्षादिनपूर्वकत्वं साध्यते, तदा पक्षधर्मावच्छिन्नसाध्यव्यापकोऽयमुपाधिरिति साम्प्रदायिकाः । किञ्च, विवादाध्यासितत्वेनतत्कालीनाहोरात्रस्य पक्षत्वे सिद्धसाधनम् । संसर्गाद्यतत्पक्षत्वे च बाधः । नचाहोरात्रत्वमव्यवहिताहोरात्रपूर्वकत्वव्याप्यम् । अहोरात्रवृत्तिधर्मत्वात् । एतदहोरात्रत्ववत् । पक्षैकदेशस्यापि दृष्टान्तत्वाविरोधात्। साध्यवत्तया निश्चितत्वस्यैव

नक्षत्रत्वादिति वाच्यम् । अहोरात्रत्वसमानाधिकरणात्यन्ताभाव-प्रतियोगित्वस्योपाधित्वात् । न च ब्रह्माण्डस्य नित्यत्वेन साधन-व्यापकोऽयमुपाधिरित्याह ॥ न चेति ॥ वृत्तिनिरोधस्येति ॥ यथा सुषुप्तौ विषमविपाकसमयान्यपि कर्माणि युगपन्निरुद्धवृत्तीनि प्रति-बद्धभोगजननानि, तद्वत्तदाऽपीत्यर्थः ॥ आयुष इति ॥ जीवनस्य कालावच्छेद आयुस्तदर्थमित्यर्थः ॥उपमर्द्देति॥ प्रतिबद्धप्रतिबन्धक-स्वभावतयेत्यर्थः । सुस्वाप इति युक्तः पाठः । सुविनिर्दुर्भ्यः सुपि-सूतिसमा इत्यनेन कृतसम्प्रसारणस्यैव सुपेः षत्वविधानात् ॥ तथा-ऽपीति ॥ कर्मभिर्भोगजनने देहस्यावश्योत्पाद्यत्वादित्यर्थः ॥भोगेति॥ तदानीं कर्मभिर्भोगजननात् तदर्थं देहोत्पादनमित्यर्थः । तण्डुलीयक-मुद्दिश्य दृष्टान्तः ॥ एवमिति ॥ क्षीरादक्षीराच्च परमाणोः क्षीरम्, एवं दध्याद्यपीत्यर्थः । नन्विदानीं ब्राह्मणत्वादिव्यवस्थापकं विशुद्धमाता-पितृजत्वादिकं, सर्गादौ तु कर्मेत्यननुगम इत्यत आह ॥ स एवेति ॥ इदानीमप्यदृष्टविशेषोपगृहीतभूतजनितत्वेनैव तद्व्यवस्थेत्यर्थः ॥ गत-मिति ॥ सर्गाद्यगोव्यक्तौ व्यभिचारादित्यर्थः ॥ योनिजेष्विति ॥ योनिजमात्रवृत्तिगोत्वव्याप्यजातेस्तत्र हेतुत्वादित्यर्थः । तन्निश्चयश्च कालविशेषवृत्त्येति भावः ॥

**समयोऽप्येकेनैव मायाविनेव व्युत्पाद्यव्युत्पादकभावा-वस्थितनानाकायाधिष्ठानाद् व्यवहारत एव सुकरः । यथा हि मायावी सूत्रसञ्चाराधिष्ठितं दारुपुत्रक-मिदमानयेति प्रयुङ्क्ते । स च दारुपुत्रकस्तथा करोति तदा चेतनव्यवहारादिवत्तद्दर्शी बालो व्युत्पद्यते, तथेहापि स्यात् । क्रियाव्युत्पत्तिरपि तत एव कुलाल-कुविन्दादीनाम् ॥**

**सर्गादावेव किं प्रमाणमितिचेत् । विश्वसन्तानो-ऽयं दृश्यसन्तानशून्यैः समवायिभिरारब्धः । सन्तान-त्वादारण्येयसन्तानवत् । वर्त्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तराः । नित्यत्वे सति**

**तदारम्भकत्वात् प्रदीपपरमाणुवदित्यादि । अवयवानामावापोद्वापादुत्पत्तिविनाशौ च स्यातां, सन्तानाऽविच्छेदश्चेति को विरोध इतिचेन्न । एवं हि घटादिसन्तानाविच्छेदोऽपि स्यात । विपर्ययस्तु दृश्यते । कर्त्रादिभोगविशेषसम्पादनप्रयुक्तोऽसाविति चेन्न । द्व्यणुकेषु तदभावात् । तथाच तदवयवानामपगमाभावेऽनादित्वप्रसङ्गे द्व्यणुकत्वव्याघातः । तस्माद् यत्कार्यं यन्निबन्धनस्थिति, तदपगमे तन्निवृत्तिः । यद् यद्धेतुकं तदुपगमे तस्योत्पत्तिः । न च कार्यस्य स्थितिनिबन्धनं नित्यमेव । नित्यस्थितिप्रसङ्गात् । न च नित्य एव हेतुरकादाचित्कत्वप्रसङ्गात् । तदतिनिस्तरङ्गमेतत् ॥**

समयोऽपीति ॥ नन्वीश्वरव्यवहाराच्छक्तिग्रहे स भ्रमः स्यात् । व्यवहारहेतुतज्ज्ञानस्य नित्यतया शब्दजन्यत्वबाधात् । तथाच तन्मूलकः सर्वशाब्दव्यवहारो भ्रमः स्यात् । न । घटपदजं घटज्ञानमित्यस्य भ्रमत्वेऽपि घटपदं घटशक्तमित्यस्य ज्ञानस्य सत्यज्ञानत्वात् विषयबाधाभावात् । न च भ्रममूलकत्वेन भ्रमत्वम् । विशेष्यावृत्तिप्रकारकत्वस्योपाधित्वात् । अत एवानुरूपं दृष्टान्तमाह॥यथा हीति॥

विश्वसन्तानेति ॥ ननु विश्वशब्देन ब्रह्माण्डपक्षत्वे तदसिद्ध्या आश्रयासिद्धिः । कार्यमात्रपक्षत्वे क्रमारब्धदहनपवनादिन्यायेनारम्भेऽपि प्रलयासिद्धौ सिद्धसाधनम् । एकदेति विशेषणे तेनैव व्यभिचारात् । एकदाऽऽरम्भहेतुसाकल्ये सतीति विशेषणासिद्धेः । साध्यमपि कार्यद्रव्यशून्यसमवाय्यारभ्यत्वं कार्यमात्रशून्यसमवाय्यारभ्यत्वं वा ? । आद्ये सिद्धसाधनमन्त्ये बाधः, आरम्भकसंयोगादेः सत्त्वात् । अथैककालीनाः सर्वे परमाणवः कदाचित् समग्रोपादेयप्रबन्धशून्याः, आरम्भकत्वाद्भ्रष्टपवनारम्भकपरमाणुवत् । सर्वत्र पक्षतावच्छेदकावच्छिन्नसाध्यं प्रतीयते इत्येककाले शून्यता लभ्यते । न च पवनपरमाणूनामपि पक्षत्वेनांशतः सिद्धसाधनम् । पक्षधर्मताबललभ्यसाध्याप्रतीतेः । अभेदानुमानवच्च पक्षस्यापि दृष्टान्तत्वावि-

रोधः । न । कार्यद्रव्याधिकरणकालमात्रवृत्तित्वस्योपाधित्वात् । न च परमाणवः कार्यद्रव्यसमानकालिकपरमाणुक्रियाऽतिरिक्तक्रियावन्तः । मूर्तत्वात् । पटवदित्यवान्तरप्रलये महाप्रलये च कार्यद्रव्यसमानकालिकैतद्वृत्तिध्वंसान्यध्वंसवन्तः । तत एव तद्वदिति वाच्यम् । एतदन्यगुणवत्त्वस्योपाधित्वात् । नाप्यारम्भककालान्यवृत्तिध्वंसाप्रतियोगिवृत्ति कार्यद्रव्यत्वं,स्वाधिकरणानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति । कार्यमात्रवृत्तिधर्मत्वात् । एतत्प्रदीपत्ववदिति वाच्यम् । स्वपदेन पक्षभिन्नाभिधानेऽनन्वयात् । पक्षाभिधाने त्वप्रसिद्धिः ॥

अत्राहुः । विश्वसन्तानपदेन कार्यमात्रवृत्त्यनेकवृत्तिर्द्धर्मः कार्यद्रव्यत्वं पक्षः । तथाहि, समयसमवायिभिन्नवृत्तिध्वंसप्रतियोग्यवृत्तिकार्यद्रव्यत्वं कार्यद्रव्यप्रागभावसमानकालीनारम्भकातिरिक्तकार्यद्रव्यानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति । कार्यमात्रवृत्तिधर्मत्वात् । शब्दत्ववत् । न चात्र विभुवृत्तित्वमुपाधिः । अन्त्यावयविकर्मत्वे साध्याव्यापकत्वात् ॥ वर्त्तमानेति ॥ ब्रह्माण्डस्यागमसिद्धत्वान्नाश्रयासिद्धिः । तदारम्भकत्वं तन्तुभिः पूर्वमनुत्पादितपटैरनैकान्तिकमित्यत उक्तम् ॥ नित्यत्वे सतीति ॥ नित्यत्वमात्रन्तु व्योमादिभिरनैकान्तिकमिति तदारम्भकत्वादित्युक्तम् । प्रदीपपरमाणूनां तैजसद्रव्यत्वेन संसर्गिद्रव्यतयाऽऽरब्धतेजोजातीयत्वासिद्धौ दृष्टान्तत्वम् । न चाप्रयोजकत्वम् । निरुपाधिभङ्गप्रसङ्गस्य विपक्षबाधकत्वात् । न त्वागमो विपक्षबाधकः । तस्य कार्यद्रव्यानाधारकालाबोधकत्वात् । सन्तानाविच्छेदेऽपि उत्पत्तिविनाशयोरन्यथोपपत्तिरित्याह ॥ अवयवानामिति ॥ आवापोद्धापौ उपगमापगमौ । यदि नैवं कार्यद्रव्यस्यात्यन्तमुच्छेदस्तदाऽभिमतघटाद्युच्छेदोऽपि न स्यादित्याह ॥ एवं हीति ॥ विपर्ययस्त्विति ॥ अत्यन्तोच्छेद इत्यर्थः । ननु न सन्तानप्रयुक्तोऽत्यन्तोच्छेदः, किन्त्वन्योपाधिप्रयुक्त इत्याह ॥ कर्त्रादीति ॥ उपाधेः साध्याव्यापकत्वमाह ॥ द्व्यणुकेष्विति ॥ तदभावाद्भोगविशेषसम्पादकत्वस्योपाधेरभावादित्यर्थः । न च तत्राप्यत्यन्तानुच्छेदेऽपि अवयवानामापोद्धापाभ्यामेवोत्पादविनाशसम्भवः । तयोरत्राभावादित्याह ॥ तथा चेति ॥ नाशस्य भोगविशेषसम्पादनप्रयोजकत्वे द्व्यणुकनाशो न स्यात् । तेन भोगाजननात् । तथाच विनाशिभावस्यानुत्पन्नत्वेन नित्यतया द्व्यणुकत्वव्याघात इति सन्तानत्वस्यात्य-

न्तोच्छेदेन स्वाभाविकः सम्बन्धो मन्तव्य इत्यर्थः। सन्तानस्याव-स्थानमहेतुकं नित्यहेतुकं वा यदि स्यात्तदा सन्तानाविच्छेदः स्या-दित्याह ॥ तस्मादिति ॥ यद्धेतुकमिति दृष्टान्तार्थम्। एतत्, कार्यं यन्निबन्धनस्थितीत्यादिकम् ॥

ईदृश्याञ्च वस्तुस्थितौ भोगोऽपि कर्मभिरेवमेव वस्तुस्वभावानतिक्रमेण सम्पादनीय इति द्व्यणुकवत् पिपीलिकाण्डादेर्ब्रह्माण्डपर्यन्तस्यापि विश्वस्येयमेव गतिरिति प्रतिबन्धसिद्धिः। तथाच ब्रह्माण्डे परमाणु-साद्भवितरि परमाणुषु च स्वतन्त्रेषु पृथगासीनेषु तद-न्तःपातिनः प्राणिगणाः क्व वर्त्तन्ताम्? । कुपितकपि-कपोलान्तर्गतोदुम्बरमशकसमूहवद्, दवदहनदह्य-मानदारूदरविघूर्णमानघुणमङ्खानवत्, प्रलयपवनोल्ला-सनीयौर्वानलनिपातिपोतसांयात्रिकसार्थवद्वेति ॥

अपि च।

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्म्मणोः ॥
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥ ३ ॥

पूर्वं हि मानस्यः प्रजाः समभवन, ततोऽपत्यैक-प्रयोजनमैथुनसम्भवाः, ततः कामावर्जनीयसन्निधि-जन्मानः, इदानीं देशकालाद्यव्यवस्थया पशुधर्मादेव भूयिष्ठाः। पूर्वं चरुप्रभृतिषु संस्काराः समाधायिषत, ततः क्षेत्रप्रभृतिषु, ततो गर्भादितः। इदानीन्तु जातेषु लौकिकव्यवहारमाश्रित्य। पूर्वं सहस्रशाखो वेदोऽध्य-गायि, ततो व्यस्तः, ततः षडङ्ग एकः। इदानीन्तु क-चिदेका शाखेति। पूर्वम् ऋतवृत्तयो ब्राह्मणाः प्राद्यो-तिषत,ततोऽमृतवृत्तयः, संप्रति प्रमृतसत्यानृतकुसीद-

पाशुपाल्यइववृत्तयो भूयांसः । पूर्वं दुःखेन ब्राह्मणैरतिथयोऽलभ्यन्त, ततः क्षत्रियानिथयोऽपि संवृत्ताः, ततो वैश्यावेशिनोऽपि, संप्रति शूद्रान्नभोजिनोऽपि । पूर्वममृतभुजः, ततो विघसभुजः, ततोऽन्नभुजः, संप्रत्यघभुज एव । पूर्वं चतुष्पादूधर्म आसीत्,ततस्तनूयमाने तपसि त्रिपात्, ततो म्लायति ज्ञाने द्विपात्, संप्रति जीर्यति यज्ञे दानैकपात् । सोऽपि पादो दुरागतादिविपादिकाशनदुःस्थोऽश्रद्धामलकलङ्किनःकामक्रोधादिकण्टकशनजर्जरः प्रत्यहमपचीयमानवीर्यतया इतस्ततः स्खलन्निवोपलभ्यते ॥

इदानीमिव सर्वत्र दृष्टान्नाधिकामिष्यते इतिचेन्न । स्मृत्यनुष्ठानानुमितानां शाखानामुच्छेददर्शनात् ॥ स्वातन्त्र्येण स्मृतीनामाचारस्य च प्रामाण्यानभ्युपगमात् । मन्वादीनामतीन्द्रियार्थदर्शने प्रमाणाभावात् । आचारात् स्मृतिः स्मृतेश्चाचार इत्यनादिनाऽभ्युपगमे अन्धपरम्पराप्रसङ्गात् । आसंसारमनाम्नातस्य च वेदत्वव्याघातेनानुमानायोगात् । उत्पत्तितोऽभिव्यक्तितोऽभिप्रायतो वाऽनवच्छिन्नवर्णमात्रस्य निरर्थकत्वात्। यदि च शिष्टाचारत्वादिदं हितसाधनं कर्त्तव्यं वेत्यनुमितं किं वेदानुमानेन, तदर्थस्यानुमानत एव सिद्धेः । न च धर्मवदनत्वादिदमेवानुमानमनुमेयो वेदः । प्रत्यक्षसिद्धत्वात् । अशब्दत्वाच ॥

इदम्भ्यामिति ॥ अनित्यहेतुनिबन्धनायां कार्यस्थितौ कर्मभिः सम्पादनीयो भोग एवमेव वस्तुस्वभावानतिक्रमणेनि योजना । नन्वेवमपि ब्रह्माण्डनाशसिद्धौ गिरिसागरादीनां कुतः प्रलय इत्यत आह ॥ तथा चेति ॥ क वर्तन्तामिति ॥ विनश्यन्तीत्यर्थः । महाद्रव्या-

न्तरेण निहन्यमानाधारत्वाद्, महादहनदह्यमानाश्रयत्वाद्, महापवनक्षुभितसमुद्रविलीयमानाश्रयत्वादित्यत्र हेतुत्रये क्रमेण दृष्टान्तत्रयमाह ॥ कुपितेति ॥ एतेनाधाराभावात् पतन्त एव सन्तीत्यपास्तम् । एवं सर्वस्य नाशे अर्थाद् वेदोऽपि नश्यतीत्युपपाद्य वेदह्रासदर्शनेनापि तन्नाशोऽनुमेय इत्याह ॥ अपि चेति ॥ वेदह्रासे दृष्टान्तार्थं जन्मादिह्रास उक्तः । प्रतियुगं क्रमेण ह्रासमाह ॥ पूर्वं हीति ॥ समाधायिषत सम्यगाहिता इत्यर्थः ॥ श्रूयमाणा अपि वेदा उच्छेत्स्यन्ति, वाक्यत्वात् । उच्छिन्नशाखावदिति भावः ॥

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं कुसीदश्च कलान्तरम् ॥

पाशुपाल्यं गोरक्षादि ॥ श्ववृत्तिः सेवा ॥ वैश्यावेशिनो वैश्याऽतिथयः ॥ अमृतभुजो यज्ञशेषभुजः ॥ विघसभुजोऽतिथिशेषभुजः ॥ अन्नभुजो भृत्यशेषभुजः ॥ अघभुजः स्वार्थसाधितभुजः ॥ चतुष्पादिति ॥ तपोज्ञानयज्ञदानानि चत्वारः पादाः ॥ दुरागतं दुष्टादुपायाद् द्यूतादेरागतम ॥ तदेव विपादिका पादरोगः॥ ननु न शाखोच्छेदः, किन्तु यावान वेद इदानीमधीयते तावानेव सदाऽध्ययनविषय इति वेदह्रासोऽसिद्ध इत्याह ॥ इदानीमिति ॥ विवादपदं स्मृतिः स्मृत्यर्थानुभावकवेदमूला, अक्लृप्तमूलान्तरत्वे सति महाजनपरिगृहीतस्मृतित्वात् । प्रत्यक्षवेदमूलस्मृतिवत् । अतो न न्यायादिमूलकस्मृतौ व्यभिचारः । तथा, मङ्गलाद्याचारो वेदबोधितः । अलौकिकविषयाविगीतशिष्टाचारत्वात् यागवदिति स्मृत्याचारमूलस्य वेदस्याप्रत्यक्षत्वात् तदुच्छेदे तद्वदधीयमानवेदस्याप्युच्छेदो भावीत्याह ॥ स्मृतीति ॥ ननु वेदवत् स्मृत्याचारयोरदृष्टे स्वतः प्रामाण्यमेवेति न तन्मूलकवेदानुमानमित्यत आह ॥ स्वातन्त्र्येणेति ॥ वेदनैरपेक्ष्येण स्मृत्यादेस्त्वयाऽपि प्रामाण्यानभ्युपगमादित्यर्थः । ननु स्मृतिकर्त्तारः स्वयमेवापूर्वं साक्षात्कृत्य तत्साधनमुपदेक्ष्यन्तीति न तेषां तदर्थं वेदापेक्षेत्यत आह ॥ मन्वादीनामिति ॥ अतीन्द्रियार्थदर्शित्वे तेषामनाश्वासादिति भावः । ननु भूयः शिष्टाचारदर्शनात् स्मृतिप्रणयनं, ततः पुनरिदानीं शिष्टाचारपरम्परा स्यादिति किं तन्मूलवेदानुमानेनेत्यत आह ॥ आचारादिति ॥ उभयोरप्यनुमान-

मूलकत्वेनाव्यवस्थापकत्वात्तादृशस्मृत्याचारयोर्वेदमूलकत्वव्याप्ते-स्तव देशनाया एव धर्मे मानत्वाच्च तयोरमानकत्वापातादित्यर्थः। ननु नित्यानुमेयो वेदस्तन्मूलं स्यादतो न शास्त्रोच्छेद इत्यत आह ॥ आसंसारमिति ॥ अनाम्नातस्य अपठितस्य ॥ उत्पत्तित इति स्वमते, अभिव्यक्तित इति परपक्षे, अभिप्रायत इति उभयत्र । यथा मौनि-श्लोकोऽपठितः श्रोत्रानभिव्यक्तश्चाभिप्रायस्थस्तथा वेदोऽपीत्यपि नेत्यर्थः। तथात्वे निश्चितानुपूर्वीकपदकदम्बस्वरूपत्वे नित्यानुमेय-त्वव्याघात इति भावः ॥

अत्र स्मृत्याचारमूलं वेदोऽध्ययनविषयो न वा, वेदत्वमध्ययन-विषयत्वव्याप्यं न वेति विप्रतिपत्तिः । ननु स्मृत्यर्थज्ञापकत्वेन ज्ञातस्यैव वेदस्य स्मृत्यर्थानुभावकत्वम् । न हि शाब्दबोधे नियत-पदानुपूर्वी हेतुः । गामानयानय गामित्यत्र तदभावेऽपि तत्सत्त्वात् । पदस्य वर्णविशेषानुपूर्वीनियमेऽपि तत्तद्वर्णानुपूर्वीकपदविशेषो न हेतुः, घटकलशपदानां प्रत्येकं व्यभिचारात्। किन्त्वव्यभिचारितदर्थ-ज्ञापकत्वेन ज्ञातस्य, लाघवादावश्यकत्वाच्च । अत एव, वर्णलोपे दन्त्यादिसकारादिसन्देहे सत्यपि वाक्यार्थधीः । न च क्रमिकपद-वत्त्वं वाक्यत्वम् अनुच्चार्यमाणस्य चोच्चारणघटितक्रमासम्भव इति वाच्यम्। गौरश्व इत्यादौ तत्सम्भवेऽपि वाक्यत्वाभावात्। विशि-ष्टार्थपरशब्दत्वन्त्वत्रापि तुल्यम्। न चानुच्चार्यमाणस्य न वाक्यत्वम्। लिप्यनुमितानां मौनिश्लोकस्य च वाक्यत्वात्। किञ्च वाक्यमुच्चार्य-ते, न तूच्चारणाद्वाक्यत्वम् । वाक्यमुच्चारयेदित्यत्रानन्वयापत्तेः । उच्चारणदशायां वाक्यत्वे वाक्यस्यासत्त्वापत्तेः। एकदा तावत्पदाना-मुच्चारणाभावात् । अथ, तदर्थज्ञापकत्वेन ज्ञातात् पदात् पदार्थ-ज्ञानमात्रं स्यान्न संसर्गज्ञानम् । अन्वयप्रकारकर्मत्वाद्युपस्थापकवि-भक्त्यादिसमभिव्याहाराभावात् । मैवम्। अनुमितवेदाद्वाक्यार्थानु-भवे सामग्र्या वैलक्षण्यात् । धर्मिग्राहकमानेन तवाशरीरेश्वरकर्तृ-त्वस्यैव स्मृत्यर्थानुभावकत्वेनैव तस्य सिद्धेः। अन्यथाऽन्यत्र क्लृप्त-हेतुं विना न सोऽनुभावक इत्यादौ तदसिद्धावाश्रयासिद्धिस्तत्सिद्धौ च बाधः। अत एव स्तुतिनिन्दार्थवादकल्पितविधिनिषेधकवेदादर्थ-मवगत्य प्रवृत्तिनिवृत्ती । अन्यथा विधिनिषेधकवेदानां नानाप्रकार-कत्वेन विभक्त्यादिविशेषवत्पदस्यानुमातुमशक्यत्वाच्च ततोऽर्थधीः

स्यात् । एवमाचारानुमितवेदादपि प्रवर्तककर्तव्यताधीः स्मृत्याचारानुमितो वेदोऽर्थं बोधयतीति पूर्वपूर्वानुमितवेदादुत्तरोत्तरस्मृत्याचाराविति नान्धपरम्परा, स्वतन्त्रप्रमाणमूलकत्वादिति ॥

अत्राहुः । उच्छिन्नवेदादर्थं प्रतीत्य स्मृत्याचारयोरुपपत्तेः सामग्र्यन्तरकल्पने गौरवम् । अत एव च न बाधाश्रयासिद्धी । स्मृत्याचारमूलस्य वेदस्यास्माभिरभ्युपगमात् । तथा च, स्मृत्याचारयोर्वेदजन्यानुभवमूलकत्वानुमानादेव पक्षधर्मताबलेन प्रत्यक्षवेदमूलकत्वसिद्धिः । अननुभावकस्य मूलत्वानुपपत्तेः । स्तुतिनिन्दार्थवादाभ्यामपि प्रवृत्तिनिवृत्तिपराभ्यां प्रवृत्तिनिवृत्तिहेतुरर्थ एव कल्प्यते, लाघवात् । न तु विधिनिषेधवाक्यं, गौरवादुक्तदोषाच्च । यत्र चार्थवादादेव तज्ज्ञानं तत्र तरति मृत्युमित्यादौ न तत्कल्पनाऽपि । न च बहुभिर्महाविभिराध्यात्मिकशक्तिसम्पन्नैर्ध्रियमाणायाः शाखायाः न शाखान्तरवदुच्छेदसम्भवइतिवाच्यम् । एकस्य न सकलशाखाऽध्ययने शक्तिरित्येकेनैवापरैरपि तदनध्ययने तदुच्छेदसम्भवात् । एकानधीतायास्तस्या अपराध्ययनविषयत्वनियमे मानाभावात् । न च शाखोच्छेदे वर्णादिहानिशङ्कया प्रत्यक्षवेदादपि वाक्यार्थप्रयोगयोरनिश्चये वैदिकव्यवहारोच्छेदः, श्रूयमाणमात्रस्यैव महाजनपरिगृहीतत्वेन तत एव तन्निश्चयात् । तस्मात् स्मृत्याचारानुमितो वेदः प्रत्यक्षाऽध्ययनविषयश्च वेदत्वात् । मतवत् । विपक्षे च बाधकमुक्तं गौरवमिति सङ्क्षेपः ॥

दूषणान्तरमाह ॥ यदि चेति ॥ वेदेनापि हि प्रवृत्तिहेतुकार्यत्वज्ञानं तद्धेतुत्वज्ञानं वोत्पाद्य प्रवृत्तिर्जन्येत्यावश्यकत्वाल्लाघवाच्च तदेवानुमीयतां, किं तद्बोधकवेदेनेत्यर्थः । तदर्थस्य कार्यत्वज्ञानादेः । ननु धर्मवेदकत्वहेतुको वेदव्यवहारस्तत्र लिङ्गेऽप्यस्तीति तदेव नित्यानुमेयवेदशब्देनोच्यते इत्यत आह ॥ न चेति ॥ प्रत्यक्षसिद्धत्वान्न नित्यानुमेयत्वम् , अशब्दत्वाच्च न वेदत्वमित्यर्थः ॥

प्रमाणसामान्यानुमानेऽपि पक्षधर्मताबलात् तद्विशेषवेदसिद्धिः स्यादित्याह—

**अथ शिष्टाचारत्वात् प्रमाणमूलोऽयमितिचेत् । ततः सिद्धसाधनम् । प्रत्यक्षमूलत्वाभ्युपगमात् । त-**

दसम्भवेऽप्यनुमानसम्भवात् । नित्यमज्ञायमानत्वा-त्तदप्रत्यायकं, कथमनुमानं, कथञ्च मूलमिनिचेत् । वेदः किमज्ञायमानः प्रत्यायकोऽप्रत्यायक एव वा मूलं, येन जड़नम ! तमाद्रियसे । अनुमितत्वाज्ज्ञायमान एव इति चेत् । लिङ्गमप्येवमेवास्तु । अनुमेयप्रतीतेः प्राक्तनी लिङ्गप्रतीतिरपेक्षिता, कारणत्वात्, न तु पश्चात्तनीति चेत् । शब्दप्रतीतिरप्येवमेव । आचार-स्वरूपेण शब्दमूलत्वमनुमीयते, तेन तु शब्देन कर्त्तव्यता प्रतीयते इतिचेन्न । आचारस्वरूपस्य प्रत्यक्ष-सिद्धत्वेन मूलान्तरानपेक्षणात् । तस्मात् कर्त्तव्यतायां प्रत्यक्षाभावादप्रमिततया च शब्दानुमानानवकाशात् प्रत्यक्षश्रुतेरसम्भवाच्छिष्टाचारत्वेनैव कर्त्तव्यतामनु-माय तया मूलशब्दानुमानम् । तथाच किन्तेन ? । तदर्थस्य प्रागेव सिद्धेः । तथाप्यागममूलत्वेनैव तस्य व्याप्तेरिति चेत् । अत एव तर्हि तस्य प्रत्यक्षानुमान-मूलत्वमनुमेयम् । आदिमनस्तत्त्वं स्यादयं त्वनादि-रिति चेत् । आचारोऽपि तर्हि प्रथमतस्तथा स्यादय-न्त्वनादिर्विनाऽप्यागमं भविष्यति । आचारकर्त्तव्य-ताऽनुमानयोरेवमनादित्वमस्तु किन्नाश्छिन्नमितिचेत् । प्रथमं तावन्नित्यानुमेयो वेद इति । द्वितीयं च देशनैव धर्मे प्रमाणमिति । अथायमाशयः । वैदिका अप्या-चारा राजसूयाश्वमेधादयः समुच्छिद्यमाना दृश्यन्ते, यत इदानीं नानुष्ठीयन्ते । न चैते प्रागपि नानुष्ठिता एव । तदर्थस्य वेदराशेरप्रामाण्यप्रसङ्गात् । समुद्र-तरणोपदेशवत् । न चैवमेवास्तु । दर्शाद्युपदेशेन तुल्य-

योगक्षेमत्वात्। एवं, पुनः स कश्चित् कालो भविता-यत्रैते अनुष्ठास्यन्ते, तथाऽन्येऽप्याचाराः समुच्छेत्स्यन्ते अनुष्ठास्यन्ते चेति न विच्छेदः। ततस्तद्वदागम-मूलतेतिचेत्। एवं तर्हि प्रवाहादौ लिङ्गाभावे कर्त्तव्यत्वागमयोरननुमानादसत्यां प्रत्यक्षश्रुतौ आचार-सङ्कथाऽपि कथमिति सर्वविप्लवः। तस्मात् प्रत्यक्ष-श्रुतिरेव मूलमाचारस्य। सा चेदानीं नास्तीति शाखोच्छेदः। अधुनाऽप्यस्ति साऽन्यत्रेतिचेदत्र कथं नास्ति ?। किमुपाध्यायवंशानामन्यत्र गमनात्, तेषा-मेवोच्छेदाद्वा, आहोस्वित् स्वाध्यायविच्छेदात् ?। न प्रथमद्वितीयौ। सर्वेषामन्यत्र गमने उच्छेदे वा नियमेन भारतवर्षे शिष्टाचारस्याप्युच्छेदप्रसङ्गात्। तस्याध्येतृसमानकर्तृकत्वात्। अन्यत आगतैराचार-प्रवर्त्तने अध्ययनप्रवर्त्तनमपि स्यात्। न तृतीयः। आध्यात्मिकशक्तिसम्पन्नानामन्तेवासिनामविच्छेदे तस्यासम्भवात्॥

तस्मादायुरारोग्यबलवीर्यश्रद्धाशमदमग्रहणधारणादि-शक्तेरहरहरपचीयमानत्वात् स्वाध्यायानुष्ठाने शीर्य-माणे कथञ्चिद् अनुवर्त्तने। विश्वपरिग्रहाच्च न स-हसा सर्वोच्छेद इति युक्तमुत्पश्यामः॥

अर्थेति॥ सामान्यबुद्धेरीश्वरप्रत्यक्षविषयत्वेनाप्युपपत्तेर्न सा विशेषमवगमयतीत्याह॥ प्रत्यक्षेति॥ ईश्वरप्रत्यक्षानभ्युपगन्तृमतेऽपि भाजनादेरिव कर्त्तव्यताज्ञानेऽनुमानमेव मूलं स्यादित्याह॥ सदिति॥ विशिष्यलिङ्गाज्ञानाच्च तद् गमकमतो न मूलमित्याह॥ नित्यमिति॥ नित्यानुमेयो वेदोऽपि विशेषाकारेणानिश्चितत्वाच्च तद्-बोधकः स्यादित्याह॥ वेद इति॥ विशेषत इति शेषः। सामान्य-

तस्तज्ज्ञानं वेद इवानुमानेऽपि तुल्यमित्याह ॥ अनुमितत्वादिति ॥ आचारकर्त्तव्यताऽनुमानमूलेत्यनुमेयं पूर्वमाचारकर्त्तव्यतासिद्धौ स्यात् । सा च कर्तव्यताबोधकलिङ्गप्रतीतेः प्रागेव सिद्धेति नानुमानमित्याह ॥ अनुमेयेति ॥ एवं शब्दप्रतीतिं विनाऽपि कर्त्तव्यताबुद्धेः सिद्धत्वाद् व्यर्थं शब्दानुमानमिति तुल्यमित्याह ॥ शब्देति॥विशिष्टशिष्टाचारेण वेदमूलत्वमनुमीयते, अतो न प्रत्यक्षादिना सिद्धसाधनमित्याह ॥ आचारेति ॥ आचारस्वरूपसिद्ध्यर्थं वेदानुमानं, तत्कर्त्तव्यताबोधार्थं, व्याप्तिमात्रेण वा ? । नाद्यः । तत्र प्रत्यक्षस्यैव मूलत्वादित्याह ॥ प्रत्यक्षेति ॥ न द्वितीयः । कर्त्तव्यतायामज्ञातायां वेदाननुमानात् तज्ज्ञाने च तदनुमानवैयर्थ्यादित्याह ॥ तस्मादिति ॥ तृतीयं शङ्कते ॥ तथापीति ॥ दर्शादिव्यवहारस्य वेदपूर्वकत्वसहचारदर्शनादित्यर्थः । न हि सहचारमात्राद् व्याप्तिः । पौरुषेयवाक्यस्येव वैदिकवाक्यस्यापि प्रत्यक्षानुमानविवक्षापूर्वकत्वप्रसङ्गादिति परिहरति ॥ अत एवेति ॥ अत्रोपाधिमाह ॥ आदिमत इति ॥ आगमस्येत्यर्थः । आचारस्याप्यागमपूर्वकत्वे साध्ये स एवोपाधिरित्यनादिः स तन्निरपेक्षोऽपि स्यादित्याह ॥ आचारोऽपीति ॥ द्वितीयामिति ॥ अनुमानस्यापि धर्मे प्रमाणत्वाभ्युपगमादित्यर्थः । आचारस्यागममूलकत्वव्याप्तौ प्रयोजकमाह ॥ अथेति ॥ अप्रामाण्येति ॥ नित्यमननुष्ठानादित्यर्थः ॥ तद्वदिति ॥ विवादाध्यासिता आचारा वेदमूलाः, उच्छेदानन्तरभाविप्रवाहवत्त्वाद्राजसूयवदिति न प्रत्यक्षादिना सिद्धसाधनं, नाप्यत्यन्तमुच्छेद इत्यर्थः । प्रलये स्मृत्याचारयोरुच्छेदाल्लिङ्गाभावेनासत्यां प्रत्यक्षश्रुतौ अनुष्ठानमेव न स्यादित्यसिद्धो हेतुरित्याह ॥ एवं तर्हीति ॥ न च घटादिसम्प्रदायप्रवर्त्तनार्थमीश्वरस्यापि शरीरपरिग्रहात् तदाचारादेव कर्त्तव्यताऽनुमितिः स्यादिति वाच्यम् । बहुव्यापारघटितस्य तत्तदाचारस्य गुरुत्वाल्लाघवेन वेदरूपवाक्यस्य कल्पनादिति भावः ॥ शाखोच्छेद इति ॥ व्यासादीनां सहस्रशाखवेदज्ञातॄणां सत्त्वेऽपि साम्प्रतं तदध्ययनाभाव एव शाखोच्छेदः । स्मृत्याचारमूलं वेद इदानीमप्यन्यत्राध्ययनगोचर इति भट्टमतं शङ्कते ॥ अधुनाऽपीति ॥ परिहरति ॥ अत्रेति ॥ भारतवर्षे तदध्ययनाभावेऽप्यन्यत्र तदध्ययनकल्पनायां गौरवमिति भावः ॥ तस्येति ॥ यद्यप्याचारस्याप्यध्येतृसमानकर्तृकतयाऽध्ययनगोचर-

शाखाबोधिताचारस्यानुपपत्तिः, तथाप्यत्राध्ययनाभावः शक्त्यभाव-प्रयुक्तः। स च नैतद्देशानियतः। प्रागप्यत्र तदभावापत्तेः। किन्त्वेत-त्कालानियतः। अतो भारतवर्षान्यदेशः स्मृत्याचारमूलाध्ययनशून्यो, देशत्वात्। एतद्देशवदिति भावः॥

उच्छिन्नशाखाबोधितेतिकर्त्तव्यताशङ्कया एकस्मिन्नपि कर्मणीति-कर्त्तव्यतेयत्तानिश्चयो न स्यादित्यमानक एवायमाचार इत्याह—

गतानुगतिको लोक इत्यप्रामाणिक एवाचारो, न तु शाखोच्छेदः। अनेकशाखागतेतिकर्त्तव्यतापूर-णीयत्वात्। एकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गादिति-चेत्। एवं हि महाजनपरिग्रहस्योपप्लवसम्भवे वेदा अपि गतानुगतिकतयैव लोकैः परिगृह्यन्ते इति न वेदाः प्रमाणं स्युः। तथा च वृश्चिकभिया पलायमान-स्याशीविषमुखे निपातः॥

एतमेव च कालक्रमभाविनमनाश्वासमाशङ्क-मानैर्महर्षिभिःप्रतिविहितमतो नोक्तदोषोऽपि।न चाय-मुच्छेदो ज्ञानक्रमेण येन श्लाघ्यःस्याद् अपितु प्रमाद-मदमानालस्यनास्तिक्यपरिपाकक्रमेण। ततश्चोच्छे-दानन्तरं पुनः प्रवाहः, तदनन्तरञ्च पुनरुच्छेद इति सारस्वतमिव स्रोतः। अन्यथा कृतहानप्रसङ्गात्। तथा भाविप्रवाहवद्भवन्नप्ययमुच्छेदपूर्वक इत्यनुमीयते। स्मरति च भगवान् व्यासो गीतासु भगवद्वचनम्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे, इति॥

कः पुनरयं महाजनपरिग्रहः?। हेतुदर्शनशून्यै-

ग्रहणधारणार्थानुष्ठानादिः । स ह्यत्र न स्यादृ ऋते निमित्तम् ॥

न ह्यत्रालस्यादिर्निमित्तं, दुःखमयकर्मप्रधानत्वात् । नाप्यन्यत्र सिद्धप्रामाण्येऽभ्युपायेऽनधिकारेणाऽस्मिन्ननन्यगतिकतयाऽनुप्रवेशः । परैः पूज्यानामप्यत्राप्रवेशात् । नापि भक्ष्यपेयाद्यद्वैतरागः, तद्विभागव्यवस्थापरत्वात् । नापि कुतर्काभ्यासाहितव्यामोहः, आकुमारं प्रवृत्तेः । नापि सम्भवद्विप्रलम्भपाषण्डसंसर्गः, पित्रादिक्रमेण प्रवर्त्तनात् । नाऽपि योगाभ्यासाभिमानेनाव्यग्रनाभिसन्धिः, प्राथमिकस्य कर्मकाण्डे सुतरां व्यग्रत्वात् । नापि जीविका, प्रागुक्तेन न्यायेन दृष्टफलाभावात् । नापि कुहकवञ्चना, प्रकृते तदसम्भवात् ॥

गतेति ॥ महाजनपरिगृहीताचारस्यामानकत्वशङ्का वेदेऽपि स्यादित्याह ॥ एवं हीति ॥ वृश्चिकेति ॥ उच्छिन्नशाखवेदाङ्गीकारेऽननुष्ठानं वृश्चिकभीः, तया पलायमानस्य सर्ववेदाप्रामाण्यापात आशीविषमुखे निपात इत्यर्थः । अनेकेत्यादि दूषयति ॥ एतमिति ॥ तत्तत्कर्मणि नानाशाखाबोधितेतिकर्त्तव्यताबोधनाय महर्षिप्रणीता महाजनपरिगृहीताश्च स्मृतयः सन्तीति नानाश्वास इत्यर्थः । अन्यथैकस्य सकलानवगमाच्छाखान्तरबोधितेनिकर्त्तव्यताशङ्कया एकशाखातो नार्थनिश्चयः स्यादिति भावः । नन्वाचारस्योच्छिन्नशाखामूलकत्वे साऽपि शाखान्तरवच्छिन्द्यैर्गृह्येतेति नोच्छेदः । स चेन्नूनं समुद्रतरणोपदेशवच्छाखैवाप्रमाणमित्यत आह ॥ न चेति ॥ अप्रामाणिकधिया न तच्छाखानध्ययनमपि त्वन्यप्रयुक्तमित्यर्थः । तदेवं वेदत्वादाचारानुमितवेदवद्वेदा उच्छेत्स्यन्तीत्युपसंहरति ॥ ततश्चेति ॥ दिनरात्रिह्रासैश्च न व्यभिचारस्तस्यापि पक्षत्वादिति भावः । ननु वर्तमानप्रवाहोच्छेदासिद्धावपि भाविप्रवाहोच्छेदासिद्धिः कुत इत्यत आह ॥ अन्यथेति ॥ प्रागुपात्तादृष्टस्य देहाद्यभावेन भोगाजन-

त्त्वादित्यर्थः। नन्वेवमपि प्राच्यविच्छेदासिद्धौ परन्तन्त्रपुरुषपूर्वको-ऽस्मादिरेवायं सम्प्रदाय इत्यत्र न किञ्चिदनिष्टमित्यत आह ॥ तथा-चेति ॥ प्रवाहत्वादिति शेषः ॥ धर्मो यागादिः, तस्य ग्लानिरुच्छेदः ॥ अधर्मस्य मण्डलीकरणादेः । संस्थापना व्यवस्था। ननु महाजनपरिग्रहाद्वेदस्य प्रामाण्यधीः, स एव क इत्यत आह ॥ कः पुनरिति ॥ हेतुदर्शनेनेति ॥ अनन्यथासिद्धप्रवृत्तिविषयत्वमित्यर्थः। तदेवाह ॥ न ह्यत्रेति ॥ निमित्तमित्यग्रे सर्वत्रानुषज्यते ॥ योगेति ॥ योग एव कर्त्तव्यो, न तु चित्तविक्षेपहेतुर्यागादिरित्यभिमानेनेत्यर्थः ॥ प्राथमिकस्येति ॥ ब्रह्मचारिण इत्यर्थः । योगव्यग्रताभिमानेन कर्मकाण्डे प्रवृत्तिर्न स्यात् तस्य योगबहिर्भावादित्यर्थः । प्रागुक्तेन-विफला विश्ववृत्तिर्न—इत्यादिना ॥

बौद्धाद्यागमपरिग्रहे अन्यथासिद्धिमाह—

सम्भवन्ति चैते हेतवो बौद्धाद्यागमपरिग्रहे। तथाहि। भूयस्तत्र कर्मलाघवमित्यलसाः। इतः पतितानामप्यनुप्रवेश इत्यनन्यगतिकाः। भक्ष्याद्यऽनियम इति रागिणः। स्वेच्छया परिग्रह इति कुतर्काऽभ्यासिनः। पित्रादिक्रमाभावात् प्रवृत्तिरिति पाषण्डसंसर्गिणः ॥

उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते, इत्यादिश्रवणादत्यग्रताऽभिमानिनः। ससघटिकाभोजनादिसिद्धेर्जीविकेत्ययोग्याः। आदित्यस्तम्भनं पाषाणपाटनं शाखाभङ्गो भूतावेशः प्रतिमाजल्पनं धातुवाद इत्यादिधन्धनात् कुहकवञ्चिताः। ततस्तान् परिगृह्णन्तीति सम्भाव्यते। अतो न ते महाजनपरिगृहीता इति विभागः ॥

स्यादेतत् । यद्येवं सर्वकर्मणां वृत्तिनिरोधो न किञ्चिदुत्पद्यते, न किञ्चिद्विनश्यतीति स्तिमिताकाश-

कल्पे जगति कुतो विशेषात् पुनः सर्गः ? । प्रकृतिपरिणतेरिति सांख्यानां शोभते । ब्रह्मपरिणतेरिति भास्करगोत्रे युज्यते । वासनापरिपाकादिति सौगतमतमनुधावति । कालविशेषादिति चोपाधिविशेषाभावादयुक्तम् । असताश्चोपलक्षणानां न विशेषकत्वं, सर्वदा तुल्यरूपत्वात् । न च ज्ञानद्वारा । अनित्यस्य तस्य तदानीमभावात् । नित्यस्य च विषयतः स्वरूपतश्च अविशेषादितिचेन्न । शरीरसंक्षोभश्रमजनितनिद्राणां प्राणिनामायुःपरिपाकक्रमसम्पादनैकप्रयोजनश्वाससन्तानाऽनुवृत्तिवन्महाभूतसंप्लवसंक्षोभलब्धसंस्काराणां परमाणूनां मन्दतरतमाऽऽदिभावेन कालावच्छेदैकप्रयोजनस्य प्रचयाख्यसंयोगपर्यन्तस्य कर्मसन्तानस्येश्वरनिःश्वसितस्याऽनुवृत्तेः । किंयात्सावित्यत्राविरोधादागमप्रसिद्धिसनातिक्रम्य तावन्तमेव कालमित्यनुमन्यते । ब्रह्माण्डान्तरव्यवहारो वा कालोपाधिः । तदवच्छिन्ने काले पुनः सर्गः । यथा खल्वलाबुलतायां विततानि फलानि, तथा परमेश्वरशक्तावनुस्यूतानि सहस्रशोऽण्डानीति श्रूयते । एवं विच्छेदसम्भवे कस्य केन परिग्रहो, यतः प्रामाण्यं स्यात् । ज्ञापकश्चायमर्थो, न कारकः । ततः कारकाभावान्निवर्त्तमानं कार्यं ज्ञापकाभिमतः कथङ्कारमास्थापयेत् ॥

सम्भवन्तीति ॥ उभयोरिति ॥ अत्यन्तमलिनः कायो देही चाऽत्यन्तनिर्मलः—इति पूर्वार्द्धम् ॥ साङ्ख्यानामिति ॥ प्रकृतिपरिणतावपि प्रयोजनाकाङ्क्षायाः सत्त्वात् तेषामेव शोभते, न त्वस्माकमित्यर्थः । एवमग्रेऽपि ॥ भास्करस्त्रिदण्डिमतभाष्यकारः ॥ ननु वर्त्त-

मानोपाध्यभावेऽप्यतीतसूर्यस्पन्दा उपाधयः स्युरित्यत आह ॥ असतामिति ॥ तस्य ज्ञानस्येत्यर्थः ॥ शरीरेति ॥ यथा सुषुप्तौ कर्मणां युगपद्वृत्तिनिरोधेऽपि श्वासानुवृत्तिबलात् कदाचित् प्रबोधस्तथा परमाणूनां कर्मसन्तानानुवृत्तिवशात् कदाचित् सर्ग इत्यर्थः॥ प्रचयेति ॥ यावत् प्रचयाख्यः संयोगोऽनुवर्त्तते, तावत् कर्मसन्तानाऽनुवृत्तिरित्यर्थः । प्रचयश्च यद्यप्यवयवमात्रवृत्तिः संयोगस्तथापि द्व्यणुकारम्भकसंयोगमात्रमत्र विवक्षितम् ॥ कियानिति ॥ ब्रह्मवर्षशतमेव कालोपाधिरित्यागमप्रसिद्धेरास्थीयते इत्यर्थः । यद्वा, प्रकृतब्रह्माण्डान्यब्रह्माण्डवृत्तिः कालोपाधिरित्याह ॥ ब्रह्माण्डेति ॥ पूर्वं शब्दनित्यत्वस्य प्रवाहाविच्छेदरूपस्य नित्यत्वस्य चासिद्धिरुक्ता । इदानीमस्मदभिमतस्यापि महाजनपरिग्रहस्य सर्गादावसम्भवादसिद्धिमाह ॥ एवमिति ॥ किञ्च महाजनपरिग्रहः प्रामाण्यज्ञापको, न तूत्पादकः । यस्तूत्पादको गुणस्तदभावे ग्राह्यस्य प्रामाण्यस्याभावात् किन्तेन ग्राह्यमित्याह ॥ ज्ञापकश्चेति ॥ अयमर्थो महाजनपरिग्रहरूपः ।

द्वितीयामन्यथासिद्धिं दूषयितुमुपन्यस्यति—

**स्यादेतत् ॥ सन्तु कपिलादय एव साक्षात्कृतधर्माणः कर्मयोगसिद्धास्त एव संसाराङ्गारेषु पच्यमानान् प्राणिनः पश्यन्तःपरमकारुणिकाः प्रियहितोपदेशेनानुग्रहीष्यन्ति, कृतं परमेश्वरेणानपेक्षितकीटादिसंख्यापरिज्ञानवतेनिचेन्न । तदन्यस्मिन्ननाश्वासात् । तथा ह्यतीन्द्रियार्थदर्शनोपायो भावनेत्यभ्युपगमेऽपि नासौ सत्यमेव साक्षात्कारमुत्पादयति, यतः समाश्वासिमः । प्रमाणान्तरसंवादादितिचेन्न।अहिंसादि हितसाधनमित्यत्र तदभावात् । आगमोऽस्तीतिचेन्न । भावनामात्रमूलत्वेन तस्याप्यनाश्वासविषयत्वात् । एकदेशसंवादेनापि प्रवृत्तिरितिचेन्न, स्वप्नाख्यानवदन्यथापि सम्भवात् । न चानुपलब्धे भावना-**

ऽपि । चौरसर्पादयो ह्युपलब्धा एव भीरुभिर्भाव्यन्ते । न च कर्मयोगयोर्हितसाधनत्वं कुतश्चिदुपलब्धम् । न चैतयोः स्वरूपेणोपलम्भः कश्चिदुपयुज्यते, भावनासाध्यो वा । न चास्मिन्नन्वयव्यतिरेकौ सम्भवतः । देहान्तरभोग्यत्वात् फलस्याप्रतीततया तदऽनुष्ठाने तदभावाच्च । न च कर्तृभोक्तृरूपोभयदेहप्रतिसन्धानादेव तदुपपद्यते । तदभावात् । न ह्येतस्य पूर्वकर्मणः फलमिदमनुभवामीति कश्चित् प्रतिसन्धत्ते । केचित्तथा भविष्यन्तीति सम्भावनामात्रेऽप्यऽनाश्वासात् ।विनिगमनायां प्रमाणाभावात् । प्रतिपन्निशीथनिद्राणप्रातःप्रतिबुद्धसमस्तोपाध्यायवदन्योन्यसंवादात् कपिलादिषु समाश्वास इतिचेन्न । एकजन्मप्रतिसन्धानवज्जन्मान्तरप्रतिसन्धाने प्रमाणाभावात् । तथापि च अधिकारिविशेषेण ब्राह्मणत्वाद्यऽप्रतिसन्धानेऽनुष्ठानरूपस्याश्वासस्याभावात् । न हि पूर्वजन्मनि मातापित्रोर्ब्राह्मण्यात्तदुत्तरत्र ब्राह्मण्यमिति नियमो,येन सर्गादौ वर्णादिधर्मव्यवस्था स्यात्। ईश्वरवददृष्टविशेषोपनिबद्धभूतविशेषानुपलम्भात् । अतीन्द्रियार्थदर्शित्वे चानाश्वासस्योक्तत्वात् । एतेन ब्रह्माण्डान्तरसञ्चारिवर्णव्यवस्थया सम्प्रदायप्रवर्त्तनमपास्तम् । सञ्चारशक्तेरभावात् । वर्षान्तरसञ्चरणमेव हि दुष्करं, कुतो लोकान्तरसञ्चारः, कुतस्तराञ्च ब्रह्माण्डान्तरगमनम् । अणिमादिसम्पत्तेरेवमपि स्यादितिचेन्न । तत्रापि प्रमाणाभावात सम्भावनामात्रेण समाश्वासानुपपत्तेः । आद्यमहाजनपरिग्रहान्यथा-

ऽनुपपत्तिरेवात्र प्रमाणमितिचेत् । एवम्भूतैककल्पनयैवोपपत्तौ भूयःकल्पनायां गौरवप्रसङ्गात् । विदेहनिर्माणशक्तेरणिमादिविभूतेश्चावश्याभ्युपगन्तव्यत्वात् । अस्त्वेक एवेतिचेत्, न तर्हीश्वरमन्तरेणान्यत्र समाश्वास इति ॥

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत् क्रीडति ॥
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवं
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेऽपि॥४॥

इति द्वितीयः स्तबकः ॥ २ ॥

स्यादेतदिति ॥ भावनायाः संस्काररूपाया विषयविशेषे मनोधारणाहेतुप्रयत्नरूपाया वाऽऽत्मसाक्षात्कारजनकत्वेऽपि तृणादौ कामिन्यादिसाक्षात्कारभ्रमजनकत्वान्न समाश्वासकत्वमित्याह ॥ तथाहीति ॥ दृष्टे संवादेऽप्यतीन्द्रियार्थे तदभावादित्याह ॥ अहिंसादीति ॥ यद्यपि न हिंस्यात् सर्वभूतानीत्यनेन हिंसाया अनिष्टसाधनत्वं बोध्यते, न तु तदभावस्य हितसाधनत्वम । तथाप्यतद्गुणसंविज्ञानबहुव्रीहिणा यागाद्येवोक्तमित्याहुः ॥ भावनामात्रेति ॥ ईश्वरमूलकत्वे त्वविवाद इति भावः । आगमैकदेश संवादेन प्रामाण्यं निश्चित्यान्यत्रापि वेदत्वेन तदनुमेयमित्याह ॥ एकदेशेति ॥ एकदेशसंवादोऽप्रमाणसाधारण इति न तद्गमक इत्याह ॥ स्वप्नेति ॥ ननु महाजनपरिग्रहाद् भावनामूलकेऽप्यागमे समाश्वासः स्यादित्यत आह ॥ न चेति ॥ सर्वत्र भावना साक्षात्कारजनिकाऽपि न सम्भवति । अनुभूयमानमात्रविषयत्वात् तस्या इत्यर्थः ॥ कर्म यागादि ॥ योगश्चित्तवृत्तिनिरोधः ॥ न चेति ॥ हितसाधनज्ञानमुपयोगि न वस्तुत्वेन ज्ञानमतिप्रसङ्गादित्यर्थः । भावनासाध्यो वेत्यत्रोपलम्भ इत्यनुषञ्जनीयम् । न चान्यत्रेवात्र साधनत्वनिश्चयः सम्भवतीत्याह ॥ न चास्मिन्निति ॥ अस्मिन् कर्मयोगसाधनत्वे । ननु प्रवृत्तौ सत्यां कर्मयोगाऽन्वये फलस्यान्वयज्ञानात् साधनत्वनिश्चयः स्यादित्यत आह ॥

अप्रतीततयेति ॥ हितसाधनत्वेनेति शेषः । हितसाधनत्वनिश्चयात् प्रवृत्तिस्तस्याश्च तन्निश्चय इत्यन्योन्याश्रय इत्यर्थः । ननु योऽहं विहितनिषिद्धकर्म कृतवान् सोऽहं तत्फलमनुभवामीति प्रत्यभिज्ञानात्तद्ग्रहः स्यादित्यत आह ॥ न चेति ॥ एकेति ॥ यथैकस्मिञ्जन्मनि कार्यभेदे प्रत्यभिज्ञानं प्रत्यक्षसिद्धं, न तथा जन्मभेदे इत्यर्थः । अस्तु वा संवादात् समाश्वासः, तथाप्यधिकारिविशेषण स्वीयब्राह्मणत्वाद्यप्रतिसन्धानेऽधिकृतवेदाध्ययनाद्यनुष्ठानं तेषां स्यादित्याह ॥ तथापि चेति ॥ न चेदानीमिव तदाऽपि तन्निश्चयः प्रत्यक्षादित्याह ॥ न हीति ॥ ननु यथेश्वरेणादृष्टविशेषजन्यतया शरीरे ब्राह्मण्यादि साक्षात्कृत्य सर्गादौ कपिलादयो वेदमध्याप्यन्ते, तथा कपिलादिभिरप्यध्येप्यत इत्यत आह ॥ ईश्वरवदिति ॥ अणिमादिसम्पत्तावप्यागम एव मानम् । तत्प्रामाण्यग्रह एव चानाश्वास इत्याह ॥ अत्रापीति ॥ हेतुदर्शनशून्यैर्ग्रहणधारणादिरूपमहाजनपरिग्रहानुपपत्तिरेवाऽणिमादिसम्पत्तौ मानमित्याह ॥ आद्येति ॥ तथाविधाः किं बहवः कल्पनीयाः, एक एव वा ? । नाद्य इत्याह ॥ एवमिति ॥ कल्पनायां लाघवसाचिव्यादेक एव विषय इति तज्ज्ञानात्वे मानाभाव इत्यर्थः । कल्पनागौरवमाह ॥ विदेहेति ॥ विविधो देहो विदेहः । अन्यमाशङ्क्य ईश्वरादन्यत्रानाश्वासेन तत्रैव पर्यवसानमिति परिहरति ॥ अस्त्वित्यादि ॥

परिच्छेदार्थमुपसंहरन् ईश्वरस्य नतिमाह ॥ कारमिति ॥ जगत् कार्यद्रव्यजातं, कृत्वा कृत्वा संहरन्, हृत्वा हृत्वा सृजन् । मायावशात् सृष्टिसंहारसहकारिसम्पत्तेर्यः क्रीडतीव । तं देवं स्तुत्यं, सत्यविश्वासैककारणं,भवं जगन्मूलकारणं,निष्प्रतिबन्धस्फुरदिच्छाप्रभावं शिवं प्रत्युद्दिश्य नमन्ननन्तकालेष्वपि भूयासमित्याशंसा ॥

इति श्रीमहामहोपाध्यायश्रीवर्द्धमानविरचिते कुसुमाञ्जलिप्रकाशे द्वितीयः स्तबकः ॥ २ ॥

श्रीगणेशाय नमः ।

# अथ मकरन्द द्वितीय—

## स्तवकः ॥ २ ॥

तस्य चेति । तस्य जन्यतया तत्कारणं यागादिः स्वीकर्त्तव्यः, २. २.
ततः स्वर्गसाधनत्वेन तदुपदेशकतया तथात्वेन तद्दर्शी कश्चित् स्वी-
कर्त्तव्यइत्यर्थ ॥ तदुभयमिति ॥ यद्यपि तद्विनाऽपि तादृशरूपो व्यव-
हारः सम्भवत्येव, तथाऽप्यतीन्द्रियसाक्षात्कारं विनेत्यर्थ इत्येके ।
तदीयस्वर्गसाधनतासाक्षात्कारोऽदृष्टविषयतानियत इत्याशयेन त-
थोक्तमित्यन्ये । ज्ञानान्तरस्यासम्भवात् साक्षात्कारं विनेत्युक्तम् । उ-
त्तरग्रन्थमवतारयितुमाह ॥ वेदवाक्यजेति ॥ अग्रे पञ्चमस्तवके ॥ अ-
न्यथासिद्धिद्वारा तन्निराकरणद्वारेत्यर्थः ॥

साध्यार्थविवरणपूर्वकं विरोधमपि हेत्वाभासमाह ॥ ज्ञानाजन- २. २८.
केति ॥ एतेन चार्थविरोधयोरुभयत्रापि सत्त्वाद्विकल्पस्य विरोधाभिधा-
नमसङ्गतमित्यपास्तमेकत्रैव साध्ये दोषद्वयस्योक्तत्वात् ॥ हेत्वसिद्धि-
रिति ॥ ज्ञानत्वहेत्वप्रसिद्धिरित्यर्थः । तथा च तद्घटितसाध्यस्याप्र-
सिद्धिरिति भावः ॥ ज्ञानत्वसाक्षादिति ॥ ज्ञानसाक्षाद्विभाजकोपाधि-
त्वादित्यर्थः । एतेन, ज्ञानत्वव्याप्यज्ञानान्यान्यत्वव्याप्यत्वेन प्रमात्व-
स्यासिद्धिः । तद्व्याप्यजात्यव्याप्यत्वगर्भत्वे प्रमाऽप्रमाऽन्यतरत्वादौ
व्यभिचार इत्यपास्तम ॥ प्रमात्वस्येति ॥ त्वन्मते इति शेषः ॥
घटज्ञानमिति ॥ घटविषयकानित्यज्ञानमित्यर्थः । न च तदवच्छिन्न- ३. ३०.
कार्यनिरूपितकारणासम्भवः । अनुगतभोजकादृष्टस्य सत्त्वात् । न
चैवं प्रकृतानुमाने तेनैवार्थान्तरं, दृष्टस्यैव सम्भवादित्याहुः ॥ अनुग-
तहेतुसिद्धिरिति । ननु गुणत्वस्यानुगतस्य निर्वक्तुमशक्यत्वादनि-
त्यप्रमात्वावच्छिन्ने कथमनुगतहेतुसिद्धिरिति चेन्न । अनित्यप्रमात्वपदे-
नानित्यसाक्षात्कारिप्रमात्वादेरेव विवक्षितत्वात् । तत्र च भूयोऽवय-
वेन्द्रियसन्निकर्षाद्यनुगतहेतुसत्त्वादित्येके । शाब्दप्रमायां ग्राह्यविशेष-
स्य वाक्यार्थस्य प्रमा हेतुरिति प्रमासामान्ये ग्राह्यप्रमासामान्यमी-
श्वरस्यैव गुणः । यद्विशेषयोरिति न्यायात् । न च ग्राह्यमात्रस्याति-
प्रसक्ततया यत्र यद् ग्राह्यं तत्र तत्प्रमा हेतुर्वाच्यः । तथा च तद्ग्रा-

ह्यप्रमायां तद्ग्राह्यप्रमा हेतुरित्यननुगम एवेति वाच्यम्। एवं तत्साक्षात्कारे तदिन्द्रियसन्निकर्षो हेतुरिति विशेषेऽप्यननुगमापत्तेः। यदि च विशेषे विशेषस्य प्रयोजकत्वेऽपि सामान्ययोरपि तथात्वं, तदा प्रकृतेऽपि तुल्यमित्यन्ये। स्वाविषयकप्रमाजनकत्वं गुणत्वं, स्वाविषयकभ्रमजनकत्वञ्च दोषत्वमिति तदुभयं निर्वाच्यम्। एवञ्च तत्तत्प्रमादौ यथार्थपरामर्शत्वादिना हेतुत्वग्रहानन्तरं प्रमासामान्यं प्रत्युक्तगुणत्वेन कारणत्वग्रहः। एवं दोषत्वेनापीत्याहुः। विस्तरस्तु प्रत्यक्षप्रकाशे ॥

४. २०. प्रत्यक्षविशेषदर्शनमिति ॥ प्रत्यक्षविपरीतदर्शनमित्यर्थः ॥ संशयविपर्ययोत्तरेति ॥ यद्यपि संशयोत्तरप्रत्यक्षमात्रे विशेषदर्शनं न हेतुः, अन्धकारे घटसंशयोत्तरप्रत्यक्षस्य तद्विनाऽप्यालोकसमवधानमात्रेणैवोपपत्तेः। तथापि यत्र विशेषादर्शनादिदोषाधीनः संशयस्तदुत्तरप्रत्यक्षे तस्य हेतुत्वम्। उक्तस्थले च व्यञ्जकाभावाधीनः सइति भावः। ननु तत्रापि विशेषदर्शनं न हेतुः संशयानुत्तरप्रत्यक्षसामग्रीसत्त्वे तदुत्पत्त्यापत्तेः। तदसत्त्वे तद्व्यतिरेकादेव तद्व्यतिरेक इति किं विशेषसामग्र्यन्तरकल्पनया?। अत एव सिद्ध्युत्तरानुमितित्वावच्छिन्ने सिषाधयिषा न विशेषसामग्री, किन्तु तद्विरहविशिष्टसिद्ध्यभावः सामान्यसामग्री। तदभावादेव तदा नानुमितिरिति चेत्। तर्हि तद्वदेव विशेषदर्शनविरहविशिष्टसंशयाभावः सामान्यसामग्रीत्यत्रैव तात्पर्यमित्याहुः। विस्तरस्त्वनुमानप्रत्यक्षप्रकाशयोरनुसन्धेयः ॥

६. १०. लिङ्गसादृश्येति ॥ यद्यपि परामर्शादिरूपसामान्यसामग्रीविरहादेव तत्र नानुमित्यादिः,तथापि यत्सामान्ये यत्सामान्यमिति न्यायात् प्रमारूपानुमित्यादिविशेषे सत्यपरामर्शादिविशेषस्य हेतुत्वमिति भावः ॥ तात्पर्यविषये चेति ॥ अघटे घटवत्त्वं तत्तात्पर्यविषयस्तत्र च प्रमा नोत्पन्नैवेत्यर्थः ॥ प्रामाण्येऽपीति ॥ यद्यपि तात्पर्यविषयीभूतेऽर्थे करणापाटवस्थलेऽपि प्रामाण्यमेवेति न तात्पर्यार्थस्तत्र प्रामाण्याभावात्, तथापि प्रकृतवाक्यार्थगोचरयथार्थज्ञानलक्षणो गुण एव तत्र नास्तीति भावः ॥

६. २७. रागद्वेषयोरिति ॥ अत्रेदं चिन्त्यम्। प्रवृत्तिविरह एव निवृत्तिरिति न प्रयत्नत्रैविध्यं, मानाभावात्। न च वैपरीत्यापत्तिः। सुषुप्तिदशायामपि निवृत्तिविरहस्य सत्त्वेन प्रवृत्तिसाध्यचेष्टादिकार्योत्पत्त्यापत्तेः।

न च तदा निवृत्तिरेवेति वाच्यम्, तदा तत्कारणद्वेषाभावेन तदभावात् द्वेषाभावश्च तत्कारणदुःखसाधनत्वज्ञानाभावादिति ॥

भ्रान्तप्रतारकवाक्ये इति ॥ अत्राहार्यारोपं विना प्रतारणाया अभावात् स एव विषयाबाधात् प्रमारूप इति तमादाय यद्यपि गुणजन्यत्वमप्रत्यूहं तथापि समाधिसौकर्यादेतदुक्तम् । यद्वा, भ्रान्तप्रतारकस्यैव वाक्यं भ्रान्तप्रतारकवाक्यं, तथा च बाधितमन्यदवगत्यान्यदबाधितं यत्र दैववशाद् ब्रूते, तत्र भगवद्बुद्धेर्गुणत्वमिति वयं पश्यामः । अत एवोक्तगुणजन्यत्वेऽपि भ्रमादिदोषजन्यत्वादप्रामाण्यमपि स्यादित्यपास्तम् । भ्रमस्य भिन्नविषयत्वेन तद्वाक्याजनकत्वात्, प्रतारणायाश्चाभावात् । केचित्तु विप्रलिप्सा विसंवादिप्रवृत्तिजननेच्छा, सापि यथार्थैव दोषः, तादृशी च तत्र नास्त्येवेत्याहुः । वस्तुतो गुणविरह एव दोषः, स च तत्र नास्तीति । अत एव लिङ्गाभासजन्यप्रमायामीश्वरयथार्थलिङ्गज्ञानजन्यत्वेऽप्ययथार्थलिङ्गज्ञानरूपदोषजन्यतया व्यापकांश एव भ्रमत्वमपि स्यादित्यपास्तम् । एतदपि सम्प्रदायानुरोधादुक्तम् । वस्तुतोऽसङ्कीर्णबाधस्थले बाधानवतारकाले यथार्थपरामर्शादप्ययथार्थनुमित्युत्पत्तेरबाधितत्वप्रमा गुणः, तद्भ्रमो दोषः । शब्दे च वाक्यार्थभ्रमो दोषस्तत्प्रमा गुणः योग्यताभ्रमो दोषस्तत्प्रमागुण इति वा विवक्षितमिति सर्वमवदातम्॥

तज्ज्ञानविषयकेति ॥ पक्षश्च ज्ञानप्रामाण्यमित्यनुषज्यते । प्रत्यक्षप्रकाशे चैतदनुसन्धेयम् ॥ भागासिद्धिरिति ॥ पक्षविशेषणं बोध्यमिति शेषः ॥ न त्विति ॥ हेतुविशेषणमिति शेषः ॥ न च ज्ञानत्वेनेति ॥ ज्ञानाविषयप्रतीत्यविषयत्वेनेत्यर्थः । यथाश्रुते स्वरूपासिद्धिप्रसङ्ग इति बोध्यम् । यत्तु ज्ञानधर्मत्वेनेत्यर्थ इति तन्न । ज्ञानरूपार्थे अनुपदं व्यभिचारोपदर्शनविरोधात् । ज्ञानत्वे व्यभिचारोपदर्शनपरंतादिति ज्ञानधर्मपरत्वेऽप्यदोष इत्यन्ये ॥ अनभ्यासदशापन्नेति ॥ कर्त्तव्यहेतुर्यावति तावत एव पक्षत्वमभिमतम् । अनभ्यासदशापन्नेऽपि सर्वत्र न संशय इति यथाश्रुते भागासिद्धितादवस्थ्यापत्तेरिति ॥

न स्वाश्रयेति । न यावत्स्वाश्रयग्राह्यमित्यर्थः । तेन योगीश्वरज्ञानस्य सर्वप्रामाण्याश्रयतया तद्ग्राह्यत्वेन न बाधः । यद्यपि सर्वविषयकज्ञानमात्रवृत्तिप्रामाण्यांशे बाधः, तथापि तस्य पक्षानभिमतत्वेति बोध्यम् ॥ तदन्येति ॥ स्वाश्रयान्येत्यर्थः । ननु परेषामपि

७. १७.

८. २५.

९. २६.

प्रामाण्यस्यानुमितिग्राह्यत्वाभ्युपगमेन सिद्धसाधनम् । न च स्वाश्रयातिरिक्तमात्रग्राह्यत्वमित्यर्थः । उक्तन्यायेन प्रामाण्यमात्रस्यैव स्वाश्रयीभूतयोगीश्वरज्ञानादिग्राह्यतया बाधापत्तेरिति चेन्न। स्वाश्रयपदेन स्वाश्रयत्वावच्छिन्नं न विवक्षितं, येनोक्तदोषः स्यात्। किन्तु स्वाश्रयीभूतास्मदादिज्ञानव्यक्तिः तदतिरिक्तमात्रग्राह्यमित्यर्थः ॥

९. २६. स्वाश्रये सत्यपीति ॥ विपक्षबाधकतर्कसूचनायापिशब्दः, सतिसप्तमीमहिम्ना च स्वाश्रयसामानाधिकरण्यं पक्षविशेषणं लभ्यते। तथा च स्वाश्रयसमानाधिकरणस्वाश्रयाधिकरणक्षणावधिकतृतीयक्षणवर्त्तिद्विमात्रकोटिकसंशयकोटित्वादित्यर्थः । तेन यत्र रूपं गुण इति ज्ञाने गुणत्वतदभाव-प्रामाण्यतदभावकोटिकः समूहालम्बनः संशयः, तत्र गुणत्वे हेत्वभावादेव न व्यभिचारः। यत्र च गुणत्वतदभावमात्रकोटिकः संशयः, तत्र तादृशसंशयविषयप्रामाण्याश्रयज्ञानग्राह्यत्वाभावरूपसाध्यसत्त्वादेव न व्यभिचार इति । यद्वा, तादृशतदधिकरणकसंशयकोटित्वादिति हेतुः। तथा च यत्र तादृशतदधिकरणकसंशयकोटित्वं तत्र तन्निष्ठतया न स्वाश्रयग्राह्यत्वमिति सामान्यतो व्याप्तिरभिमता। एतञ्च गुणत्वस्य रूपनिष्ठतया स्वाश्रयेणग्रहेऽपि स्वाश्रयनिष्ठतयाऽग्रहेण विशेषणाभावसत्त्वात्तत्र न व्यभिचार इति। केचित्तु यद्यवसायविषयकोटिको यद्यवसायधर्मिकश्च सन्देहस्तृतीयक्षणे जायते तत्प्रामाण्यस्यैव पक्षत्वात् तत्प्रामाण्याश्रयग्राह्यत्वाभावो गुणत्वेऽस्त्येवेति न व्यभिचार इत्याहुः ॥

९. २७. प्रामाण्यसंशयेति ॥ स्वाश्रयविशेष्यकप्रामाण्यसंशयायोग्यत्वादित्यर्थः। विस्तरस्तु प्रत्यक्षप्रकाशेऽनुसन्धेयः । समर्थेति ॥ न च जनकतावच्छेदकस्य प्रामाण्यस्याग्रहे कथं तद्ग्रह इति वाच्यम्। उक्तग्राहकसत्त्वे तृणारणिन्यायेन व्यक्तावपि तद्ग्रहसम्भवात्। यद्वा, ज्ञानवृत्तिप्रवृत्तिसामान्यजनकत्वमेव हेतुप्रविष्टम् । तथा चोपनीते ज्ञाने प्रवृत्तिजनकत्वे प्रवृत्तौ च समर्थत्वमुपनीतं गृह्यते इत्यर्थाद्विशिष्टवैशिष्ट्यरूपहेतुग्रह उपपद्यते इति ॥

११. ३. स्मृतिरूपे पृथिवीज्ञाने इति ॥ पृथिवीज्ञाने इत्यर्थः । अन्यथा पृथिवीस्मरण एव गन्धवद्विशेष्यकत्वनिश्चयलाभे पृथिवीत्वप्रकारकनिश्चयत्वानुव्यवसितावित्यनर्थकमापद्येत । एवञ्च तत्सन्निकृष्टेनेत्यस्य स्मृतिरूपसविषयकसहकारिणा इत्यर्थः। तथा च स्मृत्युपनीते

पूर्वानुभव एव गन्धवद्विशेष्यकत्वनिश्चय इति तद्विशेष्यकपृथिवीत्वप्रकारकज्ञानत्वादिहेतुग्रह इति भावः ॥

सर्वनाममहिम्नेत्यनेनानुपपत्तिविशेषः पक्षधर्मतासहकारी विवक्षित इति नानुमाने तदुपयोग इति दूषणमनवकाशमित्येके । दृष्टान्तपरतया तदित्यन्ये ॥ ननु तद्धत्त्वस्यैकस्याभावाद्देवदत्तादिज्ञानप्रामाण्यं जन्मान्तरे नानुभूतमिति तत्र नोक्तगतिसम्भवः । गत्यन्तरसत्त्वे प्राग्भवीयसंस्कारोद्बोधे मानाभावश्चेत्यनुशयादाह ॥ प्रथममिति ॥ तत एवेति ॥ अप्रामाण्यशङ्काविधूननस्य ततोऽपि भावादिति भावः ॥ तदेवेति ॥ यद्यपि पक्षधर्मताबलादप्यखण्डाभावस्य पक्षीयत्वं व्यापकतानवच्छेदकप्रकारेण सिद्ध्यति, न तु तद्धत्तीत्यादिकं, तथापि तदनन्तरमर्थात्तत्सिद्धिरित्यत्र तात्पर्यम् । अत्र चाप्रसिद्धाभावोऽपि प्रतियोगिप्रसिद्ध्या व्यतिरेकव्याप्तिग्रहे सति सिद्ध्येत् । न चाप्रामाण्यं प्रसिद्धं, प्रामाण्यवत्तस्याप्यतीन्द्रियत्वात् । तदर्थं प्राग्भवीयसंस्काराद्यनुसारेण च प्रामाण्यानुमानार्थमेव तदनुसरणमर्हं, लाघवादावश्यकत्वाच्च । प्रमेयमित्यादिज्ञाने चाप्रामाण्याभावानुमानासम्भवे तत्र प्रकारान्तरानुसरणे स एव प्रकारः सर्वत्रानुस्रियतामित्यादि दूषणं प्रत्यक्षप्रकाशे द्रष्टव्यम् ॥ ११. १६.

अयमिति ॥ अनुभवपदं निश्चयपरम् । तेन संशयव्यावृत्तसाध्यसिद्धिः, स्मृतेरपि प्रवृत्तेस्तत्साधारण्यञ्चेत्याहुः । निष्प्रकारकत्वेनार्थान्तरवारणाय तृतीयान्तम् । पृथिवीत्वाभाववति नेत्येव साध्यम् । व्यतिरेकव्याप्तौ साध्याभावस्य व्याप्यत्वेन तत्र नीलधूमवदधिकस्य व्यर्थत्वात् । अप्रामाण्यस्य भावरूपतया साध्याभावस्याखण्डत्वेन न वैयर्थ्यमित्यस्याप्यसम्भवादिति ध्येयम् । पृथिवीत्वभ्रमे व्यभिचारवारणाय जनकान्तम् । अत्र पृथिवीत्वमिति निश्चयस्य पृथिवीत्वाभाववत् पृथिवीत्वविशेष्यकस्य पृथिवीप्रवर्तकत्वाभ्युपगमपक्षे तत्र व्यभिचार इत्यत उक्तं, पृथिवीत्वप्रकारकेति ॥ निश्चयपदं च निश्चयपक्षतासूचनार्थमविवक्षितार्थकम् । विस्तरः प्रत्यक्षप्रकाशे ॥ ११' २३ १२. ६.

कदा चिदपीति ॥ तत्र दोषात् कदा चित् प्रामाण्यसंशयेऽपि क्व चिन्मनसा तद्ग्रहे बाधकाभावान्मनोयोग्यत्वलक्षणं स्वतस्त्वं न खण्डितं भवति, अन्यथा रजतत्वादेश्चक्षुरादियोग्यत्वं न स्यात् । दोषतदभावाभ्यामुभयोपपत्तिरिति तु तुल्यम् । न च तत्र सामग्रीबला-

स्तथा प्रकृते मनसो बहिरस्वातन्त्र्यात् स्वातन्त्र्येण तद्वत्त्वग्राहकस्यैव तत्सत्तानिश्चयरूपतया प्रामाण्याग्राहकत्वान्न तथेति वाच्यम् । तर्हि सामग्रीविरहान्न स्वतस्त्वमित्यायातं, संशयानुपपत्तेः क्वोपयोगः ? । न च सोऽप्युपनीते मनसः स्वातन्त्र्याभ्युपगमात् । अन्यथा तवाप्युपनयसहकारेण ततस्तद्ग्रहणं सर्वसिद्धं विरुध्येतेति चिन्त्यम् ॥

१४. २५ अन्यथेतीति ॥ प्रवृत्त्यनुपयोग्यप्यस्तीत्येव यदि प्रामाण्यमवश्यं ज्ञेयं, तदाऽस्य ग्राह्यत्वेऽप्यनवस्थेति भावः । मिश्रमतेऽप्यनवस्था द्रष्टव्या ॥ फलमुखीमिति ॥ यद्यपि पूर्वमेवमाशङ्का परिहृतैव, तथापि सामान्यतः सा, विशिष्येदानीमाशङ्केति न दोष इत्येके । प्रसङ्गान्तरेण दोषान्तरदानाय पुनराशङ्केत्यन्ये ॥

१५. १७. बाधकाभिमतस्यापीति ॥ अशेषविशेषोपलम्भेऽपि विपरीतारोपाभ्युपगमपक्ष इति शेषः ॥ तां विनेति ॥ न चान्यत्र विशेषदर्शनस्य धर्म्यन्तरे शङ्काप्रतिबन्धकत्वेऽतिप्रसङ्ग इति वाच्यम् । अन्वयव्यतिरेकाभ्यामनन्यगत्याऽत्रैव तथा कल्पनादित्येके । तद्विषयकत्वावच्छेदेन पूर्वज्ञाने प्रामाण्यग्रहात् तज्ज्ञानत्वमेव विशेषदर्शनमित्यन्ये । वस्तुतस्तु, तस्योपनीतभानसामग्रीत्वेन तद्ग्रहानन्तरमुपनीतं प्रामाण्यं तत्र भासते इति न तत्र शङ्केति प्रत्यक्षप्रकाशे विपश्चितम् । अन्यथा तस्य व्याप्यत्वेनाग्रहे शङ्काविरोधित्वानुपपत्तेरिति ध्येयम् । धूमत्वदर्शनस्य व्याप्तिसंशयविरोधित्ववत् पृथगेव तस्य तद्विरोधित्वमित्यप्याहुः ॥

१६. १६. ननु कोलाहलस्य ध्वन्यात्मकत्वात्तदनित्यत्वेऽपि वर्णानित्यत्वं न सेत्स्यतीत्यत आह ॥ अनभिव्यक्तेति ॥ शब्दस्य विभुत्वादिति, भट्टमते ॥ अन्त्यशब्दध्वंसेऽपि कदाचिद्विवादसम्भवादाह ॥ श्रूयमाणेति ॥ अन्त्येत्युपलक्षणम् । इन्द्रियासन्निकृष्टशब्दान्तरध्वंसेऽपि द्रष्टव्यम् । न च तस्यापि स्वरूपयोग्यत्वादैन्द्रियकत्वमेवेति वाच्यम् । अन्त्यशब्दस्यापि सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वेन तथात्वसम्भवात् ॥ तस्येति ॥ अन्त्यशब्दस्येत्यर्थः । एतदपि प्रत्यक्षे स्वजनायवर्त्तित्वेन विशिष्य हेतुत्वपक्षे [illegible] ॥ कर्मधारयपक्षे साध्याविशिष्यमाशङ्क्याह ॥ ऐन्द्रियकेति ॥ लिङ्गवत्त्वेति ॥ तथा च [illegible] विशेषाभावात् सामान्याभावोऽनुमीयत एव, न प्रत्यक्ष इति भावः ॥

१८. २. ननु मूर्त्तवत्त्वस्य योग्यायोग्यघटितत्वेऽपि नायोग्यत्वं, किञ्चि-

द्विशेषयोग्यतयैव सामान्यस्य योग्यत्वात् । घटवति भूतले मूर्त्तव-
दिदं भूतलमिति चाक्षुषप्रत्यक्षदर्शनाच्च । अन्यथा घटवत्त्वसामान्य-
स्यापि सन्निकृष्टासन्निकृष्टघटघटितत्वेनैन्द्रियिकत्वानुपपत्तेः, स्वरू-
पायोग्यतया सहकारिविरहेण वा फलाभावस्याविशेषादित्यनुशया-
नआह ॥ अत्राभावपदेनेति ॥ न चैन्द्रियिकाभावत्वाविशेषेऽपि घट-
त्वसामान्याभावस्य प्रत्यक्षत्वे किं विनिगमकमिति वाच्यम् । सन्नि-
कृष्टघटस्यापि तत्र तर्कितं सत्त्वमनुपलब्धिविरोधीति यावद्विशेषाभा-
वप्रत्यक्षासम्भवादयोग्यमूर्त्ताभावस्यातथात्वादिति विशेषात् ॥ द्र-
व्यनिष्ठेति ॥ द्रव्यविशेषणतयाऽप्रत्यक्षत्वेऽपीत्यर्थः । एतेनाधिकरण-
भेदेनाभावभेदानभ्युपगमाद्, अभ्युपगमे वा द्रव्यनिष्ठतदभावे व्यभि-
चारतादवस्थ्यादित्यपास्तम् । एकस्यैवाधिकरणभेदेन प्रत्यक्षत्वाप्र-
त्यक्षत्वोपगमात्, योग्यायोग्यजले पृथिवीत्वात्यन्ताभाववत् । अत्र
यावद्विशेषाभावाप्रत्यक्षतयाऽप्रत्यक्षत्वं गुणेऽपि समानम् । अनुमाना-
दिना तन्निश्चये तत्प्रत्यक्षत्वं द्रव्येऽपि तुल्यम् । यावद्विशेषाभावनिश्चये
तन्निश्चयोऽनुमित्यात्मक इत्यपि समानमित्यनभिमतिर्वीजं द्रष्टव्यम् ॥

ऐन्द्रियिकाधारत्वश्चेति ॥ तथा चातीन्द्रियाधारत्वादित्यस्य ऐ- १८. ५.
न्द्रियिकानाधारत्वादित्यर्थो बोध्यः । तेन तद्व्यतिरेकत्वमस्योपपद्यते ।
अत एवानुपदं तथैव विभावयिष्यतीति । न च शब्दादौ साध्याव्या-
पकत्वम् । साधनाद्यवच्छिन्नसाध्यव्यापकत्वादिति भावः ॥ भवेदेवं
यदि समव्याप्त एवोपाधिः स्यात् । न चैवम् । विषमव्याप्तस्यापि त-
थात्वादित्याह ॥ उपाधेरिति ॥ तथाऽपीति ॥ आत्मादौ व्यभिचारवा-
रणाय सत्यन्तम् ॥ ऐन्द्रियिकप्रतियोगिकाभावत्वे सत्यैन्द्रियकाधा-
रत्वं योग्यत्वम् । तथा च न धर्माभावस्य योग्यता, तद्विरहश्च साधन-
व्यापक एवेत्याह ॥ ऐन्द्रियिकाभावमिति ॥

स्वरूपयोग्यतापदस्य फलोपधानपरत्वेऽपदार्थव्याख्यानमित्यनु- १८. २४.
शयानआह ॥ यद्वेति ॥ एवञ्चात्र कल्पे तस्याः स्वरूपयोग्यतायास्तां
सहकारियोग्यतामपेक्ष्य सर्वदा अव्यवस्थितेरित्यकारप्रश्लेषेण मूल-
फक्किका योज्या तेन साध्याव्यापकत्वं निर्वहतीति ध्येयम् ॥ अ-
भावत्वेति ॥ अत एव साधनावच्छिन्नसाध्यव्यापकत्वमपि निरस्तम् ।
वस्तुत आधारपदं प्रतियोगिसमवायिपरमिति भूतलादिवृत्तित्वेऽपि
साध्याव्यापकत्वम् । अन्यथा शब्दध्वंसस्यापि वीणादिवृत्तित्वेन सा-

धनव्यापकत्वापत्तेरिति ॥ द्रव्यादीति । तदभावस्य कालाद्यतीन्द्रियाधारनिरूप्यत्वात् साध्याव्यापकत्वमिति भावः ॥ ऐन्द्रियिकत्वमिन्द्रियग्राह्यत्वमात्रं, तदिन्द्रियग्राह्यत्वं वा ? । आद्ये, गौरवादिति ॥ अन्त्ये, तदिन्द्रियेति ॥ तस्येति ॥ कालादावाश्रयान्तरे प्रत्यक्ष एवेतीष्टापत्तिरपि बोध्या ॥

१९. ९. फलोपधानाभिप्रायेण समाधत्ते ॥ तस्मादिति ॥ फलोपधानाभावरूपे साध्ये सति योग्यता सत्यपि व्यर्था व्यभिचारप्रयोजिकेतिस्वरूपासिद्धिरेवोक्तेत्यर्थः । वस्तुतः, स्थापनायां योग्यत्वमेव साध्यम् । अन्यथा व्यभिचारप्रसङ्गादिति तदभाव एवात्र साध्यः । तत्र चाप्रसिद्धिरुपलक्षणतयोक्तेति व्यभिचारसत्त्वेऽप्यदोष इति तत्त्वम् । अत एवास्वरसादुक्तमित्याहुरिति ॥

१९. १५. शब्दलिङ्गजेति ॥ शब्दरूपलिङ्गजेत्यर्थः । अनुमितिविषयत्वमित्युपलक्षणम्, मानसप्रत्यक्षविषयत्वमित्यपि द्रष्टव्यम् । यद्यपि श्रोत्रप्रत्यक्षविषयत्वमपि सम्भवति, तथापि तत्र श्रोत्रस्य विशेष्यत्वमिति तन्नोक्तम् ॥ तथापीति । उपसंहरणेव इति निराकरोतीत्यन्वयः। विशेष्यमिति । विशेष्यत्वेनेति शेषः । यद्वा, एतन्मते निरधिकरणाऽप्यभावप्रतीतिः कालाद्यधिकरणा चेति तथोक्तम् । ननु भवेदेवं यदि साधनं साध्यव्याप्यं स्यात्, तदेव चोपाधिवादिमतेऽसिद्धमित्यनुशयादाह व्यभिचारानुमान इति ।

२२. ३. नाप्युभयस्येति । द्रव्याधारत्वसमानाधिकरणद्रव्यप्रतियोगित्वसाध्यप्रयोजकतया उपाधित्वेन स्थापनाहेतोरप्रयोजकत्वं नेत्यर्थः । ऐन्द्रियिकत्वरूपेति । न चाभावत्वपक्षधर्मावच्छिन्नसाध्यव्यापकत्वं, नष्टाश्रयकरूपाद्यभावे साध्याव्यापकत्वादिति भावः । एतेन पूर्वपक्षिवचनत्वेनास्य ग्रन्थस्यासङ्गतिरित्यपास्तम् । सिद्धान्तिनैव स्वातन्त्र्येण स्वहेतोरप्रयोजकत्वमाशङ्क्य परीहारकरणात् । केचित्तु नापीत्यस्य पूर्वं तदेतन्निराकरोति नोभयस्येति प्रक्षिप्य सिद्धान्तिवचनं कृत्वा योजयन्ति । नन्वेवं घटे भूतलं नास्तीति बुद्धेरपि तत्संयोगाभावविषयत्वे भ्रमत्वापत्तिः । न चेष्टापत्तिः, तस्याः प्रमात्वेन सर्व्वसिद्धत्वात् । एवं रूपं घटो नास्तीति बुद्धेरपि तत्संबन्धाभावविषयकत्वे भ्रमत्वापत्तिः । न च तत्संबन्धाभावविषयकत्वं तद्विशिष्टसंबन्धाभावविषयकत्वं विशिष्टाभावश्च विशेषणाभावाधीनस्तत्रास्त्येवेति

न भ्रमत्वमिति वाच्यम् । हन्तैवमावश्यकविशेषणाभावविषयत्वेनैवोपपत्तौ विशिष्टाभावविषयत्वकल्पने गौरवान्मानाभावाच्चेत्यनुशयादाह केचित्त्विति । तत्सम्बन्धतथात्वेति । तत्सम्बन्धसत्त्वासत्त्वप्रयुक्तेत्यर्थः । २२. १७. सामान्यध्वंसस्येति । प्रतियोगितावच्छेदकभेदेनाभावभेदादभावान्तरवद् ध्वंसस्यापि सामान्याभावत्वमिति मतेनेदम् । न च ध्वंसस्य प्रतियोगिजन्यत्वनियमात् कथं तथेति वाच्यं, चरमप्रतियोगिजन्यतया तथात्वात्, यावत् प्रतियोगिजन्यत्वे गौरवात् । ननु संयोगध्वंसस्य घटात्यन्ताभावसम्बन्धरूपत्वे गुणादौ तदत्यन्ताभावसम्बन्धो न स्यात् । यदि च तत्र स्वरूपमेव सम्बन्धः, तदा प्रकृतेऽपि तथाऽस्तु । तत्कादाचित्कत्वाभ्युपगमाच्च प्रतीतेरपि तथात्वोपपत्तेः । किञ्च, सामान्यध्वंसस्य तद्घटसंयोगसामान्यं वा, तद्भूतलघटसंयोगसामान्यं वा प्रतियोगि ? नाद्यः, व्यधिकरणस्यानागतस्य च संयोगस्य तदा तत्र भूतले ध्वंसासम्भवेनात्यन्ताभावसम्भवानुपपत्तेः । नान्त्यः, यत्र भूतले कदापि न तद्घटसंयोगस्तत्र प्रतियोग्यप्रसिद्ध्या तादृशध्वंसाभावेनात्यन्ताभावसम्बन्धानुपपत्तेः, अनागतसंयोगमादाय पूर्वदोषापत्तेश्चेति पूर्वास्वरस्मादाह यथेति । यथा दण्डोपनयापनयाभ्यां दण्डावच्छिन्नपुरुषविरह कादाचित्कः, संयोगावच्छिन्नघटविरहोऽपि तथेत्यर्थः । नन्वेवं संयुक्तत्वेनैव घटोपस्थितिरभावप्रतीत्यङ्गं स्यात् न तु घटत्वमात्रेण, तस्य प्रतियोगितावच्छेदकत्वात्, न चेष्टापत्तिः, तत्प्रकारकतदुपस्थित्यनन्तरमपि भूतले तद्घटाभावप्रतीतेरनुभवसिद्धत्वादित्यनुशयादाह यथाऽनादीति । समयविशेषसंसर्गिणा नित्याभावेनैवोपपत्तौ न तुरीयकल्पनमित्यनभिमतिबीजमत्रापि द्रष्टव्यम् ।

तदुपलम्भकं प्रतियोग्युपलम्भकं, तस्य सत्त्वे समवधाने मेलने २२. ३. इत्येतत् । उपलम्भो लौकिकप्रत्यक्षम् । तथा च प्रतियोगितद्व्याप्याभ्यामितरद् यावत् तदुपलम्भकं, तत् सत्त्वे अनुपलब्धिरित्यर्थः । चक्षुरादिकरणसमवधानमात्रे तु न योग्यानुपलब्धिः, अन्धकारे घटाभावप्रत्यक्षापत्तेः । किन्तु यावत्प्रतियोग्युपलम्भकसामग्रीसमवधाने सत्यनुपलब्धिः । तथा सति नान्धकारे घटाभावग्रहापत्तिः, घटोपलम्भकसामग्रीमध्यपातिनो यावदन्तर्गतस्यालोकसम्बन्धस्य तदानीमभावात् । प्रतियोग्युपलम्भे प्रतियोगिनोऽपि विषयविधया हेतुतया

तस्यापि यावदन्तर्गतत्वात् प्रतियोगीतरेति । प्रतियोगिसत्त्वेऽपि तेन सममिन्द्रियसान्निकर्षश्च प्रतियोगिव्याप्यः व्याप्तिश्च भेदगर्भा विवक्षिता अतः प्रतियोगिनः प्रतियोगिव्याप्यत्वेऽपि न क्षतिः । यत्किञ्चिदुपलम्भकसत्त्वेऽप्यन्धकारादौ तदभावग्रहाभावाद् यावदिति । तथा च प्रतियोगितद्व्याप्यभिन्नं प्रतियोग्युपलब्धिव्यापकं यद् यत्, समुदिततत्सत्त्वे इत्यर्थः । विभिन्नदेशावच्छेदेन यावत् तदुपलम्भकसत्त्वेऽपि अभावाग्रहात् समवधाने इति व्याख्यानम् । तत्र तद्धर्मावच्छिन्नतद्धर्मावच्छिन्नव्याप्येतरतद्धर्मावच्छिन्नलौकिकप्रत्यक्षयावत्कारणसमवधाने सति तद्धर्मावच्छिन्नानुपलब्धिः कारणमिति तु निष्कर्षः ।

२२ ३०. योग्येति । तथा चेयमेव योग्यानुपलब्धिरभावग्राहिकेति संयोगाभावोऽपि प्रत्यक्षएवेति भावः । एवं सति प्रकृतः शब्दाभावएव प्रत्यक्षो न स्यादिति नाशङ्कनीयं, तत्राप्युक्तानुपलब्धिसत्त्वादित्याह स चेति । एतेन शब्दाभावमधिकृत्य पूर्वपक्षाभावादिदमसङ्गतमित्यपास्तम् । तदङ्गेति : यद्यप्येवं समसमयत्वात् पूर्ववर्त्तित्वाभावेनानङ्गत्वमित्यन्यथासिद्ध्युपदर्शनमयुक्तं, तथापि यत्राऽपि पूर्ववर्त्तित्वं तत्रापि तदनङ्गत्वमिति दर्शयितुमन्यथासिद्धत्वादित्युक्तम् । एतदपि संयोगरूपप्रतियोगिसमवायितया भूतलस्य न निरूपकत्वमित्येवंपरं, अधिकरणनिरूपकत्वस्याग्रेऽभ्युपगमादिति ध्येयम् । बाधितेति प्राचीनमतेनेदम् । घटादाविति । तादृशगन्धाद्यनुपलम्भेऽप्युपलभ्यमानस्य घटस्य गन्धादिमत्त्वाद्व्यभिचार इत्यर्थः । एवमिति । शब्दसमवायिभिन्ना इत्यत्र साध्ये इत्यर्थः । उपाधिमतीति । तथा च विशिष्टस्य तदाश्रयतया विशेषणस्यापि तथात्वमिति भावः । तदेवाह । वीणादीति । वीणादिदेशत्वं भवत्येवेत्यर्थः । तथा च न बाध इति भावः । यद्यप्येवमुपाधिमात्रदेशत्वमेव साधयितुमर्हमित्याकाशएव विहितो भवतीति मूलमसङ्गतं, तथाप्यवच्छेदकतया तस्य तदधिकरणत्वं तत्स्वावच्छेद्यसापेक्षमिति विशिष्टदेशत्वसाधनमिति भावः । उपाधिमतोऽपीति । तथा च त्वन्मते नोपाधिमति विधिनिषेधौ सम्भ-

२७. १५. वत इति भावः । शब्दरूपस्येति । यद्यपि शब्दश्च लिङ्गञ्च शब्दलिङ्गं, तस्येत्यर्थे उभयोरपि लाभे आप्तोपदेशस्येत्यग्रिमफक्किका विफला, तथापि लिङ्गं शब्दएव वाच्यमिति तथैव व्याघात इत्याहुः । एतत्का-

लइति। एतत्कालीनध्वंसप्रतियोगीत्यर्थः । प्रागभावदशायां व्यभिचा-
रवारणाय सत्यन्तम्। अप्रसिद्धिवारणाय शब्देतरेति, स्वस्वव्याप्येत- २७. १६.
रेत्यर्थः । तथा च दृष्टान्तसौलभ्यम । उपलम्भपदं प्रत्यक्षपरम् । न-
न्वेते इति । यद्यपि स्वजन्यत्वपदं व्यर्थं यत्किञ्चित्पटसमानकालतन्तु-
ध्वंसवत्तयाऽर्थान्तरञ्च, तथापि स्वजन्यत्वपदं स्वप्रयोज्यत्वपरं प-
टविशेषणमेव बोध्यमिति नोक्तदोषः । हेतोरसिद्धिरिति । व्यापकेऽपि
व्यर्थविशेषणत्वमिति मते व्याप्यत्वासिद्धिरित्येके । आकाशादौ
व्यभिचारेण सेत्यन्ये । साध्याप्रतिद्धा अज्ञानरूपाऽसिद्धिरित्यपरे ।
विशेष्यसिद्धाविति । विशेषणसिद्धाविति युक्तः पाठः । एवं विशेष-
णमात्रनिषेधेत्यत्र विशेष्यमात्रनिषेधेति । गुणक्रियावदिति । यद्यपि
गुणक्रियापटाधारेति वक्तुमर्हति, तथापि पटनिष्ठयोरपि गुणक्रिय-
योः परम्परया तन्तुविशेषणत्वमित्यभिप्रायेण तथोक्तम् । पटध्वंस-
स्येत्युपलक्षणं, गुणादिध्वंसस्येत्यपि द्रष्टव्यम । तन्त्ववच्छेदकाना-
मिति तन्त्वाश्रयाणामित्यर्थः । तथा च परम्परासम्बन्धेन तेषां गुणा-
दिदेशत्वात्तद्ध्वंसदेशत्वमपीति भावः । शास्त्रस्येति । यद्यपि निरधि-
करणाभावप्रतीत्यनभ्युपगमे विरोधशङ्कैव नास्ति, तथाप्यधिकर-
णपदस्य प्रतियोगिसमवायिपरत्वेऽपि न विरोधो विशेषविषयत्वा-
दित्याशयः । स्मरणेनापीति । स्मरणरूपाश्रयनिरूपणेनाप्यभावप्रती-
तेरित्यर्थः । अन्यत्र गमनाभावे सत्यनुपलभ्यमानत्वादनुमेयस्तत्राह
अनुपलभ्यमानत्वादित्यस्येति । गमनाभावस्येत्यपि द्रष्टव्यम् । तेजो-
ऽन्तरे व्यभिचारात्तेजःपदमग्निपरमित्याह अग्निरिति । यदि हीति ।
यद्यपि यथाश्रुते इष्टापत्तिः, न च पिशाचो यदि स्तम्भात्मा स्यादिति
विवक्षितमिति वाच्यम, अधिकरणे प्रतियोगिसत्त्वस्य तर्कविषय-
त्वाभ्युपगमात् । तथाऽपि स्तम्भो यदि पिशाचात्मा स्यात् पिशाचा-
त्मतया प्रमाविषयः स्यादित्यत्र तात्पर्य्यम् । ननु वायोर्व्यञ्जकत्वे स-
र्वशब्दोपलब्धिः स्यात्, यदि च कार्य्ये प्रतिनियतजनकजन्यत्ववत्
शब्देऽपि प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमिति ब्रूयात्, तत्राह वर्णा नेति । ३१. १६.
अत्र प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं दोषाभावे सति परस्परविलक्षणप-
रस्परसाक्षात्कारहेतुकज्ञानविषयत्वं तदभावः साध्यः। तेनैकत्वच्छित्र-
भ्रमजनकेन परिमाणग्राहिणा, परिमाणभ्रमजनकेनैकत्वग्राहिणा च न
व्यभिचारः। न चैवमप्येकाधिकरणकक्रमिकगन्धादिभिर्व्यभिचारः, एक-

कालावस्थायित्वे सतीत्यपि साध्ये प्रतियोगिविशेषणत्वात्। केचित्तु अवच्छेदकं देशकालसाधारणं, तथा चान्यूनानतिरिक्तदेशकालत्वे सतीति सत्यन्ततात्पर्य्यम्, अतो हेतोरेव तत्रागमनान्न व्यभिचारः। न चैवं स्वमतेऽसिद्धिः, वर्णानां क्रमिकोत्पादत्वेनाव्याप्यवृत्तितया च तुल्यदेशकालत्वाभावादिति वाच्यम्। परमतेन कृतत्वादित्येके। कर्णावच्छेदेनैकदाऽपि नानावर्णोत्पादसम्भवेन तद्वर्णविशेषाणामेव पक्षत्वमित्यपरे। ननु तत्तद्वर्णप्रागभावत्वादिकञ्च प्रतिनियतव्यञ्जकमादाय बाध इति चेत्, न, तदन्यत्वेनापि साक्षात्कारहेतुविशेषणात्। इतरनिरूपणानधीननिरूपणत्वे सतीत्यपि हेतुविशेषणं, तेन घटान्योन्याभावघटत्वात्यन्ताभावयोः पृथक्त्वदीर्घत्वयोर्वा न व्यभिचारः। अधिकं शब्दप्रकाशे विपश्चितम्। उत्पत्तेस्तादृशसम्बन्धरूपतया तद्वत्त्वस्य हेतुत्वे व्यर्थविशेष्यत्वमित्यत आह स्वसमानेति।

३३. १. ननु चेति। यद्यपि सामान्यव्याप्तौ दृष्टायामपि विशेषव्याप्तेर्वैकल्यमेव, तथा च किं तन्निगमेन, तथापि विशेषव्याप्तेरेवाप्रयोजकत्वशङ्कायां सामान्यव्याप्तिस्तत्प्रयोजकत्वमाशङ्क्य निरस्तेति नोक्तदोषः। यद्बहिरिन्द्रियमिति। नन्वस्त्नेहग्राहकचक्षुरादौ व्यभिचारो विशेषपदवैयर्थ्यञ्चेति चेत्, न, विशेषपदस्यैव बहिरिन्द्रियव्यवस्थापकपरतयोभयदोषनिरासात्। तज्जातीयत्वञ्च गुणत्वव्याप्यजात्या, अतो न सङ्ख्यादिमत्तयाऽर्थान्तरम्। श्रवणमात्रेति। सत्तायां व्यभिचारवारकं मात्रपदं, बहिःपदञ्चाप्रसिद्धिवारकम्। सत्तावत्त्वाद्बाध इत्यत आह श्रवणमात्रेति। श्रवणमात्रबहिरिन्द्रियग्राह्येत्यर्थः। श्रोत्रस्य नभस्त्वे इति, कादीनां नाभसत्वेऽपि श्रोत्रं वायवीयमिति तद्धर्मतारत्वादिग्रहस्तेन स्यादिति शङ्कानिरासाय इति शेषः। ग्राह्येति। तथा च श्रोत्रस्यापि कादिमत्त्वे नभस्त्वमिति भावः। यद्यपि श्रोत्रस्य सामान्यगुणाग्राहकत्वादर्थान्तरानवकाशे विशेषपदान्तर्भावो व्यर्थः, तथापि तादृप्यसिद्ध्यर्थं चक्षुरादिसाधारण्यार्थं वा तदित्याहुः। प्रथमत इति यथा प्रथमं चाकचिक्यविशिष्टव्यक्तिर्धीमात्रे न तु विशिष्टधीः धर्मिज्ञानस्यारोपहेतुत्वात्, तथाऽत्रापि स्यादिति भावः। वायुगतजातित्वाभ्युपगमपक्षे बाधवारणायाह गकारादीनि। तारत्वमन्दत्वे चेति। चकारो भिन्नक्रमः, तथा च सप्रतियोगिकत्वाच्चेत्यर्थः। आनुभविक-

३६. २३. मिति। यत्रोपाध्याश्रयसम्बन्धात्तथा धीस्तत्रोपाधेरानुभविकत्वं, यत्र

च तदाश्रयानुविधानमात्रं न सम्बन्धस्तत्रोपपत्तिकत्वमिति भेदः । यद्वा, कुङ्कुमेनारुणा न तु स्वभावत इति कुङ्कुमस्योपाधित्वमनुभूयमानं, कृपाणे तु तथात्वमन्वयव्यतिरेकगम्यं, न तु तद्वत् कृपाणदीर्घमुखमिति प्रत्ययभेदः । अपरं शब्दप्रकाशे द्रष्टव्यम् । विरोधमाशङ्क्य व्याचष्टे न द्रव्यमिति । यद्यप्येवं समवायिकारणशून्यद्रव्यत्वादिति फलिते हेतौ समवायिपदमधिकं, तथाप्यखण्डाभावे वैयर्थ्यं नेति ध्येयम् । तथापीति । यद्यपि गुणत्वानभ्युपगमेऽपि द्रव्यगुणान्यतरत्वनिश्चयदशायां तत् प्रत्येतुं शक्यमेव, तथापीयं शङ्का मूलएवानुपदं निरस्येति भावः । वस्तुतो बाधादेव न द्रव्यत्वसिद्धिः, बाधकश्च मूलएवोक्तमिति प्रघट्टकतात्पर्य्यम । न चानेनैव तस्यापि सत्प्रतिपक्षितत्वात् कथं तेनास्य बाध इति वाच्यं, संयोगसमवायान्यतरसम्बन्धेन गृह्यमाणत्वादित्यत्र. समवायगर्भत्वे व्यर्थविशेषणतया व्याप्यत्वासिद्धत्वेन. अन्यथा स्वरूपासिद्धत्वेन. वक्ष्यमाणेन चोपाधिनाऽस्य हीनबलत्वात् । उपजीव्येति । हेतुसिद्ध्यर्थं गुणत्वसिद्धेरुपजीव्यत्वात्तद्विरोध इत्यर्थः । ननु बहिरिन्द्रियव्यवस्थापकत्वं, तत्तद्बहिरिन्द्रियमात्रग्राह्यत्वं, तथा च प्रभादौ व्यभिचारः, अतीन्द्रियशब्दांशे चाश्रयासिद्धिरित्यत आह चक्षुर्ग्राह्येति । एतच्च प्रभादावेव व्यभिचारवारणाय जातिविशेषणम् । आत्मनि तद्वारणाय बहिरिन्द्रियेति । उक्तभागासिद्धिनिरासाय जातिगर्भत्वम । जातित्वपर्य्यन्तञ्च गन्धादिकमादाय द्रव्ये व्यभिचारवारणार्थम । एवं सति मूलदृष्टान्तस्य साधनवैकल्यादाह रसादिवदिति । प्रतिरुद्धत्वादिति । बाधितत्वादित्यर्थः । श्रोत्रयोग्येति । एतच्च रूपादौ साध्याव्याप्तिवारणार्थम् । सत्तामादाय दोषतादवस्थ्यादाह गुणत्वव्याप्येति । गुणान्यान्यत्वमादाय दोषतादवस्थ्यादाह जातीति ।

अतएवेति । उत्कर्षरूपत्वादेवेत्यर्थः । एतदपि मतान्तरेणेति ध्येयम् । तन्मते सत्ताजातिर्विशेषपदार्थस्य चानभ्युपगमादस्वरसमाविष्करोति इत्याहुरिति । आकाशमात्रवृत्तित्वस्य तदितरावृत्तित्वे तात्पर्य्यम् । एवञ्च तन्मते समवाये व्यभिचारवारणाय गुणपदमित्यन्ये । गुणपदमप्रधानार्थकं, तथा चाकाशैकपरतन्त्रत्वादित्येव विवक्षितमित्यप्याहुः । हेत्वन्तरव्याख्यानं शब्दप्रकाशे द्रष्टव्यम । सुखादौ साध्याव्याप्तेराह साधनावच्छिन्नेति । ननु सुखादावुत्कर्षाप-

३७. २६.

४१. २८.

कर्षसम्भवाद्दोषतादवस्थ्यम्। न च सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वादिना तन्निर्व्वचनं, तादृशोत्कर्षादेः सुखादावसम्भवोऽविदिते तत्र मानाभावादिति वाच्यम्। तस्य रसचरमशब्दसाधारण्ये उत्कर्षापकर्षशब्देत्यादिविवक्षाविरोधात्। तथा सत्युत्कर्षापकर्षयोरन्यतरगर्भत्वेनैव सामञ्जस्ये व्यर्थविशेषणत्वापत्तेश्च। न च हेतुद्वये तात्पर्य्यम्, मूलविरोधादिति चेत्, न, साधनपदेन पक्षधर्म्मस्य विवक्षितत्वात्। स च बहिरिन्द्रियव्यवस्थाहेतुत्वादिः। उ-
४१. १९. त्कर्षापकर्षेति। उत्कृष्टापकृष्टेत्यर्थः। पक्षे साध्याव्यापकत्वमनुद्भाव्यमित्यत आह सर्व्वत्रेति। यद्यपि द्वयोरेवोक्तत्वादुपाधीनामित्ययुक्तं, तथाप्यन्यस्यापि तत्समनियतस्य तात्पर्य्यविषयत्वात्तदभिप्रायेण तथोक्तम्। पक्षमात्रेति। ननु सुखादेरपि व्यावर्त्तनान्न पक्षमात्रव्यावर्त्तकत्वम्, न च साधनवत्पक्षमात्रमेव व्यावर्त्तयतीति तथोक्तमिति वाच्यं, यथा श्रुतस्य तत्रापि सत्त्वादिति चिन्त्यम्। उत्पत्तिमत्त्वेति। भावत्वसमानाधिकरणोत्पत्तिमत्त्वव्यापकत्वमित्यर्थः। अप्रयोजकत्वशङ्केत्युपलक्षणं, ध्वंसे व्यभिचारश्चेत्यपि बोध्यम्। अतएवाह भावानामिति। व्यापकेति। आशुविनाशित्वं यदि साध्यं तदाऽयं हेतुर्बोध्यः। एवञ्च घटरूपादौ व्यभिचारवारणाय व्यापकेति। ईश्वरज्ञानादौ व्यभिचारादाह प्रत्यक्षेति। आत्मैकत्वप्रत्यक्षत्वे तत्र व्यभिचारादाह विशेषेति। हेत्वन्तरं शब्दप्रकाशे व्याख्यातम्।

गोत्वमिति। न च नित्यत्वादिसामान्यप्रत्यासत्त्या तादृशप्रतीतिसम्भवात्तमादायार्थान्तरं, एकवित्तिवेद्यत्वनियमानपेक्षार्थं सामान्यत एव तादृशधीसिद्धेरुद्देश्यत्वात्। अत एव वक्ष्यति, जातिमात्रधीसिद्धेश्चेति। नन्वेवं जातिपदार्थविवेचने नित्यत्वादित्येव हेतुरस्तु, न चैवं गवान्योन्याभावादौ व्यभिचारः, नित्यत्वप्रकारकोक्तप्रतीतिमादाय तत्रापि साध्यसत्त्वात्, गोघटितोपाधेश्चानित्यगोघटितत्वेनानित्यत्वादित्यस्वरसादाह गोभिन्नेति। एतच्च गवि व्यभिचारवारणाय। गोघटितोपाधौ व्यभिचारवारणाय भावपदमखण्डपरम्। न त्वभावे व्यभिचारवारणाय तत्, उक्तरीत्या तत्र साध्यसत्त्वात्। अन्यथा गोसादृश्यादौ व्यभिचारतादवस्थ्यापत्तेरि-
४५. ४. ति। अस्तु वा इतरनिरूपणानधीननिरूपणपरं भावपदम्। तस्मादिति। अत्र जातिपदार्थविवेचने व्यर्थविशेषणत्वं चिन्त्यम्। जातेर-

पांति । गोत्वत्वाद्युपाधिव्यक्तीभूतगोत्ववृत्तिव्यक्तित्वस्य जातित्वे जा- ४५. १०.
तावपि जातिवृत्तित्वाभ्युपगमेऽपसिद्धान्त इति भावः । विशेषत्वेने-
ति । गोत्वादिनेत्यर्थः । उक्तरीत्येति । गोत्वं गवाविषयज्ञानविषय इत्या-
दि त्वदुक्तरीत्येत्यर्थः । इत्यर्थः, इति तात्पर्यार्थः । अक्षरार्थानुसारे-
णाह यद्यपीति । ज्ञानादिति । सत्त्वाच्चेत्यपि बोध्यम् । गोभिन्नेति ।
यद्यपि तेनैकवित्तिवेद्यत्वमपाकृतं तच्चानुपदमेव शङ्कितं, तथापि
व्यक्तेर्ज्ञानान्तरमपि तदा नास्तीत्यस्यापि तन्निरस्यत्वमुक्तम् । वस्तु-
तो व्यक्तिज्ञानकारणत्वशङ्केयं, तत्र च तुल्यग्रहसामग्रीकत्वात् तद-
भावेऽप्युत्पादादित्यर्थो युक्तः । गामिति । गोज्ञानं विनाऽपीत्यर्थः ।
जातित्वस्येति । न च प्रकारान्तरात्तदुपस्थितिः, तस्यासार्वत्रिकत्वा-
त् , व्यक्तिबुद्धेश्च सार्वत्रिकतया शक्तिरेवेति भावः । ननु परेण व्य-
क्तिज्ञानं विनाऽपि जातिज्ञानाभ्युपगमान्नान्योन्याश्रय इत्यरुचेराह
वस्तुत इति । नन्विदमप्रयोजकम् , अत एव नीलो घट इत्यादौ तथैव
लक्षणेत्यस्वरसादाह गां पश्येति । यद्यपि यष्टीः प्रवेशयेतिवल्लक्षणा
सम्भवत्येव, तथापि गोपदाद्व्यक्तिमादायैव जातिस्मृतेरनुभूयमान-
त्वाद्विशिष्टे शक्तिरेव न लक्षणेति भावः । तदिदमाह तस्मादिति ।
अननुभूतेति । तन्मते इति शेषः । अपरं शब्दप्रकाशे व्याख्यातम् ।

वैशेषिकमते व्यावृत्तिबुद्धिसिद्धो विशेषनामा कश्चन पदार्थोऽस्ति।
स च द्विविधः सामान्यविशेषः अन्त्यविशेषश्च । सामान्यविशेषो-
द्रव्यत्वादिः, स खल्वनुवृत्तिबुद्धिहेतुः सन्नेव व्यावृत्तिबुद्धेरपि हेतु-
र्भवति । अन्त्यविशेषस्तु नित्यद्रव्यमात्रवृत्तिरेकमात्रगतश्च, स तु
स्वतएव व्यावृत्त इति सिद्धान्तः ।

यत्र शक्तिरस्ति, परन्तु शाब्दबोधे तस्याः कारणता नास्ति, त-
त्रैव कुञ्जशक्तिरित्येके । यत्र स्वरूपसत्येव शक्तिः कारणं न तु ज्ञाता,
तत्र कुञ्जशक्तिरित्यपरे ।

ननु पूर्व्वविच्छेदेऽपि तदुत्तरं परतन्त्रपुरुषपरम्पराधीनत्वसम्भ-
वान्न तावन्मात्रेण प्रवाहाविच्छेदसिद्धिरित्यन्यथा व्याचष्टे तज्जाती- ४९. २६.
येति । विच्छेदे सर्गाद्यवेदस्य तज्जातीयानुपूर्व्वीज्ञानजन्यत्वाभावा-
दव्याप्त्यसिद्धिरिति भावः । ज्ञानविषयत्वं तद्वत्त्वमित्यर्थः । वर्षादा-
विति । वर्षाद्यदिने इत्यर्थः । प्रलये प्रलयाभ्युपगमपक्षे । पक्षधर्म्मेति ।
वर्षादिनत्वरूपपक्षधर्म्मावच्छिन्नेत्यर्थः । ननु वर्षाद्यदिनव्यावृत्तो रा-

श्यादिविशेषसंसर्गविशेष उपाधित्वेनाभिमतः । तदिदमुक्तं प्राक्, राश्यादिभेदसंसर्गभेद उपाधिरिति। तथा च वर्षादिनत्वरूपसाधनाव्यापकत्वमप्याद्यदिने सम्भवत्येवेत्यनुशयमाविष्करोति साम्प्रदायिका इति । केचित्तु राशिविशेषवत्पूर्व्वकत्वमत्रोपाधित्वेनाभिमतं, तच्च शुद्धसाध्यव्यापकमेव, शरदाद्यदिनेऽपि तत्पूर्व्वकत्वसत्त्वात्, एवञ्चात्र न साधनव्यापकत्वशङ्काऽपि, वर्षाद्यदिने वर्षादिनत्वरूपस्य साधनस्याव्यापकत्वादित्याहुः । पक्षविकल्पभिया पक्षधर्म्मत्व-
५२. २७. त्वमाशङ्क्य परिहरति न चेति । अहोरात्रत्वं अहोरात्रवृत्तिधर्म्म इत्यर्थः । तेन पक्षैकदेशस्यापि इत्यग्रिमग्रन्थसङ्गतिः । अन्यथैतद्धर्मविशेषस्यापक्षत्वे दृष्टान्तस्य तदेकदेशत्वाभावात् असङ्गतिः स्यादिति ध्येयम् । न चैवं हेतुपक्षतावच्छेदकयोरभेदोंऽशतः सिद्धसाधनञ्चेति वाच्यं, तद्विशेष्यकोद्देश्यप्रतीतेरसिद्धेरिति ।

अहोरात्रत्वेति। अहोरात्रत्वस्य धर्मे पक्षान्तर्भूते साधनाव्यापकत्वमस्येति ध्येयम् । न चेति। न चानित्यत्वेऽपि ब्रह्माण्डस्य तत्कालीनत्वमहोरात्रत्वरूपसाधनव्यापकमेव प्रलयकालेऽहोरात्रानभ्युपगदिति वाच्यं, स्थितिकालपदेन सर्गाद्याहोरात्रव्यावृत्तस्य स्थितिकालविशेषस्योक्तत्वात् । श्वासजनककर्मणां वृत्तिलाभादसिद्धिरिति विवृणोति प्रतिबद्धेति । तण्डुलीयकेति। उद्भित्पदेन शाकविशेष एव दृष्टान्ततयोक्त इति भावः । तेनैवेति । क्रमारब्धदहनपवनादिनेत्यर्थः । तस्यैकदाऽऽरब्धत्वाभावादिति भावः । संप्रति तद्बाधितमित्यत आह कदाचिदिति। उपादेयपद स्वोपादेयद्रव्यपरं, तेन खण्डप्र-
५५. १. लयसाधने न बाधः । कार्य्यद्रव्येति । ननु मात्रपदोपादाने दृष्टान्तनपवनपरमाणावेव साध्याव्याप्तिः, तस्य प्रलयेऽपि वृत्त्या तादृशकालमात्रवृत्तित्वाभावात् । तदनुपादाने साधनव्यापकत्वं, उपाधिदातुर्मते मात्रपदव्यवच्छेद्यकार्यद्रव्यानधिकरणकालाप्रसिद्धिश्च । अतएवेदमेवानुमानं सिद्धान्तितं शब्दखण्डे, अन्यथा सोपाधित्वे तदनुपपत्तेः, तस्मादयमनुपाधिरेव । प्रलयसन्देहदशायामुपाधित्वेनास्य सन्देहो दूषकइत्याशयेनास्योपाधित्वेनोद्भावनम् । न च मात्रपदव्यवच्छेद्यासिद्धेरस्यैवाप्रसिद्धतया कथं तथात्वमपीति वाच्यं, न्यायमतेन तथात्वसम्भवादिति वदन्ति । वयन्तु ब्रूमः । न्यायमतेनैवास्योपाधित्वम् । एवञ्चोपाधित्वादित्यस्य पूर्वं त्वन्मते इति पूरणीयम् ।

तथा च नाप्रसिद्धिर्न वा साधनव्यापकत्वम् । साध्याव्यापकत्वन्त्ववशिष्यते, तदपि न सावयवत्वाणुभिन्नत्वाद्यवच्छिन्नसाध्यव्यापकतया पर्य्यवसितसाध्यव्यापकत्वात् । न चैवं स्वीकृतत्रिविधोपाधिबहिर्भावेऽपसिद्धान्तः, तस्योपलक्षणपरत्वात् । अत एव वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ रूपवत्त्वावच्छिन्नसाध्यव्यापकमुद्भूतत्वमुपाधिः सर्वसिद्धः । न च न्यायमतेन सिद्धान्तितत्वादव्यभिचरिते प्रकृतहेतौ नोपाधिरिति वाच्यं, शून्यपदस्य ध्वंसपरतया कादाचित्काभावतया वा यथाश्रुते हेतोर्मनःप्रभृतौ व्यभिचारेणास्य सङ्गतत्वात् । अतएवारम्भकत्वादिति हेतुरुक्तः, अन्यथा मेयत्वादिकमेव समर्थं स्यात् । द्रव्यसमवायिकारणत्वविवक्षया च सिद्धान्तत्वमिति न विरोधगन्धोऽपीति तत्त्वम् । कालमात्रपदयोरन्यतरान्तर्भावेण तन्मतेऽपि सन्दिग्धोपाधिपरत्वमित्याहुः । न चेति । व्योमादिसमानकालीनतया तदतिरिक्तत्वमसम्भवीत्यत आह कार्य्येति । बाधवारणाय द्रव्येति । दृष्टान्तसिद्ध्यर्थमाह परमाण्विति । मूर्त्तत्वादिति । क्रियावत्त्वादित्यर्थः । तेन निष्क्रिये विनष्टे न व्यभिचारः । योग्यता साध्येत्यन्यं । ततएवेति । मूर्त्तत्वादेवेत्यर्थः । अत्रापि योग्यतायाः साध्यत्वाञ्जोत्पन्नविनष्टे व्यभिचारः । वस्तुतो मूर्तपदं ध्वंसवत्परमन्यथाऽवच्छिन्नपरिमाणवत्परत्वे व्यर्थविशेषणत्वापत्तेरिति ध्येयम् । एतदन्येति । यद्यपि पक्षेतरत्वनिरासाय गुणवत्पदमयुक्तं, साध्यव्यापकताग्राहकसत्त्वे वह्नीतरत्ववत्त्वस्याप्युपाधित्वात्, सदसत्त्वे पर्वतेतरद्रव्यत्वादिवदस्यापि पक्षेतरतुल्यत्वेनानुपाधित्वात्, तथापि हेतोरप्रयोजकत्वे तात्पर्य्यम् । अनन्वयादिति । प्रकृतानन्वयात् कार्य्यद्रव्याधिकरणकालासिद्धेरित्यर्थः । पक्षेति । कार्य्यद्रव्याधिकरणद्रव्यादेः प्रसिद्धत्वेऽपि तादृशकालस्याप्रसिद्धेः साध्ये कालपदान्तर्भावादप्रसिद्धिरिति भावः । एतदनन्तर्भावेण सिद्धान्तमाह तथा हीति । समयेत्युपलक्षणं, तदुपाधि-दिक्-तदुपाध्यादिकमपि बोध्यम् । एतच्च तादृशाकाशवृत्तिध्वंसप्रतियोगिवृत्तित्वेनार्थान्तरं मा भूदिति बाधस्फोरणाय । समवायिपदं द्रव्यसमवायिपरम् । तादृशशब्दवृत्तित्वेनार्थान्तरवारणाय पक्षे द्रव्यपदम् । महाप्रलयेनार्थान्तरवारणाय कालीनान्तं ध्वंसविशेषणम् । कार्य्यप्रागभावपदयोरन्यतरान्तर्भावेण साध्यद्वयं बोध्यम्, अतो न व्यर्थविशेषणत्वम् । कार्य्यपदं भावकार्य्यपरम् । कार्य्यद्रव्या-

५५. २.

५५. १०.

नाधिकरणत्वं कार्य्यद्रव्याभाववत्त्वं, तच्च कपालादावपीति तद्वृत्ति-
ध्वंसमादायार्थान्तरवारणायारम्भकेति । द्रव्यसमवायिकारणातिरि-
५५.१२ क्तेत्यर्थः । कार्य्यमात्रेति । ननु ध्वंसत्वे व्यभिचारः । न च कार्य्यपदं
भावकार्यपरं, मात्रपदवैयर्थ्यापत्तेः । न च भाववृत्तित्वे सति कार्य्य-
मात्रवृत्तित्वमर्थः, तथा चानन्तत्वे व्यभिचारवारणाय मात्रपदमिति
वाच्यं, तथापि चरमज्ञानत्वादौ व्यभिचारापत्तेरिति चेत्, न, तादृ-
शध्वंसप्रतियोगिजातीयवृत्तित्वस्य साध्यार्थस्य तत्रापि सत्त्वात् । न
चैवमपि मात्रपदवैयर्थ्यमनन्तत्वे तज्जातीयव्योमादिवृत्तितयाऽपि सा-
ध्यसत्त्वादिति वाच्यं, ध्वंसप्रतियोगित्वेनापि जातीयस्य विशेषणात् ।
अधिकं शब्दप्रकाशे द्रष्टव्यम । अन्त्यावयविपदोपादानं तमादाय
साध्याव्याप्तिरिति कृत्वा, वस्तुतः कर्मत्वएव साध्याव्यापकत्वम् ।
तस्येति । यद्यपि प्रलयबोधकागमसत्त्वादिदमयुक्तं, तथापि तदनाधा-
५५.२३. रत्वेन तत्कालाबोधकत्वादित्यर्थादित्याहुः । अभिमतेति । घटात्यन्तो-
५८.१८. च्छेदोऽपीत्यर्थः । विवादपदमिति । एतच्च प्रत्यक्षवेदमूलस्मृत्यंशे लो-
भादिमूलकस्मृत्यंशे च सिद्धसाधनबाधादिवारणार्थम् । तादृप्यासि-
द्ध्येऽनुभावकान्तम् । न्यायादिमूलकस्मृतौ व्यभिचारवारणाय अ-
कलृप्तेति । असम्भवनमूलान्तरत्वे सतीत्यर्थः । ननु महाजनपरिगृ-
हीतपदं व्यर्थमिति चेत् । सत्यम् । भ्रमएवात्र मूलमित्यसिद्धिशङ्का-
निरासाय तदुपादानात् न तु हेतुविशेषणत्वे तात्पर्य्यमित्येके ।
लोभादिभिन्नन्यायादिमूलकत्वाभावमात्रे सत्यन्ततात्पर्य्यम् । एवञ्च
लोभादिमूलकस्मृतावेव व्यभिचारवारणाय तदित्यन्ये । लोभस्य
वस्तुगत्या मूलत्वाभावान्मूलपदस्य प्रामाणिकमूलपरत्वाद्वा सत्य-
न्तेन लोभमूलकस्मृतौ व्यभिचारवारणाय तदुपादानमित्याहुः ।
अलौकिकेति । एतच्च द्रव्यप्रकाशे व्याख्यातम । नन्वनुमानमूलकत्वे-
ऽपि नान्धपरम्परा न हि प्रत्यक्षमात्रं प्रमाणमित्याशयादाह तादृशे-
ति । नन्वत्राप्यसम्भवन्मूलान्तरत्वमन्यथा न्यायादिमूलकस्मृतावपि
तथात्वापत्तिरित्यनुशयादाह तवेति । मीमांसकस्येत्यर्थः । तथा च
तवापसिद्धान्त इति भावः । घटकलसेति । घटकलसपदानामित्यर्थः ।
शेषं शब्दप्रकाशे द्रष्टव्यम् ।

६०.२३. तदेवेति । कार्य्यत्वं तद्धेतुत्वं चेत्यर्थः । तदर्थस्येति । तत्प्रयोजन-
स्येत्यर्थः । प्रमाणत्वेनानुमितत्वादज्ञायमानत्वमसम्भवीत्यत आह

विशिष्येति । उक्ताभिप्रायेणाह विशेषत इति । तथा च यथा न नि- ६२.२६.
त्यानुमेयलिङ्गमूलत्वं तथा न नित्यानुमेयवेदमूलत्वमपीति निगर्वः ।
आचारोऽपीति । तथा च व्याप्तिबलादपि प्रत्यक्षश्रुतिमूलत्वमेव सिद्ध्य-
ति, अन्यादृशश्रुतेरुक्तयुक्त्या मूलत्वानुपपत्तेरित्यभिसन्धिः । असिद्ध
इत्युपलक्षणं, चैत्यवन्दनाद्याचारप्रवाहे लौकिकाचारप्रवाहे च व्यभि-
चारोऽपीति द्रष्टव्यम् । किन्त्वेतत्कालेति । यद्यप्येतत्कालावच्छिन्नै-
तद्देशत्वाऽभ्युपगमे नोक्तदोषस्तथापि लाघवादेतत्कालावच्छेदेनैव
शक्त्यभावः कल्प्यते इति भावः । स्मृत्याचारेति । विवादपदस्मृत्या-
चारेत्यर्थः । इदानीं तच्छून्य इति साध्यम् । तेन दृष्टान्तस्य न सा-
ध्यवैकल्यम् । भाविप्रवाहेति । भाविप्रवाहतदुच्छेदयोः सिद्धिः कुत
इत्यर्थः । परैः पूज्यानामप्यत्रावशेषादिति मूलम् । पाषण्डैः स्वमत-
प्रवेशार्थं पूज्यमानानामप्यत्र प्रवेशदर्शनादनन्यगतिकतया नात्र प्र-
वेश इत्यर्थः । वस्तुतोऽप्रवेशादिति पाठः । अत एव बौद्धाधिकारे-
ऽपि तथैव पाठः । तत्र तन्मतप्रविष्टानां पूज्यानामेव नात्र प्रवेशाधि-
कारः, तत्राप्यनधिकृतानामत्र प्रवेशस्त्वसम्भावितएवेत्यर्थः । अ-
स्मदभिमतस्यापीति । प्रामाण्यग्राहकत्वेनास्मदभिमतस्यापि सर्गा- ६८.११.
दिकालेऽसम्भवादसिद्धिरित्यर्थः । यथैकत्रेति । प्रतिसर्गं तेषामन्या-
न्यत्वमन्योन्यसंवादग्रहस्तदा स्याद्यदि जन्मभेदप्रतिसन्धानं न
स्यात्, न त्वेवमित्यर्थः । मूलयुक्तिमाह कल्पनायामिति । नित्यस्य
संहरणादिकमसम्भवीति व्याचष्टे कार्य्यद्रव्येति । कार्य्यमात्रसंहरणं
महाप्रलयएवेति तत्राभीक्ष्णत्वमनुपपन्नं तस्याप्रकृतत्वञ्चेति द्रव्यपद-
मुपात्तम् । ईश्वरस्य मायावित्वे संसारित्वापत्तिरिति व्याचष्टे सृष्टी-
ति । वास्तवक्रीडनमपि तस्य नास्तीत्यत आह इवेति ।                    ७१.२२.

इति महामहोपाध्यायदेवदत्तात्मजमहामहोपाध्यायरुचिदत्तविर-
चिते कुसुमाञ्जलिप्रकाशव्याख्याने मकरन्दे द्वितीयः स्तवकः ॥

## अथ तृतीयः स्तबकः ॥ ३ ॥

तृतीयां विप्रतिपत्तिं दूषयितुमुपन्यस्यति—

नन्वेतदपि कथं, तत्र बाधकसम्भवात् । तथाहि । यदि स्यादुपलभ्येत । अयोग्यत्वात् सन्नपि नोपलभ्यते इति चेदेवं तर्हि शशशृङ्गमप्ययोग्यत्वान्नोपलभ्यते इति स्यात् । नैतदेवम् । शृङ्गस्य योग्यतयैव व्याप्तत्वादिति चेत् । चेतनस्यापि योग्योपाधिमत्तयैव व्याप्तत्वात् तद्बाधे सोऽपि बाधित एवेति तुल्यम् । व्यापकस्वार्थाद्यनुपलम्भेनाप्यनुमीयते नास्तीति । को हि प्रयोजनमन्तरेण किञ्चित् कुर्यादिति ॥ उच्यते—

योग्यादृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम् ॥
क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम् ॥ १ ॥

स्वात्मैव तावद् योग्यानुपलब्ध्या प्रतिषेद्धुं न शक्यते,कुतस्त्वयोग्यः परमात्मा । तथाहि, सुषुप्त्यवस्थायामात्मानमनुपलभमानो नास्तीत्यवधारयेत् । कस्यापराधेन पुनर्योग्योऽप्यात्मा तदानीं नोपलभ्यते ? । सामग्रीवैगुण्यात् । ज्ञानादिक्षणिकगुणोपधानो ह्यात्मा गृह्यते इत्यस्य स्वभावः । ज्ञानमेव कुतो न जायते इति चिन्त्यते । पश्चाद्वा कथमुत्पत्स्यते इतिचेन्मनसोऽनिन्द्रियप्रत्यासन्नतयाऽजननात्तत्प्रत्यासत्तौ च पश्चाज्जननात् । मनोवैभववादिनामिदमसम्भतम् । तथाहि । मनो विभु,सर्वदा स्पर्शरहित-

**द्रव्यत्वात्। सर्वदा विशेषगुणशून्यद्रव्यत्वात्। नित्यत्वे सत्यनारम्भकद्रव्यत्वात्। ज्ञानासमवायिकारणसंयोगाधारत्वादित्यादेरितिचेन्न। सर्वेषामापाततः स्वरूपासिद्धत्वात्। तथाहि। यदि रूपाद्युपलब्धीनां क्रियात्वेन करणतया मनोऽनुमितिर्न तदा द्रव्यत्वसिद्धिः। अद्रव्यस्यापि करणत्वात् ॥**

नन्वेतदपीति ॥ अन्यथासिद्धिनिराकरणमपि कथमीश्वरसाधनाय, तत्र प्रत्यक्षबाधादित्यर्थः। तत्र स्वरूपसदनुपलब्धिसहकृतप्रत्यक्षबाधमाह ॥ तथाहीति ॥ यद्यप्यनुपलम्भेनेश्वरान्योन्याभावात्यन्ताभावसाधने इष्टापत्तिः, प्रागभावप्रध्वंससाधने चापसिद्धान्तः, तथापि क्षित्यादिकं यदि सकर्तृकं वेदश्च यदि सकर्त्तृकः स्यात्तदा तद्धर्त्तयोपलभ्येत इत्यर्थः। अनुपलब्धिमात्रस्य बाधकतायामयोग्योच्छेद इति योग्यानुपलब्धिर्बाधिका वाच्येत्याह ॥ अयोग्यत्वादिति ॥ एवं शशः शृङ्गी पशुत्वादित्यत्रापि तद्बाधो न स्यादयोग्यत्वाच्छृङ्गस्येत्याह ॥ एवमिति ॥ शृङ्गत्वस्य योग्यसंस्थानव्यङ्ग्यतया योग्यव्यक्तिवृत्तित्वनियमान्नायोग्यं शृङ्गमित्याह ॥ शृङ्गस्येति ॥ एवं शरीरविशिष्टात्मनि कर्तृत्वेन कर्तृयोग्यतानियमाद्विशेषणबाधेन विशिष्टबाध एवेत्याह ॥ चेतनस्यापीति॥ न तु कर्तृव्यापकशरीरबाधाद्व्याप्यकर्तृबाधपरोऽयं ग्रन्थः। प्रत्यक्षबाधस्योपक्रान्तत्वात्। व्यापकानुपलब्धिलिङ्गकानुमानं बाधकमाह ॥ व्यापकेति ॥ व्यापकश्चासौ स्वार्थादिश्चेति कर्मधारयः। आदिपदाच्छरीरादि। चेतनप्रवृत्तेः स्वेष्टसाधनताज्ञानव्याप्यत्वात् तद्बाधेनेन साऽपि बाधितैवेत्यर्थः ॥

योग्यादृष्टिरिति ॥ योग्यानुपलब्धिः कायोग्ये परमात्मनि बाधिका। शृङ्गस्यापि तथात्वे तत्रापि योग्यानुपलब्धिर्न बाधिका। न हि शशशृङ्गमयोग्यं योग्यानुपलब्ध्या निषिध्यते येन प्रतिबन्धिः स्यात्। अथ शृङ्गं योग्यमेव नायोग्यं, तदा अतितरां न प्रतिबन्धिः। व्यापकानुपलब्धिलिङ्गकश्चानुमानमीश्वरासिद्धावाश्रयासिद्धम्। तत्सिद्धौ वा धर्मिग्राहकप्रमाणबाधितमित्यर्थः ॥

सामग्रीति ॥ यथा योग्योऽपि घटादिरालोकाभावान्नोपलभ्यते.

तथाऽऽत्मा क्षणिकज्ञानादियोग्यगुणाद्युपधानसहकार्यभावाद् नोप-
लभ्यत इत्यर्थः।यद्यप्येवमुपधायकतृतीयलिङ्गपरामर्शसत्त्वादात्मबुद्धि-
रेव स्यान्नानुमितिः। न चानुमितिसामग्र्येव प्रतिबन्धिका, कारण-
मेलकरूपायां सामग्र्यामितरकारणानां व्यभिचारित्वात् तृतीयलिङ्ग-
परामर्श एव प्रतिबन्धको वाच्यः। तस्य च योग्यविशेषगुणत्वेनात्मो-
पलम्भकस्यातथात्वम्। तथापि रूपवत्प्रत्यक्षविशेषगुणत्वाज्ज्ञानेऽप्यु-
द्भवत्वजातिसत्त्वादनुद्भूतज्ञानस्य नात्मोपलम्भकत्वमिति तदुप-
धानेऽपि नात्मग्रहः। अतएवाद्यन्तशब्दयोरुद्भवत्वाभावाच्च प्रत्यक्षत्व-
मित्येके । आत्ममनःसंयोगविशेषस्यात्मग्राहकत्वमनेनोक्तमित्यन्ये ॥
मनस इति ॥ यद्यपि सुषुप्तौ यत एव न ज्ञानं तत एवात्माग्रहोपपत्तौ
योग्यविशेषगुणोपधानमतन्त्रं, तथापि द्रव्यसाक्षात्कारे सामान्यत
एव योग्यविशेषगुणस्य प्रयोजकत्वावधारणादेतदुक्तम् ॥ अस्मत-
मिति ॥ विभुनो मनस इन्द्रियाप्रत्यासत्तेरभावादित्यर्थः ॥ सर्वदेति ॥
द्रव्यत्वं परमाणुभिः, स्पर्शरहितत्वं च गुणादिभिर्व्यभिचारीति वि-
शिष्टं लिङ्गम्। तस्याप्युत्पत्तिक्षणे घटे सत्त्वाद्व्यभिचार इत्यत उक्तं,
सर्वदेति ॥ अनारम्भकद्रव्यत्वं द्रव्यानारम्भकद्रव्यत्वमत्र विवक्षितम्।
अतो न कर्मसंयोगाद्यारम्भके मनसि स्वरूपासिद्धिः। तथापि घटे-
ऽनैकान्तिक इत्यत उक्तं, नित्यत्व इति ॥ कालादिर्दृष्टान्तः । चतुर्थ-
हेतावात्मा दृष्टान्तः । न च महत्त्वमुपाधिः, साधनव्यापकत्वात् ।
न च सुखादिकं मूर्त्तसंयोगासमवायिकारणकगुणवृत्तिगुणत्वव्याप्य-
जातिमत् । नित्यवृत्त्यनित्यविशेषगुणत्वाच्छब्दवत् । पाकजवच्चेति
प्रतिरोधः। मूर्त्तत्वस्याप्रयोजकत्वात् । अनात्मवृत्तित्वस्योपाधित्वा-
च्चेति भावः ॥ आपातत इति ॥ यावन्मनो न सिद्ध्यतीत्यर्थः। स्व-
रूपासिद्धिमेवाह ॥ तथाहीति ॥ अद्रव्यस्यापीति ॥ लिङ्गज्ञानादे-
रित्यर्थः। द्रव्यत्वविनाकृतश्च रूपादिभिर्व्यभिचारीति भावः ॥

**अथासामेव साक्षात्कारितयेन्द्रियत्वेन तदनुमा-
तव्यं, तथापि व्यापकस्य निरुपाधेर्नेन्द्रियत्वमित्यु-
पाधिर्वक्तव्यः। तत्र यदि कर्णशष्कुलीवन्नियतशरीरा-
वयवस्योपाधित्वं, तदा तावन्मात्रे वृत्तिलाभः ।**

तद्दोषे च वृत्तिनिरोधः श्रोत्रवत् प्रसज्ज्येत । ततः शरीरमात्रमुपाधिरवसेयः। तथाच तदवच्छेदेन वृत्तिलाभे शिरसि मे वेदना पादे मे सुखमित्याद्यव्याप्यवृत्तित्वप्रतीतिविरोधः । असमवायिकारणानुरोधेन विभुकार्याणां प्रादेशिकत्वनियमात्। शरीरतदवयवाऽऽदिपरमाणुपर्यन्तोपाधिकल्पनायां कल्पनागौरवप्रसङ्गो नियमानुपपत्तिश्चेति । ततोऽन्यदेवैकं सूक्ष्ममुपाधित्वेनातीन्द्रियं कल्पनीयम् । तथाच तस्यैवेन्द्रियत्वे स्वाभाविकेऽधिककल्पनायां प्रमाणाभावाद्धर्मिग्राहकप्रमाणबाधः । अथ ज्ञानकर्मणेन्द्रियसहकारितया तदनुमानं, ततः सुतरां प्रागुक्तदोषः। यदि च मनसो वैभवेऽप्यदृष्टवशात् क्रम उपपाद्येत, तदा मनसोऽसिद्धेराश्रयासिद्धिरेव वैभवहेतूनामिति ॥

अथ यत्रादृष्टस्य दृष्टकारणोपहारेणोपयोगः, तत्र तत्पूर्णतायां कार्यमुत्पद्यत एव । अन्यथा अन्त्यतन्तुसंयोगेभ्योऽपि कदाचित् पटो न जायेत, जातोऽपि वा कदाचिन्निर्गुणः स्यात् । बलवता कुलालेन दृढदण्डनुन्नमपि चक्रं न भ्राम्येत । यत्र तु दृष्टानुपहारेणादृष्टव्यापारस्तत्र तद्वैगुण्यात् कार्यानुदयः। यथा परमाणुकर्मणः । तदिहापि यदि विषयेन्द्रियात्मनां समवधानमेव ज्ञानहेतुः, तदा तत्सद्भावे सदैव कार्यं स्यात्। न चैतदतिरिक्तमप्यदृष्टस्योपहरणीयमस्ति। न च सदैव ज्ञानोदयः । ततोऽतिरिक्तमपेक्षितव्यम्। नच यद्यपि सर्वाण्येवेन्द्रियाणि व्याप्नोति, तथापि करणधर्मत्वेन क्रियाक्रमः सङ्गच्छते । अकम्पिते तु

**तस्मिन्नायं न्यायः । प्रतिपत्तुरकरणत्वाच्चक्षुरादीनामनेकत्वादितिचेत् ॥**

अथेति ॥ ज्ञानकरणाजन्यः सुखाद्यनुभव इन्द्रियजन्यः जन्यप्रत्यक्षत्वात्, रूपप्रत्यक्षवत् । स्पर्शाद्यविषयत्वेन विशेषणान्न त्वगादिना अर्थान्तरम् । गन्धादिष्वेकैकमात्रप्रत्यक्षजनकत्वेन पृथिव्यादिभेदसिद्धौ निःस्पर्शं लाघवाच्च निरवयवमित्यर्थः ॥ तथापीति ॥ यथा श्रोत्रस्य विभिवन्द्रियतया कर्णशष्कुल्यवच्छिन्नस्यैवेन्द्रियत्वात्तदनवच्छेदेनोत्पन्नोऽपि शब्दो न गृह्यते । तदवच्छेदेनोत्पन्नस्यापि तस्य तदुपघातान्न ग्रहः । तथा मनोऽनवच्छेदकशरीरावयवावच्छेदेनोत्पन्नं सुखाद्यपि तदवच्छेदेनोत्पन्नञ्च तदुपघातान्न गृह्येतेत्यर्थः ॥ असमवायीति ॥ कार्यविभुविशेषगुणे चायन्नियमोऽतो न व्याप्यवृत्तिकर्मजन्यविभुपरमाणुसंयोगेन व्यभिचारः ॥

नन्‌ किमसमवायिकारणं स्वावच्छिन्ने विभुकार्यं जनयतीति नियमः, स्वावच्छिन्ने जनयत्येवेति वा, स्वावच्छिन्न एव जनयतीति वा ? । आद्ये सुखादेरधिकदेशतायामापादकाभावः । द्वितीये चाणुमनःसंयोगोऽपि स्वावच्छिन्नेऽधिकदेशे च जनयेत्, नियामकाभावात् । अन्त्ये तवापि सुखादेरणुदेशतापत्तिः । मनोवैभवेऽपि तदविरोधश्च । अथ निमित्तचन्दनाद्यनुरोधेन सुखादौ न्यूनाधिकदेशता निमित्तवायुसंयोगादिव शब्दे. न त्वसमवाय्यनुरोधात् । तर्हि मनोवैभवेऽपि तथाऽस्तु । न च विभुकार्यासमवायिकारणं स्वावच्छिन्ने करोत्येव, भेर्याकाशसंयोग इव शब्दामिति चन्दनाद्यनवच्छिन्नेऽपि सुखादि स्यादिति वाच्यम् । तद्देशावच्छिन्नचन्दनमुखे हि तद्देशचन्दनसापेक्षोऽसमवायीति कथं तन्निरपेक्षस्तत् कुर्यात् । तथाच शरीरमात्रस्योपाधित्वेऽपि निमित्तवशात् सुखादेर्नियतदेशत्वंस्यात्॥

अत्राहुः । विभुकार्यविशेषगुणस्य न स्वासमवायिकारणन्यूनदेशत्वमिति नियमः । मनोवैभवे च शरीरं व्याप्यैव मनःसंयोगोऽसमवायीति तदवच्छेदं व्याप्यैव सुखादेरुत्पत्त्यापत्तिः । ततः पादावच्छिन्नं सुखं यदि शरीरावच्छिन्नासमवायिकारणकं स्यात्, शरीरव्यापकं स्यात् । निमित्तकारणस्य चाधिकदेशत्वमात्रप्रयोजकत्वात् । अत एव निदाघतप्तस्य अम्भसि मग्नस्य सर्वाङ्गीणसुखधीरुपपन्नेति

संयोगाभावः क्रमप्रयोजकः, किन्तु बुभुत्साप्रयुक्त इत्याह॥बुभुत्सेति॥ बुभुत्सा न रूपादिग्रहहेतुर्न वा इतरज्ञानप्रतिबन्धिका, किं त्वन्यथा उपयुज्यते इत्याह ॥ न हीति ॥

ननु बुभुत्साया अतन्त्रत्वे कथं मनोऽणुत्वपक्षे मन्दोऽपि बुभुत्सितः शब्दो गृह्यते, नान्यः । तन्त्रत्वेऽपि कथं दशभिः पठ्यमानासु गाथासु तावद्गोचरबुभुत्सायां प्रणिधाने च सर्वेषामज्ञानमेकज्ञानञ्च । न च, श्रोत्रमनःसंयोगविशेषः कार्योन्नेयोऽस्ति । स एव किञ्चिच्छब्दग्रहहेतुस्तदन्यग्रहप्रतिबन्धक एवेति वाच्यम्। विभुत्वेऽपीन्द्रियमनःसंयोगविशेषस्य तथात्वे व्यासङ्गोपपत्तेः।अथ प्रत्यक्षानुकूलेन्द्रियमनःसंयोगद्वारा बुभुत्साप्रणिधानयोः प्रत्यक्षहेतुत्वमिति चाक्षुषादिबुभुत्सितग्रहे क्लृप्तत्वात्ताभ्यां श्रोत्रे बुभुत्सितशब्दावच्छेदेन मनःसंयोगः कृत इति स एव गृह्यते, नान्य इतिचेन्न । युगपत्पठ्यमानासु विंशतिगाथासु तावद्गोचरबुभुत्साप्रणिधानयोः सत्त्वे तावद्गाथावच्छेदेन मनःसंयोगाद् युगपत्तासामुपलम्भप्रसङ्गात् । प्रत्येकसामग्रीसत्त्वात् ॥

उच्यते ॥ यद्यपि बुभुत्साप्रणिधाने न शब्दग्रहमात्रे सहकारिणी, न चेतरग्रहप्रतिबन्धके, तथापि नानाशब्दसमवायदशायां यः शब्दग्रहस्तत्र तयोस्तथाभावः । तथैव तेषामन्वयव्यतिरेकनियमात् । नन्वाणावपि मनसि रसनसंयुक्ते त्वक्संयोगस्यापि सत्त्वाद् रसगुडद्रव्यज्ञानयौगपद्यापत्तिः । रसनसंयोगकाले मनसस्त्वक्संयोगे मानाभावात् । तस्माच्चाक्षुषज्ञानवतो मैत्रस्य स्वविषयसम्बद्धानि त्वगादीनि स्वविषयसाक्षात्कारहेतुसंयोगशून्यानि, तदा स्वविषयसाक्षात्काराजनकत्वात् । पटवत् । अन्यथा सामग्रीसत्त्वे युगपज्ज्ञानोत्पादप्रसङ्गः ॥

नित्यैकगुणस्येति ॥ नित्यपदं स्नेहे, एकपदञ्च द्वित्वादौ व्यभिचारवारणाय । नित्यवृत्त्येकवृत्त्यनित्यगुणत्वेन मूर्त्तसंयोगासमवायिकारणकगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं साध्यमित्यर्थः ॥

ननु मनोऽवयव्यस्तु तस्य संकोचविस्ताराभ्यां ज्ञानक्रमयौगपद्ययोरुपपत्तेः । शष्कुलीभक्षणानन्तरं गन्धादीन् युगपत् प्रत्येमीत्यनुव्यवसायस्य बाधकं विना प्रमात्वात् । मैवम् । यदि सङ्कोचविस्तारहेतुरदृष्टं, तदा तत एव तदुभयमस्तु, किं मनसा । नाप्येकपञ्च-

बुभुत्सया तौ भवतः । बुभुत्साया अहेतुत्वात् । हेतुत्वे वा लाघवाद् विभु मनोऽस्तु । एतेनाणुमनःपञ्चकमस्तु अवयविनो लघुत्वाद् बुभुत्सावशात्तेषामेकैकपञ्चेन्द्रियसम्बन्धादुभयोपपत्तेरित्यपास्तम् । पञ्चबुभुत्सायां पञ्चेन्द्रियसम्बन्धे व्यासङ्गानुपपत्तेरित्यभिप्रेत्याह । तस्मादिति ॥

एवमौपोद्घातिकं मनोवैभवनिराकरणं समाप्य प्रकृते योजयति-

**तथा च, तस्मिन्ननिन्द्रियप्रत्यासन्ने निरुपधानत्वादात्मनः सुषुप्त्यवस्थायामनुपलम्भः । एतदेव मनसः शीलमिति कुतो निर्णीतमिति चेत्, अन्वयव्यतिरेकाभ्याम् । न केवलं तस्य, किन्तु सर्वेषामेवेन्द्रियाणाम् । न हि विशेषगुणमनपेक्ष्य चक्षुराद्यपि द्रव्ये प्रवर्त्तते । स्वापावस्थायां कथं ज्ञानमिति चेत् । तत्तत्संस्कारोद्बोधे विषयस्मरणेन स्वप्नविभ्रमाणामुत्पत्तेः । उद्बोध एव कथमिति चेत् । मन्दतरतमादिन्यायेन बाह्यानामेव शब्दादीनामुपलम्भाद्, अन्ततः शरीरस्थैर्योष्मादेः प्रतिपत्तेः यदा च मनस्त्वचमपि परिहृत्य पुरीतति वर्त्तते, तदा सुषुप्तिः ॥**

**स्यादेतत् । परात्मा तु कथं परस्यायोग्यः । न हि साक्षात्कारिज्ञानविषयतामेवायं न प्राप्नोति । स्वयमप्यदर्शनप्रसङ्गात् । नापि ग्रहीतुरेवायमपराधः । तस्यापि हि ज्ञानसमवायिकारणतयैव तद्योग्यता । नापि करणस्य । साधारणत्वात् । न ह्यात्मसारमेकमेव मनः एकमेवात्मानं गृह्णातीत्यत्र नियामकमस्ति । स्वभाव इति चेत्, तर्हि मुक्तौ निःस्वभावत्वप्रसङ्गः । तदेकार्थतया अपायादिति । न । भोजकादृष्टोपग्रहस्य नियामकत्वात् । यद्धि मनो यच्छरीरं यानीन्द्रियाणि**

यस्यादृष्टेनाकृष्टानि, तानि तस्यैवेति नियमः । तदुक्तं प्राक्-प्रत्यात्मनियमाद्भुक्तेरिति ॥ एतेन परबुद्ध्याद-यो व्याख्याताः ॥

तदेवं योग्यानुपलब्धिः परात्मादौ नास्ति, तदि-तरा तु न बाधिकेति तत्रापि सम्मतम् । अतः किम-ऽधिकृत्य प्रतिबन्धिः । न हि शशशृङ्गमयोग्यानुप-लब्ध्या कश्चिन्निषेधति । न च प्रकृते योग्यानुपलब्धिं कश्चिन्मन्यते । अथायमाशयः । अयोग्यशशशृङ्गादा-वनुपलब्धिर्न बाधिका स्यादिति । ततः किं तत्सिद्ध्येदि-ति चेत् । एवमस्तु यदि प्रमाणमस्ति । पशुत्वादिकमि-ति चेत् । परसाधने प्रतिबन्धिस्तर्हि न तद्बाधने ।तत्रै-व भविष्यतीति चेत् । ननु किं तत्र प्रतिबन्धिरेव दूष-णम् । अथ कथञ्चित्तुल्यन्यायतया योग्या एव परात्म बुद्ध्यादयस्ते च बाधिता एवेत्यपहृतविषयत्वम् ? । न प्रथमः । अव्याप्तेः । नहि पशुत्वादेः शशशृङ्गसाधक-त्वेन कार्यत्वादेः कर्तृमत्त्वादिसाधकत्वं व्याप्तं, येन त-स्मिन्नसति तत्प्रतिक्षिप्येत । न द्वितीयः । मिथोऽनुप-लभ्यमानत्वस्य वादिप्रतिवादिस्वीकारात् । तथापि पशुत्वादौ को दोष इति चेत् । न जानीमस्तावत्ताद्वि-चारावसरे चिन्तयिष्यामः ॥

तथा चेति ॥ एतदेवेति ॥ विशेषगुणोपहितात्मग्राहकत्वमित्य-र्थः । अनिन्द्रियप्रत्यासन्नत्वान्मनसः स्वप्नप्रत्यया अपि न स्युरित्या-ह ॥ स्वापेति ॥ सर्वेन्द्रियप्रत्यासत्तिविरहे मनसो ज्ञानाजनकत्वं, न तु त्वगादिप्रत्यासत्तिमतोऽपीत्याह ॥ तत्तदिति ॥ उद्बोधः सहकारि-साकल्यम् विषयस्मृतिदोषादृष्टादिसान्निध्यान्मनसा स्वप्नानुभवा जन्यन्त इत्यर्थः । सदृशदर्शनादेरुद्बोधकस्याभावात् संस्कारोद्बोधा

न स्यादित्याह ॥ उद्बोध एवेति ॥ न तदेवोद्बोधकं, किं त्वदृष्टादिक-
मपि यथासम्भवमित्याह ॥ मन्देति ॥ मन्दत्वं गत्वाद्व्याप्यजा-
तिः ॥ ऊष्मादेरिति ॥ अनुद्भूतरूपोद्भूतस्पर्शतेजसः स्पर्शादेरित्य-
र्थः । स्वापमुक्त्वा सुषुप्तिमाह ॥ यदा चेति ॥ आत्मनो निरिन्द्रिय-
प्रदेशः पुरीतत् । किञ्चिन्मनः कञ्चिदेवात्मानं गृह्णातीत्यपि
नास्तीत्याह ॥ नापीति ॥ एकस्यापि मनसोऽनेकात्मग्राहकत्वादि-
त्यर्थः॥न हीति॥नैयायिकमते इति शेषः। भट्टानां तु ज्ञानार्थयोरिवा-
त्ममनसोरपि स्वाभाविक एव सम्बन्धो, यतो मुक्तावप्यात्मनो नित्य-
निरतिशयानन्दसन्दोहाभिव्यक्तिः। एकात्ममात्रज्ञानजनकत्वं मनसः
स्वभाव इत्याह॥स्वभाव इतीति॥ एकस्यात्मन एकमेव मन इति स्व-
भावः।एक मन एकमेवात्मानं गृह्णातीति वा। इयमपि जीवन्मुक्तौ ना-
स्ति। तत्र कायव्यूहे बह्वात्ममनःस्वीकाराद्योगिनामप्यात्मसाक्षात्कार-
जननादित्याह॥ मुक्ताविति ॥ जीवन्मुक्तौ । यदीयादृष्टाकृष्टं यन्मनस्त-
त्तस्यैव ग्राहकं, योगिनामपि तत एव तदीयत्वं तस्य । अदृष्टस्यापि
तदीयत्वं तदीयमनोनिष्पन्नत्वेन, बीजाङ्कुरवच्च नानवस्थादोष
इत्याह ॥ भोजकेति ॥ यथा परात्मनि परमनसो न साक्षात्कारजन-
कत्वं तथा परबुद्ध्यादावपि, तुल्यत्वादित्याह ॥ एतेनेति ॥

यत्र प्रतिबन्धिः स्यात् तदुभयमपि नेष्यते इत्याह ॥ न हीति ॥
न हि तेन ईश्वरसाधने किञ्चिद् दूषणं इत्यर्थान्तरं निग्रहस्थानमि-
त्याह ॥ नत इति ॥ आशयमविद्वानाह ॥ तादृगिति ॥ तत्सद्भावेऽपि न
प्रकृते दूषणमित्याह ॥ एवमिति ॥ मानमाह ॥ पशुत्वादिकमिति ॥
पक्षसमत्वादेव नाश्वादौ व्यभिचार इति भावः । आशयं स्फुटयति ॥
परेति ॥ यदीश्वरः सिद्ध्येत्, तदा शशशृङ्गमपि सिद्ध्येदितीश्वर-
साधने प्रतिबन्धिस्तथा चार्थान्तरमित्युक्तम् । नन्वनुपलब्धिमात्रेण
यथा शशे शृङ्गाभावस्तथा क्षित्यादौ कर्तुरप्यभाव इति बाधनेऽपि
प्रतिबन्धिः स्यात् । इष्टापत्तेरभावादित्याह ॥ तत्रैवेति ॥ मिथ इति ॥
परात्मादेः परायोग्यत्वस्योभयवादिस्वीकारात् प्रत्यक्षेणानुपलम्भ-
मात्रं, नायोग्ये बाधकमित्यर्थः अर्थान्तरं हि पुरुषदोषो,न तु साधने
दोष इत्याशयेन पृच्छति ॥ तथापीति ॥ शशे शृङ्गस्यात्यन्तमभाव
इति सर्वेषामबाधितप्रत्यक्षबाधः । शृङ्गत्वस्य जातेर्योग्यसंस्थान-
व्यङ्ग्यत्वेनायोग्ये शङ्कितुमप्यशक्यत्वादन्यथा तद्व्यतिरेकाप्रसिद्धा

अनुमानानवकाशात्, अन्वयिनश्चानङ्गीकारात्। परात्मनश्चायोग्य-स्यापि कर्तृत्वाच्च कर्तृत्वं योग्यत्वनियतमित्याशयवत उत्तरं, नेति॥

स्यादेतत् यत्प्रमाणगम्यं हि यत्, तदभाव एव तस्याभावमावेदयति। यथा रूपादिप्रतिपत्तेरभाव-श्चक्षुरादेरभावम्। कायव्यापारैकप्रमाणकश्च परा-ऽऽत्मा, तदभाव एव तस्याभावे प्रमाणमङ्कुरादिषु। तन्न। तदेकप्रमाणकत्वासिद्धेः। अन्यथा सुषुप्तोऽपि न स्यात्। श्वाससन्तानोऽपि तत्र प्रमाणमिति चेन्न। निरुद्धपवनोऽपि न स्यात्। कायसंस्थानविशेषोऽपि तत्र प्रमाणमिति चेत्, विषमूर्च्छितोऽपि नस्यात्। शरीरोष्मापि तत्र प्रमाणमिति चेन्न। जलावसिक्त-विषमूर्च्छितोऽपि न स्यात्॥

तस्माद् यद्यत् कार्यमुपलभ्यते तत्तदनुगुणश्चेतन-स्तत्र तत्र सिध्यति। न च कार्यमात्रस्य क्वचिद्व्यावृत्ति-रिति। न च त्वदभ्युपगतेनैव प्रमाणेन भवितव्यं नान्येनेति नियमोऽस्ति। न च प्रमेयस्य प्रमाणेन व्याप्तिः। सा हि कार्त्स्न्येन वा स्यादेकदेशेन वा स्यात्?। न प्रथमः। प्रत्यक्षाद्यन्यतमासङ्गावेऽपि तत्प्रमेयाव-स्थितेः। न द्वितीयः। पुरुषनियमेन सर्वप्रमाणव्या-वृत्तावपि प्रमेयावस्थितेः। अनियमेनासिद्धेः। न हि सर्वस्य सर्वदा सर्वथाऽत्र प्रमाणं नास्तीति निश्चयः शक्य इति। कथन्तर्हि चक्षुरादेरभावो निश्चेयः?। व्यापकानुपलब्धेः। चरमसामग्रीनिवेशिनो हि कार्य-मेव व्यापकं, तन्निवृत्तौ तथाभूतस्यापि निवृत्तिः। यो-ग्यतामात्रस्य कदाचित् कार्यं, तन्निवृत्तौ तथाभूतस्या-

ऽपि निवृत्तिः । अन्यथा, तत्रापि सन्देहः । प्रकृतेऽपि व्यापकानुपलब्ध्या तत्प्रतिषेधोऽस्तु, न आश्रयासिद्धत्वात् । न हीश्वरस्तज्ज्ञानं वा क्वचित् सिद्धम् । आभासप्रतिपन्नमिति चेन्न । तस्याश्रयत्वानुपपत्तेः । प्रतिषेध्यत्वानुपपत्तेश्च ॥

व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता ॥
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता ॥ २ ॥

न चैतदाभासप्रतिपन्नस्यास्तीति कुतस्तस्य निषेधाधिकरणत्वं निषेध्यता वेति । कथं तर्हि शशशृङ्गस्य निषेधः । न कथञ्चित् । स ह्यभावप्रत्यय एव । न चायमपारमार्थिकप्रतियोगिकः परमार्थाभावो नाम। न चापारमार्थिकविषयं प्रमाणं नामेति ॥

यत्प्रमाणेति ॥ यदेकप्रमाणगम्यमित्यर्थः । अतो न धूमाभावेऽपि अग्निसत्त्वाद् व्यभिचारः । अत एव—नैकप्रमाणत्वासिद्धेरिति—वक्ष्यति ॥ कार्यमात्रप्रमाणोऽन्वयस्तद्विशेषनिवृत्तिमात्रेण न निवर्तते । कार्यमात्रस्य च न व्यावृत्तिरित्युपसंहरति ॥ तस्मादिति॥तथाच, प्रमाणविशेषनिवृत्तावपि प्रमाणसामान्यसत्त्वात्तदेकप्रमाणगम्यत्वमसिद्धमित्यर्थः ॥ न च प्रमाणप्रमेययोर्व्याप्तिर्यतः प्रमाणविशेषाभावे प्रमेयाऽसत्त्वं स्यादित्याह ॥ न चेति ॥ अनियमेनेति ॥ सर्वपुरुषापेक्षयेत्यर्थः ॥ व्यापकेति ॥ तत्तद्व्यापकनिवृत्तेः तत्तद्व्याप्यनिवृत्तेरित्यर्थः । कार्यविशेषस्य कारणविशेषव्यापकत्वमाह ॥ चरमेति ॥ कार्यं रूपज्ञानादि ॥ योग्यतामात्रस्येति॥ व्यापकमित्यनुषज्यते । न च भक्षितविनष्टबीजे व्यभिचारः । यत्सामान्यं यत्कारणतावच्छेदकं तदवश्यं तज्जनकवृत्तीत्यर्थात् । नित्ययोग्याभिप्रायकत्वाद्वा ॥ अन्यथेति ॥ कदाचित्कार्यव्यतिरेके योग्यतायामपि सन्देह इत्यर्थः॥प्रकृतेऽपीति ॥ ईश्वरो न कर्ता तद्व्यापकस्वार्थादिशून्यत्वाद् व्योमवदिति व्यापकाभावलिङ्गकमनुमानमित्यर्थः ॥ आभासेति ॥ असत्ख्यात्युपस्थितमित्यर्थः । यदीश्वर कर्तृत्वनिषेधः साध्यते तदाऽऽश्रयत्वमीश्वरस्य,

यदा तस्यैवाभावः तदेश्वरस्य प्रतियोगित्वम् । उभयमपि नास्तीत्या-
ह ॥ तस्येति ॥

कुत इत्याह ॥ व्यावर्त्येति ॥ व्यावर्त्यः प्रतियोगी, तदभाववत्ता भाविकी पारमार्थिकी, विशेष्यता आश्रयता, वस्तुनः प्रामाणिकस्य, स्वाभावविरहरूपत्वं च प्रतियोगित्वम् । असत्ख्यातेः कारणाभावेन निरासादित्यर्थः ॥

नन्वनुमितिरेव पक्षः । तथाहि इयमनुमितिरयथार्था अशरीरे कर्तृत्वज्ञानत्वात् । ज्ञानं नित्यत्वज्ञानत्वाद्वा । घटः कर्त्ता चैत्रज्ञानं नित्यमिति ज्ञानवदित्यस्तु । न चोपजीव्यविरोधः । अनुमितिर्हि उप-जीव्या, न तु तद्यथार्थत्वमपि । न । अप्रयोजकत्वात् । अन्यथा, पर्वते अग्न्यनुमितिरयथार्था उभयसिद्धाग्निमद्भिन्नेऽग्निमत्त्वज्ञानत्वा-द्, ह्रदोऽग्निमानिति वदित्यापत्तेः । अपि चानुमितेरयथार्थत्वं दोषा-दुत्पन्नमनेन ज्ञाप्यं, न त्वनेनोत्पाद्यम् । तत्र चायमेव दोषो दोषान्तरं वा ? नाद्योऽन्योन्याश्रयात् । नान्त्यस्तदभावात् ॥

न चेति ॥ आभासानाभाससङ्करापत्तेरिति भावः ॥ कथमिति ॥ यदि नासतो निषेध्यत्वमिति शेषः ॥ न कथञ्चिदिति ॥ नात्रापि कल्पितस्य निषेध्यत्वं, शशेऽधिकरणे शृङ्गस्यैव निषेधादित्यर्थः ॥ स इति ॥ पारमार्थिकाभावप्रत्यय एवेत्यर्थः । प्रतियोग्यधिकरणयो-र्वस्तुत्वादिति भावः ॥ न चेति ॥ प्रामाणिकनिषेधव्यवहारे प्रामाणि-कस्यैव निषेध्यत्वादित्यर्थः ॥

किञ्चानुपलब्धिमात्रान्निषेधनिश्चयेऽतीन्द्रियोच्छेदाद् योग्यानुप-लम्भात् स वाच्यः । योग्यता च प्रतियोगितद्व्याप्येतरतत्प्रमापक-साकल्यरूपा अलीकं नास्तीति दोषसचिवतज्ज्ञानसामग्रीरूपा सा-वाच्या तस्यां च सत्यां नालीकस्यानुपलम्भः उपलम्भस्यैव सत्त्वात् अनुपलम्भदशायाञ्च तज्ज्ञानसामग्रीरूपा योग्यतैव नास्तीत्याह—

अपि च—

**दृष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ॥**
**न तस्यां नोपलम्भोऽस्ति नास्ति साऽनुपलम्भने॥३॥**

**केन च शशशृङ्गं प्रतिषिद्ध्यते । सर्वथाऽनुपलब्ध-**

स्य योग्यत्वासिद्धेः। तदितरसामग्रीसाकल्यं हि तत्। ननूक्तमाभासोपलब्धं हि तत् । अत एवाशक्यनिषेधमित्युक्तम् । अनुपलम्भकाले आभासोपलम्भसामग्र्या अभावात्तत्काले चानुपलम्भाभावादिति । कस्तर्हि शशशृङ्गं नास्तीत्यस्यार्थः ? । शशे अधिकरणे विषाणाभावोऽस्तीति ॥

स्यादेतत् ॥ यद्यपीश्वरो नावगतो, यद्यपि च नाभाससिद्धेन प्रमाणव्यवहारः शक्यसम्पादनः । तथाप्यात्मानः सिद्धास्तेषां सार्वज्ञ्यं निषिध्यते, क्षित्यादिकर्तृत्वञ्चेति । तथाहि । मदितरे न सर्वज्ञाश्चेतनत्वादहमिव, न च ते क्षित्यादिकर्त्तारः पुरुषत्वादहमिव । एवं, वस्तुत्वादरपीति । तदेतदपि प्रागेव परिहृतम् । तथाहि—

इष्टसिद्धिः प्रसिद्धेंऽशे हेत्वसिद्धिरगोचरे ॥
नान्या सामान्यतः सिद्धिर्जातावपि तथैव सा ॥४॥

प्रमाणप्रतीतानां चेतनानां पक्षीकरणे सिद्धसाधनम् । ततोऽन्येषामसिद्धौ हेतोराश्रयासिद्धत्वम् । आत्मत्वमात्रेण सोऽपि सिद्ध इति चेत् । कोऽस्यार्थः ? । किमात्मत्वेनोपलक्षिता सैव वस्तुगत्या सर्वज्ञविश्वकर्तृव्यक्तिः, अथ तदन्या, आत्मत्वमेव वा पक्षः ? । सर्वत्र पूर्वदोषानतिवृत्तेः । अथायमाशयः । आत्मत्वं न सर्वज्ञसर्वकर्तृव्यक्तिसमवेतं, जातित्वात्, गोत्ववदिति । तदसत् । निषेध्यासिद्धेर्निषेधस्याशक्यत्वात् । तथा चाऽप्रसिद्धविशेषणः पक्ष इत्याश्रयासिद्धिरिति स एव दोषः ॥

त्वदुपगतागमलोकप्रसिद्धस्यैवेश्वरस्यासर्वज्ञत्वमकर्तृत्वञ्च साध्यते इति चेन्न ॥

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ॥
आभासत्वे तु नैव स्यादाश्रयासिद्धिरुद्धता ॥५॥

निगदव्याख्यानमेतत । चार्वाकस्त्वाह, किं योग्यताविशेषाग्रहेण ?। यन्नोपलभ्यते तन्नास्ति, विपरीतमस्ति । न चेश्वरादयस्तथा । ततो न सन्तीत्येतदेव ज्यायः । एवमनुमानादिविलोप इति चेत् । नेदमनिष्टम । तथाच लोकव्यवहारोच्छेद इतिचेन्न । सम्भावनामात्रेण तत्सिद्धेः।संवादनं च प्रामाण्याभिमानादिति ॥

अपि चेति ॥ केन चेति ॥ न केनापीत्यर्थः ॥ सर्वथेति ॥ प्रमाणत इति शेषः । नन्वाभासोपलब्धस्यापि नेदं रजतमिति निषेधादुपलब्धमात्रस्य निषेधो, न तु प्रमितस्यैवेत्यत आह॥तदितरेति॥रजतादेः प्रामाणिकत्वेन योग्यस्यैवानुपलम्भान्निषेधो, न त्वाभासोपलब्धस्येत्यर्थः । तत्रैव किं न स्यादित्याह ॥ नत्विति ॥ आभाससामग्रीकालेऽनुपलम्भाभावादनुपलम्भकाले च तद्रूपयोग्यताया असत्त्वादित्याह ॥ अत एवेति ॥

नन्वेवं, घटादावपि दोषस्योपलम्भकारणत्वात्तदभावोऽपि न गृह्येत । प्रमापकत्वस्य च विवक्षितत्वे गुणस्यैव प्रमापकस्याभावात् तत्साकल्यासिद्धेः । अत्राहुः । प्रत्यक्षप्रमायामिन्द्रियार्थसान्निकर्षस्य गुणत्वात्तस्य च तद्व्याप्यत्वादेव । तदन्यगुणस्य च तत्राऽकारणत्वात् । घटादौ गुणान्यप्रमाकारणत्वेन योग्यता । शशशृङ्गे च न दोषान्यज्ञानकारणत्वेन योग्यता । दोषान्यप्रमापकस्याभावादित्यन्ये ॥

शश इति ॥ ननु गवि शशशृङ्गं नास्तीतिप्रतीतिबलात् प्रतियोग्यवृत्तिधर्मेण शशीयत्वेनावच्छिन्नः शृङ्गाभावः प्रतीयते । व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावस्य केवलान्वयित्वात् । नैवम् । प्रतियोगितावच्छेदकधर्मविशिष्टप्रतियोगिज्ञानस्याभावधीहेतुतया तादृश-

प्रतीतेरसिद्धेः । अन्यथा, प्रतियोगिनिर्विकल्पकादपि व्यतिरेक-प्रतीत्यापत्तेः ॥ न सर्वज्ञा इति ॥ परेषां सर्वज्ञाप्रसिद्धेः । अत्र किञ्चि-दनभिज्ञत्वमेव साध्यम् ॥ तत इति ॥ सामान्यलक्षणप्रत्यासत्तेस्तै-रनभ्युपगमान्नात्मत्वेनापि तदुपस्थितिरिति भावः ॥ सर्वत्रेति ॥ आत्म-त्वपक्षेऽप्यसर्वज्ञत्वे क्षित्याद्यकर्तृकत्वे च साध्ये सिद्धसाधनमित्यर्थः। न चात्मत्वमसर्वज्ञत्वव्याप्यं ज्ञानत्वञ्चानित्यत्वव्याप्यमिति वाच्यम् । विपक्षे बाधकाभावात् । अन्यथा, मूर्तत्वमवयवित्वव्याप्यमिति पर-माणुरपि न सिद्ध्येदिति भावः ॥ तथा चेति ॥ जिज्ञासितधर्मणो धर्मिणः पक्षत्वात्तदभावेनाश्रयासिद्धिरित्यर्थः॥आगमादेरिति॥ न चा-ऽऽगमादेर्धर्म्यंशे प्रामाण्येऽपि अन्यत्र न प्रामाण्यमिति वाच्यम् । तद्रूपेणाप्यस्मदादितदन्यपक्षत्वे सिद्ध्यसिद्धिभ्यां व्याघातादिति भावः ॥ सम्भावनेति ॥ उत्कटकोटिकसंशयमात्रेणेत्यर्थः ॥

अत्रोच्यते—

दृष्ट्यदृष्ट्योः क्व सन्देहो भावाभावविनिश्चयात् ॥
अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभम् ॥ ६ ॥

सम्भावना हि सन्देह एव । तस्माच्च व्यवहार-स्तस्मिन् सति स्यात् । स एव तु कुतः ?। दर्शनदशा-यां भावनिश्चयात्, अदर्शनदशायामभावावधारणा-त् । तथाच गृहाद् बहिर्गतश्चार्वाको वराको न निव-र्त्तेत । प्रत्युत, पुत्रदारधनाद्यभावावधारणात् सोर-स्ताडं शोकविकलो विक्रोशेत् । स्मरणानुभवान्नैवमि-तिचेन्न । प्रतियोगिस्मरण एवाभावपरिच्छेदात्, परा-वृत्तोऽपि कथं पुनरासादयिष्यति । सत्त्वादितिचेदनु-पलम्भकालेऽपि तर्हि सन्तीति न तावन्मात्रेणाभा-वाऽवधारणम् । तदैवोत्पन्ना इतिचेन्न । अनुपलम्भेन हेतूनां बाधात् । अबाधे वा स एव दोषः । अत एव प्रत्यक्षमपि न स्यात्, तद्धेतूनां चक्षुरादीनामनुपलम्भ-

बाधितत्वात् । उपलभ्यन्त एव गोलकादय इति-चेन्न । तदुपलब्धेः पूर्वं तेषामनुपलम्भात् । न च यौगपद्यानियमः । कार्यकारणभावादिति ॥

एतेन, न परमाणवः सन्ति अनुपलब्धेः । न ते नित्या निरवयवा वा । पार्थिवत्वात् । घटादिवत् । न पार्थिवीयपरमाणुरूपादयो नित्याः, रूपादित्वात्, दृश्यमानरूपादिवत् । न रूपत्वपार्थिवत्वादि नित्याऽकार्यातीन्द्रियसमवायि । जातित्वात् । शृङ्गत्ववत् । नेन्द्रियाणि सन्ति, योग्यानुपलब्धेः । अयोग्यानि च शशशृङ्गप्रतिबन्धिनिरसनीयानीत्येवं स्वर्गापूर्वदेवता-निराकरणं नास्तिकानां निरसनीयम् । मीमांसकश्च तोषयितव्यो भीषयितव्यश्चेति ॥

दृष्टयदृष्टयोरिति, सप्तम्याद्विवचनान्तम् । दर्शने तत्सत्त्वनिश्चयाद् अदर्शने चाभावनिश्चयान्न सन्देहः । प्रत्यक्षहेतौ गोलकादावदृष्ट्या अनुपलब्ध्या बाधिते हेत्वभावात् प्रत्यक्षमपि न स्यादित्यर्थः ॥ तथा चेति ॥ पुत्रादिभिस्तस्यादर्शनात् स न स्यादिति गृहं न प्रत्यावर्तेतेत्यर्थः ॥ प्रत्युतेति ॥ पुत्रादेरदर्शनादित्यर्थः ॥

ननु नाप्रत्यक्षं प्रमाणमिति चार्वाकसिद्धान्तादनुपलब्धिः प्रत्यक्ष-सहकारिणी । न च गेहाद्बहिर्गमनेऽधिकरणेन सहेन्द्रियसन्निकर्षोऽस्तीति न पुत्राद्यभावनिश्चयः स्यात् । सन्निकृष्टे देशे चाभावनिश्चयेऽपि ध्वंसानिश्चयान्न शोकः स्यात् । अत एव, पर्वते परभागेन सह इन्द्रियाऽसन्निकर्षाद् नाग्न्यभावनिश्चय इति तत्र संशयादनुमान-वृत्तिः । अत्राहुः । अधिकरणज्ञानमात्रमभावधीहेतुर्न तु तदिन्द्रिय-सन्निकर्षोऽपि । अत एव, देवताद्यभावस्तदधिकरणासन्निकर्षेऽपि गृह्यते इति चार्वाकसिद्धान्तमाश्रित्योक्तम् ॥

पुत्रादेः स्मरणान्नैवं करोतीत्याह ॥ स्मरणेति ॥ स्मरणादिति वक्तव्ये अनुभवग्रहणं तत्र प्रमाणसूचनार्थम् । पुत्रादिस्मरणं तदभाव-ग्रहेऽनुकूलमेव, प्रतियोगिज्ञानं विना तदग्रहादित्याह ॥ प्रतियोगीति ॥

अनुपलम्भकाल इति ॥ तथा चानुपलब्धिमात्रमभावसंशये हेतुर्न तन्निश्चायकमित्यर्थः । हेतूनां पुत्राद्युत्पादकानामित्यर्थः ॥ स एवेति ॥ नानुपलब्धिमात्रेणाभावनिश्चय इत्यर्थः ॥ अत एवेति ॥ हेतूनां बाधादेवेत्यर्थः । ननु चक्षुरादीनामपि स्वोपलब्धिकाले सत्त्वमन्यदा त्वसत्त्वमिष्यत एवेत्यत आह ॥ न चेति ॥ उपलम्भेन्द्रिययोर्युगपदुत्पन्नयोः पौर्वापर्याभावादित्यर्थः ॥ एतेनेति ॥ अनुपलम्भमात्रस्याऽसाधकत्वेन हेत्वन्तरस्य चाश्रयासिद्ध्यादिनेत्यर्थः ॥ मीमांसकश्चेति ॥ अनुपलम्भमात्रस्याभावासाधकत्वादपूर्वादिसिद्धा तोषणम् । योग्यानुपलम्भस्य बाधकत्वेनाऽयोग्यपरमात्माऽबाध इति भीषणम् ॥

यद्यनुपलम्भमात्रान्नाऽभावनिश्चयः, तदाऽतीन्द्रियोपाधिशङ्कया व्याप्त्यनिश्चयान्नानुमानमिति न तत ईश्वरसिद्धिरित्याह—

यद्येवमनुपलम्भेनादृश्यप्रतिषेधो नेष्यते, अनुपलभ्योपाधिप्रतिषेधोऽपि तर्हि नेष्टव्यः । तथा च कथं तथाभूतार्थसिद्धिरपि । अनुमानबीजप्रतिबन्धासिद्धेः। तदभावे शब्दादेरप्यभावः । प्रामाण्यासिद्धेः । सेयमुभयतःपाशा रज्जुः ॥

अत्र कश्चिदाह । मा भूदुपाधिविधूननं, चतुःपञ्चरूपसम्पत्तिमात्रेणैव प्रतिबन्धनिर्वाहात् । तस्याश्च सपक्षासपक्षदर्शनादर्शनमात्रप्रमाणकत्वात् । यत्र तु तद्भङ्गः, तत्र प्रमाणभङ्गोऽप्यावश्यकः । न ह्यस्ति सम्भवो दर्शनादर्शनयोरविप्लवे हेतुरुपप्लवते इति । अप्रयोजकोऽपि तर्हि हेतुः स्यादितिचेत्, भूयोदर्शनाऽविप्लवे कोऽयमप्रयोजको नाम ? । न तावत् साध्यं प्रत्यकार्यमकारणं वा । सामान्यतो दृष्टानुमानस्वीकारात् । नाऽपि सामग्र्यां कारणैकदेशः । पूर्ववदभ्युपगमात् । नाऽपि व्यभिचारी । तदनुपलम्भात् । व्यभिचारोपलम्भे वा स एव दोषः । न च शङ्कित-

व्यभिचारः । निर्बीजशङ्कायाः सर्वत्र सुलभत्वात् । नापि व्याप्यान्तरसहवृत्तिः । एकत्रापि साध्येऽनेकसाधनोपगमात । नाप्यल्पविषयः, धूमादेस्तथाभावेऽपि हेतुत्वात् । ननु धूमो वह्निमात्रे अप्रयोजक एव, तन्निवृत्तावपि तदनिवृत्तेः । आर्द्रेन्धनवत्तं वह्निविशेषं प्रति तु प्रयोजकः, तन्निवृत्तौ तस्यैव निवृत्तेरित्येतदप्ययुक्तम् । सामान्याप्रयोजकतायां विशेषसाधकत्वायोगात्तदसिद्धौ तस्यासिद्धिनियमात् । सिद्धौ वा सामान्यविशेषभावानुपपत्तेः । नाऽपि कलससामर्थ्येऽन्यस्मिन् कल्पनीयसामर्थ्योऽप्रयोजकः, नाशे कार्यत्वसावयवत्वयोरपि हेतुभावादिति ॥

यद्येवमिति॥अनुमानाभावे तद्ग्राह्यप्रामाण्यं शब्दाद्यपि न तत्र मानमित्याह ॥ तदभाव इति ॥ चतुःपञ्चेति ॥ पक्षसत्त्वसपक्षसत्त्वाबाधितत्वासत्प्रतिपक्षितत्वानि चत्वारि रूपाणि केवलान्वयिनि, सपक्षसत्त्वाऽभावे विपक्षासत्त्वं केवलव्यतिरेकिणि, उभयन्तु रूपमन्वयव्यतिरेकिणीति तत्र पञ्चरूपाणि ॥तद्भङ्ग इति॥ यत्र उक्तरूपसम्पत्तिभङ्गस्तत्र दर्शनादर्शनात्मकप्रमाणभङ्गोऽप्यावश्यकोऽन्यथा तयोर्निर्विषयतापात इत्यर्थः ॥ सामान्यत इति ॥ रूपरसयोरकार्यकारणभूतयोरपि व्याप्त्यभ्युपगमादित्यर्थः ॥ पूर्ववदिति ॥ पूर्वं कारणं तद्यस्यास्ति विषयतया लिङ्गज्ञानस्य, तत्तथा । कारणैकदेशस्यापि तदितराऽशेषकारणव्याप्यस्यान्त्यतन्तुसंयोगादेः पटादौ लिङ्गत्वाङ्गीकारादित्यर्थः ॥ निर्बीजेति ॥ साध्याभावसहचारदर्शनस्य शङ्काबीजस्याभावात्, भावे वा व्यभिचार एव स्फुटो दोष इत्युक्तमित्यर्थः ॥ अल्पविषय इति ॥ व्यापकवन्निष्ठात्यन्ताभावप्रतियोगीत्यर्थः ॥ तन्निवृत्ताविति ॥ धूमनिवृत्तावपि वह्न्यनिवृत्तेरित्यर्थः ॥ तस्यैवेति ॥ आर्द्रेन्धनप्रभववह्नेरित्यर्थः ॥सामान्येति॥ वह्निसामान्याव्याप्यत्वे तद्विशेषव्याप्यतैव न स्यात, सामान्यस्य विशेषव्यापकत्वादित्यर्थः । तथाच, विशेषव्याप्यत्वे सामान्यव्याप्यत्वं ध्रुवमिति भावः ॥ नाश इति ॥ गुणा-

दिनाशे भावकार्यत्वस्य प्रयोजकत्वे कलशेऽपि द्रव्यनाशे तद्व्याप्य-सावयवत्वस्यापि तत्त्वाङ्गीकारादित्यर्थः ॥

तदेतदपेशलम् । कथं हि विशेषाभावात्, कश्चि-द्व्यभिचरति कश्चिच्च नेति शक्यमवगन्तुम् । ततो नि-र्णायकाभावे सति साहित्यदर्शनमेव शङ्काबीजमिति क्वासौ निर्बीजा । एवं सत्यतिप्रसक्तिरपि चार्वाक-नन्दिनी नोपलम्भाय । स्वभावादेव कश्चित् किञ्चिद्व्य-भिचरति, कश्चिच्च नेति स्वभाव एव विशेष इतिचे-त् । केन चिह्नेन पुनरसौ निर्णेय इति निपुणेन भाव-नीयम् । भूयोदर्शनस्य शतशः प्रवृत्तस्यापि भङ्गदर्श-नात् । यत्र भङ्गो न दृश्यते तत्र तथेतिचेत् । आपा-ततो न दृश्यते इति सर्वत्र कालक्रमेणापि न द्रक्ष्यते इति को नियन्तेति । तस्मादुपाधितद्विरहावेव व्यभि-चाराव्यभिचारनिबन्धनं, तदवधारणञ्चाशक्यमिति॥

ननु यः सर्वैः प्रमाणैः सर्वदाऽस्मदादिभिर्यद्वत्तया नोपलभ्यते नासौ तद्वान् । यथा बकः श्यामिकया, नोपलभ्यते च वह्नौ धूम उपाधिमत्तयेति शक्यमि-तिचेन्न । अस्याप्यनुमानतया तदपेक्षायामनवस्थाना-त् । सर्वादृष्टेश्च सन्देहात् स्वादृष्टेर्व्यभिचारतः, सर्वदेत्यसिद्धेः । तादात्म्यतदुत्पत्तिभ्यां नियम इत्य-ऽन्ये । तत्र तादात्म्यं विपक्षे बाधकाद्भवति । तदुत्पत्ति-श्च पौर्वापर्येण प्रत्यक्षानुपलम्भाभ्याम् । न ह्येवं सति शङ्कापिशाच्यवकाशमासादयति, आशङ्क्यमानकारण-भावस्यापि पिशाचादेरेतल्लक्षणाविरोधेनैव तत्त्व-निर्वाहादिति । न । एवमप्युभयगामिनोऽव्यभिचार-

**निबन्धनस्यैकस्याऽविवेचनात्, प्रत्येकं चाव्यापकत्वात्। कुतश्च कार्यात्मनो कारणमात्मानश्च न व्यभिचरत इति ॥**

कथं हीति ॥ सहचारदर्शनस्य व्यभिचार्य्यव्यभिचारिसाधारणत्वात्तदेव विशेषादर्शनसहकृतं व्यभिचारशङ्काबीजमित्यर्थः ॥ एवं सतीति ॥ अवश्यं शङ्कया भाव्यं नियामकमपश्यताम् * इति चार्वाकोक्तातिप्रसक्तिर्नोपालम्भाय, शङ्काबीजस्य सहचारदर्शनस्य सत्त्वादित्यर्थः। यथा किञ्चित् कस्यचित् कार्यं कारणं चेत्यत्र स्वभाव एव नियामकः, तथा किञ्चित् कस्यचिद्व्याप्यं व्यापकञ्चेत्यपीत्याह ॥ स्वभावादेवेति ॥ स स्वभावविशेष एव कुतोऽवधार्य इत्याह ॥ केनेति ॥ भूयोदर्शनस्येति ॥ पार्थिवत्वलोहलेख्यत्वयोरपि व्यभिचारदर्शनादित्यर्थः। अनन्यगतिकतयोपाधिविरह एव तदुपायः। स च दुरवधारण इत्याह ॥ तस्मादिति ॥

ननु सहचारदर्शनव्यभिचारादर्शने एव व्याप्तिग्राहके। न च तयोरव्याप्तिसाधारण्यम्। उपाध्यभावज्ञानस्याप्यव्याप्यसाधारणत्वात्। न च स्वरूपसन्नेव स तद्ग्राहकः। व्याप्तिभ्रमानुपपत्तेः। नाऽपि वस्तुगत्या यत्रोपाध्यभावस्तत्र तज्ज्ञानाद्व्याप्तिप्रमाऽन्यत्र तु तद्भ्रम इति वाच्यम्। यत्र वस्तुसती व्याप्तिस्तत्र सहचारदर्शनादेरपि तत्त्वापत्तेः ॥

अत्राहुः। व्यभिचारादर्शनस्य व्याप्तिनिश्चायकत्वे तस्मिन् सति व्याप्तिसन्देहानुपपत्तिः। अनौपाधिकत्वनिश्चये तु न सन्देह इति तदेव व्याप्तिग्राहकम्। किञ्च, यथा व्यभिचारादर्शनादऽव्यभिचारनिश्चयः। एवमव्यभिचारदर्शनाद्व्यभिचारनिश्चयोऽपि स्यादविशेषात्। न च भावानुपलब्धिरभावनिश्चायिका, न त्वभावानुपलब्धिर्भावनिश्चायिकेति वाच्यम् ॥ अव्यभिचारस्यापि भावत्वात् ॥ साधनसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यरूपत्वात्। क्षित्यादि द्विकर्तृकं कार्यत्वात् पटवदित्यादेरपि गमकत्वापाताच्च ॥

तदपेक्षायामिति ॥ उपाध्यभावापेक्षायामित्यर्थः ॥ असिद्धेरिति ॥ सर्वदा उपाधिमत्तयाऽनुपलम्भस्येत्यर्थः। बौद्धोक्तं तद्ग्राहकमाह ॥ तादात्म्येति ॥ विपक्षबाधकश्च क्षणभङ्गप्रस्तावे व्याख्यातम् ॥ प्रत्यक्षा-

ऽनुपलम्भावन्वयव्यतिरेकौ ॥ अपि चाग्नीन्धनादिसमवधानेऽप्य-न्यस्य पिशाचादेः सन्निधिराशङ्क्यमानो नाग्नीन्धनादिव्यभिचारिणो-ऽन्यत्र धूमस्यादर्शनादिति नियतस्य वाच्यः । स च नेत्याह ॥ आ-शङ्क्यमानेति ॥ अग्निं विना पिशाचादेव धूमः स्यादिति पिशाचस्य कारणत्वशङ्काऽन्वयव्यतिरेकावादाय वाच्या । तौ चाग्नेः प्रत्यक्ष-सिद्धस्येति नान्यकारणशङ्केत्यर्थः । दूषयति ॥ नैवमपीति ॥ तयोर्न मिलितयोर्व्याप्तिग्राहकत्वमसिद्धेरिति प्रत्येकं तत्त्वे व्याप्तिग्राहकता-ऽवच्छेदकानुगतरूपाभाव इत्यर्थः । ननु ज्ञापकस्याननुगमो न दोषः, एकस्याप्यनेकज्ञाप्यत्वादित्यत आह ॥ कुतश्चेत्ति ॥ विपक्षबाधकतर्क-स्यापि व्याप्त्यपेक्षया तत्रापि तर्कान्तरानुसरणेऽनवस्था । तर्कं विनाऽपि व्याप्तिग्रहे व्यभिचारात् तर्कोऽपि न तद्धेतुः स्यादित्यर्थः ॥

अत्रोच्यते—

शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम् ॥
व्याघातावधिराशङ्का तर्कः शङ्काऽवधिर्मतः ॥७॥

कालान्तरे कदाचिद्व्यभिचरिष्यतीति कालं भाविन-माकलय्य शङ्केत।तदाकलनश्च नानुमानमवधीर्य कस्य चित् । मुहूर्त्तयामाऽहोरात्रपक्षमासर्त्वयनसंवत्सरा-ऽऽदयो हि भाविनो भवन्मूहूर्त्ताद्यनुमेया एव । अन-वगतेषु स्मरणस्याप्यनाशङ्कनीयत्वात् । अनाकलने वा, कमाश्रित्य व्यभिचारः शङ्क्येत । तथाच सुतराम-नुमानस्वीकारः । एवञ्च देशान्तरेऽपि वक्तव्यम् ॥

स्वीकृतमनुमानम् । सुहृद्भावेन पृच्छामः, कथ-माशङ्का निवर्त्तनीया ? इतिचेन्न । यावदाशङ्कं तर्कप्र-वृत्तेः । तेन हि वर्त्तमानेनोपाधिकोटौ तदायत्तव्यभि-चारकोटौ वाऽनिष्टमुपनयतेच्छा विच्छिद्यते । वि-च्छिन्नविपक्षेच्छश्च प्रमाता भूयोदर्शनोपलब्धसाहचर्यं लिङ्गमनाकुलोऽधितिष्ठति, अधिष्ठिताच करणात्

**क्रियापरिनिष्पत्तिरिति किमनुपपन्नम् ॥**

शङ्का चेदिति ॥ कालान्तरदेशान्तरयोर्व्यभिचारोपाध्यन्यतराशङ्का यदि, तदाऽनुमानमस्त्येव । तां विना तयोरप्रतीतेः । यदि च तयोरप्रतीतौ न शङ्का, सुतरामनुमानम् । शङ्कानिरासकस्याप्यनपेक्षणादित्यर्थः । वादकथामाश्रित्य शङ्कानिवर्त्तकमाह ॥ व्याघातेति ॥ शङ्काया अवधिस्तर्कः । तन्निवर्त्तकत्वात् । ननु तर्केऽपि व्याप्तिमूलकतया तर्कान्तरापेक्षायामनवस्थेत्यत आह ॥ व्याघातावधिरिति ॥ तर्कमूलव्याप्तौ स्वक्रियाव्याघातेन व्यभिचारशङ्कैव नोदेतीति न तत्र तर्कापेक्षेत्यर्थः ॥

पूर्वार्द्धं व्याचष्टे ॥ कालान्तरेत्यादि,नथाचेत्यन्तेन । ननु साध्याऽत्यन्ताभावसामानाधिकरण्यं साधने वर्त्तते न वेति शङ्का, देशकालावनन्तर्भाव्यैवेति नानुमानावश्यकत्वम् । मैवम् । साध्यात्यन्ताभावसामानाधिकरण्यं तदनधिकरणाधिकरणत्वम् । तत्र प्रसिद्धधूमाधिकरणे वह्निनिश्चयादेव न शङ्का । तदन्यत्रानुमानगम्यमेव ॥

तथापि सामान्यलक्षणया प्रत्यासत्त्या प्रत्यक्षेणापि कालादेरुपस्थितेर्नानुमानादेव तदुपस्थितिः। सा च प्रत्यासत्तिरनुमानप्रामाण्यवादिनाऽपि स्वीकार्या । अन्यथा, यस्य व्याप्तिग्रहः स न पक्षधर्मः । तादृशश्च न व्याप्तिग्रहगोचर इत्यनुमानविलयापत्तिः । मैवम् । इदमसाधकमनुपलभ्यमानव्यभिचारशङ्काग्रस्तत्वादित्यनुमानमपि शङ्काऽऽस्कन्दतीति जात्युत्तरत्वात् । व्याप्तिग्रहाभावव्यभिचारशङ्कयोस्त्वयाऽपि व्याप्तिस्वीकारात् । व्यभिचारशङ्कायामव्यभिचारकोटेरावश्यकत्वाच्च । अपि चानुमानाप्रामाण्यं नानुमानगम्यम् । तदनङ्गीकारात् । नापि प्रत्यक्षगम्यम् । तथाऽनुव्यवसायाभावात् । एतेनोत्कटकोटिकसंशयरूपाऽनुमितिस्तत्करणमनुमानमित्यपास्तम् । धूमादग्निं निश्चिनोमीत्यनुव्यवसायेन तन्निश्चयत्वस्य प्रत्यक्षत्वात् । अन्यथा, प्रत्यक्षस्यापि निश्चयत्वे कः समाश्वासः ? ।

यावदाशङ्कमिति॥ तर्कसहकृतभूयोदर्शनजसंस्कारसचिवप्रमाणेन व्याप्तिर्गृह्यते इत्यर्थः । तर्कव्यापारमाह ॥ तेन हीति ॥ इच्छा विच्छिद्यते इति ॥ संशयजनितसाध्याभाववति जिज्ञासा निवर्त्यते इत्यर्थः । तज्जनकसंशयसहितेति शेषः । अन्यथा, जिज्ञासाविच्छेदे-

ऽपि संशयसत्त्वे व्याप्त्यग्रहात् । न च साध्याभावविषयकज्ञानस्य प्रतिबन्धकत्वात् तन्निवर्त्तनमफलं, लाघवात्साध्याभावविषयत्वस्यैव प्रतिबन्धकतावच्छेदकत्वात् ॥

नन्वन्यत्रैव तर्कमूलव्याप्तावपि शङ्काऽनुवृत्तौ मूलशैथिल्यात्तन्निवर्त्तनं तर्कादेवेत्यनवस्थेत्याह—

**ननु तर्कोऽप्यविनाभावमपेक्ष्य प्रवर्त्तते, ततोऽनवस्थया भवितव्यम् । न । शङ्काया व्याघातावधित्वात् । तदेव ह्याशङ्क्यते, यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा नावतरन्तीति लोकमर्यादा । न हि हेतुफलभावो न भविष्यतीति शङ्कितुमपि शक्यते। तथा सति शङ्कैव न स्यात्, सर्वं मिथ्या भविष्यतीत्यादिवत् । तथापि, अतीन्द्रियोपाधिनिषेधे किं प्रमाणमित्युच्यतामिति चेत् । न वै कश्चिदतीन्द्रियोपाधिः प्रमाणसिद्धोऽस्ति, यस्याभावे प्रमाणमन्वेषणीयम् । केवलं साहचर्ये निबन्धनान्तरमात्रं शङ्क्यते ततः शङ्कैव फलतः स्वरूपतश्च निवर्त्तनीया । तत्र फलमस्याविपक्षस्यापि जिज्ञासा तर्कादाहत्य निवर्त्तते । ततोऽनुमानप्रवृत्तौ शङ्कास्वरूपमपीति सर्वं सुस्थम् । न चैतदनागमं, न्यायाङ्गतया तर्कं व्युत्पादयतः सूत्रकारस्याभिमतत्वात् । अन्यथा तद्व्युत्पादनवैयर्थ्यात् ॥**

नन्विति ॥ न चानादिसिद्धव्याप्तिका एव केचित्तर्का इति वाच्यम् । तत्रापि प्रमाणानुयोगेऽनुमान एव पर्यवसानेऽनवस्थापत्तेरिति भावः । तर्कमूलव्याप्तिग्रहो न तर्कान्तरात् किन्त्वन्यथैवेत्याह ॥ शङ्काया इति ॥ तदेव स्पष्टयति ॥ तदेव हीति ॥ धूमो यदि वह्न्यसमवहितसामग्र्यजन्यत्वे तत्समवहितसामग्र्यजन्यः स्यान्नोत्पन्नः स्यादित्यत्र तर्के प्रवृत्ते किमवह्नेरेव धूमः स्यादिति शङ्का, कचिद्वह्निं विना-

ऽपि स्यादिति वा, अकारणत एवोत्पद्यते इति वा ?। सर्वत्र स्वक्रियाव्याघातः। यदि ह्यन्वयव्यतिरेकावधृतकारणभावं कारणं विना कार्योत्पत्तिं शङ्केत, तदा नियमेन धूमार्थं वह्नेस्तृप्त्यर्थमन्नस्य परप्रतिपत्त्यर्थं शब्दस्योपादानं न कुर्यात्। तैर्विनाऽपि तेषां सम्भवात्। तस्मात् तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्। न ह्यस्ति सम्भवो धूमाद्यर्थं वह्न्यादिकमुपादत्ते तत्कारणं तन्नेत्याशङ्कते चेत्यर्थः। अतश्च–

व्याघातो यदि शङ्काऽस्ति न चेच्छङ्का ततस्तराम्।

व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः, इति खण्डनमपास्तम्। व्याघातस्य शङ्काऽनाश्रितत्वात्। स्वक्रियाया एव शङ्काप्रतिबन्धकत्वात्। एतेन व्याघातो विरोधः, स च सहानवस्थाननियमो, नियमश्च व्याप्तिरिति तत्राप्यनवस्थेत्यपि निरस्तम्॥

नन्वेवं तर्कं विनाऽपि व्याप्तिग्रहाद्व्यभिचारेण तर्कोऽपि न व्याप्तिग्राहकः। अत्रास्मत्पितृचरणाः। तर्को न व्याप्तिग्राहकः, किन्तु व्यभिचारज्ञानाभावसहकृतं सहचारदर्शनम्। ज्ञानञ्च निश्चयः शङ्का च। शङ्का क्वचिदुपाधिसन्देहात्, क्वचिद् विशेषादर्शनसचिवसाधारणधर्मदर्शनात्। तदभावश्च क्वचिद्विपक्षबाधकतर्कात्, क्वचित् स्वतःसिद्ध एवेति नानुगमः। ननु सहचारदर्शनव्यभिचारादर्शनवद् व्यभिचारज्ञानाभावानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततो व्याप्तिनिश्चयः स्यात्। न। तयोः स्वरूपसतोरेव व्याप्तिग्राहकत्वात्। सत्तर्काद्व्याप्तिप्रमा, तदाभासात्तदप्रमा। विशेषदर्शनसत्यत्वासत्यत्वाभ्यां तादृशपुरुषज्ञानवत्। इयञ्च प्रत्यक्षेण व्याप्तिग्रहे सामग्री। तदभावेऽपि शब्दानुमानाभ्यां व्याप्तिग्रहादिति। शङ्काऽपि हेतुमती, न वा ?। आद्ये हेतुं विना न स्यादेव। द्वितीये देशादिनियमहेतोरभावात् सर्वासत्यत्वप्रसङ्ग इत्याह ॥तथा सतीति॥ नन्वतीन्द्रियोपाध्यभावनिश्चयोऽशक्यः। योग्योपाधेर्योग्यानुपलब्धेरभावनिश्चयेऽप्ययोग्योपाधिव्यतिरेकस्य अनुमानाधीनज्ञानत्वेनानवस्थापातादित्याह ॥ तथापीति ॥ उपाधिर्निश्चितः, शङ्कितो वा ?। आद्ये, न वै कश्चिदिति। शङ्काऽपि– भविष्यति कश्चिदत्रोपाधिरित्यात्मिका, सकललोकयात्राविलोपकतया नाद्रियत एवेति। साध्यव्यापकतया निश्चितमिदं साधनाव्यापकं स्यादिति शङ्का स्यात्तत्राह ॥ केवलमिति ॥ साधने साध्यसम्बन्धितावच्छेदकान्तरमित्यर्थः ॥

अथ व्याप्तिविशिष्टपक्षधर्मताज्ञानमनुमितिजनकम्, तत्र का व्याप्तिर्यत्र तर्कोपयोगः। न तावत् स्वाभाविकत्वम्। स्वभावजन्यत्वस्याव्याप्तेः, स्वभावाश्रितत्वस्य चातिव्याप्तेः। नापि विशिष्टवैशिष्ट्यं, रासभादिविशिष्टेऽपि वह्निवैशिष्ट्यात्। नापि निमित्तनैमित्तिकत्वं, रूपरसयोरभावात्। निमित्तत्वस्य नियमघटितत्वाच्च। नाऽपि कार्त्स्न्येन सम्बन्धः। एकव्यक्तिकाव्याप्तेः। नानाव्यक्तिकेऽपि धूमादौ सकलधूमसम्बन्धस्य प्रत्येकं वह्नावसम्भवात्। अत एव, न कृत्स्नेन साध्येन सम्बन्धः। नापि यावत्साधनाश्रयाश्रितसम्बन्धः। साधनाश्रये महानसादौ सकले प्रत्येकवह्नेराश्रितत्वाभावात्। नाप्यविनाभावः। केवलान्वयिनि अव्याप्तेः। नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यम्। यावद्धर्मसामानाधिकरण्यं हि यावद्धर्माधिकरणाधिकरणत्वम्। तच्चाप्रसिद्धम्। साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः। नाप्यव्यभिचारित्वम्। तद्धि न साध्यात्यन्ताभाववदवृत्तित्वं, साध्यवदन्योन्याभाववदवृत्तित्वं वा। केवलान्वयिन्यव्याप्तेः। नापि साध्यवैयधिकरण्यानधिकरणत्वं, साध्यासामानाधिकरण्याऽनधिकरणत्वं वा। तदुभयमपि साध्यानधिकरणानधिकरणत्वम्। तच्च केवलान्वयिन्यसम्भवि। यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमादौ चासिद्धम्। नापि व्यापकसामानाधिकरण्यं, व्याप्तिनिरूप्यत्वात्। नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यम्। पर्वतीयाग्नेर्महानसधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्। न च धूमवन्निष्ठात्यन्ताभावप्रतियोगि न वह्निसामान्यमिति वाच्यम्। न हि विशेषाभावादन्यः सामान्यावच्छिन्नप्रतियोगिकाभावः। विशेषाभावसमूहादेव तद्व्यवहारोपपत्तेस्तत्र मानाभावात्। अव्याप्यवृत्तिसंयोगादेर्द्रव्यत्वाद्यव्याप्यतापत्तेश्च। न च प्रतियोगिविरोधित्वमभावविशेषणम्। संयोगे साध्ये सत्त्वादेरनैकान्तिकत्वाभावप्रसङ्गात्। न हि प्रतियोगिविरोधी संयोगादेरस्त्यन्योऽभावः। अधिकरणभेदेनाभावभेदाभावात्। एतेन प्रतियोगिसमानाधिकरणात्यन्ताभावेतरत्वेनाऽपि विशेषणं परास्तम्। वह्नेर्धूमवन्निष्ठात्यन्ताभावप्रतियोगित्वात्॥

अथ साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वम्। न च द्रव्यत्ववन्निष्ठान्योऽन्याभावप्रतियोगि संयोगवत्, द्रव्यं न संयोगव-

दित्यप्रतीतेरितिचेत् । न । मूले वृक्षः कपिसंयोगवान्नेत्यबाधितानुभवादवच्छेदभेदेन संयोगवदन्योन्याभावस्याव्याप्यवृत्तित्वात् । न चैवं भेदाभेदापातः । ईदृशस्यावच्छेदकं भेदमादाय तदुपगमात् । वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च । न च सामान्यावच्छिन्नप्रतियोगिकोऽन्योन्याभावः, प्रमाणाभावादित्युक्तम् । किञ्च, साधनवन्निष्ठान्योन्याभावाप्रतियोगि साध्यवद् यस्येत्यत्र षष्ठ्यर्थो न व्याप्यव्यापकभावः । तस्यानिरूपणात् । नान्योऽतिव्याप्तेः । साध्यञ्च यदि सिद्धिकर्म विवक्षितं, तदा पर्वतवह्निधूमयोरेव व्याप्तिः । व्यापकञ्चेत्तदाऽन्योन्याश्रयः । नापि साधनसमानाऽधिकरणयावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसाध्यसामानाधिकरण्यम् । साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याऽप्रसिद्धेः । नाप्यनौपाधिकः सम्बन्धो व्याप्तिः । तथाहि । उपाधिः साधनाव्यापकत्वे सति साध्यव्यापको वाच्यः । तत्र यद्यपि व्यापकत्वं न व्याप्तिनिरूपकत्वमात्माश्रयत्वात् , किन्तुतद्वन्निष्ठात्यन्ताभाव प्रतियोगित्वम । प्रतियोगित्वमपि नविरोधित्वं सहानवस्थाननियमलक्षणम् । गोत्वाश्वत्वयोरतिव्याप्तेः । अन्योऽन्याभावप्रतियोगित्वऽव्याप्तेश्च।किन्त्वभावविरहात्मत्वम् । तथापि यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो धूमादावसिद्धः । प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मश्च सिद्ध्यसिद्धिभ्यां निषेद्धुमशक्यः। यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं, यावत्साधनाव्यापके घटत्वादौ साध्यव्यापकत्वं निषिध्यते इतिचेत् । न । व्यधिकरणत्वात् । यावत्साध्यव्यापकव्याप्यत्वमनौपाधिकत्वमितिचेत् । न । आत्माश्रयात् । एतेन, यावत्साधनाव्यापकमव्यापकं यस्य, यावत्साध्यव्यापकं व्यापकं वा यस्य, तत्त्वमनौपाधिकत्वमित्यप्यपास्तम् ॥

अथ यावत्साधनसमानाधिकरणात्यन्ताभावप्रतियोगिधर्मप्रतियोगिकात्यन्ताभावसमानाधिकरणसाध्यसामानाधिकरण्यमनौपाधिकत्वम् । न ह्येवं सोपाधिः, साधनसमानाधिकरणात्यन्ताभावप्रतियोगिन उपाधेरार्द्रेन्धनवत्त्वादेर्योऽत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात् । आर्द्रेन्धनविरहिणि धूमस्यावृत्तेरितिचेत् । न । सोपाधौ गतत्वात् । तथाहि । वह्निः साधनं, तत्समानाधिकरणो योऽत्यन्ताभावस्तप्तायःपिण्डे, तत्प्रतियोगि चत्वर-

वत्त्यार्द्रेन्धनं,तत्प्रतियोगिको योऽत्यन्ताभावो महानसे,तत्समानाधिकरणः साध्यो धूमस्तेन सामानाधिकरण्यं वह्नेः साधनस्य । तथाऽप्यार्द्रेन्धनसामान्याभाववति धूमो न वर्त्तते इतिचेत् । न । सामान्यावच्छिन्नाभावस्यामानकत्वात् ॥
नापि यावत्साधनव्यभिचारितव्यभिचारि यत् साध्यं तेन सामानाधिकरण्यं व्याप्तिः । अनेकव्यक्तिकोपाधिमति प्रसङ्गतादवस्थ्यात् ॥

अथ केवलाऽन्वयिनि केवलाऽन्वयिसाध्यसामानाधिकरण्यं व्याप्तिः, साध्यवदन्यावृत्तित्वं व्यतिरेकिणि । एतयोरनुमितिविशेषे प्रयोजकत्वम् । अनुमितिमात्रे पक्षधर्मतैव प्रयोजिका । न च तन्मात्रादनुमित्यापत्तिः । विशेषसामग्रीसहिताया एव सामान्यसामग्र्या जनकत्वनियमादितिचेत् । न । धूमे साध्यवदन्यावृत्तित्वस्याभावात् । वह्निमत्पर्वतादन्यत्र महानसे धूमस्य वृत्तेः । सकलसाध्यवदन्यवृत्तित्वं न धूमे इतिचेत् । न । वह्निमतां प्रत्येकं सकलसाध्यवदन्यत्वात् ॥

अथ सम्बन्धमात्रं व्याप्तिः । व्यभिचारिणोऽपि सम्बन्धस्य केनचित् सह व्याप्तित्वात् । वह्निधूमादिव्याप्तिस्तु विशिष्यैव वक्तव्येतिचेत् । न । अनुमितिकारणलिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे सम्बन्धमात्राभिधानस्यार्थान्तरत्वात् । तज्ज्ञानादनुमित्यनुत्पत्तेः । नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदं, सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात् ॥

अत्रोच्यते ॥ यत्सम्बन्धितावच्छेदकावच्छिन्नत्वं यस्य, तस्य सा व्याप्तिः । तथाहि । धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकं, धूममात्रस्य वह्निसम्बन्धित्वात्।वह्नेस्तु धूमसम्बन्धित्वे न वह्नित्वमवच्छेदकं,धूमासम्बन्धिनि गतत्वात् । न ह्यतिप्रसक्तमवच्छेदकम् । संयोगादौ तथात्वादर्शनात् । किन्तु वह्न्यावार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं, तादृशश्च व्याप्यमेव । यद्वा, यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यद्यस्य रूपं, तदेव तस्य व्याप्यत्वम् । वह्निसामानाधिकरण्यं च धूमे धूमत्वेनावच्छिद्यते, सोपाधौ तूपाधिना । यद्वा। प्रतियोगिवैयधिकरण्यावच्छिन्नस्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नेन सामानाधिकरण्यं व्याप्तिः । न च धूमवन्निष्ठात्यन्ताभावप्रतियोगिता वह्नित्वेनावच्छिद्यते, धूमवति वह्निर्नास्तीत्यप्रतीतेः । रासभत्वन्तु तथा, धूमवति रासभो नास्तीति

प्रतीतेः । सामान्यावच्छिन्नप्रतियोगिकाभावश्चान्यः, विशेषाभावप्रमायामपि सामान्ये संशयात्। न चैवं संयोगित्वव्याप्यत्वं सत्त्वस्य स्यात्, कर्मणि संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यात्। एतदेवानौपाधिकत्वमित्युच्यते इति सङ्क्षेपः ॥

भूयोदर्शनाविप्लवे कोऽयमप्रयोजको नामेत्यत्रोत्तरमाह—

तदयं संक्षेपः। यत्रानुकूलतर्को नास्ति सोऽप्रयोजकः। स च द्विविधः, शङ्कितोपाधिर्निश्चितोपाधिश्च। यत्रेदमुच्यते—

यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते।
विपक्षस्य कुतस्तावद् हेतोर्गमनिकाबलम् ॥

तत्रोपाधिस्तु, साधनाव्यापकत्वे सति साध्यव्यापकः। तद्धर्मभूता हि व्याप्तिर्जवाकुसुमरक्ततेव स्फटिके साधनाभिमते चकास्तीत्युपाधिरसावुच्यते इति ॥

तदिदमाहुः—

अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशाऽवधारणा, इति ॥

तदनेन विपक्षदण्डभूतेन तर्केण सनाथे भूयोदर्शने, कार्यं वा कारणं वा ततोऽन्यद्वा समवायि वा संयोगि वा अन्यथा वा भावो वाऽभावो वा सविशेषणं वा निर्विशेषणं वा लिङ्गमिति निःशङ्कमवधारणीयम्। अन्यथा तदाभास इति रहस्यम् ॥

तदयमिति ॥ अनुकूलत्वञ्च तर्कस्य व्याप्तिग्राहकत्वं, व्यभिचारशङ्कानिवर्त्तनद्वारेत्युक्तम्। सोऽयमप्रयोजकः शङ्कितोपाधिः, साधनाऽव्यापकत्वेन साध्यव्यापकत्वेनोभयथा वा सन्दिग्धः। यथा, मित्रातनयत्वेन श्यामत्वे साध्ये शाकपाकजत्वम्। यथा,तुल्ययोगक्षेमत्वेन

उपाधेः साध्यव्यापकतया सन्देहे ईश्वरानुमाने शरीरजन्यत्वादि । यथा, मित्रातनयत्वे शाकपाकजत्वस्य साध्यव्यापकतासन्देह इति क्रमेणोदाहरणम् । न चोपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति वाच्यम् । व्यभिचारशङ्काऽऽधायकत्वेन सन्दिग्धानैकान्तिकस्यैव दूषकत्वात् । अत्रैव वृद्धसम्मतिमाह ॥ यत्रेति ॥ विपक्षस्याव्यतिरेकित्वं यावच्छङ्क्यते, तावन्न हेतुर्गमक इत्यर्थः । उपाधिसन्देहस्य च ज्ञायमानत्वेनानुमितिप्रतिबन्धकत्वाभावान्न हेत्वाभासान्तरत्वं, स्वरूपसति सन्देहे कारणाभावादेवानुमित्यनुत्पत्तेरिति भावः ॥साधनाव्यापकत्व इति॥ साधनत्वाभिमताव्यापकत्वे साध्यत्वाभिमतव्यापक इत्यर्थः । व्यापकत्वञ्च तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वमिति न व्यापकादिज्ञानेऽन्योन्याऽऽश्रयः ॥

ननु साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिः । न च तयोरनुपाधित्वं, दूषकताबीजसाम्यात् । बाधानुन्नीतपक्षेतरेऽतिव्याप्तिश्च । अथ प्रयोजको धर्म उपाधिः । तत्त्वञ्च न न्यूनाधिकदेशवृत्तेः । तस्मिन् सत्यप्यभवतस्तेन विनाऽपि भवतश्च तदप्रयोज्यत्वात् । पक्षेतरत्वन्तु न तथेतिचेत् । न । दूषणौपयिकप्रयोजकत्वस्य साध्यव्यापकसाधनाव्यापकत्वस्य तत्राप्यनपायात् । साध्यव्याप्यत्वस्य चादूषकत्वात् । व्यर्थविशेषणत्वादनुपाधिरितिचेत् । न । तद्धि न निष्प्रयोजनकत्वं, साधनव्याप्तिपरिहारस्यैव प्रयोजनत्वात् । नापि व्यभिचारावारकत्वम् । पक्षे स्वसिद्धस्य व्यभिचारस्य वारणात् । तादृशस्याप्यस्मदादिपदादेरुपादानात् । नापि पर्वतेतरान्यत्वादेरित्यत्र व्यतिरेके इतरान्यत्वस्याप्रसिद्धेरसिद्धिवारणार्थं पर्वतपदं विशेषणमित्येव व्यर्थत्वम् । इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्त्यऽग्रहात् । येन विशेषणेन विना व्याप्त्यग्रहस्तस्यैव सार्थकत्वात् । व्यभिचारवारकस्यापि सार्थकत्वे तस्यैव तन्त्रत्वात् । अत एव गन्धादिषु मध्ये गन्धस्यैव व्यञ्जकत्वादित्यत्राऽसिद्धिवारकविशेषणस्य सार्थकत्वम् । अन्यथा बाधोन्नीतपक्षेतरत्वस्याप्यनुपाधित्वापत्तेः । पक्षे साध्यसन्देहे साध्यव्यापकत्वानिश्चयान्न तदुपाधिः । यत्र तु पक्षे साध्याभावप्रमा, तत्र बाधोन्नीतत्वेनोपाधिरेवेतिचेन्न । पक्षाऽतिरिक्ते साध्यव्यापकत्वग्रहादेवोपाधेर्दूषकत्वात् । अन्यथा, पक्षे

साध्यसन्देहादुपाधिमात्रोच्छेदापत्तेः । विपक्षाव्यावर्त्तकविशेषणशून्येति विशेषणाच्च तदुपाधिः । बाधोन्नीतपक्षेतरत्वं चोपाधिः। तत्र पक्षाभिमतस्य विपक्षत्वादिति चेत् । न। वस्तुनो विपक्षाऽव्यावर्त्तकविशेषणशून्यत्वाभावात् । सर्वत्र प्रमेयत्वादेः सत्त्वात्। तत्रोपात्तत्वेन विशेषणे च व्याघातः। न हि तत्रोपात्तं तेन शून्यं चेति सम्भवति ॥

तथापि साध्यव्यापकत्वे सति साधनाव्यापकत्वस्य पक्षेतरत्वे सत्त्वात् तद्व्यावृत्त्या साध्यव्यावृत्तिरावश्यकीति हेतोर्व्यभिचारात्तत्र चावश्यमुपाधिसत्त्वादन्यस्योपाधेरभावात् पक्षेतरत्वमेवोपाधिः स्यात्। किञ्च, व्यभिचारावारकत्वं न व्याप्तिविरोधि, नाऽपि तज्ज्ञानविरोधि। नीलधूमे तदुभयसत्त्वात् ॥

अथोपाधेः स्वव्यतिरेकेण सत्प्रतिपक्षतया दूषकत्वम्। तथाहि। नास्य व्यभिचारोन्नायकतया दूषकत्वम्। वह्निमत्त्वं धूमवत्त्वव्यभिचारि तद्व्यापकार्द्रेन्धनव्यभिचारित्वात्प्रमेयत्ववदित्यत्रार्द्रेन्धनवत्त्वस्य धूमवत्त्वव्यापकत्वासिद्धेः। धूमवत्त्वव्यापकवह्निमत्त्वाव्यापकत्वात्। व्यापकत्वे वा साधनव्यापकत्वेनानुपाधित्वापत्तेः। न च धूमव्याप्यत्वं वह्निमत्त्वस्यासिद्धम्। तद्धि न व्यभिचारात्, स्फुटे व्यभिचारे उपाध्युपन्यासस्यानर्हत्वात्। तस्य तदर्थत्वात्। नाप्युपाधिनिश्चयात्। उपाधित्वासिद्धेः ॥

अथ यथा सहचारदर्शनव्यभिचारादर्शनाभ्यां वह्निमत्त्वं व्याप्यं धूमवत्त्वञ्च व्यापकं, तथा आर्द्रेन्धनवत्त्वमपि व्यापकं, धूमवत्त्वञ्च व्याप्यम्। तथाच व्यापकनिवृत्त्या व्याप्यनिवृत्तिवद् व्याप्यसत्त्वाद् व्यापकसत्त्वमावश्यकमित्यविशेषादुभयमप्यसाधकमित्युच्यते। हंत तर्हि सिद्धमुपाधेः सत्प्रतिपक्षतया दूषकत्वम् ॥

नापि व्याप्यत्वासिद्धिरूपत्वेन। सा हि न तावद्व्याप्तिभङ्गनिश्चयात्, तस्योपाधित्वनिश्चयसाध्यत्वात्। प्रकृते च तदनिश्चयात्। सहचारदर्शनव्यभिचारादर्शनाभ्यां तन्निश्चय इतिचेत्। न। तयोर्हेतावपि सत्त्वात्। तत्रोत्पन्नमपि व्याप्तिज्ञानमुपाधिदर्शनाद्बाध्यते इति चेत्। न। उपाधावपि तद्भङ्गापत्तेः। तत्राप्युपाधिसद्भावात्। तथा ह्यार्द्रेन्धनवत्त्वस्य धूमवत्त्व उपाधित्वे तदभावो धूमवत्त्वाभावव्याप्तो वाच्यः। अन्यथा आर्द्रेन्धनस्यापि धूमवत्त्वव्यापकत्वानुपप-

त्तेः । न हि यदभावो यदभावव्यभिचारी तत्तस्य व्यापकम् । एवं व्यतिरेके निर्वह्नित्वमुपाधिः । इदं हि निर्धूमस्य व्यापकतयाऽभिमतस्य व्यापकं, निर्धूमस्य वह्निमतोऽदर्शनात् । दर्शने वा व्यभिचारस्य स्फुटतयोपाध्युपन्यासस्यानर्हत्वादित्युक्तम् । आर्द्रेन्धनविरहस्य चाऽव्यापकं, आर्द्रेन्धनाभाववति पक्षे तदसत्त्वात् । नापि व्याप्त्यनिश्चयाद्व्याप्यत्वासिद्धिः । व्याप्त्यनिश्चयो हि पक्षे वह्निमत्त्वस्यार्द्रेन्धनविरहस्य च दर्शनात् । एवञ्च, धूमवत्त्वनिर्धूमवत्त्वाप्रसक्तौ । वस्तुनो विरुद्धद्वैरूप्याभावादेकत्र व्याप्तिभङ्गो वाच्यः । स च विनिगमकाभावादेकत्र निश्चेतुं न शक्यते इति वाच्यम् । इयं च सत्प्रतिपक्षतैव। तस्मादुपाधेः सत्प्रतिपक्षभावेन दूषकत्वस्थितौ पक्षेतरत्वस्य नोपाधित्वम् । तद्व्यतिरेकस्य साधारणतया साध्याभावासाधकत्वादिति॥

मैवम् । तथा सति प्रतिपक्षानुमाने सत्प्रतिपक्षान्तरस्योपाधेरनुद्भावनापत्तेः । न च, सत्प्रतिपक्षान्तरमपि तत्रोद्भाव्यम् । उत्तम्भकाऽप्रतिबद्धस्य मन्त्रस्येवाप्रतिबद्धस्यैव प्रतिबन्धकत्वादिति वाच्यम् । सर्वत्र स्थापनाया अपि प्रतिबद्धत्वेनाप्रतिबन्धकत्वप्रसङ्गात् । न च प्रतिपक्षबाहुल्येनाधिकबलत्वार्थमुद्भावनम् । बलं ह्यत्रानुमित्यौपयिकं व्याप्तिपक्षधर्मताऽऽत्मकं विवक्षितम् । तच्च तुल्यमेव । न तु भूयस्त्वमपि तथा । एकस्मादनुमित्यनुदयापत्तेः । तदाहुराचार्याः– बहवश्चेन्यन्वाचये चकारः, इति । सन्दिग्धोपाधेरदूषकत्वापाताच्च । तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात् । केवलव्यतिरेकिणा च सत्प्रतिपक्षसम्भवाच्च । न चासाधारण्यम् । तस्यापि सत्प्रतिपक्षोत्थापकतया दूषकत्वात् । किञ्चैवं, बाधोन्नीतपक्षेतरत्वमपि नोपाधिः स्यात् । व्यतिरेकेऽसाधारणत्वात् केवलान्वयिन्यसाधारणत्वाभावात् पक्षेतरत्वस्योपाधितापत्तिश्च । अपि चैवमन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वात् त्र्यणुकवदित्यत्राश्रावणत्वमुपाधिर्न स्यात् । तद्व्यतिरेकस्य पक्षावृत्तित्वात् । न च नायमुपाधिः, तल्लक्षणसत्त्वात् । पर्वतावयववृत्त्यन्यत्वादिकञ्चैवमप्युपाधिः स्यादेव । तद्व्यतिरेकस्यासाधारणत्वाभावात्।यत्तु, पक्षेतरत्वस्य ग्राहकसाम्यात् साध्यव्यापकत्ववत् साध्याभावव्यापकत्वात्तन्निवृत्त्या साध्यसाध्याभावाभ्यां निवर्तितव्यम् । न चैवमिति तस्य साध्यव्यापकत्वे सन्देह इति । तन्न । तथापि साध्यव्यापकतापक्षमाश्रित्योपाधित्वापत्तेः ॥

अथ साध्यसमव्याप्तत्वे सति साधनाव्यापक उपाधिरिति पक्षे-तत्त्वं नोपाधिः । युक्तश्चैतत् । यद्धर्मोऽन्यत्र भासते तस्यैव जपापुष्पस्येवोपाधित्वात् । उपाधिवृत्ति हि साध्यव्याप्यत्वं साधनाभिमते भासते इति तथैवोपाधिपदप्रवृत्तिः । साध्यव्याप्यत्वमात्रञ्च न दूषकमिति तस्य साध्यव्यापकत्वमपीष्यते । मैवम् । दूषकताबीजस्य विषमव्याप्तेऽपि सत्त्वात् । दूषकतायां साध्यव्याप्यत्वस्य व्यर्थत्वात् । दूषणान्तरसंकीर्णस्य चानुपाधित्वे समव्याप्तस्यापि तत्त्वापत्तेः ॥

अथोपाधिः स उच्यते, यदभावो व्यभिचारविरोधी । न च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि । यत्र हि व्यभिचारस्तत्र समव्याप्तमन्ततः साध्यमप्युपाधिर्भवत्येव, स्वस्य स्वव्यापकत्वे सति व्याप्यत्वात् । साधनाव्यापकत्वाच्च । विषमव्याप्तिके तु साध्यव्यापको यो धर्मस्तद्व्याप्यत्वमात्रेण तद्व्याप्यत्वम । दृष्टं ह्यनित्यत्वस्य व्यापकं प्रमेयत्वं तद्व्याप्यश्च गुणत्वम् । न च गुणत्वानित्यत्वयोर्मिथोव्याप्तिः । समव्याप्तिके च तद्व्यापकव्याप्येन व्याप्तश्च तद्व्यभिचारि चेति व्याहतम् ॥

मैवम् । तथापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वमात्रं प्रयोजकं, लाघवाद्, न तु साध्यव्यापकव्याप्यत्वमपि व्यभिचारस्थलस्य त्वयैवोक्तत्वात् । न च साध्यव्याप्यव्याप्यत्वमेवानोपाधिकत्वं, साध्यव्याप्यमित्यत्रापि ह्यनौपाधिकत्वं तदेव वाच्यं, तथा चानवस्थेति । व्यभिचारव्यावर्त्तनार्थमनौपाधित्वलक्षणे यावदिति पदं साध्यव्यापकत्वे विशेषणं प्रक्षिप्तमेव । यदि च यद्व्यतिरेकेऽनुमितिर्भवत्येव तद्दूषणं, तदा विरुद्धत्वादेरप्यदूषणत्वमिति यस्मिन् सत्यनुमितिर्न भवति तदेव दूषणमिति विषमव्याप्तोऽप्युपाधिः ॥

अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । तेन मित्रातनयत्वेन श्यामत्वे ध्वंसस्य च जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं शाकपाकजत्वं भावत्वं चोपाधिः । काकादौ प्रागभावे च केवलसाध्याव्यापकत्वादिति । तन्न । सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वादित्यर्थे साधनावच्छिन्नेत्यस्य वैयर्थ्यापत्तेः । जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नप्रमेयत्वव्यापकस्य पृथिवीत्वस्योपाधित्वप्रसङ्गात् । पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेश्च । किञ्च,

विशिष्टसाध्यव्यभिचारं प्रसाध्य केवलसाध्यव्यभिचारः साध्यः तत्र चाऽर्थान्तरम्। केवले साध्ये हि विप्रतिपत्तिर्न तु विशिष्टे।प्रकृत-साध्य व्यभिचारसिद्ध्यर्थं विशिष्टव्यभिचारः साध्यवति इति चेन्न। अप्राप्तकालत्वात् । प्रथमं साध्यव्यभिचार एवोद्भाव्यस्तत्रासिद्धौ पश्चात्तन्निर्वाहार्थमुपाधिर्वाच्य इतिचेत् । न । एवं सति प्रकृतानुमाने उपाधेरदूषणत्वापत्तेः । अत एव पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिरित्यपास्तम् । आर्द्रेन्धनवत्त्वादौ नियनताहशधर्माभावेनाव्याप्तेश्च । शब्दोऽभिधेयः प्रमेयत्वादित्यत्र शब्द-धर्म्मगुणत्वावच्छिन्नाभिधेयत्वव्यापकस्याश्रावणत्वस्योपाधित्वापा-ताच्च ।नापि पक्षावृत्तित्वे साध्यव्यापकत्वमुपाधित्वम् । शब्दो-ऽनित्यः गुणत्वादित्यत्र कृतकत्वस्य शब्दवृत्तेरनुपाधित्वापातात् । न च स्फुटे व्यभिचारे निष्फलमुपाध्यनुसरणमिति वाच्यम्। व्यभि-चारेऽवश्यमुपाधिसत्त्वात् । अन्यथैकत्र साधने साध्यतदभावसम्ब-न्धस्यावच्छेदभेदं विनाऽनुपपत्तेः ॥

अथ पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। पर्यवसितं च साध्यं पक्षधर्मतावललभ्यम् । यथा शब्दोऽनित्य-त्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान् प्रमेयत्वादित्यत्र यथोक्तसाध्या-व्यापकत्वेऽपि पक्षधर्मताबललभ्यस्यानित्यत्वस्य साध्यस्य व्यापकं कृतकत्वमुपाधिः। कृतकत्वे चैवं साध्यमानेऽनित्यत्वमुपाधिः। तन्न। पक्षधर्मताबललभ्यसाध्यसिद्धौ हि निष्फल उपाधिः, तदसिद्धौ च कस्य व्यापकः ? । न हि सोपाधौ पक्षधर्मताबलात् साध्यं सिद्ध्यति, यद्व्यापक उपाधिः स्यात् । द्व्यणुकस्य सावयवत्वे सिद्धे, द्व्यणुकं द्रव्य-समवेतं जन्यमहत्त्वानाधारद्रव्यत्वादित्यत्र निःस्पर्शद्रव्यसमवेतत्वं चोपाधिः स्यात् । नित्यद्रव्यसमवेतत्वस्य पर्यवसितस्य साध्यस्य व्यापकत्वात् । साधनाव्यापकत्वाच्च ॥

अथ साध्यसाधनसम्बन्धव्यापकत्वे सति साधनाव्यापक उपा-धिः, तेन ध्वंसस्य जन्यत्वेनानित्यत्वे साध्ये यद्यपि भावत्वं प्रागभावे साध्याव्यापकं तथापि जन्यत्वे सति यदनित्यत्वं तद्व्यापकत्वादुपा-धिरिति । न । इदमसाधकं साध्यसाधनसम्बन्धव्यभिचारित्वादि-त्यत्र साध्यव्यभिचारित्वादित्यस्यैव गमकत्वे शेषवैयर्थ्यापत्तेः। सम्बन्धव्यभिचारानुमानेऽर्थान्तरत्वापत्तेश्च।यद्विशिष्टे साधने साध्य-

सामानाधिकरण्यं स उपाधिरितिचेन्न । रासभादीनामप्युपाधित्वापत्तेः । तद्विशिष्टेऽपि साधने साध्यसम्बन्धात् । यद्विशिष्ट एवेतिचेत् । न । प्रमेयत्वादेरप्युपाधित्वापत्तेः । यद्विशिष्टे साधने साध्यसामानाधिकरण्यमस्त्येवेतिचेत् । न । गुरुत्वेन रसवत्त्वे साध्ये गन्धवत्त्वादेः साध्याव्यापकस्याप्युपाधित्वापत्तेः ॥

अथोपाधिमात्रस्य व्यतिरेकिधर्मत्वं, कचिद्‍व्याघोऽप्यनस्य पक्षेतरत्वस्याप्युपाधित्वात् । तत्तदुपाधेश्च तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वं, वह्निधूमोपाधेस्तु न लक्षणं, लक्ष्याभावात् । न च पर्वतेतरत्वं वह्निधूमसम्बन्धोपाधिः स्यात् । आपाद्याप्रसिद्धेः । न च पक्षेतरत्वं वह्निव्यापकं कुतो न भवतीति वाच्यम् । एतस्योपाधिलक्षणप्रस्तावे अर्थान्तरत्वादिति मतम् । तन्न । अनुमितिप्रतिबन्धकज्ञानविषयत्वावच्छेदकमुपाधित्वमिह निरूपयितुमुपक्रान्तम् , अन्यस्याप्रयोजकत्वात् । तच्च न व्यतिरेकिधर्मत्वम् । अतिप्रसङ्गात् । किन्तु साधनाव्यापकत्वे सति साध्यव्यापकत्वम् । तच्च पक्षेतरेऽतिव्याप्तमेवेत्युक्तम् ॥

अत्राहुः । यद्व्यावृत्त्या यस्य साधनस्य साध्यं पक्षे व्यावर्त्तते, स धर्मस्तत्र हेतावुपाधिः । स च धर्मः कतमो भवति, यस्य व्यावृत्तिः साध्यसाधनसम्बन्धविरोधिनी । यथाऽऽर्द्रेन्धनवत्त्वं वह्निमत्त्वे । व्यावर्तते हि तद्व्यावृत्त्या धूमवत्त्वं तप्तायःपिण्डे । व्यावर्त्तते च भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वसम्बन्धः. शाकपाकजत्वव्यावृत्त्या श्यामत्वमैत्रातनयत्वयोः सम्बन्धश्च। पक्षधर्मताबलाच्चानित्यत्वश्यामत्वाभावयोः पर्यवसानम् । तथा, वायावुद्भूतरूपवत्त्वं व्यावर्त्तमानं द्रव्यत्वे सति प्रत्यक्षत्वं निवर्त्तयत् प्रत्यक्षत्वाभावमादाय सिद्ध्यतीति सर्वत्र पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्ति । अत एव साधनावच्छिन्नादौ साधनव्यापकोऽप्युपाधिः, यत्र पक्षावृत्तिर्हेतुः । यथा, करका पृथिवी कठिनसंयोगवत्त्वादित्यत्रानुष्णाशीतस्पर्शवत्त्वमुपाधिः । न च स्वरूपासिद्धिरेव तत्र दोषः, सर्वत्रोपाधेर्दूषणान्तरसङ्करात् । एतेन बाधानुन्नीतपक्षेतरत्वस्योपाधित्वं निरस्तम् । स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्त्तकत्वात् ॥

अस्मत्पितृचरणास्तु— यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं, स उपाधिः । लक्षणं पुनः, पर्यवसितसाध्यव्यापकत्वे सति

साधनाव्यापकत्वम् । यद्धर्मावच्छेदेन साध्यं प्रसिद्धं, तदवच्छिन्नं साध्यं पर्यवसितत् । तत्रार्द्रेन्धनप्रभवत्वाद्युपाधौ महानसत्वाद्येव तादृशो धर्मः । तदवच्छेदेन साध्यस्य धूमस्य प्रसिद्धेः । पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधौ द्रव्यत्वं, साधनावच्छिन्नसाध्यव्यापकोपाधौ च साधनमेव तथा । तथाच तदवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण साधनस्य साध्यव्यभिचारः स्यादेव । व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारित्वनियमादिति ॥

साध्यव्यापकत्वसाधनाव्यापकत्वे एव दूषकताबीजम् । न च पक्षधर्मावच्छिन्नसाधनावच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण साधनस्य साध्यव्यभिचारोन्नयनेऽर्थान्तरं, विशेषणाव्यभिचारित्वेन निश्चिते साधने विशिष्टव्यभिचारस्य सिद्ध्यतो विशेष्यसाध्यव्यभिचारमादाय पर्यवसानात्, पक्षधर्मताबलात् । न च पक्षधर्मताबललभ्याऽर्थसिद्धावर्थान्तरत्वं, व्यक्तिसाधकानुमानमात्रे तदापत्तेः । भवतु वाऽर्थान्तरं, तथापि हेतुराभास एव । अर्थान्तरस्य पुरुषदोषत्वात् । हेत्वाभासान्तरस्य च तत्राभावादुपाधिरेव भावत्वादिकं दोषस्तत्रोद्भाव्यः । अपिच । यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः, स एवोपाधिः । व्यभिचारोन्नायकत्वञ्च साक्षात्परम्परया वेति नाऽर्थान्तरत्वम् । न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यादितिवाच्यम् । केवलाऽन्वयित्वग्राहकमानबाधादुपाधेर्विशिष्टाव्यापकत्वात् । न च स्वव्याघातकत्वेनानुपाधौ पक्षेतरत्वेऽतिव्याप्तिः । अनुकूलतर्काभावेन तस्य साध्यव्यापकत्वानिश्चयात् । न हि सहचारदर्शनव्यभिचारादर्शनमात्राद्व्याप्तिग्रहः । अप्रयोजकेऽपि तद्ग्रहप्रसङ्गात् । न चाप्रयोजकत्वादेव तदगमकम् । न हि व्याप्तस्य पक्षधर्मत्वेऽप्रयोजकत्वम् । सहचारदर्शनमात्रस्य संशायकत्वाच्च । न च व्यभिचारसंशयाधायकत्वेन तथापि सन्दिग्धोपाधित्वम् । स्वव्याघातकत्वेन तस्य तत्संशयानाधायकत्वात् । बाधोन्नीते च साध्यव्यापकताग्राहकानुकूलतर्कसत्त्वात् । अत एव पर्वतावयववृत्त्यन्यत्वादिकमप्युपाधित्वेन निरस्तम् । धूमवत्त्वे साध्येआर्द्रेन्धनप्रभववह्निमत्त्वस्य, बहिरिन्द्रियद्रव्यप्रत्यक्षत्वे चोद्भूतरूपवत्त्वस्य, व्यापकताग्राहकः प्रत्यक्षावधृतः, मित्रातनयत्वेन साध्ये श्यामत्वे साध्यशाकपाकजत्वस्य च वैद्यका-

ऽवधृतः कार्यकारणभावः। एवं जन्यत्वेनानित्यत्वे साध्ये भावत्वव्यापकताग्राहको घटोन्मज्जनप्रसङ्गः। एवमन्येषामपि तत्तदनुकूलतर्कात् साध्यव्यापकत्वग्रहः। यत्र च साध्योपाध्योर्हेतुसाध्ययोर्व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वम्। न च यत्र सन्दिग्धोपाधिः, तत्र तत एव हेतोरुपाधिः साध्यः। तत्रापि श्यामत्वादेरुपाधित्वात्। न चोभयमपि साध्यम्। अर्थान्तरत्वात्। केवलसाध्ये हि विप्रतिपत्तिर्न तूभयत्र। यत एवोपाधेः साध्यव्यापकत्वं तर्कान्निश्चेयमत एव तुल्ययोगक्षेमत्वाभावान्न साध्यव्याप्याव्यापकत्वेन साध्याव्यापकत्वं साधनीयमिति। व्यभिचारोन्नयनद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतयोपाधेर्दूषकत्वम्। एवं चासिद्धेरुपजीव्योऽप्युपाधिर्न हेत्वाभासान्तरम्। सिद्धसाधनवद् दूषकतायां परमुखनिरीक्षकत्वेन स्वतो दूषकत्वाभावात्। न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यस्य साध्यव्याप्यत्वज्ञाने प्रतिबन्धकमिति॥

अन्वर्थत्वमुपाधिपदस्याह॥ तद्धर्मेति॥ यद्धर्मोऽन्यत्र भासते स एवोपाधिपदवाच्यो यथा जवाकुसुमं स्फटिके। तथा यद्वृत्तिव्याप्यत्वं साधनत्वाभिमते भासते, स धर्मस्तत्र हेतावुपाधिरिति समव्याप्ते उपाधिपदं मुख्यं· विषमव्याप्ते तु साध्यव्यापकत्वादिगुणयोगाद्गौणमुपाधिपदमित्यर्थः॥ अन्ये इति॥ ये सोपाधयस्ते परप्रयुक्तानामुपाधिप्रयुक्तानां व्याप्तीनामुपजीवकाः, तैः सोपाधिभिर्हेतुभिः पक्षे निश्चितैरपि न साध्यव्यापकस्य सिद्धिरित्यर्थः। कार्य्यकारणसम्बन्धानामननुगमेऽप्यनुगमकमाह॥ तदनेनेति॥ अनौपाधिकसम्बन्धत्वमेव सर्वत्रानुगमकमित्यर्थः॥ भूयोदर्शने इति॥ अत्र न वारसङ्ख्यानियमः, किन्तु यावता दर्शनेन यस्य व्यभिचारशङ्कानिवृत्तिस्तस्य तावत्त्वं विवक्षितमिति॥

परैरपि व्यभिचारशङ्काऽपसरणेऽस्मदुक्तप्रकारोऽभ्युपेयः, अन्यथा तन्निवृत्तिर्दुर्लभा इत्याह—

**तादात्म्यतदुत्पत्त्योरप्येतदेवबीजम्। यदि कार्याऽऽत्मानौ कारणमात्मानञ्चातिपतेतां, तदा तयोस्तत्त्वं व्याहन्येत। अत एव, सामग्रीनिवेशिनश्चरम-**

कारणादपि कार्यमनुमिमते सौगता अपि । तस्माद्विपक्षबाधकमेव प्रतिबन्धलक्षणम् । तथाहि । शाकाद्याहारपरिणतिविरहिणि मित्रातनये न किञ्चिदनिष्टमिति नासौ तस्य व्यापिका । व्यापिका तु श्यामिकायाः, कारणत्वावधारणात् । कारणञ्च तत् तस्य, तदतिपत्य भवति चेति व्याहतम् । एवमन्यत्राप्यूहनीयमिति ॥

क पुनरप्रयोजकोऽन्तर्भवति ? । न क्वचिदित्येके । यथाहि, सिद्धसाधनं न बाधितविषयम्, । विषयापहाराभावात् । नापि निर्णये सति पक्षत्वातिपाताद्ऽपक्षधर्मः।कालातीतविलोपप्रसङ्गात्। नचानैकान्तिकादिः । व्यभिचाराद्यभावात् । तथाऽयमपि । सूत्रं तूपलक्षणपरमिति ॥

तदसत् । विभागस्य न्यूनाधिकसंख्याव्यवच्छेदफलत्वात् । क तर्हि द्वयोरन्तर्निवेशः । असिद्ध एव । व्याप्तस्य हि पक्षधर्मताप्रतीतिः सिद्धिः । तदभावोऽसिद्धिः । इयञ्च व्याप्तिपक्षधर्मतास्वरूपाणामन्यतमाऽप्रतीत्या भवन्ती यथासङ्ख्यमन्यथासिद्धिराश्रयासिद्धिः स्वरूपासिद्धिरित्याख्यायते । मध्यमाऽप्याश्रयस्वरूपाप्रतीत्या तद्विशेषणपक्षत्वाप्रतीत्या वेति द्वयी । तत्र चरमा सिद्धसाधनमिति व्यपदिश्यते । व्याप्तिस्थितौ पक्षत्वस्याहत्य विघटनात् । न त्वेवं बाधे, व्याप्तेरेव प्रथमं विघटनादिति विशेषः ॥

यत्त्वप्रयोजकः सन्दिग्धानैकान्तिक इत्यनैकान्तिकेऽन्तर्भाव्यते । तदसत् । व्याप्त्यसिद्ध्या हि निमि-

**तेन व्यभिचारः शङ्कनीयोऽन्यथा वा ? । प्रथमे, असिद्धिरेव दूषणमुपजीव्यत्वात् । नानैकान्तिकमुपजीवकत्वात् । अन्यथा शङ्का त्वदूषणमेव । निर्णीते तदनवकाशादिति ॥**

तादात्म्येति ॥ व्यभिचारिण्यपि कुतस्तादात्म्यतदुत्पत्ती न स्यातामिति शङ्का सुलभेत्यर्थः । यत एव विपक्षे बाधकादविनाभावग्रहो न स्वभावकार्ययोरेवात एव बधिरादेर्मुरजाभिघातादिना शब्दाद्यनुमानमित्याह ॥ अत एवेति ॥ उपसंहरति ॥ तस्मादिति ॥ प्रतिबन्धो लक्ष्यते निश्चीयतेऽनेनेति लक्षणं बोधकं विपक्षबाधकमित्यर्थः । यत्र तु तदभावः, तत्राप्रयोजके न तन्निश्चयो यथाऽत्रेत्याह ॥ तथा हीति॥ अतः शाकपाकजत्वं न साधनव्यापकमित्यर्थः । मित्रातनयत्वादिना यथोपाधिर्नानुमीयते, तथोक्तमधस्तात् । तत् किं साधनाव्यापकत्वसन्देहवत् साध्यव्यापकत्वेऽपि सन्देह एव, नेत्याह ॥ व्यापिका त्विति ॥ क्व पुनरिति ॥ पञ्चसु हेत्वाभासेष्वित्यर्थः । तत्र कस्यचिन्मतमाह ॥ न कचिदिति ॥ पञ्चभ्यो हेत्वाभासान्तरमेवेत्यर्थः ॥ विपर्येति॥प्रमितसाध्याभाववद्धर्मिकत्वाभावादित्यर्थः॥नापीति॥ साध्यनिश्चये सन्देहघटितपक्षत्वाभावादित्यर्थः ॥ कालेति ॥ साध्याभावस्य धर्मिणि प्रमायामपि तत्सन्देहाभावादपक्षधर्मत्वाद्बाधोऽप्यसिद्ध एवान्तर्भवतीत्यर्थः॥ सूत्रं त्विति ॥ सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ( न्याय० १. २. ४५ ) इति विभागोद्देशसूत्रमित्यर्थः॥ विभागस्येति॥ यद्यपि विभागसूत्रं न शब्दविधया न्यूनाधिसंख्याव्यवच्छेदं प्रत्याययति युक्तिशास्त्रत्वव्याघातादिति परीक्षैकवाक्यतया स तेन प्रत्याय्यस्तथा च परीक्षायास्तत्र तात्पर्यावश्यकत्वे विभागसूत्रस्यापि तत्र तात्पर्यकल्पने मानाभावः । तथापि परीक्षैकवाक्यतया पर्यवसित एवार्थो विभागस्य दर्शितः ॥ द्वयोरिति ॥ सिद्धसाधनाप्रयोजकयोरित्यर्थः ॥ व्याप्तस्येति ॥ ननु व्याप्तिपक्षधर्मतयोः प्रत्येकमभावो नासिद्धिरननुगमादिति प्रत्येकाभावानुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोऽसिद्धिर्वाच्या । तथाच यत्र विशिष्टाभावाज्ञाने व्याप्त्यादिप्रत्येकाभावज्ञानादनुमितिप्रतिबन्धस्तत्राव्याप्तिः । तेषां हेत्वाभासान्तरत्वापत्तिर्वा । विशिष्टा-

भावस्य दोषतायामसाधकतानुमाने व्यर्थविशेषणत्वञ्च । प्रत्येका-भावस्य समर्थत्वेनैवान्यथासिद्धेः । न च व्याप्तिपक्षधर्मताऽन्यतरा-भावोऽसिद्धिः, अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्यैव दूषकत्वेन व्यर्थ-विशेषणत्वात् ॥

यत्तु पक्षधर्मताप्रमितिविरह आश्रयासिद्ध्याद्यनुगतोऽसिद्धिः, तत्प्रमितिसत्त्वे तत्रानुमितिप्रमित्यापत्तेरिति । तदपि, व्यर्थविशेषण-त्वात् तदभावेऽपि प्रत्येकज्ञानस्यैव दोषत्वाच्च परास्तम् । किञ्च, प्रकृतसाधनस्य व्याप्तिपक्षधर्मतावैशिष्ट्यतत्प्रमित्योरप्रसिद्ध्या तद-भावो दुरवधारणः । यत्किञ्चिद्विरहश्च सदसद्धेतुसाधारणः । स्वप्र-मित्यभावो यत्किञ्चित्प्रमित्यभावो वा सद्धेतावपि । सकलतत्प्रमित्य-भावश्च दुर्निरूप. । न च प्रमितिविरहः स्वरूपसन्नेव दूषणं कारणा-भावत्वादिति वाच्यम् । हेत्वाभासस्य ज्ञायमानस्यैवानुमितिप्रतिबन्ध-कत्वात् । व्याप्त्यादिभ्रमादनुमित्यनुत्पादापत्तेश्च ॥

अथ व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धिस्तदभावोऽसिद्धिः । अत एवाव्याप्तापक्षधर्मयोरपि तदारोपरूपा सिद्धिरित्यनुमितिर्न तु तदनिश्चये व्याप्तपक्षधर्मादपि सा । न च व्याप्त्यादिप्रत्येकप्रमित्य-भाव एव दूषक आवश्यकत्वादिति वाच्यम् । विशिष्टनिश्चयस्य हेतु-त्वेन तदभावस्य कार्यानुत्पादकत्वादिति । मैवम् । तथा सति सव्य-भिचारादेरपि अत्रैवान्तर्भावापातात् । असिद्धेः स्वरूपसत्या एव दोषत्वे स्वज्ञानार्थं व्यभिचाराद्यनुपजीवनात् । यदि च तस्मात्तत्प्र-मितिर्नोत्पद्यते इति तस्योपजीव्यत्वं तदाऽऽश्रयासिद्ध्यादिज्ञानात्त-त्सिद्धिर्नेति सैव पृथग्दोषः स्यादिति ॥

अत्रास्मत्पितृचरणाः ॥ आश्रयासिद्ध्यादीनां प्रत्येकमेव दूषकत्वं, प्रत्येकज्ञानादुद्भावनाच्चानुमितिप्रतिबन्धात् । न तु विशिष्टाभावस्य, व्यर्थविशेषणत्वात् । तज्ज्ञानं विनाप्यनुमितिप्रतिबन्धात् । अनुमिति-कारणलिङ्गपरामर्शविषयाभावत्वेन अनुगतेन त्रयाणामसिद्धत्वेन संग्रहो महर्षिणा कृत इति न विभागविरोधहेत्वाभासाधिक्ये । न चैवं साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिभङ्गलिङ्गत्वेन वि-रुद्धव्यभिचारयोरपि सङ्ग्रहे विभागव्याघातः । स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात् । अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः । सव्य-भिचारादेश्च एवंरूपत्वेऽप्युपजीव्यत्वेन पार्थक्यम् । उपधेयसङ्कर-

ऽप्युपाधेरसङ्करात् ॥

इयं चेति ॥ विशिष्टाभावस्य विशेषणाद्यभावव्यापकत्वादित्यर्थः। अन्यथासिद्धिः सोपाधित्वम्। स्वरूपासिद्धिरपक्षधर्मत्वम् ॥ मध्यमाऽपीति ॥ अश्रयासिद्धेः सन्दिग्धसाध्यधर्मवद्धर्म्यप्रमितिरूपत्वाद् यत्र विशेष्यस्य धर्मिण एवाज्ञानं तत्रैकाऽऽश्रयासिद्धिरन्या च तद्विशेषणसाध्यसन्देहाभावात् सिद्धसाधनमुच्यते इत्यर्थः। न च सिद्धसाधनं न हेत्वाभासोऽनैकान्तिकवदनुमितिकरणाविघटकत्वात् सत्प्रतिपक्षवत् स्वत एवाप्रतिबन्धकत्वादिति वाच्यम्। लाघवात् कारणविघटकत्वेनैव प्रतिबन्धकतया तद्विशेषकरणत्वस्य व्यर्थत्वात्। साध्यज्ञानस्य तद्विशेषितसाध्यानुमित्यविरोधित्वेऽपि साध्यमात्रानुमितिविरोधित्वमस्त्येवेति तस्य हेत्वाभासत्वमपि। साध्यसाक्षात्कारे सति लिङ्गज्ञानेऽप्यनुमिनोमीत्यनुव्यवसायाभावात्। न च केवलान्वयिनि संशयाभावः। तत्रापि साध्यं पक्षनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयात्। पक्षविशेष्यकत्वस्य चातन्त्रत्वात् ॥

पक्षत्वस्येति ॥ सन्दिग्धसाध्यवत्त्वस्येत्यर्थः ॥ व्याप्तेर्वेति ॥ यद्यपि जलह्रदोऽग्निमान् धूमवत्त्वादित्यत्र बाधेऽपि न व्याप्तिभङ्गः। तथापि धर्मिणि यत्र साधनाभिमतस्य वृत्तिस्तदभिप्रायकोऽयं ग्रन्थः॥

ननु साध्याभाववति पक्षत्वाभिमते हेतोः सत्त्वाज्ज्ञप्तावसिद्धिः। तज्ज्ञाने च व्यभिचारः। साध्याभावप्रमितौ सन्देहाभावेन पक्षत्वाभावादाश्रयासिद्धिश्च। व्यभिचारे पक्षभिन्नत्वस्य व्यर्थत्वेनातन्त्रत्वात्। सर्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधनमितिज्ञानादेव भङ्गात्। न चोपजीव्यत्वाद्बाधः पृथक्। तद्धि न तमवगम्यैवावगमः। एकत्र हेतुसाध्याभावाविस्त्येकवित्तिवेद्यतया व्यभिचारज्ञानस्य तदऽनुपजीवकत्वात्। नाप्युद्भावितव्यभिचारनिर्वाहार्थं तदुद्भावनम्। इदं व्यभिचारीत्युक्ते कथमिति परानुयोगस्यानावश्यकत्वात्। तथात्वेऽपि निर्वाह्यमेव दूषणमस्तु क्लृप्तत्वात् ॥

अथ अर्थान्तरोपनायकस्मृत्यादिसहकारिता सामान्यत एव प्रमाणस्य क्लृप्ता प्रत्यभिज्ञानादौ,तदिह समीचीनव्याप्तिपक्षधर्मताकलिङ्गपरामर्शस्यासदर्थकाञ्चनमयत्वादिस्मृत्यादिसहकारिवशाद् यत्र आभासधीकारणत्वं तत्र बाधः पृथक्, न व्याप्तिपक्षधर्मतोपनीतादन्यस्यानुमितौ भाने मानाभावात्। प्रत्यभिज्ञानादौ प्रतीतिबलेन

तत्कल्पनात् । अन्यथा पूर्वानुभूतसकलार्थभानेऽनुमितेर्याथार्थ्योच्छेदापत्तेः । भानेऽपि तस्य विप्रतिपत्त्यविषयतया तेन हेत्वाभासत्वानिरूपणात् । अन्यथाऽतिप्रसङ्गात् ॥

अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधस्य दोषत्वेन क्लृप्तत्वादनुमितावपि स एव दोष इतिचेत् । न तर्हि हेत्वाभासः । अनुमित्यसाधारणदोषस्यैव तत्त्वात् ॥

अथ पक्षाभिमते साध्याभावग्रहवत् साध्याभावव्याप्यग्रहोऽपि दूषकः । विरोधित्वाविशेषात् । एवञ्च, साध्याभावसामानाधिकरण्यमनैकान्तिकत्वं, साध्याभावव्याप्यसामानाधिकरण्यं च बाधः । तादृशं चाग्नित्वाद्येवेति । मैवम् । पक्षाभिमते साध्याभावग्रहस्य दूषकत्वासिद्धौ दृष्टान्तत्वानुपपत्तेः । सिद्धौ वा, तस्योक्तरूपबाधानन्तर्भावे षष्ठहेत्वाभासत्वापत्तेः । उक्तरूपश्च बाधः पक्षाभिमतविषयसाध्याभावबुद्धौ सत्यामसत्यां वा ? । आद्येऽनैकान्तिकत्वमेव, साध्याभावसामानाधिकरण्यग्रहात् । अन्त्ये लिङ्गत्वाभिमतसाध्याभावव्याप्ययोर्गृह्यमाणविशेषतया सत्प्रतिपक्ष एव दोषो न बाधः । तत्र तुल्यबलत्वं प्रयोजकं, बाधे त्वधिकबलत्वमितिचेन्न । गमकताप्रयोजकरूपसम्पत्तेरेव बलत्वेन तस्य द्वयोरपि ज्ञातत्वात् ॥

अथ हेतुतः साध्यसिद्धिसम्भावनायामनैकान्तिकत्वासिद्धेः पक्षाभिमते धर्मिणि साध्याभावप्रमितेः साधनाभिमतात् साध्यसिद्धिसम्भावनाविरह एवानैकान्तिकावतार इत्युपजीव्यत्वाद् बाधः पृथक् । अन्यथा हेतोरसाधकत्वे सिद्धे साध्यसिद्धिसम्भावनाविरहाद् नैकान्तिकत्वबुद्धिस्तस्यां च सत्यां हेतोरसाधकत्वधीरित्यन्योन्याश्रयः । मैवम् । साध्यसिद्ध्युन्मुखहेतुज्ञानस्य प्रमितसाध्याभावसहचरितहेतुविषयत्वेनानैकान्तिकत्वज्ञानतया दूषकत्वात् । यद्यप्यनैकान्तिकत्वेऽपि साध्याभावप्रमैव प्रयोजिका तां विना तदभावादिति तस्या एव दोषत्वमर्हं, तथापि तस्याः साध्याभावसमानाधिकरणहेतुज्ञानत्वेन दूषकत्वं, क्लृप्तत्वात् । न तु साध्याभावप्रमात्वेन, तस्यावश्यकत्वेऽपि तेन रूपेण दूषकत्वाकल्पनात् ॥

अत्रोच्यते ॥ गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यत्र बाधः पृथक् । न च तत्राप्यनैकान्तिकमेव दोषः । साध्यात्यन्ताभाववदवृत्तित्वस्य तत्त्वात् । अन्यथा द्रव्यत्वेन गुणानुमाना-

पत्तेः। आद्यक्षणे साध्याभाववद्वृत्तित्वात्। न च वस्तुतो यो गन्ध-प्रागभावावच्छिन्नस्तत्र साध्यमस्त्येवेति सिद्धसाधनमेव तत्र दोषः। पक्षतावच्छेदकधर्मविशिष्टे साध्यवैशिष्ट्यस्यानुमेयत्वात्॥

अथैवं विद्यमानेयं नदी उपरि देशे वृष्टिमती विशिष्टपूरवत्त्वादित्यत्र विद्यमानवृष्ट्यनुमानापत्तिः। न चेष्टापादनं, विद्यमानवृष्टेर्वर्त्तमाननदीपूरं प्रत्यहेतुत्वादितिचेन्न। तत्र समयभेदेनैव व्याप्तिग्रहात्तथैव साध्यसिद्धेः। किञ्चैवं सिद्धसाधने प्रागभावतत्प्रतियोगिनोरेकदेशवृत्तित्वेनैककालवृत्तित्वमपि स्यात्। यदि च तयोरेकसमयावच्छेदेनैकत्रावृत्तेर्न तथात्वं,तर्हि तत्प्रागभावावच्छिन्ने धर्मिणि तत्प्रतियोग्यनुमितावपि न सिद्धसाधनमपि तु बाध एव। अधिकन्तु न्यायनिबन्धनप्रकाशे विपश्चितमस्माभिः। मतान्तरं विकल्प्य निकरोति॥ यत्त्विति॥

अनुमानादिभ्यः फलव्यापारवैजात्याभावादुपमानं न मानान्तरमिति तन्नेश्वरबाधकमित्याह—

उपमानन्तु बाधकमनाशङ्कनीयमेव, विषयानतिरेकादिति केचित्। तथाहि। न तावदस्य विषयः सादृश्यव्यपदेश्यं पदार्थान्तरमेव सम्भावनीयम्॥

परस्परविरोधे हि न प्रकारान्तरस्थितिः॥
नैकताऽपि विरुद्धानामुक्तिमात्रविरोधतः॥ ८॥

न हि भावाभावाभ्यामन्यः प्रकारः सम्भावनीयः, परस्परविधिनिषेधरूपत्वात्। न भाव इति निषेधमात्रेणैवाभावविधिः। ततस्तं विहाय कथं स्ववचनेनैव पुनः सहृदयो निषेधेन्नाभाव इति। एवं, नाभाव इति निषेध एव भावविधिः। ततस्तं विहाय स्ववाचैवानुन्मत्तः कथं पुनर्निषेधेन्न भावइति। अत एवम्भूतानामेकताप्यशक्यप्रतिपत्तिः। प्रतिषेधविध्योरेकत्रासम्भवात्। तस्माद्भावाभावावेव तत्त्वम्॥

**भावत्वेऽपि गुणवन्निर्गुणं वेति द्वयमेव पूर्ववत् । पूर्वं द्रव्यमेव । उत्तरश्चाश्रितमनाश्रितं वेति द्वयमेव । पूर्ववत् । तत्रोत्तरं समवाय एव । अनवस्थाभयात् । आश्रितन्तु सामान्यवन्निःसामान्यश्चेति पूर्ववद् द्वयमेव । तत्र प्रथममपि स्पन्दोऽस्पन्द इति द्वयमेव । एतच्च यथासङ्ख्यं कर्म गुण इति व्यपदिश्यते । निःसामान्यं निर्गुणमाश्रितन्त्वेकाश्रितमनेकाश्रितं वेति प्रागिव द्वयमेव । एतदपि यथासंख्यं विशेषः सामान्यश्चेत्यभिधीयते । तदेतत्साद्दृश्यमेतास्वेकां विधामासादयन्नातिरिच्यते । अनासादयन्न पदार्थीभूय स्थातुमुत्सहते । एतेन शक्तिसङ्ख्यादयो व्याख्याताः । ततोऽभावेन सह सप्तैव पदार्था इति नियमः । अतो नोपमानविषयोऽर्थान्तरमिति ॥**

उपमानं त्विति ॥ ननु सादृश्यमेव तद्विषयः स्यात् । न हि तदिन्द्रियगम्यं, तदापातमात्रेणाज्ञानात् । नापि लिङ्गादिगम्यं, तदभावेऽपि सादृश्यज्ञानात् । तच्च न द्रव्यमगुणत्वात् । न गुणः कर्म वा, गुणेऽपि वृत्तेः । न सामान्यं, सप्रतियोगिकत्वात् । न च विशेषसमवायौ, प्रत्यक्षत्वादित्याह ॥ तथा हीति ॥ परस्परेति ॥ विरोधोऽत्र न परस्पराभावव्याप्यत्वम् । नीलपीतयोरन्यतरनिषेधेऽप्यन्यतरस्याविधेः । किन्तु परस्पराभावरूपत्वम् ॥ पूर्ववदिति ॥ परस्परविरोधे प्रकारान्तराभावादित्यर्थः । एवमग्रेऽपि ॥

नन्वेतादृशविकल्पेन परिशेषे सामान्यविशेषसमवायानामपि द्रव्यादित्रयसाधर्म्यात्तदन्तर्भावः स्यात् । अथ व्यवहारान्यथानुपपत्त्या तेषां तद्बहिर्भावः । तुल्यं सादृश्येऽपि । न हि तत् सामान्यं, तत्रोत्कर्षादिव्यवहारानुपपत्तेः । सामान्यस्यैकरूपत्वात् । सामान्यस्याश्रयभेदेऽप्यभेदात् । सादृश्यस्य च प्रत्याश्रयं भेदात् । अथ तद्भेदे सति तद्गतभूयःसामान्यवत्त्वं सादृश्यं,भेदश्च प्रत्याश्रयं भिन्नः सप्रतियोगिकश्चेतिचेन्न । सादृश्यस्य भेदघटितत्वेन साऽवधित्वे तस्मात्

सदृश इति प्रतीत्यापत्तेः । पदार्थान्तरत्वे च सप्रतियोगिकत्वेऽपि सावधित्वाभावेन तदभावोपपत्तेः । न च सप्रतियोगित्वमेव सावधित्वं, घटान्नेति प्रतीत्यापत्तेः ।

अत्राहुः । असाधारणान्यतद्गतबहुधर्मवत्त्वं तत्सादृश्यं जात्यादिसाधारणं, भेदाघटितत्वाच्च निरवधि । तद्गतबहुधर्मवत्त्वं च तन्निरूप्यमितीतरनिरूप्यत्वमेव तस्य सप्रतियोगिकत्वम् । तथापि सादृश्ये तदेव सप्रतियोगिकत्वं, न तु भेददीर्घादिवत् सावधित्वम् । तस्मात्सदृश इति प्रतीत्यापत्ते । किञ्च यादृशान्तद्गतबहुधर्मवत्त्वज्ञानमनतिप्रसक्तं तव सादृश्यव्यञ्जकं, तदेव सदृशव्यवहारनिमित्तमस्तु, किमधिकेनेति सङ्क्षेपः ॥

एतेनेति ॥ षट्पदार्थानतिरेकेणेत्यर्थः ॥ तत इति ॥ भावरूपपदाऽर्थाः षडभावस्यापि मानसिद्धतया पदार्थत्वोपगमादिति भावः । प्रत्यक्षादिविषयद्रव्यादिपदार्थातिरिक्तं सादृश्यमुपमानपरिच्छेद्यमित्यसिद्धमित्याह ॥ अत इति ॥

मा भूत् सादृश्यं पदार्थान्तरं, तथापि तदेवोपमानपरिच्छेद्यम् । प्रत्यक्षाद्यपरिच्छेद्यत्वात्, इन्द्रियसन्निकर्षेऽपि तदज्ञानात्, लिङ्गाद्यज्ञानेऽपि ज्ञायमानत्वाच्चेति जरन्मीमांसकमतमाह—

स्यादेतत् । भवतु सामान्यमेव सादृश्यं, तदेव तस्य विषयः स्यात् । तत्सदृशोऽयमिति हि प्रत्ययो नेन्द्रियजन्यः, तदापातमात्रेणानुत्पत्तेरितिचेन्न । पूर्वपिण्डानुसन्धानरूपसहकारिवैधुर्येणानुत्पत्तेः । सोऽयमिति प्रत्यभिज्ञानवदिति ॥

नन्वेतत्सदृशः स इति नेन्द्रियजन्यम् । तेन तस्यासम्बन्धात् । न चेदं स्मरणम् । तत्पिण्डानुभवेऽपि विशिष्टस्याननुभवात् । न चैतदपि, अयं स इति विपरीतप्रत्यभिज्ञानवदुपपादनीयम् । तत्तेदन्तोपस्थापनक्रमविपर्ययेऽपि विशेष्यस्येन्द्रियेण सन्निकर्षाविरोधात् । तस्य सन्निहितवर्त्तमानगोचरत्वात् । प्रकृते तु

तदभावात् । तस्मात्, तत्पिण्डस्मरणसहायमेतत्पिण्डवर्त्तिसादृश्यज्ञानमेव तथाविधं ज्ञानमुत्पादयदुपमानं प्रमाणमिति । एतदपि नास्ति ॥

साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्ज्यते ॥
अर्थापत्तिरसौ व्यक्तमितिचेत् प्रकृतं न किम् ॥९॥

यदा हि एतद्विसदृशोऽसौ इति प्रत्येति, तत्रापि तुल्यमेतत् । न हि तत्प्रत्यक्षमसन्निकृष्टविषयत्वात् । न स्मरणम् । विशिष्टस्याननुभवात् । नोपमानमसादृश्यविषयत्वात् । नन्वेतद्धर्माभावविशिष्टत्वमेव तस्य वैधर्म्यं, तच्चाभावगम्यमेवेष्यते । न च प्रकृतेऽपि तथाऽस्तु । सादृश्यस्य भावरूपत्वादिति चेन्न । इतो व्यावृत्तधर्मविशिष्टताया अपि वैधर्म्यरूपत्वात् । तस्य च भावरूपत्वात् ॥

स्यादेतत् ॥ तद्धर्मा इह न सन्तीत्यवगते, अर्थादापद्यते इहाविद्यमानास्तत्र सन्तीति । न हि तद्विधर्मत्वमेतस्योपपद्यते, यद्येतद्विधर्माऽसौ न भवतीति चेत् । एवं तर्हि प्रकृतमप्यर्थापत्तिरेव । न हि तत्सादृश्यविशिष्टत्वमेतस्य प्रत्यक्षसिद्धमपि तस्यैतत्सादृश्यविशिष्टत्वं विनोपपद्यते ॥

एतेन दृष्टासन्निकृष्टप्रत्यभिज्ञानं व्याख्यातम् । तत्रापि तद्धर्मशालित्वं तस्य स्मरणाभिव्यक्तमनुपपद्यमानं तादिदन्तास्पदस्यैकतां व्यवस्थापयति । तस्मान्नोपमानमधिकमिति ॥

स्यादेतदिति ॥ तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्य सादृश्यत्वाद्भेदांशस्य च प्रतियोगिज्ञानज्ञेयत्वात् सहकारिवैधुर्यादापाततः

प्रत्यक्षेणाज्ञानेऽपि तत्समवधाने तत एव तद्धानोत्पत्तिरित्याह ॥ पूर्वेति ॥ यथा तत्तास्मरणाभावादापाततः प्रत्यभिज्ञानाभावेऽपि तत्समवहितादिन्द्रियादेरेव तदुत्पत्तिरित्याह ॥ सोऽयमिति ॥

सादृश्यमात्रस्योपमानापरिच्छेद्यत्वेऽपि गोप्रतियोगिकगवयनिष्ठ-सादृश्यज्ञानकरणकगवयप्रतियोगिकगोनिष्ठसादृश्यधीरुपमानफलमि-ति शाबरमतमाह ॥ नन्विति ॥ न च सा प्रत्यक्षफलम् । विशेष्य-स्य गोरसन्निकर्षादित्याह ॥ नेन्द्रियेति ॥ गत्यन्तरमाशङ्क्य निराकरो-ति ॥ न चेति ॥ गोपिण्डानुभवेऽपि गवयस्याज्ञानात् तत्प्रतियोगिक-सादृश्यवैशिष्ट्यानुभवादित्यर्थः ॥ न चेति ॥ ऋजुमत्याभिज्ञाने तत्ताविशिष्टे इदन्ताविशिष्टाभेदो भासते । अयं स इत्यत्र तु इदन्ता-विशिष्टे तत्ताविशिष्टाभेद इति तत्तेदन्तयोरनुयोगित्वप्रतियोगित्वा-वच्छेदकभेदात्, प्रत्यभिज्ञानयोर्भेदेऽपि तत्र विशेष्यसन्निकर्षादत्र तु तदभावादित्यर्थः ॥

तादृशी धीः प्रत्यक्षाद्यफलमप्यर्थापत्तिफलमिति नैतत्करणमुप-मानं मानान्तरं सिद्ध्यति । अन्यथा तद्विधर्मोऽयमिति बुद्ध्यनन्तरमेत-द्विधर्मोऽसाविति धीकरणं मानान्तरं स्यादित्याह ॥ साधर्म्यमिति ॥ गवि करभवैधर्म्यं हि करभवृत्तिधर्माभाववत्त्वम् । तच्च स्मृते गवि प्राङ्नास्ति तावदनुपलब्धिगम्यमेवेति न तत्र मानान्तरापत्तिरित्या-ह ॥ नन्वेतदिति ॥ करभावृत्तिधर्मवत्त्वं गवि तद्वैधर्म्यं, तच्च भाव एवेति नानुपलब्धिगम्यमित्याह ॥ इत इति ॥

नन्विदमप्युपमानमेव । तथाहि, सप्रतियोगिकपदार्थज्ञानेन तत्प्र-तियोगिकपदार्थज्ञानमुपमानम् । अन्यथैतद्विधर्मा स एतस्माद्दीर्घ इति प्रतीतिः कुतः ? । न तावदनुमानात् । विशेष्यासन्निकर्षे तद्गततन्निष्ठ-सादृश्यप्रतियोगित्वादेर्लिङ्गस्याज्ञानात् । नाप्यर्थापत्तेः । तस्या व्यति-रेकानुमानरूपत्वात् । न च तत्प्रतियोगिकेतन्निष्ठसादृश्यादौ भास-माने समानसंवित्संवेद्यतया एतत्प्रतियोगिकतन्निष्ठसादृश्यादिरपि भासते इति वाच्यम् । विशेषणविशेष्यप्रतियोगिभेदेन समानसं-विद्वेद्यत्वासिद्धेः । एतत्सदृश एतद्विधर्मा स इति तद्विशेष्यकज्ञानानु-दयाच्च । तद्विशेष्यकप्रत्यक्षे तत्सन्निकर्षस्य हेतुत्वात् । न च प्रत्यक्षे विशेष्यसन्निकर्षो हेतुः, न तु यावद्विशेष्यसन्निकर्षो गौरवात् । अन्य-था अतीतानागतव्याप्यविशेष्यकं व्याप्तिप्रत्यक्षं न स्यादिति वाच्यम् ।

अतीतानागतविशेष्ये सामान्यलक्षणायाः प्रत्यासत्तेः सत्त्वात् । अथ गवयसादृश्यं गवि गवयगतशृङ्गित्वादिधर्मवत्त्वं, तच्च गवये गोसादृश्ये भासमाने गवि भासत एव । सामान्यस्यैकत्वेनेन्द्रियसन्निकर्षादितिचेत् । न । तथापि गोविशेष्यकगवयगतशृङ्गित्वादिज्ञानस्य गोरसन्निकर्षेणेन्द्रियाजन्यत्वात् ॥

मैवम् । अन्योन्यसदृश-वस्तु प्रत्यक्षेण जानतो यो यत्सादृश्यप्रतियोगी तत्सदृश इति सामान्यतो व्याप्तिज्ञाने सति गौर्गवयसदृशः । तत्सादृश्यप्रतियोगित्वात् । यथा भ्राता भगिनी । गवयगतसादृश्यप्रतियोगित्वञ्च गोर्गवयगतसादृश्यावित्तिवेद्यमेव । सादृश्ये गोः प्रतियोगित्वेनैव ज्ञानात् । यत्तद्भ्यां सामान्यतो व्याप्तिग्रहश्च विना गवयसदृशो गौरिति फलासिद्धेः । ताद्रूप्येण व्याप्तिग्रहेऽस्माकं व्यतिरेकी, परेषामर्थापत्तिरित्यन्यदेतत् ॥

ननु प्रत्यभिज्ञायमानस्य पूर्वापरकालमध्यावस्थानं नाध्यक्षगम्यम् । मध्ये इन्द्रियासम्बन्धात् । न लिङ्गादिगम्यम् । तदज्ञानेऽपि ज्ञानात् । तदिदमेवोपमानपरिच्छेद्यं स्यादित्यत आह ॥ एतेनेति ॥ साधर्म्यवैधर्म्ययोरर्थापत्त्यन्तर्भावेनेत्यर्थः । दृष्टश्च तन्मध्येऽसन्निकृष्टं चेति तत् तथा, तस्य प्रत्यभिज्ञानम् । तदेव स्फुटयति ॥ तत्रापीति ॥ तत्तेदन्ताविशिष्टाभेदो मध्यासन्निकृष्टस्य मध्यसत्त्वं विना अनुपपन्नो मध्यस्य सत्त्वं कल्पयतीत्यर्थः ॥

**एवं प्राप्ते अभिधीयते—**

**सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह ॥**
**प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥ १० ॥**

**यथा गौस्तथा गवय इति श्रुतातिदेशवाक्यस्य गोसदृशं पिण्डमनुभवतः स्मरतश्च वाक्यार्थमयमसौ गवयशब्दवाच्य इति भवति मतिः । सेयं न तावद् वाक्यमात्रफलम् । अनुपलब्धपिण्डस्यापि प्रसङ्गात् । नापि प्रत्यक्षफलम् । अश्रुतवाक्यस्यापि प्रसङ्गात् । नापि समाहारफलम् । वाक्यप्रत्यक्षगोभिन्नकालत्वा-**

त् । वाक्यतदर्थयोः स्मृतिद्वारोपनीतावपि गवयपिण्डसम्बन्धेनापीन्द्रियेण तद्गतसादृश्यानुपलम्भे समयपरिच्छेदासिद्धेः । फलसमाहारे तु तदन्तर्भावे अनुमानादेरपि प्रत्यक्षत्वप्रसङ्गः । तत् किं तत्फलस्य तत्प्रमाणबहिर्भाव एव ? । अन्तर्भावे वा कियती सीमा ? । तत्तदसाधारणेन्द्रियादिसाहित्यम् । अस्ति तर्हि सादृश्यादिज्ञानकाले विस्फारितस्य चक्षुषो व्यापारः । न । उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यतदर्थस्मृतिमतः कालान्तरेऽप्यनुसन्धानबलात् समयपरिच्छेदोपपत्तेः ॥

ननु चवाक्यादेवानेन समयः परिच्छिन्नः गोसदृशस्य गवयशब्दः संज्ञेति । केवलमिदानीं प्रत्यभिजानात्ययमसाविति । प्रयोगाद्वाऽनुमितः, यो यत्रासति वृत्त्यन्तरे वृद्धैः प्रयुज्यते स तस्य वाचको यथा गोशब्द एव गोः । प्रयुज्यते चायं गोसदृशे, इति किमुपमानेनेति । न ॥

सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः ॥
समयो दुर्ग्रहः पूर्वं शब्देनानुमयाऽपि वा ॥ ११ ॥

न हि गवयशब्दस्य सादृश्यं प्रवृत्तिनिमित्तम् । अप्रतीतगुनामव्यवहारप्रसङ्गात् । न चोभयमपि निमित्तम् । स्वयं प्रतीतसमयसंक्रान्तयेऽनिदेशवाक्यप्रयोगानुपपत्तेः । गवयत्वे ह्ययं व्युत्पन्नो वृद्धव्यवहारान्न सादृश्ये । कथमेतान्निर्धारणीयमितिचेत् । वस्तुगतिस्तावदियं, तदापाततः सन्देहेऽपि न फलसिद्धिः । गन्धवत्त्वमिव पृथिवीत्वस्य, गोसादृश्यं गवयशब्द-

**प्रवृत्तिनिमित्तस्योपलक्षणमिदमेव वा निमित्तमित्य-ऽनिर्धारणात् ॥**

उपमानफलं विदुरित्यनयोर्मध्ये, इतिरध्याहार्य इति सम्प्रदाय-विदः । ननु प्रत्येकं व्यभिचारेऽपि समुदितयोस्तयोः फलं स्यादित्यत आह ॥ नापीति ॥ नन्विन्द्रियसम्बद्धे गवये वाक्यतदर्थस्मृतौ च सत्यां प्रमाणसमाहारः स्यादित्यत आह ॥ वाक्येति ॥ गवयगतगो-सादृश्यावेदने समयपरिच्छेदो न भवत्येवेत्यर्थः । फलसमाहार-माशङ्क्य निराकरोति ॥ फलेति ॥ प्रत्यक्षफलं हि प्रायशोलिङ्गपरामर्शो-ऽनुमितिकरणम् । श्रोत्रानुभवजनितपदज्ञानञ्च वाक्यार्थप्रमायां प्रत्यक्षं स्यादित्यर्थः । ननु तत्फलस्य तदनन्तर्भावे विकल्पोऽप्या-ऽऽलोचनफलं प्रत्यक्षं न स्यात्, अन्तर्भावे वा लिङ्गसादृश्याध्यक्षयोः कः प्रभेद इति पृच्छति ॥ तत् किमिति ॥ उत्तरं, तत्तदिति ॥ यत्र व्या-पारिण इन्द्रियसन्निकर्षादेरवस्थितिस्तत्र तत्फलस्यावान्तरव्यापार-ता, यत्र तु तस्यानवस्थितिस्तत्र प्रमाणबहिर्भूतत्वमित्यर्थः । इममेव विशेषमादाय शङ्कते ॥ अस्तीति ॥ उक्तयुक्त्या परिहरति ॥ उपलब्धे-ति ॥ इन्द्रियव्यापारोपरतौ लिङ्गशब्दानुसन्धानस्येव वाक्यार्थस्मृति-सचिवस्य सादृश्यज्ञानस्यापि मानान्तरत्वादित्यर्थः ॥ अयमसा-विति ॥ यो गोसदृशो धर्मी गवयशब्दवाच्यतयाऽवगतस्तं साक्षा-त्करोमीति प्रत्यभिजानातीत्यर्थः ॥

निमित्तं प्रवृत्तिनिमित्तम् ॥ समय इति ॥ गवयत्वप्रवृत्तिनिमित्तक-गवयपदवाच्योऽयं पिण्ड इत्याकार इत्यर्थः । गवयपदस्यागृहीत-समयत्वेनाप्रत्यायकत्वाद्गोसदृशपदस्य च सादृश्यमात्रबोधक-त्वादिति भावः ॥

अप्रतीतेति ॥ गवयत्वस्य जातितया लघुत्वात्, सादृश्यस्य चो-पाधितया गुरुत्वादिति भावः । उभयं समुच्चितं निमित्तं विकल्पो वा ? । आद्योऽप्रतीतगूनामव्यवहारापातादेव निरस्तः । द्वितीये त्वा-ह ॥ स्वयमिति ॥ स्वयं यत्र प्रवृत्तिनिमित्ते व्युत्पत्तिर्गृहीता, तत्र परस्यापि सा भवत्विति धियाऽऽरण्यको वाक्यं प्रयुङ्क्ते । तेन च सा गवयत्व एव ज्ञातेति तदेव प्रवृत्तिनिमित्तं बोधयेदित्यर्थः ॥ वस्तुगतिरिति ॥ तर्कादिपुरस्कारादित्यर्थः ॥ सन्देहेऽपीति ॥ गो-

सादृश्यं प्रवृत्तिनिमित्तं तदुपलक्षितं वा धर्मान्तरमिति संशये सति न प्रवृत्तिनिमित्तविशेषनिश्चय इत्यर्थः ॥ सन्देहाकारमाह ॥ गन्धवत्त्वमिवेति ॥

स्यादेतत् । पूर्वं निमित्तानुपलब्धेर्न फलसिद्धिरिदानीन्तु तस्मिन्नुपलब्धे तदेव वाक्यं स्मृतिसमारूढं फलिष्यति, अध्ययनसमयगृहीत इव वेदराशिरङ्गोपाङ्गपर्यवदातस्य कालान्तरे । न च वाच्यं, वाक्येन स्वार्थस्य प्रागेव बोधितत्वात् प्रागेव पर्यवसितमिति । गोसादृश्यस्योपलक्षणनिमित्तत्वयोरन्यतरत्र तात्पर्ये सन्देहात् । इदानीन्तु गवयत्वेऽवगते तर्कपुरस्कारात् सादृश्यस्योपलक्षणतायां व्यवस्थितायां, गङ्गायां घोष इतिवदन्वयप्रतिपत्तिरिति चेन्न ॥

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ॥
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः ॥ १२ ॥

गोसदृशो गवयशब्दवाच्य इति सामानाधिकरण्यमात्रेणान्वयोपपत्तौ विशेषसन्देहेऽपि वाक्यस्य पर्यवसितत्वेन मानान्तरोपनीतानपेक्षणात् । रक्तारक्तसन्देहेऽपि घटो भवति इति वाक्यवत् । अन्यथा वाक्यभेददोषात् । न च गङ्गायां घोष इतिवत् पदार्था एवान्वयायोग्याः । येन प्रमाणान्तरोपनीतेनाऽन्वयः स्यात् । प्रतीतवाक्यार्थबलायातोऽप्यर्थो यदि वाक्यस्यैव, दिवाभोजननिषेधवाक्यस्यापि रात्रिभोजनमर्थः स्यात् । तस्माद्यथा गवयशब्दः कस्यचिद्वाचकः शिष्टप्रयोगादिति सामान्यतो निश्चितेऽपि विशेषे मानान्तरापेक्षा, तथा गोसदृशस्य गवयशब्दो

वाचक इति वाक्यान्निश्चितेऽपि सामान्ये विशेष-वाचकत्वेऽस्य मानान्तरमनुसरणीयमिति ॥

अस्त्वनुमानम् । तथाहि, गवयशब्दो गवयस्य वाचकः । असति वृत्त्यन्तरेऽभियुक्तैस्तत्र प्रयुज्य-मानत्वात् । गवि गोशब्दवदिति चेन्न, असिद्धेः । न ह्यसति वृत्त्यन्तरे तद्विषयतया प्रयोगः सङ्गतिमवि-ज्ञाय ज्ञातुं शक्यते । सामानाधिकरण्यादितिचेन्न ॥ पिण्डमात्रे सिद्धसाधनात् । निमित्ते चासिद्धेः । सा-दृश्यस्यानिमित्तत्वादित्युक्तम् ॥

ननु व्याप्तिपरमिदं वाक्यं स्यात् । यो गोसदृशः स गवयपदार्थ इति । तथा च वाक्यादवगतप्रतिब-न्धोऽनुमिनुयात् । अयमसौ गवयो गोसदृशत्वादति-देशवाक्यावगतपिण्डवदिति । न । विपर्ययात् । न हि गोसदृशं बुद्धावारोप्यानेन पृष्टः स किंशब्दवाच्य इति । किन्तु सामान्यतो गवयपदार्थमवगम्य स कीदृगिति । तथाच यत्नोगप्राथम्याभ्यां तस्यैव व्या-प्यत्वं, ततः किं तेन ? । प्रकृतानुपयोगात् ॥

पूर्वमिति ॥ गवयपिण्डदर्शनादित्यर्थः । फलसिद्धिः प्रवृत्तिनि-मित्तविशेषनिश्चय इत्यर्थः ॥ इदानीमिति ॥ गवयत्वविशिष्टपिण्डप्र-त्यक्षकाल इत्यर्थः ॥ तर्केति ॥ प्रागुक्ततर्काद्गवयत्वे प्रवृत्तिनिमित्ते तात्पर्यनिश्चयाद् गोसदृशपदं लक्षणया गवयत्वबोधकमित्यर्थः ॥

उपलक्षणत्वनिमित्तत्वसन्देहेऽपि यो गोसदृशः स गवयपदवाच्य इति सामानाधिकरण्यरूपयथाश्रुतपदार्थान्वयेनैव वाक्ये पर्यवसिते पश्चाल्लक्षणा न कल्प्यते । यत्र त्वयोग्यतया मुख्यार्थान्वयाऽसम्भवः, तत्रैव सेत्याह ॥ श्रुतेति ॥

मानान्तरेति ॥ मानान्तरं प्रत्यक्षं, तेनोपनीतं दर्शितमित्यर्थः ॥ अन्यथेति ॥ यदि पर्यवसितेऽपि वाक्ये तत्तदाकाङ्क्षायां तत्तद्वाक्या-

ऽर्थज्ञानं स्यात्तदा वाक्यभेद इत्यर्थः। यत्र तु लक्षणा, तत्र नैवं वाक्यपर्यवसानमित्याह ॥ न चेति ॥ ननु प्रतीत्यपर्यवसानाभावेऽपि प्रतीताऽपर्यवसानाद् येन विनाऽनुपपत्तिः, सोऽपि वाक्यार्थः स्यादित्याह ॥ प्रतीतेति ॥ यदि कल्पनागौरवाद् गोसादृश्यस्य प्रवृत्तिनिमित्तत्वानुपपत्तौ गवयत्वस्य तथात्वकल्पनाऽपि वाक्यार्थः स्यात्, तदा दिवाऽभोजिनः पीनत्वानुपपत्त्या रात्रिभोजनकल्पनापि वाक्यार्थः स्यादित्यर्थः ॥

तस्मादिति ॥ ननु सामानाधिकरण्यमात्रेणान्वयोपपत्तावपि तात्पर्यानुपपत्त्या यष्टीः प्रवेशयेतिवल्लक्षणाऽस्तु । गवयपदव्युत्पित्सुं प्रति व्युत्पत्तये हि वाक्यमाप्तेनोक्तम् । तच्च न प्रवृत्तिनिमित्तप्रतिपादनं विना । न च गोसादृश्यं तथेति तात्पर्यतो गोसदृशपदेन गोसादृश्यसमानाधिकरणं गवयत्वमुपलक्षितमिति कल्प्यते। न च यथा धूमोऽस्तीत्यत्राग्नौ तात्पर्यमनुमानेन निर्वहतीति न लक्षणा, तथाऽत्र मानान्तरमस्ति, येन तन्निर्वाह्यम् । उपमानस्यासिद्धेः । न च वाक्ये न लक्षणा। तस्या वृत्तित्वेन शक्तिवच्छब्दधर्मत्वादिति वाच्यम्। एकपद एव लक्षणा, पदान्तरं तन्नियामकमित्युपगमात्। न च गोसदृशपदस्य गवयत्वे साक्षात्तात्पर्यग्रह एव लक्षणा । स च मानाभावान्नास्ति । अन्यथा धूमोऽस्तीत्यत्रापि सा स्यादिति वाच्यम् । उपस्थापकान्तराभावे सति तत्तात्पर्यस्यैव साक्षात्तात्पर्यरूपत्वात् ॥

अत्राहुः। यत्र प्रवृत्तिनिमित्तविशेषबोधने न तात्पर्यं, किन्तु यो गोसदृशः स गवयशब्दवाच्य इति स्वरूपाख्यानमात्रं, तत्राप्युक्तसामग्रीतःप्रवृत्तिनिमित्तविशेषपरिच्छेदः। न च तत्र तात्पर्यं, यदनुपपत्तिर्लक्षणाबीजं स्यात् । यत्र वा करभनिन्दातात्पर्यकं धिक्करभमित्यादिकं, तत्रापि तादृशं पिण्डमनुभवतः स्मरतश्च वाक्यार्थमयङ्करभशब्दवाच्य इति धीः। न च प्रवृत्तिनिमित्तविशेषे तत्र तात्पर्यम् ॥

अस्मत्पितृचरणास्तु, सर्वत्रान्वयानुपपत्तिरेव लक्षणाबीजम्। यष्टीः प्रवेशयेत्यत्रापि प्रकरणादिना भोजनादिप्रयोजनकप्रवेशनस्य ज्ञानात् तादृशे च प्रवेशने यष्ट्यादेरनन्वयात्, तात्पर्यग्रहाऽमपि प्रकरणादेरवश्योपजीव्यत्वादित्याहुः॥

मानान्तरमिति ॥ तर्कः प्रमाणसहकारी, न च तस्यां दशायां

मानान्तरमस्तीत्युपमानं तर्कोपकार्यमास्थेयमित्यर्थः ॥ असिद्धेरिति ॥ वस्तुतो गवयव्यक्तिवाचकत्वसिद्धावपि गवयत्वस्य प्रवृत्तिनिमित्तत्वं न सिद्ध्यतीति भावः । गवयसामानाधिकरण्येन गोसदृशो गवय इतिवाक्यप्रतिपादनाद्गवयवाचकत्वं गवयपदस्य ज्ञायते इत्याह ॥ सामानाधिकरण्यादिति ॥ गवयसामानाधिकरण्येनेत्यत्र यदि पिण्ड-सामानाधिकरण्यं विवक्षितं, तदा पिण्डवाचकत्वसिद्धावपि गवय-त्वविशिष्टवाच्यत्वासिद्धेर्नोपमानपरिच्छेद्यस्य मानान्तरात् प्रतीति-रित्याह ॥ पिण्डेति ॥ गवयत्वजातिसामानाधिकरण्यं तु मानाभावा-दसिद्धमित्याह ॥ निमित्ते चेति ॥

न हीति ॥ येन सादृश्यस्य व्याप्यत्वं स्यादिति शेषः । यदि गो-सदृशः किंशब्दवाच्य इति पृच्छेत्, तदा तमुद्दिश्य गवयशब्दवाच्य इति विदध्यादपि तु कीदृग्गवय इति पृष्टः, तथा च यो गवयशब्द-वाच्यः स गोसदृश इति उत्तरयतो विपरीत एव व्याप्यव्यापकभाव इत्यर्थः ॥ यद्योगेति ॥ व्याप्यं यच्छब्देन पूर्वमुद्दिश्यते । यथा यो धूमवान् सोऽग्निमानित्यर्थः ॥

यद्योगप्राथम्याभावेऽपि गन्धवती पृथिवीत्यादिवद्व्यतिरेकिरूप-लक्षणपरत्वं स्यादित्याह—

अथ किंलक्षणकोऽसाविति प्रश्नार्थः । तदा व्य-तिरेकपरं स्यात् । लक्षणस्य तथाभावात् । तथाच, गोसदृशो गवय इत्यस्यार्थो यो गवय इति न व्यवह्रि-यते नाऽसौ गोसदृश इति । एवञ्च प्रयोक्तव्यम्, अय-मसौ गवय इति व्यवहर्त्तव्यः गोसदृशत्वात् । यस्तु न तथा, नासौ गोसदृशो यथा हस्ती । न च हस्त्या-ऽऽदीनां विपक्षत्वे प्रमाणमस्ति । सर्वाप्रयोगस्य दु-रवधारणत्वात् । कतिपयाव्यवहारस्य चानैकान्ति-कत्वात् ॥

ननु लिङ्गमात्रे प्रश्नो भविष्यति, कीदृक् किं लिङ्गमिति । न । न ह्यनेन लिङ्गमविज्ञाय गवयशब्द-

स्य वाचकत्वं कस्यचिद्वाच्यत्वं वाऽवगतं, येन तदर्थं प्रश्नः, स्यात्। प्रवृत्तिनिमित्तविशेषलिङ्गे प्रश्नो, येन निमित्तेन गवयशब्दः प्रवर्त्तते तस्य किं लिङ्गमिति चेन्न। न हि तदवश्यमनुमेयमेवेत्यनेन निश्चितं, यत इदं स्यात्। ज्ञानोपायमात्रप्रश्ने तद्विशेषेणोत्तरमिति चेन्न। अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेत्। पर्यायान्तरं वा। यथा, गवयमहं कथं जानीयामिति प्रश्ने, वनं गतो द्रक्ष्यसीति। यथा वा, कः पिक इत्यत्र, कोकिल इति। तस्मान्निमित्तभेदप्रश्न एवायं, गवयो गवयपदवाच्यः कीदृक् केन निमित्तेनेति युक्तमुत्पश्यामः॥

तस्य च निमित्तविशेषस्य साक्षादुपदर्शयितुमऽशक्यत्वात् पृष्टस्तदुपलक्षणं किञ्चिदाचष्टे। नचोपमानसामग्रीसमुत्थापनमेव। तस्य च प्रमाणस्य सतस्तर्कः सहायतामापद्यते। मादृश्यस्यैव निमित्तताया कल्पनागौरवम्। निमित्तान्तरकल्पने च क्लृप्तकल्प्यविरोध इति तदेव निमित्तमवगच्छतीति॥

अथेति॥ हस्त्यादीनां गवयव्यवहाराविषयत्वं तत्राप्रयोगेण निश्चेयं, तत्राह॥ सर्वेति॥ न चैवं व्यवहारसाध्ये सर्वत्र लक्षणोच्छेदः स्यादिति वाच्यम्। यथा पृथिवीत्वेन पृथिवीपदवाच्यत्वं साध्यते, तथा गवयत्वेन निमित्तेन गवयपदवाच्यत्वस्य साधयितुमशक्यत्वात्। गवयत्वस्यातिदेशवाक्यादप्रतीतेः॥ न ह्यनेनेति॥ अज्ञातसामान्यस्य विशेषजिज्ञासा न युक्तेति भावः। उपसंहरति॥ तस्मादिति॥ ननु यदि निमित्तप्रश्नस्तत् किं तदेव नोत्तरयतीत्यत आह॥ तस्य चेति॥ व्युत्पाद्यस्याप्रतीतगवयत्वजातिकत्वादिति भावः॥ तच्चेति॥ सामग्र्युत्थानानुकूलमित्यर्थः॥

ननु सादृश्यप्रवृत्तिनिमित्ततायां गौरवानवतारे नोपमानस्याऽप्यवतारः। तथाच तर्केणेतराप्रवृत्तिनिमित्तकत्वे निश्चिते गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात् । यद्येवं तन्नैवमितिचेन्न। तर्कस्यानिश्चायकत्वात् । न चायं तर्को व्याप्तिमूलको येन विपर्ययानुमानादर्थसिद्धिः स्यात्। न च गवयपदं किञ्चित्प्रवृत्तिनिमित्तकमिति सामान्यतो दृष्टमेव तर्कसहकृतं गवयपदस्येतराप्रवृत्तिनिमित्तकतां परिच्छिनत्ति, न तु मानान्तरं कल्पयित्वा तर्कः सहकारी कल्प्यते इति वाच्यम्। इदं सप्रवृत्तिनिमित्तमन्यच्च न प्रवृत्तिनिमित्तमिति बुद्धावपि गवयत्वप्रवृत्तिनिमित्तकं गवयपदमिति मानान्तरमन्तरेणाप्रतीतेः। अनुमितेर्व्यापकतावच्छेदप्रकारकत्वात् ॥

ननु यथेच्छायां सामान्यतो दृष्टेन विशेषबाधकसहकृतेनाष्टद्रव्यानाश्रयत्वं ज्ञायते। अन्यथा, विशेषबाधकानां पृथिव्याद्येकैकमात्रव्यतिरेकाविषयत्वेनाष्टद्रव्यानाश्रयत्वं केन ग्राह्यम्। तथात्रापि गौरवाऽऽख्यतर्कसहकृतसामान्यतोदृष्टादितराप्रवृत्तिनिमित्तकत्वे निश्चिते पश्चाद्यतिरेकि स्यात्। कल्प्यमानान्तरसहकारित्वापेक्षया क्लृप्तप्रमाणसहकारित्वस्य युक्तत्वात् ॥

मैवम् । इच्छायामेकैकबाधसहकृतापरापरबाधकैरेव तावद्विशिष्टवैशिष्ट्यरूपाष्टद्रव्यानाश्रयत्वपरिच्छेदात्। न तु सामान्यतोदृष्टेन, विशेषणद्वयोपस्थित्यैव विशिष्टवैशिष्ट्यज्ञानानिर्वाहात्। तर्कानवतारदशायां तस्य तदपरिच्छेदकत्वाच्चेति सङ्क्षेपः ॥

एवमुपमानस्य क्लृप्तमानातिरेकं प्रसाध्याव्याप्तिं परिहर्तुं लक्षणमाह—

**लक्षणन्त्वस्यानवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिन्यनुसन्धानमुपमानम्। वाक्यार्थश्च क्वचित् साधर्म्यं क्वचिद्वैधर्म्यमतो नाव्यापकम्। तस्मान्नियतविषयत्वादेव, न तेन बाधो, न त्वनतिरेकादिनि स्थितिः ॥**

**शब्दोऽपि न बाधकमनुमानानतिरेकादिति वैशे-**

षिकादयः । तथा हि । यद्यप्येते पदार्था मिथः संसर्गवन्तो वाक्यत्वादिति व्यधिकरणं,पदार्थत्वादिति चाऽनैकान्तिकं,पदैःस्मारितत्वादित्यपि तथा । यद्यपि चैतानिपदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादित्यादौ साध्याभावः । न ह्यत्र मत्वर्थः संयोगः समवायस्तादात्म्यं विशेषणविशेष्यभावोवासम्भवति। ज्ञाप्यज्ञापकभावस्तु स्वातन्त्र्येणानुमानान्तर्भाववादिभिर्नेष्यते । न च लिङ्गतया ज्ञापकत्वं, यल्लिङ्गस्य विषयस्तदेव तस्य, परस्पराश्रयप्रसङ्गात् । तदुपलम्भे हि व्याप्तिसिद्धिस्तत्सिद्धौ च तदनुमानमिति ॥

तथाप्याकाङ्क्षादिमद्भिः पदैः स्मारितत्वाद् गामभ्याजेतिपदार्थवदिति स्यात् । न च विशेषासिद्धिर्दोषः, संसर्गस्य संसृज्यमानविशेषादेव विशिष्टत्वात् । यद्वा, एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकानि । आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात् । गामभ्याजेति पदवत् । न चैवमर्थासिद्धिः । ज्ञानावच्छेदकतयैव तत्सिद्धेः । तस्य च संसृज्यमानोपहितस्यैवावच्छेदकत्वान्न विशेषाप्रतिलम्भ इति ॥

लक्षणन्त्विति ॥ अनवगतसङ्गतिश्चासौ संज्ञा चेति कर्मधारयः । न च गोविसदृशो न गवयपदवाच्य इत्यत्र अर्थादापद्यते गोसदृशो गवयपदवाच्य इति। तथाच नात्र वाक्यार्थानुसन्धानमस्तीतिवाच्यम् । परम्परया तत्रापि वाक्यतात्पर्यात् । वस्तुतस्तु, उपमितिकरणत्वमुपमानत्वम् । उपमितित्वञ्च जातिः । न च तदसिद्धिः । सामग्रीविशेषे कार्यवैजात्यमावश्यकमिति कारणव्यङ्ग्यत्वात् । सैव सामग्री, अनवगतसङ्गतीत्यादिना दर्शिता ॥ क्वचिद्वैधर्म्यमिति ॥ धिक् करभमतिदीर्घग्रीवमित्यादौ ॥ प्रकृतमुपसंहरति ॥ तस्मादिति ॥ शब्दोऽपीति ॥ यद्यपि शब्दस्याबाधकत्वेऽनुमानानतिरेकित्वं न हेतुरनु-

मानात्मकस्यैव शब्दस्य बाधकत्वसम्भवात्, तथाप्यनुमानबाधकत्वनिरासेनैव शब्दबाधकत्वमपि निरस्तमित्यर्थः। अनुमानानतिरेकादिति ल्यब्लोपपञ्चमी। अनुमानाभेदं प्राप्य शब्दो न बाधकं, प्रकृतेः क्रियमाणानि–इत्यादिशब्दस्य वक्तव्ययुक्त्याऽन्यपरत्वादित्यन्ये॥

पदानां तदर्थानां वाऽऽकाङ्क्षादिमतां वाक्यार्थप्रत्यायने लिङ्गभावेनैव करणत्वमस्तु, किं शब्देनातिरिक्तमानेनेत्यभिप्रेत्य पदाऽर्थकरणत्वपक्षेऽनुमानाभेदं साधयति ॥ यद्यपीति ॥ अनैकान्तिकमिति ॥ निराकाङ्क्षादिभिरित्यर्थः ॥ तथेति ॥ तैरेवानैकान्तिकमित्यर्थः। पदकरणत्वमाश्रित्याह ॥ यद्यपि चेति ॥ समवाय इति ॥ न पदार्थसंसर्गाणां पदेषु समवाय इत्यर्थः॥ विशेषणेति॥ स हि पदाऽर्थानां मिथोऽन्वयो न पदधर्म इत्यर्थः ॥ न चेति ॥ लिङ्गतया ज्ञापकत्वं यच्छब्दस्य। तदेव तस्य लिङ्गस्य तत्स्मारकत्वादित्यर्थस्य विषयः कर्मेति न चेति योजना। परम्पराश्रयत्वं स्पष्टयति ॥ तदुपलम्भे हीति॥लिङ्गतया ज्ञापकत्वोपलम्भे हीत्यर्थः। मानान्तरेण शब्दस्य लिङ्गत्वसिद्धौ ततोऽनुमित्या लिङ्गतया ज्ञापकत्वे व्याप्तिः सिद्ध्येत्। इत्थञ्च ज्ञापकत्वे लिङ्गत्वसिद्धिरिति भावः। यद्यपि पूर्वपूर्वविषयानुमितिजनकत्वेनानादित्वान्नपरम्पराश्रयत्वं,तथापि ज्ञापकत्वसिद्धावपि नार्थसिद्धिः, प्रमापकत्वे तु साध्येऽनैकान्तिकमिति भावः॥

तथापीति ॥ अत्रैते पदार्थास्तात्पर्यविषयमिथःसंसर्गवन्त इति साध्यमतो नानभिमतसंसर्गसिद्ध्या अर्थान्तरम्। नन्वेवं संसर्गमात्रसिद्धावपि व्यवहारौपयिकस्तद्विशेषो न सिद्ध्येदत आह ॥ न चेति ॥ संसृज्यमानपदार्थव्यापकत्वेनागृहीतस्यापि संसर्गविशेषस्य पक्षधर्मताबलात् सिद्धिरित्यर्थः। ननु संसर्गज्ञानपूर्वकत्वसिद्धावपि कुतो वाक्यार्थसिद्धिरित्यत आह ॥ न चैवमिति ॥ संसर्गविशेषसिद्ध्यर्थमाह ॥ तस्य चेति॥ तस्य संसर्गस्य पदार्थविशेषोपहितस्यैव ज्ञानावच्छेदकत्वाज्ज्ञानज्ञानस्य च तद्विषयविषयकत्वात् संसर्गे च सम्बन्धिन एव विशेषत्वादत्रापि पक्षधर्मताबलाद्व्यापकत्वेनाज्ञातस्यापि संसर्गविशेषस्य सिद्धिरित्यर्थः॥

नन्वेवं भ्रान्तिज्ञोऽपि भ्रान्तः स्यात्। न चेष्टापत्तिः। ईश्वरस्याऽपि भ्रान्तत्वापत्तेः। भ्रान्तस्येव भ्रान्तिज्ञस्यापि भ्रमात् प्रवृत्त्यापत्तेश्च। अत्राहुः। न भ्रमविषयविषयकत्वेन भ्रमत्वं, किन्तु विशेष्यावृत्तिप्र-

कारकत्वेन। न च शुक्तौ रजतत्वप्रकारकज्ञानवानयमित्यत्र विशेष्यावृत्तिः प्रकारः, रजतत्वप्रकारकत्वस्य भ्रमे सत्त्वात्। न च प्रतारकवाक्ये व्यभिचारः। तत्र योग्यताविरहात्। तस्याप्याहार्यसंसर्गज्ञानवत्त्वाच्च। तथापि संसर्गज्ञानं विना शुकस्यान्यस्य वा वाक्ये भ्रान्तप्रतारकवाक्ये च व्यभिचारः। कथञ्च तत्र संसर्गप्रमा?। वक्तुर्ज्ञानानुमानासम्भवादितिचेन्न। तत्र वेदवदीश्वरसंसर्गज्ञानपूर्वकत्वादित्युक्तत्वात्॥

तत्र प्रथमं प्रयोगं दूषयति—

अत्रोच्यते—

अनैकान्तः परिच्छेदे सम्भवे च न निश्चयः॥
आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना॥ १३॥

एते पदार्था मिथः संसर्गवन्त इति संसृष्टा एवेति नियमो वा साध्यः, सम्भावितसंसर्गा इति वा?। न प्रथमः। अनाप्तोक्तपदकदम्बस्मारितैरनैकान्तात्। आप्तोक्त्या विशेषणीयमितिचेन्न। वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः। न ह्यविप्रलम्भकत्वमात्रमिहाप्तशब्देन विवक्षितं, तदुक्तेरपि पदार्थसंसर्गव्यभिचारात्। अपि तु तदनुभवप्रामाण्यमपि। न चैतच्छक्यमसर्वज्ञेन सर्वदा सर्वविषये सत्यज्ञानवानयमिति निश्चेतुम्। भ्रान्तेः पुरुषधर्मत्वात्॥

तत्र क्वचिदाप्तत्वमनाप्तस्याप्यस्तीति न तेनोपयोगः। ततोऽस्मिन्नर्थेऽयमभ्रान्त इति केनचिदुपायेन ग्राह्यम्। न चैतत् संसर्गविशेषमप्रतीत्य शक्यम्। बुद्धेरर्थभेदमन्तरेण निरूपयितुमशक्यत्वात्। पदार्थमात्रे चाभ्रान्तत्वसिद्धौ न किञ्चित्। अनाप्तसाधारण्यात्। एतेषां संसर्गेऽयमभ्रान्त इति शक्यमिति-

चेन्न । एतेषां संसर्ग इत्यस्या एव बुद्धेरसिद्धेः । अननुभूतचरे स्मरणायोगात्, तदनुभवस्य लिङ्गाधीनतया तस्य च विशेषणासिद्धत्वेनानुपपत्तेरिति ॥

नापि द्वितीयः, योग्यतामात्रसिद्धावपि संसर्गाऽनिश्चयात्, वाक्यस्य च तदेकफलत्वात् । योग्यतामात्रस्य प्रागेव सिद्धेः । अन्यथा, तदसिद्धावासन्नसाकाङ्क्षपदस्मारितत्वादित्येव हेतुः स्यात् । तथाचाऽग्निना सिञ्चेदित्यादिना स्मारितैरनैकान्तः । तथाविधानां सर्वथा संसर्गायोग्यत्वादिति ॥

द्वितीयेऽपि प्रयोगे हेतुराकाङ्क्षादिमत्त्वे सतीति । तत्र केयमाकाङ्क्षा नाम? न तावद्विशेषणविशेष्यभावः, तस्य संसर्गस्वभावतया साध्यत्वात् । नाऽपि तद्योग्यता, योग्यतयैव गतार्थत्वात् । नाप्यविनाभावः । नीलं सरोजमित्यादौ तदभावेऽपि वाक्यार्थप्रत्ययात् । तत्रापि विशेषाक्षिप्तसामान्ययोरविनाभावोऽस्तीति चेन्न । अहो विमलं जलं नद्याः कच्छे महिषश्चरतीत्यादौ वाक्यभेदानुपपत्तिप्रसङ्गात् । नापि प्रतिपत्तुर्जिज्ञासा । पटो भवतीत्यादौ शुक्लादिजिज्ञासायां, रक्तः पटो भवतीत्यस्यैकदेशवत् सर्वदा वाक्यापर्यवसानप्रसङ्गात् ॥

अनैकान्त इति ॥ परिच्छेदेऽवधारणे । द्वितीयं दूषयति ॥ आकाङ्क्षेति ॥ आकाङ्क्षायाः सत्त्वमात्रेणैव कारणतया लिङ्गविशेषणत्वमनुपपन्नमित्यर्थः । योग्यताऽऽसत्तिमात्रेण विशेषणे दोषमाह ॥ योग्येति ॥ न बन्धनं सम्बन्धो व्याप्तिरूपो यस्यां, सा तथा । निराकाङ्क्षे व्यभिचारादित्यर्थः ॥

संसृष्टा एवेति ॥ नच सम्भावना नियमो वा न साध्यः, किन्तु

संसृष्टा इत्येव साध्यमिति वाच्यम् । संसर्गव्यभिचार्यव्यभिचारि-साधारणतया ययोरेव घटानयनयोः परस्परसंसर्गो न जातस्तेनैव व्यभिचारादिति भावः ॥ तदुक्तेरपीति ॥ भ्रान्तेन पित्रादिनाऽप्यप्रतारकेणोक्तपदानां तदर्थानां वा संसर्गाभावादित्यर्थः । ननु पदार्थज्ञानमात्रनिरूपणादभ्रान्तत्वनिरूपणमस्त्वित्यत आह ॥ पदार्थेति ॥ तस्य चेति ॥ आप्तोक्तत्वरूपविशेषणासिद्धेरित्यर्थः ॥ तदेकेति ॥ निश्चयैकफलत्वादित्यर्थः ॥ प्रागेवेति ॥ योग्यतया लिङ्गविशेषणेन सिद्धेरित्यर्थः ॥ तस्येति ॥ एकत्र पदार्थे पदार्थान्तरवैशिष्ट्यस्यैव संसर्गरूपत्वादित्यर्थः ॥ विशेषेति ॥ नीलेन गुणसामान्यमाक्षिप्यते, सरोजेन द्रव्यमात्रं, तयोश्चाविनाभावोऽस्त्येवेत्यर्थः ॥ अहो इति ॥ जलान्वितनद्या आश्चर्यीभूतकच्छे साकाङ्क्षतापत्तावेकवाक्यतापातादित्यर्थः ॥ रक्त इति ॥ यथा रक्तः पटो भवतीत्यत्र रक्तपदार्थान्वयं विना पटो भवतीत्येकदेशो न पर्यवस्यति, तथा रक्तपदं विना यत्र पटो भवतीत्येव वाक्यमुद्भावितं, तत्रापि तन्न पर्यवस्येदित्यर्थः । अजिज्ञासोरपि वाक्यार्थज्ञानाच्चेति भावः ॥

गुणक्रियाद्यशेषविशेषजिज्ञासायामपि पदस्मारितविशेषजिज्ञासा आकाङ्क्षा । पट इत्युक्ते किंरूपः कुत्र किं करोतीत्यादिरूपजिज्ञासा । तत्र भवतीत्युक्ते किं करोतीत्येषैव पदस्मारितविषया, न तु किंरूप इत्यादिरपि । यदा तु रक्त इत्युच्यते, तदा किंरूप इत्येषाऽपि स्मारितविषया स्याद् , इति न किञ्चिदनुपपन्नमिति चेत् । एवं तर्हि चक्षुषी निमील्य परिभावयतु भवान् । किमस्यां जातायामन्वयप्रत्ययोऽथ ज्ञातायामिति ॥

तत्र प्रथमे नानया व्यभिचारव्यावर्त्तनाय हेतुर्विशेषणीयः, मनःसंयोगादिवत् सत्तामात्रेणोपयोगात् । आसत्तियोग्यतामात्रेण विशिष्टस्तु निश्चितोऽपि न गमकः । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यता-

मित्यादौ व्यभिचारात् । द्वितीयस्तु स्यादपि, यद्यनुमानान्तरवस्तत्सद्भावेऽपि तज्ज्ञानवैधुर्यादन्वयप्रत्ययो न जायते । न त्वेतदस्ति, आसत्तियोग्यतामात्रप्रतिसन्धानादेव साकाङ्क्षस्य सर्वत्र वाक्यार्थप्रत्ययात् । निवृत्ताकाङ्क्षस्य च तदभावात् ॥

कथमेष निश्चयः, साकाङ्क्ष एव प्रत्येति, न तु ज्ञाताकाङ्क्ष इतिचेत् तावन्मात्रेणोपपत्तावनुपलभ्यमानज्ञानकल्पनाऽनुपपत्तेः । अन्यत्र तथा दर्शनाच्च । यदा हि दूरादृदृष्टसामान्यो जिज्ञासते कोऽयमिति, प्रत्यासीदँश्च स्थाणुरयमिति प्रत्येति, तदाऽस्य ज्ञातुमहमिच्छामीत्यनुव्यसायाभावेऽपि स्थाणुरयमित्यर्थप्रत्ययो भवति । तथेहाप्यविशेषादृविशेषोपस्थानकाले संसर्गावगतिरेव जायते, न तु जिज्ञासावगतिरिति । न च विशेषोपस्थानात् प्रागेव जिज्ञासाऽवगतिः प्रकृतोपयोगिनी, तावन्मात्रस्यानाकाङ्क्षत्वात् । न चैवम्भूतोऽप्ययमैकान्तिको हेतुः । यदा ह्ययमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामिति वक्तोच्चारयति, श्रोता च व्यासङ्गादिना निमित्तेनायमेति पुत्र इत्यश्रुत्वैव राज्ञः पुरुषोऽपसार्यतामिति शृणोति, तदाऽस्त्याकाङ्क्षादिमत्त्वेसति पदकदम्बकत्वं, न च स्मारितार्थसंसर्गज्ञानपूर्वकत्वमिति ॥

स्यादेतत् । यावत्समभिव्याहृतत्वेन विशेषिते हेतौ नायं दोषः । तथाविधस्य व्यभिचारोदाहरणाऽसंस्पर्शात् । कुतस्तर्हि कतिपयपदश्राविणः संसर्गप्रत्ययः ?। अलिङ्ग एव लिङ्गत्वाध्यारोपात् । एतावाने-

वायं समभिव्याहार इति तत्र श्रोतुरभिमानः। न। तत्सन्देहेऽपि श्रुतानुरूपसंसर्गावगमात्। भवति हि तत्र प्रत्ययो, न जाने किमपरमनेनोक्तमेतावदेव श्रुतं, यद्राज्ञः पुरुषोऽपसार्यतामिति। भ्रान्तिरसाविति चेद् न तावदसौ दुष्टेन्द्रियजा, परोक्षाकारत्वात्। न लिङ्गाऽऽभासजा, लिङ्गाभिमानाभावेऽपि जायमानत्वात्। एतादृक्पदकदम्बप्रतिसन्धानमेव तां जनयतीति चेत्। यद्येवमेतदेवादुष्टं सदभ्रान्तिं जनयत् केन वारणीयम्?। व्याप्तिप्रतिसन्धानं विनाऽपि तस्य संसर्गप्रत्यायने सामर्थ्याऽवधारणात्। चक्षुरादिवत्। नास्त्येव तत्र संसर्गप्रत्ययोऽसंसर्गाग्रहमात्रेण तु तथा व्यवहार इति चेत। तर्हि यावत्समभिव्याहारेणापि विशेषणेनाप्रतिकारः। तथाभूतस्यानाप्तवाक्यस्य संसर्गज्ञानपूर्वकत्वाभावात्। असंसर्गाग्रहपूर्वकत्वमात्रे साध्ये न व्यभिचार इति चेत्। एवन्तर्हि संसर्गो न सिद्ध्येत्। आप्तवाक्येषु सेत्स्यतीति चेन्न। सर्वविषयाऽऽप्तत्वस्यासिद्धेः। यत्र क्वचिदाप्तत्वस्यानैकान्तिकत्वात्। प्रकृतविषये चाप्तत्वसिद्धौ संसर्गविशेषस्य प्रागेव सिद्ध्यभ्युपगमादित्युक्तम्॥

न च सर्वत्र जिज्ञासा निबन्धनम्, अजिज्ञासोरपि वाक्यार्थप्रत्ययात्। आकाङ्क्षापदार्थस्तर्हि कः?। जिज्ञासां प्रति योग्यता। सा च स्मारिततदाक्षिप्तयोरविनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावः। न चैषोऽपि ज्ञानमपेक्षते, प्रतियोगिनिरूपणाऽधीननिरूपणत्वा त्तदभावनिरूपणस्य च विषय-

निरूप्यत्वादिति ॥

गुणक्रियेति ॥ पट इत्युक्ते किंगुणः ? किंक्रियः ? इति जिज्ञासा। तत्र यदा भवतीत्युच्यते,तदा जिज्ञासाविषयस्य क्रियाविशेषस्य पदेन स्मारणात् सैव जिज्ञासा आकाङ्क्षा । रक्त इत्युक्तौ किंगुण इत्यपि सेत्यर्थः ॥ सत्तामात्रेणेति ॥ स्वरूपसदाकाङ्क्षायोग्यतादिसाचिव्या-च्छन्द एव ज्ञानजनने सम्भृतसामग्रीको लिङ्गमेव विलम्बितमिति भावः ॥ व्यभिचारादिति ॥ राजपदार्थपुरुषपदार्थयोरन्योन्यान्वये व-क्तृज्ञानाभावादित्यर्थः ॥ अनुमानान्तरवदिति ॥ अनुमितिकारणान्तर-व्याप्त्यादिवदित्यर्थः । यद्यऽपि प्रतिपदार्थान्विनाकाङ्क्षायास्तत्काल एव नाशान्न कालान्तरे सत्त्वं,तज्ज्ञानहेतुत्वञ्च संस्कारद्वारा सम्भव-ति, तथापि पदार्थसमूहविषयाया एकस्या एवाकाङ्क्षायाः स्वरूप-सत्त्वमस्त्येवेति भावः ॥ विशेषोपस्थानेति ॥ अन्वयप्रतियोगिपदार्थ-स्मरणानन्तराव्यवहितकाले इत्यर्थः ॥

नन्वाकाङ्क्षा ज्ञाताऽन्वयधीहेतुः ज्ञायमानकरणे ज्ञानोपयोगिव्य-भिचारिवैलक्षण्याद् व्याप्तिवत् । न चाप्रयोजकत्वम् । आकाङ्क्षासत्त्वे-ऽपि ज्ञानादन्वयबोधाभावापातात् । राजा पुत्रमाकाङ्क्षति पुरुषं वेति संशये तद्विपर्यये वाऽन्वयधीप्रतिबन्धाच्च ॥

अत्रास्मत्पितृचरणाः । प्रवृत्तिपरत्वं शब्दस्य लिङ्गत्वे न स्यात् । अर्थज्ञानं हि प्रवर्त्तकं न तु तज्ज्ञानज्ञानं, गौरवात् । तदभावेऽप्यर्थ-ज्ञानात् प्रवृत्तेश्च । अतो वक्ता घटज्ञानवानिति ज्ञानं न प्रवर्त्तकमपि स्वयं घट इति । घटज्ञानज्ञानमपि घटविषयमितिचेत् । सत्यम् । न तु घटत्वप्रकारकं, प्रवर्त्तकञ्च तथा । अन्यथा, भ्रान्तस्यैव भ्रान्तिज्ञस्या-ऽपि प्रवृत्तिप्रसङ्गः। अत एव, लक्षणानानार्थाद्यन्वयबोधात् तात्पर्यग्रहो वाक्यार्थधीहेतुस्तच्च पदार्थसंसर्गविशेषज्ञानोद्देश्यकत्वमतस्तद्ग्राह-कानुमानादेव तात्पर्यज्ञानावच्छेदकतया संसर्गसिद्धिरित्यपास्तम् । तात्पर्यज्ञानं न वाक्यार्थहेतुरिति वक्ष्यमाणत्वाच्च । अपि चानुमिते-र्व्यापकतावच्छेदकमात्रप्रकारकत्वात् पदानि स्मारितार्थसंसर्गज्ञान-पूर्वकानीत्यनुमितिः स्यान्न घटज्ञानपूर्वकानीति । योग्यतायाश्च लाघवात् संशयादिसाधारणं ज्ञानमात्रं हेतुः । बाधसंशयस्य ज्ञाना-प्रतिबन्धकत्वाच्च। अन्यथा प्रमामात्रोच्छेदप्रसङ्गात् । स्वपरबाधक-प्रमाविरहः क्वचिन्निश्चीयतेऽपि यथेह भूतले घटो नास्तीत्यत्र स्व-

योग्यानुपलब्ध्या घटाभावनिश्चयेनान्यस्यापि घटाप्रमाविरहो निश्चीयते। अत एव सा न लिङ्गविशेषणम्। बाधकप्रमामात्रविरहस्य सर्वत्र निश्चेतुमशक्यत्वात्, तत्संशयेऽपि शब्दादन्वयबोधाल्लिङ्गविशेषणस्य च सर्वत्र निश्चितत्वादिति सङ्क्षेपः॥

एतदेवाभिसन्धाय पूर्वापरितोषेणाह॥नचैवमिति॥ आकाङ्क्षादेर्ज्ञायमानतया हेतुविशेषणत्वेऽपीत्यर्थः॥ तत्सन्देह इति॥ यावत्समभिव्याहृतत्वसन्देहेऽपीत्यर्थः॥ भ्रान्तिरसाविति॥ कतिपयपदश्राविणो यः संसर्गप्रत्यय इत्यर्थः॥ व्याप्तीति॥ शब्दो न लिङ्गतया ज्ञापकः व्याप्त्यादिज्ञानरहितस्यापि दोषवतः, अविपर्य्ययहेतुत्वाच्चक्षुर्वदित्यर्थः॥ नास्त्येवेति॥ कतिपयपदश्रवणं यत्रेत्यर्थः। संसर्गे बाधकाच्चेति भावः॥ एवं तर्हीति॥ असंसर्गाग्रहपूर्वकत्वसिद्धावपि तस्याप्रवर्त्तकत्वात् प्रवर्त्तकं संसर्गज्ञानं न स्यादित्यर्थः॥ सर्वेति॥ आप्तोक्तत्वस्य च लिङ्गविशेषणतया ज्ञातस्यैव हेतुत्वादित्यर्थः॥ सिद्धाभ्युपगमादिति॥ सिद्धाभ्युपगमप्रसङ्गादित्यर्थः। तथा च शब्दस्यानुवादकत्वेनाप्रामाण्यापत्तिरिति भावः। तदेवं पदस्मारितपदार्थविषया जिज्ञासेत्यङ्गीकृत्य उक्तं, सम्प्रति तामप्यव्यापकतयाऽऽस्कन्दितुमाह॥न चेति॥ अथ योग्यतैव केत्यत आह॥सा चेति॥ शब्दस्मारितयोरविनाभावो, यथौदनं पचतीत्यत्र क्रियाकारकयोः। तदाक्षिप्तयोरविनाभावो यथा नीलं सरोजमस्तीत्यत्र विशेषाक्षिप्तयोर्द्रव्यगुणसामान्ययोः। प्रतिपादके संसर्गज्ञानप्रागभावो नास्तीत्यत उक्तं, श्रोतरीति॥ वाक्यान्तरोच्चारणेन तत्रापि सोऽस्तीत्यत उक्तं, तदुत्पाद्येति॥ तद्वाक्योच्चारणजन्य इत्यर्थः॥ प्रतियोगीति॥ संसर्गाऽवगमप्रागभावो हि प्रतियोगिनि तदवगमे ज्ञाते ज्ञातव्यः, स च स्वविषये संसर्गे ज्ञाते बोद्धव्य इति संसर्गस्य प्रागेव ज्ञानाद्वाक्यस्याऽनुवादकत्वादप्रामाण्यापत्तिरित्यर्थः॥

ननु निराकाङ्क्षे तदुच्चारणजन्यसंसर्गज्ञानप्रागभावस्य सिद्धाऽसिद्धिभ्यां व्याघातः। प्रागभावस्य च कार्यमात्रहेतुत्वान्न शब्दासाधारण्यम्। प्रागभावाभावस्य च कारणान्तराभावव्याप्यत्वात्ततएव कार्याभाव इति आकाङ्क्षा न हेतुः स्यात्। योग्यताऽऽसत्त्योरकारणत्वापत्तिश्च। अयोग्यानासन्नयोस्तदुच्चारणजन्यसंसर्गधीप्रागभावाभावादेवान्वयबोधानुत्पत्तेः॥

अथ ज्ञाप्यतदितरान्वयप्रकारकजिज्ञासानुकूलोपस्थितिहेतुत्वे सत्यऽजनिततात्पर्यविषयान्वयबोधकत्वमाकाङ्क्षा । घटमानयतीत्यत्र हि घटमित्युक्ते किमानयति पश्यति वा, आनयतीत्युक्ते किं घटमन्यद्वेति जिज्ञासा भवति । गौरश्व इत्यत्र नाभेदेनान्वयोऽयोग्यत्वात्। राज्ञ इति पुत्रेण जनितान्वयबोधत्वान्न पुरुषमाकाङ्क्षति । मैवम् । नामविभक्तिधात्वाख्यातार्थानां घटकर्मत्वानयनकृतीनां स्वरूपेणोपस्थितिर्नान्वयप्रकारकजिज्ञासानुकूलेति तत्राकाङ्क्षाविरहापत्तेः । घटः कर्मत्वमानयनं कृतिरित्यत्र घटमानयतीत्यत्रेवान्वयबोधापत्तेश्च ॥

अत्राहुः । अभिधानापर्यवसानमाकाङ्क्षा । येन विना यस्य न स्वाऽर्थान्वयानुभावकत्वं,तस्य तदपर्यवसानम् ।नामविभक्तिधात्वाख्यातक्रियाकारकपदानां परस्परं विना न स्वार्थान्वयानुभावकत्वम् । घटः कर्मत्वमानयनं कृतिरित्यत्राभेदेन नान्वयज्ञानमयोग्यत्वात् । योग्यता च बाधकमानाभावः । अन्यत्र यद्बाधकं तदभावस्यायोग्येऽपि सत्त्वात् । प्रकृतसंसर्गे च न तदभावः, सिद्ध्यसिद्धिव्याघातात् । न च प्रकृतसंसर्गेऽन्यत्र सिद्धबाधकमानाभावः, प्रकृतसंसर्गस्य प्रागप्रतीतेः । स्वबाधकप्रमाणविरहस्यायोग्येऽपि सत्त्वात् । सकलतदभावस्य च ज्ञातुमशक्यत्वात् । न च स्वरूपसन्नेवायं हेतुः । योग्यताभ्रमादन्वयबोधानुपपत्तेः । नापि सजातीयेऽन्वयदर्शनं, यथाकथञ्चित् साजात्यस्याव्यवर्त्तकत्वात् । पदार्थतावच्छेदकरूपेण च तस्य वाक्यार्थापूर्वतया निरासात् । नापि समभिव्याहृतपदार्थसंसर्गाभावव्याप्यधर्मशून्यत्वं, प्रमेयमभिधेयमित्यादौ संसर्गाभावाप्रसिद्धा तदनिरूपणात् । नापि समभिव्याहृतपदार्थसंसर्गव्याप्यधर्मवत्त्वं, वाक्यार्थस्यानुमेयतापत्तेः । किं त्वितरपदार्थसंसर्गे अपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावो योग्यता । प्रमेयमभिधेयमित्यत्र प्रमेयनिष्ठात्यन्ताभावप्रतियोगिप्रमाविशेष्यत्वं गोत्वे प्रसिद्धम्, अभिधेयत्वसंसर्गे च तदभावः । आसत्तिश्चाव्यवधानेनाऽन्वयप्रतियोगिस्मृतिरिति सङ्क्षेपः ॥

प्रसङ्गसङ्गतेराह—

**प्राभाकरास्तु, लोकवेदसाधारणव्युत्पत्तिबलेनाऽन्विताभिधानं प्रसाध्य वेदस्यापौरुषेयतया वक्तृ-**

ज्ञानानुमानानवकाशात् संसर्गे शब्दस्यैव स्वातन्त्र्येण प्रामाण्यमास्थिषत । लोके त्वनुमानत एव वक्तृज्ञानोपसर्जनतया संसर्गस्य सिद्धेरन्विताभिधानबलायातेऽपि प्रतिपादकत्वेऽनुवादकतामात्रं वाक्यस्येति निर्णीतवन्तः । तदतिस्थवीयः ॥

निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये ॥
व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता ॥ १४ ॥

यावती हि वेदे सामग्री, तावत्येव लोकेऽपि भवन्ती कथमिव नार्थं गमयेत् । न ह्यपेक्षणीयान्तरमस्ति । लिङ्गे तु परिपूर्णेऽप्यवगते व्याप्तिस्मृतिरपेक्षणीयाऽस्तीति विलम्बेन किं निर्णेयम् ? । अन्वयस्य प्रागेव प्रतीतेः ॥

लोके वक्तुराप्तत्वनिश्चयोऽपेक्षणीय इतिचेन्न । तद्रहितस्यापि स्वार्थप्रत्यायने शब्दस्य शक्तेरवधारणात् । अन्यथा वेदेऽप्यर्थप्रत्ययो न स्यात्, तदभावात् । न च लोके अन्यान्येव पदानि, येन शक्तिवैचित्र्यं स्यात् । अनाप्तोक्तौ व्यभिचारदर्शनात् तुल्याऽपि सामग्री सन्देहेन शिथिलायत इति चेन्न । चक्षुरादौ व्यभिचारदर्शनेन शङ्कायामपि सत्यां ज्ञानसामग्रीतस्तदुत्पत्तिदर्शनात् ॥

ज्ञायमानस्यायं विधिर्यत्सन्देहे सति निश्चायकं, यथा लिङ्गं, चक्षुरादि तु सत्तयेति चेन्न । वाक्यस्य निश्चितत्वात् फलप्रामाण्यसन्देहस्य च फलोत्तरकालीनत्वात् । आप्तोक्तत्वस्य चार्थप्रत्ययं प्रत्यनङ्गत्वात् । लोकेऽपि चाप्तत्वानिश्चयेऽपि वाक्यार्थप्रतीतेः । भव-

ति हि वेदानुकारेण पठ्यमानेषु मन्वादिवाक्येषु अपौरुषेयत्वाभिमानिनो गौडमीमांसकस्यार्थनिश्चयः । न चासौ भ्रान्तिः, पौरुषेयत्वनिश्चयदशायामपि तथा निश्चयादिति ॥

स्यादेतत् । नाप्तोक्तत्वमर्थप्रतीतेरङ्गमिति ब्रूमः । किन्त्वनाप्तोक्तत्वशङ्कानिरासः । स च क्वचिदपौरुषेयत्वनिश्चयात्, क्वचिदाप्तोक्तत्वावधारणादिति चेत् । तत् किमपौरुषेयत्वस्याप्रतीतौ सन्देहे वा वेदवाक्याद्विदितपदार्थसङ्गतेरर्थप्रत्यय एव न भवेत्, भवन्नपि वा न श्रद्धेयः ? । प्रथमे मत्याद्य एव प्रमाणम् । न चासंसर्गाग्रहे तदानीं संसर्गव्यवहारो बाधकस्यात्यन्तमभावात् । तथापि तत्कल्पनायामन्वयोच्छेदप्रसङ्गात् । द्वितीये त्वश्रद्धा प्रत्यक्षवन्निमित्तान्तरान्निवत्स्यतीति वेदे यदि, लोकेऽपि तथा स्यादविशेषात् ॥

प्राभाकरास्त्विति ॥ लोकेति ॥ य एव लौकिकास्त एव वैदिका इति भावः ॥ व्युत्पत्तिबलेनेति ॥ व्यवहारेणेतरान्वितपदार्थज्ञानस्यैव स्वकारणस्यानुमितेरित्यर्थः ॥

वेदे क्लृप्तसामग्रीतो लोकेऽपि संसर्गानुभवादन्यथा त्वनुवादकताऽपि न स्यादित्याह ॥ निर्णीतेति ॥ आकाङ्क्षादिमत्तया ज्ञानात् प्राग् लिङ्गज्ञानाभावात् तद्वत्तया च ज्ञाने वेदतुल्यतयाऽन्वयबोधे विलम्बाभावादन्यथा वैदिकवाक्यादपि स न स्यात् । तस्य लौकिकोपजीवकत्वादिति भावः । प्रत्युतानुमाने व्याप्तिस्मृत्यादिविलम्बादनुमितिविलम्बेन तस्यैवानुवादकत्वमित्याह ॥ व्याप्तिस्मृतीति ॥ लोके इति ॥ स च न वक्तृज्ञानानुमानं विनेति भावः । तं विनाऽपि वेदादन्वयबोधाद्व्यभिचारात् स न तत्र हेतुरित्याह ॥ तद्रहितस्याऽपीति ॥ य एव लौकिकास्त एव वैदिकास्त एवामीपामर्था इत्याह ॥ न चेति ॥ यथा स्थाणुपुरुषसंशये चक्षुर्न निश्चायकं, तथाऽऽप्तोक्तत्वानाप्तोक्तत्वसन्देहे तुल्याऽपि सामग्री न निश्चायिकेत्याह ॥ अनाप्तो-

काविति ॥ यथा समानविषयकसन्देहस्यैव प्रतिबन्धकत्वाद्भिन्न-विषयकोऽप्रमाजनकत्वसंशयो न चाक्षुषनिश्चयप्रतिबन्धकः, तथाऽऽप्तोक्तत्वसन्देहोऽपि न शाब्दनिश्चयप्रतिबन्धक इत्याह ॥ चक्षुरादाविति ॥ सन्देहः किं वाक्यस्वरूपे, तज्जनितज्ञानप्रामाण्ये वा, आप्तोक्तत्वे वा ? । आद्ये, वाक्यस्येति ॥ द्वितीये, फलेति ॥ अन्त्ये, आप्तोक्तत्वस्येति ॥ न चाप्रमाजनकत्वे सन्देहः, तत्प्रतिबन्धकत्वे मानाभावादिति भावः । ननु लोके आप्तोक्तत्वसन्देहे वाक्यार्थज्ञानानुदयात् तन्निश्चयस्तद्धेतुः, तथा च वाक्यार्थगोचरपदार्थज्ञानजन्यत्वग्राहकात् तदुपजीविनोऽनुमानाद्वाक्यार्थधीरित्यत आह ॥ लोकेऽपीति ॥ बाधकस्येति ॥ न चाप्तोक्तत्वकारणबाध एव बाधक इति वाच्यम् । व्यभिचारात् तद्धेतुतायामेव बाधात् । नापि लौकिकत्वेन ज्ञाते तद्धेतुः । मानाभावात् । आप्तोक्तत्वस्य च ज्ञातुमशक्यत्वात् । वाक्यार्थस्यापूर्वत्वादिति भावः । यथोत्पन्नप्रत्यक्षज्ञाने प्रामाण्यग्राहकादप्रामाण्यशङ्कात्मकाऽश्रद्धापगमः, तथा वेदवाक्यजेऽपीत्याह ॥-द्वितीये न्विति ॥

यदि चापौरुषेयत्वनिश्चये सत्येव वेदार्थधीः, तदैते पदार्था मिथः-संसृष्टाः दोषवत्पुरुषाप्रणीताकाङ्क्षादिमत्पदस्मारितत्वादिति वेदेऽन्वयधीरस्त्विति वेदोऽप्यनुवादकः स्यादित्याह—

अन्यथा वेदस्याप्यनुवादकताप्रसङ्गः । तदुच्यते ।
व्यक्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी ॥
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः ॥ १५ ॥

यदा ह्यपौरुषेयत्वनिश्चयात् प्राग् वेदो न किञ्चिदभिधत्ते इति पक्षः, तदाऽऽप्तोक्तत्वनिश्चयोत्तरकालं लोकवद् वेदेऽप्यपौरुषेयत्वनिश्चयात् पश्चादनुमानावतारः । इयांस्तु विशेषो यदत्र पदार्थानेव पक्षीकृत्य निरस्तपुंदोषाशङ्कैराकाङ्क्षादिमद्भिः पदैः स्मारितत्वादाप्तोक्तपदकदम्बकस्मारितपदार्थवत् संसर्ग एवाहत्य साध्यो बुद्धिव्यवहितास्त्वितरत्रेति फलतो न कश्चि-

**द्विशेष इति । तथा चान्विताभिधानेऽपि जघन्यत्वा-द्वेदस्यानुवादकत्वप्रसङ्गः । न चैवं सति तत्र प्रमाण-मस्ति । विशिष्टप्रतिपत्त्यन्यथानुपपत्त्या हि शब्दस्य तत्र शक्तिः परिकल्पनीया, सा चानुमानेनैवोपपन्नेति वृथा प्रयासः । तस्माल्लोके शब्दस्यानुवादकतेति वि-परीतकल्पनेयमायुष्मताम् ॥**

अन्यथेति ॥ तथाच शब्दः प्रमाणमेव न स्यात्, सर्वत्रानुमाना-देव वाक्यार्थप्रमोत्पत्तेरिति भावः ॥ बुद्धीति ॥ वक्तृज्ञानावच्छेदक-तयेत्यर्थः । इतरत्र, लौकिकवाक्ये । किञ्चैवं लोकवेदसाधारणादनु-मानादेव वाक्यार्थप्रमोत्पत्तौ वेदस्य तत्र सामर्थ्यानवधारणादन्विते शक्तावपि न मानमित्याह ॥ न चैवमिति ॥ तत्रेति ॥ अन्विते शक्ता-वित्यर्थः ॥ सा, विशिष्टप्रतीतिः ॥विपरीतेति॥ लोके सम्भृतसामग्री-कत्वेन शब्दस्यैव पूर्वं बोधकत्वाद्व्याप्तिस्मृतिविलम्बेन लिङ्गमेवा-ऽनुवादकमित्यर्थः । यद्वा, अन्विते पदानां शक्तिर्लोके चानुवादकः शब्द इति विरुद्धकल्पनेत्यर्थः ॥

नवीनास्तु– अप्रमाणशब्दव्यावृत्तं प्रमाणशब्दानुगतं प्रामाण्य-प्रयोजकं किञ्चित् कार्यवैलक्षण्यान्यथानुपपत्त्या कल्प्यम् । तच्च ज्ञातं तत्प्रयोजकं, ज्ञायमानकरणे ज्ञानोपयोग्यप्रमाणवैलक्षण्यत्वात्, व्याप्त्यादिवत् । न चाप्तोक्तत्वदोषाभावौ तथा, भ्रान्तप्रतारकवाक्य-जे ज्ञाने तदभावात् । किन्तु यथार्थतात्पर्यकत्वम् । तच्च यथार्थ-वाक्यधीप्रयोजनकत्वं लोकवेदसाधारणं, तदभावाच्चाप्रमा, स एव दोषः । तत एव भ्रान्तप्रतारकवाक्यं संवादिशुकादिवाक्यञ्च प्रमाण-म् । तच्च ज्ञातमुपयोगि, ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारि-वैलक्षण्यत्वादित्युक्तम् । अन्यथा, अन्यपरस्यान्वयबोधो न स्यात् । न स्याच्च यष्टीः प्रवेशयेत्यत्र लक्षणा नानार्थे विनिगमना च, तयोस्ता-त्पर्यग्रहमूलकत्वात् । न च तात्पर्यग्राहकप्रकरणादेः प्राथम्यादा-वश्यकत्वाच्च शब्दसहकारित्वमिति वाच्यम् । तेषामननुगमेनाहेतु-त्वात् । तात्पर्यग्राहकता त्वननुगतानामपि व्याप्यत्वात्, धूमादीना-मिव । नच्च तात्पर्यं वेदे न्यायगम्यं, लोके च न्यायाविषयेऽपि पुंसां

तात्पर्याच्च तन्न्यायगम्यमपि तु प्रथममाप्तवाक्याद्वक्तृज्ञानानुमानपूर्वकमर्थतथात्वमवधार्य तन्निश्चयः। अनुमानं च, इदं वाक्यं भ्रमादिविशिष्टज्ञानान्यतरज्ञानजन्यं, वाक्यत्वात् । ततो भ्रमादिनिरासे सति परिशेषाद्वाक्यार्थानुमानम् । अयं वक्ता स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वात्, अहमिव । तत एते पदार्था यथोचिततत्संसर्गवन्तः यथार्थज्ञानविषयत्वात्,मदुक्तपदार्थवत् । एवं वक्तुर्वाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्त्रभिप्रेतयथार्थज्ञानपरत्वज्ञानम् । ततो वेदतुल्यतया शब्दादर्थज्ञानमित्यनुवादकः शब्दो वक्तृज्ञानावच्छेदकतया वाक्यार्थस्य प्रागेव सिद्धेरित्याहुः ॥

मैवम् । यथार्थप्रतीतिपरत्वस्य ज्ञातस्य प्रमाऽनुत्पादकत्वात् । अपूर्ववाक्यार्थनिरूप्यतया तस्य पूर्वं ज्ञातुमशक्यत्वात् । गौरवाच्च । न वा भ्रमाजन्यत्वग्रहः, वाक्यार्थमज्ञात्वाऽत्रायमभ्रान्त इति निश्चेतुमशक्यत्वात् । पुंसो भ्रमादिसम्भवात् । न च संवादात्तद्ग्रहः, तस्य ज्ञानोत्तरकालीनत्वात् । न च भ्रमादिजन्यवैलक्षण्येन शब्दज्ञानमस्ति । ज्ञाने वा यादृशो लिङ्गत्वं तादृशः प्रत्यायकत्वमेवास्तु । किञ्च, पुंवाक्यस्य भ्रमादिविशिष्टज्ञानान्यतरजन्यत्वेऽनुमिते परिशेषाद्भ्रमाद्यजन्यत्वनिश्चयदशायां वेदतुल्या सामग्री लौकिकवाक्येऽपि वृत्तेति तत एवार्थस्य निश्चयाद्वेदवत् तस्यापि प्रामाण्यम् । अनुमितावनुमानस्य व्याप्तिस्मृत्यादिविलम्बितत्वात् । यदि च यथार्थतात्पर्यकत्वज्ञानं प्रमोत्पादकं, तदा लोकवेदयोस्तादृशपदस्मारितत्वेन पदार्थसंसर्गानुमितिसम्भवाच्च शब्दः प्रमाणं स्यात् । अनेकार्थे श्लिष्टे चानेकोपस्थितावपि प्रकरणादेकम आदायान्वयबोधः । लक्षणाऽपि न तात्पर्यानुपपत्त्या, किन्त्वन्वयानुपपत्त्येत्युक्तम् । यद्वा नानार्थे लक्षणायाञ्च नियतपदार्थोपस्थित्यर्थं पदार्थे तात्पर्यग्रहापेक्षा, तेन विना तदभावात् । न वाक्यार्थे । अन्यत्रान्वयप्रतियोग्युपस्थितिस्तात्पर्यग्रहं विनैवेति न तदपेक्षेत्यस्मत्पितृचरणाः ॥

इदानीं प्रसङ्गागतं पदानाम् अन्विताभिधानं विकल्प्य सिद्धसाधनादिना निराकरोति—

**किं चेदमन्विताभिधानं नाम ? । न तावदन्वित-**

प्रतिपादनमात्रम् । अविवादात् । नापि स्वार्थाभिधाया-
स्तत्र तात्पर्यम् । अविवादादेव । नापि सङ्गतिबलेन
तत्प्रतिपादनं, वाक्यार्थस्यापूर्वत्वात् । नापि स्वार्थ-
सङ्गतिबलेन, तस्य स्वार्थ एवोपक्षयात् । नापि सैव
सङ्गतिरुभयप्रतिपादिका, प्रतीतिक्रमानुपपत्तेः । यौग-
पद्याभ्युपगमे तु योग्यत्वादिप्रतिसन्धानशून्यस्यापि
पदार्थप्रत्ययवद् वाक्यार्थप्रत्ययप्रसङ्गात् । नापि सैव
सङ्गतिः स्वार्थे निरपेक्षा,वाक्यार्थे तु पदार्थप्रतिपादना-
ऽवान्तरव्यापारेति युक्तम् । तस्याः स्वयमकरणत्वात् ।
सङ्गतानि पदानि हि करणं, न तु सङ्गतिः । तथापि
तत्प्रतिपादनानुगुणसङ्गतिशालीनि पदानीतिचेत् । न
तावद्वाक्यार्थप्रतिपादनानुगुणता सङ्गतेस्तदाश्रयत्वेन,
सामान्यमात्रगोचरत्वात् तद्धन्मात्रगोचरत्वाद् वा ।
नाऽपि तदनुगुणव्यापारवत्त्वेन,अकरणत्वादित्युक्तम् ।
तदनुगुणकरणव्यापारोत्थापकत्वात्तदनुगुणत्वे न नो
विवादः । अन्वित एव शक्तिरिति चेत् । उक्तमत्र
वाक्यार्थस्यापूर्वत्वात् प्रतीतिक्रमानुपपत्तेश्चेति । स्मृत-
क्रियान्विते कारके स्मृतकारकान्वितायाश्च क्रियायां
सङ्गतिरतो नोक्तदोषावकाशः । नाऽपि पर्यायता-
पत्तिः, प्राधान्येन नियमात् । नापि पौनरुक्त्यं, विशेषा-
ऽन्वये तात्पर्यात् । नापीतरेतराश्रयत्वम् । स्वार्थस्मृता-
वनपेक्षणात् । नापि वाक्यभेदापत्तिः । परस्परपदा-
ऽर्थस्मृतिसन्निधौ तदितरानपेक्षणादिति चेत् । न ।
अन्विते सङ्गतिग्रह इति कोऽर्थः ? यदि यत्र सङ्गति-
स्तद्वस्तुगत्या पदार्थान्वितं, न किञ्चित् प्रकृतोपयोगि ।

**न हि यत्र चक्षुषः सामर्थ्यमवगतं तद्वस्तुगत्या स्पर्शवादिति तद्वत्ताऽपि तस्य विषयः । अथान्वितत्वैव तत्र व्युत्पत्तिरित्यर्थः । तदसत् । प्रमाणाभावात् ॥**

किं चेति ॥ अविवादादिति ॥ पदानां साक्षाद्वाक्यार्थानभिधायकत्वेऽप्यन्वितस्वार्थाभिधानद्वारा अन्वितज्ञानोत्पादकत्वाङ्गीकारादित्यर्थः ॥ नापीति ॥ स्वार्थे पदानां शक्तिस्तस्या इतरान्वितस्वार्थप्रतीतिप्रयोजनकत्वस्याभिहितान्वयपक्षेऽप्युपगमादित्यर्थः । संगतिः, शक्तिग्रहः । सा किं प्रत्याय्ये वाक्यार्थे पदार्थमात्रे वा ? । आद्ये, वाक्यार्थस्येति ॥ उपस्थिते हि शक्तिग्रहः, न च शब्दानुभवात् । पूर्वं वाक्यार्थस्योपस्थितिरिति कुत्र शक्तिर्गृह्येतेत्यर्थः । अन्त्यमाशङ्क्य निराकरोति ॥ नापीति । पदार्थशक्त्या तन्मात्रमुपस्थापयेन्न त्वन्वितमित्यर्थः । न च स्वार्थसङ्गतिरेव स्वार्थतदन्वितयोः प्रतिपादिकेत्याह ॥ नापीति ॥ अपेक्षणीयाभावात् पदार्थस्मृतिकाल एवान्वितमपि प्रतिपादयेदित्यर्थः । न चेष्टापत्तिः, पदार्थस्मृत्यनन्तरं तेषां योग्यतादिज्ञानापेक्षयाऽन्वितानुभवोत्पादात्तदनपेक्षायाञ्चातिप्रसङ्गादित्याह ॥ यौगपद्येति ॥ ननु पदार्थे सङ्गतिरन्वितज्ञाने कर्त्तव्ये पदार्थस्मृतिमपेक्षते इति क्रमः स्यादित्याह ॥नापीति॥ तस्या इति ॥ करणानामवान्तरव्यापारयोगः । न च सङ्गतिः करणं, किन्तु पदानि, तेषामन्वयाद्यनुविधानादित्यर्थः ॥ तथापीति ॥ करणमित्यनुषज्यते। तथाच सङ्गतेः करणकोटावन्तर्भाव इति तस्या अवान्तरव्यापारयोग इति भावः । सङ्गतेर्वाक्यार्थज्ञानानुकूलत्वं साक्षाद्वाक्यार्थधीजनकत्वं, वाक्यार्थज्ञानानुकूलव्यापारवत्त्वं, तदनुकूलपदार्थस्मृतिहेतुत्वं वा ? तत्र नाद्य इत्याह ॥ न तावदिति ॥ अस्य पदस्येदं वाच्यमिति पदार्थाश्रयत्वेन सङ्गतेर्ग्रहान्न वाक्यार्थाश्रयत्वमित्यर्थः । न चान्याश्रया सङ्गतिरन्यद् बोधयत्यतिप्रसङ्गादिति भावः ॥ सामान्यतद्वन्मात्रेति मतभेदेन द्रष्टव्यम् । द्वितीयमाशङ्क्य निराकरोति ॥ नापीति ॥ विशिष्टस्य करणत्वेऽपि विशेषणमात्रस्यातत्त्वादिति भावः । अन्त्ये तु विवादपर्यवसानमित्याह ॥ तदनुगुणेति ॥ ननु वृद्धव्यवहारादन्वित एव पदानां शक्तिरित्याशङ्क्योक्तयुक्त्या निराकरोति ॥ अन्वित एवेति ॥ नन्वन्वयविशेषे न शक्तिर्येनोक्तदोषः स्यात्, किन्तु क्रिया-

कारकयोरन्योन्याविनाभावादन्वयसामान्यम् उपस्थितमिति तत्रैव शक्तिग्रह इत्याह ॥ स्मृतेति॥ क्रियाकारकान्वयविशेषस्य च वाक्यार्थत्वान्न तदपूर्वत्वभङ्ग इत्यर्थः। नन्वेवं क्रियाकारकपदयोः पर्यायताऽऽपत्तिः, ताभ्यां कारकक्रिययोरप्युपस्थापनादित्यत आह ॥ नाऽपीति ॥ प्राधान्येनेति ॥ क्रियापदं कारकमभिदधदपि कारकाविशेष्यां क्रियामाह, कारकपदञ्च क्रियामप्यभिदधत् क्रियाविशेष्यं कारकमाहेति विशेषणविशेष्यभावभेदेनार्थभेदादित्यर्थः । ननु क्रियाकारकविशेषवाचकं पदं पुनरुक्तं, कारकोपहितक्रियादेरितरपदेनैवोपस्थापनादित्यत आह ॥ नापीति॥ विशेषेति ॥ सामान्यज्ञानेऽपि तद्विशेषज्ञापनाय विशेषपदमित्यर्थः । ननु कारकपदात् कारकोपस्थितिमपेक्ष्य क्रियापदेन तद्विशिष्टा क्रियोपस्थाप्या, कारकपदेन च क्रियापदात् क्रियोपस्थितिमपेक्ष्य तद्विशिष्टं कारकमुपस्थाप्यमित्यन्योन्याश्रय इत्याह ॥ नापीति ॥ स्वार्थेति ॥ कारकक्रियोपस्थितिमनपेक्ष्य क्रियाकारकपदाभ्यां विशिष्टास्मरणादित्यर्थः । नन्वेवं घटाऽन्वितमानयनमानयनान्वितो घट इति विशेषणविशेष्यभावभेदादर्थभेदे वाक्यभेदः स्यादित्यत आह ॥ नापि वाक्येति ॥ यत्रैकस्मिन् वाक्यार्थे पर्यवसन्ने वाक्यार्थान्तरबोधस्तत्र वाक्यभेदोऽत्र तु न तथा, विशेषणविशेष्यमात्रभेदेऽपि घटानयनात्मकार्थस्याभेदादित्यर्थः ॥ यत्रेति ॥ यत्र वाक्यार्थे व्युत्पत्तिः सङ्गतिग्रह इत्यर्थः ॥

प्रमाणाभावादिति ॥ ननु वृद्धव्यवहारेणानुमितेतरान्वितपदार्थज्ञाने पदकरणत्वग्रहादुपस्थितत्वाच्च तत्रैव शक्तिग्रहो न पदार्थज्ञानमात्रे, तस्य व्यवहाराहेतुतया ततोऽनुपस्थितेः । मैवम् । विशिष्टज्ञानस्य विशेष्यविषयत्वनियतेनेतरान्वितपदार्थज्ञानोपस्थितौ विशेष्यस्य पदार्थज्ञानस्याप्युपस्थितेस्तत्रैव शक्तिग्रहाल्लाघवात् । न त्वितरान्वितेऽपि, गौरवात् । न चानन्यलभ्यत्वात्तत्र शक्तिः, पदार्थज्ञानशक्तत्वेन ज्ञातपदस्य स्वार्थस्मृतिद्वाराऽऽवश्यकाकाङ्क्षादिसान्निध्यात् समभिव्याहृतपदार्थेन स्वार्थान्वयानुभावकत्वस्वभावकल्पनात् । न चाशक्यान्वयानुभवेऽतिप्रसङ्गः, शक्यान्वयत्वस्य स्वरूपसतो नियामकत्वात् । अन्वयसामान्यशक्तावपि अन्वयविशेषज्ञानार्थमाकाङ्क्षादेरवश्यमपेक्षणात् । तस्मात् पदार्थानामन्वितज्ञानजकत्वेऽपि यथा जातिवाचकपदानां व्यक्तावेवैव शक्तिर्जात्यंशे ज्ञाता

व्यक्त्यंशे तु स्वरूपसती व्याप्रियते, तथा एकैव शक्तिरन्वयांशे स्वरूपसती पदाऽर्थांशे ज्ञाता व्याप्रियते इति नान्वयांशेऽपि शक्तिः। ज्ञातशब्दशक्तिजन्यज्ञानविषयस्यैव शक्यत्वात् ॥

नन्वन्वये पदानां तात्पर्यं तन्निर्वाहिका च वृत्तिः। न च स्वार्थसम्बन्धिनि स्वान्वये तात्पर्याल्लक्षणा, अन्वयविशेषणतया पदार्थोपस्थितेश्च न वृत्तिद्वयविरोध इति वाच्यम्। वाक्यार्थस्यापूर्वतया अन्वयस्य स्वार्थसम्बन्धित्वेन पूर्वमज्ञानात्। एवञ्चान्वयः पदशक्यः वृत्त्यन्तरं विना पदबोध्यत्वात् पदार्थवदिति। मैवम्। वृत्तिं विनाऽप्युक्तरीत्या पदानामन्वयबोधकत्वसम्भवेनाप्रयोजकत्वात्। अन्यथा शक्त्या तात्पर्यनिर्वाहदर्शनाद् वृत्त्यन्तरोच्छेदात्। अत एव धूमोऽस्तीत्यत्र शक्त्या धूमोपस्थितावनुमानद्वारा वह्नौ तात्पर्यनिर्वाहान्न लक्षणेत्यस्माकं पैतृकः पन्था इति सङ्क्षेपः ॥

उक्तान्यलभ्यत्वमविद्वानाह—

अन्विताथप्रतिपत्त्यन्यथानुपपत्तिरितिचेन्न। अनन्विताभिधानेनाप्युपपत्तेः। आकाङ्क्षाऽनुपपत्तिरस्तु। न हि सामान्यतोऽन्वितानवगमेऽन्वयविशेषे जिज्ञासा स्यात्। न। दृष्टे फलविशेषे रसविशेषजिज्ञासावदाक्षेपतोऽप्युपपत्तेः। शब्दमहिमानमन्तरेण यतः कुतश्चिदपि स्मृतेषु पदार्थेषु अन्वयप्रतीतिः स्यात्। न चैवम्। ततः शब्दशक्तिरवश्यं कल्पनीयेतिचेत्। कुतस्तर्हि कविकाव्यानि विलसन्ति। न हि संसर्गविशेषमप्रतीत्य वाक्यरचना नाम। न च स्वोत्प्रेक्षायां प्रत्यक्षमनुमानं शब्दस्तदाभासा वा सम्भवन्ति, अन्यत्र चिन्तावशेन पदार्थस्मरणेभ्यः। असंसर्गाग्रहोऽसाविति चेत्। मम तावत् संसर्गग्रह एवासौ। तवाऽपि सैव पदावली क्वचिदन्वये पर्यवस्यति क्वचिदनन्वयाग्रहे इति कुतो विशेषात्। आप्तानाप्तवक्तृकतयेति-

चेत् । किं तथाविधेन वक्त्रा तत्र कश्चिद्विशेष आहितः ? आहो वक्तैवावच्छेदकतया विशेषः ? । प्रथमे अभिहितान्वयवादिनामिव तवापि शक्तिकल्पनागौरवम्।द्वितीये तु वक्तुरिव पदानामप्यवच्छेदकतयैवविशेषकत्वमस्तु। एवं तर्हि पदानामप्यन्वयप्रतीतावस्त्युपयोगः । कः सन्देहः । परं पदार्थाभिधानेन, न त्वन्यथा । यथा तवैवाप्तस्य संसर्गपरतया पदसमभिव्याहारमात्रेण, न त्वन्यथा । अन्यथा गुरुमतविदामेव श्लोक आप्तपदप्रक्षेपेण पठनीयः—

प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि ।
आप्तानामेव सा शक्तिर्वरमभ्युपगम्यताम्, इति॥

तस्मात् प्रकारान्तरेण संसर्गप्रत्ययो भवतु मा वा, पदार्थानामाकाङ्क्षादिमत्त्वे सति अभिहितानामवश्यमन्वय इति कुतोऽतिप्रसङ्गः । न चैवं सति पदाऽर्था एव करणं, तेषामनागतादिरूपतया कारकत्वाऽनुपपत्तौ तद्विशेषस्य करणत्वस्यायोगात्। तत्संसर्गे प्रमाणान्तरासंकीर्णोदाहरणाभावाच्च। पदानान्तु पूर्वभावनियमेन पदार्थस्मरणाऽवान्तरव्यापारवत्तया तदुपपत्तेः, व्यापारस्याव्यवधायकत्वादितिकृतं प्रसक्ताऽनुप्रसक्त्या। अस्तु तर्हि शब्द एव बाधकं सर्वज्ञे कर्त्तरि तथाहि—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्त्ताऽहमिति मन्यते, इत्यादि पठन्ति । अस्यायमर्थः । न पारमार्थिकं चेतनस्य कर्तृत्वमस्ति, आभिमानिकं तु तत् । न च सर्वज्ञस्या-

ऽभिमानो, न चासर्वज्ञस्य जगत्कर्तृत्वमस्ति ॥ उच्यते—

न प्रमाणमनाप्तोक्तिर्नादृष्टे कचिदाप्तता ॥
अदृश्यदृष्टौ सर्वज्ञो न च नित्यागमः क्षमः ॥ १६ ॥

यदि हि सर्वज्ञकर्त्रभावावेदकः शब्दो नाप्तोक्तः, न तर्हि प्रमाणम् । अथाप्तोऽस्य वक्ता, कथं न तदर्थदर्शी । अतीन्द्रियार्थदर्शीति चेत् । कथमसर्वज्ञः ? कथं वा न कर्त्ता ? । आगमस्यैव प्रणयनात् । न च नित्यागमसम्भवो विच्छेदादित्यावेदितम् ॥

अन्विताथैति ॥ उक्तमभिप्रेत्याह ॥ अनन्वितेति ॥ पदार्थज्ञानशक्तत्वेन ज्ञानादेव पदादावश्यकाकाङ्क्षादिसहकारिवशादेवान्वयज्ञानसम्भवान्नान्वये शक्तिः कल्प्यते इत्यर्थः ॥ आकाङ्क्षेति ॥ प्रमाणमिति विपरिणतेन सम्बन्धः। ओदनमित्युक्तेऽन्वयविशेषे जिज्ञासाऽस्ति, सा च सामान्यतो ज्ञाते विशेषतश्चाज्ञाते भवतीति तदन्यथाऽनुपपत्त्याऽन्वयसामान्ये शक्तिः कल्प्यते इत्यर्थः ॥ दृष्ट इति ॥ यथा दृष्टे रूपविशेषे रससामान्यमनुमाय तद्विशेषे जिज्ञासा, तथा पदार्थमात्रस्य कोष्ठगत्यान्वयमात्रव्याप्तेरन्वयसामान्यज्ञानोपपत्तेरित्यर्थः ॥ शब्देति ॥ पचतीत्युक्ते प्रत्यक्षाद्युपस्थितकलायादेरन्वयबोधो न भवति, किन्तु पदोपस्थापितस्यैवेत्यन्वयविशेषे शब्दोपयोगादन्वयसामान्ये शक्तिः कल्प्येत्यर्थः ॥

तदेतदिष्टापादनमित्यन्तरा पदार्थकरणवादी भट्टोऽन्विताभिधानवादिनमास्कन्दति ॥ कुतस्तर्हि इति ॥ अन्यथा मानाभावात् संसर्गज्ञानानुदयान्नवकाव्यरचना न स्यादिति पदार्था एव चिन्तावशोपस्थिता अन्वयबोधकाः । यत्रापि पदात् पदार्थोपस्थितिस्तत्रापि पदार्था एवान्वयबोधकाः, न तु पदान्यपि । पदार्थस्मृत्यैवान्यथासिद्धत्वात्। कथमन्यथा श्वेतरूपदर्शनाद्धेषाशब्दश्रवणात् क्षुरविक्षेपशब्दश्रवणाच्छब्दं विना श्वेतोऽश्वो धावतीति धीः। न चैवं पचतीत्युक्ते प्रत्यक्षोपस्थितकलायेनान्वयबोधापत्तिः। शब्दोपस्थिते पदार्थे शब्दोपस्थापितपदार्थान्तरेणैवान्वयात् । शाब्दी ह्याकाङ्क्षा शब्देनैव

पूर्यते इति न्यायात् । अत एव श्रुतार्थापत्तिस्थलेऽपि शब्द एव कल्प्यते इत्यर्थः ॥ असंसर्गेति ॥ उत्प्रेक्षादिवशाद्वाक्यार्थासंसर्गाग्रहः काव्यरचनाहेतुरित्यर्थः ॥ ममेति ॥ मया पदैरप्रतिपादितानामपि पदार्थानां संसर्गप्रमोत्पादकत्वाभ्युपगमान्नासंसर्गाग्रहस्तत्र हेतुरित्यर्थः । त्वयाऽप्येतदभ्युपेयं, गत्यन्तराभावादित्याह ॥ तवापीति ॥ गुरोरपीत्यर्थः ॥ उच्चारणमात्रकर्तृतैव तत्र विशेष इत्यर्थः । यद्याप्तेन तेषु पदेषु कश्चिद्विशेषो नाहितः, तदा नाप्तोक्तान्यन्वयबोधकानि स्युरित्याप्तेन पदनिष्ठातिशयाधानकल्पने यथा पदानां स्वार्थाभिधाने शक्तिस्तत्रान्वयधीहेत्वतिशयाधानशक्तिर्वाक्यार्थधीशक्तिश्चेत्यऽभिहितान्वयपक्षे गौरवं, तद्वत्तवाप्तानां पदोच्चारणशक्तिः पदनिष्ठाऽतिशयाधानशक्तिर्वाक्यार्थधीशक्तिश्चेति गौरवमापतितमित्याह ॥ प्रथम इति ॥ अन्त्ये, ममापि पदैर्न पदार्थे शक्तिराधीयते, किन्तु पदोपस्थापितत्वमेवाप्तोक्तत्वमिव विशेषः स्यादित्याह ॥ द्वितीये त्विति ॥ नन्वेवं पदानामेव वाक्यार्थवाचकत्वे सिद्धमन्विताभिधानमित्याह ॥ एवं तर्हीति ॥ त्वन्मते यथाऽऽप्तानां पदोच्चारणमात्रे हेतुत्वं नान्वयबोधे, तथा ममापि पदानां पदार्थोपस्थापनमात्रे हेतुत्वं पदार्था एवाकाङ्क्षाद्युपेता अन्वयबोधका इत्याह ॥ कः सन्देह इति ॥ तदाहुः—

> न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः ।
> यज्ज्वलन्ति हि काष्ठानि तत् किं पाकं न कुर्वते, इति ॥

न तु वाक्यार्थवाचकत्वेन । तथा सति त्वन्नयेऽप्याप्तानां तद्वाचकत्वापत्तेरित्याह ॥न त्विति॥ एवञ्च प्राथमिकत्वाद् यदि पदानामन्वयबोधे करणत्वमापाद्यते, तदाऽऽप्तानामेव तथात्वात्तेषामेव तत् किं न स्यादित्याह ॥ अन्यथेति ॥ पदानामेवेति गुरुमतश्लोके विशेषः। सा शक्तिरन्विताभिधाने शक्तिरित्यर्थः ॥

तस्मादिति ॥ कविकाव्यस्थले मनसोत्प्रेक्षासहितेषु चिन्तावशोपस्थितेषु पदार्थेषु क्वचिद्दोषवशात् क्वचिदनुमानात् संसर्गज्ञानमसंसर्गाग्रहो वा भवतु । यत्र तु शब्दादाकाङ्क्षाद्युपेतपदार्थोपस्थितिस्तत्र पदार्था एव करणम् । शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते इति न्यायाच्च न शब्दं विना प्रकारान्तरोपस्थितपदार्थानां शब्दोपस्थापितपदार्थैरन्वयबोध इत्यर्थः । तदेवं भट्टमुखेन प्रभाकरं निराकृत्य

पदार्थकरणत्वसिद्धान्तं निराकरोति ॥ न चैवमिति ॥ तत्संसर्ग इति॥ पदं विना यत्र पदार्थज्ञानात् संसर्गज्ञानं, तत्र यथायथं मानान्तरसत्त्वान्न पदार्थानां संसर्गबोधे करणत्वम् । तथाहि, काव्यस्थले पदार्थज्ञानव्यापारकमुत्प्रेक्षादिसहकृतं मन एवान्वयानुभवे करणम् । न चैवमुत्प्रेक्षाया मानान्तरत्वम् । व्यभिचारजातीयतया लिङ्गादौविव प्रमाकरणतावच्छेदकरूपाभावात् । श्वेतोऽश्वो धावतीति धीश्च लिङ्गजेत्यर्थः । ननु पदानामप्यतीतत्वात् कथं संसर्गधीकरणत्वम् । अथ पदस्मरणं करणं, तर्हि पदार्थस्मरणमेव करणमस्त्वाऽऽवश्यकत्वादित्यत आह ॥ पदानां त्विति ॥

पदार्थस्मरणस्य निर्व्यापारत्वेनाकरणत्वात् पदार्थस्मरणस्य पदज्ञानव्यापारतया तेन तदन्यथासिद्ध्यभावादनन्यथासिद्धान्वयव्यतिरेकाभ्यामाकाङ्क्षादिमत्पदस्यान्वयानुभवविशेषे कारणत्वाच्च । अपि च, व्युत्पत्तिकाले प्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यव्यापारदर्शनादन्वितज्ञानोपपत्त्यर्थमन्वितबोधकत्वं शब्दस्य गृह्यते । तदत्र तन्निर्वाहार्थमर्थोपस्थितिरपि सहकारिणी कल्प्यते इति न तया शब्दस्यान्यथासिद्धिरिति शब्दतदर्थयोरुपस्थितयोरन्वयबोधात् कुत्रान्वयज्ञानशक्तत्वमिति संशये प्राथम्याच्छब्दानामेव कारणत्वमवधारयति । किञ्चाग्निः करणम् ओदनः कर्मता पाकः कृतिरिष्टसाधनमिति ज्ञानेऽप्यग्निनौदनं पचेतेत्यत्रेव कुतो नान्वयबोधः । तावत्पदार्थोपस्थितेरविशेषात् । तत्र परस्परमाकाङ्क्षेव नेतिचेत्, तर्हि साकाङ्क्षपदार्थोपस्थितौ पदविशेषजन्यत्वं तन्त्रमिति नागृहीतविशेषणान्यायात् पदविशेषोऽप्यन्वयबोधेऽङ्गमिति कथं न तस्य करणत्वम् । पदादमुमर्थं प्रत्येमीत्यनुव्यवसाये बाधकाभावाच्चेति सङ्क्षेपः ॥

शब्दप्रामाण्यप्रसङ्गागतमन्विताभिधाननिराकरणं, तदनुप्रसक्तश्चाभिहितान्वयवाद इति विस्तरेण तन्निराकरणे ग्रन्थगौरवं स्यादित्यत आह ॥ कृतमिति ॥ प्रकृतेरिति ॥ प्रकृतेरचेतनाया गुणैः सत्त्वादिभिः सर्वाणि कर्माणि क्रियमाणानि अहं कर्त्तेत्यहंकारोत्थव्यामोहवशाच्चेतनो मन्यते इति प्रतिपादनाच्चेतनस्य कर्तृत्वं निषिद्धम् । विशेषविधेः शेषनिषेधे पर्यवसानादित्यर्थः । कर्त्तेति तृन्नन्तम् । अतो, न लोकाव्ययेत्यादिना कृद्योगषष्ठ्या निषेधः । न चाभिमानिकं जगत्कर्तृत्वमीश्वरस्येत्याह ॥ न चेति ॥ तन्मूलविशेषादर्शनाभावा-

दित्यर्थः ॥ उपदर्शितागमो यदि नाप्तोक्तस्तर्ह्यप्रमाणत्वान्न बाधकः । आप्तोक्तश्चेत्,तर्ह्यागमप्रणयनहेतुस्तज्ज्ञानमिन्द्रियलिङ्गाद्यभावान्नित्य-मुपेयम्। तत्र च विषयस्याहेतुत्वात् सर्वविषयत्वमर्थसिद्धमित्यागमो-ऽप्यन्यपर इत्याह ॥ न प्रमाणमिति ॥ न चाप्तोक्तत्वं विना नित्यत्वा-दागमो मानं, सर्गप्रलययोः साधितत्वादित्याह ॥ न चेति ॥

न केवलं तत्र बाधकाभावः,अपि तु द्यावाभूमी जनयन् देव एक इत्यादिश्रुतयः साधिका अपि सन्तीत्याह—

अपि च,

न चासौ क्वचिदेकान्तः सत्त्वस्यापि प्रवेदनात् ॥
निरञ्जनावबोधार्थो न च सन्नपि तत्परः ॥ १७ ॥

न ह्यसत्त्वपक्ष एवागमो नियतः। ईश्वरसद्भावस्यैव भूयःसु प्रदेशेषु प्रतिपादनात् । तथाचाग्रे दर्शयिष्या-मः । तथाच साति क्वचिदसत्त्वप्रतिपादनमनेकान्तं न बाधकम् । सत्त्वप्रतिपादनमपि तर्हि न साधनमिति चेदापाततस्तावदेवमेतत् । यदा तु निःशेषविशेष-गुणशून्यात्मस्वरूपप्रतिपादनार्थत्वमकर्तृकत्वागमाना-मवधारयिष्यते, तदा न तन्निषेधे तात्पर्यममीषामिति सत्त्वप्रतिपादकानामेवागमानां प्रामाण्यं भविष्यती-ति । न च तेषामप्यन्यत्र तात्पर्यमिति वक्ष्यामः ॥

अस्त्वर्थापत्तिस्तर्हि बाधिका । तथाहि । यद्य-ऽभविष्यन्नोपादेक्ष्यद्, न ह्यसावनुपदिश्य प्रवर्त्तयितुं न जानाति। अत उपदेश एवान्यथानुपपद्यमानस्तथा-विधस्याभावमौदासीन्यं वाऽऽवेदयति । न । अन्यथै-वोपपत्तेः ॥

हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा ॥
तदभावात् प्रवृत्तिर्नो कर्मवादेऽप्ययं विधिः ॥ १८ ॥

बुद्धिपूर्वा हि प्रवृत्तिर्न बुद्धिमनुत्पाद्य शक्यसम्पादना। न च प्रकृते बुद्धिरप्युपदेशमन्तरेण शक्यसिद्धिः। तस्यैव तत्कारणत्वात्। भूतावेशन्यायेन प्रवर्त्तयेदिति चेत्। प्रवर्त्तयेदेव यदि तथा फलसिद्धिः स्यात्। न त्वेवम्। कुत एतदवसितम्?। उपदेशान्यथानुपपत्त्यैव। यस्यापि मते अदृष्टवशादेव भूतानां प्रवृत्तिस्तस्यापि तुल्यमेतत्। यद्यस्ति प्रवृत्तिनिमित्तमदृष्टं, किमुपदेशेन। तत एव प्रवृत्तिसिद्धेः। न चेत्, तथापि किमुपदेशेन। तदभावे तस्मिन् सत्यप्यप्रवृत्तेः। नित्यः स्वतन्त्र उपदेशो न पर्यनुयोज्य इति चेत्। यूयं पर्यनुयोज्याः, ये तमवधानतो धारयन्ति विचारयन्ति चेति॥

न चार्थापत्तिरनुमानतो भिद्यते, लोके तदसंकीर्णोदाहरणाभावात्। प्रकारान्तराभावाच्च॥

तथाहि,

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः॥
न मानयोर्विरोधोऽस्ति प्रसिद्धे वाऽप्यसौ समः॥१०॥

जीवंश्चैत्रो गृहे नास्तीत्यनुपपद्यमानमसति बहिःसद्भावे तमापादयतीत्युदाहरन्ति। तत्र चिन्त्यते। किमनुपपन्नं जीवतो गृहाभावस्येति। न ह्यनियम्यस्यानियामकं विना किञ्चिदनुपपन्नम्। अतिप्रसङ्गात्। ननु स्वरूपमेव तद् न तावद्बहिःसत्त्वेन कर्त्तव्यं, तदऽकार्यत्वात् तस्य। स्थितिरेवास्य तेन विना न स्यादित्यस्य स्वभाव इतिचेत्। एवं तर्हि तन्नियतस्वभाव एवासौ व्याप्तेरेव व्यतिरेकमुखनिरूप्यायास्तथा व्यप-

देशात् । कथं वा बहिःसत्त्वमस्योपपादकम् ? । न हि अनियामको भवन्नप्यनियम्यमुपपादयति । अतिप्रसङ्गादेव । स्वभावोऽस्य यदनेन बहिःसत्त्वेन गेहासत्त्वं क्रोडीकृत्य स्थातव्यमितिचेत् । सेयं व्याप्तिरेवान्वयमुखनिरूप्या तथा व्यपदिश्यते इति । न वयमविनाभावमर्थापत्तावपजानीमहे, किन्तु तज्ज्ञानम् । न चाऽसौ सत्तामात्रेण तदनुमानत्वमापादयतीतिचेत् । न । अनुपपत्तिप्रतिसन्धानस्यावश्याभ्युपगन्तव्यत्वात् । अन्यथा त्वतिप्रसङ्गात् । अर्थापत्त्याभासाऽनवकाशाच्च । यदा ह्यन्यथैवोपपन्नमन्यथाऽनुपपन्नमिति मन्यते तदाऽस्य विपर्ययो, न त्वन्यथेति । तथापि कथमत्र व्याप्तिर्गृह्यतेतिचेत् । यदाऽहमिह तदा नान्यत्र, यदान्यत्र तदा नेहेति सर्वप्रत्यक्षसिद्धमेतत् । का तत्रापि कथन्ता ? । सर्वदेशाप्रत्यक्षत्वे तत्राभावो दुरवधारण इत्यपि नास्ति । तेषामेव संसर्गस्यात्मनि प्रतिषेधात् । अयोग्यानां प्रतिषेधे का वार्त्तेतिचेत् । तदवयवानां तत्संसर्गप्रतिषेधादेवानुमानाद् अन्येषां न काचित् । न ह्यकारणीभूतेन परमाणुना नेदं संसृष्टमिति निश्चेतुं शक्यमिति । न चाऽविनाभावनिश्चयेनापि गमयन्नपक्षधर्मोऽर्थापत्तिरिति युक्तम् । पक्षधर्मतायाः अनिमित्तत्वप्रसङ्गात् । अविशेषात् । व्यधिकरणेनाविनाभावनिश्चयायोगाच्च । यद् यत्र यदेति प्रकारानुपपत्तेः ॥

न चासाविति ॥ शब्दयोर्मिथः प्रतिबन्धादपि न बाध इत्याह । निरञ्जनेति । बाधकत्वाभिमत आगमः, आत्मनो यन्निरञ्जनत्वं विशेष-

गुणशून्यत्वं तज्ज्ञेयमित्येवम्परो, न त्वकर्तृत्वबोधनपर इत्यर्थः ॥

उत्तरार्द्धं व्याचष्टे ॥ यदा त्विति ॥ अर्थापत्तिबाधकत्वमुपन्यस्य निराकरोति ॥ अस्त्विति ॥ न ह्यसाविति ॥ असार्वज्ञ्यापत्तेरिति भावः॥ हेत्वभावे इति ॥ कारणाभावे कार्याभाव इति सामान्यव्याप्तौ कारणविशेषप्रमाणाभावे कार्यविशेषप्रमा न स्यादित्यर्थः । तद्भावेऽनिष्टमाह ॥ तदभावादिति ॥ इच्छाद्वारा प्रमाजन्या प्रवृत्तिरस्मदादीनां नेश्वरेण कारयितुं शक्या । ततः प्रवर्त्तनीयप्रमोत्पादनाऽर्थमवश्यमुपदेश इत्यर्थः । प्रमाया अभावेऽप्यदृष्टादेव प्रवृत्तिः स्यात्, किं वेदेनेति मतेऽप्युपदेशानर्थक्यमेवादृष्टादेव प्रवृत्तेरित्याह ॥ कर्मवादेऽपीति ॥ प्रवर्त्तयेदेवेति॥ विधिवाक्येन स्वर्गकामप्रवृत्तिर्हि स्वर्गसाधनमिति बोधनाद् भूतावेशन्यायेन जनिताऽपि प्रवृत्तिर्न स्वर्गसाधनमित्यर्थः । उपदेशान्यथानुपपत्त्या गत्यन्तरेणापि प्रवर्त्तनमशक्यमित्यवधार्यते इत्याह ॥ उपदेशेति ॥ वेदादात्मश्रवणस्यापि मोक्षहेतुत्वाद्वेदरूप उपदेश आवश्यकः । प्रतिपुरुषं भूतावेशादुपदेश एव लघीयानिति भावः ॥ यद्यस्तीति ॥ न चादृष्टमप्युपदेशात् प्रवृत्तौ स्यादिति वाच्यम् । उपदेशं विनाऽपि पूर्वादृष्टवशादेव यागादौ प्रवर्त्तेत । तददृष्टमप्युपदेशमन्तरेण पूर्वप्रवृत्त्यैवेत्याशयात् ॥ यूयमिति ॥ न च वेदधारणविचारणयोरदृष्टजनकत्वश्रुतेरदृष्टार्थतया तयोरुपपत्तिः स्यादिति वाच्यम् । प्रवृत्त्यर्थमपि तदुभयकरणादिति भावः ॥ प्रकारान्तरेति ॥ अनुमानप्रकारापेक्षया फलवैजात्याभावाद् व्यापारभेदाभावाच्च भिन्नप्रकाराभावादित्यर्थः ॥

अनियम्यस्येति ॥ अनियम्यस्याव्याप्यस्य न अयुक्तिर्योगोऽनुपपत्तिर्व्यापकमुपपादकं विना, अपि तु व्याप्यस्य व्यापकं विनाऽनुपपत्तिः । अनियन्ता चाव्यापको नोपपादकोऽपि तु व्यापकस्तथेत्यनुपपत्तौ व्याप्तिरस्त्येवेति तज्ज्ञानात् कल्पनमनुमानमेवेत्यर्थः । प्रमाणयोर्विरोधे चाविरोधायार्थापत्तिरिति मतान्तरं निरस्यति ॥ न मानयोरिति ॥ एवमनङ्गीकारे धूमादग्न्यनुमानमप्यर्थापत्तिरेव स्यादित्याह ॥ प्रसिद्धे वापीति ॥ एवं नहीति ॥ जीवतो गृहाभावस्थितिरेव बहिःसत्त्वेन विना नेति व्यतिरेकव्याप्तिरेवेत्यर्थः ॥ सेयमिति ॥ वह्निनेव धूमं बहिःसत्त्वेन गेहासत्त्वं क्रोडीकृत्य स्थानव्यमतो धूमे सति वह्निर्भवत्येवेतिवत् सति गृहासत्त्वे जीवतो बहिःसत्त्वं भवत्येवेति-

अन्वयव्याप्तिरेवेत्यर्थः । अर्थापत्तौ कल्प्यकल्पकयोर्व्याप्तिः सत्यपि न ज्ञाता कल्पनाऽङ्गमिति नेयमनुमानमित्याह ॥ न वयमिति ॥ एवं सत्यनुपपत्तिज्ञानं विनापि कल्पना स्यादिति तज्ज्ञानमावश्यकमित्याह ॥ अनुपपत्तीति ॥ व्याप्तिज्ञानं विनानुपपत्तेरज्ञानादित्यर्थः। सत्तावास्थितव्याप्त्यैव कल्पनेऽन्यथोपपन्नेऽप्यनुपपत्तिधिया उपपादककल्पना न स्यादित्याह ॥ अर्थापत्त्याभासेति ॥ विपर्यय इति ॥ उपपादककल्पनरूपो भ्रम इत्यर्थः । न च दोषादेव भ्रमः प्रमाप्रतिबन्धश्च स्यादिति वाच्यम् । यत्र भ्रमस्तत्र वस्तुतो व्याप्तिरेव नेति क दोषः सहकारी स्यादित्याशयात् ॥ यदाऽहमिहेति ॥ यद्यप्यन्वये जीविगृहासत्त्वं व्याप्यं व्यापकं च बहिःसत्त्वं, विपर्यये तु बहिरसत्त्वं व्याप्यं गृहसत्त्वं च व्यापकमिति यद्योगप्राथम्याभ्यां यदा नान्यत्र तदाऽहमिह, यदा नेह तदाऽन्यत्रेति वक्तुमर्हति । तथापि यत्तदोर्विभिद्यैव सम्बन्धः कार्यः । तेन यदा जीवतो गृहासत्त्वं तदा बहिःसत्त्वमित्यन्वयव्याप्तिः,यदा तु बहिरसत्त्वं तदा जीवतो गृहसत्त्वमिति व्यतिरेकव्याप्तिरुक्ता।सर्वत्र बहिरभाव एव प्रत्येतुमशक्योऽधिकरणानामयोग्यत्वादित्याह ॥ सर्वदेशेति ॥ न तेषु तेषु देशेष्वभावनिश्चयः,किन्त्विन्द्रियग्रहणयोग्यानां तावदात्मनि संसर्गाभावो योग्याऽनुपलब्ध्या निश्चीयते इत्याह ॥ तेषामेवेति ॥ सर्वदेशानामित्यर्थः ॥ अयोग्यानामिति ॥ तत्र योग्यानुपलब्धेरसामर्थ्यादित्यर्थः ॥ तदवयवानामिति ॥ योग्यानामयोग्या येऽवयवाः, तेषामवयविसंसर्गनिषेधादेव संसर्गनिषेधो निश्चेयः । न हि यद् येनावयविना न संसृष्टं तत् तदवयवसंसृष्टम् । अवयवावयविविधुरातीन्द्रियद्रव्यसंसर्गस्य च न विधिनिषेधवार्त्ता । उभयत्र मानाभावादित्यर्थः । ननु जीविगृहाभावबहिःसत्त्वयोर्व्याप्तावपि जीविदेवदत्ताभावो गृहे वर्त्तमानो न बहिःसत्त्वे लिङ्गं, देवदत्तावृत्तित्वादित्यनुमानाद्भेदोऽर्थापत्तेः स्यादित्यत आह ॥ न चेति ॥ गृहनिष्ठाभावप्रतियोगित्वस्य लिङ्गत्वात्तस्य च देवदत्तवृत्तितया पक्षधर्मत्वादित्यर्थः । अन्यथा बहिःसत्त्वगृहनिष्ठाऽभावयोर्व्यधिकरणत्वेन नियतसामानाधिकरण्यरूपा व्याप्तिरपि न स्यात् । उपरि सविता भूमेरालोकवत्त्वादित्यत्रापि भूमेरुपरि सन्निहितसवितृकत्वेनानुमानादित्याह ॥ व्यधिकरणेनेति॥

ननु गृहनिष्ठाभावप्रतियोगित्वमपि न लिङ्गम् । प्रतियोगित्वस्य

देवदत्तधर्मतया तदसन्निकर्षे प्रत्यक्षेण ज्ञातुमशक्यत्वात् । कथं वा प्रत्यक्षेण तृतीयलिङ्गपरामर्शः । विशेष्यस्य देवदत्तस्यासन्निकर्षात् । व्यतिरेकव्याप्तिगृहनिष्ठाभावयोर्ज्ञानं सहकार्यासाद्य मनसैव लिङ्गपरामर्श इतिचेन्न । अक्षादिवत्तयोर्मानान्तरत्वापातात् । अतीतानागतधूमादग्न्यनुमितिः कथम् ? । तत्रापि लिङ्गपरामर्शाभावादिति चेन्न । तत्रापि धूमज्ञानसहकृतादग्निं विना धूमोऽनुपपन्न इति ज्ञानत एवाऽग्निज्ञानात् । उक्तरीत्याऽनुमितिसामग्र्यभावात् । यत्र चानुपपत्तिज्ञानं विना तृतीयलिङ्गपरामर्शः, तत्रैवानुमानात् । तस्माद्व्यतिरेकव्याप्तिमुपजीव्य व्यधिकरण एव जीविदेवदत्तगृहाभावो बहिःसत्त्वं कल्पयतीति ॥

मैवम् । देवदत्तासन्निकर्षेऽपि तस्य गृहनिष्ठाभावप्रतियोगित्वज्ञानात् । तथाहि । गृहे देवदत्तस्याभाव इति प्रत्यक्षेण जायमानमभावज्ञानं, स्मृतदेवदत्तस्य प्रतियोगित्वमपि विषयीकरोति । प्रतियोगिना सममभावस्य सम्बन्धान्तराभावात् । गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते स्मृतव्याप्तिवैशिष्ट्यमपि प्रत्यक्षेण सुग्रहम् । न च देवदत्तविशेष्यकं बहिःसत्त्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं नास्तीति कथं तद्विशेष्यिकाऽनुमितिरिति वाच्यम् । पक्षवृत्तिलिङ्गपरामर्शमात्रस्यानुमितिहेतुत्वात्, पक्षविशेष्यकत्वस्य चानन्तत्वात् ॥

सम्प्रदायविदस्तु, अनतिप्रसक्तव्याप्त्यादिस्मृतिसहकृतान्मनस एव तत्र स्मृतदेवदत्तविशेष्यकस्तृतीयलिङ्गपरामर्शः । न च सहकारिणो मानान्तरताऽऽपत्तिः । निर्व्यापारत्वादित्याहुः ॥

जीवी क्वचिदस्तीति क्वचित्त्वेन गेहस्यापि विषयत्वात् पश्चाद् गेहे नास्तीत्यनयोर्गेहेऽस्ति नास्तीत्यत्रैव विरोधज्ञानं करणम् । क्वचिदित्यस्य गेहातिरिक्तविषयत्वकल्पनमविरोधापादकं फलम् । न चानुमानमत्र प्रभवतीति ततोऽर्थापत्तेर्भेद इति मतमुत्थाप्य निराकरोति—

**प्रमाणयोर्विरोधे अर्थापत्तिरविरोधोपपादिका, न त्वेवमनुमानमित्यपि नास्ति । विरोधे हि रज्जुसर्पादिवदेकस्य बाध एव स्यान्न तूभयोः प्रामाण्यम् । प्रा-**

माणये वा न विरोधः । स्थूलमिदमेकमितिवत् सह-संभवात। चैत्रोऽयमयं तु मैत्र इतिवद्वा विषयभेदात्। प्रकृते क्वाप्यस्तीति सामान्यतो गेहस्यापि प्रवेशादेक-विषयताऽप्यस्तीति चेत्। यद्येवं क्वचिदस्ति क्वचिन्ना-स्तीतिवन्न विरोधः । अत्रापि विरोध एवेतिचेद्, एकं तर्हि भज्येत । न भज्येत, अर्थापत्त्या उभयो-रप्युपपादनादितिचेत् । किमनुपपद्यमानम्। विरोध एवान्यथानुपपद्यमानो विभिन्नविषयतया व्यवस्थाप-यनीति चेत्। अथाभिन्नविषयतयैव किं न व्यवस्थाप-येत्? । व्यवस्थापनमविरोधापादनम् । एकविषयत-यैव चानयोर्विरोधः । स कथं तयैव शमयितव्यः । न हि यो यद्विषमूर्च्छितः स तेनैवोत्थाप्यते इतिचेत्। एकविषयतया अनयोर्विरोध इत्येतदेव कुतः।विभिन्न-देशस्वभावतयैव सर्वत्रोपलम्भादितिचेत् । नन्वियं व्याप्तिरेव। तथाच घट्टकुट्यां प्रभातमिति । धूमो-ऽपि वा अनुपपद्यमानतयैव वह्निं गमयेत्। न हि तेन विना असावुपपद्यते । विरोधोऽपि, धूमाद्वह्निना भवितव्यम्, अनुपलब्धेश्च न भवितव्यमिति। तथा-चानुपलब्धेरर्वाग्भागव्यवस्थापनं, धूमस्य च व्यवधा-नेनानुपलभ्यवह्निविषयत्वस्थितिरर्थापत्तिरिति कुतो-ऽनुमानम्। वह्निमानयमित्यनुमानं व्याप्तेः। अन्यथा-ऽनुमानाभावे विरोधासिद्धेः । अर्वाग्भागानुपलब्धि-विरोधेन परभागेऽस्य वह्निरित्यर्थापत्तिरेवेतिचेन्न। व्याप्तिग्राहकेन प्रमाणेन विरोधस्योक्तत्वात्। नाप्युत्त-रार्थापत्तिः। अन्यथा पाण्डरत्वस्यापालालत्वविरोधेन

पालालत्वस्थितिरप्यर्थापत्तिरेव स्यात्। तद्विशिष्टस्य तेनैव व्याप्तेर्नैवमिति चेत्। यद्येवमर्वाग्भागानुपलभ्यमानवह्नित्वेन विशिष्टस्य धूमस्य तेनैव व्याप्तेः कथमेवं भविष्यतीति तुल्यम्। केवलव्यतिरेक्यनुमानं पराभिमतमर्थापत्तिरन्वयाभावादितिचेत्। एवमेतावता विशेषेणानुमानेऽर्थापत्तिव्यवहारं न वारयामः। तत्रानुमानव्यवहारः कुतइतिचेत्। अविनाभूतालिङ्गसमुत्पन्नत्वात्। साध्यधर्मेण विना ह्यभवनमन्वयिन इव व्यतिरेकिणोऽप्यविशिष्टं, तन्निश्चयश्चाऽन्वयव्यतिरेकाभ्यामन्यतरेण वेति। तस्मादर्थापत्तिरित्यऽनुमानस्य पर्यायोऽयं, तद्विशेषवचनं वा पूर्ववदादिवदिति युक्तम्॥

प्रमाणयोरिति॥प्रमाणयोर्विरोधो वास्तवो वा, वस्तुनोऽविरोधेऽपि ज्ञायमानो वा?। तत्र नाद्य इत्याह॥ विरोधे हीति॥ प्रामाण्ये वा उभयोर्वस्तुनो विरुद्धद्वैरूप्यापत्तिरिति भावः॥ स्थूलमिति॥ यथा घटे स्थौल्यैकत्वग्राहकमानयोर्न विरोधस्तथाऽत्रापीत्यर्थः। अन्त्यं शङ्कते॥ अत्रापीति॥ उक्तस्फोरणेन निराकरोति॥एकमिति॥ अर्थापत्त्येति॥ विषयभेदकल्पनेनेति शेषः॥ किमिति॥ अनुपपन्नतया ज्ञातस्यैवोपपादनादित्यर्थः॥ अथेति॥ विरोधज्ञानान्मानयोरविरोधकल्पनमेकविषयत्वेनैव किन्न क्रियते?। कृतकत्वानित्यत्वयोरिव तत्रापि विरोधव्यावृत्तेरुपलम्भादित्यर्थः। प्रमाणयोर्वैषयिकविरोधज्ञानं विषयभेदकल्पनया शाम्यति। विरोधप्रतिसन्धानस्य भावाभावग्राहकमानयोरेकविषयतयैवोपलम्भात्। तथा च व्याप्तिज्ञानमावश्यकमित्याह॥ नन्विति॥ घट्टकुट्यामिति॥ व्याप्तिभिया विरोधे अविरोधापादनाकारगोपनेन पलायमानस्य व्याप्तावेव निपातादित्यर्थः। एवमनङ्गीकुर्वतः प्रसिद्धानुमानमर्थापत्तिरेवेति तद्विलोप इत्याह॥ धूमोऽपीति॥ तदेव स्पष्टयति॥ न हीति॥ धूमाद् वह्निना भाव्यमित्यनेनानुपलब्धेर्विरोधस्तदा, यदि धूमो वह्न्यनुमापकः स्या-

ज्ञान्यथा । तथा च सिद्धमनुमानम् । देशभेदेन तयोरविरोधापादन-मर्थापत्तिफलमेवेत्याह ॥ वह्निमानयमिति ॥ नात्रानुमानेन सम-मनुपलब्धेर्विरोधः, किन्तु वह्निधूमव्याप्तिग्राहकमानेनेत्याह ॥ व्याप्ती-ति ॥ यदि च सामान्यग्राहकमानस्य विशेषतोऽनुपलब्धिरबाधिका, तदा क्वचिदस्तीत्यस्यापि गेहे नास्तीत्यनेन सह न विरोध इत्यर्थः ॥ नापीति ॥ अर्वाग्भागानुपलब्धिविरोधेनेत्याद्युक्तरूपेत्यर्थः । यदि च नैवं, तदा पाण्डरधूमस्यापालालवह्निविरोधात् पालालवह्निसिद्धि-रप्यर्थापत्तिरेव स्यादित्याह ॥ अन्यथेति ॥ तेनैव, परभागवह्निनैवेत्य-ऽर्थः । ननु केवलव्यतिरेकिणि साध्यसाधनाभावयोर्व्याप्तिरन्वयस्य पक्षधर्मत्वमिति न व्याप्तस्य पक्षधर्मतेत्यनुमानाभावेऽर्थापत्तिः स्या-दित्याह ॥ केवलेति ॥ व्यतिरेकव्याप्तावपि पक्षधर्मस्यान्वयस्य गमक-त्वम् । न चातिप्रसङ्गः । प्रतियोग्यनुयोगिभावस्य नियामकत्वात् । तथाचानुमितिसामग्र्यस्त्येव, परिभाषा त्वपर्यनुयोज्येत्याह ॥ एव-मिति ॥ वस्तुतो व्यतिरेकयोः सहचारादन्वययोरेव व्याप्तिः, प्रति-योग्यनुयोगिभावस्य नियामकत्वादिति व्याप्तस्य पक्षधर्मत्वमस्त्येवे-ति भावः ॥ अन्यतरेण वेति ॥ केवलान्वयिव्यतिरेकिणोरित्यर्थः ॥

ननु ज्योतिःशास्त्राद् देवदत्तस्य शतवर्षजीवित्वे ज्ञाते, अथ शतवर्षजीवी गृह एवेति नियमे प्रत्यक्षेण निश्चिते, पश्चाद् योग्यानुप-लब्ध्या निश्चितो गृहाभावो जीवननियमग्राहकमानयोर्बलाबलाऽनि-रूपणाद् बहिःसत्त्वकल्पनां विना नियमद्वयविषयं संशयं जनयित्वा, जीवनसंशयमापाद्य, तदपनुत्तये जीवनोपपादकं बहिःसत्त्वं कल्पयति। यथोक्तसामग्र्यनन्तरं बहिरस्तीति प्रतीतेः । तत्रान्वयव्यतिरेकाभ्यां जीवनसंशय एव करणम् । जीवित्वलिङ्गविशेषणसन्देहेऽनुमानाभा-वात् । यथोक्तसामग्रीप्रभवसंशयस्य च कल्पनाङ्गत्वान्न स्थाणुपुरुष-संशयस्य मृतजनिष्यमाणयोर्गृहाभावनिश्चयस्य च तादृशसंशया-ऽजनकस्य नैककोटिनिर्वाहकबहिःसत्त्वकल्पकत्वम् ॥

अथ जीवननियमाग्राहकमानयोस्तुल्यबलत्वज्ञाने विशेषादर्शना-न्न बहिःसत्त्वकल्पना, एकस्य बलवत्त्वाज्ञाने च तेनान्यस्य बाध एवेति न संशयः । तस्माज्जीवनगृहाभावयोर्निश्चय एव बहिःसत्त्वं कल्प्यते, न तु जीवनसंशये इत्यनुमानादेव बहिःसत्त्वसिद्धिः ॥ तन्न । योग्यानुपलब्धिजनितो गृहाभावनिश्चयः सुदृढ इति जीवन-

नियमग्राहकयोरेकं बाध्यं, विरुद्धयोरमानत्वात्। तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतामुत बहिःसत्त्वं कल्पयित्वा नियमग्राहकम्? । तत्र बहिःसत्त्वकल्पने गृहनियमग्राहकमात्रबाधा, मरणकल्पने तु शतवर्षजीवी देवदत्तः, शतवर्षजीवी गृहे एवेति नियमद्वयस्य बाधः स्यात् । तथाचार्थापत्तिकल्पितं जीवित्वमुपजीव्यानुमानादेव बहिःसत्त्वज्ञानं भविष्यतीत्येतावत्तर्कसहितस्य यथोक्तसामग्रीप्रभवसंशयस्य बहिःसत्त्वकल्पकत्वात् । न च तस्यां दशायां मानान्तरमस्ति, ततोऽर्थापत्तिसहकारित्वं तर्कस्य । यत्र च मृते गृहस्थिते वा तादृशसंशयाद्बहिःसत्त्वकल्पना, तत्र जीवननियमग्राहकयोरन्यतराभासत्वं, परोक्षज्ञानस्य जनकज्ञानाप्रमात्वेनाप्रमात्वनियमात् ॥

अत्राहुः । देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वादिति सामान्यतोदृष्टमभावरूपमरणापेक्षया जीवनं भावरूपं विषयीकरोति लाघवादिति तत्रैव लाघवं सहकारि । तथाहि । यथोक्तसंशयदशायां जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति तर्कानन्तरमेव बहिःसत्त्वज्ञानमित्यविवादम् । तत्र कॢप्तप्रमाणभावे सामान्यतोदृष्ट एव लाघवं सहकारि, न तु कल्पनीयप्रमाणभावे यथोक्तसंशये, गौरवात् ॥

यच्चोक्तं, मरणकल्पने शतवर्षावच्छिन्नजीवी गृह एवेत्यस्यापि बाध इति । तत्र विशिष्टबाधो न विशेष्यबाधात् । मरणेऽपि जीवी गृह एवेत्यस्य विशेष्यस्याबाधात् । किन्तु विशेषणबाधात् । स च शतवर्षजीवित्वबाध एव । विशेषणाभावायत्तो विशिष्टाभावोऽप्यस्तीति चेन्न । विशेष्यवति विशिष्टाभावस्य विशेषणाभावात्मकत्वादिति सङ्क्षेपः ॥

पूर्ववदादिवदिति ॥ त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टम् ( न्याय० १. १. ५ ) इति सूत्रे पूर्ववदादिरनुमानविशेष उक्तः ॥

अनुपलब्धिस्तु स्वरूपसती परमात्मनो योग्यत्वाभावान्न बाधिका, ज्ञाताऽप्यनुमानरूपतया न बाधिका । अनुमानबाधकत्वस्य निरस्तत्वादित्याह—

**अनुपलब्धिस्तु न बाधिकेति चिन्तितम् । न च प्रत्यक्षादेरतिरिच्यते । तदुच्यते—**

**प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात् ।**
**अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः ॥ २० ॥**

या हि साक्षात्कारिणी प्रतीतिः सेन्द्रियकरणिका, यथा रूपादिप्रतीतिः। तथेह भूतले घटो नास्तीत्यपि। साक्षात्कारित्वमस्या असिद्धमितिचेन्न । एकजातीयत्वे ज्ञाताज्ञानकरणत्वानुपपत्तेः। न हि तस्मिन्नेव कार्ये तदेव करणमेकदा ज्ञातमज्ञातञ्चैकदोपयुज्यते । लिङ्गेन्द्रिययोरपि व्यत्ययप्रसङ्गाज्ज्ञानस्याकारणत्वप्रसङ्गाच्च । न हि तदातिपत्त्यापि भवतस्तत्कारणत्वं, व्याघातात् । तस्माज्ज्ञातानुपलब्धिजन्यस्यासाक्षात्कारित्वात् तद्विपरीतकारणकमिदं तद्विपरीतजातीयमिति न्याय्यम् ॥

ननु क्व नाम ज्ञातानुपलब्धिरसाक्षात्कारिणीमभावप्रतीतिं जनयति । तद् यथा निपुणतरमनुसृतो मया मन्दिरे चैत्रो न चोपलब्ध इति श्रुत्वा श्रोताऽनुमिनोति,नूनं नासीदेवेति। एतेन प्राङ्नानास्तिताऽपि व्याख्याता । ननु तथाप्यवान्तरजातिभेदोऽस्तु अज्ञातानुपलब्धिजन्ये साक्षात्कारस्तु कुत इतिचेत्। कारणविरोधात् कार्यविरोधेन भवितव्यमित्युक्तमेव । अनन्यत्रोपक्षीणेन्द्रियव्यापारानन्तरभावित्वाच्च।अधिकरणग्रहणे तदुपक्षीणमिति चेन्न । अन्धस्यापि त्वगिन्द्रियोपनीते घटादौ रूपविशेषाभावप्रतीतिप्रसङ्गात् । अस्ति हि तस्याधिकरणग्रहणम्, अस्ति च प्रतियोगिस्मरणम्, अस्ति च श्यामे रक्तत्वस्य योग्यास्याभावोऽनुपलब्धिश्च । अधिकरणग्राहकेन्द्रियग्राह्याभाव-

**वादिनोऽपि समानमेतदितिचेन्न । प्रतियोगिग्राहकेन्द्रियग्राह्योऽभाव इत्यभ्युपगमात्।ममापि प्रतियोगिग्राहकेन्द्रियगृहीतेऽधिकरणे अनुपलब्धिः प्रमाणमित्यभ्युपगम इतिचेन्न । वायौ त्वगिन्द्रियोपनीते रूपाभावप्रतीत्यनुदयप्रसङ्गात् । तथापि तत्तत्र सन्निकृष्टमितिचेत्। हन्तैवमनन्यत्र चरितार्थमिन्द्रियमवश्यमपेक्षणीयं रूपाभावानुभवेन ॥**

अनुपलब्धिस्त्विति ॥ घटोपलम्भे घटाभावाज्ञानादनुपलब्धिरवश्यं हेतुरिति सैव करणमावश्यकत्वात्। न च प्रतियोग्यनुपलब्धिमात्रं न करणं, प्रतियोगिज्ञानस्याभावधीहेतुत्वात् । नाऽपि प्रतियोगिसत्त्वप्रमाविरहः । अत्यन्ताभावग्रहे तदप्रसिद्धेरिति वाच्यम् । यादृश्यास्तवेन्द्रियसहकारित्वम् । तादृश्याः करणत्वात् । न तु इन्द्रियमपि तत्करणं, गौरवादिति प्रसङ्गागतं निरस्यति ॥ न चेति ॥ अभावस्य यथायथं प्रत्यक्षादिगम्यत्वादित्यर्थः ॥

तत्र प्रत्यक्षगम्यत्वे मानमाह ॥ प्रतिपत्तेरिति ॥ जन्यापरोक्षज्ञानस्येन्द्रियजन्यत्वनियमादित्यर्थः । तत्र चान्वयव्यतिरेकितया योग्यानुपलब्धेः सहकारित्वं न निषिध्यते इति भावः ॥ इन्द्रियस्येत्यादि ॥ इन्द्रियव्यापारस्यानन्यथा सिद्धत्वादज्ञातकरणजन्यज्ञानत्वाच्चेत्यर्थः॥ भावावेशाच्चेति ॥ अस्मदादिबाह्यानुभवस्य भावभूतकरणसचिवमनोजन्यत्वनियमादित्यर्थः ॥

इन्द्रियकरणिकेति॥यद्यप्यत्र मनसा सिद्धसाधनम् । न चेन्द्रियत्वेन तज्जन्यत्वं साध्यम् । साक्षात् प्रतीतिकरणस्यैवेन्द्रियतया तेनैव तदनवच्छेदादात्माश्रयात् । तथापि रूपाभावादिप्रतीतेर्बहिरिन्द्रियान्तराजन्यबहिर्विषयकजन्यसाक्षात्कारित्वाच्चाक्षुषादिवत् साध्यमिति भावः । अनुपलब्धेरपि ज्ञातानुपलब्ध्यन्तरगम्यत्वेनानवस्थानात् क्वचिदज्ञातैव करणमुपेयेत्याशयेनाह ॥ एकेति ॥ अज्ञातकरणकानुभवत्वं साक्षात्त्वव्यवस्थापकम् । अतः स्मृतेरज्ञातकरणकत्वेऽपि न तदिति भावः । यदि च नैवं, तदा लिङ्गमपि साक्षात्कारमिन्द्रियमप्यनुमितिं जनयेदित्याह ॥ लिङ्गेति ॥ ज्ञातकरणकत्वं ज्ञान-

करणकत्वं लिङ्गादेरजनकत्वादिति व्यभिचारादभावज्ञाने तत्करणं न स्यादित्याह ॥ ज्ञानस्येति ॥ तद्विपरीतेति ॥ अज्ञातयोग्यानुपलब्धिकरणकं साक्षात्कारजातीयमित्यर्थः । ननु प्राङ्नास्तितायामिन्द्रियं विनाप्यभावधीरिति व्यभिचारादिन्द्रियमकरणमित्यत आह ॥ एतेनेति ॥ यथा शब्दावगतानुपलब्ध्या लिङ्गेनाभावानुमानं, तथा प्राङ्नाऽस्तितास्थलेऽप्यभावधीर्लिङ्गजेत्यर्थः । ननु तत्रास्मरणं न लिङ्गं, न हि यावदनुभूतं तावदेव ग्रहणयोग्यमपि स्मर्यत एवेति नियम इति । मैत्रस्य तद्गेहसत्त्वेऽप्यननुभवात् संस्कारानुत्पादात्तदनुद्बोधाद् वा तदस्मरणस्योपपत्तेः । न । कश्चिद्विषयविशेष एव हि तादृशो यो गेहादिनिष्ठतया अनुभूयत एव । तदनुभवेन च संस्कारो जन्यत एव । स च न नश्यति । नाऽपि तदुद्बोधकान्तरापेक्षा । विलक्षणविषयविशेषमाहात्म्यात् । यथा श्रीविश्वनाथायतने भगवन्तं श्रीविश्वनाथमनुभवतः, तथा मैत्रमपि प्रेष्ठम् । प्रयोगश्च । तद्गेहं तदा मैत्राभाववत् । तत्तुल्यपरिमाणपटादिस्मरणेऽपि तद्वत्तया अस्मर्यमाणत्वात् । यदेवं तदेवं, यथा पटाभाववद् भूतलमिति । स्मरणाभावश्च संयुक्तविशेषणतया मनोवेद्य एवेति भावः । केचित्तु यत्र सामान्याभावेन लिङ्गेन विशेषाभावानुमानं, तत्र ज्ञातानुपलब्धिरनुमानाङ्गमिति तत्परोऽयं ग्रन्थ इत्याहुः ॥

ननु ज्ञातानुपलब्धेरसाक्षात्कारजनकत्वेऽप्यज्ञातानुपलब्धिजन्ये अवश्यं साक्षात्कारित्वमिति न नियमो वैजात्यान्तरेणाप्युपपत्तेरित्याह ॥ नन्विति ॥ सर्वत्र असाक्षात्कारित्वस्य ज्ञायमानकरणजन्यत्वव्याप्तेस्तन्निवृत्तावसाक्षात्कारित्वव्यावृत्तेरवान्तरजातिः साक्षात्कारित्वमेवेत्याह ॥ कारणेति ॥ न च साक्षात्कारित्वमिन्द्रियजन्यत्वप्रयुक्तमेवेति वाच्यम् । ज्ञातेन्द्रियसन्निकर्षजेन्द्रियगतिज्ञानस्य साक्षात्कारित्वप्रसङ्गात् । असाक्षात्कारित्वस्य च साक्षात्कारिभिन्नज्ञानरूपत्वात् । अनुभवत्वेन साङ्कर्यापत्त्या जातित्वाभावादिति भावः । न चेन्द्रियजत्वं साक्षात्कारित्वप्रयोजकं, प्रकृतेऽपि तत्त्वादित्याह ॥ अनन्यत्रेति ॥ ननु प्रतियोगिज्ञानस्येवाश्रयज्ञानस्याप्यभावधीहेतुत्वमिति तत्रैवेन्द्रियमन्यथा सिद्धमिति विशेषणासिद्धो हेतुरित्याह ॥ अधिकरणेति ॥ अधिकरणधीरिन्द्रियव्यापारो न तया तदन्यथासिद्धम् । अन्यथा सन्निकर्षोपक्षीणमिन्द्रियं घटग्राहकमपि न स्यादि-

त्याह ॥ अन्धस्येति ॥ ममापीति ॥ प्रतियोगिग्राहकेन्द्रियेणाश्रयाग्रहे योग्यानुपलब्ध्या नाभावो गृह्यते । न चान्धस्य रूपग्राहकेन्द्रियेण पटादिग्रहः । अत एव चक्षुःसंयुक्ते पृथिवीपरमाणौ न जलत्वाद्यभावधीप्रसङ्ग इत्यर्थः ॥ वायाविति ॥ वायोः प्रतियोगिग्राहकचक्षुरग्राह्यत्वादित्यर्थः ॥

ननु यथा तव नीरूपो वायुरितिवायुविशेष्यिका धीरानुमानिकी विशेष्ययोग्यतामाश्रित्येन्द्रियाणां प्रवृत्तेः । तथा वायौ रूपाभावविशेष्यिकाऽपि धीर्ज्ञातानुपलब्धिलिङ्गजन्याऽनुमितिरेव । तथाच या धीः साक्षात्कारित्वेन त्वदभिमता । तस्यामुक्ता सामग्रीति नोक्तदोषः । न चाभावज्ञानस्य साक्षात्कारित्वेनेन्द्रियजन्यत्वं, स्मृतिवत्तस्य परोक्षत्वात् । मैवम् । घटाभावबुद्धेरपि साक्षात्कारित्वेनाभिमताया योग्यानुपलब्धिलिङ्गजन्यत्वापत्तेः । यदि च लिङ्गाज्ञानेऽपि तदनुभवादज्ञातकरणिका सा, तदा वायौ रूपाभाव इति धीरपि तथा । किञ्च, वस्तुतो घटवन्त्युपलब्धिप्राक्कालेऽनुपलब्ध्या घटस्मृतिमतः कुतो नाभावधीः? घटाभावाभावादितिचेत् । हन्तैवमभावबुद्धेरर्थजन्यत्वात् प्रत्यक्षत्वसिद्धाविन्द्रियजन्यमेव । अपि च । प्रतियोगिसत्त्वविरोधिनी याऽनुपलब्धिः, सैव योग्यानुपलब्धिः । अतो जलपरमाणौ गन्धाभावो न प्रत्यक्षः, प्रत्यक्षश्च वायौ रूपाभावः । रूपानुपलब्धिज्ञापकस्याभावात् । तल्लिङ्गत्वाभावं च स्वयमेवाचार्यो वक्ष्यति ॥ तथापीति ॥ चक्षुषा वायोरग्रहेऽपि चक्षुर्वायुसन्निकृष्टमेवेति नाश्रयग्रहे तदुपक्षीणमित्यर्थः ।

नन्वाश्रयेत्यन्यमात्रोपलक्षणम्, अस्ति च वायुसन्निकृष्टस्येन्द्रियस्य तद्देशवृक्षादिप्रकाशकत्वमित्यन्यथासिद्धिरेवेत्याह—

स्यादेतत् । तथापि वस्त्वन्तरग्रह एव तस्योपयोग इति चेन्न । तस्य तं प्रत्यकारणत्वात् । कारणत्वे वा महान्धकारे करपरामर्शेन स्पर्शवद्द्रव्याभावं न प्रतीयात् । प्रतीयाच्च पुरोविस्फारिताक्षः पृष्ठलग्नस्याऽश्यामत्वम् । आर्जवावस्थानमप्यधिकरणस्योपयुज्यते इतिचेत्, तर्हि नयनसन्निकर्षोऽप्युपयोक्ष्यते । तदेक-

सहकारिप्रभासन्निकर्षापेक्षणात् । अन्यथा वातायनविवरविसारिकिरणपरामृष्टेऽप्यधिकरणे तदुपलम्भप्रसङ्गाच्च ॥

तथापि योग्यताऽऽपादनोपक्षीणश्चक्षुः । यदितरसामग्रीसाकल्ये ह्यनुपलभ्यमानस्याभावो निश्चीयते । तच्च चक्षुष्यधिकरणसन्निकृष्टे सति स्यादिति चेत् । ननु परिपूर्णानि कारणान्येव साकल्यम् । तथाच किं कुत्रोपक्षीणम् । अथान्योन्यमेलकं मिथःप्रत्यासत्त्यादि शब्दवाच्यं तदुपक्षयः, न तर्हि क्वचिच्चक्षुः कारणं स्यादिति । न हि रूपाद्युपलब्धिमप्यसन्निकृष्टमेतदुपजनयति । अथाधिकरणमसन्निकृष्टेऽपि तद्विषयाभावग्रहेऽनुपलब्धेरपेक्षणीयः । ततस्तत्रेदं चरितार्थम् । वाय्वादिषु तु रूपाद्यभावप्रतीतिरानुमानिकी । तथाहि । अनुपलब्ध्या ह्यनुमीयते, अयं नीरूपो वायुरिति । न असिद्धेः । न ह्युपलम्भाभावो भवतामभावोपलम्भः । उपलम्भस्यातीन्द्रियत्वाभ्युपगमात् । प्राकट्याभावेनानुमेय इतिचेन्न । वायौ रूपवत्ताप्राकट्याभावस्याप्यसिद्धेः । रूपाभावेन समानत्वात् । व्यवहाराभावेनानुमेय इतिचेन्न । कायवाग्व्यापाराभावेऽप्युपेक्षाज्ञानाभावाभ्युपगमात् । मूकस्वप्नोपपत्तेश्च । न च व्यवहाराभावमात्रेणानुमातुमपि शक्यते । अनैकान्तिकत्वादसिद्धेश्च ॥

स्यादेतदिति ॥ अन्धस्यापि रूपाभावप्रतीत्यापत्त्या न तावदिन्द्रियमभावज्ञाने अकारणमेव, किन्तु कारणव्यापकत्वेन परम्पराकारणं मन्तव्यम् । तथा सत्याह ॥ तस्येति ॥ तस्य वस्त्वन्तरग्रहणस्य, तं प्रत्य-

भावानुभवं प्रतीत्यर्थः ॥ न प्रतीयादिति ॥ त्वगिन्द्रियेण वस्त्वन्तराऽग्रहादित्यर्थः । ननु प्रतीयत एवाकाशमत्रापि, तस्य तन्मते प्रत्यक्षत्वादित्यत आह ॥ प्रतीयाच्चेति ॥ आर्जवावस्थितेऽप्यन्धकारे ज्ञानाभावादालोकसन्निकर्षोऽपि हेतुरेष्टव्यः । स च चक्षुषः सहकारी नान्यस्येति सिद्धं चक्षुः करणमित्यभिप्रेत्याह ॥ नयनेति ॥ अथार्जवावस्थानेऽपि नालोकसन्निकर्षापेक्षा, तत्राह ॥ वातायनेति ॥ तदुपलम्भप्रसङ्गाद्रूपाभावोपलम्भप्रसङ्गादित्यर्थः । चक्षुषा यत्किञ्चिदुपलम्भस्य तत्रापि सम्भवादिति भाव ॥ नन्विति ॥ तथान्वे वा सहकार्युच्छेदापत्तिः । वस्तुतः प्रतियोगिसत्त्वविरोधित्वमनुपलब्धेर्योग्यत्वं, तत्र न चक्षुरुपक्षय इति भावः ॥ न हीति ॥ विषयप्रत्यासत्ताविन्द्रियान्यथासिद्ध्या क्वचिदपि इन्द्रियं करणं न स्यात् । अप्रत्यासन्नस्याऽजनकत्वादित्यर्थः ॥ तद्विषयेति ॥ अधिकरणनिष्ठाभावग्रहे इत्यर्थः ॥ वाय्वादिष्विति ॥ चक्षुःसन्निकृष्टे वायौ चक्षुषा तद्धर्माग्रहे वायौ रूपाभावधीर्नाध्यक्षा, किन्त्वनुमितिरिति नेयं तत्र सामग्रीत्यर्थः । असिद्धिमेवोपपादयति ॥ न हीति ॥ वायौ रूपाभावधीर्नानुपलब्धिलिङ्गजन्या, अनुपलब्धेरज्ञानात् । आप्तवाक्यस्यापि तद्बोधकस्याभावात् । न चोपलब्धेरनुपलब्धिरज्ञातैव तद्बाधिका। उपलब्धेरतीन्द्रियत्वेन योग्यानुपलम्भेनानुपलब्ध्यभावस्य ज्ञातुमशक्यत्वात् । अनुपलब्धिमात्रस्य चाभावाग्राहकत्वादित्यर्थः । उपलम्भकार्यज्ञातताया अभावेनोपलम्भाभावोऽनुमीयते इत्याह ॥ प्राकट्येति ॥ वायौ रूपाभाववद्रूपप्राकट्याभावस्यापि दुर्ग्रहत्वं, यदि च स योग्यानुपलब्धिगम्यस्तर्हि रूपाभावोऽपि तथाऽभ्युपेयस्तुल्ययोगक्षेमत्वादित्याह ॥ वायाविति ॥ रूपज्ञानाभावे लिङ्गान्तरमाह ॥ व्यवहारेति ॥ दृश्यमानो व्यवहाराभावो लिङ्गं, व्यवहारसामान्याभावो वा ? । नाद्यः । अनैकान्तिकत्वादित्याह॥ कार्येति ॥ अन्त्येऽपि यदि स्वकीयव्यवहारमात्राभावस्तदाऽनैकान्तिकं, सर्वस्य तु तदभावो ग्रहीतुमशक्य इत्याह ॥ न चेति ॥

ननु अनुपेक्षणीयविषयकः स्वकीयरूपवत्ताज्ञानाभावस्तद्विषयकस्वकीयरूपवद्व्यवहाराभावेनानुमेय इत्यत आह—

**तद्विषयस्तु व्यवहारस्तद्विषयज्ञानजन्यो वा ?**

तद्विषयज्ञानजनको वा, तदाश्रयधर्मजनको वा ? । तदभावश्च तज्ज्ञानतदाश्रयधर्माभावान्तर्भूत एवेत्य-ऽशक्यनिश्चयएव।आत्माश्रयेतरेतराश्रयचक्रकप्रवृत्ति-प्रसङ्गात् । न चाज्ञातस्योपलम्भाद्यभावस्य लिङ्गता । न च प्राकट्याभावः सत्तामात्रेणोपलम्भाभावमावेद-यतीति युक्तम् । लिङ्गाभावस्य तथात्वेऽतिप्रसङ्गात् । अविनाभावबलेन तु नियमे तत्प्रतिसन्धानापत्तेः । न ह्यविनाभावः सत्तामात्रेण ज्ञानहेतुं नियमयति, धूमादावपि तथाभावप्रसङ्गादिति । ज्ञानप्रत्यक्षत्वेन त्वद्दिशा भविष्यतीतिचेन्न । शब्दध्वंसादिनोक्तोत्तर-त्वात् । अपिच । प्रतियोगिग्राहकेन्द्रियेणाधिकरणधर्म-प्रतीतिरनुपलब्धेरङ्गमिति, तद्रहितायास्तस्याः कार्य-व्यभिचाराद्यवस्थाप्येत, व्याप्तिबलाद्वा ? । न ताव-दुक्तरूपानुपलब्धिस्तां विना अभावप्रत्ययमजनयन्ती दृश्यते । नापि व्याप्तेः । तथा सति वायौ रूपाभाव-प्रत्ययस्तामाक्षिपेत् । एवम्भूतत्वात् । अनाक्षेपे वा, न तत्कारणकी भवेद् न वा भवेत् । ततो न भवत्येव, लिङ्गात्तदुत्पत्तिरितिचेत् । ननु लिङ्गमपि सैव, न त-त्त्वान्तरम् । यथा योनिसंबन्धोऽलिङ्गदशायामिन्द्रिय-सन्निकर्षमपेक्षते,लिङ्गदशायान्तु तदनपेक्षएव ब्राह्मणय-ज्ञाने, तथैतत् स्यादितिचेन्न । कार्यजातिभेदात्तदुप-पत्तेः । प्रकृते च तदनभ्युपगमात । पारोक्ष्यापारोक्ष्ये विहायान्यथाऽप्यसौ भविष्यतीतिचेन्न । अनुप-लम्भात् । सम्भाव्यते तावदितिचेत् सम्भाव्यतां, न त्वेतावताऽपि तमाश्रित्य करणनियमनिश्चयः ॥

**अज्ञातकरणत्वाच्च । यदज्ञायमानकरणजं ज्ञानं तत्साक्षादिन्द्रियजं, यथा रूपप्रत्यक्षम् । तथा चेह भूतले घटो नास्तीति ज्ञानमिति । यथा वा स्मरणमज्ञायमानकरणजं साक्षान्मनोजन्म । कुतस्तर्हि न साक्षात्कार्यनुभवरूपम् ? । संस्कारातिरिक्तसन्निकर्षाभावादिति वक्ष्यामः ॥**

तद्विषयस्त्विति ॥ तदभावश्चेति ॥ आद्ययोर्ज्ञानाभावान्तर्भूतः, अन्त्ये तदाश्रयधर्माभावान्तर्भूत एवेत्यर्थः ॥ आत्माश्रयेति ॥ यदि तद्विषयकज्ञानाभावेनैव तद्विषयकज्ञानाभावोऽनुमेयस्तदाऽऽत्माश्रयः । अथ तद्विषयकज्ञानाभावात् तद्विषयकव्यवहाराभावज्ञानं, तद्विषयकव्यवहाराभावेन च तद्विषयकज्ञानाभावज्ञानं, तदाऽन्योन्याश्रयः । अथ तद्विषयकज्ञानाभावात् तद्विषयकव्यवहाराभावज्ञानं, तद्विषयकज्ञानाभावश्च तद्विषयकप्राकट्याभावात्, स च तद्विषयकज्ञानाभावात् तर्हि चक्रकमित्यर्थः ॥

नन्वन्येषामज्ञातानामलिङ्गत्वेऽपि प्राकट्याभावः सत्तयैव ज्ञानाभावं गमयिष्यति । न चायोग्यप्रतियोगिकत्वेनायोग्योऽस्याभाव इति वाच्यम् । अनुपलब्धेरेव तद्विशेषणवत्त्वादित्यत आह ॥ न चेति ॥ स हि व्याप्तिबलेन वा प्रतिपादयेल्लिङ्गाभावत्वमात्रेण वा, कार्याभावमात्रतया वा ? तत्र न मध्यमान्तिमावित्याह ॥ लिङ्गाभावस्येति ॥ धूमाभावस्यापि सत्तया गमकत्वापातादित्यर्थः ॥ आद्यमाशङ्क्य निराकरोति ॥ अविनाभावेति ॥ न ह्युपलम्भाभावो भवतामभावोपलम्भ इत्यत्र शङ्क्ते ॥ ज्ञानेति ॥ प्रत्यक्षेण ज्ञानाभावं ज्ञात्वा तस्माल्लिङ्गाद्वायौ रूपाभावानुमानं स्यादित्यर्थः । मन्मते प्रतियोगिसत्तयाऽनुपलम्भाद्वायौ रूपाभावः प्रत्यक्षत्वान्नानुमेयः, शब्दाभावप्रत्यक्षत्वव्यवस्थापनया आश्रययोग्यतायास्तद्धर्मग्रहस्य चाभावप्रत्यक्षताऽङ्गत्वनिरासादिति परिहरति ॥ शब्देति ॥ व्याप्तिबलाद्वेति ॥ कार्यकारणभावस्य व्याप्तिविशेषत्वेन गोवृषन्यायात् तां विना या व्याप्तिस्तद्बलादित्यर्थः ॥ तां विनेति ॥ अधिकरणवृत्तिधर्मप्रतीतिं विनेत्यर्थः ॥ एवम्भूतत्वाद् व्याप्यत्वादित्यर्थः ॥ अनाक्षेपे वेति ॥ अधिकरणवृत्तिधर्म-

प्रतीत्यनाक्षेपे वा नाभावधीस्तद्धेतुका तद्व्याप्या वा। तथात्वे वा हेतुं विना व्यापकं विना वा न भवेदित्यर्थः ॥ ततः, अधिकरणधर्मप्रतीतित इत्यर्थः ॥ सैव, अनुपलब्धिरेवेत्यर्थः ॥ यथेति ॥ यथा विशुद्धमातापितृयोनिजत्वं लिङ्गालिङ्गदशायामिन्द्रियसम्बन्धनिरपेक्षसापेक्षं, तथानुपलब्धिरपि स्यादित्यर्थः ॥ कार्येति ॥ दृष्टान्तस्य तत्सापेक्षस्याऽपरोक्षज्ञानजनकत्वं तन्निरपेक्षस्य च परोक्षज्ञानजनकत्वम् । अत्र तु लिङ्गानुपलब्धिजन्याभावज्ञाने जातिभेदाभावाल्लिङ्गजानुमितौ व्यभिचारात् सा कारणं न स्यात् । तद्वदपरोक्षजात्यङ्गीकारे च तत्रेन्द्रियजन्यत्वमावश्यकमित्यर्थः । न च जातिं विनाऽपि व्याप्त्यादिज्ञानविनाकृतानुपलब्धिजन्याभावज्ञाने सा कारणमिति वाच्यम् । अनुपलब्धिजन्यज्ञानत्वेनैव तल्लिङ्गकानुमितिवद्विवादपदेऽपि तदकारणत्वानुमानात् । इन्द्रियान्यथासिद्धेर्निरासादिति भावः ॥ सम्भावयतामिति ॥ कार्यजातिसम्भावनया तज्जातीयनियतस्य कारणत्वसम्भावनायामपि तत्रानिश्चयादित्यर्थः ॥

यदज्ञायमानेति ॥ नन्विदमनुमित्यादावनैकान्तिकं तस्याज्ञायमानमनःकरणकत्वात् । न च ज्ञायमानकरणजन्यत्वं लिङ्गं, लिङ्गादेरजनकतया तज्ज्ञानस्याज्ञायमानस्यैव करणत्वात् । नापि ज्ञानासाधारणकारणकत्वाभावो लिङ्गम्, अभावज्ञाने प्रतियोग्यादिज्ञानजन्यतया तदसिद्धेः । सविकल्पकमात्रस्यैव विशेषणज्ञानजन्यत्वाच्च । मैवम् । लिङ्गादिज्ञानाजन्यानुभवत्वस्य लिङ्गत्वात् ॥ साक्षादिति, मनसा व्यवहितव्यापारेण सिद्धसाधननिरासार्थम्, उपनीतभाननिरासार्थं वा ॥ कुत इति ॥ साक्षादिन्द्रियसन्निकर्षजन्यस्य प्रत्यक्षत्वव्याप्तत्वादित्यर्थः ॥ संस्कारेति ॥ संस्कारान्यः सन्निकर्षः प्रत्यक्षत्वप्रयोजकः । स्मरणे तु स एव सन्निकर्षः । प्रत्यभिज्ञाने तु तत्ता स्मृत्युपनीता भासते । न तु संस्कारस्तत्सन्निकर्षः । तज्जन्यत्वे स्मृतित्वापत्तेरित्यर्थः ॥

**तथापि भावविषये इयं व्यवस्था, अभावज्ञानं त्वज्ञातकरणत्वेऽपि न साक्षादिन्द्रियजं भविष्यतीतिचेन्न । उत्सर्गस्य बाधकाभावेन सङ्कोचानुपपत्तेः । अन्यथा सर्वव्यासीनां भावमात्रविषयत्वप्रसङ्गोऽवि-**

शेषात् । तथापि विपक्षे किं बाधकमितिचेत् । नन्विद-मेव तावत् । अन्यदप्युच्यमानमाकर्णय । तद् यथा अकारणककार्यप्रसङ्गो, रूपाद्युपलब्धीनामपि वाऽनि-न्द्रियकरणत्वप्रसङ्गः । न ह्यनुमित्यादिभिरुपलभ्यमान-करणिकाभिश्चक्षुरादिव्यवस्थापनम्, अपि त्वनुप-लभ्यमानकरणिकाभी रूपाद्युपलब्धिभिरेव । यद्यपि साक्षात्कारिताऽपि तत्रैव पर्यवस्यति, तथापि प्रथमतो-ऽनुपलभ्यमानकरणत्वमेव प्रयोजकं चक्षुरादिकल्पने । न ह्युपलभ्यमाने करणान्तरे साक्षात्कारिणीष्वपि तासु चक्षुराद्यनुपलभ्यमानं कश्चिदकल्पयिष्यत् । अत एव साक्षात्कारित्वेऽपि स्मृतेर्मन एव करणमुपा-गमन् धीराः । संस्कारस्त्वर्थविशेषप्रत्यासत्तावुप-युज्यते । इन्द्रियाणां प्राप्यकारित्वव्यवस्थापनात् ॥

भावावेशाच्च चेतसः । सर्वत्र हि बाह्यार्थानुभवे जनयितव्ये भावभूतप्रमाणाविष्टमेव चेत उपयुज्यते नातोऽन्यथेति व्याप्तिः । तथैव शक्तेरवधारणात् । न ह्यनुपलब्धिमात्रसहायं तदभावेऽप्यनुभवमाधातुमु-त्सहते । शब्दलिङ्गादेरपेक्षादर्शनात् । न च यत्र यद-पेक्षं यस्य जनकत्वमुपलब्धं, तदेव तस्यैव तदनपेक्षं जनकमिति न्यायसहम् । आर्द्रेन्धनसंबन्धमन्तरेणा-पि दहनाद् धूमसम्भावनापत्तेः । तथाच गतं कार्य-कारणभावपरिग्रहव्यसनेन ॥

अपिच,

प्रतियोगिनि सामर्थ्याद्व्यापाराव्यवधानतः ॥
अक्षाश्रयत्वाद्दोषाणामिन्द्रियाणि विकल्पनात् ॥२१॥

**यद्धि प्रमाणं यद्भावावगाहि, तत् तदभावावगाहि यथा लिङ्गं शब्दो वा । घटाद्यवगाहि चेन्द्रियमिति । अन्यथा हि शब्दादिकमपि नाऽभावमावेदयेद्, भाव एव सामर्थ्यावधारणात् । न चैवमेव न्याय्यम् । देवदत्तो गेहे नास्तीति शब्दाद्, मया तत्र जिज्ञासमानेनापि न दृष्टो मैत्र इत्यवगतानुपलब्ध्यानुमानादप्यवगतेः । ग्राहयतु वाश्रयमिन्द्रियं, तथापि न तेनेदं व्यवधीयते व्यापारत्वात् । अन्यथा सर्वसविकल्पकानां प्रत्यक्षत्वाय दत्तो जलाञ्जलिः स्यात् ॥**

तथापीति ॥ विपक्षे बाधकाभावादित्यर्थः । न च भावविषयत्वमुपाधिः, अभावज्ञानेऽपि प्रतियोग्यादिभावविषयतया साधनव्यापकत्वात् । नाप्यभावाविषयत्वं, अभावस्मरणे साध्याव्यापकत्वात् ॥ उत्सर्गस्येति ॥ सामान्यत एव व्याप्तिर्भावविषयत्वस्य गुरुत्वादित्यऽर्थः । तथाप्युत्सर्गस्य बाध्यत्वशङ्कानिवारकं किमित्याह॥तथापीति ॥ निर्बीजतादृशशङ्कायां सर्वत्र सामान्यव्याप्त्युच्छेद इत्याह ॥ नन्विदमिति ॥ उत्सर्गस्य बाधकं विनेत्याद्येवेत्यर्थः ॥ अकारणकेति ॥ अज्ञातकरणकत्वावच्छिन्नज्ञानं प्रतीन्द्रियस्य करणत्वादिन्द्रियं विना तन्न स्यादित्यर्थः ॥ न हीति ॥ ज्ञानकरणकज्ञानेन करणतया नेन्द्रियं कल्प्यते, किन्त्वज्ञातकरणकज्ञानेनेत्यर्थः । ननु नाज्ञायमानकरणकज्ञानत्वेन चक्षुरादिकल्पनम्, अपि तु साक्षात्कारिज्ञानत्वेनेत्यत आह ॥ यद्यपीति ॥ तत्रैव इन्द्रियकरणकत्व एवेत्यर्थः । यदि च साक्षात्कारिज्ञानमेवेन्द्रियसिद्धौ मानं स्यात्, तदा स्मृतेस्तदभावान्मनःकरणत्वं नानुमीयेतेत्याह ॥ अत एवेति ॥ न चैवं स्मृतेः साक्षात्कारित्वापत्तिः । संस्कारातिरिक्तसन्निकर्षाभावादित्युक्तत्वात् । ननु स्मृतौ संस्कार एव कुतो न करणमित्यत आह ॥ संस्कारस्त्विति ॥ इन्द्रियाणामप्रामानां ज्ञानाजनकत्वात्, संस्कारस्य च निर्व्यापारत्वेनाकरणत्वादित्यर्थः ॥

भावावेशादिति ॥ भावरूपासाधारणकारणसाहित्यनियमादि-

त्यर्थः। तथाचाभावप्रमायां मनो भावभूतासाधारणकारणसहकृतमेव करणमिति भावः। प्रयोगश्च– लिङ्गाद्यजन्या अभावप्रमा भावभूताऽसाधारणकारणसहकृतमनोजन्या अस्मदाद्यभावप्रमात्वात्।लिङ्गादिजन्याभावप्रमावदिति । अत एव, भावप्रमायां तथात्वेऽप्यभावप्रमायां योग्यानुपलब्धिमात्रापेक्षं मनः करणं स्याद् विपक्षे बाधकाभावादित्यपि निरस्तमित्याह ॥ न हीति ॥ न च भावत्वमतन्त्रं गौरवात्। अन्यथा लिङ्गाद्यपि तत्र मानं न स्यादिन्द्रियसहकृतस्यैव मनसो बाह्यानुभावकत्वादिति वाच्यम् । वाय्वौ रूपाभावबुद्धेरनुपलब्धिकरणत्वाभावव्यवस्थापनेन गौरवस्यापि न्याय्यत्वादिति भावः॥

प्रतियोगिनीति ॥ इन्द्रियाणीति धर्मिनिर्देशः । करणमिति साध्यं, प्रकरणात्। प्रतियोगिग्राहकं मानं तदभावग्राहकमपि, यथा लिङ्गाद्यतीन्द्रियभावग्राहकमभावधीकरणमित्यर्थः । ननु प्रतियोगिग्राहकत्वमतन्त्रम्, अनन्यथासिद्धत्वस्योपाधित्वात् । इन्द्रियं त्वाश्रयग्रहे अन्यथासिद्धमित्यत आह ॥ व्यापारेति ॥ अभावभ्रमस्य दुष्टकरणजन्यत्वादनुपलब्धेश्च स्वरूपतो दुष्टत्वाभावात् पित्तादिना दुष्टमिन्द्रियं तत्करणमित्याह ॥ अक्षेति ॥ किञ्चाधिकरणाभावयोर्विशिष्टधीर्नेन्द्रियजन्या। अभावबुद्धित्वात्। नानुपलब्धिजन्या। भावबुद्धित्वात्। नोभयजन्या, जातिसङ्करप्रसङ्गादित्युभयग्राहकमिन्द्रियं मन्तव्यमित्याह ॥ विकल्पनादिति ॥

यद्धीति ॥ ननु न व्यक्तिगर्भोऽयं नियमः । भावग्राहकलिङ्गादिव्यक्तेरेवाभावाग्राहकत्वात्। नाऽपि तज्जातीयं तथा, उपमाने व्यभिचारात्। सुरभि चन्दनमितिवदुपनीताभावभानेन सिद्धसाधनञ्च। मैवम् । चक्षुष्ट्वादिकमभावग्राहकवृत्ति भावग्राहकवृत्तिजातित्वात्। शब्दत्ववत्। उपमानत्वञ्च न जातिः, योगजधर्माजन्यजन्यस्वविषयकसविकल्पकाजन्य–सामान्यलक्षणप्रत्यासत्त्यजन्य–जन्याभावप्रमित्यऽसाधारणकारणतावच्छेदकं चात्र साध्यं विवक्षितमिति नोपनीताऽभावभानेन सिद्धसाधनमित्याशयात्॥ अन्यथेति ॥ इन्द्रियस्य निर्विकल्पकेनान्यथासिद्धेरित्यर्थः ॥

**नन्वेवं सति धूमोपलम्भोऽप्यस्य व्यापारः स्यात्। तथाच गतमनुमानेनापीतिचेन्न। यया क्रियया विना**

यस्य यत्कारणत्वं न निर्वहति, तं प्रति तस्या एव व्यापारत्वात् । न च धूमाद्युपलब्धिमन्तरेण चक्षुषो वह्निज्ञानकारणत्वं न निर्वहति, संयोगवदिति ॥

अस्ति च भावाभावविपर्ययः । सोऽयं यस्य दोषमनुविधत्ते, तदेवात्र करणमिति न्याय्यम् । न चानुपलब्धिः स्वभावतो दुष्टा, नाप्यधिकरणग्रहणं प्रतियोगिस्मरणं वा स्वभावतो दुष्टम् । अनुत्पत्तिदशायामनुत्पत्तेरुत्पत्तिदशायाश्च स्वार्थप्रकाशनस्वभावताया अपरावृत्तेः। असंसृष्टयोरधिकरणप्रतियोगिनोः संसृष्टतया प्रतिभानं दुष्टम् । संसृष्टयोश्चासंसृष्टतयेतिचेत् । नन्वयमेव विपर्ययः । तथाच आत्माश्रयो दोषः । तस्माद् दुष्टेन्द्रियस्य तद्विपर्ययसामर्थ्ये अदुष्टस्य तत्समीचीनज्ञानसामर्थ्यमपि । तथाच प्रयोगः । इन्द्रियमभावप्रमाकरणं, तद्विपर्ययकरणत्वात् । यद् यद्विपर्ययकरणं तत् तत्प्रमाकरणं, यथा रूपप्रमाकरणं चक्षुरिति ॥

विकल्पनात् खल्वपि । अघटं भूतलमिति हि विशिष्टधीरवश्यमिन्द्रियकरणिका स्वीकर्त्तव्या प्रमाणान्तरं वा समममास्थेयम् । यथा हि विशेष्यमात्रोपक्षीणामिन्द्रियमकरणमत्र, तथा विशेषणमात्रोपक्षीणा अनुपलब्धिरपि न करणं स्यात् । स्वस्वविषयमात्रप्रवृत्तयोः प्रमाणयोः समाहारः कारणमितिचेन्न । विषयभेदे फलवैजात्ये च तदनुपपत्तेः । न हि मृत्सु तन्तुषु च व्याप्रियमाणयोः कुलालकुविन्दयोः समाहारः स्यात् । नापि घटपटादिकारिणां चक्रवेमादीनां

**समाहारः क्वचिदुपयुज्यते । तत्र कर्बुरकार्याभावान्न तथा । प्रकृते तु विशिष्टप्रत्ययस्य परोक्षापरोक्षरूपस्य दर्शनात्तथेतिचेन्न । विरुद्धजातिसमावेशाभावात् । भावे वा करम्बित एव कार्ये द्वयोरपि शक्तिरभ्युपगन्तव्या । दर्शनबलात् । न हि नियतविषयेण सामर्थ्येन कर्बुरकार्यसिद्धिः । अन्यत्रापि तथा प्रसङ्गात् । ननूभयोरप्युभयत्र सामर्थ्ये कोऽर्थो मिथःसन्निधानेनेतिचेन्न । तत्सहितस्यैव तस्य तत्र सामर्थ्यादिति । एतेन सुरभि चन्दनमित्यादयो व्याख्याताः । तथाचाभावविषयेऽपीन्द्रियसामर्थ्यस्य दुरपह्नवत्वादलमसद्ग्रहेणेति ॥**

नन्वेवमिति ॥ वह्न्यनुमितावपि धूमज्ञानं चक्षुषो व्यापार एवेति नानुमानसम्भव इत्यर्थः ॥ क्रियया, व्यापारेणेत्यर्थः ॥ संयोगवदिति, व्यतिरेकदृष्टान्तः ॥ यथा संयोगं व्यापारं विना चक्षुषो वाह्यसाक्षात्कारकरणत्वं न निर्वहति, न तथा धूमपरामर्शं विनेत्यर्थः । न च वह्निज्ञानमात्रे तस्य व्यापारत्वाभावेऽपि वह्न्यनुमितौ व्यापारत्वं स्यादिति वाच्यम् । शाब्दलिङ्गपरामर्शादपि वह्न्यनुमानादिति भावः ॥ न चेति ॥ न चानुपलब्धेर्लिङ्गाभासादिवद् दोषस्वभावत्वाभावेऽपि पित्तादिदोषसाहित्यमेवेन्द्रियस्यैव दुष्टत्वं स्यादिति वाच्यम् । लिङ्गाभासाद्यजन्यभ्रमत्वेन इन्द्रियकरणकत्वानुमानादित्यर्थात् ॥ अनुत्पत्तीति ॥ अधिकरणादिज्ञानाभावकाले स्वाभावादेव दुष्टत्वाभावात् । तदुत्पत्तिकाले तु स्वार्थविषयत्वमबाधितमेवेत्यर्थः ॥ आत्माश्रयेति ॥ दोषाद् भ्रमो भ्रमस्यैव दोषत्वमिति तस्मादेव स स्यादित्यात्माश्रय इत्यर्थः ॥ तद्विपर्य्ययेति ॥ न च यद् यद्विपर्ययजनकं तत्तत्प्रमाजनकमिति पित्तादिदोषेऽनैकान्तिकम् । इन्द्रियत्वेन दोषान्यत्वेन वा हेतुविशेषणात् । किं प्रमाणयोः समाहारः, समाहृतयोर्वा प्रामाण्यम् ? । तत्र नाद्य इत्याह ॥ विषयभेदे इति ॥ भिन्नाभिन्नप्रमाजनकत्वेन तयोः पर्य-

ऽवसितयोः प्रमान्तरजनकत्वानुपपत्तेरित्यर्थः । विषयभेदफलभेदयोः क्रमेण समाहाराभावमुदाहरति ॥ न हीति ॥ तत्रेति ॥ इन्द्रियजन्यत्वेन साक्षात्कारित्वे सत्यनुपलब्धिकरणकत्वेन परोक्षत्वे कर्बुरत्वमित्यर्थः । अन्त्ये त्वभावज्ञानेऽपीन्द्रियस्य सामर्थ्यं सिद्धमित्याह ॥ भावे चेति ॥ अन्यत्रापीति ॥ घटपटसामग्रीतोऽपि करम्बितकार्यं स्यादित्यर्थः ॥ एतेनेति ॥ घ्राणजसौरभज्ञानसहकृतेन चक्षुषा सुरभि चन्दनमिति ज्ञानं सौरभविशेषणकं चन्दनविशेष्यकं जन्यते । चन्दनसौरभमिति ज्ञानं चक्षुरुपनीतचन्दनविशेषणकं सौरभविशेष्यकं घ्राणेन जन्यते । यदिन्द्रियजन्यं यज्ज्ञानं तत्तदिन्द्रिययोग्यविशेष्यकमिति व्याप्तेरित्यर्थः ॥

ननु घटाभाववद्भूतलमित्यपि धीरनुपलब्ध्युपनीताभावविशिष्टबुद्धिरिन्द्रियेण जन्यते । तथाच विशिष्टज्ञानस्यैन्द्रियकत्वेऽपि विशेषणज्ञानायानुपलब्धिर्मानान्तरं सौरभज्ञानाय घ्राणमिवेत्याह —

स्यादेतत् । नागृहीते विशेषणे विशिष्टबुद्धिरुदेति । तत्कार्यत्वात् । न च विशिष्टसामर्थ्ये केवलविशेषणेऽपि सामर्थ्यं, केवलसौरभेऽपि चक्षुषो वृत्तिप्रसङ्गात् । अतोऽभावविशेषणग्रहणाय मानान्तरसम्भवः । अपि च । कथमनालोचितोऽर्थ इन्द्रियेण विकल्प्येत? । न च मानान्तरस्याप्येषा रीतिः । अनुमानादिभिरनालोचितस्याप्यर्थस्य विकल्पनात् । अप्राप्तेश्च । न ह्यभावेनेन्द्रियस्य संयोगादिः सम्भवति । न च विशेषणत्वं, संबन्धान्तरपूर्वकत्वात् तस्य । अवश्याभ्युपगन्तव्यत्वाच्चानुपलब्धेः । न हि तदुपलब्धौ तस्याभावोपलम्भ इति चेत् । उच्यते,

अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात् ॥
प्राप्त्यन्तरेऽनवस्थानान्न चेदन्योऽपि दुर्घटः ॥ २२ ॥

स ह्यर्थविशेषणीभविष्यन् केवलोऽपि विस्फुरेद् यस्यावच्छेदकज्ञानं न व्यञ्जकम् । स च विकल्पयितव्य आलोच्यते, यो विशेषणज्ञाननिरपेक्षेणेन्द्रियेण विज्ञाप्यते । यस्तु तत्पुरःसर एव प्रकाशते, तत्र तस्य विकल्पसामग्रीसमवधानवत एव सामर्थ्यान्नायं विधिः । स्वभावप्राप्तौ सत्यामप्यधिका प्राप्तिः प्रतिपत्तिबलेन रूपादावभ्युपगता । इह त्वनवस्थादुस्थतया न तदभ्युपगमो, न तु स्वभावप्रत्यासत्तिरेतावतैव विफलायते । न चेदेवं, प्रमाणान्तरेऽपि सर्वमेतद् दुर्घटं स्यात् । तथाहि । सर्वमेव मानं साक्षात्परम्परया वा निर्विकल्पकविश्रान्तम् । न ह्यनुमानादिकमप्यऽनालोचनपूर्वकम् । ततोऽनालोचितोऽभावः कथमनुपलब्ध्याऽपि विकल्प्येत । न च तया तदालोचनमेव जन्यते, प्रतियोग्यनवच्छिन्नस्य तस्य निरूपयितुमशक्यत्वात् । शक्यत्वे वा किमपराद्धमिन्द्रियेण । तथा, सम्बन्धान्तरगर्भत्वनियमेन विशेषणत्वस्य, मानान्तरेऽपि कः प्रतीकारः ? तदभावस्य तदानीमपि समानत्वात् । परस्य तादात्म्यमस्तीति चेत् । ननु यद्यसावस्ति, अस्त्येव, न चेन्नैव । न ह्यभ्युपगमेनार्थाः क्रियन्ते, अनभ्युपगमेन वा निवर्त्तन्ते इति । अवश्याभ्युपगन्तव्यत्वे कारणत्वं सिद्ध्येद्, न तु मानान्तरत्वम् । अन्यथा भावोपलम्भेऽप्यभावानुपलब्धिरेव प्रमाणं स्याद्, नेन्द्रियम् । अभावोपलम्भे भावाऽनुपलम्भवद् भावोपलम्भे अभावानुपलम्भस्यापि वज्रलेपायमानत्वादिति ॥

**प्रत्यक्षादिभिरेभिरेवमधरो दूरे विरोधोदयः**
**प्रायो यन्मुखवीक्षणैकविधुरैरात्माऽपि नासाद्यते ॥**
**तं सर्वानुविधेयमेकमसमस्वच्छन्दलीलोत्सवं**
**देवानामपि देवमुद्भवदतिश्रद्धाः प्रपद्यामहे ॥ २३ ॥**

## इति तृतीयः स्तबकः ॥ ३ ॥

नागृहीतेति॥प्रत्यक्षविशिष्टज्ञानस्य निर्विकल्पकजन्यत्वेन व्याप्ते-र्नाभावे सविकल्पकैकवेद्ये तदस्तीति नाभावज्ञानं प्रत्यक्षमित्याह ॥ अपि चेति ॥ अनुपलब्धिजन्याभावज्ञाने तु न तज्जन्यत्वमसाक्षात्कारि-त्वाच्छब्दादाविवेत्याह ॥ न चेति ॥ अप्राप्तेश्चेति ॥ इन्द्रियाणां प्राप्तार्थग्राहकत्वादित्यर्थः। न च तत एव संयोगादिबाधेनैव विशेष-णताप्राप्तिः कल्प्येत्याह ॥ न चेति ॥ विशेषणतायाः समवायादिस-म्बन्धान्तरव्याप्तत्वात्तद्बाधे विशेषणत्वस्यापि बाधादित्यर्थः । सम्ब-न्धस्य सम्बन्धिभिन्नत्वनियमेन ग्राह्यस्वरूपस्यासम्बन्धत्वनिश्चयात् समवायानभ्युपगमेनान्यत्र तदकल्पनाच्च । न चाभावस्येन्द्रियग्राह्यत्व-सिद्धाविहैव तत्कल्पनम । विशेषणताकल्पने सत्यभावः प्रत्यक्षः । तत्सिद्धौ च तत्कल्पनमित्यन्योन्याश्रयादिति भावः । एवमभावबुद्धौ इन्द्रियाणां करणत्वं निरस्यानुपलब्धेः करणत्वमनन्यगतिकतयोप-पादयति ॥ अवश्येति ॥ शुक्तौ रजतभ्रमे सति रजतानुपलब्धेरभावा-दिन्द्रियसंबद्धस्यापि रजताभावस्याग्रहणावश्यकत्वादित्यर्थः ॥

विशिष्टज्ञानमात्रस्य न विशेषणज्ञानजन्यत्वनियमः । अवच्छेद-ग्रहानियतज्ञानविषयत्वस्योपाधित्वादित्याह ॥ अवच्छेदेति ॥ ध्रौव्यं नियमः । अभावत्वेन अभावज्ञानस्य प्रतियोग्यादिज्ञानजन्यतया वि-शिष्टज्ञानसामग्र्यस्त्येवेति न केवलमभावो भासते । अतो न निर्वि-कल्पकविषय इत्यर्थः । अथाभावज्ञानं प्रतियोग्यादिज्ञानानपेक्षं, तर्ह्य-भावोऽपि निर्विकल्पकविषय एवेति सिद्धसाधनमित्याह ॥ ध्रौव्ये इति ॥ अभावश्च सम्बन्धान्तरं विनाऽपि स्वरूपेणैव विशेषणं, सम्ब-न्धान्तरसत्त्वे तत्रापि तत्कल्पनादनवस्थापत्तेः । यदि च नैवं, तदा त्वन्मतेऽपि वक्ष्यमाणो दोष इत्याह ॥ प्राप्त्यन्तरे इति ॥

स हीति ॥ अवच्छेदस्य प्रतियोग्यादेर्विशेषणस्य जन्यज्ञानं विना यत्र विशिष्टज्ञानसामग्री प्रथमतो न भवति, स एवार्थोऽग्रे विशिष्टज्ञानविषयः पूर्वं निर्विकल्पकविषय इति विषयमुखी व्याप्तिरित्यर्थः ॥ स चेति ॥ जन्यविशेषणज्ञानासहकृतेन्द्रियजन्यज्ञानगोचरत्वं निर्विकल्पकप्रयोजकमिति प्रमाणमुखी व्याप्तिरित्यर्थः । अभावस्तु प्रतियोग्यादिविशेषणज्ञाननियतज्ञानविषयत्वेन विशिष्टज्ञानैकविषयत्वाच्च तथेत्याह ॥ यस्त्विति ॥ प्राप्त्यन्तरे इति व्याचष्टे ॥ स्वभावेति ॥ यद्यपि घटे रूपसमवाय इति नानुभवः, तथापि रूपादेः प्रत्यक्षत्वेनेन्द्रियसन्निकर्षाश्रयत्वात् संयोगबाधेनेन्द्रियसम्बन्धघटकतया संयुक्तसमवायादिकल्पनादित्यर्थः । ननु ज्ञानघटयोरिव द्रव्येण रूपादिभिः स्वरूपसम्बन्धेनार्थान्तरम् । इन्द्रियसंयुक्तविशेषणतयैव रूपादिभानोपपत्तेः । मैवम् । सम्बन्धानुमितौ हि न स्वरूपसम्बन्धो विषयः । तत्स्वरूपाणामनन्तत्वेन गौरवात् । किन्तु पक्षधर्मताबलादेक एव सम्बन्धस्तद्विषयो लाघवादिति भावः ॥ इह त्विति ॥ यद्यपि सम्बन्धद्वयासिद्धौ नानवस्था, तथात्वे वा समवायोऽपि न स्यादनवस्थाऽऽपादकत्वात् तथाप्यभावो यद्यतिरिक्तसम्बन्धवान् स्यात् सत्तावान् स्यादित्यव्यवस्थैवानवस्थेत्यर्थः । इन्द्रियञ्च नाप्राप्तग्राहकमिति संयोगादिबाधेनैव तत्प्राप्तिर्विशेषणता कल्प्येति भावः ॥ मानान्तरेऽपीति ॥ अनुपलब्ध्याख्यमानान्तरस्वीकारेऽपीत्यर्थः॥निर्विकल्पकेति ॥ प्रमाणविषयत्वं निकल्पकविषयत्वव्याप्यमित्यर्थः ॥ तदभावस्य, सम्बन्धान्तराभावस्य ॥ तदानीमपि, मानान्तरस्वीकारेऽपि ॥ परस्येति ॥ भट्टानामधिकरणे विशेषणत्वं नाभावस्य, किन्तु तादात्म्यमित्यर्थः । भावाभावयोर्विरोधाच्च तादात्म्यं, तथात्वे वा संयोगादिनैवाभावग्रहः स्यादित्याशयेनाह ॥ नन्विति ॥ यद्यभावोऽस्ति तदा विशेषणत्वमस्त्येवेत्यर्थः । अवश्याभ्युपगन्तव्यत्वादित्यत्राह ॥ अवश्येति ॥ अन्यथेति ॥ अभावज्ञाने यथा भावोपलम्भः प्रतिबन्धकस्तथा भावज्ञानेऽप्यभावोपलम्भः प्रतिबन्धकः स्यादित्यर्थः । एतच्च भावोपलब्धावभावानुपलब्धिः पृष्ठलग्नैवेति व्याचक्षाणैरस्माभिः परिशिष्टप्रकाशे विपञ्चितमिति तत्रैवानुसन्धेयम् ॥

स्तबकार्थमुपसंहरन्नेवेश्वरनतिं निबध्नाति ॥ प्रत्यक्षादिभिरिति ॥

यस्येश्वरस्य मुखवीक्षणैकविधुरैर्धर्मिग्राहकमानबाधितैः प्रत्यक्षादि-भिर्विरोधोदयोऽधरः । अत एव, दूरे । सर्वमनुविधेयं वश्यं यस्य । असमा चासौ स्वच्छन्दा चेतनान्तराप्रयोज्या या लीला, सैवोत्सवो यस्य, स तथा । दुःखाभावैकनिदानत्वात् । अत एवोज्ज्वदतिभङ्गा घयं, तं देवानामपि देवं स्तुत्यं प्रपद्यामहे इत्यर्थः ॥

इति श्रीमहामहोपाध्यायश्रीवर्धमानविरचिते न्यायकुसुमाञ्जलि-प्रकाशे तृतीयः स्तबकः ॥ ३ ॥

श्रीगणेशाय नमः ।

# अथ मकरन्दे तृतीय—

## स्तवकः ॥ ३ ॥

अनुपलब्धेः स्वातन्त्र्येण प्रामाण्यानभ्युपगमाच्च बाधकत्वमत आह तत्रेति । विशेषणबाधेनेति । शरीरबाधेन कर्तृबाधप्रवेत्यर्थः । २. ८.
प्रत्यक्षबाधस्येत्युपलक्षणम् । अग्रिमेण पौनरुक्त्यापातादित्यपि द्रष्टव्यम् । स्वेष्टेति । यद्यपि जगतएव तदिच्छाविषयत्वात् स्वेष्टसाधनताज्ञानं तस्यापि, तथापि स्वप्रयोजनव्याप्यत्वादिति मूलोक्तएव तात्पर्य्यम् । स्वप्रयोजनप्रयोजकताज्ञानव्याप्यत्वादित्यर्थः । तथात्वे अयोग्यत्वे । प्रतिबन्धिसामान्यनिषेधे कृते अतितरां न प्रतिबन्धिरिति युज्यते इति तदर्थपरतया प्रथमं तृतीयमेव पदं व्याख्याय द्वितीयपदं व्याचष्टे अथेति । व्यभिचारादिति । तेषु सत्स्वप्यात्मप्रत्यक्षप्रतिबन्धाभावादित्यर्थः । अतथात्वमिति । एकस्य कारणत्वप्रतिबन्धकत्व- ३. ६.
विरोधादित्यर्थः । तथापीति । तथा च परामर्शेऽप्यनुद्भवाच्च तथात्वमिति भावः । ननु हेत्वन्तरवत् परामर्शोऽपि व्यभिचारी, सत्यपि तस्मिन् बाधादिना अनुमितिप्रतिबन्धे परापर्शोपहितात्मप्रत्यक्षसत्त्वात् । अन्यथा वह्निव्याप्यवन्तं जानामीत्यनुव्यवसायानभ्युपगमे अनुभवविरोधात् । तस्मात् प्रत्येकमप्रतिबन्धकत्वेऽप्यनुमितिसामग्रीत्वेन तद्धेतूनां फलबलात् प्रतिबन्धकत्वम् । परामर्शस्य च रूपान्तरेण तदुपलम्भकत्वमिति नोक्तविरोधः । यदि च सकलहेत्वधिकरणक्षणः सामग्री, तदा तस्य परामर्शभिन्नत्वाद्विरोधशङ्कैव नास्ति । एवञ्चोपपत्तौ न ज्ञानादावुद्भूतत्वं, मानाभावात् । आद्यशब्दाग्रहश्च श्रोत्रेणासम्बन्धात् । सम्बन्धे वा तद्ग्रहस्येष्टत्वात् । क्षणिकान्तशब्दस्य च स्वसमयवर्त्तितया विशिष्य हेतुत्वपक्षएवाप्रत्यक्षत्वात् । न च कर्तृत्वादिनिर्विकल्पकापेक्षायां पक्षान्तरेऽप्यसम्भवः, सुतरां तर्हि नोद्भूतत्वम् । स्मरणरूपविशेषणज्ञानमादाय तत्सम्भवाच्चेत्यनुशयमाविष्करोति इत्येके इति । उक्तेनैवोपपत्तौ मनःसंयोगविशेषत्वेन हेतुत्वे गौरवं, संयोगे विशेषश्च जातिरूपः प्रत्यक्षखण्डोक्तसङ्करापत्त्या निरस्तः, अन्यश्च दुर्वच इत्यस्वरसमाविष्करोति इत्यन्ये इति । कर्मेति न्यायमते । संयोगादीति भट्टमते । स्वमतावष्टम्भेनाह साध- ३. १७.

नेति। अन्यथा पक्षएव साधनाव्यापकत्वात्। अजसंयोगेन सिद्ध-
३. २० साधनादाह मूर्त्तेति। चन्दनसंयोगेन सिद्धसाधनादाह असमवा-
यीति। शब्दजशब्दे व्यभिचारवारणाय जातिगर्भत्वम्। तत्र च
गुणपदं स्पष्टार्थम्। गुणत्वावान्तरपदं तादृशशब्दवृत्तिसत्तायोगित्वे-
नार्थान्तरवारणाय। शब्दसुखान्यतरत्वादिकमादायार्थान्तरादाह
जातिपदम्। जलावयविस्नेहे व्यभिचारादाह नित्यवृत्तीनि। परमा-
णुस्नेहे व्यभिचारादाह अनित्येति। आत्मवृत्तित्वित्वे व्यभिचारादाह
विशेषेति। भट्टमते शब्दस्य द्रव्यत्वादुभयसिद्धं दृष्टान्तान्तरमाह
पाकजवच्चेति। अनात्मेति। साधनावच्छिन्नसाध्यव्यापकोऽयमुपाधिः,
अन्यथा प्रचयजन्यपरिमाणवृत्तिजातियोगिन्यात्मपरिमाणे साध्या-
व्यापकत्वात्। ज्ञानेति। जन्यत्वमपि पक्षविशेषणमतो नेश्वरप्रत्यक्ष-
भागे बाधः। इन्द्रियजन्यः विषयप्रत्यासन्नसंयोगिकरणजन्य इत्यर्थः।
५. ६. तेनेन्द्रियत्वस्य मनोगर्भत्वादिदानीं न साध्याप्रसिद्धिः। यथेति।
यद्यप्यतिप्रसङ्गभिया श्रोत्रस्योपाधिकल्पनेऽप्यत्र तदभावान्न तत्क-
ल्पनमर्हं बहिरिन्द्रियत्वञ्चाप्रयोजकं, तथाप्यापातत इदं, व्यासङ्गानु-
पपत्तावेव तात्पर्य्यम्। एकं करणमिति प्रत्यक्षप्रकाशे द्रष्टव्यम्।
नानेति। अत्र नानादिगवच्छिन्नेति पाठो युज्यते, अन्यथा अनन्वयात्।
ननु रूपादिषु मध्ये रूपादिमात्रग्राहकत्वेनैव चक्षुरादिसिद्धेस्त-
७. २०. दन्यगुणग्रहे तदसामर्थ्याच्चित्रज्ञानमसम्भवीत्यरुचेराह वस्तुत
इति। ननु गोगोत्वनिर्विकल्पकानन्तरमन्यतरविशेषणज्ञानोत्पत्ता-
विवादृष्टमेवात्र नियामकमस्तु, यथा च तत्र नोभयविशेष्यकसमू-
हालम्बनं तथाऽत्र न युगपज्ज्ञानमिति चेत्। न, अणुना मनसा दृ-
ष्टेनैवोपपत्तावदृष्टकल्पनाऽनवकाशात्। अन्यथा सएव न कल्प्येते-
ति भावः। सर्व्वसिद्धत्वादिति। यद्यपि युगपदनेकेन्द्रियसन्निकर्षो न
सर्वसिद्धः, तथापि ज्ञानक्रमस्य तत्र सर्व्वसिद्धत्वात् अत्रापि क्रम-
८. ४. इत्यत्रैव तात्पर्य्यम्। तटस्थः शङ्कते नन्विति। यद्वा, गूढाभिसन्धिः
शङ्कते नन्विति। अतएवाभिसन्धिमुद्घाटयति विभुत्वेऽपीति। तथै-
व तेषामिति। नन्वेवं वैभवेऽपि रूपादिसकलगोचरबुभुत्सा-
याश्चहेतुत्वेऽपि तदन्यतमबुभुत्सा तद्ग्राहिका अन्यग्रहप्रतिबन्धिका
चास्तामिति तुल्यः समाधिः। न च तादृशबुभुत्सायामपि सूचीस-
र्पादिवेधानुभवेन तादृश्या अपि व्यभिचारान्नैवमिति वाच्यं, शब्दे-

ऽपि तादृशबुभुत्सायां निकटाहन्यमानढक्काशब्दानुभवेन तुल्यत्वात् । अत्रापि यदि विशेषकल्पनं, तदा तदपि तुल्यमिति । मैवम् । अणुना मनसैवोपपत्तौ तादृशबुभुत्साहेतुत्वादिकल्पनायामेव गौरवात् । रसनसंयोगकालइति । न च त्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वे तदावश्यकमिति वाच्यं, त्वचस्तथात्वमतेऽपि तन्मनोयोगस्य तथात्वे मानाभावात् । न च सुषुप्तौ ज्ञानानुत्पत्तिरेव मानं, शारीरमनःसंयोगाभावात्तदुपपत्तेः । चाक्षुषेति । प्रत्यक्षप्रकारो विपश्चितम् । शब्दजशब्दे व्यभिचारवारणाय साध्यं व्याचष्टे मूर्तेति । गुणपदं स्पष्टार्थम् । न तदेवेति । न सदृशदर्शनमेवेत्यर्थः । अपिपदात्तद्भिन्नशब्दाद्युपलम्भपरिग्रहः । तथा च क्वचिद्दृष्टं क्वचिज्ज्ञानान्तरमुद्बोधकमिति भावः । ननु मन्दत्वं तारत्वनिरूप्यमिति तदज्ञाने तदसम्भवीत्यत आह मन्दत्वमिति । जातिज्ञाने च नेतरज्ञानापेक्षेति भावः । ननूष्मा तेजस्तच्चानीन्द्रियमित्यत आह अनुद्भूतरूपेति । ऊष्मादेरित्यत्रातद्गुणसंविज्ञानबहुव्रीह्याश्रयणादिति भावः । भट्टानामिति । तथा च तेषां तथानियमएवेत्यर्थः । एकात्ममात्रेति । तथा च नियामकान्तराभावेऽपि स्वभावएव नियामकइति भावः । अयोग्यस्यैव बाध इत्याशङ्क्याह शृङ्गत्वस्येति । अप्रयोजकत्वमाशङ्क्याह अन्यथेति । अन्वयिनः केवलान्वयिनः । अयमेवेति । प्रकृतानुमानमेवेत्यर्थः । आभासेति । आभासप्रतिपन्नस्यापि वस्तुत्वाभ्युपगमे वस्तुत्वावस्तुत्वसङ्करापत्तिरित्यर्थः । यदीति । यद्यपि तर्हीत्यस्य तदेत्यर्थः, तस्य च नित्यसापेक्षतया शेषदानं विनाऽपि तदर्थलाभः, तथापि नित्यसापेक्षतया अध्याहारात् तदपेक्षया शेषस्य त्वरितप्रतिपत्तिकरत्वमिति भावः । शशे इति । यद्यपि शशे गवादिशृङ्गस्य संयोगवृत्त्या सत्त्वात् कथं शृङ्गाभावः, समवायवृत्त्या च तदभावो गवादावपि शृङ्गस्य संयोगित्वात्, तथापि जन्यजनकभावसंबन्धेन तदभावो बोध्यः । प्रत्यक्षप्रमायामिति । तथा च प्रतियोगितद्व्याप्येतरयावत्प्रमापकसमवधाने सति अनुपलब्धिरभावग्राहिका, गुणस्य चार्थनियतत्वेन तद्व्याप्यपदेनैव व्यवच्छेदान्नासम्भवः । सा च न शशशृङ्गाभावे, तत्प्रमापकाप्रसिद्धेः, न च दोषान्यज्ञापकसाकल्यं विवक्षितं, तच्चेन्द्रियाद्येव तत्रापि प्रसिद्धमिति वाच्यम् । गौरवादित्याहुः । वस्तुतोऽसत्ख्यातेः कारणा-

८. २०. ११. ३. १४. १५. १६. २०.

भावेनानभ्युपगमादलीकस्य नोपलब्धत्वमपीति न तन्निषेध्यमिति
१६. २३. भावः । प्रमापकस्येति । प्रज्ञापकस्येत्यर्थः । अत्रेदमनभिमतिबीजम् ।
असत्ख्यातिपक्षे दोषान्यज्ञापकमिन्द्रियाद्येव, अन्यथा दोषोऽपि न
तज्ज्ञापकइति दोषान्यविशेषणं व्यर्थमिति । प्रतियोगितेति । यद्यपि
तादृशज्ञानं विनाऽपि प्रमेयाभावइति शाब्दादिनाऽभावग्रहान्न तस्या-
हेतुत्वं, तथापि प्रत्यक्षे तथात्वं बोध्यम् । यद्यप्याहार्य्यादिरूपं तादृ-
शज्ञानं प्रकृते सम्भवत्येव, तथाप्यनुमानप्रकाशे मदुक्तमनुसन्धे-
१७. २. यम् । परेषामिति । यद्यपि शाब्दादिज्ञानमादाय तेषामपि तत्प्रसिद्धि-
रस्त्येव, तथापि तथा सति बाधापत्तेः सर्व्वज्ञपदस्य सर्व्वविषयक-
प्रत्यक्षाश्रयपरतायामेव प्रसिद्धिर्बोध्या । जिज्ञासितेति । प्राचीनमते-
नेदम् । तद्रूपेणेति । यद्यपि धर्म्मिमात्रसिद्धौ न सिद्धासिद्धिव्याघातः,
तथाप्याप्तोक्तत्वाविशेषाद्धर्म्मांशेऽपि प्रामाण्यमन्यथा न धर्म्यंशेऽपी-
त्याश्रयासिद्धिरेवेति भावः । अस्मदादिपक्षत्वे सिद्धसाधनं बोध्यम् ।
उपलम्भेन्द्रिययोरिति । प्रत्यक्षस्य विषयजन्यत्वनियमात्तदन्यज्ञानस्य
त्वयाऽनभ्युगमादिति भावः । ध्वंसे व्यभिचारेण भावपदमन्तर्भा-
वयति भावकार्य्यत्वस्येति । यद्यप्यत्र पौर्व्वापर्य्यनियमे मानाभावः,
तथापि सामान्यविशेषयोः प्रथममुत्सर्गतः सामान्यस्योपस्थितिरि-
२२. ४. त्याशयेन तथोक्तम् । सहचारदर्शनस्येति । शङ्कितव्यभिचारएवाप्रयोज-
कइति भावः । स उपाध्यभावः । नन्वनौपाधिकत्वं व्याप्तिव्याप्यमि-
ति व्याप्यत्वेन तदनिश्चयदशायां तत्सन्देहः स्यादेव, न चानौपाधि-
कत्वव्याप्तिमतेनेदं, तस्य व्याप्तिग्राहकत्वेनाभ्युपगमादित्यरुचेराह
२२.२२. किञ्चेति । अव्यभिचारेति । व्याप्तिनिश्चयइत्यर्थः । अतएवाग्रे तथैव
वक्ष्यति । उपाध्यभावेति । उपाध्यभावनिश्चयापेक्षायामित्यर्थः । निय-
तस्य अग्नीन्धनादिनियतस्य तस्य तादात्म्यादेरित्यर्थः । ननु व्या-
प्तिस्वीकारेऽपि नानुमानप्रामाण्यस्वीकारस्तयोर्भेदादित्यत आह अपि
चेति । धूमादिति । निश्चयत्वं जातिरिति मतेनेदम् । उपनीतभानाभि-
प्रायेण वा । अन्यथा अनुव्यवसायविषयत्वानुपपत्तेरित्याहुः । आशु-
विनाशिनां क्रमिकाणां मेलकानुपपत्तेराह संस्कारेति ।
२४.३०. अन्यथेति । प्रतिबन्धकतावच्छेदके ज्ञानत्वस्यैव न प्रवेशो गौरवान्,
कुतो निश्चयत्वस्येति भावः । ननु संशयो न जिज्ञासाहेतुः, तस्या इच्छा-
त्वेन ज्ञानेष्टसाधनताज्ञानसाध्यत्वात् । साध्यार्थिनश्च साध्याभावज्ञानं

नेष्टसाधनमिति न तत्र जिज्ञासा। तथा च कथं तन्निवर्त्तकता तर्कस्येति चेत् न, अन्वयव्यतिरेकाभ्यां सत्प्रतिपक्षस्येव संशयस्यापि जिज्ञासाजनकत्वात् । ननु विरोधिविषयत्वाभावात्तर्कः कथं संशयजिज्ञासयोर्निवर्त्तक इति चेत् , न, वैषयिकविरोधाभावेऽपि स्वरूपेणैव दाहादौ मण्यादिवत् फलबलेन तस्य विरोधित्वात्, इच्छायामनिष्टप्रतिसन्धानत्वेनापि विरोधित्वाच्च, मधुविषसंपृक्तान्नबुभुक्षादौ तथा दर्शनात् । नन्वेवमपि यदि निर्वह्निः स्यादिति विषयपरिशोधकस्य तर्कस्य कथमनुमितावुपयोगः, परामर्शादेव विशेषदर्शनत्वेन शङ्कानिवृत्तेरिति चेत्। विशेषदर्शने स्वरसवाहिशङ्काऽनुदयेऽपि अन्याहितशङ्कोदयेन बाधकप्रमाणावतारशङ्कानिबन्धनसाध्याभावशङ्कानिवर्त्तकत्वेन तदुपयोगादिति विपश्चितमनुमानप्रकाशे। केचित्तु प्राथमिकलिङ्गदर्शनस्य तदविरोधित्वेन धूमवानयं वह्निमान्न वेति संशयः, ततो जिज्ञासा, ततश्च साध्याभावज्ञानोपायानुसन्धानपरस्य तामपि वह्निव्याप्तिं पक्षधर्मधूमं न परामृशति व्यग्रत्वादिति प्रसिद्धायां परामर्शसामग्र्यां तत्तर्कावतारे तेनापहृतायां जिज्ञासायां तदुपायानुसरणपरत्वरूपविषयान्तरसञ्चाराभावे परामर्शोत्पादः, अत एवायं न्यायविषयपरिशोधक इति गीयते, न्यायस्य परामर्शस्य विषयो लिङ्गं, तस्य परिशुद्धिः परामर्शप्रतिबन्धकसाध्याभावजिज्ञासातदुपायानुसरणपरत्वयोरपगमः। तदाह प्रमेयतत्त्वबोधे वर्द्धमानः—"एवञ्च विरोधिनानाविषयस्य जिज्ञासा तदुपायानुसरणञ्च वास्तवकोटिप्रमाणप्रवृत्तावंशतः परिपन्थी"—इति। न चैवं तर्कस्य न्यायोत्तराङ्गत्वप्रतिपादनविरोधः, परामर्शव्यापारस्तर्क इति मतेन तदुत्थानात् । तदाह तत्रैव वर्द्धमानः। "तर्को न्यायस्य पूर्वाङ्गं न्यायविषयपरिशोधकत्वात्, व्याप्तिग्राहकत्वाच्च" इत्याहुः ।

यत्तर्कमूलव्याप्तौ व्याघातः शङ्काप्रतिबन्धकस्तमुदाहरति धूमो यदीति । सत्यन्तं घटादौ व्यभिचारवारणाय । पक्षविशेषणमप्येतद् बोध्यम । तेनैतद्विशेषणस्यैव व्यतिरेकमादाय नास्य विपर्ययपर्यवसानम् । तद्ग्रहश्च योग्यानां व्यभिचारदर्शनात्, अयोग्यानामनुपस्थितकल्पनागौरवात् । तदुपादानमिति । तदुपादानहेतुभूतधूमवह्न्यादिकार्य्यकारणभावज्ञानमेवेत्यर्थः । शङ्काया विरोधिनिश्चयाप्रतिबध्यत्वादिति ध्येयम् । यद्यप्येवमन्योन्याश्रयः, शङ्कानिवृत्तावेव　२५।२५

तर्कस्य कार्य्यकारणभावनिवर्त्तकत्वं निश्चिते च कार्य्यकारणभावे सतः शङ्कानिवृत्तिरिति तथापि न सर्व्वत्रानेनैव तर्केण वह्निधूमकार्य्यकारणभावग्रहः, स्वतः सिद्धशङ्काविरहेऽन्वयादिज्ञानवतस्तद्ग्रहे बाधकाभावात् तस्मात् सर्व्वत्र शङ्का स्यादेवेति यश्चार्व्वाकादिरनुमानविरोधी मन्यते, तं प्रत्युच्यते । तथा सत्येतादृशतर्केऽपि तादृशशङ्कायां भवतो धूमार्थवह्न्युपादानं व्याहन्येत । तदिदमाह, न ह्यस्ति सम्भवो धूमाद्यर्थं वह्न्यादिकमुपादत्ते तत्कारणं तन्नेत्याशङ्कते चेति दिक् । किन्त्विति । न चैवमव्यभिचार-
२६।१३
ज्ञानाभावसहकृताद्यभिचारनिश्चयप्रसङ्ग इति पूर्व्वोक्तदोषानपाय इति वाच्यम् । सहचारदर्शनस्य व्यभिचारनिश्चयानङ्गत्वात्, मानाभावात्, विरुद्धे व्यभिचारनिश्चयस्य तेन विनाऽपि भावाच्च । शेषन्त्वनुमानप्रकाशे ।

अहेतुकैवोत्पत्तिरित्यभ्युपगमे हेतुफलभावाभावेऽपि शङ्का स्यादेवेत्यतो व्याचष्टे शङ्काऽपीति । देशादीति । अत्रैव शङ्का नान्यत्रेति नियमहेतोरभावात् शङ्कायामपि शङ्का, एवं सर्वं मिथ्या भविष्यतीत्यपि शङ्का स्यादिति सर्व्वासत्वप्रसङ्ग इत्यर्थः ।
२६।२२
सकलेति । शङ्कापिशाचीसत्त्वेनातिप्रसङ्गान्न सा प्रतिबन्धिकेत्यर्थः । यद्यपि संशयसहितजिज्ञासाया एव शङ्कानिवर्त्तकत्वेनोक्तत्वात् तथैव युक्तत्वाच्च ततोऽनुमानप्रवृत्तौ शङ्कास्वरूपमर्पीति मूलमयुक्तं, तथापि मतान्तरेणेदमित्येके । अनुमानप्रवृत्ताविति न सतिसप्तमी किन्तु निमित्तसप्तमी, न च कर्म्मयोगाभावान्न तथेति वाच्यं, शङ्कास्वरूपस्य कर्म्मकर्तृत्वादित्यन्ये । विशिष्टेति । साधनविशिष्टं साध्यवैशिष्ट्यमित्यर्थः । व्यापकत्वं व्याप्तिघटितं तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं वा विवक्षितम् । आद्ये दोषमाह व्याप्तिनिरूप्यत्वादिति । अन्त्यमाशङ्क्य निराकरोति नापीति । सम्बन्धज्ञानेऽपीत्युपलक्षणम् । एवमप्यर्थान्तरतादवस्थ्यादित्यपि द्रष्टव्यम् । व्याप्तिलक्षणान्यनुमानप्रकाशे द्रष्टव्यानि । यथा तुल्येति । यद्यप्यस्योपाधित्वाभावान्न सन्दिग्धोपाधित्वं, अन्यथेश्वरानुमानस्य सोपाधित्वापत्तेः, तथापि विशेषादर्शनदशायां कदा चित् तत्सन्देहोऽप्यनुमितिप्रतिबन्धकइति तदपि तथात्वेनोदाहृतम् । वस्तुतः शाकपाकजत्वादिकमेव साध्यव्यापकत्वमात्रसन्देहदशायां तथेति बोध्यम् । सन्दिग्धेति । दूषकत्वमा-
३०।२६

ने दृष्टान्तोऽयम् । विपक्षस्येति । विपक्षगामित्वमित्यर्थः ॥

ज्ञायमानत्वेनेत्यापाततः, परमुखनिरीक्षकतयेति बोध्यम् । अन्यथोपाधेस्तथात्वं स्यादेवेति । साधनत्वसाध्यत्वे व्याप्यत्वव्यापकत्वे, न च सोपाधौ वस्तुतस्तथात्वमत आह अभिमतेति । ननु व्यापकत्वं- ३१।१० व्याप्तिनिरूपकत्वम् । तथा च व्याप्तौ गृहीतायामुपाधिप्रत्ययस्तत्प्रत्यये च तदभावरूपानौपाधिकत्वप्रत्ययाधीनव्याप्तिप्रत्ययइत्यन्योन्याश्रयइत्यत आह व्यापकत्वञ्चेति । प्रतियोग्यसमानाधिकरणत्वमप्यत्यन्ताभावविशेषणम् । तेन संयोगस्य द्रव्यत्वव्यापकत्वम् । पक्षेतरस्योपाधित्वं मन्यमानोऽपि नैयायिकसिद्धान्तानुसारेण तल्लक्षणेऽतिव्याप्तिं ददाति बाधानुन्नीतेति । त्वन्मते इति शेषः । एतदपि पक्षान्तर्भावेण साध्यव्यापकत्वानिश्चयात् पक्षातिरिक्तसाध्यव्यापकत्वाभिप्रायेण बोद्धव्यम् । एतच्चाग्रे स्फुटम् । ननु साध्यप्रयोजकत्वे सतीति लक्षणविशेषणं तच्च न पक्षेतरत्वे इति नातिव्याप्तिरित्याह अर्थेति । न तथा, न प्रयोजकत्वघटितलक्षणवदित्यर्थः । एतेनोक्तशङ्कायाअतिव्याप्तिपोषकतयाऽसङ्गतिरप्यपास्तम् । दूषकेति । तथा च ३१।१५ प्रयोजकत्वगर्भस्यापि तस्य तत्र सत्त्वादतिव्याप्तिस्तदवस्थैवेति भावः । ननु व्यर्थविशेषणरहितत्वं तद्विशेषणमिति नातिव्याप्तिरित्याह व्यर्थेति । अनुपाधिः उपाधिलक्षणानाक्रान्त इत्यर्थः । साधनेति । इतरत्वस्य केवलान्वयितया साधनव्यापकत्वमिति पर्वतादिपदविशेषणम् । ततश्च पक्षएव साधनाव्यापकत्वमित्यर्थः । तथा च पुनरतिव्याप्तितादवस्थ्यमेवेति भावः । ननु साधने साध्यव्यभिचारावारकतयैव व्यर्थत्वं ब्रूमः, तत्र तद्वारकस्यैवोपाधित्वात् । यथा वह्नौ धूमव्यभिचारवारकमार्द्रेन्धनवत्त्वमुपाधिः, पक्षेतरत्वञ्च न धूमे वह्निव्यभिचारवारकं, तत्र तस्यैवाप्रसिद्धेरित्यत आह नापीति । स्व- ३१।२० सिद्धस्य पक्षेतरोपाधिवादिसिद्धस्य । तन्मते धूममात्रस्य पर्व्वतएव वह्निव्यभिचारित्वात्तद्वारकं धूमे पर्व्वतेतरत्वं विशेषणम् । पर्व्वतेतरधूमवत्त्वस्य वह्न्यव्यभिचारित्वात् । तथा च सर्वथा व्यर्थविशेषणरहितत्वस्य तत्र सत्त्वादुक्तातिव्याप्तिः सुदृढैवेति भावः । यद्यपि वास्तवव्यभिचारवारकत्वविवक्षायां नातिव्याप्तिः, तथापि एतादृशस्याप्युपाधित्वेन सर्व्वसिद्धत्वात्तत्राव्याप्तिर्बोध्या । तादृशस्यापीति । स्वसिद्धव्यभिचारवारकस्यापीत्यर्थः । पक्षापक्षसाधारणसाध्यव्यापक-

त्वमेव विवक्षितमिति नोक्तातिव्याप्तिरित्याह पक्ष इति । परमतेनैव परस्यातिव्याप्तिं दत्त्वा अनुमानद्वेषी चार्वाकस्तस्योपाधित्वमेवोपपादयति तथापीति । तद्व्यावृत्त्येति । अत्र पक्षातिरिक्तसाध्यव्यापकत्वमेवेति तद्व्यावृत्तावपि पक्षनिष्ठसाध्याव्यावृत्तेः कथं व्यभिचार इति चिन्त्यम् । अनौपाधित्वस्य व्याप्तित्वानभ्युपगमान्न व्याप्यत्वासिद्धिरूपत्वमिति तदुन्नायकत्वेन तथात्वं वाच्यम्, एवं सत्याह सा हीति । निर्धूमस्येति । तथा चापातत उक्तोपाधिना प्रकृतोपाधौ व्याप्तिज्ञा-

२३।१० नबाधा स्यादेवेति भावः । उपसंहरन्नेव प्रकृते योजयति तस्मादिति। ननु सन्दिग्धोपाधेर्व्यभिचारसंशयाधायकतया पृथगेव दोषत्वमभ्युपगम्यते न तु सत्प्रतिपक्षतयेत्यरुचेर्दोषान्तरमाह केवलेति । व्यतिरेकव्याप्तिपुरस्कारेण तेनापि सत्प्रतिपक्षसम्भवादित्यर्थः । तस्यापीति। असाधारणस्यापीत्यर्थः। तथा च सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवत्तत्रासाधारणोऽपि न दोष इति भावः । ननु बाधेन व्यतिरेके पक्ष-

२३।२३ स्यैव सपक्षत्वेन तद्व्यावृत्तत्वाभावान्नासाधारण्यमित्यरुचेराह केवलान्वयिनीति । केवलान्वयिधर्मसाध्यकानुमाने इत्यर्थः । तत्र व्यतिरेके साध्याप्रसिद्ध्या सपक्षाभावान्नासाधारण्यमिति भावः । यद्यप्येवमसाधारण्याभावेऽपि साध्याप्रसिद्ध्यैव व्यतिरेके सत्प्रतिपक्षत्वाभावान्न तस्योपाधित्वं स्यात्, तथाप्यसाधारण्यनिरासमात्राभिप्रायकोऽयं ग्रन्थ इत्याहुः । वस्तुतः साध्याप्रसिद्धावप्यप्रसिद्धसाध्यकव्यतिरेकिणीव व्यतिरेकव्याप्तिपक्षधर्मतापरामर्शसम्भवात्तस्य प्रकृतहेतुपक्षधर्मताव्याप्तिपरामर्शसंवलनदशायां सत्प्रतिपक्षत्वमित्यभिप्रायकोऽयं ग्रन्थः । यद्यपि विरोधिपरामर्शत्वेन तथात्वं प्रकृते च विरोधनिरूपकाप्रसिद्धिः, तथापि विरोधप्रतिसन्धानमेव तत्प्रयोजकम् । तच्च प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्रमसम्भवात् सम्भवत्येवेति मतविशेषेण तथोक्तमिति । यद्वा, आकाशात्यन्ताभावादिकेवलान्वयिपरमेतत् । तत्र तद्वतोऽप्रसिद्ध्या सपक्षाभावादिति। केचित्तु

२३।३१ पूर्वास्वरसादाह अपि चेति । तथापीति । साध्यव्यापकताकोटिमाश्रित्य सन्दिग्धोपाधितापत्तेरित्यर्थः ।

समव्याप्त एवोपाधिरित्युपपादयन्नेवाह अथेति । यदीयं प्रसञ्जितं साधनव्यापकत्वं हेतुसाध्ययोर्व्यभिचाराभावापादकमित्यर्थः । अभावः साधनव्यापकत्वम् । तत् किं साध्यव्यापकव्याप्यत्वमेवा-

नौपाधिकत्वं, तथा चोक्तगुणत्वाद्यतिप्रसङ्ग इत्यत आह व्यभिचारीति । यदि चेति । ननु समव्याप्तव्यतिरेके व्यभिचाराभावनियमेऽप्यनुमितिनियमो नास्ति, ह्रदोऽग्निमान् धूमादित्यादौ तादृशोपाधेरभावेऽपि स्वरूपासिद्ध्या अनुमित्यभावादिति चेत् । न । पक्षवृत्तित्वे बाधप्रतिरोधाभावे च सति यद्व्यतिरेके लिङ्गस्य समीचीनत्वानियमस्तद्दूषणमित्यर्थात् । विरुद्धत्वादेरिति । आदिपदाद्व्यभिचारादिपरिग्रहः । अन्यतरव्यतिरेकेऽप्यन्यतरसत्त्वे लिङ्गस्यासमीचीनत्वादित्यर्थः । ननु साधनावच्छिन्नसाध्यस्य पक्षेऽपि सत्त्वात्तद्व्यापकतया नातिप्रसङ्ग इत्यनुशयादाह पक्षधर्मेति । वायुः प्रत्यक्षः प्रमेयत्वादित्यादावुद्भूतरूपवत्त्वाद्युपाधावव्यापनादित्यर्थः । आर्द्रेन्धनवत्त्वादाविति । यद्यपि द्रव्यत्वादिकमवच्छेदकं सम्भवत्येव, तथाप्यवच्छेदकस्य साध्ये व्याप्यतावच्छेदकत्वमभिप्रेत्यैतदुक्तम् । तदिदमाह नियतेति । नियतावच्छेदकेत्यर्थः । धूमत्वस्यैवार्द्रेन्धनव्याप्यतावच्छेदकत्वादिति भावः । वस्तुतः प्रागभावो विनाशी जन्यत्वादित्यादौ भावत्वाद्युपाध्यव्याप्तिर्बोध्या । शब्दोऽभिधेय इति । एतच्च पक्षातिरिक्तसाध्यव्यापकत्वमादाय बोध्यम् । व्यभिचारे इति । अस्फुटत्वदशायां तदनुसरणसम्भवाच्चेत्यपि द्रष्टव्यम् । यथेति । यद्यप्यत्र व्यभिचाराभावात्तद्व्याप्तोपाधेरनुपपत्तिः, तथापि सत्प्रतिपक्षे विरोधमात्रस्य तन्त्रत्वेन पर्यवसितानित्यत्वरूपसाध्याभावसाधनद्वारा तदुन्थापकतयैवोपाधित्वमित्येतन्मततात्पर्य्यम् । न च कृतकत्वस्य पक्षवृत्तितया तद्व्यतिरेकस्यासिद्धत्वान्न तदुन्थापकत्वमपीति वाच्यम् । शब्दानित्यतावादिन उपाधिदातुर्मते शब्दस्याकृतकत्वादिति भावः । असमवेतत्वपर्य्यवसानवारणायाह । सावयवत्वे इति । जन्येति । परमाणुसिद्धिदशायां मनसोऽणुत्वादिसिद्धिदशायाञ्च गगनादौ व्याप्तिग्रहार्थं जन्यपदम् । अखण्डाभावे न वैयर्थ्यमिति । निःस्पर्शेति । अत्र द्रव्यपदं समव्याप्तत्वाभिप्रायेण । रासभादावतिप्रसङ्गे सत्येव दूषणान्तरमाह गुरुत्वेनेति । रसवत्त्वे रसयोग्यत्वे । अन्यथा विशिष्टस्यापि हरीतक्यादौ व्यभिचारेण नियमासिद्धेः । यद्व्यावृत्त्येति । पक्षे यद्व्यावृत्त्या यस्य साधनस्य साध्यव्यावृत्तिरनुमीयते इत्यर्थः साध्यसाधनसम्बन्धव्यापकत्वाभिप्रायेणाह भावत्वेति । नन्वेवं सम्बन्धाभावसाधनेऽर्थान्तरं साध्याभावसिद्धेरुद्देश्यत्वादित्यतआह

३४।२१

३५।८

३५।२२

३६।२४ पक्षधर्म्मतेति। अतएवेति। यत एव तादृशोपाधिव्यावृत्त्याऽपि पक्षे साध्यव्यावृत्त्यनुमितिरित्यर्थः। तथा च साध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वे प्रयोजकमिति बाधोत्थापकतयोपाधेर्दोषत्वमित्येतन्मततात्पर्य्यम्। साधनेति। साधनावच्छिन्नसाध्यव्यापकादावुपाधौ साध्ये इत्यर्थः।

नन्वेवं पक्षवृत्तिरुपाधिर्न स्यात् तद्व्यतिरेकस्य पक्षे साध्यापकत्वात्। न चेष्टापत्तिः, तस्याप्युपाधित्वेन व्यवहारात्। न च पक्षपदं साधनवत्परं, तथा चान्यत्र क्वचित् साधनवति साध्यव्यावर्त्तकत्वाद्व्यभिचारज्ञानद्वारैव तस्य दूषणत्वमिति वाच्यम्। अनुष्णाशीतस्पर्शत्वस्यैवमनुपाधितापत्तेः, तस्य साधनव्यापकत्वेन साधनवति

३६।३० स्वव्यावृत्त्या साध्याव्यावर्त्तकत्वादित्यरुचेराह अस्मत्पितृचरणास्त्विति। यद्व्यभिचारित्वेन लिङ्गेन साधनस्य साध्यव्यभिचारित्वम, नुमीयते, स उपाधिरित्यर्थः। न चाकाशादिसाध्यकहेतौ घटादेरुपाधिताऽऽपत्तिः, यस्य पर्य्यवसितसाध्यव्यापकस्य व्यभिचारित्वेनेत्यर्थात्। तच्च क्वचिद्विशेषितं क्वचिदविशेषितञ्च लिङ्गमित्यन्यदेतत्।

३७।१ साधनाव्यापकत्वं व्यभिचारिसाधनाव्यापकत्वम्। तेन महानसत्वाद्यवच्छिन्नवह्निव्यापके धूमाव्यापके व्यञ्जनवत्त्वादौ नातिप्रसङ्गः। नन्वेवमुपाधिज्ञानकालएव व्यभिचारभाने तदुन्नायकत्वमस्य न स्यादिति चेत्। भ्रान्तोऽसि। न ह्यनेनैव रूपेण ज्ञातस्यास्य तदुन्नायकत्वं, किन्तु शुद्धसाध्यव्यापकत्वादिना। इदन्तु सकलसङ्ग्राहकमात्रम्। साधारणादीनामुभयकोट्युपस्थापकत्ववत्। इदञ्च सर्वैरेवाभ्युपेयम्, अन्यथा पर्य्यवसितत्वाद्यस्फुरणे शुद्धसाध्यव्यापकत्वस्फुरणेऽपि तदुन्नायकत्वं न स्यात्। न चानुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूपयितुमुपक्रान्तमिति प्रागुक्तविरोधः, तस्य यथाश्रुताभिप्रायेण साधनाव्यापकत्वसाध्यव्यापकत्वांशाभिप्रायेण वा सर्वसमाधेयत्वात्। पर्वतत्वरूपपक्षधर्मावच्छिन्नवह्निव्यापकत्वादिना पाषाणवत्त्वादिग्रहेऽपि धूमे न तदुन्नयनं, बाधात्। तदवतारे व्यभिचारानुमितेर्भ्रमरूपाया इष्टत्वात्। अस्तु वा व्यभिचारिपदं व्यभिचारित्वसमानियतधर्मान्तरपरम्। न चैवं तेनैव तदुन्नयनापत्तिः, स्वरूपेणैव तस्य ज्ञानात्। तथा च नियतत्वास्फुरणदशायां तदभावात्। तथापि च तस्य तदुन्नायकत्वे बाधकानभिधा-

नाश्च । केचित्तु यद्व्यभिचारित्वेनेत्यादिकमेव लक्षणम् । इदन्तु येन रूपेण ज्ञातस्य तस्य व्यभिचारानुमापकत्वं, तन्निर्वचनम् । तथा च लक्षणमित्यस्य व्यभिचारानुमापकतावच्छेदकमित्यर्थ इत्याहुः । विस्तृतमिदमनुमानप्रकाशे । साधनेति । साधनं व्यभिचारि यस्य, साधनाव्यापक इत्यर्थः । अत्र स्वव्यभिचारित्वेनेति शेषः । तेन तद्गुज्ञायकाप्रयोजकत्वादौ नातिप्रसङ्गः । एवञ्च साधनव्यभिचारिपदंस्वरूपनिर्वचनं बोध्यम् । ततएव हेतोरिति । मित्रातनयत्वादेव शाकपाकजत्वमुपाधिः साध्यः । पक्षेऽपीति । साधनव्यापकत्वनिश्चयाच्च सन्दिग्धोपाधित्वमित्यर्थः । साध्याभावप्रमा बाध इति मतानुरोधादाह प्रमितेति । ननु ज्ञप्तावनुपजीव्यत्वेऽपि स्वरूपएवोपजीव्यत्वं तस्य स्यादित्यत आह यदि चेति । सैवेति । आश्रयासिद्धिः स्वरूपासिद्धिर्व्याप्यत्वासिद्धिरित्यर्थः । ज्ञानगर्भहेत्वाभासानुरोधादिति भावः । वस्तुतः, सएवेति पाठः । आश्रयासिद्ध्यादिरित्यर्थः । चिन्तामणिविरोधादेव नेति स्थाने नन्विति पाठः क्वाचित्को हेयः, अर्थासङ्गतेश्च । व्यर्थेति । एतच्चाखण्डाभावानभ्युपगमेन तदभ्युपगमे व्यर्थत्वाभावात् । विशिष्टस्यापि ग्राह्यतया तदभावज्ञानस्यापि विरोधित्वाच्च । विशिष्टाभावोऽपि दोषएव । अत एव तत्साधारणमेव संग्राहकमनुपदं वक्ष्यतीत्यवधेयम् । एवं रूपत्वेऽपीति परामर्शविषयाभावत्वेऽपीत्यर्थः । उपधेयेति । ननु यद्युपाध्यसङ्करमात्रेण पार्थक्यं, तदा आश्रयासिद्ध्यादीनामपि तथात्वे विभागव्याघातएव । यदि चोक्तानुगतरूपसंगृहीततया न तथात्वं, तदा व्यभिचारादावपि तुल्यम् । अत एव नोपजीव्योपजीवकभावोऽपि । अभेदे तदभावात् । अन्यथा आश्रयासिद्ध्यादेरपि तथात्वापत्तिरिति चिन्त्यम् । वस्तुतोव्यभिचारादिभिन्नपरामर्शविषयाभावत्वं, व्यभिचारादिचतुष्टयभिन्नहेत्वाभासत्वं वा विभाजकोपाधिरिति तत्त्वम् । तद्विशेषितेति । साध्यविशेषितसाध्यान्तरानुमित्यविरोधित्वेऽपि साध्यमात्रानुमितिविरोधित्वमस्त्येवेत्यर्थः । तदेव दर्शयति साध्यसाक्षात्कारे इति । सिषाधयिषाविरहे सतीति द्रष्टव्यम् । एवञ्च साक्षात्कारत्वमविवक्षितं बोध्यम् । एतच्च सर्वं प्राचीनमतेनेत्यवधेयम् । व्यभिचारे पक्षभिन्नत्वस्येति फक्किका साध्याभावप्रमितावित्यस्य पूर्वं युज्यते इति प्राहुः।

गन्धप्रागभावावच्छिन्न इति । यद्यपि गन्धप्रागभावसमयावच्छेदेन

३७।१६ ४१।२० ४२।१० ४३।२९

गन्धसाधकाभावादेव न गन्धानुमितिर्न तु बाधात्, न च पक्षधर्मताबलात् तथा, पक्षधर्मता हि लिङ्गस्य पक्षे वृत्तिरेव, सा च साध्यसामान्यव्याप्तिमतस्तस्य पक्षीयं साध्यविशेषं विनाऽनुपपन्नेत्यतो-व्याप्त्या सह परामृश्यमाना पक्षसम्बन्धं साध्यं साधयति, न तु पक्षतावच्छेदकत्वेन यदुपादीयते तदवच्छेदेन साध्यस्य पक्षे सम्बन्धं, बीजाभावात्, तं विना तस्या अनुपपत्त्यभावात्। तदवच्छेदेन पक्षे साध्यसम्बन्धं विनाऽपि प्रकृते पृथिवीत्वादिहेतोर्व्याप्तिपक्षधर्मताया उपपन्नत्वात्। तथापि प्रमाणस्यायं स्वभावो यद्बाधकं विना विशिष्टवैशिष्ट्यज्ञानमेव जनयति, तथा च ज्ञानसामान्यसामग्रीबलादेव तदवच्छेदेनानुमितिः स्यात्, यदि न बाधो दोष इति प्राहुः। यत्तु यथा शब्दतात्पर्यवशेन क्वचिदेकस्य द्वयं क्वचिद्विशिष्टवैशिष्ट्यञ्चेत्यन्वयबोधद्वैविध्यं, तथा सिषाधयिषावशादनुमितिद्वैविध्यमपीति, तन्न, सिषाधयिषायाः पक्षताशरीरानिष्पादकत्वेनान्यथासिद्धतया व्यभिचारेण चानुमित्यहेतुत्वात्। न चानुमितिविशेषे तद्धे-
४४।४ तुत्वं, मानाभावात्, पक्षताया अहेतुत्वापाताच्चेति सङ्क्षेपः। विद्यमानेति। वर्त्तमानकालावच्छिन्नेत्यर्थः। नत्रेति। पूर्वकालीनवृष्ट्यैव व्याप्तेस्तस्याएव सिद्धिरित्यर्थः। बाधादेव न तत्सिद्धिरबाधे चेष्टापत्तिरित्यपि बोध्यम्। प्रत्यक्षत्वादिति वैशेषिकमतेन। न्यायमते समवायभेदसाधनेऽनेकत्वादिकं लिङ्गमिति ध्येयम्। व्यवहारान्यथानुपपत्तिमेवाह न हीति। भेदघटितत्वेनेति। यद्यपि भेदोऽन्योन्याभावः, स च न सावधिः, किन्तु सप्रतियोगिकः अन्यथा घटो नेत्यत्र घटान्नेति प्रतीत्यापत्तेः, तथापि भेदपदमत्र पृथक्त्वपरम्। अत एव भेदाघटितत्वादिति सिद्धान्तोऽपि सङ्गच्छते। अन्यथा तस्याप्यन्योन्याभा-
४६।४ वघटितत्वे विरोधापत्तेः। असाधारणेति। असाधारणान्यमात्रेत्यर्थः। एतच्च स्वस्मिन्नपि स्वसदृशत्वप्रसङ्गवारणाय। तद्भिन्ने इति। तदन्यत्वे सतीत्यर्थः। अतीतानागतेति। यद्यप्येवमपि गौरवं नापाकृतं,-तथापि प्रामाणिकं तदिति भावः। अन्यथा घटसन्निकर्षात् पटविशेष्यकस्यापि समूहालम्बनस्यापत्तेः। तथा च तत्तद्विशेष्यकप्रत्यक्षे तत्तद्विशेष्यसन्निकर्षो हेतुः अत एव सामान्यलक्षणाऽभ्युपगमोऽपीति। धर्मिणि समयस्य पूर्वं गृहीतत्वादाह गवयत्वप्रवृत्तिनिमित्तकेति। ननु गवयपदादेव गवयत्वं प्रतीत्य तद्विशिष्टे समयं ग्रहीष्य-

स्यतआह गवयपदस्येति । तर्कादीति । लाघवपुरस्कारादित्यर्थः । पू- ५०।१९
र्वत्वस्य किञ्चिन्निरूप्यत्वादाह गवयपिण्डेति । गोसदृशपदमिति ।
यद्यप्येतन्न पदं किन्तु वाक्यं, तत्र च न लक्षणा तस्याः पदधर्मत्वा-
त्, तथाप्येकपदएव लक्षणा पदान्तरञ्च नियामकमिति भावः । वा-
क्येऽपि लक्षणेतिमतेन पदमिह वाक्यमेवोक्तमित्यन्ये । शक्यसम्ब-
न्धमाह गोसादृश्यसमानाधिकरणमिति । सर्वत्रान्वयेति । यद्यप्येव-
मपि प्रकृते लक्षणा स्यादेव, उक्तप्रकरणादिना प्रवृत्तिनिमित्तवाच्य-
त्वज्ञानात्, तस्य च धर्मिमात्रेऽनन्वयात्, तथापि तात्पर्य्यानुपपत्त्या
लक्षणेति परोक्तनिराकरणमात्रपरोऽयं ग्रन्थ इति प्रतिभाति। यद्वीति।
उद्देश्यस्य व्याप्यत्वं विधेयस्य व्यापकत्वं प्रतीयते इति भावः । की-
दृग् गवयइति। गवयपदवाच्यः कीदृगित्यर्थः। गवयत्वविशिष्टत्ववा-
च्यत्वमेवमपि न सिद्ध्यतीत्यपि बोध्यम् । तथा चेति । न तु यो- ५५।१२
गोसदृशः स गवयपदवाच्यइत्युत्तरं, येन गोसादृश्यस्य वाच्यत्वं
यद् योगादिना लभ्येतेति भावः । पृथिवीत्वेनेति । पृथिवीत्वनि-
मित्तकपृथिवीपदवाच्यत्वमित्यर्थः। गवयत्वेनेति। गवयत्वनिमित्तक-
गवयपदवाच्यत्वस्येत्यर्थ. । धर्मिमात्रवाच्यत्वस्य शब्दादेव प्रतीते-
रिति भावः । अज्ञातेति। गवयपदवाच्यस्य प्रतीतौ स किंलिङ्गकइति
प्रश्नः, तत्प्रतीतिश्च तस्य लिङ्गादेव जातेति लिङ्गस्य ज्ञातत्वान्न तत्र
प्रश्नइति भावः। अयमिति। लाघवाख्य इत्यर्थः। अनुमितेरिति। तथा
चेतराप्रवृत्तिनिमित्तकतां परिच्छिनत्तीत्यप्ययुक्तमिति । तथाऽत्रापी-
ति । अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वानियमोऽसिद्धएवेत्याश-
यः।व्यतिरेकीति। पूर्वोक्तव्यतिरेकीत्यर्थः । तस्य सामान्यतोदृष्टस्य । ५७।१६
तत्परिच्छेदकत्वात्     इतराप्रवृत्तिनिमित्तकत्वापरिच्छेदकत्वात्,
तर्कसहकारेणैव तस्य तथात्वाभ्युपगमादिति भावः। यद्यपि तद्दशा-
यां नोपमानस्याप्यवतारः, तथापि तर्कानवतारे सामान्यतोदृष्टस्य
किञ्चित्प्रवृत्तिनिमित्तकत्वमात्रमनुमाय पर्य्यवसितत्वादग्रे पुनस्तर्का-
वतारे उपमानप्रवृत्तिरप्रत्यूहैवेति भावः । अत्रेदमालोचनीयम् । कॢ-
प्तप्रमाणभावस्य सामान्यतोदृष्टस्य पुनरनुसन्धानमात्रं कल्पयितुमर्हं
लाघवात् न तु मानान्तरं, गौरवात् । न च पुनरनुसन्धीयमानाद-
पि तर्कसहकृतादपि तस्मान्नेतराप्रवृत्तिनिमित्तकत्वपरिच्छेदोऽनुमिते-
र्व्यापकतावच्छेदकप्रकारकत्वानियमादिति वाच्यम् । लाघवगौरवस-

हकारेण व्यापकतानवच्छेदकस्यापि भानाभ्युपगमात्, अतएवेश्वरानुमाने क्षित्यादावेकमात्रकर्तृकत्वानुमितिः, अस्तु वा तथा, तथापि इतरद् न प्रवृत्तिनिमित्तं गुरुत्वादिति मानान्तरादितराप्रवृत्तिनिमित्तकत्वनिश्चये उक्तव्यतिरेकिणा गवयत्वप्रवृत्तिनिमित्तकत्वसिद्धिरविकलैव, न च साध्याप्रसिद्धेर्न तत्तत्सिद्धिरिति वाच्यं तथा सत्युपमानादपि तद्विशिष्टबुद्ध्यनुदयापत्तेः । विशेषणज्ञानं विना तदभावात् ।

यदि च गवयत्वं किञ्चित्पदप्रवृत्तिनिमित्तं जातिविशेषत्वादित्यादिना तस्य तुल्यवित्तिवेद्यतया किञ्चित्पदे तत्प्रसिद्धिसम्भवात्तथात्वं, तदा प्रकृतेऽपि तुल्यम् । व्यतिरेक्यन्तरेऽप्ययमेव गतिः । किञ्च यथा देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वादिति सामान्यतोदृष्टं तर्कसहकृतं पुनरनुसन्धीयमानं जीवित्वप्रकारकं ज्ञानं जनयति, तथा गवयपदं गवयत्वतदितरान्यतरप्रवृत्तिनिमित्तकं पदत्वादिति सामान्यतोदृष्टं तर्कसहकृतमनुसन्धीयमानं गवयत्वप्रवृत्तिनिमित्तकत्वं परिच्छिनत्तु, कृतं मानान्तरेण । तदाह गङ्गेशः, विचित्रसहकारिबलेनैकस्यापि विचित्रफलजनकत्वादिति । अन्यथा तत्र लिङ्गविशेषणजीवित्वानिश्चये अर्थापत्तिलब्धावकाशा स्यात् । तस्मात्, त्यज वोपमानं मानान्तरं, स्वीकुरु वाऽर्थापत्तिं संशयकरणिकामन्यथेति । वस्तुतस्तु गवायपरिच्छेद उपमानार्थ इत्याकर एव स्फुटं, न तु प्रवृत्तिनिमित्तपर्यन्तपरिच्छेदोऽपि, तस्य शक्यत्वे शक्यवृत्तित्वे इत्यादिघटितस्य नियमतउपस्थितौ मानाभावात्, तद्ग्रहस्य व्यवहाराङ्गत्वेनानुद्देश्यत्वाच्च, तथा च गवयत्वविशिष्टवाच्यत्वसिद्धिर्नोद्देश्या । तदिदमुक्तम्, पिण्डवाचकत्वसिद्धावपि गवयत्वसिद्धावपि गवयत्वविशिष्टवाच्यत्वासिद्धेर्नोपमानपरिच्छेद्यस्य मानान्तरात् प्रतीतिरिति । एवञ्च शब्दाद्विशेषवाच्यत्वावगमेऽपि गवयत्ववाच्यत्वपरिच्छेदार्थमुपमानस्वीकार इति परमार्थः । तदिदमुक्तप्राकरं सामान्यविशेषवाचकत्वेऽस्य मानान्तरमनुसरणीयमिति । तत्र भ्रमः । एवं व्यवहारादेरपि शक्तिग्राहकस्य व्यक्तिग्राहकस्य व्यक्तिमात्रविषयत्वात् घटत्वादिवाच्यत्वग्रहार्थं मानान्तरमनुस्रियेत, यदि च लाघवादिसहकृतं व्यक्तिशक्तिग्राहकमेव तद् ग्राहकं, तदा प्रकृतेऽपि तुल्यम् । तदिदमुक्तं गङ्गेशेन शक्तिग्राहक-

मेव लाघवादिसहकृतं निमित्तमप्यवधारयति, यथा क्षित्यादौ कर्तृ-
ग्राहकं कर्तुरेकतामिति । ननु प्रकृते विशिष्टशक्तिग्राहकं नास्ति श-
ब्दस्य गवयत्वोपस्थितिकाले पर्यवसितत्वादिति चेत् । न । गवय-
त्वविशिष्टोऽयं गवयपदवाच्यः गोसदृशत्वादित्यादेर्लाघवसहकृत-
स्य सत्त्वात् लिङ्गाभासादिनाऽप्यनुमित्यविरोधाच्च । अन्यथा व्य-
वहारादिना घटत्वादिविशिष्टशक्तिग्रहोऽप्यशक्यः । यद्वा धर्मि-
वाच्यत्वे शब्दादेव सिद्धे गवयत्वं गवयपदवाच्यं गवयत्वादिति
व्यतिरेकिणा लाघवसहकृतेन तद्वाच्यत्वसिद्धिः । तस्मात् पिण्डादेः
सपक्षाद्व्यावृत्तावसाधारण्यं, तस्य सत्प्रतिपक्षोत्थापकतया दोषत्वा-
दस्य च तर्कसहकारेणाधिकबलत्वात्, अस्तु वा गवयपदप्रवृत्तिनि-
मित्तत्वमेव साध्यम्, तथा च सपक्षाभावान्नासाधारण्यम् । न च
साध्याप्रसिद्धिः, गवयपदं किञ्चित्प्रवृत्तिनिमित्तकमिति सामान्य-
तोदृष्टादेव सामान्यतस्तत्सिद्धेः । न च व्याप्त्याद्यप्रतिसन्धानदशा-
यामपि तत्परिच्छेदादर्शनमिति वाच्यं, मानाभावात् । अन्यथा
मूलप्रकाशयोरनुमानदूषणप्रयासस्याप्युक्तत्वापातात् । तददृष्टत्वे-
ऽपि तदनन्तरं उपमानावतारसम्भवात् । तथा च यत्र
यत्परिच्छेदस्तत्र क्लृप्तप्रमाणमावश्यकोऽवतारः कल्प्यते, लाघवा-
त्, अतीन्द्रियादिलिङ्गे व्याप्यत्वपरामर्शवदुपनयसहकृतेन मनसा
विशिष्टवाच्यत्वपरिच्छेदसम्भवाच्च । न चोपमिनोमीत्यनुव्यवसाय-
बलाद्विजातीयप्रमासिद्धौ तत्करणसिद्धिरिति वाच्यम् । संज्ञासंज्ञिस-
म्बन्धबुद्धौ तादृशानुव्यवसायासिद्धेः । गवा गवयमुपमिनोमीत्यनु-
व्यवसायस्य सादृश्यबुद्धिविषयत्वात्, अतएवान्यत्रापि मुखचन्द्रा-
दिसादृश्यप्रतीतौ तथेति विद्वद्भिः परिचिन्तनीयमिति । नन्विदमु-
पमितावेवातिव्याप्तं लिङ्गोपहितलैङ्गिकभानवत् सादृश्यज्ञानोपनीत-
स्य तत्र भानसम्भवादित्यरुचेराह वस्तुतस्त्विति । एवं सति हेतुं- ५८।२२
पूरयति प्रकृतेनेति । निराकाङ्क्षादिभिरिति । अयोग्यैरित्यत्रैव तात्पर्य-
म् । योग्यतासत्त्वे आकाङ्क्षाविरहे व्यभिचाराभावादिति ध्येयम् ।
शेषं शब्दप्रकाशे विपश्चितम् । द्वितीयप्रयोगे मूले आकाङ्क्षादिमत्त्वा-
दित्येव हेतुः तत्स्मारकत्वादित्यस्य व्यर्थत्वात् । प्रमापकत्वे इति ।
आकाङ्क्षादिमतोऽपि सहकारिविरहेण कदाचित् प्रमानुत्पादकत्वादि-
ति भावः । यद्यपि ज्ञापकत्वेऽपि व्यभिचारः, तथापि दूषणान्तरस्यै-

ष सम्भवादयं नोद्भावित इति भावः। निराकाङ्क्ष इति। तात्पर्य्यघटि-
६२।१ तसाध्ये व्यभिचारोऽयमुन्नेयः। संसर्गव्यभिचारीति। आकाङ्क्षादिम-
त्पदस्मारितत्वादितिहेतोः संसर्गव्यभिचार्य्यव्यभिचारिसाधारणत-
या व्यभिचार इत्यर्थः। संसर्गव्यभिचारिसाधारण्यमेव दर्शयति
ययोरिति। न चैवं तत्र योग्यतैव नेति कथं व्यभिचारइति वाच्यं,-
घटस्यानयनमित्यत्र संसर्गव्यभिचारिणोरपि घटानयनयोर्योग्यपद-
स्मारितत्वात्। संसर्गस्य व्यभिचारीति क चित्पाठः स तु चिन्त्यः।
अनिश्चयस्य सन्निहिततया तत्परामर्शभ्रमं वारयति निश्चयैकेति।
६२।७ योग्यतया इति। सम्भावितपदस्य लिङ्गविशेषणयोग्यतापरत्वे दूषण-
मिदम्। सन्दिग्धपरत्वे संसर्गानिश्चयादित्येव दूषणं बोध्यम्।

राजपदार्थेति। यद्यपि योग्यतासत्त्वे ईश्वरसंसर्गज्ञानसत्त्वान्न व्य-
भिचारः, तथाप्यजनितान्वयबोधे तत्रेश्वरतात्पर्य्याभावात्तात्पर्य्यघ-
टितसाध्ये व्यभिचार इति भावः। नन्विति। तथा चाकाङ्क्षाया लिङ्ग-
विशेषणत्वसम्भवादनुमानएवान्तर्भाव इति भावः। क चिदपि तद-
निश्चये तत्संशयोऽपि दुर्लभ इत्यत आह स्वपरेति। अतएवेति। यत-
एव संशयसाधारणं तज्ज्ञानं हेतुरित्यर्थः। नन्वेतदेव कुतइत्यत आह
६६।५ बाधकेति। एतदेवेति। आकाङ्क्षाज्ञानहेतुत्वमेवेत्यर्थः। दोषवत इति
विपर्य्यय इति च स्वरूपनिर्वचनं, ज्ञानहेतुत्वादित्यत्र तात्पर्य्यम्।
संसर्गइति। समस्ताश्रवणमेव बाधकमित्याशयः। तस्येति। असंसर्गा-
ग्रहस्येत्यर्थः। स्मारितयोरिति। एतच्च सन्यन्तं विशेषणं स्वरूपनिर्व-
चनम्। नन्वेवं गौरश्वइत्यादावभेदान्वयबोधे आकाङ्क्षा स्यादित्यत्र
आह गौरश्व इति। तथा चेष्टापत्तिरिति भावः। यदि च स्वरूपेणैव
तदुपस्थितिस्तदनुकूला, तत्राह घटः कर्मत्वमिति। अभिधाने-
ति। अभिधानमन्वयानुभवः, तस्यापर्य्यवसानमनिष्पत्तिरित्यर्थः।
एतच्च घटः कर्मत्वमित्यादावप्यस्तीत्यन्यमपर्य्यवसानपदार्थमाह
६७।९ येनेति। घटः कर्मत्वमित्यादेश्च नेतरव्यतिरेकप्रयुक्तं क्रियाकर्मभावे-
नान्वयाननुभावकत्वं, किन्तु स्वरूपायोग्यत्वप्रयुक्तं, तत्समवधाने-
ऽपि तदननुभावकत्वात्, अभेदान्वये च तत्राप्याकाङ्क्षाऽस्त्येव, अ-
योग्यत्वाच्च नान्वयधीरित्यतआह घटः कर्मत्वमिति। आकाङ्क्षालक्ष-
णादिकं शब्दप्रकाशे सम्यग्व्याख्यातमनुसन्धेयम्। उपजीवकत्वात्
तुल्यत्वात्। य एव लौकिकास्तएव वैदिका इत्याशयात्। लोके

व्युत्पत्तिग्रहो व्यवहारादिति तस्योपजीव्यत्वमित्यप्याहुः । दोषवदिति । अत्र हेतुद्वये तात्पर्य्यम् । न चाद्यहेतोर्विसंवादिशुकवाक्ये व्यभिचारः, दोषवत्पुरुषाप्रणीतसतात्पर्य्यकपदस्मारितत्वस्याद्यहेत्वर्थत्वात् । तच्चेति । न च पौनरुक्त्यं, विशेषतः साधनात् । तयोरिति लक्षणाविनिगमनयोरित्यर्थः । ननु प्रकरणादीनामननुगमेनाहेतुत्वादित्युक्तमित्यरुचेराह यद्वेति । ७२।२४

विशेष्यस्येति । विशेष्यस्यापीत्यर्थः । तथा चाभ्युपगमवादोऽयमिति भावः । आवश्यकाकाङ्क्षादिसान्निध्यादिति यदुक्तं; तत्र तदावश्यकत्वे हेतुमाह अन्वयसामान्येति । अतएवेयं फक्किका, न चेत्यस्य पूर्वं युज्यते इति प्राहुः । कोष्ठगत्या वस्तुगत्येत्यर्थः । अन्विताभिधानवादिनामिति प्रभाकरमित्यर्थः । त्वयाऽपीति । अन्यथा क्वचिदन्वयधीपूर्वकत्वं क्वचिदनन्वयाग्रहपूर्वकत्वमिति व्यभिचारापत्तेरिति भावः । ७९।५

यथा पदानामिति । यथा पदानां स्वार्थाभिधानशक्तिस्तत्र पदेष्वन्वयधीहेत्वभिधाऽऽख्यातिशयाधानशक्तिर्वाक्यार्थधीशक्तिश्चेत्यभिहितान्वयवादिनो मम भट्टस्य पक्षे गौरवं त्वयोच्यते, तथा तवापि पदोच्चारशक्तिः पदनिष्ठातिशयाधानशक्तिर्वाक्यार्थधीशक्तिश्चेति शक्तित्रयगौरवमिति भावः । तथा ममापीति । तथा च पदानां प्रयोजकत्वमात्रं न तु हेतुत्वमिति भावः । प्रयोजकत्वे प्राचीनसम्मतिमाह न विमुञ्चतीति । व्यभिचारजातीयतयेत्युपलक्षणं, निर्व्यापारत्वादित्यपि द्रष्टव्यम् । ननु पदार्थस्मरणवत् पदज्ञानमपि न करणं, औत्प्रेक्षिकान्वयानुभवे व्यभिचारात् । किञ्च, फलप्रमाणभावेन मनसा पदार्थस्मरणसहकृतेनौत्प्रेक्षिकवदन्वयग्रहोपपत्तौ मानान्तरकल्पने गौरवमित्यत आह अनुभवविशेषइति । औत्प्रेक्षिकव्यावृत्तशब्दप्रयोज्यजातिमतीत्यर्थ । तथा च नोक्तव्यभिचारः । गौरवञ्च प्रामाणिकं, विजातीयप्रमासिद्धौ तत्करणस्यावश्यकत्वादिति भावः । नतु तत्सिद्धिरेव कुतइति चेत् । न । अनुमिनोमीत्यादिवत् शृणोमीत्यनुव्यवसायात् । नतु प्रत्यक्षसामग्रीबलवत्त्वान्मानसप्रत्यक्षसामग्रीसत्त्वे तदवश्यम्भाव इति चेत् । न । लौकिकप्रत्यक्षसामग्र्यास्तथाप्यलौकिकप्रत्यक्षसामग्र्या दुर्बलत्वात्, अन्यथा अनुमितेरप्युच्छेदः स्यात् । ननु प्रयोज्यव्यापारदर्शनात् प्रयोजकत्वमात्रं गृह्यते न तु हेतुत्वं, अन्वयव्यतिरेकादेः साधारणतया तत्संशायकत्वादि- ७९।१६ ८०।१२

८०।१८ त्यरुचेराह किञ्चेति । नन्वन्वयविरोधिपदाजन्यपदार्थोपस्थितित्वेनान्वयबाधकत्वम्, अन्यथा तवाप्याकाङ्क्षादिवैकल्याच्छाब्दान्वयबोधाभिप्रत्यूहो व्यवहारः स्यादित्यरुचेराह पदादिति । सर्व्वविषयत्वमिति । तथा च तस्य जगत्कर्तृत्वं न्यायप्राप्तमित्यागमोऽन्यपर इत्यर्थः । सर्गप्रलययोरिति । अत्र सर्गेति सम्पातायातम् । प्रलयेऽपि व्योमादिवन्नित्यागमसत्त्वे न विरोधः, तथापि वर्णनित्यत्वेऽप्यानुपूर्वीघटितस्यानित्यत्वात् प्रवाहनित्यत्वात् प्रवाहनित्यत्वं वाच्यं, तत्रेदमुत्तरमिति भावः । शब्दयोरिति । यद्यपि मिथः प्रतिबन्धाद् बाधो न भवत्येव, तथापि बाधो न दोषइत्यर्थः । साधकागमस्येति शेषः । बाधकत्वाभिमतागमस्यान्यार्थपरतया विरोधाभावेनाप्रतिरो-
८४।३ धकत्वादिति भावः । असार्व्वज्ञ्यापत्तेरिति । उपदेशं विना प्रवर्त्तकत्वस्याज्ञानादित्यर्थः । प्रमाणपदवैयर्थ्यमाशङ्क्याह कारणाभाव इति । तथा च प्रमाणाभावेनेत्यपि कृतं सामान्यव्याप्तिविषयमित्यर्थः । इच्छाद्वारेति । उपदेशं विनेति शेषः । इच्छाद्वारेति पूरणं यद्यप्यफलं, तथापि प्रमामात्रं सामान्यलक्षणादिभिरप्युपपद्यते इतीच्छाजनकं यागादेरिष्टसाधनत्वज्ञानमुपदेशं विना नेत्याशयेन तदुक्तम् । प्रवर्त्तनीयेति । इष्टसाधनत्वादिप्रकारकयागादिप्रमोत्पादनार्थमित्यर्थः ।
८४।१४ नन्वेवमपि वेदान्तररूप उपदेशः कथमित्यत आह प्रतिपुरुषमिति ।

नन्वेवमपि व्याप्तिज्ञानं नायातमत आह व्याप्तिज्ञानं विनेति । उपपादकेति । उपपादकत्वाभिमतकल्पनेत्यर्थः । केति त्वया स्वरूपसद्व्याप्तेरेव कल्पनाऽङ्गत्वेनाभ्युपगमादिति भावः । यद्यपीति । अत्र प्रकृते विवक्षितमिति शेषः । वैपरीत्येऽपि व्याप्यव्यापकभावसम्भवादिति ध्येयम् । यदा नेति । व्याप्यएव नञर्थप्रवेशादिति भावः । उभयत्रेति । यद्यप्येवं संशय इति न व्याप्तिनिश्चय स्यात्, तथापि प्रत्यक्षाभावेऽप्यनुमानादपि तत्सम्भव इति भावः । व्याप्तावपीत्युपलक्षणं, तन्निश्च-
८५।२९ येऽपीत्यपि बोध्यम् । उपरीति । तथा च तत्रापि सामानाधिकरण्यमेव व्याप्तिरित्यर्थः । ननु स्थूलमिदमेकमित्येकत्वज्ञानमिति द्वितीयस्य प्रतियोगिनोऽभावादेव न विरोध इत्याशङ्क्याह यथेति । ननु प्रमाणद्वयविरोधज्ञानस्य करणत्वात् किमनुपपद्यमानमित्यसङ्गतमित्यत आह अनुपपन्नतयेति । तेनापीति । एकविषयत्वेनापीत्यर्थः । प्रमाण-
८७।२१ योरिति । यत्र यत्र विरोधज्ञानं तयोस्तत्रैकविषयतयैव, यत्र वा वैप-

यिकविरोधज्ञानशान्तिस्तत्र विषयभेदकल्पनयैवेति व्याप्तिरेवेत्यनुमा-
नादेव विषयभेदकल्पनाऽपीति नार्थापत्तिरित्यर्थः । सामान्येति । पर्व-
तो वह्निमानिति सामान्यतो ग्राहकस्येत्यर्थः । विशेषत इति । अर्वा- ८९।४
ग्भागावच्छेदेनेत्यर्थः । न विरोध इति । तथा च कुतस्तज्ज्ञानं करण-
मिति भावः । ननु वह्निमानयमित्यादि पूर्वपक्षे प्रथमं नार्थापत्त्यन्तर-
मुक्तं, तथा च नाप्युत्तरेत्यसङ्गतमत आह अर्वाग्भागेति। यदि चेति।
यद्यपि प्रमाणयोरेव विरोधस्तथात्वेन पराभिप्रेतः प्रकृते च न तथा,
तथापि यत्रापि व्याप्तिस्तत्र मानान्तरकल्पने विरोधान्तरस्यापि त-
थात्वं स्यादित्याशयेन तदुक्तमिति ध्येयम् । तथा चार्थापत्तिकल्पि-
तमित्यत एवकारो भिन्नक्रमः । तथा च तस्यां दशायां मानान्तराभा-
वादर्थापत्तिकल्पितं जीवित्वमुपजीव्यैव लिङ्गविशेषणनिश्चयेऽनुमा-
नाद्बहिःसत्त्वज्ञानं त्वयाऽपि वाच्यम्, एवञ्चावश्यकतयाऽर्थापत्त्यैव
बहिःसत्त्वनिश्चयोऽस्तु, कृतमन्तरा जीवित्वनिश्चयेनेति तर्कशरीरमे-
वेदं द्रष्टव्यम् । तेन संशयस्य बहिःसत्त्वकल्पकत्वादिति नोपसंहार-
विरोधः, न वा जीवित्वस्यार्थापत्तिकल्पनोपवर्णनेऽपसिद्धान्त इति ।

जीवननियमेति । गृहे नास्त्येवेति नियमग्राहकमत्रोक्तम् । अतएव ९०।९
जीवनगृहाभावग्राहकयोरित्येव क्वचित् पाठः। नापीति। अधिकरण इति
शेषः । अतएवाह अत्यन्तेति । वायौ रूपात्यन्ताभावग्रहे अधिकरणे-
प्रतियोगिप्रमाऽसिद्धेत्यर्थः। गौरवादिति। उभयकारणकल्पने गौरवादि-
त्यर्थः । साक्षादिति । तथा चेन्द्रियत्वं न साक्षात्प्रतीतौ कारणतावच्छे- ९२।२२
दकमात्माश्रयादिति तत्साधने बाध इति भावः । यद्यपि स्मृत्यजन-
कज्ञानकारणमनोयोगाश्रयत्वादिना तन्निर्वचने नोक्तदोषः, तथापि
समाधिसौकर्यादाह तथापीति । अत्र रासनप्रत्यक्षे व्यभिचारवार-
णायाजन्यान्तम् । एतच्च रूपाभावबुद्धौ चाक्षुषत्वसाधने रसाभाव-
बुद्धौ रासनत्वसाधने चाक्षुषप्रत्यक्षएव तद्वारणाय तदित्यवधेयम् ।
अप्रसिद्धिवारणाय प्रथमबहिःपदम् । मनोमात्रकरणके व्यभिचारा-
दाह बहिर्विषयकेति । ऐशे व्यभिचारादाह जन्येति । अनुमित्यादौ
व्यभिचारादाह साक्षात्कारित्वादिति । न चोपनीतविषये मानस- ९२।२४
प्रत्यक्षे व्यभिचारः, जन्यपदेन लौकिकत्वस्य विवक्षितत्वात् । व-
स्तुतो बहिर्विषयकजन्येत्यत्र स्वार्थिककन्प्रत्ययाद्बाह्यविषयजन्यत्वं
विवक्षितम् । तस्य च विषयाजन्यत्वादिति । नन्वस्तु तर्हि स-

र्व्वत्र ज्ञातैवानुपलब्धिः करणमित्यत आह अनुपलब्धेरपीति। सामान्याभावेन उपलम्भसामान्याभावेन विशेषाभावानुमानमित्यर्थः। इन्द्रियजन्यत्वेति। इन्द्रियसन्निकर्षजन्यत्वेत्यर्थः। तेन नोत्तरविरोधः। इन्द्रियविशिष्टसन्निकर्षहेतुत्वे इन्द्रियहेतुत्वमपीति न विरोध इत्यन्ये।-ज्ञायमानकरणत्वमाश्रित्याह ज्ञातेन्द्रियेति। चक्षुर्गतिमत् गतिशून्य-संयोगित्वादित्यनुमितेरित्यर्थः। नन्वेवमसाक्षात्कारित्वमपि तत्र न स्यादिन्द्रियसन्निकर्षान्यकरणस्य तत्र प्रयोजकत्वादित्यत आह अ-
९३।२५ साक्षात्कारित्वस्येति। तथा च साक्षात्कारित्वप्रयोजकस्याज्ञातकर-णत्वस्याभावादेव तत्र तदुपपद्यते इति भावः। ननु परोक्षत्वमसा-क्षात्कारित्वमित्येकं, तच्च जातिरूपं, न तूक्तोपाधिरूपमित्यत आह अनुभवत्वेनेति। स्मृतेरपि परोक्षत्वादिति भावः। एतच्चोपलक्षणम्। तज्जातित्वेऽपि ज्ञायमानकरणप्रयोज्यत्वाभ्युपगमे गत्यनुमितौ तदुप-पद्यतएवेत्यपि बोध्यम्। न चेति। इन्द्रियत्वेनेन्द्रियजन्यत्वमित्यर्थः। तथा चेन्द्रियाजन्यतया असाक्षात्कारित्वमिति भावः। अत्रासिद्धि-
९३।२७ माह प्रकृतेऽपीति। तत्त्वादिन्द्रियजन्यत्वादित्यर्थः। अन्यथा यथाश्रुते विरोधापत्तेः। ननु वायोरतीन्द्रियतया त्वगिन्द्रियोपनीत इत्ययुक्त-मत आह वायोरिति। तथा चेति। यद्यपि वायौ रूपाभावविशेष्यि-का धीः साक्षात्कारित्वेन तदभिमतैव तत्र च नोक्ता सामग्री, तथापि साक्षात्कारित्वेन त्वदभिमतेत्यस्याज्ञातानुपलब्धिजन्यत्वेनोभयसि-द्धेत्यर्थ इति वयम्। अन्यथा तु चिन्त्यम्। साक्षात्कारित्वेनेति स्व-मते। यदि चेति। तथा च तत्र त्वदुक्तानुपलब्धिवैकल्यादनन्यगत्या इन्द्रियग्राह्यएवाभाव इति भावः। युक्त्यन्तरमाह किञ्चेति। प्रत्यक्षश्चेति। यद्यप्येवं स्वरूपसंदनुपलब्धिग्राह्यत्वमात्रं सिध्यति, त-थापि पूर्व्वोक्तयुक्त्यवष्टम्भेन प्रत्यक्षत्वमुक्तमिति ध्येयम्। चक्षुषेति। तथा च प्रतियोगिग्राहकेन्द्रियेणाधिकरणसन्निकर्षएवानुपलब्धिसह-कारी स च तत्रास्त्येवेति भावः। अकारणमेव अप्रयोजकमेवेत्य-
९६।८ र्थः। परम्पराकारणं कारणकारणम्। तथात्वे वेति। कारणचक्रस्य साकल्योपक्षयाभ्युपगमे दण्डचक्रादेरपि तथात्वे घटाद्यहेतुत्वापत्ति-रित्यर्थः। तथा च योग्यताघटकतयाऽवश्यापेक्षणीयस्यान्यत्रानुप-क्षीणस्येन्द्रियस्याभावग्राहकत्वं सिद्धमिति भावः। उपलम्भस्येति। उपलभ्यस्य ज्ञाततायां चरमकारणत्वात्तदभावेन तदभावोऽनुमीयते

इत्यर्थः । प्राकट्याभावालिङ्गत्वभ्रमं वारयति रूपज्ञानाभाव इति । न चेत्यग्रिमग्रन्थेन गतार्थत्वात् कायेत्यादि व्यर्थमिति विकल्पयति दृश्यमानेति । ननु व्यवहारसामान्याभावस्य क्वाप्यसिद्धेरनैकान्तिकत्वमसिद्धमिति विकल्प्य योजयति अन्त्येऽपीति । आद्ययोरिति । यद्यपि व्यवहाराभावो न ज्ञानाभावान्तर्भूतस्तस्य ततोऽन्यत्वात्, तथापि ज्ञानाभावेनैव सोऽप्यनुमेयस्तज्ज्ञानञ्चात्माश्रयादिनाऽसम्भवीति व्यवहाराभावोऽशक्यनिश्चयः । एवञ्च तदाश्रयधर्म्माभावस्तद्विषयप्राकट्याभावः, तस्यापि तदनुमापकत्वे चक्रकादिना सोऽशक्यनिश्चय- इत्यत्र तात्पर्यम् । ज्ञानाभावान्तर्भूतो ज्ञानघटितप्रतियोगिकतया ज्ञानाभाववदतीन्द्रिय इत्यर्थः । ज्ञानाभावश्चेति । तज्ज्ञानमित्यर्थः । यद्वा, अनुमेय इति पूर्वोक्तमनुषञ्जनीयम् । अनुपलब्धेरेवेति । प्राकट्याभावस्त्वयोग्यमपि गमयिष्यतीत्यर्थः। सैवेति । तच्च दूषितमिति भावः । तथेति । अनुपलब्धिरप्यधिकरणधर्म्मज्ञाननिरपेक्षसापेक्षा स्यादित्यर्थः। लिङ्गादीति । अत्रानुभवपदं व्यर्थं स्मरणस्यापि दृष्टान्तत्वेन साध्यवत्त्वाभ्युपगमात् अतएव परिमले ज्ञानत्वस्येति पाठ इति वदन्ति । वस्तुतो यथाश्रुतसाध्ये मनसैव सिद्धसाधनप्रसङ्गान्मनोभिन्नेन्द्रियजत्वमिन्द्रियत्वेनेन्द्रियजत्वं वा तदर्थः । तथा च स्मरणे व्यभिचारादनुभवपदमिति । द्वितीयदृष्टान्तेऽनुशयप्रकाश एवायं प्रकाशकृत इति प्रतिभाति । ९८।७ ९८।१३

अतएवाह साक्षादिति । यद्यप्यात्ममनोयोगलक्षणतद्व्यापारस्य न व्यवधानमन्यथा चक्षुरादावपि तथात्वेन बाधापत्तेः, तथापि निरुक्तएव तात्पर्य्यम् । यथाश्रुतमभिप्रेत्याह साक्षादिति । विपक्षइति । तथा चाप्रयोजकत्वपरोऽयं ग्रन्थ इत्यर्थः । भावविषयत्वोपाधिपरस्तु नेत्याह न चेति । न त्वित्यर्थः । इत्यर्थइति शेषः, भावाभावविषयतयेति यदि पाठः क्वचित्तदाऽभावपदं सम्पातायातम् । अभावस्मरणइति । एतच्च यथाश्रुते । वस्तुत उपनीताभावप्रत्यक्षे तथात्वम् । अदृष्टादिना अर्थान्तरादाह लिङ्गादीति । एतच्चानुमित्याद्यंशे सिद्धसाधनवारणाय । घटादिप्रमांऽशे तद्वारणायाभावेति । स्मृत्यंशे बाधवारणायाह प्रमेति । अनुपलब्धया अर्थान्तरादाह भावेति । शरीरादिनाऽर्थान्तरादाह असाधारणेति । प्रतियोगिज्ञादिनाऽर्थान्तरादाह करणेति । अनुभवकरणेत्यर्थः । अन्यथा ९९।२२ १०२।२

पक्षे हेतौ च प्रमात्वपर्य्यन्तस्य वैयर्थ्यापत्तेः। यदि च कारणेति पाठः, तदाऽपि तत्रैव तात्पर्य्यम्। ईश्वरप्रमायां व्यभिचारादाह अस्मदादीति। सुखाद्यभावप्रमायां व्यभिचारादाह अभावेति। बाह्याभावेत्यर्थः। प्रमापदं स्मृतौ व्यभिचारवारणाय अनुभवपरं, भ्रमेऽपि साध्यसत्त्वात्। चक्षुष्ट्वादिकमित्यनुमानमन्यच्च सर्व्वं प्रत्यक्षप्रकाशे विप-
१०७।२० ञ्चितम्। विशिष्टज्ञानमात्रेति। विशिष्टप्रत्यक्षमात्रस्य न विशेषणनिर्विकल्पकजन्यत्वनियम इत्यर्थः। सम्बन्धघटकतयेति। सम्बन्धरूपतयेत्यर्थः। सत्तावानिति। न च सामान्यविशेषाभ्यां व्यभिचारः, तद्भिन्नत्वे सतीत्यापादकविशेषणात्। वस्तुनो भावः स्यादित्यर्थः, तेन नोक्तदोषः। ननु साक्षात्परम्परासाधारणमालोचनपूर्वकत्वमनुमानादिवदभावज्ञानेऽप्यस्त्येव, तद्धेतुप्रतियोग्यादिज्ञानस्य तत्पूर्वकत्वनियमादिति परस्य नानिष्टमित्यत आह प्रमाणविषयत्वमिति। तथा चाप्रयोजकत्वादिना यथा नेयं व्याप्तिस्तथा प्रत्यक्षविशिष्टज्ञानस्य निर्विकल्पकजन्यत्वव्याप्तिरपीति भावः। लिङ्गासङ्गतेराह यद्य-
१०८।२४ भावोऽस्तीति। भावरूपत्वे च तस्य संयोगादिनैव ग्रहापत्तेरित्युक्तत्वादिति भावः। तथेति। तथा च भावज्ञानेऽप्यभावानुपलब्धिरेव प्रमाणं स्यादिति भावः॥

इति महामहोपाध्यायश्रीरुचिदत्तविरचिते कुसुमाञ्जलिमकरन्दे तृतीयः स्तवकः॥

## सप्रकाशे न्यायकुसुमाञ्जलौ चतुर्थः स्तबकः ॥ ४ ॥

सत्त्वेऽपि तस्याप्रमाणत्वादिति चतुर्थीं विप्रतिपत्तिमुत्थापयति-

ननु सदपीश्वरज्ञानं न प्रमाणं, तल्लक्षणायोगात्। अनधिगतार्थगन्तुस्तथाभावात् । अन्यथा स्मृतेरपि प्रामाण्यप्रसङ्गात् । न च नित्यस्य सर्वविषयस्य चानधिगतार्थता, व्याघातात्। अत्रोच्यते ॥

अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वदृक् ॥
यथार्थानुभवो मानमनपेक्षतयेष्यते ॥ १ ॥

न ह्यधिगतेऽर्थे अधिगतिरेव नोत्पद्यते, कारणानामप्रतिबन्धात्। न चोत्पद्यमानाऽपि प्रमातुरनपेक्षितेति न प्रमा, प्रामाण्यस्याऽतदधीनत्वात् । नाऽपि पूर्वाविशिष्टतामात्रेणाप्रामाण्यम्। उत्तराविशिष्टतया-पूर्वस्याप्यप्रामाण्यप्रसङ्गात् । तदनपेक्षत्वेन तु तस्य प्रामाण्ये तदुत्तरस्यापि तथैव स्यादविशेषात्। छिन्ने कुठारादीनामिव परिच्छिन्ने नयनादीनां साधकतमत्वमेव नास्तीत्यपि नास्ति, फलोत्पादानुत्पादाभ्यां विशेषात् । तत्फलं प्रमैव न भवति, गृहीतमात्रगोचरत्वात् स्मृतिवदितिचेद् न । यथार्थानुभवत्वनिषेधे साध्ये बाधितत्वात् । अनधिगतार्थत्वे सिद्धसाधनात्, साध्यसमत्वाच्चाव्यवहारनिषेधे तन्निमित्तविरहौपाधिकत्वात्, बाधितत्वाच्च। न चानधिगता-

**ऽर्थत्वमेव तन्निमित्तं, विपर्ययेऽपि प्रमाव्यवहारप्रसङ्गा-त्। नापि यथार्थत्वविशिष्टमेतदेव, धारावहनबुद्ध्य-व्याप्तेः। न च तत्तत्कालकलाविशिष्टतया तत्राप्यनधि-गतार्थत्वमुपपादनीयम्। क्षणोपाधीनामनाकलना-त्। न चाज्ञातेष्वपि विशेषणेषु तज्जनितविशिष्टता प्रकाशते इति कल्पनीयं, स्वरूपेण तज्जननेऽनागतादि-विशिष्टताऽनुभवविरोधात्। तज्ज्ञानेन तु तज्जनने सूर्यगत्यादीनामज्ञाने तद्विशिष्टताऽनुत्पादात्। न चैतस्यां प्रमाणमस्ति। नन्वनुपकार्यानुपकारकयो-र्विशेषणविशेष्यभावे कथमतिप्रसङ्गो वारणीयः?। व्यवच्छित्तिप्रत्यायनेन व्यवच्छित्तौ स्वभावेन। अन्यथा तवाप्यनवस्थानादिति॥**

नन्विति॥गन्तुर्बोधकस्य॥ अनधिगतार्थगन्तृत्वञ्च फलप्राक्कालिक-समानाधिकरणज्ञानाविषयविषयकत्वम्। वेदो न प्रमाणमप्रमा-ऽनुभवमूलकत्वादिति भावः। तदेतल्लक्षणं यथार्थत्वेन विशेषितं, न वा?। आद्ये प्रमाभूतधारावहनबुद्धावव्यापकम्। अन्त्ये च भ्रमे-ऽतिव्याप्तिरित्याह॥ अव्याप्तेरिति॥ दृग् दर्शनं,भावपरतया। अनधि-गतार्थविषयकत्वं न लक्षणमित्यर्थः। स्वमते प्रमाणलक्षणमाह॥ यथार्थेति॥ अत्रोक्तदोषाभावादित्यर्थः। ननु यथार्थानुभववद् यथार्थ-स्मृतिरपि प्रमा किं न स्यात्?। यथार्थत्वस्यैव तन्त्रत्वादनुभवत्वस्य व्यर्थत्वादित्यत आह॥ अनपेक्षतयेति॥ स्मृतेर्याथार्थ्येऽपि स्वकारणी-भूतान्यूनानतिरिक्तविषयकानुभवयाथार्थ्यापेक्षा,न त्वनुभवस्येत्यर्थः॥ अतदधीनत्वात्, प्रमात्रपेक्षाऽनधीनत्वादित्यर्थः॥ पूर्वाविशिष्टता पूर्वज्ञानान्यूनानतिरिक्तविषयतेत्यर्थः॥यदि चोत्तरज्ञानानपेक्षं पूर्वज्ञान-मिति स्वविषये तत् प्रमाणं, तदा पूर्वज्ञानानपेक्षमुत्तरमपि तथेत्याह॥ तदनपेक्षत्वेनेति॥ यद्यप्युत्तरज्ञानं विशिष्टज्ञानत्वेन विशेषणज्ञाना-ऽऽत्मकपूर्वज्ञानापेक्षम्। अन्यथा सामग्रीतौल्ये धारावाहिधियां क्रमो

न स्यात् । तथापि विशेषणमात्रविषयतया तथा, न विशिष्टविषयतयेति भावः ॥ फलोत्पादेति ॥ छिन्ने छिदा न सम्भवति । ज्ञाते तु ज्ञानान्तरं सम्भवत्येवेत्यर्थः ॥ साध्यसमत्वादिति ॥ प्रमात्वाभावस्य गृहीतमात्रग्राहित्वरूपतया साध्याविशेषादित्यर्थः ॥ व्यवहारेति ॥ प्रमाशब्दवाच्यत्वव्यतिरेके साध्ये तत्प्रवृत्तिनिमित्तराहित्यमुपाधिरित्यर्थः । न चायमुपाधिः साधनाव्यापक इत्याह ॥ न चेति ॥ धारावहनेति ॥ इन्द्रियार्थसन्निकर्षाधारस्तृतीयः क्षणस्तदिन्द्रियार्थसन्निकर्षजज्ञानोत्पत्त्याधारः, अव्यासक्तमनसो यावत्सहकारिसाकल्ये सत्यनाद्येन्द्रियसन्निकर्षाधारक्षणत्वाद् द्वितीयक्षणवदिति धारावहनबुद्धौ मानमाहुः ॥

ननु सूर्यगत्यादिरूपकालावच्छेदकोपाधिविशिष्टतत्तदर्थविषयत्वेन तासामप्यधिकाविषयकत्वम् । एकस्मिन् क्षणे यौगपद्यनिषेधेन तस्यावश्यकत्वादित्यत आह ॥ न चेति ॥ घटोऽयं घटोऽयमित्यादिबुद्धिधारायां विषयभेदानुपलम्भाज्ज्ञानायौगपद्यं स्वरूपसत्कमिकक्षणभेदमादायेति भावः । उपाधयो यदि स्वसत्तया विशिष्टतां जनयेयुः, तदाऽनधिगतधर्माणामविद्यमानतया तद्विशिष्टताऽनुभवो न स्यादित्याह ॥ स्वरूपेणेति ॥

अथ स्वासत्त्वेऽपि ज्ञानसत्तया ते तां जनयन्ति,तत्राह ॥ तज्ज्ञानेति ॥ नन्वसन्तस्ते सत्तामात्रेण, नासन्तश्च स्वज्ञानसत्तया तां जनयन्तीति नोक्तदोष इत्यत आह ॥ न चैतस्यामिति ॥ एतस्यां विशिष्टतायाम् । विशेषणविशेष्यभावानुपपत्ति तत्र मानमाह ॥ नन्विति ॥ विशेषणेन विशेष्ये विशिष्टताख्यधर्मोत्पादनं विनैव स्वसम्बन्धादेव व्यावृत्तिबुद्धिजननेन तदुपपत्तिरित्याह ॥ व्यवच्छिन्तीति ॥ न च विशिष्टज्ञाने सा भासते, विशेषणविशेष्यसम्बन्धातिरिक्तायास्तस्या अननुभवात् ॥

ननु चाभावविशिष्टबुद्धेर्विशिष्टज्ञानत्वात् संयोगादिबाधेन वैशिष्ट्यमेव सम्बन्धो विषयोऽस्तु । मैवम् । तद्धि प्रत्यभावव्यक्ति भिन्नमभिन्नं वा ?। आद्ये तत्तत्स्वरूपरूपा विशेषणतैवास्तु, किमनन्तवैशिष्ट्येन । अन्त्ये घटाभाववति पटवति घटाभावधीप्रसङ्गः । घटाभावपटाभाववैशिष्ट्ययोरभेदात् । तद्वैशिष्ट्यसत्त्वेऽपि तत्र पटाभावो नास्तीति चेन्न । पटाभावाभावस्य भावत्वे पटस्य प्रतिबन्धकतया

तदभावस्य हेतुत्वात् । तस्य च वैशिष्ट्यसम्बन्धेन तत्र सत्त्वात् । अभावत्वे च तस्यापि वैशिष्ट्यसंबन्धेन तत्र सत्त्वात् । न चाभावेऽपि समवाय एव सम्बन्धः । तत्साधकाविशिष्टबुद्धेरविशेषादिति वाच्यम् । समवेतकार्यत्वाद् ध्वंसनाशे पटाद्युन्मज्जनप्रसङ्गात् । न च तत्र भावत्वं तन्त्रं, गौरवाद्वैपरीत्यापत्तेश्चेति सङ्क्षेपः ॥

ज्ञाततैवोपाधिरिति चेत् । न । निराकरिष्यमाणत्वात् । तत्सद्भावेऽपि वा स्मृतेरपि तथैव प्रामाण्यप्रसङ्गात् । जनकागोचरत्वेऽप्युत्तरोत्तरस्मृतौ पूर्वपूर्वस्मरणजनितज्ञातताऽवभासनात् । अस्तु वा प्रत्यक्षे यथा तथा, गृहीतविस्मृतार्थश्रुतौ का वार्त्ता । अप्रमैवाऽसाविति चेत् । गतमिदानीं वेदप्रामाण्यप्रत्याशया । न ह्यनादौ संसारे स्वर्गकामो यजेतेति वाक्याऽर्थः केनचिन्नावगतः । सन्देहेऽपि प्रामाण्यसन्देहात् । न च तत्रापि कालकलाविशेषाः परिस्फुरन्ति । न चैकजन्मावच्छेदपरिभाषयेदं लक्षणं, तत्राप्यनुभूतविस्मृतवेदार्थं प्रति अप्रामाण्यप्रसङ्गात् । कथन्तर्हि स्मृतेर्व्यवच्छेदः ? । अननुभवत्वेनैव । यथार्थो ह्यनुभवः प्रमेति प्रामाणिकाः पश्यन्ति । 'तत्त्वज्ञानाद्' इति सूत्रणात् । अव्यभिचारि ज्ञानमिति च । ननु स्मृतिः प्रमैव किं न स्याद् यथार्थज्ञानत्वात् प्रत्यक्षाद्यनुभूतिवदिति चेत् । न । सिद्धे व्यवहारे निमित्तानुसरणात् । न च स्वेच्छाकल्पितेन निमित्तेन लोकव्यवहारनियमनम्, अव्यवस्थया लोकव्यवहारविप्लवप्रसङ्गात् । न च स्मृतिहेतौ प्रमाणाभियुक्तानां महर्षीणां प्रमाणव्यवहारोऽस्ति,पृथगनुपदेशात् । उक्तेष्वन्तर्भावादनुप-

**देश इति चेद् न । प्रत्यक्षस्यासाक्षात्कारिफलत्वानुपपत्तेः, लिङ्गशब्दादेश्च सत्तामात्रेण प्रतीत्यसाधनत्वादिति ॥**

ज्ञाततैवेति ॥ पूर्वपूर्वज्ञानाहितज्ञातताविशिष्टमुत्तरोत्तरज्ञानविषय इत्यनधिगतार्थतैव धारावहनबुद्धीनामित्यर्थः ॥ तत्सद्भावेऽपीति ॥ स्मृतिव्यावृत्त्यर्थमनधिगतेति व्यर्थविशेषणम् । तेनापि च न तद्व्यवच्छेदः । तत्रापि कारणीभूतानुभवजनितज्ञाततासत्त्वेनानधिगतार्थताऽनपायादित्यर्थः ॥

अथ स्मृतेर्जनकज्ञानविषयमात्रविषयत्वात् सा स्मृतौ न भासते, तथापि पूर्वपूर्वस्मृतिजनितज्ञाततविशिष्टस्योत्तरोत्तरस्मृतौ भानादनधिगतार्थत्वसत्त्वादित्याह ॥ जनकेति ॥ न च स्मृतता नोत्तरोत्तरस्मृतिविषयोऽनुभवाविषयत्वादिति वाच्यम् । धारावहनबुद्धावप्युत्तरोत्तरबुद्धेः पूर्वपूर्वज्ञानाहितज्ञाततासमानकालोत्पत्तिकत्वेन तत्राऽपि तद्विषयत्वाभावापातादिति भावः ॥

अन्यत्र तत्सन्देहेऽप्युभयसिद्धप्रामाण्ये वेदे अधिगतार्थगोचरे प्रामाण्यासम्भव इति दुरुत्तरं समाधानमित्याह॥अस्तु वेति॥तत्रापीति ॥ एकजन्मनीत्यर्थः ॥ अननुभवत्वेनैवेति ॥ इममर्थमनुभवामीममर्थं स्मरामीत्यनुभवसाक्षिकावेवानुभवत्वस्मृतित्वे जातिविशेषावित्यर्थः॥ तत्त्वज्ञानादिति॥ज्ञानपदमनुभवपरम् ॥एवमग्रेऽपि॥ नन्विति ॥ यथार्थज्ञानत्वमेव प्रमापदप्रवृत्तिनिमित्तं लाघवाद्, न तु तद्विशेषोऽनुभवत्वमपीत्यर्थः ॥ सिद्धे इति ॥ स्मृतेः प्रमात्वं यदि यथार्थज्ञानत्वमेव साध्यं, तदा सिद्धसाधनं साध्याविशेषश्च स्यादिति प्रमापदवाच्यत्वं साध्यम् । तत्र च तन्निमित्तत्वमुपाधिरित्यर्थः ॥

ननु यथार्थज्ञानत्वमेव तन्निमित्तमित्युक्तमित्यत आह ॥ न चेति॥ न च स्मृतीति ॥ यदि स्मृतौ प्रमापदस्येश्वरसङ्केतः स्यात्, तदा प्रमाणाभियुक्तानां संस्कारे प्रमाकरणत्वव्यवहारः स्यात् । न चैवमित्यर्थः ॥ उक्तेषु प्रत्यक्षादिष्वित्यर्थः ॥

अनपेक्षतयेति विवृणोति—

**एवं व्यवस्थिते तर्क्यतेऽपि । यदियमनुभवैक-**

विषया सती तन्मुखनिरीक्षणेन तद्यथार्थत्वायथार्थत्वे अनुविधीयमाना तत्प्रामाण्यमव्यवस्थाप्य न यथार्थतया व्यवहर्तुं शक्यते इति । व्यवहारेऽपि पूर्वानुभव एव प्रमितिरनपेक्षत्वात् । न तु स्मृतिः, नित्यं तदपेक्षणात् । असमीचीने ह्यनुभवे स्मृतिरपि तथैव ॥

नन्वेवमनुमानमप्यप्रमाणमापद्येत, मूलप्रत्यक्षाऽनुविधानात् । न । विषयभेदात् । आगमस्तर्हि न प्रमाणं, तद्विषयमानान्तरानुविधानात् । न । प्रमातृभेदात् । धारावाहिकबुद्धयस्तर्हि न प्रमाणम् । आद्यप्रमाणानुविधानात् । न । कारणविशुद्धिमात्रापेक्षया प्रथमवदुत्तरासामपि पूर्वमुखनिरीक्षणाभावात् कारणबलायातं काकतालीयं पौर्वापर्यमिति ॥

तर्क्यतेऽपीति ॥ अनुभवैकविषया, अनुभवमात्रविषयेत्यर्थः । तेनास्या विषयान्तरेऽपि न प्रमात्वमिति भावः ॥ तद्यथार्थत्वेति ॥ स्वजनकानुभवयथार्थत्वायथार्थत्वव्याप्तयथार्थत्वायथार्थत्वेत्यर्थः ॥ तत्प्रामाण्यमिति ॥ स्वजनकानुभवप्रामाण्यमित्यर्थः ॥ अव्यवस्थाप्य अनवधार्य ॥ यद्यपि स्वजनकानुभवप्रामाण्यमनिश्चित्यापि प्रवृत्तिसंवादादिना अनुभवस्येव स्मृतेरपि प्रामाण्यग्रहः सम्भवत्येव, तथाऽपि यदि स्मृतिः प्रमा स्यात्, तदा स्वान्यूनानतिरिक्तविषयकस्वजनकानुभवप्रामाण्यव्याप्तप्रामाण्यो न स्यात् । व्यतिरेके इच्छादिदृष्टान्तः । धारावहनबुद्धिषु पूर्वपूर्वबुद्धेर्विशेषणमात्रविषयतयोत्तरोत्तरबुद्धिष्वपेक्षा, स्मृतौ त्वन्यूनानतिरिक्तविषयतयेति न तत्र व्यभिचारः । धारावहनबुद्ध्यन्यत्वेन वा विशेषणम् ॥

शक्यते इतीत्यस्यानन्तरं, न स्मृतिः प्रमेति शेषः । तदपेक्षणमेवाह ॥ असमीचीने हीति ॥ मूलेति ॥ कारणव्याप्त्यादिप्रत्यक्षप्रामाण्यव्याप्यप्रामाण्यादित्यर्थः ॥ विषयेति ॥ व्याप्त्यादिप्रत्यक्षस्य लिङ्गलिङ्गिविषयत्वादनुमितौ च पक्षतावच्छेदकधर्मभाननैयत्येन तस्या-

ऽधिकस्य मानादित्यर्थः। तथापि श्रोतुर्वाक्यार्थप्रमाया वाक्यप्रयोगमूलतदर्थविषयकज्ञानप्रामाण्यापेक्षित्वान्न प्रमात्वं स्यादित्याह ॥ आगम इति ॥ तथात्वेऽपि वक्तृश्रोतृरूपप्रमातृभेदोऽस्ति, स्मृतौ त्वेकस्यैव तथात्वमित्याह ॥ प्रमात्रिति ॥

तर्हि विषयप्रमात्रोरभेदाद्धारावाहनबुद्धयः पूर्वबुद्ध्यपेक्षाः प्रमा न स्युरित्याह ॥ धारेति ॥ यद्यपि बुद्धिक्रमान्यथाऽनुपपत्त्या पूर्वबुद्धेर्विशेषणज्ञानत्वेनोत्तरबुद्धिकारणत्वं, तथापि स्मृतिवदन्यूनविषयतया न कारणत्वं, किन्तु विशेषणमात्रविषयत्वेनेत्युक्तम् । अन्यूनानतिरिक्तविषयत्वन्तु काकतालीयमित्याह ॥ कारणेति ॥

नन्वतीतानुभववैशिष्ट्यरूपा तत्ता न मानसप्रत्यक्षवेद्या, अनुभवसत्त्वकाले तदतीतत्वाभावात् । तदत्ययकाले च विशेष्यासत्त्वादिति स्मृतिरेव तत्र मानमित्यगृहीतविषयतया सा प्रमा स्यादित्याह—

यदि हि स्मृतिर्न प्रमितिः पूर्वानुभवे किं प्रमाणम् । स्मृत्यन्यथाऽनुपपत्तिरिति चेत् । न । तया कारणमात्रसिद्धेः । न तु तेनानुभवेनैव भवितव्यमिति नियामकमस्ति । अननुभूतेऽपि तर्हि स्मरणं स्यादिति चेत् । किं न स्यात् । न ह्यत्र प्रमाणमस्ति । पूर्वानुभवाकारोल्लेखः स्मृतेर्दृश्यते, सोऽन्यथा न स्यादिति चेत्। तत् किं बौद्धवद्विषयाकारान्यथानुपपत्त्या विषयसिद्धिस्त्वयाऽपीष्यते, तथाभूतं ज्ञानमेव वा तत्सिद्धिः?।आद्ये तद्वदेवानैकान्तिकत्वम्।न हि यदाकारं ज्ञानं,तत्पूर्वकत्वं तस्येति नियमः,अनागतज्ञाने विभ्रमे च व्यभिचारात् । द्वितीये तु स्मृतिप्रामाण्यमवर्जनीयम् । मा भूत् पूर्वानुभवसिद्धिः, किं नश्छिन्नमिति चेत् । न तर्हि स्मृत्यनुभवयोः कार्यकारणभावसिद्धिरिति । न । तदप्रामाण्येऽपि पूर्वाऽपरावस्थावदात्मप्रत्यभिज्ञानप्रामाण्यादेव तदुपपत्तेः । योऽह-

**मन्वभवममुमर्थं, सोऽहं स्मरामीति मानसप्रत्यक्ष-मस्तीति ॥**

यदीत्यादिना, न तर्हीत्यन्तेन ॥तत्किमिति॥ सौत्रान्तिकानां घटाद्याकारज्ञानकादाचित्कत्वान्यथाऽनुपपत्त्या घटादिकल्पनवत् तत्ताऽऽकारान्यथाऽनुपपत्त्या पूर्वानुभवकल्पनमित्यर्थः ॥ तथाभूतमिति ॥ बुद्धीनां निराकारतया विषय एव विशेषक इत्यर्थः ॥ तद्वदेवेति ॥ सौत्रान्तिकमते यथाऽनैकान्तिकत्वं, तथा त्वन्मतेऽपीत्यर्थः ॥ तदेवाह ॥ न हीति ॥ आकारेण ज्ञानस्यार्थजन्यत्वमनुमेयमर्थसत्त्वमात्रं वा । आद्ये अनागतार्थस्य वर्त्तमानज्ञानाकारणत्वादनैकान्तिकम् । अन्त्ये अनागतस्य कादाचित्कत्वेऽपि शुक्तौ सर्वदा रजतत्वाकारत्वाऽसत्त्वाद्रजतत्वाकारभ्रमेऽनैकान्तिकमित्यर्थः ॥ द्वितीये चेति ॥ तत्ताविषया स्मृतिरेव तत्तासिद्धिरिति सा प्रमा स्यादेवेत्यर्थः । तथा च स्मृत्यनुभवयोः कार्यकारणभावान्यथाऽनुपपत्तेः स्मृतिः प्रमेति भावः । अतीतानुभवविशिष्टे स्मृतिवैशिष्ट्यप्रत्यभिज्ञानं स्मृत्यनुभवयोः कार्यकारणभावग्राहकमित्यन्यथोपपत्त्या न स्मृतिः प्रमेत्याह॥ तदप्रामाण्येऽपीति ॥ प्रत्यभिज्ञानस्वरूपमाह ॥ योऽहमिति ॥

ननु केयं तत्ता । न तावदतीतानुभवविषयत्वम् । अतीतानुभवविषयत्वस्यानुभवाविषयतया स्मृत्या तदनुल्लेखापत्तेः । न च तस्याऽनुभवाविषयत्वेऽपि यदा ज्ञानान्तरेण ग्रहणं तदा, स घट इति स्मृतिः । अन्यथा प्रमुष्टतत्तांशा, घट इतीति वाच्यम् । अतीतानुभवविषयत्वस्यानुमितौ भानेऽपि स इति बुद्धेरभावात् । नाप्यतीतधर्मवैशिष्ट्यम् । यदि हि यो वस्तुतोऽतीतो धर्मस्तद्वैशिष्ट्यं तत्ता, तदाऽनुभवेऽपि तद्विषयत्वात्तत्तोल्लेखापत्तिः । अतीतधर्मविशिष्टः स इति सहप्रयोगानुपपत्तिश्च । नाप्यतीतत्वेन भासते यो धर्मस्तद्वैशिष्ट्यम् । भासमानधर्मस्यातीतत्वेनानुभवाविषयत्वात् । प्रत्युत वर्त्तमानत्वेनाऽनुभवात्, स्मृतौ तत्तोल्लेखानापत्तेः । नाऽप्यतीतसमयसम्बन्धः । अनागतगोचरस्मृतिप्रत्यभिज्ञयोस्तत्तोल्लेखानापत्तेः । इदन्ताऽपि न तद्वृत्तिगुणादि । गुणादावभावात् । नापि प्रत्यक्षज्ञानगोचरत्वम् । अचाक्षुषत्वापत्तेः ॥

उच्यते । अनुभवे य एव धर्मः कालो वा वर्त्तमानत्वेन भासते

स एव स्मृतावपि । तयोरेकविषयत्वेऽपि स्मृतावेव तच्छब्दोल्लेखः । संस्कारजज्ञानस्यैव तच्छब्दप्रयोगहेतुत्वात् । प्रत्यभिज्ञाने तथा कल्पनात् । तत्रैव च प्रत्यक्षानुभवेनेदंशब्दप्रयोगः । विषयकृतश्च स्मृत्यऽनुभवयोर्विशेषो नास्त्येव । अत एवायं घट इत्यनुभवादयं घट इति न स्मृतिः । स घट इति स्मृतेश्च स घट इति नानुभवः । सह प्रयोगस्तु धर्मविशेषमादायेत्यस्मत्पितृचरणाः ॥

परलक्षणमभ्युपगम्य अनधिगतार्थगन्तृत्वमीश्वरज्ञानेऽप्यस्तीत्याह—

**न च गृहीतग्राहित्वमीश्वरज्ञानस्य, तदीयज्ञानान्तरागोचरत्वाद् विश्वस्य । न च तदेव ज्ञानं कालभेदेनाऽप्रमाणम्, अनपेक्षत्वस्यापरावृत्तेः । तथापि वा अप्रामाण्येऽतिप्रसङ्गादिति ॥**

न चेति ॥ ईश्वरस्य ज्ञानान्तराभावान्न तज्ज्ञानं गृहीतग्राहीत्यऽर्थः । पुरुषान्तरज्ञानान्तरगोचरत्वेन गृहीतग्राहित्वे अभिमताऽपि प्रमा न स्यात् ॥

अथ तद्विषयज्ञानोत्तरकालवर्त्तिसमानाश्रयतद्विषयकज्ञानत्वमेव गृहीतग्राहित्वम् । तन्न । बुद्धिमात्रस्य प्रमात्वाभावापत्तेः । यद्विषया बुद्धिरुत्पन्ना तद्विषयाया एव तस्याः स्वोत्पत्त्युत्तरक्षणेऽपि सत्त्वादिति भावः । नन्वीश्वरस्य ज्ञानान्तराभावेऽपि प्रथमक्षणे गृहीतस्यैव द्वितीयादिक्षणे ज्ञानाद् गृहीतग्राहित्वमस्त्येवेत्यत आह ॥ न चेति ॥ अनपेक्षत्वस्येति । न हि स्मृतिवदुत्तरकालबुद्धिविषयत्वे पूर्वकालीनतद्विषयज्ञानापेक्षा ईश्वरज्ञानेऽस्तीत्यर्थः ॥ अतिप्रसङ्गादिति ॥ सर्वज्ञानानां द्वितीयादिक्षणे ग्रहणरूपत्वेनाप्रमात्वापातादित्यर्थः । वस्तुतो, गृहीतेत्यत्र निष्ठार्थस्य ध्वंसस्यासम्भव एवेति भावः ॥

ननु विषयनियमान्यथाऽनुपपत्त्या तदुपपादको विषयनिष्ठो ज्ञानजन्यो धर्मः स्वीकार्यः । तस्य च तदुपादानज्ञानजन्यत्वे तदुत्पत्तेः प्राक् तद्विषयत्वाभावात् कथं तदुत्पत्तिः । तदुपादानज्ञानाजन्यत्वे च क्षित्यादिसकर्तृकत्वग्राहकं कार्यत्वं तत्रैवानैकान्तिकमित्याह—

**स्यादेतत् । अनुपकारकं विषयस्य, तदीयमेतदीयं**

वा न भवितुमर्हत्यविशेषात् । न च तस्येत्यनियतं तत्र प्रमाणमतिप्रसङ्गात् । न च तदभिज्ञमन्तरेण तदुपकारस्योत्पत्तिः, तथाऽनभ्युपगमात् । अभ्युपगमे वा, कार्यत्वस्यानैकान्तिकत्वात् । अत्रोच्यते—

स्वभावनियमाभावादुपकारोऽपि दुर्घटः ॥
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ॥ २ ॥

विशेषाभावात्तत्रैव फलं नान्यत्रेत्यस्यापि नियमस्यानुपपत्तेः । स्वभावनियमेन चोपपत्तौ तथैव विषयव्यवस्थोपपत्तेः । अवश्यश्चैतदनुमन्तव्यम्, अतीतादिविषयत्वानुरोधात् । न हि तत्र ज्ञानेन किञ्चित् क्रियतेइति शक्यमवगन्तुम् । असत्त्वात् । न च तद्धर्मसामान्याधारं किञ्चित् क्रियते इति युक्तम् । तेन तस्यैव विषयत्वप्राप्तेः । तादात्म्याद्विशेषस्यापि सैव ज्ञाततेतिचेत्, तत् किं चक्षुषा घटे ज्ञायमाने रसोऽपि ज्ञायते, तादात्म्यात् । घटाकारेण ज्ञायतएवासौ रसः इति चेत् । अथ रसाकारेण किं न ज्ञायते । तेन रूपेण ज्ञातताऽनाधारत्वादिति चेत् । न तर्हि वर्त्तमानसामान्यज्ञानेऽप्यतीतानागतादिज्ञानम् । तेनाकारेण प्राकट्यानाधारत्वादिति ॥

स्यादेतदिति ॥ न चेति ॥ तदीयोऽयं विषय इति नानियतं, किन्तु नियतमेव । तन्नियामकस्तज्जन्यधर्म एव वाच्यः । तेन तज्जन्यज्ञातताऽऽश्रयत्वमेव तद्विषयत्वमित्यर्थः ॥

ज्ञानस्य ज्ञेयनिष्ठोपकाराधानेऽपि नियामकः स्वभाव एव वाच्यः । तथाच तत एव विषयनियमोपपत्तौ किमुपकाराधानेनेत्याह ॥ स्वभावेति ॥ विद्यमानेऽर्थे ज्ञानजन्योपकारसम्भवेऽप्यतीताद्यर्थे तद्-

ऽसम्भवाद् यथा तत्र स्वभाव एव विषयत्वनियामकः, तथा विद्यमानेऽप्यर्थेऽस्त्वित्याह ॥ सुघटत्वेऽपीति ॥

अतीतादिघटादौ भासमाने घटत्वादेरपि भासनात्तत्रैव ज्ञाततोत्पत्तिः स्यादित्यपि नास्तीत्याह ॥ न चेति ॥ तथा सति ज्ञातताऽनाश्रयत्वाद् घटादिर्विषयो न स्यात् । घटत्वादौ ज्ञातताऽऽधानात्तस्यैव तद्विषयत्वादित्यर्थः । ननु धर्मधर्मिणोस्तादात्म्यात्तद्धर्मज्ञातता तस्यैवेत्याह ॥ तादात्म्यादिति ॥ तत्किमिति ॥ ननु धर्मिणो धर्माभेदेऽपि धर्मस्य न धर्म्यभेदः । भेदाभेदाङ्गीकारात् । तथाच धर्मे ज्ञायमाने तदभिन्नो धर्मी ज्ञायतां, धर्मिणि ज्ञायमाने तद्भिन्नो धर्मः कथं ज्ञायेत । मैवम् । भेदाभेदस्य विरोधेनासम्भवात् ॥

ननु धात्वर्थावच्छेदकपरसमवेतक्रियाफलशालित्वं कर्मत्वमिति ज्ञानक्रियायाः स्वकर्मनिष्ठफलजनकत्वाज्ज्ञातता स्यादित्याह—

ननु क्रियया कर्मणि किञ्चित् कर्त्तव्यमितिव्याप्तेरस्त्वनुमानम् ? । न ॥

अनैकान्त्यादसिद्धेर्वा न च लिङ्गमिह क्रिया ॥

तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके ॥ ३ ॥

धात्वर्थमात्राभिप्रायेण प्रयोगे संयोगादिभिरनेकान्तात् । न हि शरसंयोगेन गगने किञ्चित् क्रियते, अन्त्यशब्दाभिव्यक्त्या वा । स्पन्दाभिप्रायेणासिद्धेः । व्यापाराभिप्रायेण शब्दलिङ्गेन्द्रियव्यापारैर्व्यभिचारात् । न हि तैः प्रमेये किञ्चित् क्रियते, अपि तु प्रमातर्येव । फलाभिप्रायेणापि तथा । अन्ततस्तेनैवानेकान्ताद्, अनवस्थानाच्च । आशुविनाशिधर्माभिप्रायेण छित्त्वादिभिरनियमात् । आशुकारकाभिप्रायेण कर्मण्यसिद्धेः । कर्मण्याशुकारकं ज्ञानमित्येव हि साध्यम् । कर्त्तर्याशुकारकत्वस्य कर्मोपकारत्वेनाव्याप्तेः । शब्दादिव्यापारैरेवानेकान्तात् ॥

स्यादेतत् ॥ अनुभवसिद्धमेव प्राकट्यम् । तथाहि, ज्ञातोऽयमर्थ इति सामान्यतः, साक्षात्कृतोऽयमर्थ इति विशेषतो विषयविशेषणमेव किञ्चित् परिस्फुरतीति चेत् । तदसत् । यथा हि,

अर्थे नैव विशेषो हि निराकारतया धियाम् ॥

तथा,

क्रिययैव विशेषो हि व्यवहारेषु कर्मणाम् ॥ ४ ॥

किं न पश्यसि, घटक्रिया पटक्रियेतिवत् कृतो घटः करिष्यते घट इत्यादि । तथैव गृहाण, घटज्ञानं पटज्ञानमितिवज्ज्ञातो घटो ज्ञास्यते ज्ञायते इति । कथमसंबद्धयोर्धर्मधर्मिभाव इतिचेद् ध्वस्तो घट इति यथा । एतदपि कथमितिचेद्, नूनं ध्वंसेनापि घटे किञ्चित् क्रियतेइति वक्तुमध्यवसितोऽसि । तन्निरूपणाऽधीननिरूपणो ध्वंसः स्वभावादेव तदीय इति किमत्र संबन्धान्तरेणेति चेत् । प्रकृतेऽप्येवमेव ॥

नन्विति ॥ क्रिया न धात्वर्थमात्रं, शरसंयोगादिना धात्वर्थेन कर्मणि गगनादौ तदजननादनैकान्तिकत्वात् । नापि स्पन्दः, ज्ञाने स्पन्दत्वाभावात् । नापि करणव्यापारत्वं, शब्दादिव्यापारपदार्थस्मृत्यादिभिरनैकान्तिकत्वादित्याह ॥ अनैकान्त्यादिति॥ इह ज्ञाततायाम् । ननु प्रत्यक्षैव ज्ञातता, संयुक्त इतिवज्ज्ञात इत्यनुभवादित्यत आह ॥ तद्वैशिष्ट्येति ॥ ज्ञातताऽनुभवो ज्ञानवैशिष्ट्यमात्रविषयको नातिरिक्तविषयताया मानमित्यर्थः ॥

अन्त्यशब्देति ॥ न चान्त्यशब्दाभिव्यक्त्या तत्र ज्ञातनैवोत्पद्यते इति वाच्यम् । तस्याव्यवहितोत्तरक्षण एव नाशात् । समवायिकारणस्य च कार्यसमानकालतानियमात् । शब्दनित्यत्वस्य च निषेधादिति भावः ॥ असिद्धेरिति ॥ ज्ञानक्रिया न स्पन्द इत्यर्थः । ननु क्रिया फलमत्र, यद्धि फलं तत्प्रमेयनिष्ठकिञ्चिज्जनकं, प्रयत्नवदात्म-

संयोगवदित्यत आह ॥ फलेति ॥ अन्तत इति ॥ फलेनापि फलजनने-ऽनवस्थेति क्वचिद्विश्रान्तौ तेनैव व्यभिचार इत्यर्थः ॥ आशुविना-शित्वं क्षणचतुष्टयानवस्थायित्वम् ॥ अनियमाद्, व्यभिचारादित्य-र्थः ॥ कर्मण्याशुकारकत्वं हेतुः, कर्त्तर्याशुकारकत्वं वा, आशुकारक-त्वमात्रं वा ? । नाद्यः । साध्याविशिष्टतया हेतोरसिद्धत्वादित्याह ॥ कर्मणीति ॥ न द्वितीयतृतीयावनैकान्तादित्याह ॥ कर्त्तरीति ॥ शब्दादि-व्यापारैः पदार्थस्मृतिलिङ्गपरामर्शादिभिर्वाक्यार्थज्ञानानुमित्यादिकं कर्त्तर्याशुक्रियते । न च कर्मणि वाक्यार्थे अनुमेयादौ वा किञ्चित् क्रियते इत्यनैकान्तिकमित्यर्थः । कारिकोत्तरार्द्धं व्याख्यातुं शङ्कते ॥ अनुभवेति ॥ निराकारमपि ज्ञानं यथा विषयेण नीलत्वादिना नील-ज्ञानाद्युच्यते, तथा ज्ञानरूपक्रिययैव ज्ञातोघटइतिर्धीव्यपदेशौ । इत्थ-मनभ्युपगमे च कृतो घट इत्यादावपि कृत्यादिजनितधर्माधारो घटः स्यात् । न चैतत् त्वयेष्यते, इति परिहरति ॥ यथा हीति ॥ घट-क्रियेत्यत्र क्रियायामर्थो विशेषकः, कृतो घट इत्यत्रार्थे क्रिया विशे-षिकेति भेदः । एवं घटज्ञानमित्यत्रार्थो ज्ञाने विशेषणं, ज्ञातो घट इत्यत्रार्थे ज्ञानं विशेषणम् ॥

ननु घटोऽयमिति ज्ञानं घटधर्मिककिञ्चिद्धर्मजनकं घटज्ञानत्वाद् अपेक्षाबुद्धिवत् । न चापेक्षाबुद्धित्वमुपाधिः । घटसंयोगादिजनका-ऽवयवसंयोगादौ साध्याव्यापकत्वात् । मैवम् । अप्रयोजकत्वात् । अन्यथेच्छा स्वविषयनिष्ठकिञ्चिद्धर्मजनिका सविषयकत्वात् बुद्धि-वदित्यादेरापत्तेः । तथापि ज्ञातो घट इति ज्ञानं विशेषणविशेष्ययोः सम्बन्धविषयकं विशिष्टज्ञानत्वात् । गौरिति ज्ञानवत् । वर्त्तमानेऽर्थे बाधकाभावात् । अन्यथा समवायोऽपि न सिद्ध्येदिति चेन्न । अती-तानागतयोर्ज्ञाततया अभावेन ज्ञातव्यवहाराभावापत्तेः । तस्य ज्ञात-तासाध्यत्वात् । तत्र ज्ञानविषयावेव तद्विषयाविति चेन्न । वर्त्तमानेऽपि तयोरेव तद्विषयत्वापत्तेः । अतीतादिवर्त्तमानतत्प्रतीत्योर्वैलक्षण्या-ऽननुभवात् ॥ अथ घटपटयोरेकज्ञानविषयत्वेऽपि घटत्वेन घटो ज्ञातः, पटत्वेन पटो ज्ञात इति ज्ञातताभेदभानाज्ज्ञानभिन्ना ज्ञाततेति-चेन्न । तस्यैव ज्ञानस्य सम्बन्धस्तत्र तत्र तेन तेन धर्मेण निरूप्यते-इति ज्ञानस्वभावादेव नियमादिति भावः ॥ प्रतिबन्धिमुक्त्वा मूल-युक्तिमाह ॥ तन्निरूपणेति ॥

ननु ज्ञानजन्यफलानाश्रयत्वादर्थः कर्म न स्यादित्यत आह—

एतेन फलानाधारत्वादर्थः कथं कर्मेति निरस्तम् । विनाश्यवत् करणव्यापारविषयत्वेन तदुपपत्तेः । स्वाभाविकफलनिरूपकत्वञ्च तुल्यम् ॥

ननु ज्ञानमतीन्द्रियत्वादसाधारणकार्यानुमेयं तदभावे कथमनुमीयेत, अप्रतीतञ्च कथं व्यवहारपथमवतरेदिति ज्ञानव्यवहारान्यथाऽनुपपत्त्या ज्ञातताकल्पनम् । तदप्यसत् । परस्पराश्रयप्रसङ्गात् । ज्ञाततया हि ज्ञानमनुमीयेत, ज्ञाते च तद्व्यवहारान्यथानुपपत्तिस्तां ज्ञापयेत् । कुतश्च ज्ञानमतीन्द्रियम् ? । इन्द्रियेणाऽनुपलभ्यमानत्वादिति चेत् । न । अनुमानोपन्यासे साध्याविशिष्टत्वात् । अनुपलब्धिमात्रोपन्यासे तु योग्यताऽविशेषिताऽसौ कथमैन्द्रियकोपलम्भाभावं गमयेत् । तद्विशेषणे तु कथमतीन्द्रियं ज्ञानमिति । तथाविधज्ञातताऽनाश्रयत्वादिति चेन्न । आश्रयासिद्धेः । व्यवहारान्यथाऽनुपपत्त्यैव सिद्ध आश्रय इति चेन्न । ज्ञानहेतुनैव तदुपपत्तेः । तस्यात्ममनःसंयोगादिरूपस्य सत्त्वेऽपि सुषुप्तिदशायामर्थव्यवहाराभावान्नैवमिति चेन्न । तावन्मात्रस्य व्यवहाराहेतुत्वात् । अन्यथा ज्ञानस्वीकारेऽपि तुल्यत्वात् । स्मरणान्यथाऽनुपपत्त्येति चेन्न । तस्याप्यसिद्धेः । अस्ति तावद्व्यवहारनिमित्तं किञ्चिदितिचेत् । किमतः ? । न ह्येतावता ज्ञानं तदिति सिद्ध्यति, तस्यैवासिद्धेः । तथापि नियतस्य कर्तुः प्रवृत्तेः कर्तृधर्मेणैव केनचित् प्रवृत्ति-

हेतुना भवितव्यमिति चेत्। अस्त्विच्छा प्रत्यक्षसिद्धा, न तु ज्ञानम्। सैव कथं नियताधिकरणे उत्पद्यतामिति चेन्न। ज्ञानाऽभ्युपगमेऽपि तुल्यत्वात्। स्वहेतोः कुतश्चिदिति चेत्। तत एव इच्छा अस्तु, किं ज्ञानकल्पनयेति॥

स्यादेतत्। प्रकाशमाने खल्वर्थे तदुपादित्सादिरुपजायते, न तु सुषुप्त्यवस्थायामप्रकाशमानेऽप्यर्थे इत्यनुभवसिद्धम्। तत इच्छायाः कारणं विलक्षणमेव किञ्चित् परिकल्पनीयं, यस्मिन् सति सुष्वापलक्षणमौदासीन्यमर्थविषयमात्मनो निवर्त्तते इति चेत्। हन्तैवं सुष्वापनिवृत्तिमनुभवसिद्धां प्रतिजानानेन ज्ञानमेवापरोक्षमिष्यते। अचेतयन्नेव हि सुषुप्त इत्युच्यते, अचैतन्यनिवृत्तिरेव हि चैतन्यं ज्ञानमिति। तथा च कालात्ययापदिष्टो हेतुः॥

एतेनेति॥ परसमवेतक्रियाफलशालित्वं न कर्मत्वम्। आत्मानं जानातीत्यत्राव्याप्तेः। किन्तु करणव्यापारविषयत्वम्। तच्चात्राऽस्त्येवेत्याह॥ विनाश्यवदिति॥ अर्थो ज्ञानस्य कर्मैव न भवति। अतीतादेरप्यर्थत्वात्। कारकविशेषस्य च कर्मत्वात्। अतीतानागतं जानामीति द्वितीयाप्रयोगः साधुरिति तु तत्त्वम्॥ स्वाभाविकेति॥ यथा कर्तृव्यापारफलं विनाशः प्रतियोगिनिरूप्यः, तथा ज्ञानमपि विषयनिरूप्यमित्यर्थः॥

तद्विशेषणे त्विति॥ यदि योग्यानुपलब्ध्या योग्यस्य ज्ञानस्याऽभावो गृह्यते, तदा सिद्धमैन्द्रियकत्वं ज्ञानस्येत्यर्थः॥ तथाविधेति॥ साक्षात्कृतताऽनाश्रयत्वादित्यर्थः॥ आश्रयेति॥ ज्ञानस्याप्रत्यक्षत्वे मानान्तरासम्भवेनाश्रयस्य ज्ञानस्यासिद्धेरित्यर्थः। ज्ञानस्य प्रत्यक्षतया स्वरूपासिद्धेश्चेति भावः। अज्ञाते घटादिव्यवहारो न स्यात्।

तस्य व्यवहर्त्तव्यज्ञानसाध्यत्वादिति कार्येण कारणानुमानात् सिद्ध आश्रय इत्याह ॥ व्यवहारेति ॥ ज्ञानहेतुत्वेनाभिमतादेवावश्यकाद्व्यवहारोपपत्तौ न तेन ज्ञानानुमानमित्याह ॥ ज्ञानेति ॥ ज्ञानहेतुसद्भावेऽपि व्यवहाराभावान्न तेनान्यथासिद्धिरित्याह ॥ तस्येति ॥ ज्ञानहेतुसद्भावे सुषुप्तौ कुतो ज्ञानमेव न जायते ? । तावन्मात्रस्याहेतुत्वादिति यदि, तदा या ज्ञानसामग्री सा व्यवहारसामग्र्यस्तु किमान्तरालिकेन ज्ञानेनेत्याह ॥ तावन्मात्रस्येति ॥ अन्यथेति ॥ ज्ञानमेव तदा किं न स्यादित्यर्थः ॥ तस्यापीति ॥ स्मरणस्यापि ज्ञानत्वेनातीन्द्रियत्वादसिद्धिरित्यर्थः । अत्राप्यनुभवकारणादेव स्मरणोत्पत्तिरित्यन्यथासिद्धिरिति भावः ॥ तदिति ॥ व्यवहारनिमित्तमित्यर्थः ॥ तस्यैवेति ॥ ज्ञानासिद्धया व्यवहारे तज्जन्यत्वानिश्चयादित्यर्थः । कर्तृधर्मप्रवृत्तेः कर्तृधर्मकार्यत्वात् कर्तृधर्मतया ज्ञानं सिद्ध्येदित्याह ॥ तथापीति ॥ इच्छा स्वविषयविषयकात्मधर्मजन्या नियतविषयकधर्मत्वात् प्रयत्नवदित्यभिप्रेत्याह ॥ सैवेति ॥ अनुमानं ज्ञान एवानैकान्तिकमित्यभिप्रेत्याह ॥ ज्ञानेति ॥ न च ज्ञानहेतोरननुगमाद् व्यभिचारेण कारणत्वासम्भवः । परेषामेकशक्तिमत्त्वेनापि कारणत्वग्रहसम्भवादिति भावः ॥ अनुभवसिद्धमिति ॥ यद्यप्येकत्रात्मन्येकदा आशुतरविनाशिगुणत्रयानवस्थानादिच्छाज्ञानयोः पौर्वापर्याऽनुभवो न सम्भवति, तथापि ज्ञानव्यतिरेकाऽव्यवहितोत्तरकाले इच्छाव्यतिरेकनियमात् कार्यकारणभावग्रह इति भावः ॥

एतेन क्षणिकत्वादिति निरस्तम् । अपि च । किमिदं क्षणिकत्वं नाम ? । यद्याशुतरविनाशित्वं, तदाऽनैकान्तिकम् । अथैकक्षणावस्थायित्वं, तदसिद्धं प्रमाणाभावात् ॥

ननु स्थायिविज्ञानं यादृशमर्थक्षणं गृह्णदुत्पद्यते, द्वितीयेऽपि क्षणे किं तादृशमेव गृह्णाति, अन्यादृशं वा, न वा कमपीति । न प्रथमः । तस्य क्षणस्यातीतत्वात् । प्रत्यक्षज्ञानस्य च वर्त्तमानाभत्वात् । न चा-

ऽतीतमेव वर्त्तमानाभतयोल्लिखति,भ्रान्तत्वप्रसङ्गात् । न द्वितीयः, विरम्य व्यापारायोगात् । प्रथमतोऽपि तथाऽभ्युपगमेऽनागतावेक्षणप्रसङ्गात् । न तृतीयः । ज्ञानत्वहानेरिति महाव्रतीयाः ॥

तदसत् । ज्ञानं गृह्णातीत्यस्यैवाऽर्थस्याऽनभ्युपगमात् । अपि तु तदेव ग्रहणमित्यभ्युपगमः । तथाच ज्ञानं प्रथमे क्षणे यमर्थमालम्ब्य जातं,द्वितीयेऽपि क्षणे तदालम्बनमेव तन्न वेति प्रश्नार्थः । तत्र तदालम्बनमेव तदिति परमार्थः । न चैवं भ्रान्तत्वम् । विपरीतानवगाहनात् । तथापि ज्ञेयनिवृत्तौ कथं ज्ञानाऽनुवृत्तिः,तदनुवृत्तौ वा कथं ज्ञेयनिवृत्तिरितिचेत् । किमस्मिन्ननुपपन्नम् । न हि ज्ञानमर्थश्चेत्येकं तत्त्वमेकायुष्कं वेति ॥

सत्यपि वा क्षणिकत्वे कथमप्रत्यक्षम् ? । इत्थं, यथोच्यते । न स्वप्रकाशं, वस्तुत्वादितरवस्तुवत् । न च ज्ञानान्तरग्राह्यं, ज्ञानयौगपद्यनिषेधेन समानकालस्य तस्याभावात् । ग्राहककाले ग्राह्यस्यातीतत्वेन वर्त्तमानाभत्वानुपपत्तेः । ग्राह्यकाले च ग्राहकस्यानागतत्वादितिचेत् । नन्वेवं ज्ञातताऽपि न प्रत्यक्षा स्यात्, क्षणिकत्वात् । कथम् ? । इत्थम् । न स्वप्रकाशा । वस्तुत्वात् । न जनकग्राह्या, अनागतत्वात् । विरम्य व्यापारायोगाच्च । न समसमयज्ञानग्राह्या, ज्ञानजनकेन्द्रियसम्बन्धाननुभवात् । न च तदुत्तरज्ञानग्राह्या, तदानीमतीतत्वादिति । क्षणिकत्वमेव तस्याः कुत इतिचेत् । त्वदुक्तयुक्तेरेव ॥

तथाहि । यं क्षणमाश्रित्य जाता ततः परमपि त-मेवाश्रयतेऽन्यं वा, न वा कमपीति । तत्र न प्रथमः । तस्य तदानीमसत्त्वात् । न द्वितीयः । अप्रतिसंक्रमात् । एकक्षणावगाहिनि च ज्ञाने तदन्यक्षणाऽऽश्रयज्ञाततफलत्वेन भ्रान्तत्वप्रसङ्गात् । रजताऽवगाहिनि पुरोवर्त्तिवृत्तिज्ञाततफल इव । न चान्यमपि क्षणं ज्ञानमवगाहते, तदानीं तस्यासत्त्वात् । न तृतीयः । निःस्वभावताप्रसङ्गात् । न ह्यसौ तदानीं तदीयाऽन्यदीया वेति । अतीतेनापि तेनैव क्षणेनोपलक्षिताऽनुवर्त्तते इतिचेत् । एवं तर्हि वर्त्तमानार्थता प्रकाशस्य न स्यात् । अन्यथा ज्ञानस्यापि तथानुवृत्तेः को दोषः । न हि वर्त्तमानार्थप्रकाशसम्बन्धमन्तरेण ज्ञानस्यान्या वर्त्तमानावभासना नाम । अर्थनिरपेक्षप्रकाशनानुवृत्तिमात्रेण तथात्वे भूतभाविविषयस्यापि ज्ञानस्य तथाभावप्रसङ्गात् । अथ मा भूदयं दोष इति स्थूल एव वर्त्तमानः प्रकाशेनाश्रीयते इत्यभ्युपगमः, तदा तज्ज्ञानस्यापि स एव विषय इति तस्यापि न क्षणिकत्वमिति ॥

एतेनेति॥कालान्यथापदेशेनेत्यर्थः॥ तदानैकान्तिकमिति॥इच्छादावित्यर्थः । यादृशं, वर्त्तमानक्षणावच्छिन्नम्॥ अन्यादृशं द्वितीयक्षणावच्छिन्नम्॥ तस्येति॥ द्वितीये क्षणे इत्यनुषज्यते॥ वर्त्तमानाभत्वादिति॥ वर्त्तमानविषयत्वादित्यर्थः॥विरम्येति॥ ज्ञानं हि यं विषयीकृत्य उत्पन्नं, न तंजहाति, नान्यं वा विषयीकरोतीति ज्ञानस्वभावादित्यर्थः। न च प्रथमत एव तद्विषयीकरणे हेतुरस्ति, भावित्वेनार्थस्य तदानीमवर्त्तमानत्वादित्याह॥प्रथमतोऽपीति॥ द्वितीयक्षणे पूर्वक्षणविषयीभूतस्यार्थस्य वर्त्तमानता भासते, तथाच तत्क्षणनाशेऽपि तथाविधमर्थं

विषयीकुर्वज्ज्ञानमभ्रान्तमेवोत्तरक्षणेऽवतिष्ठते इति नोक्तदोष इत्याह ॥ तत्रेति ॥ किमस्मिन्निति ॥ ज्ञानार्थयोर्यौगपद्ये इत्यर्थः ॥ स्वप्रकाशमिति ॥ स्वप्रकाशत्वाप्रसिद्धावपि इदं घटज्ञानं नैतस्य विषयो ज्ञानत्वादित्यर्थः ॥ ग्राहकेति ॥ ग्राहकज्ञानकाले ग्राह्यं ज्ञानं नास्ति, ग्राह्यज्ञानकाले च तद्ग्राहकं ज्ञानमनागतमित्यर्थ । ज्ञातताजनकं यज्ज्ञानं तदेव न तद्ग्राहकं, तत्काले ज्ञाततायाः अनागतत्वेन वर्त्तमानत्वाभावादित्याह ॥ न जनकेति ॥ ननु ज्ञातताजनकमेव ज्ञानं ज्ञाततां जनयित्वा तां ग्रहीष्यतीत्यत आह॥विरम्येति॥ ज्ञानजनकेति ॥ ज्ञातताममकालोत्पन्नज्ञानेन न तद्ग्रहः, ज्ञातताजननोत्तरकाले तदिन्द्रियसम्बन्धस्य प्राप्त्या तत्समकालं तदभावादित्यर्थः ॥ अनुभवेति ॥ भू प्राप्तावित्येतस्य रूपम् ॥ अप्रतिसंक्रमादाश्रयान्तरागमनादित्यर्थः ॥ एकक्षणेति ॥ अन्यविषयकज्ञानेनान्यत्र ज्ञातताजनने जनकज्ञानं भ्रमः स्यादित्यर्थः।ननु क्षणान्तरमपि ज्ञातताजनकज्ञानस्य स्वतन्त्रो विषय इति न तद्भ्रम इत्यत आह ॥ न चेति॥ पूर्वक्षणे तदुत्तरक्षणस्यावर्त्तमानत्वादित्यर्थः॥ एवं तर्हीति॥विषयवर्त्तमानतया ज्ञानस्य वर्त्तमानाऽर्थता,सा च ज्ञानस्यातीतक्षणोपलक्षितविषयतायां न स्यादित्यर्थः॥ तथेति॥ अतीतेनापि क्षणेनोपलक्षितस्य वर्त्तमानार्थतयाऽनुवृत्तेरित्यर्थः । ननु ज्ञाततापक्षे अर्थनिरपेक्षवर्त्तमानज्ञाततासम्बन्धमात्रेणैव तज्जनकज्ञानस्य वर्त्तमानाभताऽर्थान्ययेऽप्युपपद्यते । त्वन्मयेऽर्थस्यातीतत्वाज्ज्ञाततायाश्चाभावात् सा नोपपद्येतेत्यत आह ॥ न हीति ॥ विषयवर्त्तमानतया वर्त्तमानाभता ज्ञानस्य न स्ववर्त्तमानतया । ज्ञाततायाश्च क्षणिकत्वेन तज्ज्ञानकाले नाशात्तदर्थविषयवर्त्तमानता । तथात्वे वा अतीतादिविषयकमपि ज्ञानं वर्त्तमानाभं स्यात् । एवञ्चाग्रिमक्षणे अतीतज्ञातताविषयकं ज्ञानं न वर्त्तमानाभं स्यादित्यर्थः ॥

ननु यदि ज्ञानं मानसं स्यात्तदा विषयान्तरग्रहो न स्यात्, संयुक्तसमवायरूपाया मनःप्रत्यासत्तेः सदा सत्त्वेन ज्ञानपरम्पराया एव ज्ञेयत्वादित्याह—

**ननु ज्ञानमैन्द्रियकं चेद् विषयसञ्चारो न स्यात् । संज्ञानसम्बन्धत्वात् । न च जिज्ञासानियमान्नियमः । तस्याः संशयपूर्वकत्वात् । तस्य च धर्मिज्ञानपूर्वकत्वा-**

त्। धर्मिणश्च सन्निधिमात्रेण ज्ञाने जिज्ञासाऽपेक्षणे वा उभयथाऽप्यनवस्थानादिति। तन्न। ज्ञाततापक्षेऽपि तुल्यत्वात् तस्या अपि हि ज्ञेयत्वे तत्परम्पराज्ञानापाताज्जिज्ञासानियमस्य च तद्वदनुपपत्तेः। नच इन्द्रियसम्बन्धविच्छेदाद्विरामइतियुक्तम्। आत्मप्राकट्याव्यापनात्। स्वभावत एव काचिदसावजिज्ञासिताऽपि ज्ञायते, न तु सर्वेति चेत्तुल्यम्। प्रागुत्पन्नज्ञातताम्मरणजनितजिज्ञासः समुन्मीलितनयनः सज्ञानज्ञानसमुत्पादितप्राकट्यं जिज्ञासुरेव प्रतिपद्यते इत्यतो नानवस्थेतिचेत्। तुल्यमेतत्॥

ननु ज्ञानं न सविकल्पकग्राह्यं, तस्य निर्विकल्पकपूर्वकत्वाद् निर्विकल्पकगृहीतस्य तावत्कालानवस्थानात् तस्य तेनैव विनाशात्। नापि केवलनिर्विकल्पकवेद्यम्। तस्य सविकल्पकोन्नेयत्वेन तदभावे प्रमाणाभावात्। न च समवायाभाववन्निर्विकल्पकनिरपेक्षसविकल्पकगोचरत्वं ज्ञानस्येति साम्प्रतम्। तयोर्विशेषणांशस्य प्राग्ग्रहणादनुमानादिवत्तदुपपत्तेः। प्रकृते तु ज्ञानत्वादेरनुपलब्धेरगृहीतविशेषणायाश्च बुद्धेर्विशेष्यानुपसंक्रमात् कथमेवं स्यात्। न। उत्पन्नमात्रस्यैव बाह्यविषयज्ञानस्यालोचनात्। ततस्तत्पुरःसरं प्रथमत एव तज्जातीयस्य ज्ञानान्तरस्य विकल्पनात्। इन्द्रियसन्निकर्षस्य तदैव विशेषणग्रहणलक्षणसहकारिसम्पत्तेः। व्यक्त्यन्तरसमवेतमपि हि सामान्यं गृहीतं तदेवेत्युपयुज्यते। अन्यथा अनुमानादिविकल्पानामनुत्पादप्रसङ्गः। तद्गतस्य विशेषणस्या-

ऽग्रहणाद्, अन्यगतस्य चानुपयोगात्, किं लिङ्गग्रहण-सहकारि स्यादिति । एतेन शब्दादिप्रत्यक्षं व्याख्यातमिति ॥

स्यादेतत् । विषयनिरूप्यं हि ज्ञानमिष्यते । न चातीन्द्रियस्य परमाण्वादेर्मनसा वेदनमस्ति । न चाऽगृहीतस्य विशेषणत्वम् । न च नित्यपरोक्षस्यापरोक्ष-विशिष्टबुद्धिविषयत्वं व्याघातादिति । न । बाह्येन्द्रिय-ग्राह्यस्याग्राह्यस्य वा पूर्वज्ञानोपनीतस्यैव मनसा वेदनात् । अन्यथाऽतीन्द्रियस्मरणस्याप्यनुत्पत्तिप्रसङ्गात् । इयांस्तु विशेषः । तस्मिन् सति तद्बलादेव, असति तु तज्जनितवासनाबलात् । न चैवं सति स्मरणमेतत् । अगृहीतज्ञानगोचरत्वात् । न च विषयांशे तत्तथा स्यादिति युक्तम् । अवच्छेदकतया प्रागवस्थावदवभासनात् । न च प्रत्यभिज्ञानमपि ग्रहणस्मरणाकारम् । विरोधात् । अथ ग्रहणस्मरणयोः कियती सामग्री ? । अधिकोऽर्थसन्निकर्षो ग्रहणस्य, संस्कार-मात्रं सन्निकर्षः स्मरणस्य ॥

नन्विति ॥ ननु ज्ञानं योग्यं मनःप्रत्यासन्नमपि जिज्ञासाज्ञेयमिति तन्नियमाभावोक्तदोष इत्यत आह ॥ न चेति ॥ सामान्यतो ज्ञाते विशेषतश्चाज्ञाते जिज्ञासा जायते इति सामान्यतो ज्ञानानुभवो वाच्यः । तस्यापि यदि जिज्ञासानैरपेक्ष्येण सन्निकर्षमात्राद् ग्रहः, तदाऽस्य सदातनत्वाद् ग्रहणपरम्पराया अविच्छेदादनवस्था । अथ तद्ग्रहेऽपि सा नियामिका, तदा तस्या अपि सामान्यतो ज्ञानार्थं जिज्ञासा वाच्या । साऽपि सामान्यज्ञानपूर्विका, तदपि जिज्ञासाऽधीनजन्मेति पूर्वपूर्वज्ञानापेक्षायामनवस्थेत्युभयथानवस्थार्थः । अत्र किञ्चिज्ज्ञानमजिज्ञासितं ज्ञायते, किञ्चिज्जिज्ञासितं, किञ्चिन्न ज्ञायत एवेत्यनियमाभावोक्तदोष

इत्यभिप्रेत्य समाधातुं प्रतिबन्दिमुखेनाह ॥ ज्ञाततापक्षेऽपीति ॥ ननु चक्षुरादिना सम्बन्धविच्छेदाज्ज्ञातताग्रहविच्छेदः स्यादित्यत आह ॥ न चेति ॥ बाह्ये तथा सम्भवेऽप्यात्मज्ञाततायां मनःसम्बन्धविच्छेदो न सम्भवतीत्यर्थः ॥ तुल्यमिति ॥ ज्ञानमपि किञ्चिदुद्भवत्वाभावात्तद्ग्राहकात्ममनःसंयोगविशेषाभावाद्वा न ज्ञायते इत्यर्थः । पूर्वोत्पन्नज्ञाततायाः सामान्यतोग्रहादिदानीन्तन्यपि ज्ञातता ज्ञातैवेति तत्संस्काराधीनज्ञातता सामान्यजिज्ञासायामिन्द्रियसन्निकर्षादिदानीन्तनी ज्ञातता ज्ञायते इत्येवमनवस्थापरीहारो ज्ञानप्रत्यक्षत्वेऽपि तुल्य इति शङ्कोत्तराभ्यामाह ॥ प्रागिति ॥ तावत्कालेति ॥ घटज्ञानस्य तन्निर्विकल्पकाज्ज्ञानत्वविशिष्टज्ञानकाल एव नाशाद् विशेष्यनाशे सति तद्विशेष्यकज्ञानत्वविशिष्टज्ञानानुत्पादः स्यात् । प्रत्यक्षविशिष्टज्ञानस्य स्वसमानकालीनविशेष्यकत्वनियमादित्यर्थः ॥ तस्येति ॥ निर्विकल्पकस्यातीन्द्रियत्वाभ्युपगमेन सविकल्पकैकोन्नेयतया तदभावे तत्र मानान्तराभावादित्यर्थः ॥ समवायेति ॥ समवायवदभावश्चेत्यर्थः ॥ तयोरिति ॥ समवायाभावयोर्विशेषणयोः सम्बन्धिप्रतियोगिनोर्ज्ञानानन्तरमेव ज्ञानाद्विशिष्टज्ञानसामग्रीनियमेन तथात्वेऽपि ज्ञाने ज्ञानत्वरूपविशेषणस्य पूर्वमज्ञानात् कथं तद्विशिष्टज्ञानमित्यर्थः। तथाच जानामीति वर्त्तमानज्ञानवैशिष्ट्यज्ञानमात्मनि न जायेतेति भावः । अत्र किञ्चिज्ज्ञानं निर्विकल्पकैकवेद्यं किञ्चिन्नावेद्यमेवेत्यऽनियम इति नोक्तदोष इत्याभिप्रेत्याह॥उत्पन्नेति॥व्यवसायनाशक्षणोत्पन्नज्ञानान्तरे ज्ञानत्वविशिष्टज्ञानं प्रथमत एव जायते । व्यवसायनिष्ठविशेषणस्य ज्ञानत्वस्य निर्विकल्पकेन विषयीकृततया सम्भूतसामग्रीकत्वात् । तन्निष्ठतया विशेषणज्ञानस्य गौरवेणाप्रयोजकत्वात् । नन्वन्यव्यक्तिसमवेतत्वेन विशेषणज्ञानं न विशिष्टज्ञानजनकं, घटान्तरवृत्तित्वेन गुणक्रियादीनां विशेषणानां ज्ञानेऽपि घटान्तरे तद्विशिष्टज्ञानानुत्पादात्। ग्राह्यव्यक्तिवृत्तितया च तस्य प्रकृतेऽसम्भवात् । तदुत्पादानन्तरं ग्राह्यज्ञानव्यक्तिनाशात् प्रत्यक्षानुपपत्तेरित्यत आह ॥ व्यक्त्यन्तरेति ॥ व्यक्त्यन्तरवृत्तित्वेनापि ज्ञानत्वस्य ज्ञानं तज्जातीयव्यक्त्यन्तरेषु विशिष्टज्ञानं जनयति, विशेषणस्य ज्ञानत्वस्याभेदात् । यथा पर्वतोऽग्निमानित्यनुमितिमन्यव्यक्तिनिष्ठतया वह्निमत्त्वस्य विशेषणस्य ज्ञानं जनयति । वह्नेर्भेदेऽपि वह्निमत्त्वस्य

उपाधेर्विशेषणस्याभेदात् । अन्यथा अनुमित्युच्छेद इत्यर्थः ॥

ननु ज्ञानान्तरस्य निर्विकल्पकाविषयस्य सविकल्पकवेद्यस्योत्पत्तौ हेत्वभावः। अनुमिनोमीत्यनुव्यवसाये तदसम्भवश्च । सामग्र्यऽभावात् । उच्यते । आत्ममनःसंयोगस्य ज्ञानात्मसमवायस्य च पूर्वसिद्धत्वेनोत्पन्नं ज्ञानं मनसा सम्बद्धञ्चेत्येकः कालः । ततो ज्ञानत्वनिर्विकल्पकस्योत्पादो ग्राह्यज्ञानस्य विनश्यत्ता सविकल्पकस्योत्पद्यमानतेत्येकः कालः । ततः सविकल्पकस्योत्पादो ग्राह्यज्ञानस्य विनाशो निर्विकल्पकस्य विनश्यत्तेत्येकः काल इत्येवमसमानकालत्वेन विशेष्यस्य ज्ञानस्य नाशक्षण एव ज्ञाने ज्ञानत्वविशिष्टज्ञानम । विशेष्यस्य ज्ञानस्य विशिष्टज्ञानाव्यवहितपूर्ववर्त्तितया कारणत्वाविरोधात् । प्रत्यक्षस्य सम्बद्धवर्त्तमानार्थजन्यत्वेऽपि स्वसमानकालतया विशेष्यस्याऽहेतुत्वात् । गौरवात् । यथा द्वे द्रव्ये इत्यत्र यथार्थविशिष्टज्ञानं द्वित्वनाशकालेऽपि, अव्यवहिपूर्वकालवर्त्तितया द्वित्वस्य विशेषणस्य विशिष्टज्ञानहेतोर्ज्ञानात् । विशिष्टज्ञानं जानामीति च वर्त्तमानत्वेन स्थूलकालोपाधिर्भासते, न तु क्षणः, तस्यातीन्द्रियत्वात् । यद्वा, ज्ञानं ज्ञानत्वञ्च निर्विकल्पके भासते । ततो ज्ञानत्ववैशिष्ट्यं ज्ञाने, ज्ञानवैशिष्ट्यञ्चात्मनि भासते । विशेष्ये विशेषणं विशेषणे विशेषणान्तरं भासते इत्येव विशिष्टवैशिष्ट्यार्थः । वस्तुतो ज्ञानस्य विषयनिरूप्यतया समवायाभावयोरिव विशिष्टज्ञानसामग्रीसत्त्वाद् निर्विकल्पकं नास्त्येव । ज्ञाने विषयस्य विशेषणत्वात् तद्भानंनैयत्येन सविकल्पकस्यैव सम्भूतसामग्रीकत्वात् । तथाच तदेव ज्ञानं ज्ञानत्वांशे निर्विकल्पकं, विषयांशे सविकल्पकमित्युभयरूपमेव । अंशभेदेनाविरोधात् । अनुमिनोमीत्यादौ तु न तथा । अनुव्यवसाये अनुमितित्वाभावात् । ग्रन्थस्तु ज्ञानान्तरस्य सामग्रीसत्त्वाद् यत्र सम्भवस्तत्परतया नेयः ॥

एतेनेति॥एकगकारादिनिष्ठतया गत्वादिनिर्विकल्पकेन गत्वादिविशिष्टज्ञानकाले एकगादिव्यक्तेर्नाशेऽपि गादिव्यक्त्यन्तरे गत्वादिविशिष्टज्ञानमित्यर्थः । ननु ज्ञानस्य विषयावच्छिन्नस्यैव मानसप्रत्यक्षत्वादतीन्द्रियार्थविषयज्ञानस्य न मानसत्वं, परमाण्वादेरतीन्द्रियत्वात् । अतस्तद्दृष्टान्तेनेतरज्ञानस्याप्यमानसत्वमनुमेयम् । न चाप्रयोजकत्वम् । बाह्येन सह मनसः सन्निकर्षाभावलक्षणप्रति-

कूलतर्कस्य विपक्षबाधकत्वादिति शङ्कते ॥ स्यादेतदिति ॥ ज्ञानोपनीतविषयेणसंयुक्तसमवेतविशेषणताऽऽत्मकज्ञानरूपमनःप्रत्यासत्त्या मनसैव प्रत्यक्षाऽप्रत्यक्षविषयग्रहः । न चाऽतीन्द्रियत्वव्याघातः । योगजधर्माजन्य-जन्यस्वविषयकसविकल्पकाजन्यजन्यप्रत्यक्षाऽविषयस्यातीन्द्रियत्वादिति परिहरति ॥ बाह्येति ॥ यदि च ज्ञानसंस्काराद्यपेक्षमपि मनो नातीन्द्रियार्थग्राहकं ततस्तत्करणिका स्मृतिरतीन्द्रिये न स्यादित्याह ॥ अन्यथेति ॥ ननु यदि ज्ञानादनुव्यवसायः स्मरणञ्च स्यात्, तदाऽनुव्यवसायः साक्षात्कारी, न तु स्मरणमिति कुतो नियम इत्यत आह ॥ इयांस्त्विति ॥ तस्मिन्निति ॥ ज्ञाने विद्यमाने तद्रूपप्रत्यासत्तेस्तदनुव्यवसायः साक्षात्कारी, ज्ञाने त्वऽसति संस्काररूपप्रत्यासत्तेस्तदन्यप्रत्यासत्त्यभावाच्च स्मरणं परोक्षमेवेत्यर्थः । तथाप्यनुव्यवसायो व्यवसायगृहीतगोचरत्वेन गृहीतग्राहित्वात् स्मृतिः स्यादित्यत आह ॥ न चैवमिति ॥ अगृहीतेति ॥ ज्ञानस्य व्यवसायाविषयस्यैवानुव्यवसायविषयत्वादित्यर्थः । अर्थांशे गृहीतग्राहित्वेऽपि न घटस्य विशेष्यता, किन्तु ज्ञाने विशेषणता तत्तावदित्याह ॥ अवच्छेदकनयेति ॥ यथा प्रागवस्थास्मरणसहकारिणा चक्षुषा जनिते प्रत्यभिज्ञाने प्रागवस्थायाःसंयुक्तविशेषणतया स्फुरणं, न स्मरणं, तथा व्यवसायसहकारिणा मनसा जनितेऽनुव्यवसाये संयुक्तसमवेतविशेषणतया विषयस्फुरणेऽपि न तस्य स्मरणत्वमित्यर्थः । ननु प्रत्यभिज्ञानमपि तत्तांशे स्मरणमेव, इदन्त्वांशे त्वनुभव इत्यत आह ॥ न चेति ॥ स्मृतित्वानुभूतित्वजात्योर्व्याप्यवृत्तित्वेनांशावृत्तेरित्यर्थः ॥ अथेति ॥ संस्कारजन्त्वाविशेषात् प्रत्यभिज्ञानमनुभवो, न स्मृतिरिति कुतो नियम इत्यर्थः ॥ अधिक इति ॥ संस्कारातिरिक्तायाः संयुक्तविशेषणतायाः प्रत्यासत्तेः प्रत्यभिज्ञाने सत्त्वादित्यर्थः ॥

अथ संस्कारजन्यत्वेन स्मृतिवत् प्रत्यभिज्ञानं परोक्षमेव कुतो नेत्याशयेन पृच्छति—

**अथ ग्रहणत्वेऽपि कुत एतदपरोक्षाकारम् ? कारणान्तरनिरपेक्षेण संस्काराऽधिकसन्निकर्षवतेन्द्रियेण**

जनितत्वात् ॥ अथ कः सन्निकर्षः ? ज्ञानेन संयुक्त-समवायः, तदर्थेन संयुक्तसमवेतविशेषणत्वमिति । मनसो निरपेक्षस्य बहिर्व्यापारेऽन्धबधिराद्यभावप्रसङ्ग इति चेत् । ज्ञानावच्छेदकं प्रति नाऽयं दोषः । न च ज्ञानापेक्षया बहिरित्यस्ति । नाऽपि तद्विषयापेक्षया निरपेक्षत्वं, तस्यैव ज्ञानस्यापेक्षणात् । अथाऽपि ज्ञानं प्रत्यक्षमित्यत्र किं प्रमाणम् ? । प्रत्यक्षमेव । यदसूत्रयत्– 'ज्ञानविकल्पानां भावाभावसंवेदनादध्यात्मम्' ( न्याय० ५. १. ३१. ) इति ॥

ननु नेश्वरज्ञानं प्रमा, नित्यत्वेनाफलत्वात् । नाऽपि प्रमाणम् । अकारकत्वात् । अत एव च न तदाश्रयः प्रमातेति । उच्यते—

मितिः सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता ॥
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥ ५ ॥

समीचीनो ह्यनुभवः प्रमेति व्यवस्थितम् । तथाच अनित्यत्वेन विशेषणमनर्थकम् । नित्यानुभवासिद्धौ तद्व्यवच्छेदस्यानिष्टत्वादसिद्धौ च व्यवच्छेद्याभावात् । नचेदमनुमानम्, आश्रयासिद्धिबाधयोरन्यतराक्रान्तत्वात् । न तत्प्रमाकरणमिति त्विष्यत एव, प्रमया सम्बन्धाभावात् । तदाश्रयस्य तु प्रमातृत्वमेतदेव; यत् तत्समवायः । कारकत्वे सतीति तु विशेषणं पूर्ववन्निरर्थकमनुसन्धेयम् । यद्येवम् । 'आप्तप्रामाण्याद्' (न्याय० २.२.६७.) इति सूत्रविरोधः । तेन हीश्वरस्य प्रामाण्यं प्रतिपाद्यते, न तु प्रमातृत्वमितिचेन्न । निमित्तसमावेशेन व्यवहारसमावेशाविरोधात् । प्रमासम-

वायो हि प्रमातृव्यवहारनिमित्तं, प्रमया त्वयोगव्यवच्छेदेन सम्बन्धः प्रमाणव्यवहारनिमित्तं, तदुभयञ्चेश्वरे। अत्रापि कार्ययेति विशेषणं पूर्ववदनर्थकमूहनीयम् ॥

स्यादेतत्। प्रमीयतेऽनेनेति प्रमाणं, प्रमिणोतीति प्रमातेति कारकशब्दत्वमनयोः। तथाच कथमकारकमर्थे इतिचेत्। न। एतस्य व्युत्पत्तिमात्रनिमित्तत्वात्। प्रवृत्तिनिमित्तन्तु यथोपदर्शितमेव व्यवस्थापनात्। अन्यथा अस्मदादिषु न प्रमातृव्यवहारः स्यात्। सर्वत्र स्वातन्त्र्याभावात्। करणव्यवहारस्त्वन्यत्र यद्यप्यन्यनिमित्तकोऽपि, तथापीहोक्तनिमित्तविवक्षयैवेति। एवन्तर्हि पञ्चमप्रमाणाभ्युपगमेऽपसिद्धान्तः। न हि तत् प्रत्यक्षमनुमानमागमो वा, अनिन्द्रियलिङ्गशब्दकरणत्वात्। न। साक्षात्कारिप्रमावत्तया प्रत्यक्षान्तर्भावाद् इन्द्रियार्थसन्निकर्षोत्पन्नत्वस्य च लौकिकमात्रविषयत्वात् ॥

अथेति ॥ उत्तरं, कारणान्तरेणेति ॥ लिङ्गाद्यनपेक्षेणेत्यर्थः। न च विनिगमनाभावः। प्रत्यभिज्ञाने अनुभवामीत्यनुव्यवसायसाक्षिकत्वादनुभवत्वस्येति भावः। वस्तुतस्तत्तास्मृतिजन्यमेव प्रत्यभिज्ञानं, न संस्कारजन्यम। अन्यथा संस्कारद्वारा पूर्वानुभवस्य तत्करणतया ज्ञानकरणतया तस्य परोक्षत्वापत्तिः। तत्तास्मृतेश्च निर्व्यापारत्वेनाऽकरणत्वादिति तत्त्वम ॥

ज्ञानेति ॥ इन्द्रियादिजनितव्यवसायापेक्षस्य मनसो बहिःप्रवृत्तेर्न स्वातन्त्र्येणेति नोक्तदोष इत्यर्थः। समाधानान्तरमाह ॥ न चेति ॥ साधकबाधकाभावात् संशयः स्यादित्याशयेन पृच्छति ॥ अथेति ॥ उत्तर, प्रत्यक्षमेवेति ॥ जानामीति मानसप्रत्यक्षमेव ज्ञानप्रत्यक्षत्वे

माननित्यर्थः । तत्र सूत्रकारसम्मतिमाह ॥ यदिति ॥ ज्ञानविकल्पानां ज्ञानभेदानां प्रत्यक्षादीनां भावाभावौ, अस्ति मे प्रत्यक्षं ज्ञानं, नास्ति मे प्रत्यक्षं ज्ञानमित्याकारेणात्मना मनसा संवेद्येते इत्यर्थः।न्यायरुचि प्रति आशुविनाश्यात्मविशेषगुणत्वेन सुखवत् प्रत्यक्षत्वनुमेयमिति भावः ॥

नित्यत्वेनेति ॥ नित्यत्वेन फलानात्मकत्वादित्यर्थः । प्रमायाश्च क्रियात्वेन जन्यत्वादिति भावः ॥ नापीति ॥ निर्व्यापारत्वेनाकारक-तया तद्विशेषकरणत्वस्याभाव इत्यर्थः ॥ अत एवेति ॥ समवायि-कारणस्य प्रमातृत्वादित्यर्थः ॥ अनित्यत्वेनेति ॥ यथार्थानुभवत्वमेव प्रमात्वं नित्यानित्यसाधारणम् । न च क्रियात्वविरोधः, धात्वर्थ-मात्रस्यैव नित्यानित्यसाधारणस्य सत्तादेरिव क्रियात्वात् । अनित्य-त्वेन तद्विशेषणस्य गौरवेण व्यर्थत्वादित्यर्थः । दूषणान्तरमाह ॥ नित्येति ॥ न चेश्वरज्ञानं न प्रमा फलानात्मकत्वाद् गगनवदित्यनु-मानमपि सम्भवतीत्याह ॥ न चेदमिति ॥ नापि प्रमाणमित्यत्र सिद्ध-साधनत्वमेवेत्याह ॥न तत्प्रमाकरणमिति॥ स्वप्रमां प्रति तस्याकरण-त्वमिष्यत एवेत्यर्थः । अस्मदादिप्रमां प्रति तु तत्करणत्वं वर्त्तत एव । तस्य सव्यापारत्वादिति भावः ॥ तदाश्रयस्येति ॥ प्रमासम-वायित्वस्यैव प्रमातृत्वात् तत्र तत्कारणान्तर्भावस्य व्यर्थत्वादित्य-ऽर्थः ॥ पूर्ववदिति ॥ सिद्धासिद्ध्योरुभयोरपि व्यावर्त्याभावादित्यर्थः । यदीश्वरस्य न प्रमाणत्वमिष्यते, तदा न्यायसूत्रप्रतिपादिततत्प्रमाण-त्वविरोध इत्याह ॥ यद्येवमिति ॥ प्रमया त्विति ॥ चक्षुरादीनामपि चरमसहकारिक्षणे प्रमया अयोगव्यवच्छेदेन सम्बन्धस्य विद्यमान-त्वादित्यर्थः ॥ पूर्ववदिति ॥ सिद्धासिद्ध्योरुभयोरपि व्यावर्त्याप्रसिद्धे-रित्यर्थः ॥ सर्वत्रेति ॥ यदि प्रमाकर्तृत्वेन प्रमातृत्वं, तदा अस्मदादी-नामपि तदभावात् प्रमातृव्यवहारो न भवेत् । तदनुकूलप्रयत्नवत्त्वं हि स्वातन्त्र्यम् । तत्कर्तृत्वं सर्वप्रमायामस्मदादीनामपि नास्ति । अस्मदादिप्रयत्नं विनाऽप्यस्मदादिप्रमोत्पत्तेरित्यर्थः ॥अन्यत्रेति॥लोक इत्यर्थः ॥ अन्यनिमित्तकोऽपीति ॥ अयोगव्यवच्छेदेन जनकत्वनि-मित्तकोऽपीत्यर्थः । कारकविशेषवाचकः प्रमाणशब्द ईश्वरे नवर्त्तते, किन्त्वन्यथेति भावः ॥ साक्षात्कारीति ॥ साक्षात्कारिप्रमया त्वयोग-व्यवच्छेदेन सम्बन्धस्य सम्भवेन प्रत्यक्षप्रमाणान्तर्भावाभोक्तदोष इत्यर्थः । साक्षात्कारित्वं त्वीश्वरप्रमाया धर्मिग्राहकमानसिद्धमित्य-

ऽर्थः। यथाश्रुतं सूत्रन्तु लौकिकप्रत्यक्षविषयमित्याह॥ इन्द्रियार्थेति॥

नन्वीश्वरस्य सर्वज्ञत्वेन सविषयभ्रमज्ञतावीश्वरोऽपि भ्रान्तः स्यात्। भ्रमस्येव तस्या अपि भ्रमविषयविषयकत्वादित्याह—

**स्यादेतत्। तथापीश्वरज्ञानं न प्रमा, विपर्ययत्वात्। यदा खल्वेतदस्मदादिविभ्रमानालम्बते, तदैतस्य विषयमस्पृशतो न ज्ञानावगाहनसम्भव इति तदर्थोऽप्यालम्बनमभ्युपेयम्। तथाच तदपि विपर्ययः। विपरीतार्थालम्बनत्वात्। तदनवगाहने वा अस्मदादेर्विभ्रमानविदुषस्तदुपशमायोपदेशानाप्तमसर्वज्ञपूर्वकत्वमिति। न। विभ्रमस्याप्रामाण्येऽपि तद्विषयस्य तत्त्वमुल्लिखतोऽभ्रान्तत्वात्। अन्यथा भ्रान्तिसमुच्छेदप्रसङ्गः। प्रमाणाभावात्। तथाप्यारोपितार्थावच्छिन्नज्ञानालम्बनत्वेन कथं न भ्रान्तत्वमितिचेत्। न। यद् यत्र नास्ति तत्र तस्यावगतिरिति भ्रान्त्यर्थत्वात्। एतदालम्बनस्य चैवमुल्लिखतः सर्वत्र यथार्थत्वात्। न हि न तद्रजतं, नाऽपि तत्रासत्, नाऽपि तत्रावगतमिति॥**

**साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ**
**भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः॥**
**लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः**
**शङ्कोन्मेषकलङ्किभिःकिमपरैस्तन्मेप्रमाणंशिवः॥ ६॥**

**इति चतुर्थः स्तबकः॥ ४॥**

तथापीति॥ शुक्तौ रजतत्वप्रकारकज्ञानवानिति ज्ञानं न भ्रमः, भ्रान्तस्य तथात्वात्। शुक्ताविदं रजतमिति ज्ञाने रजतत्वं प्रकारः। तेन तद्भ्रमः। ईश्वरज्ञाने तु रजतत्वप्रकारकत्वं प्रकार इति न भ्रम-

त्वम् । अत एवास्मदादिरपि भ्रान्तिज्ञो न भ्रान्त इत्याह ॥ वि-भ्रमस्येति ॥ प्रमाणाभावादिति ॥ भ्रमत्वग्राहकज्ञानस्य भ्रमविषय-मुल्लिखतो भ्रमस्यैवायथार्थत्वादित्यर्थः । भ्रमविषयविषयकत्वेन न भ्रमत्वं, किन्तु यद्यत्र नास्ति तत्र तज्ज्ञानत्वेन । तथाच शुक्ताविदं रजतमिति ज्ञानं रजतत्वाभाववति रजतत्वविषयमिति भ्रमः । तदनु-व्यवसायश्च यत्र रजतज्ञाने रजतत्वप्रकारकत्वमस्ति, तत्र तदुल्लिखन् न भ्रमो विषयाबाधादित्याह ॥ यद् यत्रेति ॥ तदेव स्पष्टयति ॥ न हीति ॥ एतेन यद् यत्रास्ति, तत्र तज्ज्ञानं प्रमेत्यपि निरुक्तम् ॥

स्तबकार्थं शिवस्तुतिव्याजेन सङ्कलयति ॥ साक्षात्कारिणीति॥ भूतार्थानुभवे यथार्थानुभवे ॥ साक्षात्कारिणि प्रत्यक्षे ॥ निविष्टो वि-षयीभूतो निखिलः समस्तः प्रस्ताविवस्तूनां नानापदार्थानां क्रमो यस्य, स तथा । अनुभवविषयसकलविश्व इत्यर्थः ॥ नित्ययोगिनि सदा सम्बद्धे । अत एव इन्द्रियादीनां द्वाराणामनपेक्षा स्थितिर्यस्य । लेशा अल्पा या अदृष्टिर्विशेषादर्शनं, तन्निमित्ता या दुष्टिः रागद्वेषा-ऽऽत्मिका, तद्विगमेन प्रभ्रष्टः शङ्कानुषो वेदप्रामाण्यशङ्कालेशो यस्मा-दित्यर्थः । यद्वा,भूतार्थोऽनुभवो यस्य,तादृशि साक्षात्कारवति शिवे । निविष्टेत्यादि पूर्ववत् । स शिवः प्रमाणं, नाप्रमाणमिति कण्ठतः परमतनिरासः । प्रमाणं साक्षी शरण्यमिति ध्वनितम् । दुष्टमिति क-चित् पाठः । तत्र भावे क्तः ॥

इति श्रीमहामहोपाध्यायश्रीवर्द्धमानविरचिते कुसुमाञ्जलि-प्रकाशे चतुर्थः स्तबकः ॥ ४ ॥

## सप्रकाशे न्यायकुसुमाञ्जलौ

### पञ्चमः स्तबकः ॥ ५ ॥

तत्साधकप्रमाणाभावादिति पञ्चमीं विप्रतिपत्तिं निराकर्त्तुमुपन्यस्यति—

**नन्वीश्वरे प्रमाणोपपत्तौ सत्यां सर्वमेतदेवं स्यात् तदेव तु न पश्याम इति चेत् । न ह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति । तथाहि—**

**कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ॥**
**वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥१॥**

क्षित्यादि कर्त्तृपूर्वकं कार्यत्वादिति ॥

**न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः ॥**
**सिद्ध्यसिद्ध्योर्विरोधो नो नासिद्धिरनिबन्धना ॥ २ ॥**

तथाहि, अत्र ये शरीरप्रसङ्गमुद्धाटयन्ति, कस्तेषामाशयः ?। किमीश्वरं पक्षयित्वा कर्त्तृत्वाच्छरीरित्वं; ततः शरीरव्यावृत्तेरकर्त्तृत्वम् । अथ क्षित्यादिकमेव पक्षयित्वा कार्यत्वाच्छरीरिकर्त्तृकत्वम् । यद्वा शरीराऽजन्यत्वादकार्यत्वम्, तत एव वाऽकर्त्तृकत्वं, परव्याप्तिस्तम्भनार्थं विपरीतव्याप्त्युपदर्शनमात्रं वेति । तत्र प्रथमद्वितीययोराश्रयासिद्धिबाधापसिद्धान्तप्रतिज्ञाविरोधाः । तृतीये तु व्याप्तौ सत्यां नेदमनिष्टम् । असत्यान्तु न प्रसङ्गः । चतुर्थे बाधानैकान्तिकौ । पञ्चमे त्वसमर्थविशेषणत्वम् । षष्ठेऽपि नागृह्यमाण-

**विशेषया व्याप्त्या बाधः । न चागृह्यमाणाविशेषव्याप्त्या गृह्यमाणविशेषायाः सत्प्रतिपक्षत्वम् । अस्ति च कार्यत्वव्याप्तेः पक्षधर्मतापरिग्रहो विशेषः । कर्त्ता शरीरी, विपरीतो न कर्त्तेति चानयोस्तद्विरहः ॥**

नन्विति ॥ सर्वमिति ॥ प्रागुक्तान्यथासिद्ध्यादिनिरासरूपमित्यर्थः ॥ स्थाणोरीश्वरस्य, अथ च दारुविशेषस्य॥अन्धस्तत्र प्रमाणाऽदर्शी, चक्षुर्हीनश्च ॥ कारिकायां संगृहीतं कार्यत्वं हेतुं विवृणोति ॥ क्षित्यादीति ॥

नन्वत्र प्रत्येकं क्षित्यादि न पक्षः । तस्य स्वशब्देनाभिधातुमशक्यत्वात् । नापि मिलितम् । एकरूपाभावात् । न च शरीराजन्यं जन्यं पक्षः । वेदाद्यव्याप्तेःअदृष्टद्वारा शरीरिणोऽपि क्षित्यादिकर्तृत्वात् । नाप्यदृष्टजनककृत्यजन्यं जन्यम्, ईश्वरकृतेरदृष्टजनकत्वेन क्षितौ तदभावात् । नापि जन्यकृतिसाक्षादजन्यं जन्यम् । घटादेरपि पक्षतापत्तेः । नापि सकर्त्तृकत्वविवादविषयः, तत्सन्देहविषयो वा पक्षः । एकरूपाभावे क्षित्यादिसकलविषयविवादसंशययोरभावात् । किञ्च, न वादिनोः संशयः । तयोर्निश्चितत्वात् । वाद्यनुमानयोस्तुल्यत्वेन मध्यस्थसंशय इतिचेत् । तर्ह्यनुमानाभ्यां तत्संशयो, मध्यस्थसंशयानन्तरञ्च वाद्यनुमानमित्यन्योन्याश्रयः । न च क्षितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तिकत्वात् । हेतौ साध्याभाववद्गामित्वसंशयस्य दूषकत्वात् । तस्य च साध्याभाववति हेतुसन्देहादिव हेतुमति साध्याभावसन्देहादपि दूषकत्वात् । पक्षे तत्सद्भावेऽप्यनुमानमात्रोच्छेदकत्वेन तस्यादूषकत्वात् । न चाङ्कुरेऽपि तत एव साध्यानुमितिः । तस्यापक्षत्वेन स्थापनानुमानाविषयत्वात् । अनुमानान्तरस्य च क्षित्या सन्दिग्धानैकान्तिकत्वात् । तथा चाऽन्योन्याश्रयादेकस्याप्यनुमानस्याप्रवृत्तिः।एकैकमात्राभिन्नसिद्धावपि सकलविषयज्ञानवदसिद्धिश्च ॥

साध्यमपि न कृतिमत्सहभावः, तज्जन्यत्वं वा । अस्मदादिना सिद्धसाधनात् । नाप्युपादानगोचरापरोक्षज्ञानादिमज्जन्यत्वं, यत्किञ्चिदुपादानविवक्षायां घटोपादानगोचरज्ञानादिमताऽस्मदादिना-

ऽर्थान्तरात् । न च, ज्ञानादीनामपि जनकत्वं विवक्षितम् । न च घटोपादानगोचरज्ञानादेः क्षित्यादिजनकत्वसम्भव इति वाच्यम् । तथापि क्षितिजनकादृष्टजनकज्ञानादीनामुपादानविषयत्वनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च साक्षात्तज्जन्यत्वं विवक्षितम् । घटादेर्दृष्टान्तस्य साध्यवैकल्यापत्तेः । न च शरीरक्रिया दृष्टान्तः । घटे व्यभिचारात्, तत्क्रियात्वस्यैवोपाधित्वाच्च । क्षित्युपादानविवक्षायामप्रसिद्धिः । न चोपादानशब्दस्य सम्बन्धिशब्दतया तत्तत्समभिव्याहारात्तत्तदुपादानबोधकत्वम् । शाब्द एव बोधे तथा व्युत्पत्तेः । अनुमितौ च येन रूपेण व्यापकत्वं, तेनैव रूपेण तस्य विषयत्वात् । तच्चोपादानत्वमेवेत्युक्तदोषापरीहारात् । किञ्च, घटे चिकीर्षाद्वारा कृतिसाध्येष्टसाधनताज्ञानमनुमितिरूपं जनकमिति साध्यविकलो दृष्टान्तः, साध्याप्रसिद्धिर्वा । प्रत्युत घटेऽनुमितिजन्यत्वदर्शनादीश्वरेऽनुमितिः सिध्येत् । यथा च प्रत्यक्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे, तथाऽनुमितेर्लिङ्गजन्यत्वेऽपि नित्यैव सा तत्र स्यात्। द्वेषयोनिकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारश्च । तद्दृष्टान्तेन क्षित्यादौ द्वेषसाध्यत्वानुमानादीश्वरे द्वेषोऽपि सिध्येत् । द्वेषवतश्च संसारित्वे भगवतोऽपि तथा स्यात् । कथं वा उपादानगोचरा चिकीर्षा, असिद्धत्वात् ।

किञ्च, कार्यत्वं न योगोपस्थितकृत्यहेत्वम् । असिद्धेः । नापि कादाचित्कत्वं, प्रागभावे व्यभिचारात् । नापि प्रागभावप्रतियोगित्वं, ध्वंसे व्यभिचारात् । न च सत्त्वेन हेतुविशेषणम् । सत्ताजातेः परं प्रत्यसिद्धेः । स्वरूपसत्त्वस्य ध्वंसेऽपि सत्त्वात् । नापि पूर्वकालासम्बन्धित्वे सत्युत्तरकालसम्बन्धः । सकलपूर्वकालस्याप्रसिद्धेः । तत्तत्पूर्वकालस्य चाननुगमात् ॥

घटादिरपि दृष्टान्तः साध्यविकलः । अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकतया तदाश्रयस्याजनकत्वात् । धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा तद्ग्राहकस्याभावात् । न च ज्ञानवत् कार्यत्वेनात्मजन्यत्वमनुमेयम् । आत्मसमवेतत्वस्यैवोपाधित्वात् । अन्यथा शब्दवदाकाशजन्यत्वानुमानापत्तेः । एतेन सर्गाद्यकालीनद्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यं, कार्यत्वात् । अदृष्टसामग्रीजन्यत्वे चादृष्टत्वापत्तिः । द्व्यणुकासमवायिकारणसमानकालीनकृतिजन्यमि-

ति वा साध्यमित्यपास्तम् । आद्ये, ज्ञानादिसिद्धावपि द्व्यणुकाजनकत्वादुदासीनसिद्धावप्रयोजकत्वात् । अन्त्ये, गौरवाद् द्व्यणुकासमानकालीनकृतित्वेनाजनकत्वात् । अपिच, सामान्यज्ञानादिप्रत्यासत्तिजन्योपादानज्ञानादिमतार्थान्तरम् । न चानागतगोचर-प्रत्यक्षजनकप्रत्यासत्त्यजन्यं ज्ञानविशेषणम् । तादृशप्रत्यासत्तेस्तज्जन्यत्वस्य च परं प्रत्यसिद्धेः ॥

अत्रोच्यते । अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यं समवेतं जन्यम्, अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यम् । समवेतत्वे सति प्रागभावप्रतियोगित्वात् । यदेवं तदेवं, यथा घटः । तथा चैतत् । तस्मात्तथा । एवञ्च शब्दफूत्कारादीनां पक्षत्वान्न तैः सन्दिग्धानैकान्तिकत्वम् । यदि च कस्यचित् पक्षे नान्तर्भावः, तदा तमादाय निरुक्तस्य पक्षत्वे समूहालम्बनानुमितावविरोधः । जन्यकृत्यजन्यत्वञ्च जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणप्रत्यासत्त्या तावतामुपस्थितिः । जन्यत्वञ्च कृतो स्वपक्षे विशेषणं, परं प्रत्युपरञ्जकमात्रं प्रमेयो घट इतिवत् तत्प्रकारकज्ञानोपयोगि । उभयसिद्धसप्रयोजनत्वमात्रं तन्त्रं, न तु प्रयोजनस्योभयसिद्धत्वम् । क्षितिरेव वा पक्षः । पक्षपक्षसमनैरपेक्ष्येण घटादौ निश्चितव्याप्तेर्लिङ्गस्य तयोर्दर्शनेनोभयत्राऽनुमित्यविरोधान्न सन्दिग्धानैकान्तिकम् । अनुमित्योरन्योन्यानपेक्षणाच्चान्योन्याश्रयः । न चाङ्कुरे पक्षधर्मताज्ञानाभावः। सिषाधयिषाविरहसहकृतसाधकप्रमाणाभाववत एव पक्षत्वात् ।तच्च क्षितौ पञ्चावयववाक्येनाङ्कुरेऽन्यत इति न विशेषः ॥

यदि च क्षितौ लिङ्गनिश्चयदशायां तद्वृत्तयाऽङ्कुरस्य न निश्चयः तदा क्व सन्दिग्धानैकान्तिकम् । पक्षसमे साध्याभावसामानाधिकरण्यसन्देहाल्लिङ्गे व्याप्तिग्रह एव नोत्पद्यतेइतिचेत् । तर्हि धूमेऽपि व्याप्तिग्रहो नस्यात् । सन्दिग्धवह्निपर्वतापर्वतधूमवत्तामेकधर्माभावेन अपक्षत्वात् । तस्मादनुमानोच्छेदप्रसङ्गात् सन्दिग्धसाध्ये लिङ्गनिश्चयो नदोषः। लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्यप्रवाहाऽजनकत्वे नित्यत्वसिद्धौ, कारणं ततो निवर्त्तमानं नियतविषयतामादायैव निवर्त्तते । तस्याः कारणाधीनत्वात् । अनित्यासर्वविषयकज्ञानाजन्यत्वेन पक्षविशेषणाद्वा ज्ञानस्य सर्वविषयकत्वसिद्धिः ॥

साध्येच ज्ञानादीनां विशेषणतया विशिष्टस्यसाधनत्वेन विवक्षितत्वाच्च तदुपलक्षितक्षेत्रज्ञेनार्थान्तरम् । अदृष्टप्रागभावेति विशेषणाच्चादृष्टद्वारा नास्मदादिभिः सिद्धसाधनम् । नापि साध्याप्रसिद्धिः । सिद्धवृत्त्यसिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति भवति । न हि मृदवयवानां संस्थानविशेषे कृतिसाध्येष्टसाधनत्वानुमितावपि अवयवानां प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः । न चोपादानप्रत्यक्षं प्रवर्त्तकज्ञानोपक्षीणम । अप्रत्यक्षे परमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः । प्रवृत्तिविषयमृदङ्गादेः प्रत्यक्षत्वाद् न शब्दादिना व्यभिचारः । न चेश्वरेऽनुमित्यापत्तिः । स्वसुखादिसाधनतानुमितेर्हेतुताया गृहीताया ईश्वरे धर्माद्यभावेन बाधाद्, अनुमितिमात्रस्य च हेतुत्वाग्रहात् । उपादानस्य सिद्धत्वेऽप्युपादेयवत्त्वेन चिकीर्षाविषयत्वात् । न च द्वेषासिद्धिः । तस्य कृतिद्वारा कार्याहेतुत्वात् । प्रयोजनं विना द्वेषमात्राच्छत्रुनाशानुकूलकृतेरनुत्पत्तेः । किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलमुद्दिश्य तत्साधनताज्ञानात् कृतिः । तथाचेष्टसाधनताज्ञानात्तत्रेच्छाऽस्त्येवेति सैव कृतिकारणम् । क्लृप्तत्वात् । द्वेषस्तु परम्परया तदुपक्षीणः । शत्रुं द्वेष्मीत्यऽबाधितमानसप्रत्यक्षाच्च तत्सिद्धिः ॥

नापि साध्यविकलो दृष्टान्तः । प्रयत्नवदात्मसंयोगस्य चेष्टाद्वारा घटहेतुतया प्रयत्नस्येवात्मनोऽपि हेतुत्वात् । न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणं संयोगपरिचायकमात्रमात्मेतिवाच्यम् । संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य तस्य हेतुत्वात् । नात्मसंयोगः क्रियाहेतुः । संयोगाभावेन तदभावादर्शनादिति चेत् । न । यः स्पन्दो व्यधिकरणयद्गुणजन्यः स तत्संयोगाऽसमवायिकारणकः । यथा स्पर्शवद्वेगवत्संयोगजा क्रियेति तत्सिद्धेः । असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च॥

केचित्तु अनुकूलकृतिसमवायित्वमेव कर्तृत्वं, न तु जनकत्वविशेषितं गौरवात् । तथाच ज्ञानेच्छाकृतिजन्यत्वस्यैव साध्यत्वात् तदाश्रयत्वमेवेश्वरस्य कर्तृत्वमित्याहुः । सामान्यादिगोचरप्रत्यासत्त्या कपालगोचरप्रत्यक्षेऽपि घटादावकर्तृत्वात् कर्तृत्वेन ज्ञानं सिध्यत्तद्विलक्षणमेव सिध्यतीति सङ्क्षेपः ॥

यद्यपि बाधस्तृतीयस्तबक एव निरस्तः, तथापि प्राधान्येन तत्र

योग्यानुपलब्धिबाधो निरस्त इह त्वनुमानबाधो निरस्यः । तत्र व्यापकानुलब्धिविरोधेन बाधो विवक्षितः, प्रतिरोधो वा ? आद्ये, न बाधोऽस्य कार्यत्वस्य धर्मिसिद्ध्यर्थमन्यैर्हेतुभिः कर्तृत्वादिभिरुपजीव्यत्वात् । अन्त्ये, प्रतिबन्धः प्रतिरोधो न । हीनोत्तमबलयोस्तद्भावादित्यर्थः । ननु परव्याप्तिस्तम्भनार्थं विपरीतव्याप्त्युपदर्शनेन तद्विरोधमात्रं स्यात् । यद्वा, व्याप्तिपक्षधर्मतोपस्थाप्यविशेषयोर्विरोधेन विशेषविरोधः स्यादित्यत आह ॥ सिद्ध्यसिद्ध्योरिति ॥ आद्ये कार्यत्वस्य पक्षधर्मत्वसिद्धौ कर्तृत्वादेश्च तदसिद्धौ सत्यां तुल्यबलत्वाभावेन विरोधाभावादित्यर्थः । अन्त्ये अभिमतविशेषसिद्ध्यसिद्ध्योः सहोपलम्भविरोधिविशेषानुपलम्भाभ्यां विरोधस्य प्रत्येतुमशक्यत्वादित्यर्थः।सन्दिग्धव्यतिरेकित्वाप्रतीतव्याप्तिकत्वोपाधिभिरसिद्धिरपि नेत्याह ॥नासिद्धिरिति ॥ विपक्षबाधकोपदर्शनव्याप्तिज्ञानोपायोपाधिविरहप्रतिपादनैरसिद्धिनिबन्धनस्याभावादित्यर्थः ॥

कारिकार्थं सङ्कलयितुं पराभिप्रायं विकल्पयति ॥ तथाहीति ॥ सत्तयाऽनुपलब्धेः प्रागेव निरासाज्ज्ञातायास्तथात्वं वाच्यम् । तत्र पक्षादिविभागं पृच्छति ॥ किमीश्वरमिति ॥ कर्तृत्वादिति ॥ तथा चाशरीरस्य कार्यनिर्माणशक्त्यभावापत्तिरिति भावः ॥ तत एव, शरीराजन्यत्वादित्यर्थः ॥ परव्याप्तिः कार्यत्वसकर्तृकत्वव्याप्तिः ॥ तत्रेति ॥ ईश्वरस्य धर्मिणः प्रमाणेन ज्ञानाज्ञानयोर्धर्मिग्राहकमानबाधाश्रयासिद्धी । ईश्वरद्वेषिणः परस्य कर्तृत्वात् तच्छरीरित्वस्वीकारेऽपसिद्धान्तः । ईश्वरः शरीरीकर्त्ता वेत्यत्र माता वन्ध्येतिवत् प्रतिज्ञापदयोर्व्याघातः। ईश्वरपदस्याशरीरकर्तृवाचकत्वादित्यर्थः। कार्यत्वशरीरिकर्तृत्वयोर्व्याप्तिबलात् क्षित्यादौ शरीरिकर्तृसाधनेऽपि नाऽशरीरिकर्तृनिरास इत्याह॥तृतीयेति॥क्षित्यादौ शरीरिणः कर्तुर्योग्याऽनुपलम्भेन बाध इति भावः । वस्तुतः शरीरकर्त्रभावेऽप्यङ्कुरादौ कार्यत्वाद्यभिचारेण न व्याप्तिरित्याह ॥ असत्याश्चेति ॥ क्षित्यादेः सर्वस्य पक्षत्वे बाधः । कस्यचिदपक्षत्वे तत्रानैकान्तः । प्रमितसाध्याऽभाववद्धर्मिकस्यैव बाधत्वादित्याह ॥ चतुर्थ इति ॥ जन्यत्वमात्रस्यैव गमकत्वे शरीरं व्यर्थं व्याप्यतानवच्छेदकत्वरूपम् । शरीरजन्यत्वाभावादिति नञः प्रतियोगिविशेषणतायामखण्डस्यैव हेतुतायामजन्यत्वमेवोपाधिरिति न साधनं साध्यव्याप्यमित्याह ॥ पञ्चमे

त्विति ॥ स्तम्भनं बाधः प्रतिरोधो वा न सम्भवतीति क्रमेणाह ॥ षष्ठेऽपीति ॥ विशेषः पक्षधर्मता ॥ अस्ति चेति, चो हेतौ ॥ यस्माद्-ऽस्मद्व्याप्तौ पक्षधर्मतास्ति, त्वदीयव्याप्तौ च सा नास्ति धर्म्यज्ञानात् । ज्ञाने वा धर्मिग्राहकमानबाधः । केवलव्याप्तेश्चासाधकत्वमित्यर्थः ॥

ननु क्षित्यादिकं न बुद्धिमद्धेतुकं शरीराजन्यत्वादित्यत्र यद् बुद्धिमद्धेतुकं तच्छरीरजन्यमिति व्यतिरेकव्याप्तौ पक्षधर्मतालाभः स्यादित्याह—

ननु यद् बुद्धिमद्धेतुकं तच्छरीरहेतुकमिति नियमे यच्छरीरहेतुकं न भवति तद्बुद्धिमद्धेतुकमपि न भवति इति विपर्ययनियमोऽपि स्यात । तथाच पक्ष-धर्मताऽपि लभ्यते इतिचेत् । न । गगनादेः सपक्ष-भागस्यापि सम्भवात् केवलव्यतिरेकित्वानुपपत्तेः । अन्वये तु विशेषणासामर्थ्यात् । हेतुव्यावृत्तिमात्रमेव हि तत्र कर्तृव्यावृत्तिव्याप्तं, न तु शरीररूपहेतुव्या-वृत्तिरित्युक्तम् । व्याप्तश्च पक्षधर्म उपयुज्यते, न त्व-न्योऽतिप्रसङ्गात् ॥

एतेन तद्व्यापकरहितत्वादिति सामान्योपसंहारस्या-ऽसिद्धत्वं वेदितव्यम् । न हि यद्व्यावृत्तिर्यदभावेऽन्वय-व्यतिरेकाभ्यामुपसंहर्त्तुमशक्या, तत् तस्य व्यापकं नामेति । विशेषविरोधस्तु विशेषासिद्धौ सहोपलम्भेन तदसिद्धौ मिथोधर्मिपरिहारानुपलम्भेन निरस्तो ना-शङ्कामप्यधिरोहतीति ॥

स्यादेतत् । अस्ति तावत् कार्यस्यावान्तरविशेषो यतः शरीरिकर्तृकत्वमनुमीयते । तथाच तत्प्रयुक्ता-मेव व्याप्तिमुपजीवेत् कार्यत्वसामान्यमिति स्यात् । न स्यात् । न हि विशेषोऽस्तीति सामान्यमप्रयोजक-

म् । तथा सति सौरभकटुत्वनीलिमाऽऽदिविशेषे सति न धूमसामान्यमग्निङ्गमयेत् । किं नाम साधकसामान्ये साध्यसामान्यमाश्रित्य प्रवर्त्तमाने तद्विशेषः साध्यविशेषव्याप्तिमाश्रयेद्, न तु विशेषे सति सामान्यमकिञ्चित्करम्। तस्यापि विशेषान्तरापेक्षयाऽकिञ्चित्करत्वप्रसङ्गात् । सौरभादिविशेषं विहायाऽपि धूमे वह्निर्दृष्टो, न तु विशेषं विहाय कार्ये कर्त्तेति चेत् । न। कार्यविशेषः कारणविशेषे व्यवतिष्ठते, न तु कार्यकारणसामान्ययोः प्रतिबन्धमन्यथाकुर्यादिति । किं न दृष्टं कार्यं कारणमात्रे अङ्कुरो बीजे तद्विशेषो धान्ये तद्विशेषः शालौ तद्विशेषः कलमे इत्यादि बहुलं लोके । क्व वा दृष्टमणुद्रव्यारभ्यं द्रव्यं नित्यरूपाद्यारब्धं रूपादि । तथापि सामान्यव्याप्तेरविरोधात् सिद्ध्यत्येव । अवश्यञ्चैतदेवमङ्गीकर्त्तव्यम् । अन्यथा कार्यत्वस्याकस्मिकत्वप्रसङ्गात् ॥

नन्विति ॥ इदं केवलव्यतिरेकितया साधनम् अन्वयव्याप्तिसत्त्वेऽपि व्यतिरेकिव्याप्तिबलेन, अन्वयव्यतिरेकितया वा ? । तत्र नाद्य इत्याह ॥ गगनादेरिति ॥ असत्सपक्षस्यैव केवलव्यतिरेकित्वादित्यर्थः । शरीररूपविशेषणवैयर्थ्येनान्वयव्याप्त्यभावाद्व्यतिरेकेऽपि तदभावान्नान्त्य इत्याह ॥ अन्वये त्विति ॥ व्याप्यत्वासिद्धिं परिहरतश्च स्वरूपासिद्धिप्रसङ्ग इतिभावः । केवलायाश्च पक्षधर्मताया असाधकत्वाद्व्याप्त्यभावे साऽप्यनुपयोगिनीत्याह ॥ व्याप्तश्चेति ॥

ननु ज्ञानमनित्यमेवेत्यादिप्राथमिकव्याप्तिप्रत्यक्षविरोधाद् नाऽशरीरनित्यज्ञानादिकर्तृसिद्धिः । अतएव शरीरमनित्यमेवेति नियमाऽकर्तृत्वेन नित्यातीन्द्रियतत्सिद्धिरीश्वरे । न चाप्रयोजकत्वम् । निरुपाधित्वात् । कार्यत्वसकर्तृकत्वयोरपि यदि निरुपाधित्वमस्ति, तदा तुल्यबलत्वेन ज्ञातात् सत्प्रतिपक्षवत् प्रतिबन्धोऽस्तु । मैवम् । पक्ष-

धर्मताबलाद् नित्यज्ञानादिसिद्धौ ज्ञानमनित्यमेवेत्यादिव्याप्तिग्रहस्याऽप्रतिबन्धकत्वात्। अस्मदादिज्ञानमात्रविषयत्वेन तत्प्राथमिकव्याप्तिप्रत्यक्षस्य तस्य भिन्नविषयत्वात् । एकविषयकविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् । नित्यत्वानित्यत्वयोरेकजातीये द्रव्येऽविरोधात् । न च ज्ञानत्वं नित्यावृत्त्येवेति ज्ञातमतस्तत्र न नित्यवृत्तित्वज्ञानमिति वाच्यम् । उभयसिद्धानित्यावृत्तित्वज्ञानेऽप्यतिरिक्तनित्यवृत्तित्वज्ञानाभावविरोधात् । अत एव कर्त्ता शरीर्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमपास्तम् ॥

ननु क्षित्याद्यकर्तृकं कर्तृव्यापकरहितत्वादित्यत्र नोक्तदोष इत्यत आह ॥ एतेनेति ॥ दृष्टान्ते विशेषणासामर्थ्यप्रदर्शनेन सामान्यतः कर्तृव्यापकरहितत्वमसिद्धम् । शरीरजन्यत्वादेश्च रहितत्वमसमर्थविशेषणतयेत्यर्थः । तदेव स्पष्टयति ॥ न हीति ॥ यद्व्यावृत्तिः, शरीरव्यावृत्तिः ॥ यदभावे, कर्त्रभावे ॥ तच्छरीरं तस्य कर्तुर्व्यापकमित्यर्थः । स एव तस्य व्यापको यस्याभावे साध्ये दृष्टान्ते अन्वयव्यतिरेकाभ्यां पक्षे उपसंहर्तुं शक्यते । यथा वह्न्यभावो धूमाभावे । प्रकृते चान्वयिनि दृष्टान्ते विशेषणासामर्थ्ये तदप्रयोजकत्वस्योक्तत्वाद्व्यतिरेकोऽप्यप्रयोजक इति भावः ॥

ननु किं विशेषणस्यासामर्थ्यं ? न तावन्निष्प्रयोजनकत्वं, व्याप्तिग्रहोपयुक्तविशेषणस्यैव पक्षधर्मतौपयिकस्यापि तस्य सप्रयोजनकत्वात् । व्यभिचारवारकस्यापि सार्थकत्वेऽनुमितिप्रयोजकत्वस्यैव तन्त्रत्वात् । नापि व्यभिचारवारकविशेषणवत्येव व्याप्तिरिति तच्छून्यत्वं, निर्विशेषणेऽपि गोत्वादौ व्याप्तेः । तत्र व्यक्तेरेव विशेषणत्वेऽन्योन्याश्रयात् । माऽपि व्यभिचारवारकं विशेषणं विशिष्टे व्याप्तिग्राहकं, सहचारदर्शनादिसत्त्वे तदभावे व्याप्तिग्रहाविलम्बात् । नच व्यभिचारावारकविशेषणशून्यएव व्याप्तिग्रहः । प्रमेयत्वेन ज्ञायमाने धूमे व्याप्तिग्रहात्तत्रोपात्तव्यभिचारावारकविशेषणशून्यत्वस्य च विवक्षितत्वे विरोधः । तत्रोपात्तं तेन शून्यश्चेत्यस्यासम्भवात् ॥

अथ शरीरजन्यत्वाभावे न व्याप्तिः । एकवृत्तित्वबाधे सत्येव व्यासज्यवृत्तित्वात् । विशेष्यतावच्छेदकस्य व्याप्यतावच्छेदकत्वे सत्येव विशेषणस्य तदवच्छेदकत्वाच्च । किन्तु जन्यत्वाभावे व्याप्तिः तत्र स्वरूपासिद्धिः। तन्निरासार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिः।

न । अव्यभिचारानौपाधिकत्वयोर्विशिष्टे सत्त्वेन तदभावसाधने बाधात् । किञ्चैवं निर्धूमोऽयम् आर्द्रेन्धनप्रभववह्निरहितत्वादित्याद्यप्यनुमानं न स्यात् । यद्वा,शरीरजन्यत्वाभावोऽखण्ड एव हेतुरस्तु, तत्र व्यर्थविशेषणत्वाभावात् ॥

अत्राहुः । शरीराजन्यत्वस्य व्याप्यत्वेऽपि शरीरं न व्याप्यतावच्छेदकं, गौरवात् । येन विशेषणेन विना व्याप्तिर्न गृह्यते, तस्यैव व्याप्यतावच्छेदकत्वनियमात् । अत एव गन्धस्यैव व्यञ्जकत्वादित्यत्राप्रसिद्धत्वेन गन्धादिषु मध्ये इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते इत्यसिद्धिवारकमपि विशेषणं सार्थकम् । व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वात् । धूमे च वह्निविशेषस्य कारणत्वात् कारणाभावस्य च कार्याभावव्याप्यत्वान्न तत्रोक्तदोषः ॥

शरीरजन्यत्वाभावोऽप्यखण्डो न हेतुः । यदि शरीरजन्यत्वप्रयुक्तं सकर्तृकत्वं स्यात्, तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात् । न चैवम् । किन्तु जन्यत्वप्रयुक्तं, लाघवात् । तथा चाजन्यत्वमेवोपाधिः । न च सत्प्रतिपक्षोच्छेदात् पूर्वसाधनव्यतिरेको नोपाधिः । आभासस्थापनायां पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वेन तत्र सत्प्रतिपक्षावकाशात् ॥

यद्वा, यन्निरूपिता यन्निष्ठा व्याप्तिर्येन विशेषणेन विना न गृह्यते, तत्र विशिष्टं व्याप्यतावच्छेदकम् । अकर्तृत्वनिरूपिताभावनिष्ठव्याप्तौ च शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं क्लृप्तमिति न शरीरजन्यत्वमवच्छेदकम् । अतो गौरवेण शरीरजन्यत्वमप्रतियोगितया च जन्यत्वं नावच्छेदकमिति व्याप्यतावच्छेदकाभावान्न शरीरजन्यत्वाभावोऽकर्तृत्वव्याप्यः । अन्यथाऽदृष्टाजन्यत्वस्यापि क्षित्यादावनुमित्यापत्तेः ॥

अस्मत्पितृचरणास्तु— प्रतिपक्षानुमानस्य प्रसिद्धकर्तृजन्यत्वाभावविषयत्वात् । अप्रतीतप्रतियोगिकाभावस्य निरूपयितुमशक्यत्वात् । स्थापनानुमानस्य च पक्षधर्मताबलात् प्रसिद्धकर्तृसाधकत्वाद् भिन्नविषयतया न प्रतिबध्यप्रतिबन्धकभावः । न च कर्तृजन्यत्वस्योपाधेः स्थापनाविषयतया तदभावः साध्यः । तस्याप्यप्रसिद्धकर्तृव्यक्तिमादाय पर्यवसानात् । न चैवं सत्प्रतिपक्षोच्छेदः । तस्य गोत्वाद्येकभावाभावसाधकविषयत्वादित्याहुः ॥

अर्थान्तरेण सिद्ध्यसिद्ध्योरिति व्याचष्टे ॥ विशेषेति ॥ व्याप्ति-पक्षधर्मताभ्यामानीयमानशरीरित्वाशरीरित्वसिद्धौ रूपरसवत् कर्त्तरि सहोपलम्भेन, तदसिद्धौ कर्त्तरि तदुभयासिद्धौ यो मिथो धर्मिपरीहारोऽन्योन्यधर्मिप्रतिक्षेपः, तस्यानुपलम्भेन निरस्तो विशेषविरोधो न शङ्कामप्यधिरोहतीत्यर्थः। असिद्धिनिबन्धनमुपाधिमाह॥ अस्तीति ॥ शरीरजन्यकार्ये यदवच्छेदेन शरीरस्य कारणत्वं गृह्यते, तत् सामान्यात्मकमेकमङ्गीकार्यम्। अतस्तत्सामान्यवत्त्वमेवोपाधिरिति न कार्यत्वसामान्यं कर्तृजन्यत्वव्याप्यमित्यर्थः। तत्सामान्याऽनङ्गीकारेऽपि घटत्वादिकमेव कर्तृजन्यत्वे प्रयोजकम्। अग्निजन्यतायां धूमत्वादेरिवाननुगतस्यापि जन्यत्वावच्छेदकत्वादिति भावः। तथापि कार्यत्वसामान्यस्य कर्तृसामान्येन व्याप्तौ विशेषो नोपाधिः। न हि विशेषोऽस्तीति सामान्यमप्रयोजकम्। तथात्वे वाऽग्निजन्यत्वे धूमविशेषस्य प्रयोजकत्वान्न धूमसामान्यमग्निं गमयेत्। तस्माद् यद्विशेषयोः कार्यकारणभावः, तत्सामान्ययोरपि बाधकं विना तथात्वनियम इत्याह॥ न हीति॥ नन्वग्निधूमसामान्ययोर्व्याप्तौ धूमविशेषो नोपाधिः। प्रत्येकं साध्याव्याप्तेः। कर्तृकार्यसामान्ययोर्व्याप्तौ शरीरप्रयोज्यजातिर्न साध्याव्यापिकेत्याशयमविद्वान् शङ्कते ॥ सौरभादीति॥ सा जातिर्न कर्तृमात्रप्रयोज्यतया कल्पिता, किन्तु शरीरप्रयोज्यतयेति तदभावाच्छरीरमेव कारणं निवर्त्तते, न कर्तृसामान्यम्। तस्यैव कार्यकारणभावप्रवृत्तौ कर्तृमात्रनिवृत्तावप्रयोजकत्वादिति परिहरति ॥ कार्यविशेष इति ॥ शरीरकर्तृत्वानुमानञ्च घटत्वादिभिरेवोपपन्नमिति तज्जातौ मानाभावः। तेषाञ्च नोपाधित्वं, प्रत्येकं साध्याव्यापकत्वादिति भावः। नन्वत्र बाधकाभावादस्तु तथा,प्रकृते तु ज्ञानमनित्यमेवेत्यादिप्राथमिकबहुव्याप्तिप्रत्यक्षबाधः, तुल्यत्वेऽपि व्याप्तिसंशयाधायकत्वात। न च कार्यकारणभावमूलकत्वेन कार्यत्वसकर्तृकत्वव्याप्तिर्बलीयसीति वाच्यम्। विरोधिप्रत्यक्षेण कार्यकारणभावस्यैवासिद्धेरित्यत आह ॥ क्व वेति ॥ एवं सति अवयवी महानेव रूपारम्भकं रूपमनित्यमेव, तेजउद्भूतरूपमेवेत्यादि–व्याप्तिग्रहात् परमाणुतद्रूपचक्षुरादेरप्यसिद्धिः स्यात् ॥

अथ द्रव्यचाक्षुषत्वेऽनेकद्रव्यवत्त्वस्य रूपे स्वाश्रयसमानाधिकरणरूपस्य साक्षात्कारे विषयेन्द्रियसन्निकर्षस्य कारणत्वात् तन्मूल-

विपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तेर्बाधो, न तु वैपरीत्यम् । विपक्षबाधकाभावेन तस्या बलवत्त्वात् । तर्हि ज्ञानादिकार्ययोः कार्यकारणभावावधारणात् तन्मूलविपक्षबाधकेन व्याप्तिग्रहात् पक्षधर्मतासचिवानित्यज्ञानादिसिद्धौ व्यभिचाराज्ञ व्याप्तिः । न च कार्यकारणभावे बाधः, साध्यं पक्षातिरिक्त एव, सुखं दुःखसम्भिन्नमेवेत्यादिव्याप्तिग्रहात् कार्यात् कारणानुमानोच्छेदे निरीहं जगज्जायेतेत्यर्थः ॥

ननु शरीरजन्यत्वमुपाधिः । पक्षेतरत्ववत् पक्षमात्रव्यावर्त्तकविशेषणत्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वानिश्चयाच्च नतदुपाधिरिति चेन्न । तेषामनुपाधित्वे साध्यग्राहकमानाभावस्य तन्त्रत्वात् । प्रकृते तु चेष्टेतरकार्ये शरीरव्यापारद्वारैव कर्तुः कारणत्वाच्छरीरसहकृतस्यैव स्वकार्यजनकत्वाच्च विपक्षबाधकात्तन्निश्चयात् । अत एव बाधोन्नीतं पक्षेतरत्वमग्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभवाग्निमत्त्वं रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः । विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात् ॥

मैवम् । कर्तुर्हि शरीरसहकारिता यदि घटादौ कर्त्तव्ये तदा शरीरं विना तस्य घटाद्यकरणेऽपि किमायातं कर्तुः कार्यमात्रकरणे। न च कार्यमात्रकरणे सा । तस्य त्वया कर्तृजन्यत्वानभ्युपगमात् । तथात्वे वा शरीराजन्यमपि कार्यं कर्तृजन्यमिति तस्य साध्याव्यापकत्वम् । नापि स्वकार्ये । तत्रैव तस्यानवच्छेदकत्वादात्माश्रयात् ॥

तथापि सन्दिग्धोपाधिः स्यात्तुल्ययोगक्षेमतया साध्याव्यापकतासंशयाधायकत्वादिति चेन्न । लाघवेन बाधकं विना कर्तृजन्यत्वे जन्यत्वस्यैवावच्छेदकत्वात् । न तु शरीरजन्यत्वस्य, गौरवात् । तथाच न शरीरजन्यत्वं सकर्तृकत्वव्यापकम् । घटादौ त्वार्थः समाजः । घटत्वेन शरीरजन्यत्वनियामाद्, न तु व्यापकत्वप्रयुक्तः ॥

अपि च, शरीरजन्यत्वं हस्तादिजन्ये साध्याव्यापकम् । न च साक्षात्प्रयत्नाधिष्ठेयजन्यत्वं तदर्थः,साधनव्यापकत्वात् । परमाण्वादेस्तत्साक्षात्प्रयत्नाधिष्ठेयत्वात् । शरीरिकर्तृकत्वमपि नोपाधिः । कार्यमात्रे कर्तुः शरीरसहकारित्वाभावात्, तस्य साध्यव्यापकत्वाऽनिश्चयात् ॥

ननु घटादौ कृतिसाध्यता शरीरव्यापारद्वारैव, न साक्षात्। न चाऽशरीरस्य तत्सम्भव इति तद्बाधात् कर्तुरपि बाध एव। शरीरव्यापारजन्यत्वं वोपाधिः। मैवम्। कार्यमात्रे हि तथा न कृतिसाध्यता। क्षित्यादौ व्यभिचारात्। घटादौ च तथात्वेऽपि कार्यमात्रे कृतिमात्रस्य जनकत्वाविरोधात्। विशेषयोर्हेतुहेतुमद्भावे बाधकं विना सामान्ययोरपि तथात्वात्। न च चेष्टेतरकार्ये शरीरव्यापारद्वारैव कृतेर्जनकत्वम्। क्षित्यादौ व्यभिचारात्। किन्तु घटादावित्युक्तम्॥

अत एव सहभावनिरूपकत्वे सति नियतपूर्ववर्त्तित्वं कारणत्वम्। न च कृतेः कार्यसहभावनिरूपकत्वं, स्वतः कार्यकाले तदभावात्, तथा च तत्परिचायितव्यापारद्वारा तस्याः सहभावनिरूपकत्वम्। अतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं, न तु केवलाया इत्यऽपास्तम्। कार्यमात्रे तथात्वाभावात्॥

कार्यत्वसकर्तृकत्वव्याप्तौ विपक्षबाधकमाह ॥अन्यथेति॥ कारणान्तरस्येव कर्तुरप्यभावेन कार्याभावात् कर्त्रभावे कारणान्तरस्याऽप्यनुत्पादकत्वे कार्यमाकस्मिकं स्यादित्यर्थः। यदि व्यतिरेकसन्देहात् प्रकृते नानुमानं, तदा तादृशव्यतिरेकसन्देहश्च कार्यात् कारणविशेषानुमानेष्वपि कर्तुं शक्यते इति तेषामप्यनुमानाभासत्वं स्यादिति शङ्कोत्तराभ्यामाह—

स्यादेतत्। अन्वयव्यतिरेकि तावदिदं कार्यत्वमिति परमार्थः। तत्राकाशादेर्विपक्षात् किं कर्तृव्यावृत्तेः कार्यत्वव्यावृत्तिराहोस्वित् कारणमात्रव्यावृत्तेरिति सन्दिह्यते। तदसत्। कर्तुरपि कारणत्वात्। कारणेषु चान्यतमव्यतिरेकस्यापि कार्यानुत्पत्तिं प्रति प्रयोजकत्वादन्यथा कारणत्वव्याघातात्। करणादिविशेषव्यतिरेकसन्देहप्रसङ्गाच्च। कथं हि निश्चीयते किमाकाशात् कारणव्यावृत्त्या कार्यत्वव्यावृत्तिः, उत करणव्यावृत्त्या। एवं किमुपादानव्यावृत्त्या,

किमसमवायिव्यावृत्त्या, किं निमित्तव्यावृत्त्येति । कार्यत्वात् करणमुपादानमसमवायि निमित्तं वा बुद्ध्यादिषु न सिद्ध्येत् । कर्तुः कारणत्वे सिद्धे सर्वमेतदुचितं, तदेव त्वसिद्धमिति चेत् । किं पटादौ कुविन्दादिरकारणमेव कर्त्ता, प्रस्तुते वोदासीन एव साधयितुमुपक्रान्तः । तस्माद् यत्किञ्चिदेतदपीति ॥

ननु कर्त्ता कारणानामधिष्ठाता साक्षाद्वा शरीरवत्, साध्यपरम्परया वा दण्डादिवत् ? । तत्र न पूर्वः । परमाण्वादीनां शरीरत्वप्रसङ्गात् । न द्वितीयः । द्वाराभावात् । न हि कस्यचित् साक्षादधिष्ठेयस्याऽभावे परम्परया अधिष्ठानं सम्भवति ॥

तदयं प्रमाणार्थः । परमाण्वादयो न साक्षाच्चेतनाऽधिष्ठेयाः, शरीरेतरत्वात् । यत्पुनः साक्षादधिष्ठेयं न तदेवं,यथास्मच्छरीरमिति । नापि परम्परया अधिष्ठेयाः, स्वव्यापारे शरीरानपेक्षत्वात् । स्वचेष्टायामस्मच्छरीरवत् । व्यतिरेकेण वा दण्डाद्युदाहरणम् । एवं क्षित्यादि न चेतनाधिष्ठितहेतुकं, शरीरेतरहेतुकत्वादित्यतिपीडया सत्प्रतिपक्षत्वम् ॥

अपिच, पटादौ कुविन्दादेः किं कारकाधिष्ठानाऽर्थमपेक्षा, तेषामचेतनानां स्वतोऽप्रवृत्तेः, आहो कारकत्वेन ? । न पूर्वः । तेषां परमेश्वरेणैवाधिष्ठानात् । न ह्यस्य ज्ञानमिच्छा प्रयत्नो वा वेमादीन् न व्याप्नोतीति सम्भवति । न चाधिष्ठितानामधिष्ठात्र-ऽन्तरापेक्षा तदर्थमेव । तथा सत्यनवस्थानादेवाऽविशेषात् । न द्वितीयः । अधिष्ठातृत्वस्यानङ्गत्वप्रसङ्गे

**दृष्टान्तस्य साध्यविकलत्वापत्तेः । न च हेतुत्वेनैव तस्यापेक्षाऽस्त्विति वाच्यम् । एवन्तर्हि यत्कार्यं तत्सहेतुकमिति व्याप्तिः, न तु सकर्तृकमिति । तथा च तथैव प्रयोगे सिद्धसाधनात् ॥**

**किञ्चानित्यप्रयत्नपूर्वकत्वप्रयुक्तां व्याप्तिमुपजीवत् कार्यत्वं न बुद्धिमत्पूर्वकत्वेन स्वभावप्रतिबद्धम् । न ह्यनित्यप्रयत्नोऽपि बुद्ध्या शरीरवत् कारणत्वेनाऽपेक्ष्यते, येन तन्निवृत्तावप्यकार्यबुद्धिर्ननिवर्त्तते इति॥**

स्यादेतदिति ॥ अन्यथा सत्प्रतिपक्षाभिधानाय भूमिकामारचयति ॥ नन्विति ॥ यत्र प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियोत्पादको यः, स तत्र साक्षादधिष्ठाता, यथा स्वशरीरे अस्मदादिः । शरीरक्रियया यो यत्क्रियाजनकः, स तत्र परम्पराऽधिष्ठाता, यथा दण्डादौ कुलालादिः । आद्ये परमाण्वादिः शरीरं स्यात् । तादृशक्रियाश्रयत्वादित्याह ॥ परमाण्वादीनामिति ॥ स्वव्यापार इति ॥ स्वक्रियायां शरीरव्यापारानपेक्षत्वादित्यर्थः ॥ स्वचेष्टायामिति ॥ शरीरक्रियायास्तत्क्रियानपेक्षत्वादित्यर्थः ॥ व्यतिरेकेणेति ॥ यत् परम्पराऽधिष्ठेयं तन्न स्वव्यापारे शरीरक्रियानपेक्षमपि तु तदपेक्षमेव । यथा दण्डादीति व्यतिरेकीत्यर्थः । एवं कारणपक्षकानुमानमुक्त्वा कार्यपक्षकमाह ॥ एवमिति ॥ सिद्धसाधनमभिधातुं भूमिकामारचयति ॥ अपिचेति ॥ अधिष्ठातृत्वस्येति ॥ क्षित्यादवचेतनाधिष्ठितहेतुजन्यत्वे साध्ये पटादिर्दृष्टान्तः साध्यविकलः । कुविन्दादेः कारकत्वेनैवापेक्षणीयतया कारणाधिष्ठातृत्वेन तदभावादित्यर्थः ॥ तथा चेति ॥ कर्त्रजन्यत्वेऽप्यचेतनसमवायादिहेतुकत्वस्य मयाऽभ्युपगमादित्यर्थः॥

उपाधिमाह ॥ किञ्चेति ॥ न हीति ॥ यथा शरीरनिवृत्तावप्यकार्या बुद्धिर्न निवर्त्तते, तद्वदनित्यप्रयत्ननिवृत्तावप्यकार्यबुद्धिर्न निवर्त्तते इति न । शरीरं हि बुद्ध्या कारणत्वेनापेक्ष्यते इति शरीरनिवृत्तौ कार्या बुद्धिर्निवर्त्तते इति युक्तं, न पुनरनित्यप्रयत्नो बुद्ध्या कारणत्वेनापेक्ष्यते । येनानित्यप्रयत्ननिवृत्तौ कार्या बुद्धिर्निवर्त्तते न नित्येति स्यात्,

अपि तु व्यापकत्वमात्रेणेत्यर्थः । शरीरवदिति प्रथमासमर्थाकृतिः । बुद्ध्या शरीरं यथा कारणतयाऽपेक्ष्यते, न तद्वदनित्यः प्रयत्नः कारणतयेत्यर्थः ॥ तन्निवृत्तावपीति ॥ अनित्यप्रयत्ननिवृत्तावपीत्यर्थः ॥

तदेतत् प्रागेव निरस्तप्रायं नोत्तरान्तरमपेक्षते । तथाहि । साक्षादधिष्ठातरि साध्ये परमाण्वादीनां शरीरत्वप्रसङ्ग इति किमिदं शरीरत्वं, यत् प्रसज्ज्यते ? यदि साक्षात्प्रयत्नवदधिष्ठेयत्वं, तदिष्यत एव । न च ततोऽन्यत् प्रसञ्जकमपि । अथेन्द्रियाश्रयत्वम् ? । तन्न । तदवच्छिन्नप्रयत्नोत्पत्तौ तदवच्छिन्नज्ञानजननद्वारेणेन्द्रियाणामुपयोगात् । अनवच्छिन्ने प्रयत्ने नायं विधिः । नित्यत्वात् । अत एव नाऽर्थाश्रयत्वम् । न हि नित्यज्ञानं भोगरूपमभोगरूपं वा यत्नमपेक्षते तस्य कारणविशेषत्वात् । न च नित्यसर्वज्ञस्य भोगसम्भावनाऽपि । विशेषादर्शनाभावे मिथ्याज्ञानानवकाशे दोषानुत्पत्तौ धर्माधर्मयोरसत्त्वात् ॥

तस्मात्, साक्षात्प्रयत्नानधिष्ठेयत्वात् स्वव्यापारे तदनपेक्षत्वाच्चेति द्वयं साध्याविशिष्टम् । अनिन्द्रियाश्रयत्वादभोगायतनत्वात् स्वव्यापारे तदनपेक्षत्वाच्चेति त्रयमप्यन्यथासिद्धम् । अभोगायतनत्वादनिन्द्रियाश्रयोऽपि, भोक्तृकर्मानुपग्रहादभोगायतनमपि, स्पर्शवद्वेगवद्द्रव्यानुग्राह्यत्वात्तदनपेक्षमपिस्यात् । अचेतनत्वाच्चेतनाधिष्ठितमपि स्यादिति को विरोधः ॥

तथा च साक्षात्प्रयत्नाऽधिष्ठितेतरजन्यत्वादिति साध्यसमः । इन्द्रियाश्रयेतरजन्यत्वाद् भोगायतनेतरजन्यत्वादिति द्वयमप्यन्यथासिद्धम् । कार्यज्ञाना-

ध्यनपेक्षत्वाच्छरीरेतरजन्यमपि स्यात् । अचेतनहेतु-
कत्वाच्चेतनाधिष्ठितमपीति को विरोधः ॥

अप्रसिद्धविशेषणश्च पक्षः। नहि चेतनानाधिष्ठित-
हेतुकत्वं क्वचित् प्रमाणसिद्धम् । न च चेतनाधिष्ठित-
हेतुकत्वानिषेधः साध्यः । हेतोरसाधारण्यप्रसङ्गात् ।
गगनादेरपि सपक्षाद्व्यावृत्तेः ॥

यत् पुनरुक्तं, कुविन्दादेः पटादौ कथमपेक्षेति ।
तत्र कारकतयेति कः सन्देहः । किन्तु कारकत्वमेव
तस्य ज्ञानचिकीर्षाप्रयत्नवतो न स्वरूपतः । तदेव चा-
ऽधिष्ठातृत्वम् ॥

यत्त्वधिष्ठिते किमधिष्ठानेनेति । तत् किं कुविन्द
उच्चार्यते, ईश्वरो वा, अनवस्था वाऽऽपाद्यते । न
प्रथमः । अन्वयव्यतिरेकसिद्धत्वात् । न द्वितीयः ।
परमाण्वदृष्टाद्यधिष्ठातृत्वसिद्धौ ज्ञानाऽऽदीनां सर्व-
विषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् । न तु
तदधिष्ठानार्थमेवेश्वरसिद्धिः ॥

न तृतीयः । तस्मिन् प्रमाणाभावात् । तथाप्येका-
ऽधिष्ठितमपरः किमर्थमधितिष्ठतीति प्रश्ने किमुत्तर-
मिति चेत् । हेतुप्रश्नोऽयं, प्रयोजनप्रश्नो वा ? ।
नाद्यः । ईश्वराधिष्ठानस्य नित्यत्वात् । कुविन्दाद्य-
धिष्ठानस्य स्वहेत्वधीनत्वात् । न द्वितीयः । कार्य-
निष्पादनेन भोगसिद्धेः स्पष्टत्वात् ॥

एकाधिष्ठानेनैव कार्यं स्यादिति चेत् । स्यादेव ।
तथापि न सम्भेदेऽन्यतरवैयर्थ्यम् । परिमाणं प्रति
सङ्ख्यापरिमाणप्रचयवत् प्रत्येकं सामर्थ्योपलब्धौ स-

म्भूयकारित्वोपपत्तेः ॥

अस्ति तत्र वैजात्यमिति चेत् । इहापि किञ्चिद्भविष्यतीति । न चाकुर्वतः कुलालादेःकायसंक्षोभादिसाध्यो भोगः सिद्ध्येदिति तदर्थमस्य कर्तृत्वमीश्वरोऽनुमन्यते, तदर्थमात्रत्वादैश्वर्यस्येति ॥

यत्त्वनित्यप्रयत्नेत्यादि । भवेदप्येवं यद्यनित्यप्रयत्ननिवृत्तावेव बुद्धिरपि निवर्त्तेत । न त्वेतदस्ति । उदासीनस्य प्रयत्नाभावेऽपि बुद्धिसद्भावात् । हेतुभूता बुद्धिर्निवर्त्तेत इतिचेन्न । उदासीनबुद्धेरपि संस्कारं प्रति हेतुत्वात् । कारकविषया बुद्धिर्निवर्त्तेत इतिचेन्न। उदासीनस्यापि कारकबोद्धृत्वात् । न हि घटादिकमकुर्वन्तश्चक्रादिकं नेक्षामहे । हेतुभूता कारकबुद्धिर्निवर्त्तेत इतिचेन्न । अयतमानस्यापि दुःखहेतुभूताया अपि तद्धेतुकण्टकस्पर्शबुद्धेरभावात् । चिकीर्षाहेतुभूतोऽनुभवो निवर्त्तेत इतिचेन्न । केनचिन्निमित्तेनाऽकुर्वतोऽपि चिकीर्षातद्धेतुबुद्धिसम्भवात् । अनपेक्षकृतिहेतुचिकीर्षाकारणं बुद्धिर्निवर्त्तेत इतिचेद्, नतर्हि बुद्धिमात्रम् । तथाचानित्यप्रयत्नहेतुकत्वप्रयुक्तं विशिष्टप्रयत्नचिकीर्षाहेतुबुद्धिमत्पूर्वकत्वमिति तन्निवृत्तौ तदेव निवर्त्ततां, न तु बुद्धिमत्पूर्वकत्वमात्रम् । तत्र तस्याप्रयोजकत्वादितिबुद्धिमत्पूर्वकत्वसाध्यपक्षे परीहारः । सकर्तृकमिति प्रयत्नप्रधानपक्षे शङ्कैव नास्ति । तस्यैव तत्रानुपाधित्वात् ॥

तदेतदिति ॥ विशेषस्य विशेषं प्रति प्रयोजकत्वादित्यादिना । अत्र प्रसक्तदशायां तावद् दूषणमाह ॥ यदीति ॥ इष्टापादनमित्यर्थः ॥

न चेति ॥ आपाद्यादापादकस्याविशेष इत्यर्थः ॥ अथेति ॥ तथा च आपाद्यापादकयोर्भेद इत्यर्थः । तत्राप्रयोजकत्वमाह ॥ तदवच्छिन्नेति ॥ साक्षात्प्रयत्नाधिष्ठितत्वेऽपि तस्यैवेन्द्रियाश्रयत्वम् । यदवच्छिन्न आत्मनि प्रयत्नस्तदवच्छिन्नात्मनिष्ठज्ञानेनेन्द्रियकार्येण भोगो जनयितव्यः । अकार्यौ तु ज्ञानप्रयत्नाविन्द्रियाश्रयत्वं विनाऽपि स्यातामिति न विरोध इति मूलशैथिल्यमित्यर्थः ॥ प्रयत्नोत्पत्ताविति, निमित्तसप्तमी ॥ अत एवेति ॥ सोपाधित्वेन मूलशैथिल्यादेवेत्यर्थः । उपाधिमाह ॥ न हीति ॥ ज्ञानानित्यत्वमुपाधिरित्यर्थः॥न च नित्येति ॥ यदवच्छिन्नात्मन्यर्था भोगं जनयन्ति तस्यार्थाश्रयत्वम् । नित्यज्ञानाश्रयस्य त्वीश्वरस्य भोगाभावान्न तदर्थं तदपेक्षेत्यर्थः ॥

प्रसङ्गदूषणेनैव तदनुग्राह्यो हेतुरपि दूषित इत्याह ॥ तस्मादिति ॥ शरीरत्वं यदि साक्षात्प्रयत्नाधिष्ठेयत्वं, तदा शरीरेतरत्वं साक्षात्प्रयत्नानधिष्ठितत्वम् । तथा स्वव्यापारे शरीरानपेक्षत्वं साक्षात्प्रयत्नाऽधिष्ठेयानपेक्षत्वमेव । तथाच साध्याविशेष इत्यर्थः । यदि चेन्द्रियाऽऽश्रयत्वं भोगाश्रयत्वं वा शरीरत्वं, तदा शरीरेतरत्वादित्यस्यानिन्द्रियाश्रयत्वादभोगायतनत्वाद्वेत्यर्थः । स्वव्यापारेऽइन्द्रियाश्रयानपेक्षत्वाद्भोगायतनानपेक्षत्वादिति वा द्वितीयहेत्वर्थः । तदेतत् सर्वमन्यथासिद्धमित्याह ॥ अनिन्द्रियाश्रयत्वादिति ॥ अन्यथासिद्धिमेवाह ॥ अभोगायतनत्वादिति ॥ ईश्वरे ह्यदृष्टाभावेन भोगाभावात् परमाण्वादिर्भोगानवच्छेदकत्वेनानिन्द्रियाश्रयोऽपि स्यात्, स्पर्शवद्वेगवद्द्रव्यान्तराप्रेर्यमाणत्वाच्छरीरानपेक्षक्रियोऽपि स्याद्, नविरोध इत्यर्थः । क्षित्यादिकं न चेतनाधिष्ठितहेतुकं शरीरेतरजन्यत्वादित्यत्रापि शरीरपदार्थस्य विकल्पत्रये दोषमाह ॥ तथाचेति ॥

दूषणान्तरमाह ॥ अप्रसिद्धेति ॥ ननु चेतनाऽधिष्ठितहेतुकत्वं तावदन्यत्रावगतमतः प्रतीतप्रतियोगिकत्वे तन्निषेधः शक्यसाधनः स्यादित्यत आह ॥ न चेति ॥ कुविन्द इति ॥ ईश्वरेणैव तन्त्वादेरधिष्ठानात् किं तदर्थं कुविन्देनेत्यर्थः ॥ ईश्वरो वेति ॥ कुविन्देनैव च तन्त्वादेरधिष्ठानात् किं तदर्थमीश्वरेणेत्यर्थः ॥ अनवस्था वेति ॥ घटादेर्द्विकर्तृकतया तद्दृष्टान्तेन कार्यत्वात् क्षित्यादेरपि द्विकर्तृकत्वापत्तौ तस्यापि पक्षधर्मताबलात् सर्वज्ञेन सर्वज्ञाधिष्ठातृसिद्धौ पुनर्घटादिदृष्टान्तेन क्षित्यादौ कर्तृत्रयं स्यादिति पुनर्घटवत् क्षितिः क्षितिवद्

घट इतीश्वरानन्त्यं स्यादित्यर्थः ॥ अन्वयेति ॥ कुविन्दव्यापारस्यान्वयव्यतिरेकादित्यर्थः । ईश्वरज्ञानादीनां नित्यत्वेन सर्वविषयत्वात् पटाद्युपादानविषयत्वमपीति कथं न तेषां पटादिकारणत्वं, कुविन्दज्ञानादितुल्यत्वादित्याह॥ परमाण्विति ॥ पटाकाशसंयोगादिकं प्रति ईश्वरस्य कर्तृत्वात् पटादिगोचरमपि ज्ञानं सिद्धमिति भावः ॥ न त्विति ॥ न त्वधिष्ठिताधिष्ठानार्थमेवेत्यर्थः । यथा कुविन्दाधिष्ठानमन्वयव्यतिरेकाभ्यां तथेश्वरस्याधिष्ठानं, ज्ञानादीनां नित्यतया सर्वविषयत्वात् । तद्वदधिष्ठात्रन्तरकल्पनायां न मानमस्ति, येनानवस्था स्यात् । कार्ये हि कर्तृत्वेन कारणता, न द्विकर्तृत्वादिनेति न तत्सिद्धिरित्याह ॥ प्रमाणाभावादिति ॥ वैजात्यमिति ॥ प्रत्येकजन्यव्यावृत्तं कारणमेलकव्यङ्ग्यमित्यर्थः ॥ इहापीति ॥ द्विकर्तृके घटादावेककर्तृकक्षित्यादेर्वैजात्यमित्यर्थः ॥ उदासीनस्येति ॥ कारणानि अव्यापारयत इत्यर्थः। उदासीनबुद्धेरिति कर्मधारयः॥दुःखहेत्विति॥ दुःखहेतुश्चासौ कण्टकस्पर्शश्चेति विग्रहः । तस्य बुद्धेरित्यर्थः ॥

तत्रेति ॥ बुद्धिमत्पूर्वकत्वे साध्ये ॥ तस्य॰ अनित्यप्रयत्नस्य ॥ प्रयोजकत्वे वोदासीनबुद्धेर्निवृत्तिप्रसङ्ग इति भावः । तदनेन प्रबन्धेन यो बुद्धिमत्पूर्वकमिति साध्य प्रतिजानीते, तदनुकूलतया परिहृतम् । यदा तु सकर्तृकमिति प्रधानीभूतकृतिविषयाप्रधानीभूतबुद्धिमत्पूर्वकत्वं प्रतिज्ञायते, तदानीमनित्यप्रयत्नस्योपाधित्वशङ्काऽपि नास्तीत्याह ॥ बुद्धिमदिति ॥

ननु प्रधानीभूतकृतिपूर्वकत्वसाध्यपक्षे बुद्धिरप्रधानीभूता कुतः सिद्ध्येत् ? । न हि यत्नात्तत्सिद्धिः । शरीरसम्बन्धे ज्ञानगतकार्यत्ववद् बुद्धिसम्बन्धेऽपि प्रयत्नगतकार्यत्वस्योपाधेः सुवचत्वात् । तथा च कृतिमात्रशाली कर्ता प्राप्त इत्यत आह—

**एतेन शरीरसम्बन्धे बुद्धिगतकार्यत्ववद् बुद्धिसम्बन्धे प्रयत्नगतकार्यत्वमुपाधिरिति निरस्तम् । यो हि बुद्ध्या शरीरवच्छरीरनिवृत्त्या बुद्धिनिवृत्तिवद्वा प्रयत्नेन बुद्धिं बुद्धिनिवृत्त्या प्रयत्ननिवृत्तिं साधयेत्, स एवं कदाचिदुपालभ्यः । वयं त्ववगतहेतुभावं क-**

लितसकलशक्तिकारकप्रयोक्तारं कार्यादेवानुमिमाना नैवमास्कन्दनीयाः । तत्र तस्यानुपाधित्वात् । न च प्रयत्न आत्मलाभार्थमेव मतिमपेक्षते । विषयलाभाऽर्थमप्यपेक्षणात् । ततः प्रयत्नाद् बुद्धिः । तन्निवृत्तेश्च प्रयत्ननिवृत्तिः सिद्ध्यत्येवेति विस्तृतमन्यत्र । कार्यबुद्धिनिवृत्त्या तु कार्य एव प्रयत्नो निवर्त्तते, न नित्यः । नित्ये च प्रयत्ने नित्यैव बुद्धिः प्रवर्त्तते, नानित्या । न हि तया तस्य विषयलाभसम्भवः । शरीरादेः प्राक् तदसम्भवे देहानुपपत्तौ सर्वानुपपत्तेः । शरीराजन्यत्ववच्चानित्यप्रयत्नाजन्यत्वमिति संक्षेपः ॥

एतेनेति ॥ प्रयत्नानित्यत्वस्यानुपाधित्वेनेत्यर्थः । कार्यत्वादेकैकजन्यत्वं सिद्ध्यत् त्रितयजन्यत्वमपि सिद्ध्यति । आर्थस्तु समाजः । अत एव, ज्ञानादित्रयव्यतिरेकान्न कार्यव्यतिरेकः, किन्त्वेकैकव्यतिरेकादिति व्यर्थविशेषणत्वेन विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः । साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगमकत्वादित्यपास्तम् । ज्ञानाद्येकैकजन्यत्वस्यैव साध्यत्वात्, तथैव व्याप्तेरिति भावः ॥

तत्रेति ॥ ज्ञानाद्येकैकजन्यत्वे साध्ये इत्यर्थः । तस्य, प्रयत्नगतकार्यत्वस्येत्यर्थः । किञ्च, यदि प्रयत्नेन बुद्धिः स्वोत्पत्त्यर्थमेवापेक्ष्यते, तदा प्रयत्नगतकार्यत्वमेवोपाधिः स्यात् । न चैवम् । प्रयत्नस्य निर्विषयत्वेन ज्ञानविषयेषु कार्यजनकमिति तदर्थं बुद्ध्यपेक्षा स्यादेवेत्याह ॥ न च प्रयत्न इति ॥ तथापि नित्या बुद्धिः कुतः सिद्ध्यतीत्याह ॥ नित्ये च प्रयत्न इति ॥ न हीति ॥ बुद्ध्यनित्यत्वे तद्धेतुशरीरात् प्राक् तदभावे शरीरोत्पत्तिरेव न स्यादिति कदाऽपि सा बुद्धिर्न जायेतेत्यर्थः। अनित्यप्रयत्नाजन्यत्वात् क्षित्यादेरकर्तृकत्वे साध्ये शरीराजन्यत्ववद्व्यर्थविशेषणत्वमित्याह ॥ शरीराजन्यत्ववदिति ॥

तर्कापरिशुद्धिश्च यदि प्रतिकूलतर्काप्रतीघातस्तदा तेषां यदि ईश्वरः कर्त्ता स्याच्छरीरी स्यादित्यादीनां तर्काणामीश्वरसिद्ध्य-

सिद्धिभ्यां व्याघातेनाभासत्वान्न दूषणत्वमित्याह—

**तर्काभासतयाऽन्येषां तर्काशुद्धिरदूषणम् ॥**
**अनुकूलस्तु तर्कोऽत्र कार्यलोपो विभूषणम् ॥ ३ ॥**

**कारकव्यापारविगमे हि कार्यानुत्पत्तिप्रसङ्गः । चेतनाचेतनव्यापारयोर्हेतुफलभावावधारणात्कारणान्तराभावे इव कर्त्रभावे कार्यानुत्पत्तिप्रसङ्गः । कर्तुरपि कारणत्वात् ॥**

यस्त्वाह,प्रत्यक्षानुपलम्भाभ्यां तदुत्पत्तिनिश्चयो दृश्ययोरेव, न त्वदृश्ययोः । प्रत्यक्षस्यानुपलम्भस्य च तावन्मात्रविधिनिषेधसमर्थत्वात् । धूमाग्निवत्, कम्पमारुतवच्च । न हि धूमः कार्योऽनलस्येति उदर्यस्यापि, न हि शाखाकम्पो मातरिश्वन इति स्तिमितस्यापि स्यात् । किन्तु भौमस्पृश्ययोरेव । तथेहापि शरीरवत एव कारणत्वमवगन्तुमुचितं, नान्यस्येति ॥

तदसत् । प्रत्यक्षाऽनुपलम्भौ हि दृश्यविषयावुपायस्तदुत्पत्तिनिश्चये । न तु दृश्यतैव तत्रापेया । किन्नाम दृश्याश्रितं सामान्यद्वयम् । तदालीढस्य हि तदुत्पत्तिनिश्चये दृश्यमदृश्यं वा सर्वमेव तज्जातीयं तदुत्पत्तिमत्तया निश्चितं भवति । यथा स्पर्शरूपरसगन्धानामुत्तरोत्तरनिमित्ततायां तव, अस्माकञ्चातीन्द्रियसमवायादिसिद्धौ । नचेदेवमुदाहृतयोरेव दहनपवनयोरालोकरूपवतोस्तदुत्पत्तिनिश्चये कथमनालोकनिरस्तरूपयोः सिद्धिर्येदुदर्यस्तिमितसाधारणी सिद्धिः स्यादिति । तद्भवेदप्येवं यदि शरीरादिकं विना कार्यमिव भौमं स्पर्शवद्वेगवन्तश्च विनाऽग्निमात्रात्

पवनमात्राद्वा धूमकम्पौ स्यालाम् । न त्वेवम् । नचैवं चेतनव्यभिचारोऽपि शक्याऽभिधान इत्यलं बालप्रलापानां समाधानैः ॥

तदुत्पत्तेरासिद्धावपि तत्तदुपाधिविधूननेन स्वाभाविकत्वस्थितौ यदि कर्त्तारमतिपत्य कार्यं स्यात् स्वभावमेवातिपतेदिति कार्यविलोपप्रसङ्ग इति । एतच्च सर्वमात्मतत्त्वविवेके निपुणतरमुपपादितमिति नेह प्रतन्यते । एवञ्च सिद्धे प्रतिबन्धे न प्रतिबन्ध्यादेः क्षुद्रोपद्रवस्यावकाशः । प्रतिबन्धसिद्धाविष्टापादनात् । तदसिद्धौ तत एव तत्सिद्धेरप्रसङ्गादिति ॥ ननु तस्य सर्वदा सर्वत्राविशेषे कार्यस्य सर्वदोत्पत्तिप्रसङ्ग इति निरपेक्षेश्वरपक्षे दोषः, सापेक्षे उपेक्षणीय एवास्त्विति बालस्य प्रदीपकलिकाक्रीडयैव नगरदाहः । तन्न । स्थैर्यभाजो जगत एवाकारणत्वप्रसङ्गात् । ओमिति ब्रुवतः सौगतस्य दत्तमुत्तरं प्राक् ॥

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥

तमिममर्थमागमः संवदति, विसंवदति तु परेषां विचारम्—

विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यां धमति सम्पतत्रै-
र्द्यावाभूमी जनयन् देव एकः ॥

अत्र प्रथमेन सर्वज्ञत्वं, चक्षुषा दृष्टेरुपलक्षणात् । द्वितीयेन सर्ववक्तृत्वं, मुखेन वागुपलक्षणात् । तृती-

येन सर्वसहकारित्वं, बाहुना सहकारित्वोपलक्षणात् । चतुर्थेन व्यापकत्वं, पदा व्याप्तेरुपलक्षणात् । पञ्चमेन धर्माधर्मलक्षणप्रधानकारणत्वं, तौ हि लोकयात्रा-वहनाद् बाहू । षष्ठेन परमाणुरूपप्रधानाधिष्ठेयत्वं, ते हि गतिशीलत्वात् पतत्त्रव्यपदेशाः, पतन्तीति । स-न्धमति, सञ्जनयन्निति च व्यवहितोपसर्गसम्बन्धः । तेन संयोजयति समुत्पादयन्नित्यर्थः । द्यावा इत्यूर्ध्व-सप्तलोकोपलक्षणं, भूमीत्यधस्तात्, एक इत्यनादिने-ति । स्मृतिरपि—अहं सर्वस्य प्रभवो मत्तः सर्वं प्रव-र्त्तते, इत्यादि । एतेन ब्रह्मादिप्रतिपादका आगमा बोद्धव्याः ॥

तर्काभासतयेति ॥ अथानुकूलतर्काभावरूपा सा ? । तत्राह ॥ अनुकूलस्त्विति ॥ कर्त्तुः कारणस्याभावे कार्यं न स्यादित्येवानुकूल-स्तर्क इत्यर्थः ॥

ननु कर्त्रभावेऽपि कारणान्तरव्यापारात् कार्यं स्यादित्यत आह ॥ कारकव्यापारेति ॥ कारकान्तरव्यापारं प्रति चेतनव्यापारस्य हेतु-त्वात् कर्त्रभावे सोऽपि न स्यादित्यर्थः । कारणान्तरव्यापारसत्त्वेऽपि कर्त्रभावे कार्यं न स्यात् यत्किञ्चित्कारणाभावस्य कार्यानुत्पत्ति-व्याप्यत्वादित्याह ॥ कारणान्तरेति ॥

सौगतमतमाह ॥ यस्त्विति ॥ कृतिमात्रकार्यमात्रयोर्नान्वयव्यतिरे-काभ्यां व्याप्तिग्रहः, त्वन्मते व्यापककृतेः सत्त्वेनायोग्यकृतेर्व्यतिरेका-ऽनिरूपणात् । यदि च कृतिमात्रेण व्याप्तिग्रहाददृश्यकर्तृसिद्धिः, तदावह्निमात्रव्याप्यधूमाददृश्यजाठर्यादिवह्निरपि सिध्येत् । शाखाकम्पे चायोग्यस्यापि स्तिमितवायोः कारणताग्रहश्च स्यादित्यर्थः ॥

कृतिविशेषकार्यविशेषयोरन्वयव्यतिरेकग्रहो बाधकं विना कृति-मात्रकार्यमात्रयोर्व्याप्तिग्रहोपायः । न तु पक्षधर्मतालभ्यविशेषयोरन्व-यादिग्रहः । यथा वह्निधूमविशेषयोरन्वयादिना तत्सामान्ययोरपि व्याप्तिग्रहः, अन्यथाऽनुमानमात्रोच्छेदादित्याह ॥ प्रत्यक्षानुपलम्भा-

विति ॥ अन्यथा पाकं प्रत्यालोकात्मकस्यैव वह्नेः कम्पं प्रति रूपवत एव दण्डादेः प्रत्यक्षानुपलम्भाभ्यां कारणत्वनिश्चयादनालोकात्मकजाठर्यदहनस्य निरस्तरूपस्य पवनस्य च कथं सिद्धिः स्यादित्याह ॥ न चेदेवमिति ॥ उदाहृतयोः पूर्वोक्तयोरित्यर्थः । दहनपवनयोरनालोकनिरस्तरूपयोः कुतः सिद्धिरालोकरूपवतोरेव तदुत्पत्तिनिश्चये सतीति योजना । आलोकवत एव वह्नेर्धूमोत्पत्तिनिश्चये रूपवत एव हस्तादेर्लोष्टादौ कम्पनिश्चये सतीत्यर्थः । अदृश्यवह्नेर्धूमानुत्पत्तेः पवनमात्राच्च कम्पानुत्पत्तेस्तत्र दृश्यत्वमेव तन्त्रमिति न धूमाददृश्यवह्निसिद्धिर्न वा कम्पात् पवनमात्रस्यानुद्भूतस्पर्शस्य सिद्धिरित्याह ॥ न त्विति ॥ कारणत्वसिद्धावपि प्रकारान्तरेण कार्यलोपप्रसङ्गं वक्तुमाह ॥ तदुत्पत्तेरिति ॥ ननूपाधिविधूननमेव कथमित्याह ॥ एतच्चेति ॥ प्रतिबन्ध्यादेरिति ॥ शशो पशुत्वाद् दृश्यशृङ्गबाधेऽप्यऽदृश्यशृङ्गसिद्धिरित्यादेरित्यर्थः ॥ प्रतिबन्धसिद्धाविति ॥ वस्तुतो विपक्षबाधकाभावाद्व्याप्त्यभाव इत्यर्थः । प्रकृतादर्थादर्थान्तरं शृङ्गत्वस्य योग्यसंस्थानव्यङ्ग्यत्वेनायोग्यं शृङ्गं विरोधाच्छङ्कितुमप्यशक्यं शशे शृङ्गस्यात्यन्ताभाव इति सर्वेषामबाधितप्रत्यक्षबाधश्चेति भावः॥ तत एव, प्रतिबन्धासिद्धेरेवेत्यर्थः । अप्रसङ्गः, शशशृङ्गादेरित्यर्थः ॥ दत्तमिति॥कार्यस्याहेतुकत्वे कादाचित्कत्वानुपपत्तिरित्यादिनेत्यर्थः॥

नन्वागमादेवेश्वरसिद्धौ तत्र न्यायप्रदर्शनं व्यर्थमित्यत आह ॥ आर्षमिति ॥ तर्कानुसन्धानं विनाऽऽर्षधर्मोपदेशो तात्पर्यमेव निश्चेतुमशक्यमित्यर्थः ॥ यद्वा, आगमाविरोधं न्यायमाह ॥ आर्षमिति ॥ अस्मन्न्याये नागमविरोधोऽपि तु तत्संवादः, परोक्तन्याये तु नैवमित्याह ॥ तमिममिति ॥ व्यवहितेति ॥ व्यवहिताश्चेत्यनेन उपसर्गसंज्ञाविधानादिति भावः ॥ एतेन ब्रह्मादीति ॥ ब्रह्मादिशरीरमधिष्ठाय ईश्वर एव जगत् सृजतीत्यर्थः ॥

**आयोजनात् खल्वपि—**

**स्वातन्त्र्ये जडनाशानिर्नादृष्टं दृष्टघातकम् ॥**
**हेत्वभावे फलाभावो विशेषस्तु विशेषवान् ॥ ४॥**

**परमाण्वादयो हि चेतनायोजिताः प्रवर्त्तन्ते अचे-**

तनत्वाद् वास्यादिवत्। अन्यथा कारणं विना कार्यानुत्पत्तिप्रसङ्गः । अचेतनक्रियायाश्चेतनाधिष्ठानकार्यत्वावधारणात् । क्रियाविशेषविश्रान्तोऽयमर्थो, न तु तन्मात्रगोचरः। चेष्टा हि चेतनाधिष्ठानमपेक्षतेइतिचेत् । अथ केयं चेष्टा नाम ? । यदि प्रयत्नवदात्मसंयोगाऽसमवायिकारणिका क्रिया, प्रयत्नमात्रकारणिकेति वा विवक्षितम् । तन्न । तस्यैव तत्रानुपाधित्वात् । अथ हिताहितप्राप्तिपरिहारफलत्वं तत्त्वम् । तन्न । विषभक्षणोद्बन्धनाद्यव्यापनाद् इष्टानिष्टप्राप्तिपरिहारफलत्वमितिचेत् । कर्त्तारं प्रत्यन्यं वा ?। उभयथाऽपि परमाण्वादिक्रियासाधारण्यादविशेषः । भ्रान्तसमीहाया अतथाभूताया अपि चेतनव्यापारापेक्षणाच्च । शरीरसमवायिक्रियात्वं तदितिचेन्न । मृतशरीरक्रियाया अपि चेतनपूर्वकत्वप्रसक्तेः । जीवत इति चेन्न । नेत्रस्पन्दादेश्चेतनाधिष्ठानाभ्युपगमप्रसङ्गात् । स्पर्शवद्द्रव्यान्तराप्रयोगे सतीतिचेन्न । ज्वलनपवनादौ तथाभावाभ्युपगमापत्तेः । शरीरस्य स्पर्शवद्द्रव्यान्तराप्रयुक्तस्येतिचेन्न । चेष्टयैव शरीरस्य लक्ष्यमाणत्वात् । सामान्यविशेषश्चेष्टात्वं, यत उन्नीयते प्रयत्नपूर्विकेयं क्रियेति चेन्न । क्रियामात्रेणैव तदुन्नयनात् । भोक्तृबुद्धिमत्पूर्वकत्वं यत इतिचेत् तर्हि तद्विश्रान्तत्वमेव तस्य । न चैतावतैव क्रियामात्रं प्रत्यचेतनमात्रस्य चेतनाधिष्ठानेन व्याप्तिरपसार्यते । विशेषस्य विशेषं प्रति प्रयोजकतया सामान्यव्याप्तिं प्रत्यऽविरोधकत्वात् । अन्यथा सर्वसामान्यव्याप्तेरु-

च्छेदादित्युक्तम् ॥

खल्वपीति निपातसमुदायः, उदाह्रियते-इत्यर्थे वर्त्तते, न समुच्चयार्थः।स, साध्यो विश्वविदव्यय इत्यनेनान्वीयते इत्येके । साध्यते इत्यनुवर्त्तते इत्यन्ये । एवमग्रेऽपि ॥

आ युज्यते संयुज्यतेऽन्योन्यं द्रव्यमनेनेत्यायोजनं द्व्यणुकारम्भकसंयोगजनकं सर्गाद्यकालीनपरमाणुकर्मात्र विवक्षितम् । तद् यदि स्वप्रयत्नादेव तेषां स्यात्, तदा परमाणूनामचैतन्यानुपपत्तिरित्याह॥ स्वातन्त्र्ये इति ॥ यदि च प्रयत्ननिरपेक्षाददृष्टादेव तत् स्यात्, तदा द्व्यणुकादीनामपि तत एवोत्पादः स्यादिति हेत्वन्तरोच्छेद इत्याह ॥ नादृष्टमिति ॥ चेतनव्यापारसहितात्तस्मादिति भावः । तथाच सर्गाद्यकालीनद्व्यणुकोत्पादकं कर्म स्वसमानकालीनप्रयत्नजन्यं कर्मत्वाच्चेष्टावदिति मानार्थः । विपक्षे किं बाधकमित्याह ॥ हेत्वभावे इति ॥ हेतोश्चेतनव्यापारस्यान्यत्रोपलब्धस्याभावे क्रियारूपफलाभाव इत्यर्थः।ननु चेष्टारूपः क्रियाविशेषस्तथा, न तु क्रियामात्रमित्यत आह॥ विशेषस्त्विति ॥ चेष्टा हि भोक्तृगतप्रयत्नस्य प्रयोज्या, न तु प्रयत्नमात्रस्येत्यर्थः ॥

तर्कोपकार्यं मानमाह ॥ परमाण्वादयो हीति ॥ आयोजिता उत्पादितकर्माणः प्रवर्त्तन्ते कार्यमारभन्ते इत्यर्थः । विशेषणीभूतकर्मपक्षत्वे पूर्वदर्शितानुमाने तात्पर्यम् । विशेषस्त्वित्यादिनिराकार्यं चेष्टात्वमुपाधिमाह ॥ क्रियाविशेषेति ॥ तस्यैवेति ॥ प्रयत्नवदात्मसंयोगाऽसमवायिकारणकत्वमेव हि परमाणुक्रियायां चेतनायोजितत्वमिति साध्यम् । तच्च नोपाधिः । साधनव्यापकत्वादित्यर्थः ॥ विषेति ॥ विषभक्षणादिक्रियाया अहितमरणादिप्रापकत्वादित्यर्थः ॥ इष्टेति ॥ विषभक्षणाद्यनुकूलक्रियाया अपि इच्छाविषयविषभक्षणादिप्रापकत्वमस्त्येव, इच्छां विना तत्र प्रवृत्त्यभावादित्यर्थः ॥ उभयथाऽपीति ॥ परमाण्वादिक्रियायास्तत्कर्तुरीश्वरस्याऽस्मदादेश्चेच्छाविषयार्थहेतुत्वादित्यर्थः । तथाच साधनव्यापकत्वादनुपाधित्वमिति भावः ॥

साध्याव्यापकत्वमप्याह ॥ भ्रान्तेति ॥ भ्रमप्रवृत्तस्पन्दस्येष्टरजताप्रापकत्वादनिष्टशुक्त्यपरीहारकत्वाच्च तत्र साध्याव्यापकत्वादित्यर्थः। न च रजतत्वेनेच्छाविषयस्य शुक्तेः प्रापकत्वमस्त्येवेतिवाच्यम् । येन

रूपेणेष्टं तादूप्येण प्राप्तेर्विवक्षितत्वादिति भावः ॥ मृतेति ॥ वाय्वाऽऽदिना मृतशरीरक्रियायां साध्याव्याप्तेरित्यर्थः । एतच्च समव्याप्तोपाध्यभिप्रायेण । मृतेत्युपलक्षणं, जीवशरीरस्याऽपि वायुवशात् क्रियायां तथात्वमिति भावः । विषमव्याप्तोपाधिपक्षे तु शरीरावयवक्रियायां साध्याव्यापकत्वं मन्तव्यम् ॥ नेत्रेति ॥ इदमपि दूषणं समव्याप्तोपाधिपक्षे । विषमव्याप्ते तु करादिक्रियायां साध्याव्यापकम् ॥ स्पर्शवदिति॥नेत्रादिस्पन्दनन्तु स्पर्शवद्वायुनोदनजन्यमिति नोक्तदोष इत्यर्थः ॥ ज्वलनेति ॥ त्वन्मते ज्वलनादिक्रिया न प्रयत्नजन्या, किन्त्वदृष्टवदात्मसंयोगजन्येत्यतस्तत्रापि समव्याप्तोपाधिपक्षे साध्यापत्तिरित्यर्थः। चेष्टयैवेति ॥ चेष्टाश्रयः शरीरमिति लक्षणपक्षेऽन्योन्याऽऽश्रय इत्यर्थः ॥ लक्षणान्तरे तु करादिक्रियायां साध्याव्याप्तिरिति भावः ॥ सामान्येति ॥ अतो नोक्तदोष इति भावः । तत्र मानमाह ॥ यत इति ॥ क्रियामात्रेणेति ॥ क्रियामात्रस्यैव मया प्रयत्नजन्यत्वानुमापकत्वाङ्गीकारादिति न तेनैषा जातिः सिद्ध्यतीत्यर्थः ॥ विशेषस्येति ॥ क्रियाप्रयत्नयोः सामान्यतः कार्यकारणभावनिश्चये साध्याऽव्यापकत्वमावश्यकमिति भावः ॥ यद्वा, प्रयत्नवदात्मसंयोगजसंयोग एव साध्याव्यापकत्वमिति भावः ॥

ननु परमाणवो न चेतनाधिष्ठिताः प्रवर्त्तन्ते शरीरेतरत्वादिति सत्प्रतिपक्षता स्यादित्यत आह—

**एतेनाऽशरीरत्वादिना सत्प्रतिपक्षत्वमपास्तम् ।**

**अत्राप्यागमसंवादः—**

**यदा स देवो जागर्त्ति तदेदं चेष्टते जगत् ।**
**यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥**
**अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।**
**ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥**
**मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।**
**तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च, इत्यादि ॥**

**अत्र जागरस्वापौ सहकारिलाभालाभौ । ईश्वर-**

प्रेरणायामज्ञत्वमप्रयतमानत्वञ्च हेतू दर्शितौ परमाण्वादिसाधारणौ। स्वर्गश्वभ्रे चेष्टानिष्टोपलक्षणे। एतदेव सर्वाधिष्ठानमुत्तरत्र विभाव्यते, मयेत्यादिना। न केवलं प्रेरणायामहमधिष्ठाता, अपितु प्रतिरोधेऽपि। यो हि यत्र प्रभवति, स तस्य प्रेरणावद्धारणेऽपि समर्थः। यथाऽर्वाचीनः शरीरप्राणप्रेरणधारणयोरिति दर्शितं नपामीत्यादिना ॥

धृतेः खल्वपि ॥ क्षित्यादि ब्रह्माऽण्डपर्यन्तं हि जगत् साक्षात् परम्परया वा विधारकप्रयत्नाधिष्ठितं गुरुत्वे सत्यऽपतनधर्मकत्वाद्वियति विहङ्गमशरीरवत् तत्संयुक्तद्रव्यवच्च। एतेनेन्द्राग्नियमादिलोकपालप्रतिपादका अप्यागमा व्याख्याताः। सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः, आत्मैवेदं सर्वमिति। यथैक एव मायावी अश्वो वराहो व्याघ्रो वानरः किन्नरो भिक्षुस्तापसो विप्र इत्यादि ॥

अदृष्टादेव तदुपपत्तेरन्यथासिद्धमिदमितिचेत्। तद्भावेऽपि प्रयत्नान्वयव्यतिरेकानुविधानेन तस्यापि स्थितिं प्रति कारणत्वात्। कारणैकदेशस्य च कारणान्तरं प्रत्यनुपाधित्वात्। उपाधित्वे वा सर्वेषामकारणत्वप्रसङ्गात्। शरीरास्थितिरेवं, न त्वन्यस्थितिरितिचेत्। न। प्राणेन्द्रिययोः स्थितेरव्यापनात्। प्राङ्न्यायेनापास्तत्वाच्च। अत्राप्यागमः। 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः' इति। प्रशासनं दण्डभृतः प्रयत्नः ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः, इति स्मृतिः। अत्रोत्तमत्वमसंसारित्वं सर्वज्ञत्वादि च। परमत्वं सर्वोपास्यता। लोकत्रयमिति सर्वोपलक्षणम्। आवेशो ज्ञानचिकीर्षाप्रयत्नवतः संयोगः। भरणं धारणम्। अव्ययत्वमागन्तुकविशेषगुणशून्यत्वम्। ऐश्वर्यं संकल्पाप्रतिघातः—इति। एतेन कूर्मादिविषया अप्यागमा व्याख्याताः॥

संहरणात् खल्वपि। ब्रह्माण्डादि द्व्यणुकपर्यन्तं जगत् प्रयत्नवद्विनाश्यं विनाश्यत्वात् पाट्यमानपटवत्। अत्राप्यागमः—

एष सर्वाणि भूतानि समभिव्याप्य मूर्त्तिभिः।
जन्मवृद्धिक्षयैर्नित्यं सम्भ्रामयति चक्रवत्॥
सर्वभूतानि कौन्तेय, प्रकृतिं यान्ति मामिकीम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्,

इत्यादि। एतेन रौद्रमंशं प्रतिपादयन्तोऽप्यागमा व्याख्याताः॥

एतेनेति॥ शरीरेतरक्रियायाश्चेष्टात्वाभावाद्भोक्तृप्रयत्नजन्यत्वं निवर्त्तते, क्रियामात्रे तु प्रयत्नजन्यत्वं स्यादेवेत्यर्थः। 'यदा स देव' इत्यादिपरकीयविचारे आगमविरोधप्रदर्शनम्॥ अध्यक्षेण अधिष्ठात्रा प्रकृतिः परमाणुः॥ क्षित्यादीति॥ क्षित्यादिकं प्रयत्नप्रतिबद्धपतनं गुरुत्वे सत्यऽपातित्वादित्यर्थः। विहगादिसंयुक्तद्रव्यान्तरेण व्यभिचारनिरासाय तत् साध्येऽन्तर्भावयति॥ परम्परया वेति॥ तत्र दृष्टान्तमाह॥ तत्संयुक्तेति॥ एतेन धारकप्रयत्नधृतत्वव्युत्पादनेन॥ व्याख्याताः॥ मुख्यार्थतयेति शेषः। नन्विन्द्रादिदेवताभेदप्रतिपादकागमस्य मुख्यार्थतायामभेदप्रतिपादकागमविरोध इत्यत आह॥ सर्वावेशेति॥ आवेशो ज्ञानादिमत्संयोग इति वक्ष्यते॥ तद्भावेऽपीति॥ पतनप्रतिबन्धकसंयोगभेद स्थितिः। अत एव वायु-

संयोगादाकाशपत्रस्थितिवत् सा स्यादित्यपास्तम् ॥ अनुपाधित्वादिति ॥ साधनव्यापकत्वादित्यर्थः ॥ प्राक्न्यायेन ॥ विशेषश्च विशेषवानिति न्यायेनेत्यर्थः। किमिदं शरीरत्वं यत्साक्षात् प्रयत्नाधिष्ठितत्वे परमाणूनां प्रसज्यते इत्यादिना वेत्यर्थः । धृत्यादेरित्यादिपदसंग्राह्यमाह ॥ संहरणादिति ॥ ब्रह्माण्डादीति ॥ ब्रह्माण्डादिकं स्वजनकप्रयत्नसमानकालीनचरमकारणनाशप्रतियोगीति साध्यार्थः ॥ सर्वभूतानीति ॥ परमाणुमात्रावशिष्टानीत्यर्थः ॥

ननु नाशविशेष एव प्रयत्नपूर्वकोऽन्यस्त्वन्यथाऽपि भविष्यतीत्याशङ्क्य वृत्तसमाधानं कुर्वाण एव ग्रन्थलाघवाय वर्णिष्यमाणेऽप्यऽतिदिशति—

पदात् खल्वपि—

कार्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः ॥
विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्ववत् ॥ ५ ॥

पदशब्देनात्र, पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एवोच्यते। अतोऽपीश्वरसिद्धिः। तथाहि । यदेतत् पटादिनिर्माणनैपुण्यं कुविन्दाऽऽदीनां, वाग्व्यवहारश्च व्यक्तवाचां, लिपितत्क्रमव्यवहारश्च बालानां,स सर्वःस्वतन्त्रपुरुषविश्रान्तो व्यवहारत्वात् । निपुणतराशिल्पिनिर्मितापूर्वघटघटनानैपुण्यवत्, चैत्रमैत्रादिपदवत्, पत्राक्षरवत्, पाणिनीयवर्णनिर्देशक्रमवच्चेति ॥

आदिमान् व्यवहार एवम्, अयन्त्वनादिरन्यथाऽपि भविष्यतीतिचेन्न । तदसिद्धेः । आदिमत्तामेव साधयितुमयमारम्भः । न चैवं संसारस्यानादित्वभङ्गप्रसङ्गः । तथापि तस्याविरोधात् । न हि चैत्रादिव्यवहारोऽयमादिमानिति भवस्याप्यनादिता नास्ति

तदनादित्वे वा न चैत्रादिपदव्यवहारोऽप्यादिमानिति । अस्त्वर्वाग्दर्शी कश्चिदेवात्र मूलमिति चेन्न । तेनाऽशक्यत्वात् । कल्पादावादर्शाभासस्याप्यऽसिद्धेः । साधितौ च सर्गप्रलयौ ॥

ननु व्यवहारयितृवृद्धः शरीरी समधिगतो, न च ईश्वरस्तथा, तत्कथमेवं स्यान्न । शरीरान्वयव्यतिरेकाऽनुविधायिनि कार्ये तस्यापि तद्वत्त्वात् । गृह्णाति हि ईश्वरोऽपि कार्यवशाच्छरीरमन्तरान्तरा, दर्शयति च विभूतिमिति । अत्राप्यागमः—

पिताऽहमस्य जगतो माता धाता पितामहः ॥

तथा,

यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्, इति॥

एतेन, नमः कुलालेभ्य कर्मारेभ्य इत्यादि यजूंषि बोद्धव्यानि ॥

कार्यत्वादिति ॥ यथा धृतिविनाशयोः कार्यकारणभावो विपक्षे बाधको निरुपाधित्वग्राहकः । तथा पदस्याऽपि स एव तद्ग्राहक इत्यर्थः । न चादिमत्त्वमुपाधिः । प्रलये विच्छेदादनादित्वाभावेन साधनव्यापकत्वादित्याह ॥ विच्छेदेनेति ॥ प्रत्ययादिहेतुष्वपि पूर्ववत् कार्यकारणभाव एव विपक्षबाधक इत्यर्थः ॥

व्यक्तवाचो मनुष्याः॥ स्वतन्त्रेति ॥ तज्जातीयव्यवहारानुपजीवित्वं पुरुषस्य स्वातन्त्र्यम् । साध्येषु क्रमेण दृष्टान्ताः, निपुणेत्यादि ॥ आदिमानिति ॥ सादिव्यवहारत्वमुपाधिरित्यर्थः ॥ अन्यथाऽपीति ॥ स्वतन्त्रपुरुषं विनाऽपीत्यर्थः ॥ तथापीति ॥ पूर्वपूर्वसर्गेऽपि तज्जातीयव्यवहारस्येश्वरपूर्वकत्वादित्यनादित्वं न विरुध्यते इत्यर्थः । इदा-

नीन्तनापूर्वव्यवहारस्य सादित्वेऽपि, न भवस्यानादित्वं हीयते इत्याह ॥ न हीति ॥ तदनादित्वे इत्यत्रापि न हीत्यनुषज्यते ॥ आदर्शेति ॥ यद्व्यवहारं दृष्ट्वा व्यवह्रियते. सोऽपि नास्तीत्यर्थः ॥ शरीरान्वयेति ॥ ईश्वरस्यादृष्टाभावेऽपि तच्छरीरसाध्यहेतुकास्मदादिभोगसम्पादकाऽदृष्टादेवेश्वरस्य शरीरोत्पत्तिरिति भावः ॥ पिताऽहमस्येति ॥ अस्य जगतोऽहमेव पित्रादिरित्यर्थः ॥ यदि ह्यहमिति ॥ यदि ह्यहं न वर्त्तेयं, तदा लोक्यन्ते इति लोकाः प्रामाणिकव्यवहारा उत्सीदेयुरिति व्यवहितेनान्वयः । अत्र हेतुः, मम वर्त्मेति । एतेन, घटादिव्यवहारस्य स्वतन्त्रपुरुषपूर्वकत्वव्युत्पादनेन । कुलालादिदेहवत ईश्वरस्य तथा भावादित्यर्थः ॥

प्रत्ययपदं समाश्वासशक्तं तत्सम्बन्धि तद्विषयं प्रामाण्यं लक्षयतीत्याह —

प्रत्ययोऽपि ॥ प्रत्ययशब्देनात्र समाश्वासविषयप्रामाण्यमुच्यते । तथाच प्रयोगः । आगमसंप्रदायोऽयं कारणगुणपूर्वकः प्रमाणत्वात्, प्रत्यक्षादिवत् । न हि प्रामाण्यप्रत्ययं विना क्वचित् समाश्वासः । न चाऽसिद्धस्य प्रामाण्यस्य प्रतीतिः । न च स्वतः प्रामाण्यमित्यावेदितम् । न च नेदं प्रमाणं, महाजनपरिग्रहादित्युक्तम् । न चासर्वज्ञो धर्माधर्मयोः स्वातन्त्र्येण प्रभवति । न चासर्वज्ञस्य गुणवत्तेति निःशङ्कमेतत् ॥

श्रुतेःखल्वपि। तथाहि । सर्वज्ञप्रणीता वेदाः, वेदत्वात् । यत् पुनर्न सर्वज्ञप्रणीतं, नाऽसौ वेदो यथेतरवाक्यम् ॥

ननु किमिदं वेदत्वं नाम ? वाक्यत्वस्यादृष्टविषयवाक्यत्वस्य च विरुद्धत्वात् । अदृष्टविषयप्रमाणवाक्यत्वस्य चासिद्धेः । मन्वादिवाक्ये गतत्वेन विरोधात्तेतिचेन्न । अनुपलभ्यमानमूलान्तरत्वे सति महाजन-

परिगृहीतवाक्यत्वस्य तत्त्वात् । न ह्यस्मदादीनां प्रत्यक्षादि मूलम् । नाऽपि भ्रमविप्रलिप्से, महाजनपरिग्रहादित्युक्तम् । नापि परम्परैव मूलं, महाप्रलये विच्छेदादित्युक्तम् ॥

अन्वयतो वा । वेदवाक्यानि पौरुषेयाणि वाक्यत्वाद्, अस्मदादिवाक्यवत् । अस्मर्यमाणकर्तृकत्वान्नैवमितिचेन्न । असिद्धेः ॥

अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयते ॥

वेदान्तकृद्वेदविदेव चाहम्, इति स्मृतेः । तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे इत्यादिश्रुतिपाठकस्मृतेश्च ॥

अर्थवादमात्रमिदमितिचेन्न । कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात् । तथाचास्मरणे कालिदासादेरस्मरणात् । एवञ्च कुमारसम्भवादेरकर्तृकत्वप्रसङ्गः । अनैकान्तिकत्वं वा हेतोः ॥

प्रमाणान्तरागोचरार्थत्वात् सत्प्रतिपक्षत्वमितिचेन्न । प्रणेतारं प्रत्यसिद्धेः । अन्यं प्रत्यनैकान्तिकत्वात् । आकस्मिकस्मितबीजसुखानुस्मृतेः कारणविशेषस्यान्यं प्रति प्रमाणान्तरागोचरस्यापि तेनैव वक्त्रा प्रतिपाद्यमानत्वात् ॥

वक्तैव प्रकृते न सम्भवति । हेत्वभावे फलाभावात् । चक्षुरादीनां तत्रासामर्थ्यात् । अस्मदादीन्द्रियवत् । मनसो बहिरस्वातन्त्र्यात् । न । चेतनस्य ज्ञानस्येन्द्रियस्य मनसो वा पक्षीकरणे आश्रयासिद्धेः

प्रागेव प्रपञ्चनात्। नित्यनिराकरणे चासामर्थ्यात्॥

परमाण्वादयो न कस्यचित् प्रत्यक्षाः, तत्सामग्रीरहितत्वादिति चेन्न। द्रष्टारं प्रत्यसिद्धेः। अन्यं प्रति सिद्धसाधनात्॥

तथापि वाक्यत्वं न प्रमाणम्। अप्रयोजकत्वात्। प्रमाणान्तरगोचरार्थत्वप्रयुक्तं तत्र पौरुषेयत्वं, न तु वाक्यत्वप्रयुक्तम्। न। सुगताद्यागमानामपौरुषेयत्वप्रसङ्गात्। प्रमाणवाक्यस्य मत इति चेन्न। प्रणेतृप्रमाणान्तरगोचरार्थत्वस्य साध्यानुप्रवेशात्। स्वतन्त्रपुरुषप्रणीतत्वं हि पौरुषेयत्वम्। अर्थप्रतीत्येकविषयौ हि विवक्षाप्रयत्नौ स्वातन्त्र्यम्। मन्वादिवाक्यस्याऽपौरुषेयत्वप्रसङ्गाच्च। तदर्थस्य शब्देतरप्रमाणागोचरत्वात्। प्रयुज्यमानवाक्येतरगोचरार्थत्वमात्रमितिचेन्न। तस्य वेदेऽपि सत्त्वात्। एकस्याप्यर्थस्य शाखाभेदेन बहुभिर्वाक्यैः प्रतिपादनात्। अस्त्वेवं, न तु तेषां मिथोमूलमूलीभावइति चेन्न। उक्तोत्तरत्वात्॥

प्रत्ययशब्देनेति ॥ तथा चेति ॥ आगमस्य सम्प्रदायः प्रवाहः प्रमात्वप्रयोजकवाक्यार्थप्रमारूपगुणजन्यो, यथार्थविख्यापयिषादिवक्तृगुणजन्यो वा। प्रमाणशब्दत्वात्। लौकिकप्रमाणशब्दवदित्यऽर्थः। लक्षणाबीजं सम्बन्धमाह॥ न हीति॥ न च प्रमाणत्वमसिद्धं, प्रामाण्याज्ञाने पारलौकिके कर्मणि वेदबोधिते प्रेक्षावतां प्रवृत्त्यनुपपत्तेरित्याह॥न चेति॥तथापि तेन वक्तृगुणपूर्वकेणैव भाव्यमित्यसिद्धमित्यत आह॥न च स्वतइति॥तथापि वक्तुः सार्वज्ञ्यं कुतः सिद्ध्यतीत्याह ॥ न चेति ॥ तथाहीति ॥ यद्यपि परैः सर्वज्ञानङ्गीकारात्तत्प्रणीतत्वं परं प्रत्यसिद्धं, तथाप्यात्मत्वमसंसारिवृत्ति जातित्वात् पटत्ववत्। स चासंसारी किञ्चिद्वाक्यप्रणेता पुरुषत्वादिति साध्यप्रसिद्धौ, वेदा

असंसारिपुरुषप्रणीता इति साध्यम् ।न चास्मदाद्युच्चरिते वेदे व्यभिचारः । वेदज्ञानाजन्यज्ञानजन्यत्वस्य साध्यत्वादिति भावः॥ विरुद्धत्वादिति ॥ प्रतारकवाक्यस्याप्यदृष्टविषयत्वादित्यर्थः॥ मन्वादीति ॥ मन्वादिवाक्यस्याप्यदृष्टविषयप्रमाणत्वादित्यर्थः॥अनुपलभ्यमानेति ॥ मन्वादिवाक्ये च वेदस्यैव मूलान्तरस्योपलभ्यमानत्वादित्यर्थः ॥

ननु वाक्यत्वमसिद्धम् । समुदायस्याप्रतिपादकत्वात् । न च शाखासमुदायो वेदः । तस्य वेदनिरूप्यत्वात् । नापि महाजनानां वेदाकारानुगतव्यवहाराद्वेदत्वं जातिः । देवदत्तीयत्वानुमापकशब्दवृत्तिजातिभिः सङ्करप्रसङ्गात् । नापि स्वर्गकामादिशब्दः । स्मृत्यादौ तथात्वात् ॥

उच्यते।शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयाऽर्थकत्वे सति शब्दाजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्वम् । ईश्वरप्रमाया अजन्यत्वात् । वेदार्थस्यानुमानादिविषयत्वेऽप्यनुमानादेर्वेदोपजीवकत्वात् । स्मृत्यादीनां वेदसमानार्थत्वेऽपि शब्दजन्यधीजन्यत्वात् । वेदादर्थं प्रतीत्य तत्प्रणयनात् ॥

वाक्यादिति सङ्गृहीतं हेतुं व्याचष्टे ॥ अन्वयतो वेति ॥ ननु किं पौरुषेयत्वम् ? । न तदर्थधीजन्यत्वं, तदुच्चारणधीजन्यत्वं वा । अध्यापकतदुभयजन्यत्वेन सिद्धसाधनात् । नापि स्वतन्त्रपुरुषप्रणीतत्वम् । इदानीं पठ्यमाने वेदे तदभावात् । न च स्वतन्त्रपुरुषप्रणीतजातीयत्वं साध्यम् । आद्यस्मृत्यादौ व्यभिचारात् । तज्जातीयस्य स्वतन्त्रपुरुषप्रणीतत्वाभावात् । नाप्यर्थं प्रतीत्य तदर्थपरतया प्रतिसन्धीयमानपदत्वं पौरुषेयत्वम् । अर्थज्ञानवताऽध्यापकेन सिद्धसाधनात् ॥

अत्राहुः । सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं पौरुषेयत्वम् । आद्यस्मृतावपि तज्जातीयत्वान्न व्यभिचारः । यद्वा, वेदत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्ति । प्रमाणत्वावच्छेदकवाक्यधर्मत्वात् । स्मृतित्ववत् ॥

यज्ञादिति ॥ यज्ञो विष्णुः । ननु वेदे कर्तृस्मरणमर्थवादतया न मानम् । कार्यान्वितज्ञानजनकस्यैव पदस्य शक्तिग्रहादित्याह ॥ अर्थवादेति ॥ आदित्यो वै यूप इत्यादेरर्थवादस्य मुख्यार्थत्वे बाधकादप्रमाणत्वात् स्तुतिपरत्वेऽपि प्रकृते बाधकानां निरासादविध्यर्थस्या-

ऽपि मुख्यार्थत्वमेव। अन्यथा, यन्न दुःखेन सम्भिन्नमित्यादेरपि स्वार्थपरित्यागप्रसङ्गात्। कालिदासस्मरणेऽपि विध्यभावात् तत्काव्यस्याप्यकर्तृकत्वप्रसङ्गात्। सकर्तृकत्वे वा, तत्रैवायं हेतुरनैकान्त इत्याह ॥ कर्त्रस्मरणस्येति ॥ प्रमाणान्तरेति ॥ वेदा न पौरुषेयाः प्रमाणान्तरागोचरार्थत्वात्। यन्नैवं तन्नैवम्। यथा मन्वादिवाक्यमित्यर्थः। यदि वेदप्रणेतृप्रमाणान्तरागोचरार्थत्वं हेतुः, तदा तत्प्रणेतुरीश्वरस्य प्रत्यक्षगोचरत्वादसिद्धिः। अथ यस्य कस्यापि प्रमाणान्तरागोचरार्थत्वं, तदाऽनैकान्तिकमित्याह ॥ प्रणेतारमिति ॥ अनैकान्तिकत्वं स्पष्टयति ॥ आकस्मिकेति ॥ दृष्टकारणोपहारं विना जातस्मितस्य यद्बीजं सुखानुस्मृतिरूपं कारणं, तस्येत्यर्थः। सर्वज्ञो वेदवक्ता न सम्भावनाऽऽस्पदम्। वाक्यार्थज्ञानसामग्रीरहितत्वादित्याह ॥ वक्तेवेति ॥ ईश्वरो नातीन्द्रियार्थदर्शी पुरुषत्वात्, तज्ज्ञानं वा नातीन्द्रियविषयं ज्ञानत्वात्, तदिन्द्रियं वा नातीन्द्रियार्थग्राहि इन्द्रियत्वात्, तन्मनो वा नातीन्द्रिये प्रवर्त्तते मनस्त्वादित्यादयः प्रयोगाः प्रागेव निरस्ता इत्याह ॥ चेतनस्येति ॥ अपि च, सामग्र्यभावात् कार्यज्ञानाभावेऽपि अकार्यं ज्ञानं न निवर्त्तते इत्याह ॥ नित्येति ॥ उपाधिं शङ्कते ॥प्रमाणान्तरेति॥ अत्र साध्याव्यापकत्वमाह ॥ सुगतेति ॥ पक्षधर्मावच्छिन्नसाध्यव्यापकत्वादुपाधित्वं स्यादित्याह ॥ प्रमाणेति ॥ प्रणेत्रिति ॥ साध्यादभिन्नत्वे साध्याव्यापकत्वाद् भेदनिबन्धनत्वाच्च व्याप्यव्यापकभावस्येत्यर्थः। प्रमाणान्तरगोचरार्थत्वेन शब्देतरप्रमाणगोचरार्थत्वं विवक्षितं, मानान्तरगोचरार्थत्वं वा, मूलभूतमानान्तरगोचरार्थत्वं वा ?। आद्ये, मन्वादीति ॥ द्वितीयमाशङ्क्य निराकरोति ॥प्रयुज्यमानेति ॥ तृतीयं शङ्कते ॥ अस्त्वेवमिति ॥ मूलमूलीभावः, उपजीव्योपजीवकभावः ॥उक्तेति॥ प्रणेतृमूलभूतप्रमाणान्तरगोचरार्थत्वस्यासिद्धेरन्यं प्रत्यनैकान्तिकत्वादित्यादिनेत्यर्थः ॥

द्व्यणुकादिपरिमाणमनेकवृत्तिसङ्ख्याजन्यं, तस्याश्च द्वित्वादेरपेक्षाबुद्धित उत्पत्तिः, तदाश्रय ईश्वर इति साधयितुमाह—

**संख्याविशेषात् खल्वपि । द्व्यणुकत्र्यणुके तावत् परिमाणवती द्रव्यत्वात्। तच्च परिमाणं कार्यं कार्यगुणत्वात्। न च तस्य परमाणुपरिमाणं द्व्यणुकपरि-**

माणं वा कारणम्। नित्यपरिमाणत्वात्। अणुपरिमाणत्वाच्च। अन्यथा अनाश्रयकार्योत्पत्तिप्रसङ्गात्। द्व्यणुकस्य महत्त्वप्रसङ्गाच्च। त्र्यणुकवदण्वारभ्यत्वाविशेषात्। तत्र कारणबहुत्वेन महत्त्वे अणुपरिमाणस्यानारम्भकत्वस्थितेरणुत्वमेव महदारम्भे विशेष इत्यपि न युक्तम्। महतो महदनारम्भप्रसङ्गात्। अणुत्वमहत्त्वयोर्विरुद्धतया एकजातीयकार्यानारम्भकत्वसङ्गात्। बहुभिरपि परमाणुभिर्द्वाभ्यामपि द्व्यणुकाभ्यामारम्भप्रसङ्गाच्च ॥

एवं सति को दोष इति चेत् । परमाणुकार्यस्य महत्त्वप्रसङ्गः। कारणबहुत्वस्य तद्धेतुत्वात्। अन्यथा द्वाभ्यां त्रिभिश्चतुर्भिरित्यनियमेनाप्यण्वारम्भे तद्वैयर्थ्यप्रसङ्गात्। अणुत एव तारतम्याभ्युपगमस्तु संख्यामवधीर्य न स्यात्। अस्तु महदारम्भ एव त्रिभिरिति चेत् । न। महतः कार्यस्य कार्यद्रव्यारभ्यत्वनियमात्। तथापि वा तारतम्ये संख्यैव प्रयोजिकेति। न च प्रचयोऽपेक्षणीयोऽवयवसंयोगस्याभावात् ॥

तस्मात् परिमाणप्रचयौ महत एवारम्भकाविति स्थितिः। अतोऽनेकसंख्या परिशिष्यते। सा अपेक्षाबुद्धिजन्या,अनेकसंख्यात्वात्। न चास्मदादीनामपेक्षाबुद्धिः परमाणुषु सम्भवति । तद् यस्यासौ सर्वज्ञः। अन्यथा अपेक्षाबुद्धेरभावात् संख्याऽनुत्पत्तौ तद्गतपरिमाणानुत्पादेऽपरिमितस्य द्रव्यस्यानारम्भकत्वात् त्र्यणुकानुत्पत्तौ विश्वानुत्पत्तिप्रसङ्गः। अस्मदादीनामेवाऽऽनुमानिक्यपेक्षाबुद्धिरस्त्विति चेन्न । इतरेतराश्रयप्रसङ्गात्। जाते हि स्थूलकार्ये तेन परमाण्वाद्यनु-

**मानं, तस्मिन् सति द्व्यणुकादिक्रमेण स्थूलोत्पत्तिः । अस्त्वदृष्टादेव परिमाणं कृतमपेक्षाबुद्ध्येतिचेत् । न । अस्तु तत एव सर्वं, किं दृष्टकारणेनेत्यादेरसमाधेयत्व-प्रसङ्गादिति ॥**

द्व्यणुकेति ॥ कार्यगुणत्वादिति ॥ कार्यवृत्तिगुणत्वादित्यर्थः । ननु द्व्यणुके परमाणुपरिमाणात् त्र्यणुके च द्व्यणुकपरिमाणादेव परिमाणोत्पादोपपत्तेः किं द्वित्वादिसङ्ख्ययेत्यत आह ॥ न चेति ॥ आकाशपरिमाणवदिति शेषः । यदि च परः परममहत्परिमाणमेव न स्वीकुर्यात्, तदा हेत्वन्तरमाह ॥ अणुपरिमाणत्वादिति ॥

यद्यपि नात्र मनःपरिमाणं दृष्टान्तः, परमते मनसो विभुत्वात् । न चानारम्भकद्व्यणुकपरमाणुपरिमाणं दृष्टान्तः । तयोरपि कदाचिदारम्भकत्वात् । अवयवाऽणुपरिमाणस्य जनकत्वाऽभ्युपगमाच्च । अन्यथा नित्यवृत्तिसङ्ख्याया अप्यजनकत्वापत्तेः। तथापि प्रमाणबलेन मनसोऽणुत्वं साधयिष्यामीति तत्परिमाणमेव दृष्टान्त इति भावः ॥

अन्यथेति॥ कालादिमनसां परिमाणस्य परिमाणजनकत्वे तैर्द्रव्यैर्द्रव्यानारम्भादनाश्रयपरिमाणं जायेतेत्यर्थः । बाधकान्तरमाह ॥ द्व्यणुकस्येति ॥ अणुपरिमाणं यदि त्र्यणुके महत्त्वारम्भकं, द्व्यणुकेऽपि स्यादविशेषादित्यर्थः । त्र्यणुकेऽपि वा द्व्यणुकवदणुत्वापत्तिरिति भावः । यदि च त्र्यणुकमहत्त्वारम्भकं बहुत्वं, तदा तत्रैवाणुत्वमनादृत्य बहुत्वसङ्ख्यायाआरम्भकत्वसिद्धेर्द्व्यणुकपरिमाणस्यानारम्भकत्वं सिद्धमित्याह ॥ तत्रेति ॥ ननु द्व्यणुकपरिमाणे काचिज्जातिरस्ति तद्विशिष्टाणुत्वं महत्त्वजनकमिति नोक्तदोष इत्यत आह ॥ अणुत्वमेवेति ॥ एवं हि महत्त्वं महत्त्वारम्भकं न स्याद्व्यभिचारेण कारणत्वाभावादित्यर्थः । यद्वा, किमणुत्वं महत्त्वमेव जनयति, क्वचिदणुत्वमपि वा ? । तत्राद्यमाशङ्क्य दूषयति ॥ अणुत्वमेवेति ॥ अन्त्यं दूषयति ॥ अणुत्वमहत्त्वयोरिति ॥ अणुत्वमहत्त्वयोर्विरुद्धजातीयतयाऽन्योन्यपरिहारेण स्थितेर्व्यभिचारान्नैकमप्यारम्भकं स्यादित्यर्थः । ननु कारणभेदात् कार्यभेदः स्यादित्यत आह ॥ बहुभिरपीति ॥ यदि न संख्या कारणं, किन्त्वणुपरिमाणमिति शेषः ॥ परमाणुकार्यस्येति ॥ कारणबहुत्वस्याप्यन्यत्र महत्त्वहेतुत्वकल्पनाद् द्व्यणुककार्यवत्

परमाणुत्रयारब्धस्यापि बहुत्वहेतुकमहत्त्वोत्पादापत्तिरित्यर्थः । ननु परमाणुद्वयारब्धस्येवाणुत्रयारब्धस्याणुत्वमेव स्यादित्यत आह ॥ अन्यथेति ॥ तथा सति त्रित्वादिसंख्यावैयर्थ्यापत्तिरणुद्वयारब्धापेक्षया तद्विशिष्टारब्धे विशेषाभावादित्यर्थः। प्रत्येकं व्यभिचारादकारणत्वञ्च स्यादिति भावः । नन्वणूनां संख्यावैचित्र्यमणुपरिमाणतारतम्यभेदसम्पादनोपयोगि, परिमाणेऽवान्तरकारणभेदव्यङ्ग्यजातिभेदाच्च न व्यभिचार इत्यत आह ॥ अणुन एवेति ॥ तथापि तारतम्ये संख्यैव प्रयोजिका, संख्याभेदं विना समुदाये भेदकान्तराभावादित्यर्थः । परमाणुकार्यस्य महत्त्वप्रसङ्ग इत्यत्रेष्टापत्तिमाह ॥ अस्त्विति॥ त्रिभिः परमाणुभिरित्यर्थः ॥ महत इति ॥ अनन्यथासिद्धान्वयव्यतिरेकाभ्यां तथैव कारणत्वनिर्णयादित्यर्थः । ननु द्व्यणुकादिपरिमाणस्य परिमाणाजन्यत्वेऽपि प्रचयजन्यत्वं स्यात्, तस्यापि महत्त्वे कारणत्वादित्यत आह ॥ न चेति ॥

अतोऽनेकेति ॥ अत्रेदं तत्त्वम् । त्र्यणुकमहत्त्वं न परिमाणजन्यं संख्याप्रचयाजन्यमहत्त्वं प्रत्यवयवमहत्त्वेन कारणत्वात् । न त्ववयवपरिमाणत्वेन, परमाणुपरिमाणाद् द्व्यणुके महत्त्वापत्तेः। नापि जन्याऽवयवपरिमाणत्वेन, गौरवात् । नापि जन्याणुत्वेन, तथाऽदर्शनात् । महत्त्वविशेषेऽनियतहेतुकताऽऽपत्तेश्च । महत्त्वावान्तरजातिकल्पने गौरवम् । बहुत्वकल्पनञ्च प्रामाणिकम् । एवं द्व्यणुकपरिमाणं न महत्त्वजनकम् । अणुपरिमाणत्वात् । परमाणुपरिमाणवत्।अन्यथा तस्य महत्त्वजनकत्वे द्व्यणुकस्यापि महत्त्वप्रसङ्गः। किन्त्ववयवबहुत्वं, परिमाणप्रचयाजन्यमहत्त्वे अवयवबहुत्वेन कारणत्वकल्पनात् । एवं, द्व्यणुकपरिमाणं नाणुपरिमाणजन्यं परिमाणत्वाद्, अणुपरिमाणत्वाद्वा । न परिमाणजनकम्, अणुपरिमाणत्वाद्, द्व्यणुकपरिमाणवत् ॥

यत्तु नित्यपरिमाणत्वान्न तज्जनकं व्योममहत्त्ववदिति । तन्न, अवयवनित्यपरिमाणस्य जनकत्वाभ्युपगमात् । अन्यथा,नित्यवृत्तिसंख्याया अप्यजनकत्वापत्तेः। अतो द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वादित्यवयवबहुत्वाभावाद् द्वित्वमेव तज्जनकम् । यदि द्व्यणुकत्र्यणुकपरिमाणं परिमाणजन्यं स्यात्, तदा कारणपरिमाणापेक्षया उत्कृष्टं स्यान्महज्जन्यमहत्तरमहत्तमवदित्यणुपरिमाणतरतमत्वापत्तिः । उत्कर्षश्च नकारणपरिमाणा-

ऽपेक्षयाऽधिकदेशत्वं, येनेष्टापत्तिः, स्यात् । किन्तु तरवन्तकारण-परिमाणवाचकवाच्यत्वं, तत्प्रवृत्तिनिमित्तजातिमत्त्वं वा ॥

ननु परमाणुद्वित्वं न परिमाणजनकं नित्यवृत्तिसंख्यात्वाद्,अणुवृत्तिद्वित्वत्वाद्वा, व्योमद्व्यणुकवृत्तिद्वित्ववत् । एवं द्व्यणुकवृत्तिबहुत्वं न परिमाणजनकम्, अवयववृत्तिबहुत्वात्, परमाणुबहुत्ववत् । यथा त्र्यणुकमहत्त्वस्याणुजन्यत्वे द्व्यणुकस्यापि महत्त्वप्रसङ्गः, तथाऽणुवृत्तिसंख्याजन्यत्वेऽपि द्व्यणुकस्य महत्त्वप्रसङ्गः । यथा च परिमाणस्य स्वोत्कृष्टपरिमाणजनकत्वादणुतरत्वप्रसङ्गः, तथा संख्याया अपि समानाधिकरणपरिमाणोत्कृष्टपरिमाणारम्भकत्वप्रसङ्गः ॥

मैवम् । सर्गादौ परमाणुवृत्तिद्वित्वबहुत्वयोरसिद्धावाश्रयासिद्धेः सिद्धौ वा धर्मिग्राहकमानबाधात् । अथ द्व्यणुकपरिमाणं न द्वित्वजन्यं परिमाणत्वात्, त्र्यणुकमहत्त्वं नाणुवृत्तिबहुत्वजन्यं महत्त्वत्वात् परिमाणत्वाद्वेति चेत् । न । प्रसिद्धद्वित्वबहुत्वजन्यत्वे साध्ये सिद्धसाधनात्, अप्रसिद्धतन्निषेधे साध्याप्रसिद्धेरिति संख्यैव तज्जनिकेति वयम् ॥

साम्प्रदायिकास्तु— द्व्यणुकपरिमाणासमवायिकारणताग्राहकं मानं यद्यणुपरिमाणं विषयीकुर्यात् तदा परिमाणद्वयासमवायिकारणत्वे गौरवमिति द्वित्वमेकं विषयीकरोति । यद्वा, एकत्वस्य परिमाणानारम्भकत्वे सजातीयनिरूपितोत्कर्षानाश्रयत्वं प्रयोजकम् । तच्च परमाणुपरिमाणेऽपि तुल्यमित्याहुः ॥

ऋजवस्तु— कारणपरिमाणवत् कारणानेकवृत्तिसंख्याऽप्यन्वयाद्यनुविधानात् परिमाणहेतुः । ग्रन्थस्तु संख्यानिरपेक्षपरिमाणकारणत्वनिषेधपर इति समादधुः ॥

तद् यस्यासाविति ॥ ईश्वरापेक्षाबुद्धेर्नित्यत्वेनाविनाशेऽपि तदुत्पादितद्वित्वादेर्निमित्तान्तरनाशेन नाश इति भावः ॥ जाते हीति॥ महत्त्वोत्पत्तेः पूर्वं द्व्यणुकस्याप्रत्यक्षत्वेन लिङ्गाभावादित्यर्थः ॥

अत्र कार्यमुद्देश्यत्वम्, उद्देशश्च तात्पर्यम् । तद्विषय एव वेदस्य प्रामाण्यम् । तच्च परिशेषाद्वक्तुरिच्छा । सा च वेदार्थे नास्मदादीनामिति तदाश्रयेश्वरसिद्धिरित्याह—

अथवा, कार्येत्यादिकमन्यथा व्याख्यायते ।

उद्देश एव तात्पर्यं व्याख्या विश्वदृशः सती ॥
ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः ॥ ६ ॥

आम्नायस्य हि भाव्यार्थस्य कार्ये पुरुषप्रवृत्तिनिवृत्ती । भूतार्थस्य तु यद्यपि नाहत्य प्रवर्त्तकत्वं निवर्त्तकत्वं वा, तथापि तात्पर्यतस्तत्रैव प्रामाण्यम् । तथाहि, विधिशक्तिरेवावसीदन्ती स्तुत्यादिभिरुत्तभ्यते । प्रशस्ते हि सर्वः प्रवर्त्तते, निन्दिताच्च निवर्त्तते इति स्थितिः ॥

तत्र पदशक्तिस्तावदभिधा, तद्बलायातः पदार्थः । आकाङ्क्षादिमत्त्वे सति चाऽन्वयशक्तिः पदानां पदार्थानां वा वाक्यं, तद्बलायातो वाक्यार्थः ॥

तात्पर्यार्थस्तु चिन्त्यते । तदेव परं साध्यं प्रतिपाद्यं प्रयोजनमुद्देश्यं वा यस्य, तदिदं तत्परम् । तस्य भावस्तत्त्वम् । तद् यद्विषयं, स तात्पर्यार्थ इति स्यात् ॥ तत्र न प्रथमः, प्रमाणेनार्थस्य कर्मणोऽसाध्यत्वात् । फलस्य च तत्प्रतिपत्तितोऽन्यस्याभावात् । प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वारेणप्रवृत्तिनिवृत्तिरूपं साध्यं परमुच्यते इति चेन्न । गङ्गायां घोष इत्यत्र तीरस्याऽप्रवृत्तिनिवृत्तिरूपस्यासाध्यस्यापि परत्वात्तीरविषये प्रवृत्तिनिवृत्ती साध्ये इति तीरस्यापि परत्वमितिचेन्न स्वरूपाख्यानमात्रेणापि पर्यवसानात् ॥

न द्वितीयः। पदवाक्ययोः पदार्थतत्संसर्गौ विहाय प्रतिपाद्यान्तराभावात् । पदशक्तिसंसर्गशक्ती विना स्वार्थाविनाभावेन प्रतिपाद्यं परमुच्यते इत्यपि न साम्प्रतम् । न हि यद् यच्छब्दार्थाविनाभूतं तत्र तत्र

तात्पर्यं शब्दस्य । अतिप्रसङ्गात् । तदा हि गङ्गायां जलमित्याद्यपि तीरपरं स्यात् । अविनाभावस्य तादवस्थ्यात् । मुख्ये बाधके सति तत्तथा स्यादिति चेत् । न । तस्मिन्नसत्यपि भावात् । तद् यथा—

गच्छ गच्छसि चेत् कान्त, पन्थानः सन्तु ते शिवाः। ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्, इति, मुख्यार्थाबाधनेऽपि वारणे तात्पर्यम् । न च परं व्यापकमेव, अव्यापकेऽपि तात्पर्यदर्शनात् । तद् यथा । मञ्चाः क्रोशन्तीति पुरुषे तात्पर्यम् । न च मञ्च-पुरुषयोरविनाभावः, नापि पुरुषक्रोशनयोः ॥

नापि तृतीयः । ताद्धि प्रतिपाद्यापेक्षितं, प्रतिपादकापेक्षितं वा स्यात् । नाद्यः । शब्दप्रामाण्यस्यात-दधीनत्वात् । तथात्वे वाऽतिप्रसङ्गात् । यस्य यदपेक्षितं, तं प्रति तस्य परत्वप्रङ्गात् । तदर्थसाध्यत्वेनाऽपेक्षानियम इति चेत् । न । कार्यज्ञाप्यभेदेन साध्यस्य बहुविधत्वे भिन्नतात्पर्यतया वाक्यभेदप्रसङ्गात् । धूमस्य हि प्रदेशश्यामलतामशकनिवृत्त्याद्यनेकं कार्यम् । आर्द्रेन्धनदहनाद्यनेकं ज्ञाप्यम् । तथाचेह प्रदेशे धूमोद्गम इत्यभिहिते तात्पर्यतः को वाक्यार्थो भवेत् । चेतनापेक्षाया नियन्तुमशक्यत्वात् । नाऽपि प्रतिपादकापेक्षितं, वेदे तदभावात् ॥

चतुर्थस्तु स्यात् । यदुद्देशेन यः शब्दः प्रवृत्तः स तत्परः । तथैव लोकव्युत्पत्तेः । तथाहि । प्रशंसावाक्य-मुपादानमुद्दिश्य लोके प्रयुज्यते, तदुपादानपरम् । निन्दावाक्यं हानमुद्दिश्य प्रयुज्यते,तद्धानपरम् । एव-

मन्यत्रापि स्वयमूहनीयम् ॥

तस्माल्लोकानुसारेण वेदेऽप्येवं स्वीकरणीयम् । अन्यथा अर्थवादानां सर्वथैवानर्थक्यप्रसङ्गात् । स चोद्देशो व्यवसायोऽधिकारोऽभिप्रायो भाव आशय इत्यनर्थान्तरमिति तदाधारप्रणेतृपुरुषधौरेयसिद्धिः ॥

तथा च प्रयोगः । वैदिकानि प्रशंसावाक्यानि उपादानाभिप्रायपूर्वकाणि प्रशंसावाक्यत्वात् परिणतिसुरसमाम्रफलमित्यादिलोकवाक्यवदिति । एवं, निन्दावाक्यानि हानाभिप्रायपूर्वकाणि निन्दावाक्यत्वात् परिणतिविरसं पनसफलमित्यादिवाक्यवत् । अन्यथा निरर्थकत्वप्रसङ्गश्च विपक्षे बाधकमुक्तम् ॥

उद्देश एवेति ॥ वेदस्यायोजनमासमन्ताद्भावेन योजनं व्याख्यानम् । तच्चास्मदादीनां सर्ववेदादर्शिनां न निष्कम्पप्रवृत्तिहेतुरिति तद्व्याख्यातृतयेश्वरसिद्धिरित्याह ॥ व्याख्येति ॥ ईश्वरादिपदानां सर्वज्ञे नित्यज्ञाने वेदादेव शक्तिग्रहात् ततोऽपि तत्सिद्धिरित्याह ॥ ईश्वरादीति ॥ लोकवृत्तेति ॥ लौकिकदृष्टान्ते व्याप्तिग्रहादित्यर्थः ॥

वृद्धव्यवहारेण कार्यान्विते पदार्थे पदानां शक्तिः । कार्यान्वयश्च विधिसमभिव्याहृतस्य साक्षात्, तदसमभिव्याहृतस्य च परम्परयेति मतमाश्रित्याह ॥ आम्नायस्येति ॥ भव्यार्थस्य साध्यार्थस्य ॥ यथा पथ्यं भुङ्क्ष्व अपथ्यं न भुङ्क्ष्व इत्यस्य साक्षात् कार्यान्वयज्ञानात् प्रवर्त्तकत्वनिवर्त्तकत्वे ॥ भूतार्थस्य सिद्धार्थस्य ॥ यथा परिणतिसुरसमाम्रफलं परिणतिविरसं पनसमिति वाक्यस्य तदभावाद् भक्षणाऽभक्षणकार्यत्वे तात्पर्यग्रहात् परम्परया तथात्वमित्यर्थः । तदुपपादयति ॥ विधिशक्तिरिति ॥ कार्यान्वयज्ञानजननेऽपि प्रवृत्त्यौपयिकं प्रवृत्तिविषयस्यान्यापेक्षया प्राशस्त्यज्ञानं, तद्रूपसहकार्यलाभो विधिशक्तेरवसादः । तल्लाभश्चोत्तम्भनम् । तत्सहकारित्वे मानमाह ॥ प्रशस्ते हीति ॥ पदार्थवाक्यार्थाभ्यां तात्पर्यं भेदयितुं प्रस्तौति ॥ तत्रेति ॥ तदेव परं यस्य स्तुत्यादिवाक्यस्येत्यत्र परपदार्थं विकल्पयति ॥ साध्य-

मिति ॥ तदिदमिति ॥ वाक्यमित्यर्थः ॥

ननु वाक्यार्थस्य वाक्यरूपप्रमाणासाध्यत्वेऽपि तन्निष्ठफलसाध्यतयैव तत्साध्यता स्यादित्यत आह ॥ फलस्य चेति ॥ तस्य च द्वितीयविकल्प एव प्रवेशादिति भावः॥ तीरस्यापीति॥साध्यफलभागितया तीरस्यापि साध्यत्वमित्यर्थः ॥ स्वरूपेति ॥ प्रवृत्त्यादौ तात्पर्याभावेऽपि तीरस्य तात्पर्यविषयत्वादित्यर्थः ॥ पदवाक्ययोरिति ॥ स्तुत्यादिवाक्यस्य पदार्थवाक्यार्थभिन्ने प्रवृत्त्यादावपि तात्पर्यात्तद्व्यापकत्वादित्यर्थः।न च यदर्थज्ञानजनकत्वं यस्य, तस्य तत्र तात्पर्यमिति वाच्यम् । धूमोऽस्तीति वाक्यस्याग्निज्ञानाजनकत्वेऽप्यग्नौ तात्पर्यात्तदव्यापकत्वादिति भावः ॥ तद्धीति॥ प्रयोजनं न वक्तुः श्रोतुर्वेत्यर्थः । यत्र वक्तुस्तात्पर्यं, तत्र शब्दस्य प्रामाण्यमिति स्थितेराह ॥ शब्देति ॥ अतिप्रसङ्गमेवाह ॥ यस्येति ॥ तथाच तात्पर्यभेदेन वाक्यभेदः स्यादिति भावः ॥ तदर्थेति ॥ शब्दस्य योऽर्थस्तस्य यत्साध्यं प्रतिपाद्यस्य चापेक्षितं, तत्परं, न तु तदसाध्यमपीत्यर्थः ॥ कार्येति ॥ साध्यं जन्यं ज्ञाप्यं वा ? । उभयस्याप्यनेकत्वात् । तथापि तात्पर्यभेदाद्वाक्यभेद एव स्यादित्यर्थः । न च प्रकरणादिना तात्पर्यनियमान्न वाक्यभेदापत्तिः । प्रकरणं हि न साध्यं नियमयति । अशक्यत्वात् । न हि धूमं जिज्ञासमानस्य प्रतीयमानधूमाद्धूमकेतुप्रतीतिवन्मशकादिनिवृत्तिर्न भवति । प्रतिपादकाभिप्रायनियमने च सिद्धं वेदस्य सकर्तृकत्वमिति भावः॥चेतनेति॥ एक एवार्थः सर्वेषां चेतनानामपेक्षित इत्यत्र नियामकाभावाद्भिन्नभिन्नार्थापेक्षायां तात्पर्यभेदाद्वाक्यभेदः स्यादिति भावः ॥ वेद इति ॥ तव दर्शने इति शेषः ॥ तथैवेति ॥ लोके हि पदानां स्वतन्त्राभिप्रायपूर्वकतया स्वार्थप्रतिपादकत्वदर्शनाद्वेदेऽपि तथात्वं तत्पूर्वकतयैव युज्यते । न च लौकिकशब्देभ्यो वैदिकाः शब्दा अन्ये एवेति लोकमर्यादाऽतिक्रमः स्यात् । यतोऽनेनैव न्यायेन लौकिकानामेव शब्दानामर्थविशेषे शक्तिग्रहाद् वैदिकानां तद्भिन्नत्वादगृहीतशक्तिकत्वादर्थाप्रतिपादकत्वप्रसङ्गः।अत एव, य एव लौकिकास्त एव वैदिकास्त एव चामीषामर्था इत्याहुरित्यर्थः । ननूद्देश्यत्वं नेच्छाविषयत्वं, किन्तु वस्त्वन्तरमेवेत्यत आह ॥ स चेति ॥ लोके तथैव निश्चयादित्यर्थः ॥

वैदिकानीति ॥ ननु सर्गाद्यकालीनवैदिकवाक्यपक्षतायामाश्रया-

सिद्धिः । इदानीन्तनस्य तस्य पक्षत्वेऽप्ययमाऽस्मदादिनाऽर्थान्तरत्वं, स्वरूपाख्यानपरपुत्रस्तुतिवाक्ये चानैकान्तिकम् । अत्राहुः । वैदिकप्रशंसावाक्यानि वेदसमानविषयकतात्पर्यापूर्वकतात्पर्यविषयकाणि सतात्पर्यवाक्यत्वात् । लौकिकप्रशंसावाक्यवत् ॥

यदि च वेदे न स्वतन्त्रपुरुषाऽभिप्रायपूर्वकता, तदा भट्टानां श्रुतार्थापत्त्या शब्दः कल्प्यते इति राद्धान्तव्याघात इत्याह—

**अपि च । नो चेदेवं, श्रुतार्थापत्तिरपि हीयेत । सिद्धो ह्यर्थः प्रमाणविषयो, न तु तेनैव कर्त्तव्यः । न च पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रौ भुङ्क्त इति वाक्यशेषोऽस्ति । अनुपलम्भबाधितत्वात् । उत्पत्त्यभिव्यक्तिसामग्रीताल्वादिव्यापारविरहात् । अयोग्यस्याशङ्कितुमप्यशक्यत्वात् । तस्मादभिप्रायस्थ एव परिशिष्यते, गत्यन्तराभावात् । स चेद्वेदे नास्ति, नास्ति श्रुतार्थापत्तिरिति तद्व्युत्पादनानर्थक्यप्रसङ्गः । तस्मात् कार्यात्तात्पर्यादप्युन्नीयते, आस्ति प्रणेतेति ॥**

**आयोजनात् खल्वपि । न हि वेदादव्याख्यातात् कश्चिदर्थमधिगच्छति । न चैकदेशदर्शिनो व्याख्यानमादरणीयम् ॥ पौर्वापर्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्, इतिन्यायेनानाश्वासात् । त्रिचतुरपदकादपि वाक्यादेकदेशश्राविणोऽन्यथार्थप्रत्ययः स्यात्, किमुतातीन्द्रियादन्तरान्तरवाक्यसम्भेददुरधिगमात् ॥**

**ततः सकलवेदवेदार्थदर्शी कश्चिदेवाऽभ्युपेयोऽन्यथाऽन्धपरम्पराप्रसङ्गात् । स च श्रुताऽधीतावधृतस्मृतसाङ्गोपाङ्गवेदवेदार्थस्तद्विपरीतो वा न सर्वज्ञादन्यः सम्भवति । को ह्यप्रत्यक्षीकृतविश्वतदनुष्ठान एतावानेवायमाम्नाय इति निश्चिनुयात् । कश्चाऽर्वाग्दृग्**

निःशेषाः श्रुतीर्ग्रन्थतोऽर्थतो वाऽधीयीत, अध्यापयेद्वा ॥

अत्रापि प्रयोगः । वेदाः कदाचित् सर्ववेदार्थविद्व्याख्याताः, अनुष्ठातृमतिचलनेऽपि निश्चलार्थानुष्ठानत्वात् । यदेवं तत्सर्वं तदर्थविद्व्याख्यातं, यथा मन्वादिसंहितेति । अन्यथा त्वनाश्वासेनाव्यवस्थानादननुष्ठानमव्यवस्था वा भवेदनादेशिकत्वात् । अनुष्ठातार एवादेष्टार इति चेत् । न । तेषामनियतबोधत्वात् । वेदवद्वेदानुष्ठानमप्यनादीतिचेत् । न । तद्धि स्वतन्त्रं वा, वेदार्थबोधतन्त्रं वा ? । आद्ये निर्मूलत्वप्रसङ्गः । द्वितीये त्वनियमापत्तिः । न ह्यसर्वज्ञाविशेषे पूर्वेषां तदवबोधः प्रमाणं, न त्विदानीन्तनानामिति नियामकमस्ति ॥

पदात् खल्वपि । श्रूयते हि प्रणवेश्वरेशानादिपदम् । तच्च सार्थकम् । अविगानेन श्रुतिस्मृतीतिहासेषु प्रयुज्यमानत्वात्, घटादिपदवदिति सामान्यतः सिद्धे कोऽस्यार्थः ? इति व्युत्पित्सोर्विमर्शे सति निर्णयः । स्वर्गादिपदवत् ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः, इत्यर्थवादात् । यववराहादिवद्वाक्यशेषाद्वा । तद् यथा ईश्वरप्रणिधानमुपक्रम्य श्रूयते—

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः

षडाहुरङ्गानि महेश्वरस्य, इति ॥

एवम्भूतोऽर्थः प्रमाणबाधित इति चेन्न । प्रागेव प्रतिषेधात् । तथापि न तत्र प्रमाणमस्तीतिचेत् । स्वर्गे अस्तीति का श्रद्धा । न ह्युक्तविशेषणं सुखे किञ्चित् प्रमाणमस्त्यस्मदादीनाम् ॥

याज्ञिकप्रवृत्त्यन्यथाऽनुपपत्त्या तथैव तदित्यवधार्यते इति चेद् न । इतरेतराश्रयप्रसङ्गात् । अवधृते हि स्वर्गरूपे तत्र प्रवृत्तिः, प्रवृत्त्यन्यथाऽनुपपत्त्या च तदवधारणमिति । पूर्ववृद्धप्रवृत्त्या तदवधारणेऽयमदोष इति चेन्न । अन्धपरम्परासङ्गात् । विशिष्टादृष्टवशात् कदाचित् कस्यचिदेवंविधमपि सुखं स्यादिति नास्ति विरोधः । तन्निषेधे प्रमाणाभावादिति चेत् । तुल्यमितरत्रापि ॥

अत्रापि प्रयोगः । यः शब्दो यत्र वृद्धैरसति वृत्त्यन्तरे प्रयुज्यते स तस्य वाचकः । यथा स्वर्गशब्दः सुखविशेषे प्रयुज्यमानस्तस्य वाचकः । प्रयुज्यते चायं जगत्कर्त्तरीति । अन्यथा निरर्थकत्वप्रसङ्गे सार्थकपदकदम्बसमभिव्याहारानुपपत्तिरिति । एतेन, रुद्रोपेन्द्रमहेन्द्रादिदेवताविशेषवाचका व्याख्याताः ॥

अपिच । अस्मत्पदं लोकवद्वेदेऽपि प्रयुज्यते । तस्य च लोके नाचेतनेष्वन्यतमदर्थः । तत्र सर्वथैवाप्रयोगात् । नाप्यात्ममात्रमर्थः । परात्मन्यपि प्रयोगप्रसङ्गात् । अपि तु यस्तं स्वातन्त्र्येणोच्चारयति, तमेवाह । तथैवान्वयव्यतिरेकाभ्यामवसायात् । ततो लोकव्युत्पत्तिमनतिक्रम्य वेदेऽप्यनेन स्वप्रयोक्तैव वक्तव्यः ।

अन्यथाऽप्रयोगप्रसङ्गात् । न च यो यदोच्चारयति वैदिकमहंशब्दं, स एव तदा तस्यार्थ इति युक्तम् । तथा सति मामुपासीतेत्यादौ स एवोपास्यः स्यात् ॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते, इत्युपाध्यायशिष्यपरम्परैवात्मन्यैश्वर्यं समधिगच्छेत् । तथा च उपासनां प्रत्युन्मत्तकेलिः स्यात् । लोकव्यवहारश्चोच्छिद्येत । तस्मान्नानुवक्ताऽस्य वाच्योऽपि तु वक्तैवेति स्थिते प्रयुज्यते । वेदे अस्मच्छब्दः स्वप्रयोक्तृवचनः । अस्मच्छब्दत्वाल्लोकवदिति ॥

एवमन्येऽपि यः कः स इत्यादिशब्दा द्रष्टव्याः । तेषां बुद्ध्युपक्रमप्रश्नपरामर्शाद्युपहितमर्यादत्वात् । तस्य च वक्तृधर्मत्वात् । बुद्ध्युपक्रमो हि प्रकृतत्वं, जिज्ञासाऽऽविष्करणञ्च प्रश्नः, प्रतिसन्धानञ्च परामर्श इति । एवञ्च संशयादिवाचका अप्युन्नेयाः ॥

न च जिज्ञासासंशयादयः सर्वज्ञे प्रतिषिद्धा इति युक्तम् । शिष्यप्रतिबोधनायाहार्यत्वेनाविरोधात् । को धर्मः कथंलक्षणक इत्यादिभाष्यवदिति । एतेन धिगहो बत हंतेत्यादयो निपाता व्याख्याताः ॥

अपि चेति ॥ ननु मा भूच्छ्रुतार्थापत्त्या शब्दकल्पनं, योग्यार्थकल्पनयैवोपपत्तेः । मैवम् । क्रियाकारकपदानामन्योन्योपस्थापिताऽर्थान्वयबोधकत्वनियमव्युत्पत्तेः । अन्यथा गौः कर्मत्वमानयनं कृतिरित्यतोऽपि गामानयेत्यस्मादिवान्वयबोधापत्तेः । पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिशब्दसमभिव्याहारं विना चतुर्थ्यनुपपत्तेश्च । न च स्पृहयतिशब्दार्थयोग एव चतुर्थी साधुः । पुष्पमिच्छतीत्यत्रापि चतुर्थ्यापत्तेः ॥

तथापि स्वयं स्मृतानामेव योग्यासन्नसाकाङ्क्षपदानां श्रुतपदैः

सहैकार्थप्रतिपादने तात्पर्यकल्पनं श्रुतार्थापत्तिविषयः स्यादिति चेन्न । वेदे परस्परसमभिव्याहृतपदानामेकार्थप्रतिपादने तात्पर्योपलब्धेः । तस्य चोच्चारणाभिप्रायान्यतरनियतविषयत्वेनोभयथाऽपि ईश्वरसिद्धिरित्याशयेनाह ॥ गत्यन्तराभावादिति ॥

कार्येत्यादिकारिकायां धृत्यादेरित्यपि व्याचष्टे ॥ स चेति ॥श्रुतः श्रोत्रेण साक्षात्कृतः । अधीतो ज्ञानविषयार्थः । धृतः सतताभ्यासेन दृढसंस्कारः । तद्विपरीतो विनैवाध्ययनं ज्ञातसकलाङ्गोपाङ्गवेदार्थः, अध्यापितधारितादिवेदार्थो वा । कदाचिदिति बाधनिरासाय । एकदेशदर्शिव्याख्यातवेदात्, शिष्याणां श्रद्धया प्रवर्तमानानां निश्चलानुष्ठानमस्तीत्यनैकान्तिकमित्यत उक्तम्, अनुष्ठात्रिति ॥ तत्राऽनुष्ठातॄणामव्यवस्थितमतित्वाभावादित्यर्थः ॥ अननुष्ठानहेतुमाह ॥ अव्यवस्थानादिति ॥ अर्थनिश्चयस्येति शेषः । अन्यथा त्वनियतमनुष्ठानं स्यादित्याह ॥

अव्यवस्था वेति ॥ अर्थनिश्चयाव्यवस्थानादित्यर्थः ॥ अनादेशिकत्वात्, अनौपदेशिकत्वादित्यर्थः ॥ ननु पूर्वेषामेव स्वतन्त्रवेदार्थज्ञानं प्रमाणमाधुनिकानान्त्वप्रमाणं स्यादित्यत आह॥न हीति॥ न च कश्चित् पदार्थोऽस्तीत्यनेन रूपेणास्मदादिभिरेव व्याख्यानादनुमाने सिद्धसाधनं, येन रूपेण वेदार्थो व्याख्यात इति लोके व्यवहारः, तद्रूपेण व्याख्यानस्य विवक्षितत्वात् । यद्वा, वेदा व्याख्यानानुकूलतद्विषयानित्यज्ञानभिन्नज्ञानसमानविषया वाक्यत्वात्,वेदाप्तद्विषयाऽनित्यज्ञानान्यज्ञानविधृता धृतवाक्यत्वादितिभावः॥ अविगानेनेति॥ निरर्थकतया प्रसिद्ध्यभावेनेत्यर्थः । अत एव स्तोमैर्न व्यभिचारः । निरर्थकत्वेनैव तेषां प्रसिद्धेरिति भावः । यथा स्वर्गपदे विधिशेषीभूतार्थवादाच्छक्तिग्रहस्तथा प्रकृतेऽपीत्याह ॥ निर्णय इति ॥ अर्थवादमाह ॥ उत्तम इति ॥

यववराहादिवदिति ॥ यवमयश्चरुर्भवति वाराही चोपानद् वैतसे कटे प्राजापत्यं धिनोतीत्यत्र यववराहवेतसशब्दाः किं कङ्गुवायसजम्बूनां वाचकाः, उत दीर्घशूकशूकरवञ्जुलानामिति म्लेच्छार्यव्यवहारदर्शनाद्विप्रतिपत्तौ मुख्यार्थानध्यवसायेऽननुष्ठानापत्त्या तत्पदवद्वेदप्रामाण्यसंशये, पूर्वपक्षः— व्युत्पत्तिग्राहकव्यवहाराविशेषात् कङ्ग्वादावपि शक्तिरेव,पिकनेमतामरसपदेषु म्लेच्छप्रसिद्धेरादरणा-

श्चेति ॥ राद्धान्तस्तु- वसन्ते सर्वसस्यानां जायते पत्रशातनम् । मोद-मानास्तु तिष्ठन्ति यवाः कणिशशालिनः, वराहं गावोऽनुधावन्ति, अप्सुजो वेतसः इत्यादिवाक्यशेषरूपवेदविरोधिनी म्लेच्छप्रसिद्धि-र्हेयेति म्लेच्छप्रसिद्धौ निरस्तायां निष्प्रतिपक्षार्थव्यवहाराच्छक्ति-ग्रहः । यत्र तु वेदविरोधो नास्ति, तत्र पिकादिपदेष्वभियोगवत्त्वा-न्म्लेच्छानां तत्प्रसिद्धिरेवादरणीयेत्यर्थः ॥

प्रकृते विधिशेषीभूतं वाक्यशेषमाह ॥ सर्वज्ञतेति ॥ तृप्तिः स्वभोगे-च्छाविरहः । अलुप्तशक्तिः नित्यप्रयत्नः । अङ्गानि धर्माः । उक्तविशेषणे, दुःखादिसंभिन्नत्वाभावादिविशिष्टे ॥ याज्ञिकेति ॥ लौकिकसुखाऽति-शयसुखं विना बहुवित्तव्ययायाससाध्ये कर्मणि प्रवृत्तिर्न स्यादित्य-ऽर्थः ॥ एतेनेति ॥ रुद्रादिपदेष्वपि, रुद्रस्त्र्यम्बक इत्यादिवाक्यशेषा-न्निर्णय इत्यर्थः ॥

यदि अस्मच्छब्दस्योच्चारयितरि शक्तिस्तदा, वाच्यस्त्वया मद्वचना-त् स राजेत्यत्र कविरेवास्मच्छब्देनोच्येतेत्यत उक्तं, स्वातन्त्र्येणे-ति ॥ अन्यकर्तृकत्वेनोच्चारणाभावः स्वातन्त्र्यम् । अत एव, गृभ्णामि ते सौभगत्वायेत्यादावपि नेश्वरवाच्यकत्वम् । अस्यान्यपरतयैव ईश्वरेणोच्चारितत्वात् ॥ अस्मच्छब्दत्वादिति ॥ अनन्यपरास्मच्छब्द-त्वादित्यर्थः ॥ तेषामिति क्रमेण यच्छब्दादीनामर्थकथनम् ॥ धर्म इति ॥ अथातो धर्मजिज्ञासा इत्यनेन शास्त्रप्रयोजनमभिधाय विशेषेण धर्म-जिज्ञासोः शास्त्रारम्भे शिष्यजिज्ञासामुपादाय मीमांसाभाष्यम् । को धर्मः कथं लक्षणकः कान्यस्य साधनानीति यथेत्यर्थः ॥ एतेन, बुद्ध्युपक्रमादीनां वक्तृधर्मत्वकथनेन ॥ गर्हाविस्मयखेदानुशयानां वक्तृधर्मत्वादित्यर्थः ॥

लोके लिङादीनामभिच्छायां शक्तिग्रहाद्वेदेऽपि स एवार्थः । न च वेदार्थे अस्मदादीनामिच्छा सम्भवतीति तदाश्रयेश्वरसिद्धि-रित्याह—

**प्रत्ययादपि । लिङादिप्रत्यया हि पुरुषधौरेयनि-योगार्था भवन्तस्तं प्रतिपादयन्ति । तथाहि ।**

**प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ॥**
**तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥७॥**

प्रवृत्तिः खलु विधिकार्या सती न तावत्कायपरिस्पन्दमात्रम् । आत्मा ज्ञातव्य इत्याद्यव्यापनात् । नापीच्छामात्रम् । तत एव फलसिद्धौ कर्मानारम्भप्रसङ्गात् । ततः प्रयत्नः परिशिष्यते । आत्मज्ञानभूतदयादावपि तस्याभावात् ।तदुक्तं,प्रवृत्तिरारम्भः, इति॥

सेयं प्रवृत्तिर्यतः सत्तामात्रावस्थिताद्, नासौ विधिः । तत्र शास्त्रवैयर्थ्यात् । अप्रतीतादेव कुतश्चित् प्रवृत्तिसिद्धौ तत्प्रत्यायनार्थं तदभ्यर्थनाभावात् । न च प्रवृत्तिसिद्धौ तत्प्रत्यायनार्थं तदभ्यर्थनाभावात् । न च प्रवृत्तिहेतुजननार्थं तदुपयोगः । प्रवृत्तिहेतोरिच्छाया ज्ञानयोनित्वात् । ज्ञानमनुत्पाद्य तदुत्पादनस्याशक्यत्वात्, तस्य च निरालम्बनस्यानुत्पत्तेरप्रवर्त्तकत्वाच्च । नियामकाभावात् ॥

तस्माद् यस्य ज्ञानं प्रयत्नजननीमिच्छां प्रसूते,सोऽर्थविशेषस्तज्ज्ञापकोवाऽर्थविशेषोविधिः प्रेरणा प्रवर्त्तना नियुक्तिर्नियोग उपदेश इत्यनर्थान्तरमिति स्थिते विचार्यते । स हि कर्तृधर्मो वा स्यात्, कर्मधर्मो वा, करणधर्मोवा, नियोक्तृधर्मो वेति । न प्रथमः॥

इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधनः ॥ असत्त्वात् प्रत्ययत्यागात् कर्तृधर्मो न सङ्करात् ॥ ८ ॥

स हि न स्पन्द एव, आत्मानमनुपश्येदित्याद्यव्याप्तेः । ग्रामं गच्छतीत्यादावतिव्याप्तेश्च । नाऽपि तत्कारणं प्रयत्नः । तस्य सर्वाख्यातसाधारणत्वात् ॥

लिङादीति ॥ नियोगोऽभिप्रायः । अन्येषां लिङर्थत्वे बाधकस्य वक्तव्यत्वादित्यर्थः ॥ प्रवृत्तिरिति ॥ अन्यत्र ज्ञानादेरपि प्रवृत्तिपदप्रा-

च्यत्वेऽत्र कृतिरेव सा विवक्षितेत्यर्थः । तथाच कृतिकारणेच्छाज्ञान-विषयो विधिरित्यन्येषां मतम् । स्वमतमाह ॥ तज्ज्ञापक इति ॥

यथा चाप्तेच्छाविषयत्वेन प्रवर्त्तकज्ञानविषय इष्टसाधनत्वमनु-मीयते, तथा वक्ष्यति । तच्च परमतनिरासं विना न भवतीति तन्नि-राकर्तुमाह ॥ प्रवृत्तिः खल्विति ॥ विधिकार्या, विधिज्ञानकार्येत्यर्थः॥ आत्मेति ॥ चेष्टां विनाऽपि विध्यर्थसत्त्वादित्यर्थः ॥ तत एवेति ॥ इ-च्छामात्रेण विध्यर्थनिर्वाहे बहुवित्तव्ययायाससाध्ययागाद्यकरणप्र-सङ्गादित्यर्थः । तत इति ॥ कृतौ नायम् । क्रियमाणयागस्योपयोगा-दित्यर्थः ॥ आत्मज्ञानेति ॥ मोक्षकामस्य ज्ञानविधाने भूतेषु दयावि-धाने च चेष्टाया अभावेऽपि यत्नस्य सत्त्वादित्यर्थः ॥ आरम्भो यत्नः॥ तत्प्रत्यायनार्थमिति ॥ शास्त्रस्य ज्ञापकतया स्वरूपमन्तरेण शास्त्रानुपयो-गादित्यर्थः। तदिदं परमतनिराकरणं विना न सिध्यति। तदर्थमुपन्यस्य ति ॥ स हीति ॥ कर्त्तृधर्मः प्रवर्त्त्यपुरुषधर्मः स्पन्द इच्छा प्रयत्नो वा । कर्मधर्मोऽपूर्वस्य क्रियाया वा धर्मः कार्यत्वादिः । करणधर्म इष्ट-साधनत्वं शब्दव्यापारो भावना वा । नियोक्तृधर्म आप्ताभिप्रायः ॥

तत्र स्पन्दस्य विधित्वं दूषयति ॥ इष्टहानेरिति ॥

अव्याप्त्यतिव्याप्तिभ्यामित्यर्थः । यत्नस्य विधित्वं दूषयति ॥ अ-प्रवृत्तेरिति ॥ यत्नमात्रस्यानिष्टसाधनसाधारण्यादित्यर्थः । इच्छाया विधित्वे बाधकमाह ॥ विरोधन इति ॥ इच्छाया विधित्वे तयैव तज्जन-नाद्विरोध इत्यर्थः । न चेच्छा ज्ञाता प्रयत्नजननी, किन्तु सत्तया । न च लिङ्श्रवणकाले सा सतीत्याह ॥ असत्त्वादिति ॥ न च लिङेव तां जन-यति । तत्र ज्ञानकारणत्वत्यागापत्तेः, लिङं विनाऽपीच्छोत्पत्तेश्चेत्या-ह ॥ प्रत्ययेति ॥ उपायगोचरप्रवृत्ताविष्टसाधनत्वज्ञानस्य हेतुत्वनि-श्चयात् तत्सङ्कीर्णेच्छायाः सङ्कल्परूपायाः प्रवर्त्तकत्वे लाघवादिष्ट-साधनतैव विधिरित्याह ॥ मङ्गादिति ॥

करोतीत्यत्र यत्नस्य कृधातुनैवोक्तत्वादाख्यातमात्रस्य यत्नार्थत्वे पौनरुक्त्यं स्यादिति नाख्यातमात्रं यत्नमभिधत्ते, किन्तु लिङेवेत्याह ॥

**ननु न सर्वत्र प्रयत्न एव प्रत्ययार्थः । करोती-त्यादौ प्रकृत्यर्थातिरेकिणस्तस्याभावात् । संख्यामा-त्राभिधानेन प्रत्ययस्य चरितार्थत्वात् । ततो लिङा-**

दिवाच्य एव प्रयत्न इति । न । कुर्यादित्यत्रापि तुल्यत्वात् प्रयत्नमात्रस्य प्रकृत्यर्थत्वेऽपि तस्य पराङ्गताऽऽपन्नस्य प्रत्ययार्थत्वान्न तुल्यत्वमिति चेत् । न । तथापि तुल्यत्वात् । न चैकस्य तद्वाचकत्वेऽन्यस्य तद्विपर्यय आपद्येत । एको द्वौ बहव एधिषतीत्यादौ व्यभिचारात् । तत्र द्वितीयसंख्येच्छादिकल्पने करोति प्रयतते इत्यादावपि तथा स्यात् । प्रत्येकमन्यत्र सामर्थ्यावधृतौ सम्भेदे तथा कल्पनायास्तुल्यत्वात् ॥

रथो गच्छतीत्यादौ तदसम्भवे का गतिरिति चेत, तन्तवः पटं कुर्वन्तीत्यत्र या । लोकोपचारोऽयमपर्यनुयोज्य इति चेत्तुल्यम् । लिङः कार्यत्वे वृद्धव्यवहाराद्व्युत्पत्तौ सर्वं समञ्जसम् । आख्यातमात्रस्य तु न तथेति चेत् । न । विवरणादेरपि व्युत्पत्तेः । अस्ति च तदिह । किं करोति ? पचति, पाकं करोतीत्यर्थः इत्यादिदर्शनात् ॥

तथापि फलानुकूलताऽऽपन्नधात्वर्थमात्राभिधाने तदतिरिक्तप्रयत्नाभिधानकल्पनायां कल्पनागौरवं स्यात् । अतो विवरणमपि तावन्मात्रपरमिति चेत् । भवेदप्येवं, यदि पाकेनेति विवृणुयात् । न त्वेतदस्ति। धात्वर्थस्यैव पाकमिति साध्यत्वेन निर्देशात् । ततस्तं प्रत्येव किञ्चिदनुकूलताऽऽपन्नं प्रत्ययेनाभिधानीयमिति युक्तम् ॥

तथापि तेन प्रयत्नेनैव भवितव्यं, न त्वन्येनेति कुत इति चेत । नियमेन तथा विवरणात् । बाधकं विना तस्यान्यथाकर्त्तुमशक्यत्वात् । अन्यथाऽतिप्र-

सङ्गात् ॥

नन्विति ॥ ननु यदि प्रकृत्यर्थातिरिक्तो नाख्यातार्थः, तदा तत्प्रयोगो व्यर्थ इत्यत आह ॥ संख्येति ॥ एकत्वादिसंख्यामात्रमाख्याताऽर्थः, तत्प्रत्यायनार्थमेव तत्प्रयोग इत्यर्थः । तर्हि लिङपि न यत्नार्थः, कुर्यादित्यत्र पौनरुक्त्यापत्तेः । अथाख्यातात् कृतेरुपस्थितावपि तात्पर्याभावात् सा नान्वीयते, किन्तु संख्यामात्रम् । तर्हि करोतीत्यादावपि तुल्यमित्याह ॥ कुर्यादित्यत्रेति ॥ यदि कुर्यादित्यत्र यत्नमात्रं कृधात्वर्थः, तस्य च चैत्रादिसम्बन्धित्वमनुकूलत्वं वा प्रत्ययार्थ इति विशेषः, तदा करोतीत्यादावपि तुल्यमिति शङ्कोत्तराभ्यामाह ॥ यत्नमात्रस्येति ॥

अपि च । कृतेर्धात्वर्थत्वेऽपि प्रत्ययस्य तदर्थत्वं न दोषाय, प्रकृतिप्रत्यययोरन्यत्र समानार्थत्वदर्शनादित्याह ॥ न चेति ॥ एकस्य प्रकृतिरूपस्य, अन्यस्य प्रत्ययरूपस्य, तद्विपर्ययस्तद्वाचकत्वमित्यऽर्थः।अथैक इत्यादौ प्रकृत्यर्थातिरिक्तंद्वितीयमेकत्वादिकम् । पिपठिषतीत्यत्रापरेच्छा प्रत्ययार्थः, तदा करोतीत्यत्र यत्नान्तरमेवाख्यातार्थ इत्यास्त्वित्याह ॥ तत्रेति ॥ ननु द्वितीयसंख्येच्छायत्नाननुभवान्न तथा, प्रकृतिप्रत्यययोः साम्येनान्वयानुपपत्तेरित्यत आह ॥ प्रत्येकमिति ॥ तथा चोभयोपस्थितेरावश्यकत्वेनैकस्यानन्वयेऽप्यदोषादित्यर्थः ॥

रथो गच्छतीत्यादावित्यादिपदाज्जानाति यतते निद्रातीत्यादेर्ग्रहणम् । तत्र धात्वर्थानुकूलयत्नाभावेऽप्याख्यातप्रयोगात् । यदि चाऽचेतने व्यापारमात्रमाख्यातार्थः, तदा चेतनेऽपि तथेत्यर्थः । कृधातोर्यत्नार्थत्वस्योभयसिद्धत्वादचेतने यथा करोतेः प्रयोगो लाक्षणिकः, तथा रथो गच्छतीत्यादावाख्यातस्येत्याह ॥ तुल्यमिति ॥ लिङः स्वाऽऽत्मनि प्रवर्त्तकत्वेन ज्ञाते कार्यताज्ञाने वृद्धव्यवहारेण शक्तिग्रहात्तस्य प्रयत्नार्थत्वे मानमस्ति, न त्वाख्यातमात्रस्येत्याह ॥ लिङ इति ॥ पचति पाकं करोतीत्यादौ यत्नार्थककरोतिना सर्वाख्यातविवरणाद् वृद्धव्यवहारादिव बाधकं विना विवरणादपि व्युत्पत्तेः । किं करोतीति यत्नविशेषप्रश्ने, पचतीत्युत्तरस्य यत्नार्थत्वं विनानुपपत्तेश्च प्रकृतेऽपि मानमस्तीत्याह ॥ विवरणादेरिति ॥

ननु धातुः स्वरूपेण स्वार्थं भावमाह । आख्यातन्तु यावता कर्म-

क्षणनिश्चयेन फलं सिध्यति तावति वर्त्तते । ओदनं पचतीति दर्शनात् । न ह्येकेन कर्मक्षणेनोदनः सिध्यति । अतः फलार्थो व्यापारसमूहो भाव्यत्वाद्भावनेत्युच्यते । भाव्यमानस्य तस्य फलसाधनत्वात्। फलानुकूलताविशिष्टयत्नवाच्यत्वे तु कल्पनागौरवमिति शङ्कते ॥ तथापीति ॥ पचेस्तावत्तुषबुषप्रक्षेपणादिव्यापारकलाप एवार्थः । तस्यैव रूपपरावृत्तिलक्षणफलं प्रत्यनुकूलताआख्यातवाच्या। अधिकयत्नस्यापि वाच्यत्वे गौरवमिति शङ्कार्थः । तावन्मात्रपरं, धात्वर्थस्य फलानुकूलतामात्रपरं, न तु यत्नपरमित्यर्थः ॥

ओदनं पचतीत्यत्र धात्वर्थः पाक ओदनानुकूल इत्यर्थे काष्ठेनौदनं पचतीतिवदोदनं पाकेन करोतीति प्रयोगप्रसङ्गात् । न चेष्टापत्तिः । किं करोति, पचति, पाकं करोतीत्यनुभवस्य सार्वलौकिकत्वात् । कर्मान्वयानुपपत्तेश्चेति परिहरति ॥ भवेदप्येवमिति ॥ एवमप्यनुकूलव्यापारमात्रमाख्यातार्थोऽस्तु,नत्वनुकूलयत्नः । तथात्वे बाधकं विनैवाख्यातमचेतनेषु गौणं कल्प्यमिति गौरवमित्याह ॥ तथापीति ॥ यत्नार्थकरोतिनाऽऽख्यातार्थस्य विवरणात् तस्य चाबाधितत्वात् प्रमाणवतो गौरवस्यापि न्याय्यत्वादित्याह ॥ नियमेनेति ॥

ननु करोतिर्न यत्नार्थः, किन्त्वनुकूलव्यापारमात्रार्थः । यत्नोऽप्यनुकूलत्वेनैवाख्यातार्थः।अन्यथा आख्यातार्थस्य यत्नपदपर्यायतापत्तेः । अत एव, यत्न एवाख्यातार्थः । आनुकूल्यन्त्वन्वयलभ्यमित्यपास्तम् । एवञ्च धात्वर्थस्य पाकादेः साध्यताऽप्युपपद्यते । न च धातुनैव स्वार्थे साध्यत्वेनोच्यते इति वाच्यम् । पाक इत्यत्रापि तत्प्रतीत्यापत्तेः। यत्नस्य वाच्यत्वेन गौरवापत्तेः। मुख्ये बाधकं विनैव रथो गच्छतीत्यादावाख्यातस्य गौणत्वापाताच्चेत्याह—

**स्यादेतत् । यस्य कस्यचित् फलं प्रत्यनुकूलताऽऽपत्तिमात्रमेव करोत्यर्थो, न तु प्रयत्न एव । सोऽपि ह्यनेनैवोपाधिना प्रत्ययेन वक्तव्यो, न तु यत्नत्वमात्रेण । प्रयत्नपदेनाविशेषप्रसङ्गात् । तद्वरं तावन्मात्रमेवास्तु लाघवाय । अन्यथा त्वनुकूलत्वप्रयत्नत्वे द्वावुपाधी कल्पनीयौ, अचेतनेषु सर्वत्र गौणार्थास्तिको-**

ऽसति बाधके कल्पनीया इति चेत्। अत्रोच्यते—

कृताकृतविभागेन कर्तृरूपव्यवस्थया ॥

यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना ॥९॥

यत्नपूर्वकत्वं हि प्रतिसन्धाय घटादौ कृत इति व्यवहारात्। हेतुसत्त्वप्रतिसन्धानेऽपि यत्नपूर्वकत्वप्रतिसन्धानविधुराणामङ्कुरादौ तदव्यवहारात् करोत्यर्थो यत्न एव तावदवसीयते। अन्यथा हि यत्किञ्चिदनुकूलपूर्वकत्वाविशेषाद् घटादयः कृताः, न कृतास्त्वङ्कुरादय इति कुतो व्यवहारनियमः। तेन च सर्वमाख्यातपदं विव्रियते इति सर्वत्र स एवार्थ इति निर्णयः। तथाच समुदिते प्रवृत्तं पदं तदेकदेशेऽपि प्रयुज्यते। विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत्। अन्यथाऽपि मध्यमोत्तमपुरुषगामिनः प्रत्ययाः, प्रथमे पुरुषे जानाति इच्छति प्रयतते अध्यवस्यति शेते संशेते इत्यादयश्च गौणार्था एवाचेतनेषु। न च वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता। अन्याय्यश्चानेकार्थत्वमिति स्थितेः। अत एवानुभवोऽपि, यावदुक्तं भवति पाकानुकूलवर्त्तमानप्रयत्नवाँस्तावदुक्तं भवति पचतीति। एवं तथाभूतातिवृत्तप्रयत्नोऽपाक्षीदिति। एवं तथाभूतभाविप्रयत्नः पक्ष्यतीति। न तु पचतीति पाकानुकूलयत्किञ्चिद्वानिति। अन्यथाऽनिधावपि परिश्रमशयाने पचतीति प्रत्ययप्रसङ्गात् ॥

यस्य कस्यचिदिति॥ क्रियाजन्यत्वाविशेषेऽपि यत्नजन्यत्वाजन्यत्वप्रतिसन्धानेन घटाङ्कुरयोः कृताकृतव्यवहारात् तृजन्तकृधातु-

व्युत्पन्नकर्तृपदस्य कृत्याश्रयवाचकत्वाच्च कृञो यत्नार्थत्वम् । क्रिया-ऽऽश्रयः कर्तृपदार्थः स्यादिति कारकमात्रेऽतिप्रसङ्गः । एवञ्च कृञो यत्नार्थत्वात् तेन चाख्यातविवरणात्तस्यापि यत्नार्थकत्वमित्याह ॥ कृताकृतेति ॥ कृतिश्च करोत्यर्थः । एवमाख्यातस्य यत्नपदपर्ययता-ऽऽपत्तिं निरस्यति ॥ पूर्वेति ॥ परस्मिन्नुत्तरकालवर्त्तिनि धात्वर्थे सति सैव कृतिरेव पूर्वा साधनीभूता भावनेत्युच्यते । तेन फल-साधनीभूतः प्रयत्नो भावना, सैव चाख्यातवाच्या ॥

यद्वा, फलानुकूलधात्वर्थपूर्वापरव्यापारप्रचयजनिका पूर्वापर-स्मिन् पूर्वापरीभूतत्वे सति कृतिराख्यातार्थो भावना । भाव्यते फल-मनयेति व्युत्पत्त्येत्यर्थः ॥

नन्वेवं पूर्वापरीभूतत्वं यत्नत्वमनुकूलत्वञ्चेति त्रितयमाख्यात-वाच्यमिति तदभावे कथमाख्यातपदमचेतनेषु प्रयुज्यते इत्यत आह ॥ तथाचेति ॥ यत्नस्य पूर्वापरीभूतत्वानुकूलत्वे प्रवृत्तमाख्यातं, धात्व-र्थस्य फलानुकूलतामात्रे रथो गच्छतीत्यादौ प्रयुज्यतेऽतिलाक्षणिक-मित्यर्थः । समुदितप्रवृत्तस्य पदस्यैकदेशे प्रयोगे निदर्शनमाह ॥ विशुद्धिमात्रमिति ॥ श्रोत्रियंश्छन्दोऽधीतेइत्यनुशासनाच्छन्दोऽध्येतृ-ब्राह्मणव्यक्तिः, जन्मना ब्राह्मणो ज्ञेय इति स्मृतेर्जन्मसंस्कारविद्या-समुदायवद्ब्राह्मणव्यक्तिर्वा श्रोत्रियपदशक्या । अतो विशुद्धब्राह्मण-मात्रे यथा लक्षणया प्रयोगः, विशिष्टशक्तपदस्य विशेषणे शक्य-सम्बन्धिनि तात्पर्यादित्यर्थः ॥

ननु शक्यैकदेशे प्रयोगो न लाक्षणिकः । उपस्थित्यर्थं हि लक्षणा । विशिष्टशक्तपदाद्विशिष्टोपस्थितौ विशेषणमप्युपस्थितमेवेत्ययोग्य-तया विशेष्यांशमपहाय विशेषणान्वयस्य मुख्यवृत्त्यैवोपपत्तेः । मैवम् । तस्य धर्म्यन्तरान्वितत्वेनोपस्थितस्येतरधर्म्यनाकाङ्क्षिततया स्वतन्त्रतदुपस्थित्यर्थं लक्षणाया न्याय्यत्वात् ॥

अत एव, पुरोडाशकपालेन तुषानुपवपतीत्यत्र पुरोडाशप्रयोजनक-त्वेनोपस्थितस्य कपालस्य प्रयोजनान्तरानाकाङ्क्षितत्वात् स्वतन्त्र-कपालोपस्थितयेऽधिष्ठानलक्षणा । पङ्कजं कुमुदमित्यत्र पद्मगतत्वेन उपस्थितस्य पङ्कजनिकर्तृत्वस्य धर्म्यन्तरनिराकाङ्क्षितत्वात् कुमुद-परत्वे पङ्कजपदस्य लक्षणेति विपश्चितं द्वितीयाध्याये ॥

अपिच, अचेतनेषु सर्वत्राख्यातस्य गौणत्वं मा भूदिति मानिन-

स्तव यत्नस्याख्यातवाच्यत्वानभ्युपगमः । तच्च तवाप्यापतितमित्याह ॥ अन्यथाऽपीति ॥ मध्यमोत्तमपुरुषलिङ्गोः सम्बोध्यवक्तृविषयत्वाच्चित्रस्यादौ तत्प्रयोगः । प्रथमपुरुषेऽपि जानातीत्यादिप्रयोगश्चाऽचेतने त्वन्मते यथा गौणस्तथाऽस्मन्मते रथो गच्छतीत्यादावपि प्रयोग इत्यर्थः । न चाक्षादिपदवदनेकार्थत्वम् । अक्षादिपदवैधर्म्येण एकत्रैव वाचकता, अन्यत्र वृत्त्यन्तरेणापि प्रयोगोपपत्तेरित्याह ॥ न चेति ॥ अत्रैवानुभवं प्रमाणयति ॥ अत एवेति ॥

अतिथावपीति ॥ श्रमाच्छयानस्य श्रमशान्तेः पाकानुकूलत्वादित्यर्थः । कर्तृरूपव्यवस्थयेति व्याचष्टे ॥

अपि च । कर्तृव्यापार एव कृञर्थश्चेतनश्च कर्त्ता, अन्यथा तद्व्यवस्थाऽनुपपत्तेः । न ह्यभिधीयमानव्यापारवत्त्वं कर्तृत्वम्, अनभिधानदशायां कुर्वतोऽप्यकर्तृत्वप्रसङ्गात् । नाप्याख्यातप्रत्ययाभिधानयोग्यव्यापारशालित्वं कर्तृत्वं, योग्यताया एवानिरूपणात् । फलानुगुणमात्रस्य सर्वकारकव्यापारसाधारणत्वात् । नापि विवक्षातो नियमः अविवक्षादशायामनियमप्रसङ्गात् । स्वव्यापारे नेदमनिष्टमिति चेत् । एवं तर्हि, "स्वव्यापारे च कर्तृत्वं सर्वत्रैवास्ति कारके," इति न्यायेन करणादिविलोपप्रसङ्गः । न स्वव्यापारापेक्षया करणादिव्यवहारः, किन्तु प्रधानक्रियापेक्षया। अस्ति हि काञ्चित् क्रियामुद्दिश्य प्रवर्त्तमानानां कारकाणामवान्तरव्यापारयोगो, न त्ववान्तरव्यापारार्थमेव तेषां प्रवृत्तिरिति चेत् । तर्हि तदपेक्षयैव कर्तृकर्मादिव्यवहारविशेषनियमे किं कारणमिति चिन्त्यताम् । स्वातन्त्र्यादीतिचेत् । ननु तदेव किमन्यत् प्रयत्नादिसमवायादिति विविच्याभिधीयतामिति । त-

स्मात् सर्वत्र समानव्यापार एवाख्यातार्थः ॥

तथापि फलानुगुणतैवास्तु प्रत्ययस्य प्रवृत्तिनिमित्तं, प्रयत्नस्त्वाक्षेपतो लप्स्यते इतिचेन्न ॥

भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः ॥
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ १० ॥

केन हि तदाक्षिप्येत । न तावदनुकूलत्वमात्रेण, तस्य प्रयत्नत्वेनाव्यापनात् । न हि यत्नत्वैकार्थसमवाय्येवानुकूलत्वम् । अत एव न संख्यया, तस्याः संख्येयमात्रपर्यवसायित्वात् । कर्त्रेति चेत् । न । द्रव्यमात्रस्याकर्तृत्वात् । व्यापारवतश्चाभिधाने व्यापाराभिधानस्यावश्याभ्युपगमनीयत्वात् । नापि धात्वर्थेन तदाक्षेपः । विद्यते इत्यादौ तदसम्भवात् । न ह्यत्र धात्वर्थो भावनाऽपेक्षी, सत्ताया नित्यत्वात् । तत्र न भविष्यतीतिचेत् । न । पूर्वापरीभूतभावनाऽनुभवस्याविशेषात् । भावनोपरागेण ह्यतथाभूतोऽप्यर्थस्तथा भासते इति । न च पदान्तरलब्धया भावनयाऽनुकूलतायाः प्रत्ययार्थस्यान्वयः । तदसम्भवात् । न खलु प्रकृत्यैव साऽभिधीयते । धातूनां क्रियाफलमात्राभिधायित्वात् । अन्यथा पाक इत्यादावपि भावनाऽनुभवप्रसङ्गात् । नापि चैत्र इत्यादिना पदान्तरेण। प्रकृतिप्रत्यययोरुभयोरप्यकारकार्थत्वात् ॥

ओदनमित्यादेः कारकपदत्वात् तस्य च क्रियापहितत्वात् तेनाभिधानमापक्षेपो वा । कथमन्यथौदनमित्युक्ते, किं भुङ्क्ते पचति वेति विशेषाकाङ्क्षेतिचेन्न । पचतीत्युक्ते किमोदनं तेमनं वेति विशेषाकाङ्क्षा-

**दर्शनात् । सा चाक्षेपाभिधानयोरन्यतरमन्तरेण न स्यात् । तस्यां दशायां न चेदाक्षेपो नूनमभिधानमेवेति ॥**

अपिचेति ॥ यस्य व्यापारं धातुराख्यातं वा प्राधान्येनाभिधत्ते, स्वतन्त्रश्चेतनोऽचेतनश्च स कर्त्तेत्यत्राभिधानं यदि विशेषणं, तत्राह ॥ न हीति ॥ कर्तृत्वमज्ञात्वा तत्र कर्तृपदप्रयोगाभावादवगते कर्तृत्वे शब्देन तदभिधानम् । तेन कर्तृत्वावगम इत्यन्योन्याश्रयश्चेतिभावः । अथाभिधानमुपलक्षणमुपलक्ष्या च तद्योग्यता, तत्राह ॥ नापीति ॥ योग्यत्वावच्छेदकरूपाज्ञाने अस्या ज्ञानादित्यर्थः । न च प्रधानक्रियानुकूलव्यापारत्वमेव तदवच्छेदकमतिव्याप्तेरित्याह ॥ फलेति ॥ फलानुकूलव्यापारवत्तया यत्कारकं विवक्ष्यते, स कर्त्तेति नोक्तदोष इति मतं निरस्यति ॥ नापीति ॥ ननु स्वव्यापारे सर्वेषां कर्तृत्वमिष्टमेवान्यत्र करणत्वादीत्याह ॥ स्वव्यापार इति ॥ तर्हीति ॥ प्रधानक्रियापेक्षयैव यत्कर्तृत्वं करणादिव्यावृत्तं तस्यैव किं लक्षणमित्यर्थः ॥ स्वातन्त्र्यादीति ॥ स्वतन्त्रः कर्त्तेति पाणिनिलक्षणादित्यर्थः । तस्यान्यस्य व्यवस्थाबीजस्याभावाज्ज्ञानचिकीर्षाकृतिसमवायित्वमेव तद्वाच्यमित्याह ॥ नन्विति ॥ आक्षेपेति ॥ पाकादीनां यत्नं विनाऽनुपपत्तेरित्यर्थः । पादत्रयस्य प्रागेव विवृतत्वादन्तिमं पादं व्याचष्टे ॥ केन हीति ॥ तत्प्रयत्नत्वमित्यर्थः ॥ न हीति ॥ प्रयत्नस्याप्यनुकूलत्वात्, तथात्वे वा रथो गच्छतीत्यादि तत्रापि गौणं स्यादित्यर्थः ॥ तस्या इति ॥ सङ्ख्यया सङ्ख्येयमात्राक्षेपेऽपि न प्रयत्नाक्षेपः, प्रयत्ने सङ्ख्याया अभावादित्यर्थः ॥

कर्त्रेति ॥ आख्यातवाच्येनेत्यर्थः । परमते तस्याऽऽख्यातवाच्यत्वात् । कर्त्ता न द्रव्यमात्रं, द्रव्यमात्रस्यायत्नवत्त्वात् तेन यत्नस्यानाक्षेपादित्याह ॥ द्रव्यमात्रस्येति ॥ नापि व्यापारवन्मात्रं, यत्नरहितस्याप्यचेतनस्य व्यापारवत्त्वात्, यत्नरूपव्यापारवदभिधाने तु प्रयत्नोऽपि वाच्य एव स्यादित्याह ॥ व्यापारवतश्चेति ॥ तत्रेति ॥ आक्षेप इति शेषः ॥ पूर्वेति ॥ पचतीत्यादाविव धात्वर्थानुकूलयत्नानुभवादित्यर्थः । ननु सत्तायानित्यत्वे पूर्वापरीभावो विरुद्ध इत्यत आह ॥ भावनेति ॥ तदसम्भवादिति ॥ ओदनं पचति चैत्र इत्यत्र पदान्तरेण

भावनाऽनुपस्थानादित्यर्थः । अस्माकन्तु अनुकूलयत्नोपस्थितावपि अयोग्यतया स नान्वीयते इति भावः । न हि धातुनैव भावनोपरक्तार्थोऽभिधीयते इत्यत आह ॥ न खल्विति ॥ प्रकृत्या धातुनेत्यर्थः ॥

फलस्य धात्वर्थतया पच्यर्थो विक्लित्तिर्लाघवात्, न तु तत्फलकोव्यापारोऽधःसन्तापनादिः । न चैवं व्यापारविगमे फलसत्त्वकाले पचतीति प्रयोगापत्तिः । धात्वर्थानुकूलव्यापारवत्त्वस्याख्यातार्थतया व्यापारकाल एव पचतीति प्रयोगात् । अथैवं धात्वर्थतया फलं क्रियेति तण्डुलादेः कर्मता न स्याद्, विक्लित्त्यादिजन्यफलभागित्वाभावादितिचेन्न । परसमवेतव्यापारफलशालिनः कर्मत्वात् । स च व्यापारो धात्वर्थ आख्यातार्थो वा । उभयथाऽपि समवेतव्यापारफलशालिनस्तण्डुलादेः कर्मत्वात् । विक्लित्त्यनुत्पादे व्यापारविगमदशायां पाको वर्त्तते इत्यत्र पाकपदे व्यापारलक्षणेति मतमाश्रित्योक्तं दूषणमिदम् ॥

अन्यथेति ॥ यदि धातूनामेव भावनाऽभिधायकत्वमित्यर्थः ॥ प्रकृतीति । प्रकृतिश्चैत्रपदं, प्रत्ययः प्रथमा । तयोरुभयोरपि शुद्धप्रातिपदिकार्थतया न कारकार्थत्वं, व्यापारवतः कारकत्वेन कारकाऽर्थस्य भावनार्थत्वं सम्भाव्येतापीत्यर्थः ॥ कथमिति ॥ ओदनमित्युक्ते भावनाविशेषजिज्ञासा तत्सामान्यज्ञानं विना न स्यादित्यर्थः । कर्मपदादाक्षेपतोऽभिधानतो वाऽवश्यकी तदुपस्थितिरिति भावः ॥ पचतीत्युक्त इति ॥ कर्मपदानुच्चारणेऽपि तदभिधानाक्षेपयोरभावे पचतीत्यत्र भावनाधीर्न स्यादिति भावनाऽभिधायकमाख्यातपदं कल्प्यमित्यर्थः ॥

ननु बीजेनाङ्कुरः कृतो बीजमङ्कुरं करोतीति यत्नं विनाऽपि कृञः प्रयोगाद् न तस्य यत्नो वाच्यः । नापि कर्तृपदं यौगिकं, तथा सति कृञो यत्नार्थत्वे तृचश्च कर्त्रर्थत्वे धातुप्रत्ययार्थयोः कृतिकर्त्रोः परस्परमनन्वयापत्तेः । कृतिविशिष्टस्य कृतिनिराकाङ्क्षत्वात् । एवं कृञः क्रियार्थत्वे तृचश्च तदाश्रयवाचकत्वे तयोः परस्परमनन्वय एवेत्युभयदर्शने कर्मपदवत् कर्तृपदं रूढमेव ॥

तथाच, न कृताकृतविभागेन कर्तृरूपव्यवस्थया च कृञो यत्नोऽर्थइति न तेन विवरणादाख्यातस्य यत्नार्थत्वं, किन्त्वनुकूलत्वेन व्यापार एव तद्वाच्यः । तेन चेतनाचेतनयोर्धात्वर्थानुकूलव्यापारव-

त्वादाख्यातप्रयोगो मुख्यः। न चैवं पथि श्रमशयानेऽपि पचतीति प्रयोगापत्तेः । यदि तु तस्य प्रयत्नविशेषो वाच्यः, तदा ममापि व्यापारविशेषो वाच्यइत्यस्तु। यत्नधीस्त्वाक्षेपात्। धात्वर्थविशेषस्य पाकादेस्तेन विनाऽनुपपत्तेः॥ न चाख्यातस्य यत्नो वाच्यः, पचतीत्यस्य पाकानुकूलयत्नवानिति विवरणादिति वाच्यम् । तथा सति कर्त्तुरपि तद्वाच्यताऽऽपत्तेः। न हि पाकयत्न इत्येव विवरणम्। अथ तात्पर्यविवरणस्याऽऽक्षेपादिनाऽपि निर्वाहः, तुल्यं यत्नेऽपि । अत एव रथो गच्छति विद्यते व्योमेत्यत्र न भावनाऽनुभवः। भावनाया धात्वर्थान्वयायोग्यतया त्वयाऽपि तत्र गौणत्वाङ्गीकारादिति ॥

अत्र वदन्ति । चैत्रः पचतीत्यत्र पाकानुकूलयत्नानुभवात् स एवाख्यातवाच्यः। लाघवात्। न त्वनुकूलव्यापारः । यत्नत्वजात्यपेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात्। न चाचेतनेऽप्याख्यातस्य मुख्यत्वार्थमनुगतो व्यापार एव शक्य इति वाच्यम् । शक्तिग्राहकेण लघुनि शक्तिग्रहात्। मुख्यत्वार्थं शक्तिकल्पने वृत्त्यन्तरोच्छेदापत्तेः। न च पाकस्य यत्नसाध्यत्वानुमित्या यत्नस्यापि लाभादन्यलभ्यत्वेन स नाख्यातवाच्यः। चैत्रः पाकानुकूलवर्त्तमानयत्नवान् प्रतीयते। न च पाकस्य वर्त्तमानयत्नेन प्राप्तिरस्ति । अतीतादौ व्यभिचारात्। नापि धात्वर्थेनानुमिते यत्ने आख्यातेन वर्त्तमानत्वान्वयबोधः सम्भवी । यत्नस्यापदार्थत्वात् । स्वार्थव्यापारवर्त्तमानत्वबोधनेनाख्यातस्य पर्यवसितत्वाच्च। न चाचेतने आख्यातस्य व्यापारावाचकत्वावधारणादेवं कल्पनेतियुक्तम्। गौणतया शक्तिभ्रमेण वा तत्राख्याताद्व्यापारावगमोपपत्तेः । यत्नविगमदशायां तज्जन्यव्यापारकाले पचतीत्यत्र वर्त्तमानव्यापाराभिधानमाख्यातेन लक्षणया । रथो गच्छतीत्यत्र यथा । अतोऽन्यलभ्यत्वाच्च तदनुरोधेन व्यापारे शक्तिः। अन्यथा तवापि यत्नकाले पचतीति न स्यादिति ॥

स्यादेतत् । अभिधीयतां तर्हि कर्त्ताऽपि। तदनभिधाने हि सङ्ख्येयमात्रमाक्षिप्य सङ्ख्या कथं कर्त्तारमन्वियात्, न तु कर्म्मादिकमपि । शाकसूपौ पचतिशाकसूपौदनान् पचतीत्यादौ विरोधनिरस्ता सङ्ख्या

चैत्र इति कर्त्तारमविरुद्धमनुगच्छतीति चेत्। चैत्रओदनं पचतीत्यत्र का गतिः।

एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथा, यववराहादिवदिति चेत्। न। पच्यते इत्यादावपि तथाभावप्रसङ्गात्। चैत्राभ्यां चैत्रैरिति विरोधनिरस्तास्तूप इत्यविरुद्धं कर्म्म समनुक्रामतीति चेत्। चैत्रमैत्राभ्यां शाकसूपौ पच्येते इत्यत्र का गतिः।

अन्यत्र निर्णीतेनार्थेन व्यवहार इति चेत्। न। पचतीत्यादावपि तथाभावप्रसङ्गात्। तत्र पूर्व्वकएव निर्णयः, पच्यते इत्यत्र त्वपर इति चेत्। न। विशेषाभावात्। आत्मनेपदपरस्मैपदाभ्यां विशेष इति चेत्। न। पच्यते पचते पक्ष्यते इत्यादौ विप्लवप्रसङ्गादिति।

ननु धात्वर्थानुकूलयत्नस्याख्यातशक्यत्वे एककृतिकाले पचतीतिवत् कृतेर्ध्वंसे अग्रिमकृतेरनुत्पाददशायां मध्येऽप्यपाक्षीत् पक्ष्यतीति स्यात्। यत्नप्रचयस्य च शक्यत्वे पचतीति न स्यादेव, एकदा तस्याभावात्। अथ भूतभविष्यतोर्यत्नाभावनिरूप्यत्वात् यत्नकाले तदभावान्नोक्तदोष इतिचेन्न। ध्वंसानुत्पादयोर्यत्नविशेषप्रतियोगिकतया यत्नकालेऽपि तत्सत्त्वात्। तयोः सकलकृतिप्रतियोगिकत्वाभावात्॥

मैवम्। यत्राख्यातवाच्ये प्रचये एकैकस्य वर्त्तमानव्यवहारनिमित्तत्वं, तत्र तावतां ध्वंसैः प्रागभावैश्च भूतभविष्यद्व्यवहारः। न तु वर्त्तमानव्यवहारनिमित्तकिञ्चिदभावात्। चेतनाचेतनभोजनगमनादौ तथैव प्रयोगात्। प्रयोगे सति निमित्तानुसरणात्। धातोराख्यातस्य चानुकूलव्यापारवाचकत्ववादिभिरनन्यगतिकतयातथैवस्वीकाराच्चेति॥

चैत्र ओदनं पचति चैत्रेण पच्यते ओदन इत्यत्र कर्त्तरि कर्मणि आख्यातार्थसङ्ख्याऽन्वयात् कर्तृकर्मणी लकारवाच्ये। तेन वाच्यगामिनी सङ्ख्येति नियमो भवति। अन्यथाऽऽक्षिप्तसङ्ख्यान्वये नियमो-

न स्यादिति वैयाकरणमतमाह—

अभिधीयतामिति ॥ का गतिरिति ॥ ओदनमित्येकत्वेनोपस्थिते-नैकत्वसङ्ख्याऽन्वयविरोध इति पचतीत्येकत्वमोदनान्वितं किन्न स्यादित्यर्थः ॥

यववराहादीति ॥ यवमयश्चरुर्भवतीत्यत्र दीर्घशूकस्य यवपदार्थतया निर्णीतस्य यवैर्यजेतेत्यादौ न यत्र वाक्यशेषस्तत्रापि तस्यैव यवपदवाच्यता यथेत्यर्थः । तथाभावेति ॥ आख्याताभिहितभावनायाः कर्त्रन्वयप्रसङ्गादित्यर्थः । तथा चौदनः पच्यते देवदत्त इति प्रयुज्येतेति भावः ॥

अन्यत्रेति ॥ चैत्राभ्यां चैत्रैः सूपः पच्यते इत्यत्र कर्माणि सङ्ख्याऽन्वयस्य निर्णीतत्वादत्रापि तथेत्यर्थः ॥ पचतीत्यादाविति ॥ देवदत्त ओदनं पचतीत्यादावपि कर्मगतैकत्वान्वयप्रसङ्ग इत्यर्थः ॥ तत्रेति ॥ पचतीत्यत्र सङ्ख्याऽन्वयः कर्त्रा, पच्यते इत्यत्र कर्मणेत्यर्थः ॥ विशेषेति ॥ क्वचित् कर्त्तरि क्वचित् कर्मणि सङ्ख्याऽन्वयस्य दृष्टत्वादन्यतरत्र नियामकाभावादित्यर्थः ॥ पच्यत इति ॥ पच्यत इतिदृष्टान्तार्थम् । अतो यथात्मनेपदात् पच्यते इत्यत्र कर्मणा सङ्ख्यान्वयः, तथा पचते इत्यत्रापि स्यादित्यर्थः ॥

नन्वाख्यातवाच्यत्वे कर्त्तुस्तद्वाच्यया सङ्ख्ययाऽन्वयबोधो न स्यात्, एकपदोपस्थापितपदार्थयोर्मिथोऽन्वयबोधस्याव्युत्पन्नत्वात्। अन्यत्र भिन्नपदोपस्थापितानामेवान्वयबोधादित्यतआह ॥

दृश्यते च समानप्रत्ययाभिहितेनान्वयः सङ्ख्यायाः। तद् यथा, भूयते सुप्यते इत्यादौ। न हि तत्र कर्त्रा कर्म्मणा वा अन्येनैव वा केनाचिदन्वयः, किन्तु भावेनैव। अनन्वये तदभिधायिनोऽनर्थकत्वप्रसङ्गात्। आक्षिप्तेन चान्वये तत्रापि कर्त्रैवान्वयापत्तेः। को हि सुप्यते स्वपितीत्यनयोः कर्त्राक्षेपं प्रति विशेषः।

स्यादेतत्। भावकर्म्मणोरित्याद्यनुशासनबलात्तावत् भावकर्म्मणी प्रत्ययवाच्ये। ततस्तदभिहिता

सङ्ख्या ताभ्यामन्वीयते । यस्तु प्रत्ययो न तत्रोत्पन्नः, तदभिहिता सङ्ख्या, मुख्यं वा पूर्वचोदनाल्लोकवद् ( मी० १२, २, २३, ) इति न्यायेन कर्त्तारमेवाश्रयते इति नियमः । न । विपर्य्ययप्रसङ्गात् । शेषात् कर्त्तरि परस्मैपदं कर्त्तरि शबित्यनुशासनबलाद्भावकर्त्तारौ प्रत्ययवाच्यौ, ततस्तदभिहिता सङ्ख्याऽपि ताभ्यामन्वीयते । यस्तु प्रत्ययो न तत्रोत्पन्नस्तदभिहिता संख्या तेनैव न्यायेन कर्म्म* समाश्रयेदिति नियमोपपत्तेः । तस्मान्मतिकर्दममपहाय यथाऽनुशासनमेव गृह्यते इति प्राप्तम् । एवं प्राप्तेऽभिधीयते ।

आक्षेपलभ्ये सङ्ख्येये नाभिधानस्य कल्पना ।
सङ्ख्येयमात्रलाभेऽपि साकाङ्क्षेण व्यवस्थितिः ॥११॥

सङ्ख्याऽपि तावदियं भावनाऽनुगामिनी; यं यं भावनान्वेऽति, तं तं सङ्ख्याऽपीति स्थितेः एकप्रत्ययवाच्यत्वानियमात् । भावना च शुद्धं प्रातिपदिकार्थमात्रमाकाङ्क्षति । न हि व्यापारवन्तं व्यापार आश्रयते, आत्माश्रयत्वात् ।

दृश्यते चेति॥यथा भावनाच्चाख्यानाभिधेयसङ्ख्या तेनैवान्वीयते न त्वाक्षिप्तेन कर्त्रा, साकाङ्क्षयोग्यासन्नपदार्थमात्रस्यैवान्वयप्रतियोगित्वात् । भिन्नपदोपस्थापितत्वस्य गौरवेणाप्रयोजकत्वात् । तथाऽऽख्यातवाच्ययोः कर्तृसङ्ख्ययोरप्यन्वय इत्यर्थः ॥ न हीति ॥ अन्वये वा कर्तुरनेकत्वे द्विबहुवचनयोः प्रयोगः स्यादिति भावः ॥

यदि च भावसङ्ख्ययोरन्योन्यमनन्वयः, तदा निश्चितान्वयपदत्वेनाख्यातमपार्थकं स्यादित्याह ॥ अनन्वय इति ॥ यद्याक्षिप्तेन कर्त्रान्वयः सङ्ख्यायाः स्यात्, तदा स्वपितीत्यत्रेव सुप्यत इत्यत्रापि तेनैव तदन्वयः स्यादित्याह ॥ आक्षिप्तेन वेति ॥ को हीति ॥ आक्षेपहेतोर्भावनाऽभिधानस्योभयत्राविशेषादित्यर्थः ॥

मुख्यं वेति ॥ आग्नावैष्णवमेकादशकपालं चरुं निर्वपेत्, संग्रामे सरस्वतीमप्याज्यस्य यजेतेत्यत्राग्नावैष्णवधर्मा अग्रतो भवन्त्याहो सारस्वतधर्माः ? इत्यानियमे अग्नावैष्णवधर्मा एव प्रथमं भवन्ति । अत हेतुः । पूर्वचोदनात् । अस्योदाहरणं, लोकवादेति ॥ यथा लोके यत्र विवादपदे साक्षिद्वयसत्त्वान्मुख्यः साक्षी पृष्टस्तमनुजानाति, द्वितीयश्च पृष्टस्तमपलति । तत्र प्रथमपृष्टेनैव व्यवहारः । तस्य मुख्यत्वात् । तथा कारकाणां प्रथमं कर्त्रैव देशित इति बाधकं विना तेनैव सङ्ख्याऽन्वीयत इत्यर्थः ॥

भावकर्त्तारावेति द्वन्द्वः तेनैव, मुख्य वेत्यादिनैवेत्यर्थः ॥ कर्मेवेति ॥ तथा च भक्ष्यते ओदनं देवदत्त इति न स्यात्, किन्तु पक्ष्यते ओदन देवदत्तेने इत्येव स्यादित्यर्थः । यथाऽनुशासनं, व्याकरणानतिक्रमेणेत्यर्थः । तथा च कर्त्तरि विहितस्याख्यातस्य सङ्ख्या कर्त्रा कर्मणि च विहितस्य सा कर्मणाऽन्वेतीति नियम उपपद्यते इति भाव॥

समानप्रत्ययोपात्तत्वे प्रत्यासत्त्यरङ्गत्वात् सङ्ख्येमात्रसाकाङ्क्षाऽपि सङ्ख्याभावनाऽन्वयिनैवान्वेति । अग्निना चैत्र ओदनं पचतीत्यत्र चत्रपदार्थस्य निर्व्यापारत्वेनोपस्थितस्य भावनाऽऽत्मकव्यापारसाकाङ्क्षत्वाद् भावनायाश्चाश्रयाकाङ्क्षत्वात् तेनैव भावनाऽन्वेति, न कर्मकरणादिना । द्वितीयादिना तस्य व्यापारवत्तयोपस्थितेर्व्यापारान्तरनिराकाङ्क्षत्वात् । भावनायाः साकाङ्क्षाया अन्वयानङ्गत्वात् । ओदनः पच्यते चैत्रणेत्यत्र तु कर्त्तुर्व्यापारवत्त्वेनोपस्थितेन तत्र भावनाऽन्वयः किन्तु प्रथमानिर्दिष्टेन कर्मणा । तस्य व्यापारवत्त्वेनानुपस्थितेस्तत्साकाङ्क्षत्वात् । चैत्रेण सुप्यते इत्यत्र तु कर्तुर्निराकाङ्क्षत्वात् कर्मणश्चाभावाद् धात्वर्थेनैव सङ्ख्याया अन्वय इति आक्षेपादेव कर्तृकर्मणोर्लाभे सङ्ख्याऽन्वयोनमस्य चान्ययोपपत्तौ न ते लकारवाच्ये इत्याह ॥ सङ्ख्या तावदिति ॥

शुद्धं, निर्व्यापारत्वेनोपस्थितम् । इदञ्च कर्तृकर्मणोराक्षेपलभ्यत्वं यद्भावनाविशेष्यत्वे सति प्रथमान्तपदोपस्थाप्यत्वं, न तु सङ्ख्यालिङ्गकानुमितिविषयत्वम् । अनुमित्या सङ्ख्येयमात्रगतत्वेन सङ्ख्याप्रतीतेः । शाब्दोपस्थापितसङ्ख्यायास्तदुपस्थापितेनैवान्वयनियमाच्चेति तत्त्वम् । किं तद्व्यापारविशिष्टे तद्व्यापाराश्रयणम, उत व्यापारान्तरविशिष्टे ? । तत्र नाद्य इत्याह ॥ आत्माश्रयादिति ॥ अन्त्ये, त्वनुपस्थिते-

रिति भावः । युक्त्यन्तरमाह ॥

समवायं प्रति तदनुपयोगात् । विजातीयव्यापारवतोऽकर्तृत्वाच्च । न च द्वितीयाद्याः प्रातिपदिकाविभक्तयः । ततः प्रथमानिर्दिष्टेनैव भावनाऽन्वीयते इति तस्यान्वययोग्यतानियमात् सङ्ख्याऽपि तदनुगामिनी तेनैवान्वीयते इति नातिप्रसङ्गः । नञर्थवत् । यथा हि चैत्रो न गौरो न स्पन्दते न कुण्डलीत्यादौ विशेषणविशेष्यसमभिव्याहाराविशेषेऽपि नञा तदनभिधानाविशेषेऽपि नञर्थस्य विशेषणांशैरेवान्वयो न विशेष्यांशेन ।

ननु बाधास्तत्र तथा । न हि विशेष्येण तदन्वये विशेषणोपादानमर्थवद्भवेत् । तन्निषेधेनैव विशेषणनिषेधोपलब्धेः । उभयनिषेधे चावृत्तौ वाक्यभेदादनावृत्तौ निराकाङ्क्षत्वादिति चेत् । न । तुल्यत्वात् । समानप्रत्ययोपात्तभावनाऽऽक्षिप्तान्वयोपपत्तौ बाधकं विना सन्निहितत्यागे व्यवहितपरिग्रहस्य गुरुत्वात् । भावनायाश्च सामान्याक्षेपेऽपि साकाङ्क्षपरित्यागे निराकाङ्क्षान्वयानुपपत्तेः । न ह्यन्यतराकाङ्क्षा अन्वयहेतुः, अपितूभयाकाङ्क्षा । प्रातिपदिकार्थो हि फलेनान्वयमलभमानः क्रियासम्बन्धमपेक्षते, भावनाऽपि व्यापाररूपा सती व्यापारिणमित्युभयाकाङ्क्षा अन्वयहेतुः । कटं कटेनेत्यादि तु कारकतयैव फलसमन्वितं न व्यापारान्तरमपेक्षते इति निराकाङ्क्षमिति ॥

समवायं प्रतीति ॥ तदनुपयोगाद् व्यापारवदनुपयोगात् ॥ भावनाया इव तत्समवायस्यापि शुद्धप्रातिपदिकार्थापेक्षतया भावना-

द्विविशिष्टनिराकाङ्क्षत्वादित्यर्थः ॥

यद्वा, समवायो मेलकः । यत्नमेलकस्य पूर्वापरीभूतभावनावाचकेनाख्यातेनैव बोधितत्वाद् न तदन्वयाय भावनान्तरापेक्षेत्यर्थः । नन्वात्माश्रयानवस्थाभ्यां सजातीयव्यापारवदनाकाङ्क्षेति द्वितीयाद्युपनीतविजातीयव्यापारवत् साकाङ्क्षत्वं स्यादित्यत आह ॥ विजातीयेति ॥ तथा सत्यऽयोग्यत्वादनन्वयापत्तिः । न हि घटानुकूलव्यापारेण पाककर्तृत्वं दृष्टमित्यर्थः ॥

ननु शुद्धप्रातिपदिकार्थापेक्षिण्यपि भावना कुतो न द्वितीयाद्युपनीतेनान्वेतीत्यत आह ॥ न चेति ॥ उभयोपस्थितावपि साकाङ्क्षेण सहान्वयो भावनाया न निराकाङ्क्षेणेति दृष्टान्तेन स्पष्टयति ॥ नञर्थवदिति ॥ न चैत्र इत्यादिना क्रमेण जातिगुणकर्मद्रव्याणां विशेषणानां निषेध्यत्वमुक्तम् ॥ आवृत्ताविति ॥ उभयनिषेधे च सकृदुच्चरितस्य नञोऽन्यतरनिषेधेनैव निराकाङ्क्षत्वात् तदर्थान्वयार्थमावृत्तिकल्पने पदावृत्तिरूपवाक्यभेदापत्तिरित्यर्थ ॥ अनावृत्ताविति ॥ सकृदुच्चरितनञो येन केनचिदेकेनैव चरितार्थत्वाद् निराकाङ्क्षत्वादित्यर्थः ॥

भावनाऽन्वयिनैव सङ्ख्याऽन्वेतीत्यत्राभिमतं नियामकं स्पष्टयति ॥ समानेति ॥ यद्यपि व्यापारात्मिका भावना व्यापारसामान्यमाकाङ्क्षति आक्षिपति, तथापि साकाङ्क्षेण व्यापारेणा प्रातिपदिकार्थेनान्वीयते, न तु निराकाङ्क्षेण कारकान्तरेणेत्याह ॥ सामान्येति ॥ उभयाकाङ्क्षामाह ॥ प्रातिपदिकार्थ इति ॥ फलेन धात्वर्थेन ॥ क्रियासम्बन्धं व्यापारसम्बन्धमित्यर्थः ॥ कर्तृ कर्त्रेति ॥ अत्र द्वितीयातृतीयाभ्यां कारकविभक्तिभ्यां क्रियाऽनुकूलव्यापारसहितस्यैवोपस्थितेर्न भावनाऽऽकाङ्क्षेत्यर्थः ॥

अत एवास्यते सुप्यते इत्यादौ नाक्षिप्तेनान्वयः । न हि चैत्रेणेति तृतीयान्तशब्दस्य भावनायामाकाङ्क्षाऽस्ति । भाव्याकाङ्क्षाऽस्तीति चेत् । न । फलेन शयनादिधात्वर्थेनान्वयात् । फलसंबन्धिनश्चात्र कर्त्रनतिरेकात् । न हि शयनादयो धात्वर्थाः कर्त्रतिरेकिसंबन्धाः । न च फलतत्संबन्धिव्यतिरेकेणान्यो भाव्यो-

नाम, यमपेक्षेत ॥

ननु यदि स्वपिति इत्यादावाक्षिप्तेन कर्त्राऽन्वयस्तदा सुप्यते इत्यादावपि तथा स्यादित्यत आह ॥ अत एवेति ॥ यत एव उभयाकाङ्क्षानिबन्धनोऽन्वय इत्यर्थः । भाव्यं भावनाजन्यं, फलञ्चेत्तत्राह ॥ फलेनेति ॥ अथ फलसम्बन्धि कर्म भाव्यं, तत्राह ॥ फलेनि ॥ धातूनामकर्मकत्वात् तदाश्रयत्वं कर्तुरेवेत्यर्थः । तस्य च, चैत्रेणेति तृतीयया कर्तृत्वोपस्थितेर्न भाव्यत्वेनान्वयान्तरमिति भावः ॥

ननु चैत्रस्तण्डुलान् पचति इत्यत्र भावनाऽन्वयश्चैत्रे सम्भवत्याश्रयत्वात् । चैत्रेण पच्यन्ते तण्डुला इत्यत्र तण्डुलानां न तावद्विषयत्वेन भावनाऽन्वयः । यत्नस्य विक्लित्त्यनुकूलव्यापारविषयत्वात् । विषयत्वेनान्वये वा, चैत्रस्तण्डुलान् पचतीत्यत्र तण्डुलानां विषयत्वेन भावनाऽन्वयापत्तौ सङ्ख्याया अपि तदन्वयापत्तेः । नाप्याश्रयतया, भावनाया अतदाश्रितत्वात् । न च चैत्रेण भावनाऽन्वयः, तृतीयार्थयत्नेनावरुद्धतया भावनायास्तदनन्वयात् । अचेतने वा कथं सङ्ख्याऽन्वयनियमः ? । तत्र भावनाया अनन्वयात् । यत्र च पचतीत्येव प्रयुज्यते, तत्र कथं भावनायाः कर्त्रन्वयः ? । यत्र वा चैत्रः कर्त्ता पचत्योदनम्, इति प्रयोगः, तत्र चैत्रेणेति वत् कर्तृत्वेनैवोपस्थितावाकाङ्क्षाविरहाद्भावनाऽनन्वये कथं कर्त्तरि सङ्ख्याऽन्वयः ? ॥

उच्यते । यत्र यद्विशेष्यं, तेन सङ्ख्याऽन्वयः । तथाहि । चैत्रस्तण्डुलान् पचतीत्यत्र तण्डुलानां कर्मत्वेनान्वयात् तण्डुलवृत्तिफलजनकव्यापारजनकयत्नाश्रयश्चैत्र इति प्रतीतेः स विशेष्यः । चैत्रेण पच्यन्ते तण्डुला इत्यत्र चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयास्तण्डुलाः प्रतीयन्ते इति यत्नस्य परम्परया तण्डुला विशेष्याः । एवं यद्यप्युभयत्र चैत्रः कर्त्ता तण्डुलाः कर्माणि, तथापि यत्नविशेष्ये सङ्ख्याऽन्वयः। अचेतनेऽपि रथो ग्रामं गच्छतीत्यत्र ग्रामवृत्तिफलजनकव्यापाराश्रयो रथः प्रतीयते । रथेन गम्यते ग्राम इत्यत्र रथवृत्तिव्यापारजन्यफलाश्रयो ग्राम इति तत्रापि विशेष्ये सङ्ख्याऽन्वयः ॥

चैत्रेण सुप्यते इत्यत्र न चैत्रो भावनाविशेष्यः । तृतीयार्थावरुद्धत्वात् । कर्म तत्र नास्त्येव । अतो धात्वर्थ एव भावनाविशेष्यः, फलत्वाद्विषयत्वाद्वेति तत्र सङ्ख्याऽन्वयः । न च प्रातिपदिकार्थे भावना-

ऽन्वयेऽपि न सङ्ख्याऽन्वयः। प्रथमोपनीतसङ्ख्याऽन्वयेन च तस्य तदनाकाङ्क्षत्वादिति वाच्यम्। प्रथमाऽऽख्याताभ्यामेकस्या एव सङ्ख्याया अभिधानात्। चैत्रो दण्डीत्यत्रैव सामानाधिकरण्यानुरोधात्। अन्यथा त्वन्मते प्रथमाऽर्थसङ्ख्याऽन्वयश्चैत्रे न स्यात्। आख्यातेनैव स्ववाच्यकर्तृसङ्ख्याऽभिधानात्। नापि पचतीत्यत्र पाकयत्नवानिति विवरणात् कर्त्ता आख्यातवाच्यः। कर्तुरन्यलभ्यत्वेनावाच्यत्वस्थितौ विवरणस्य तात्पर्यविषयपरत्वात्। द्वन्द्वादिसमासस्य विग्रहेण विवरणेऽपि तत्र शक्त्यभावाच्च॥

अत्रास्मत्पितृचरणाः। कृतिरूपकर्तृत्ववत् कर्मत्वमपि लकारवाच्यम्। तद्धर्मिणोरन्यत एव लाभात्। तण्डुलान् पचतीत्यत्र द्वितीयात इव चैत्रेणौदनः पच्यते इत्यत्रान्यतः कर्मत्वालाभादित्याहुः॥

कर्तृकर्मकरणादीनामभिहितानभिहितत्वविशेषाभावे कटं करोति चैत्र इत्यत्र विभक्तिपरिणामे प्रयोगः किं न स्यादित्याह—

स्यादेतत्। किमिति न प्रयुज्यते कटः करोति चैत्रमित्यादि, अभिहितानभिहितव्यवस्थाऽभावादिति चेत्। न। चैत्रमिति प्रथमान्तस्यासाधुत्वात्। द्वितीयान्तस्य तु कर्म्मवचनत्वेन तत्संबन्धाद्याख्यानपेक्षणीभावेन भावकमात्रमपेक्षेत। न च कटस्य चैत्रं प्रति भावकत्वं, विपर्ययात्। अनासेन तु विवक्षायां प्रयुज्यत एव।

प्रयुज्यतां तर्हि कटः करोति चैत्र इत्यादि। न। नित्यसन्दिग्धत्वेन वाक्यार्थासमर्पकत्वात्। ततस्तदुपपत्तये विशेषस्य व्यञ्जनीयत्वात्। व्यज्यतां तर्हि तृतीयया चैत्रेणेति, एवं देवदत्तः क्रियते कटमिति व्यज्यतां द्वितीययेति चेत्। न अप्रयोगात्। न ह्यनासेनाऽप्येवंप्रायाणि प्रयुज्यन्ते। लक्षणाविरोधेन कुत एतदेवेति चेत्। लोकस्यापर्यनुयोज्यत्वात्॥

न हि गार्गिकयेति पदं साध्विति श्लाघाऽभिधायिपदसन्निधिमनपेक्ष्य प्रयुज्यते । तस्य तदुपाधिनैव विहितत्वादिति चेत् । एतदेव कुतः ? लोके तथैव प्रयोगदर्शनादिति चेत् । तुल्यम् । करोतीत्यादि कर्मविभक्तिसमभिव्याहारेणैव प्रयुज्यते, क्रियते इति कर्तृविभक्तिसमभिव्याहारेणैवेति किमत्र क्रियताम् ।

किमिति ॥ चैत्रशब्दस्य पुंलिङ्गत्वात् प्रथमायां तद्रूपमसाध्वित्याह ॥ चैत्रमितीति ॥ भाव्यानपेक्षिणीति ॥ द्वितीयायाः कर्मत्वाभिधायकत्वेन भाव्यानपेक्षिणी भावनेत्यर्थः ॥ नित्येति ॥ कर्तृकर्मभावे इति शेषः ॥ लोकस्येति ॥ व्याकरणस्याप्यनादिप्रयोगानुपजीव्यैव शब्दान्वाख्यायकत्वादित्यर्थ, ॥ तुल्यमिति ॥ अनादिः प्रयोगोऽस्माकमप्युपजीव्य इत्यर्थः ॥

इदमेवेति ॥ बालव्युत्पत्त्यर्थं प्रकृतिप्रत्ययविभागस्येवाभिहितानभिहितत्वस्यापि व्युत्पादनमित्यर्थः । वस्तुतो यत्पदस्य यत्पदसमभिव्याहारेणैव प्रयोगनियमः, तस्य तत्पदं विना न प्रयोग इत्यर्थः ॥

कर्तृधर्मस्य यत्नस्य विधित्वे सर्वाख्यातसाधारण्येनोक्तातिप्रसङ्गे समाधिं शङ्कते—

इममेव विशेषमुररीकृत्यानभिहिताधिकारानुशासनेन ह्येतावान् परामर्शः सर्वेषां हृदि पदमादधातीत्यभिधानानभिधानविभाग एव व्युत्पादनदशायां पेशल इति ॥

स्यादेतत् । भवतु सर्वाख्यातसाधारणी भावना । कालविशेषसंबन्धिनी सा लड़ाद्यर्थः, कालत्रयापरामृष्टा लिङर्थ इति चेत् । न । यत्नपदेन समानार्थत्वप्रसङ्गात् । विषयोपरागानुपरागाभ्यां विशेष इति चेत् । न । यागयत्न इत्यनेन पर्यायताऽऽपत्तेः । कर्तृसङ्ख्याऽभिधानानभिधानाभ्यां विशेष इति चेत् । न ।

यागयत्नवानित्यनेन साम्यापत्तेः। इष्टएवायमर्थ इति चेत्। न। इतोवत्सरशतेनाप्यप्रवृत्तेः। फलसमभिव्याहाराभावान्न प्रवर्त्तते इति चेत्। न। स्वर्गकामो-यागयत्नवानित्यतोऽप्यप्रवृत्तेः। तत् कस्य हेतोः? न हि यत्नोयत्नस्य हेतुर्यत्नप्रतीतिर्वा यत्नस्य कारणं, अपि त्विच्छा। न च सोऽपि प्रतीता यत्नजननी येन सैव विध्यर्थ इत्यनुगम्यतां, अपि तु सत्तया। न च लिङः श्रुतिकाले सा सती। न च लिङेव तां जनयति। अर्थविशेषमप्रत्याययन्त्यास्तस्यास्तज्जनकत्वे व्युत्पत्तिग्रहणवैयर्थ्यात्। अनुपलब्धलिङाश्चेच्छाऽनुत्पत्तिप्रसङ्गादिति।

एतेन वृद्धव्यवहाराद्व्युत्पत्तिर्भवन्ती बालस्यात्मनिप्रवृत्तिहेतुर्योऽवगतस्तमेवाश्रयेत्, स्वयञ्च कुर्यामिति सङ्कल्पादेवायं प्रवृत्तः, ततः सएव लिङर्थ इति निरस्तम्। कुर्यामिति प्रयत्नो वा स्यादिच्छा वा? नाद्यः, स्वात्मनि वृत्तिविरोधात्। न द्वितीयः। सा हि सत्तयैव प्रयत्नोत्पादिनी, न च लिङः श्रुतिकाले सा सतीत्युक्तम्।

फलेच्छा तु निसर्गवाहितया सत्यपि न प्रयत्नं प्रतिहेतुः। अन्यविषयत्वात्। तदर्थश्च शास्त्रवैयर्थ्यात्। तस्याः कारणान्तरतएव सिद्धेः। तत्प्रतीत्यर्थमपि शास्त्रानिपेक्षणात्। तस्यामनोवेद्यत्वात्। अप्राप्ते च शास्त्रानवकाशात्*। तदभिधाने च स्वर्गकाम इति कर्तृविशेषणपौनरुक्त्यात्। तदा हि यजेतेत्यस्यैव यागकर्त्ता स्वर्गकाम इत्यर्थः स्यात्।

स्यादेतदिति ॥ लडादीनां वर्त्तमानादिकालनियमवल्लिङस्तद्भावादिति नातिप्रसङ्ग इत्यर्थः । यत्नज्ञानस्याप्रवर्त्तकतया प्रागुक्ताप्रवृत्तेरिति स्मारणेन परिहरति ॥ यत्नपदेनेति ॥ अथ लिङा न यत्नः क्रियते अपि तु यत्नज्ञानमिति, तत्राह ॥ यत्नप्रतीतिर्वेति ॥ अत्रापि. न हीति योज्यम् । अस्तु कर्तृधर्म इच्छैव लिङ्वाच्येत्यत आह ॥ न चेति ॥ प्रवृत्तिहेतुज्ञानविषयस्य लिङर्थत्वादित्यर्थः ॥

असत्त्वादिति विवृणोति ॥ न च लिङ इति ॥ प्रत्ययत्यागादिति हेतुं व्याचिख्यासुर्भूमिकामारचयति ॥ न च लिङेवेति ॥ अथ विषयज्ञानमनुत्पाद्य लिङपि नेच्छां जनयति, अन्यथा व्युत्पन्नस्येवाव्युत्पन्नस्यापि लिङ्श्रवणादिच्छा स्यादित्याह ॥ अर्थेति ॥ स्वयश्चेति ॥ इष्टसाधनं ममेति मत्वा कुर्यामिति यः सङ्कल्पः, तज्ज्ञानादहं प्रवृत्तः। अतः प्रयोज्यवृद्धोऽपि तत एव प्रवृत्तः । ततः सङ्कल्पज्ञानं लिङुच्चारणान्तरं जातमिति सिङेव तत्करणमित्यगवच्छति व्युत्पद्यमानो बाल इत्यर्थः ॥

स्वात्मनीति ॥ यत्नस्य यत्नहेतुत्वे आत्मनि वृत्तिविरोध इत्यर्थः । अनेन विरोधत इति कारिकांऽशो विवृतः । इच्छा च साधनगोचरा प्रवृत्तिहेतुरपि न ज्ञाता सतीति न लिङर्थ इत्याह ॥ सा हीति ॥ न चेति ॥ लिङः श्रवणात् प्रागिच्छाहेत्विष्टसाधनताज्ञानाभावादित्यर्थः ॥

सङ्करादिति कारिकांऽशं विवरीतुं, सुखादीच्छा लिङः श्रुतिकालेऽप्यस्तीति सा लिङर्थः प्रयत्नहेतुश्च स्यादिति निरस्यति ॥ फलेच्छा त्विति ॥ निसर्गग्राहित्वं निरुपाधित्वम् ॥ अन्यविषयत्वादिति ॥ फलसाधने हि पुरुषः प्रवर्त्तते, न फले अन्येच्छायाश्चान्यत्र प्रवृत्तिहेतुत्वेऽतिप्रसङ्ग इत्यर्थः । अपि च । फलेच्छां शास्त्रमुत्पादयत्, ज्ञापयेद्वा ? । तत्र नाद्य इत्याह । तदर्थश्चेति । फलेच्छायाः फलज्ञानादेवोत्पत्तेः, तस्य स्वविषयकेच्छाजनकस्वभावत्वादित्यर्थः । अतएव यत् ज्ञातं स्ववृत्तितयेष्यते, तदेव स्वतः प्रयोजनमिति भावः। द्वितीयमाशङ्क्य निराकरोति । तदिति । किमतो यद्येवमित्यत आह । अप्राप्ते चेति । अवकाशे वा फलेच्छाया लिङैवोक्तत्वात् स्वर्गकाम इति पुनरुक्तरूपसङ्करापत्तिरित्यत आह । तदभिधान इति ।

ननु समानविषयकतयेच्छाप्रवृत्त्योर्हेतुहेतुमद्भाव एव कुतः इत्य-

त आह ।

**यदि च फलविषयैव साधनविषयं प्रयत्नं जनयेत्; अन्यत्रापि प्रसुवीत, नियामकाभावात् । हेतुफल भावएव नियामक इति चेत् । न । अज्ञातस्य तस्य नियामकत्वे लिङं विनाऽपि स्वर्गेच्छातो यागे प्रवृत्तिप्रसङ्गात् । ज्ञातस्य तु तत्साधनत्वस्य नियामकत्वे तादिच्छैव तत्र प्रवर्त्तयतु । यो यत्कामयते स तत्साधनमपि कामयतएवेति नियमात् । न च सा तदानीं सती । न च तज्ज्ञानमेव प्रयत्नजनकं, तच्च लिङा क्रियते इति युक्तम् । स्वर्गकामो यागचिकीर्षावनित्यतोऽपि प्रवृत्तिप्रसङ्गात् । लिङोयेच्छां प्रतीत्यानिच्छपि सर्वः प्रवर्त्तेत स्वसंबन्धितया तदवगस्तथा न तु सामान्यतइति चेत् । न । प्रथमपुरुषेण तदभिधाने तस्याविध्यर्थत्वप्रसङ्गात् । ओदनकामस्त्वं पाकचिकीर्षावानित्यतोऽपि प्रवृत्त्यापत्तेश्च* ।**

यदि चेति । अन्यत्राप्यसाधनेऽपीत्यर्थः । नियामकमाह । हेतुफलेति । फलेच्छा तत्साधन एव प्रयत्नमुत्पादयति नान्यत्रेत्यर्थः। यदि स्वरूपसन्नेव हेतुफलभावः प्रवृत्तिनियामकः, तदा स्वर्गकामो यजेतेत्यादिविधिजन्यज्ञानं विनाऽपि स्वर्गसाधनं प्रवृत्त्यापत्तिरित्याह । अज्ञातस्येति । भ्रमादसाधनेऽप्रवृत्त्यापत्तेश्चेति भावः । अथ ज्ञातः, तदा फलसाधनेच्छैव तत्साधने प्रवर्त्तयतु समानविषयत्वादित्याह । ज्ञातस्य त्विति ।

ननु साधनविषया नेच्छा तस्य निसर्गसुन्दरत्वाभावादित्यत आह । योयदिति । अस्तु साधनविषयैवेच्छा प्रयत्नजननी लिङर्थ इत्यत आह । न चेति । साधनेच्छा न लिङः श्रुतिकाले सतीत्यर्थः । ननु साधनेच्छायास्तत्कालासत्त्वेऽपि तज्ज्ञानादेव प्रवृत्तिः स्यादित्यत आह । न चेति । तच्चेति । साधनविषयेच्छाज्ञानमित्यर्थः । यदि

च साधनेच्छाज्ञानादेव प्रवृत्तिः, तदा स्वेच्छानुत्पत्तिदशायामपि ततः प्रवर्त्तेतेत्याह । लिङ्गेवेति । यजेतेत्यतःसाधनेच्छाज्ञानं जातं, न तु स्वसम्बन्धितया, तादृशञ्च प्रवर्त्तकम्, अतोनानिच्छन्नपि प्रवर्त्स्यतीत्यत आह । स्वसम्बन्धितयेति । एवं यजेतेत्यस्य विध्यर्थत्वं न स्यात्तस्य स्वेच्छाज्ञानाजनकत्वादित्याह । प्रथमेति ।

किमर्थमिति । इच्छाज्ञानादेव प्रवृत्तौ किमर्थमिच्छोत्पादनमित्यर्थः । कुत इति प्रश्ने सङ्कल्पज्ञानादित्युत्तरं, किमर्थमित्यत्र तु, प्रयत्नार्थमिति । इच्छाविशेषः, कुर्यामित्याकारः । स्वभावतः, सुखज्ञानस्य स्वविषयविषयकेच्छाजनकस्वभावत्वादित्यर्थः । औपाधिकः, तत्साधनताज्ञानजन्य इत्यर्थः । सङ्कल्पस्तु न फलं न वा तत्साधनमिति नेच्छाविषयः न च सङ्कल्पज्ञानात् फलसाधन एवेच्छा, ज्ञानस्य स्वसमानविषयकेच्छाजनकत्वनियमादिति भावः । तत्साधनत्वादेवेति । परम्परया फलसाधनत्वज्ञानादेवेत्यर्थः । तर्हीति । तथा चेष्टसाधनतैव विधिः स्यान्न सङ्कल्पः, तेन रूपेणाप्रवर्त्तकत्वादिति भावः ॥

यद्वा, सङ्करादिति विवृणोति । तर्हीति । एवं लाघवादिष्टसाधनतैव विधिः, सङ्कल्पस्य तु तत्सङ्कीर्णत्वादित्यर्थः ।

अपि च । सङ्कल्पज्ञानात् यदि प्रयत्नो जायेत तथापि सङ्कल्पस्य कुतोजन्म किमर्थञ्च ? सङ्कल्पज्ञानादेव, प्रयत्नार्थञ्चेति चेत् । नन्विच्छाविशेषः सङ्कल्पः; स तावत् सुखे स्वभावतः, तत्साधने चौपाधिकः, सङ्कल्पविषयस्तु कथम् ? तत्साधनत्वादेवेति चेत् । तर्हि तत्साधनत्वज्ञानात् न तु सङ्कल्पस्वरूपज्ञानाद्भवितुमर्हतीति । अन्यथेष्टसाधनताज्ञानमप्यनर्थकमापद्येत । तस्मात्, सङ्कल्पः प्रवर्त्तक इत्यभ्युपेयते,किन्तु सत्तामात्रेण न तु ज्ञात इति नासौ विधिः। ज्ञानञ्चविषयोपहारेणैव व्यवहारयतीति तद्विषयएवावशिष्यते इति कर्तृधर्म्मव्युदासः ॥

यदि च नैवं,तदा भोजनादाविष्टसाधनताज्ञानमिच्छोत्पादकं न स्यादित्याह। अन्यथेति। सङ्कल्पस्याप्रवर्त्तकत्वे शास्त्रविरोधं परिहरति। तस्मादिति। तर्हि ज्ञानमेव कर्तृधर्मोविधिरस्त्वित्यत आह। ज्ञानञ्चेति। तद्विषयएव, ज्ञानविषयएव । विधिरित्यनुषज्यते। यदि हि विषयविशेषनवच्छिन्नं ज्ञानं प्रवर्त्तयेत्, सर्वत्र प्रवृत्तिप्रसङ्गः । तदवच्छिन्नस्य च तस्य तथात्वे यं विषयमुपनयत्तत् प्रवर्त्तकं स पदार्थोविधिरिति कृतिहेतुचिकीर्षाकारणज्ञानविषयोविधिरित्यर्थः॥

क्रियते इति व्युत्पत्त्या कर्मपदेन यदि फलं स्वर्गादिरुच्यते, तस्य च कार्य्यत्वं ज्ञात्वा प्रवर्त्तते, तदा अनुपायेऽपि प्रवर्त्तेतेत्याह—

अस्तु तर्हि कर्म्मधर्म्मः। नेत्युच्यते,

अतिप्रसङ्गान्न फलं नापूर्वं तत्त्वहानितः॥

तदलाभान्न कार्यश्च न क्रियाऽप्यप्रवृत्तितः॥१२॥

कर्म्म हि फलं वा स्यात्, तत्कारणमपूर्वं वा, तत्कारणं क्रिया वा ? न प्रथमः फलेच्छायाः प्रवृत्तिं प्रत्यहेतुत्वात्, अतिप्रसङ्गादित्युक्तत्वात् । न द्वितीयोऽव्युत्पत्तेः । लिङो हि प्रवृत्तिनिमित्तमपूर्वत्वं वा स्यात्, कार्यत्वं वा स्यात, उभयं वा? न प्रथमः। शब्दप्रवृत्तिनिमित्तस्यापूर्वत्वस्य प्रमाणान्तरादवगतावपूर्वत्वव्याघातात् । अनवगतावव्युत्पत्तेः। संबन्धिनोऽनवगमे संबन्धस्य प्रत्येतुमशक्यत्वात्। ततएवावगताविततरेतराश्रयदोषात् ।

न च गन्धवत्त्वेनोपनीतायां पृथिव्यां पृथिवीशब्दवत् पूर्वं प्रवर्त्तते लिङिति युक्तम् । तत्रोभयोरपि प्रतीयमानत्वेन सन्देह कल्पनागौरवपुरस्कारेण पृथिवीत्वएव सङ्गतिविश्रान्तेरुपपत्तेः। न त्वत्रापूर्वत्वप्रतीतिः।

स्यादेतत्। कार्यत्वमुपलक्षणीकृत्य तावदेषा लि-

ङ् प्रवृत्ता । तदुपलक्षितश्च यागोवा यत्नोवाऽन्यो वा शब्देतरप्रमाणगोचरोनाधिकारिविशेषणस्वर्गसाधन-समर्थः । न चाकाम्यफले कामी नियोक्तुं शक्यते । ततोऽन्यदेवालौकिकं किञ्चिदनेनोपलक्ष्यते, यो लिङादिप्रवृत्तिगोचर इति किमनुपपन्नमिति चेत् । उपलक्षणं हि स्मरणमनुमानं वा । उभयमप्यनवगतसंबन्धेनाशक्यम् । न हि संस्कारवन्मनोवददृष्टवद्वा-कार्यत्वमपूर्वत्वमुपलक्षयन्ति, ज्ञानापेक्षणात् । ततो हस्तीव हस्तिपकं, धूमइव धूमध्वजं, तत्संबन्धज्ञाना-दुपलक्षयेत्, न त्वन्यथा ।

अतिप्रसङ्गादिति ॥ अथापूर्वस्य कार्य्यत्वं ज्ञात्वा प्रवर्त्तते, तदा शब्दानुभवात् पूर्वं तदुपस्थितं न वा? आद्ये अपूर्वत्वव्याघातः, तस्य शब्दानुभवैकवेद्यत्वादित्यर्थः । अन्त्ये, कथं शक्तिग्रह इति भावः । ननु कार्य्यत्वेनोपलक्षिते अपूर्वे कार्य्यत्वेनैव रूपेण शक्तिग्रहः, कार्य्यत्वविशिष्टाश्चोपस्थितमेवेत्याह । तदुलाभादिति । उपलक्ष्यस्यान्यप्रमानान्तरसिद्धत्वादत्रापि तथात्वे अपूर्वत्वहानिरन्यथा तु तदलाभ इत्यर्थः ।

यद्वा, कार्य्यत्वविशिष्टे कार्य्ये धर्मिणि शक्तिग्रहः, वाक्यार्थानुभवदशायामयोग्यतया घटादौ निरस्ते च तदतिरिक्तापूर्व्वलाभः स्यादित्यत आह । तदलाभादिति । तथापि नित्यनिषेधापूर्वयोरलाभः स्यादित्यर्थः । न क्रियाऽपीति । क्रियायाः कार्य्यत्वज्ञानात् न प्रवृत्तिरनिष्टसाधनत्वादित्यर्थः ।

तत्कारणमपूर्वकारणम् । फलेच्छाया इति । स्वर्गादेः कार्य्यतां जानन्नपि उपायज्ञानं विना प्रवर्त्तते । कथं वाऽन्यज्ञानादन्यत्र साधने प्रवृत्तिः । यदि च साध्यसाधनभावो नियामकः, तदा भ्रमादसाधने न प्रवर्त्तेतेत्यर्थः ।

प्रमाणान्तरादिति । शब्देतरप्रमाणागोचरत्वस्यापूर्वस्य त्वया-

ऽभ्युपगमादित्यर्थः । अनवगताविति । मानान्तराच्छक्तिग्रहविषया-नुपस्थितौ तदसम्भवादित्यर्थः । ततएवेति । लिङ्पदादेवेत्यर्थः । इतरेति । लिङः शक्तिग्रहे ततोऽपूर्वोपस्थितिस्तदुपस्थितौ च तत्र शक्तिग्रहइत्यर्थः । तत्रेति । पृथिवीत्वगन्धवत्त्वयोः प्रत्यक्षतः सिद्धौ तदन्यतरत्र प्रवृत्तिनिमित्तत्वसंशये गन्धवत्त्वस्योपाधित्वेन सखण्ड-त्वात् पृथिवीत्वस्य च जातित्वेनाखण्डत्वात् तत्रैव शक्तिः कल्प्यते, प्रकृते त्वपूर्वत्वाप्रतीतौ न तथेत्यर्थः ।

कार्य्यत्वमिति । वृद्धव्यवहाराद्व्युत्पद्यमानोबालः आत्मन्यवगतं प्रवृत्तिहेतुं कार्य्यत्वं लिङर्थमवधारयति । ततः कार्य्यशक्तं लिङ्पदं स्वर्गकामायोग्यतया यागस्वर्गयोः कार्य्यत्वं त्यक्त्वा स्वर्गसाधनता-योग्यं तन्मध्यवर्त्तिकार्य्यत्वोपलक्षितमपूर्वत्वमनुभावयिष्यतीत्यर्थः ।

उपलक्षणं हीति । यथा गङ्गापदं स्वार्थान्वयानुपपत्त्या स्वसम्ब-न्धितया प्रतीतचरं तीरं स्मारयति, यथा वा व्याप्यं व्यापकतयाऽव-गतमनुमापयति, न तद्वदपूर्वमप्रतीतचरत्वेन सम्बन्धितया व्यापक-तया वा ऽनवगतं कार्य्यत्वं स्मारयितुमनुमापयितुं वाऽलमित्यर्थः । न च यथा संस्कारादिरज्ञातएव स्मृत्यादि जनयति, एवं कार्य्यत्व-मज्ञातमेवापूर्वं ज्ञापयति, सम्बन्धित्वव्याप्यत्वाभ्यां ज्ञातस्यैव ज्ञाप-कत्वादित्याह । न हीति । तत्सम्बन्धेति । अपूर्वेण सम्बन्धज्ञानादि-त्यर्थः । एवञ्च प्रागुक्तन्यायसम्पादनमपि अफलं, सर्वथाऽपूर्वस्याप्र-तीततया तत्र शक्तिग्रहाशक्यत्वादित्याह

तथाच न्यायसम्पादनाऽप्यरण्ये रुदितम् । न हि युक्तिसहस्रैरप्यविदिते सङ्गतिग्रहोऽविदितसङ्गतिर्वा-शब्दः प्रवर्त्तते इति । एतेन भेदाग्रहात् क्रियाकार्ये व्युत्पत्तिरिति निरस्तम् । न ह्यज्ञाने भेदाग्रहोव्यव-हाराङ्गम्, अतिप्रसङ्गात् ।

किञ्चापूर्वत्वे प्रवृत्तिनिमित्तं कल्प्यमाने लौकिकी लिङनर्थिका प्रसज्येत । तत्रोपलक्षणीयाभावात् । तत्र कार्यमेव प्रवृत्तिनिमित्तमिति यदि, प्रकृतेऽपि तथैवा-

स्तु क्लृप्तत्वात् सम्भवाच्चेति ॥

अस्तु तर्हि तदेव प्रवृत्तिनिमित्तं, तर्कसम्पादनयाऽत्वपूर्वव्यक्तिलाभ इति चेत् । न । नित्यनिषेधापूर्वयोरलाभप्रसङ्गात् । न चास्मिन् पक्षे एकत्र निर्णीतेन शास्त्रार्थेनान्यत्र तथैव व्यवहार इति सम्भवति । कार्यत्वस्यैव प्रवृत्तिनिमित्तत्वेन निर्णीतत्वात्, न त्वपूर्वत्वस्य । न्यायसम्पादनायाश्च तत्रासम्भवात् । फलानुगुण्येन हि व्यक्तिविशेषो लभ्यते । न च तत् तत्र श्रूयते । न चाश्रुतमपि कल्पयितुं शक्यते । बीजाभावात् ।

तथाचेति । स्थायि कार्य्यत्वमेव लिङः प्रवृत्तिनिमित्तं, क्रियारूपकार्य्ये तु भेदाग्रहाल्लिङः प्रवृत्तिरित्यप्यतएवापास्तं, ज्ञातेनैव सह भेदाग्रहस्य प्रवर्त्तकत्वादित्याह । एतेनेति । किञ्चेति । पचेतेत्यादौ क्रियायायोग्यत्वेन त्यागाभावात्तत्क्रियाकार्यत्वमेव लिङ्पदात् प्रतीयते इत्यपूर्वत्वस्य तत्प्रवृत्तिनिमित्तत्वे तदानर्थक्यं स्यादित्यर्थः । प्रकृतेऽपीति । तच्च क्रियासाधारणमिति नापूर्वव्यक्तिलाभ इति भावः ।

ननु कार्ये धर्मिणि कार्यत्वेन रूपेण घटादावेव शक्तिग्रहः सम्भवति । कार्यत्वञ्च मानान्तरोपस्थितमेवातोऽन्विताभिधानदशायां स्वर्गकामायोग्यतया घटादिकं तिरस्कृत्य क्रियातोऽन्यत् स्थायि स्वर्गसाधनतायोग्यं लिङा बोध्यते । न चान्यत्र शक्तिग्रहोऽन्यच्च शब्देन बोध्यते इति न स्यादिति वाच्यम् । येन रूपेण शब्दादनुभवः, तेन शक्तिग्रहस्य हेतुत्वात् । तथाच कार्यत्वेन रूपेण घटादौ शक्तिग्रहे योग्यतादिसहकारिवशादप्रतीतं धर्म्यन्तरं लिङाऽनुभाव्यते । न च स्मृतानां पदार्थानां योग्यतादिसाचिव्याच्छब्देनान्वयो बोध्यते, न चापूर्वं स्मृतिगोचर इति वाच्यम् । शक्तिग्रहपदार्थस्मरणवाक्यानुभवादीनां समानप्रकारत्वेनैव कार्यकारणभावात् । लाघवादावश्यकत्वाच्च । न च क्वचित् सहचारमात्रेणान्वयप्रतियोगिन एव स्मृतिरन्वयबोधे हेतुः, गौरवात् । प्रकृतेऽपि कार्यशक्ता लिङिति

शक्तिग्रहात् कार्यमिति ततः स्मृतिः, यागविषयकं कार्यमित्यनुभव इति क्रमेण तेषां समानप्रकारकत्वमस्त्येवेत्यभिसन्धायाह—

अस्त्विति ॥ यदि कार्यत्वेन क्रियासाधारण्येन लिङः शक्तिग्रहः, स्वर्गकामायोग्यतया च क्रियानिरासः, तदा अहरहः सन्ध्यामुपासीत न कलञ्जं भक्षयेदित्यत्र नित्यनिषेधापूर्वयोरलाभः । न हि तत्रायोग्यतया क्रिया त्यक्तुं शक्यते, फलाश्रवणेन न्यायसम्पादनानवकाशादित्याह । नित्येति । अस्मिन् पक्षे कार्यत्वप्रवृत्तिनिमित्तता-पक्षे । न्यायेति । न ह्यपूर्वत्वेन शक्तिरपि तु कार्यत्वेन कार्ये धर्मिणि, क्रिया च तथा भवत्येवेति न तद्भिन्नं लिङा बोध्यतेत्यर्थः ।

ननु न लोके कार्ये धर्मिणि शक्तिः कल्पिता, किन्त्वनन्यलभ्ये कृतिरूपे कार्यत्वमात्रे । धर्मिणः पाकादेर्धातोरेवोपस्थितिसम्भवात् । क्रियाकार्यत्वस्य चान्विताभिधानलभ्यत्वात् । तथाच धर्मिणि शक्तिर्वेद एव कल्प्या । सा च क्रियानिरासेनैव । क्रियाया अन्वययोग्यत्वे धर्मिणि शक्तिग्रहस्याशक्यत्वात् । तस्मादयोग्यतया क्रियायां निरस्तायां धर्मिणि शक्तिग्रहकाले वस्तुतो यत्क्रियाभिन्नं कार्यं, तत्र शक्तिः । तथाच नित्यनिषेधयोरपि तदेवोपासनाद्यन्वययोग्यं लिङाऽभिधीयते, क्लृप्तत्वात् । न तु क्रियान्वययोग्यं कार्यत्वमात्रं, लक्षणाप्रसङ्गात् । धर्मिणि बाधकाभावाच्च । अत एव क्रियाकार्यत्वे लौकिकी लिङ् लाक्षणिकी । उक्तरीत्या क्रियानिरासेनैव वेदे धर्मिणि शक्तिकल्पनात् । लौकिकानां तत्र तात्पर्यासम्भवात् । क्रियासाधारणशक्तावपि लोके लिङ् लाक्षणिकी । पचेतेत्यादौ पाककार्यताज्ञानेऽपि लाघवात् कार्यत्वे लिङस्तात्पर्यम् । न तु धर्मिण्यपि, धातुलभ्यत्वात् । तथाच तृतीयायाः करणैकत्ववत् कार्यं कार्यत्वञ्च न स्वतन्त्रं शक्यं, किन्तु विशिष्टम् । विशिष्टाच्च विशेषणमन्यदेवेति कार्यत्वे लक्षणा । न चानुपपत्त्या कार्यत्वविशिष्टोपस्थितावपि धर्म्यंशमपहाय क्रियायाः कार्यत्वान्वयोपपत्तौ किमुपस्थित्यन्तरार्थं लक्षणयेति वाच्यम् । यत इतरधर्मिगतत्वेनोपस्थितस्य कार्यत्वस्य न धर्म्यन्तराकाङ्क्षाऽस्ति, येन तदितरधर्म्यन्वयो ज्ञायेत । तथाच स्वतन्त्रकार्यत्वोपस्थितये लक्षणा युक्ता ।

नैवम् । कार्यत्वमात्रशक्तस्य लिङ्पदस्यापूर्वलक्षणयैवोपपत्तौ तत्र शक्तौ मानाभावात् । न चापूर्वं शक्यकार्यत्वसम्बन्धितया न

ज्ञातमिति न तत्र लक्षणेति युक्तम् । यथा हि शक्तिपक्षे कार्यत्वेन रूपेण घटादावेव लिङः शक्तिग्रहः, कार्यमिति ततः स्मृतिश्चानुभवदशायां च योग्यतावशात् घटादिकं विहायापूर्वं भासते, तथा लक्षणायामपि लिङ्वाच्यं कार्यत्वं कार्यघटादिसम्बन्धितया ज्ञातं कार्यं घटादि स्मारयतु, योग्यतावशाच्चापूर्वमनुभवे भासताम् । कार्यस्मरणं हि अन्विताभिधानोपयोगि न त्वपूर्वस्मरणम् । तच्च पदेन पदार्थेन वेति न कश्चिद्विशेषः । न च लिङो लाक्षणिकत्वेनापूर्वानुभवप्रसङ्गः, लाक्षणिकपदस्याननुभावकत्वादिति युक्तम् । त्वन्मये इतरान्वितस्वार्थशक्तस्य यजिपदस्यैवेतरदपूर्वमादायानुभावकत्वात् । अन्यथा तीरादेरप्यननुभवापत्तिः ।

अथेतरोपलक्षितस्वार्थान्वयमात्रे पदानां शक्तिर्न तु इतरत्रापि । गौरवात् । पदान्तरलभ्यत्वाच्च । न च तीरादिप्रतिबन्धिः, तत्र हि तीरोपलक्षितान्वयशालिस्वार्थान्वयानुभावकत्वं वसतीत्यादिपदस्य । तीरस्य तु संस्कारादुपस्थितिः । प्रकृते चापूर्वस्य संस्काराविषयत्वादिति चेत् । न । मञ्चाः क्रोशन्तीत्यत्र मञ्चस्थाः पुरुषाः क्रोशन्तीत्यवगम्यते । न च मञ्चस्थः पुरुषः प्रागनुभूतो येन तीरमिव संस्कारादुपतिष्ठेत् । न चापूर्वः पुरुषविशेषो न भासते इति वाच्यम् । गृहप्रवेशानन्तरं अयं मया पूर्वमज्ञात एव मञ्चाः क्रोशन्तीति शब्दात् क्रोशनकर्तृतयाऽवगत इत्यनुभवात् । तस्मादनन्यगतिकतयेतरान्वितस्वार्थबोधकत्वमभ्युपेयम् ।

अथैवं सति यजिपदेन स्वर्गकामकार्यविषयो याग इत्यनुभवो जन्येत । लक्षणायामितरपदस्य लक्षणीयविशेषणस्वार्थविशेष्यकानुभवजनकत्वात् । न चैतादृशो बोध आकाङ्क्षित इति चेत् । न । स्वर्गकामकार्यविषयो याग इत्यनुभवेऽपि स्वर्गकामकार्य्ययोरन्वयप्रकारत्वेनापूर्वलाभात् । तादृशशब्दानुभवानन्तरमर्थाद्यागविषयकं कार्यमित्योपादानिकबोधात् प्रवृत्त्युपपत्तेश्च । अस्तु वा लाक्षणिकमपि पदमनुभावकम् । तच्च द्वितीयाध्यायप्रकाशे प्रपञ्चितमस्माभिरिति नेह प्रतन्यते ।

किञ्च । न कार्ये घटादौ लिङः शक्तिग्रहः । स्वर्गकामायोग्यतया शक्तिग्रहकाले क्रियानिरासवत् यागान्वयानुपपत्त्या घटादिनिरासस्यापि सम्भवात् । तत्र यागविषयकत्वस्य बाधात् । अन्यथाऽन्वि-

ताभिधानकालेऽपि तन्निरासानुपपत्तेः। न च शक्तिग्रहकाले यागान्वयानुपपत्तेरप्रतिसन्धानं, किन्तु स्वर्गकामान्वयानुपपत्तिमात्रं प्रतिसन्धीयते इति युक्तम्। प्रत्ययस्यान्तरङ्गप्रकृत्यर्थान्वयं बोधयत एवेतरान्वयबोधकत्वमिति तदन्वयानुपपत्तिप्रतिसन्धानस्यैव प्राथमिकत्वात्। पुरुषदोषादप्रतिसन्धानेऽपि शक्तिग्रहस्य भ्रमत्वापत्तेः। घटादेरशक्यत्वात्। घटादीनामानन्त्येऽपि पृथिवीत्वादिनाऽन्विताभिधानकालवन्निरासोपपत्तेः। एवञ्च प्रचरत्कार्यनिरासे क्व कार्यधर्मिणि शक्तिग्रहः ?।

एतेन, लिङ्पदमेकत्रोच्चारणे स्थायिकार्यस्वर्गजनकत्वादीनां ज्ञाने शक्तमिति व्युत्पत्तिः। स्थायिज्ञानादिकञ्चोपस्थितमेव। अतो लिङ्पदेनैकत्रोच्चारणे योग्यतादिवशाद् यागविषयकं स्थायि स्वर्गजनकं कार्यमित्येकं ज्ञानमनुभवरूपं प्रचरद्वस्तुविलक्षणविषयं क्रियते। न चैवं नानार्थवदेकैकज्ञाने शक्तिग्रहादेकैकविषयोऽनुभवो भवेत्, न समुदितविषय इति वाच्यम्। शक्तिग्रहकाले एकत्रोच्चारणे इति विशेषणमहिम्ना तत्सम्भवात्। नानार्थे तु प्रमाणाभावेन गौरवेण शक्तिग्रहे तस्याप्रवेशात्। तथाप्यमीषां समूहालम्बनापत्तिर्न तु मिथोवैशिष्ट्यज्ञानमिति न वाच्यम्। साकाङ्क्षधर्मधर्मिणोरेकं ज्ञानमेव हि विशिष्टज्ञानम्। इत्थमेवालौकिककार्येषु स्वर्गादिपदेषु शक्तिग्रह इत्यपास्तम्।

स्थायिनां घटादीनां निरासात्। धर्ममात्रे च शक्तिग्रहस्य प्रकृतेऽनुपयोगात्। किञ्च, तेषु समुदितेषु न शक्तिग्रहः, प्रथमं समुदायस्यैकज्ञानाविषयत्वात्। विषयत्वे वा पूर्वमेव विशिष्टस्य सत्त्वे अपूर्वत्वव्याघातः। एकज्ञानविषयकसाकाङ्क्षधर्मधर्मिणोरेव विशिष्टत्वात्। नापि प्रत्येकम्। तथाहि। लिङ्पदात् स्मरणत्रयं याजिपदाच्च यागस्मरणम्। न च चतुर्णां तेषां यौगपद्यमस्ति। न च प्रत्येकं शक्तिग्रहेऽपि समुदितविषयमेकं स्मरणं लिङ्पदादिति वाच्यम्। समुदायस्य पूर्वमननुभवात्। किञ्च, एकमेव स्मरणं यदि साकाङ्क्षधर्मधर्मिविषयकं, तदापूर्वत्वक्षतिः। तवैकज्ञानारूढयोः साकाङ्क्षधर्मधर्मिणोरेव विशिष्टत्वादित्यस्मत्पितृचरणाः।

नन्वविश्वजिन्न्यायेन नित्येऽपि फलं कल्पयिष्यते इत्यत आह

तद्धि विध्यन्यथाऽनुपपत्त्या कल्प्येत, कार्य्यत्वप्रत्ययान्यथाऽनुपपत्त्या वा, लोकवत् । न प्रथमः । भवतां दर्शने तस्योपेयरूपत्वात् । यतः श्रुतस्वर्गफलत्वेऽपि साध्यविवृद्धिरुच्यते । न द्वितीयः । शब्दबलेन तत्प्रत्यये तदनपेक्षणात् । लोके हि तत्प्रत्यय इष्टाभ्युपायताऽधीनो न तु वेदे इत्यभ्युपगमात् । अन्यथेष्टाभ्युपायतैव प्रथमं वेदादवगन्तव्या ! प्रमाणान्तराभावात् । ततः कार्य्यतेत्यानुमानिकोविधिः स्यात्, न शाब्दः ।

आनुमानिकं फलमस्तु, यत्कर्त्तव्यं तदिष्टाभ्युपाय इति व्याप्तेरित्यपि न युक्तम् । सुखेन व्यभिचारात् । अन्यत्वे सतीति चेत् । न । दुःखाभावेन व्यभिचारात् । फलं विहायेति चेत् । तदेव किमुक्तं स्यात् । इष्टं स्वभावत इति चेत् । तर्हि ततोऽन्यदनिष्टं स्यात्, तच्च कर्त्तव्यमिति व्याघातः । तत्साधनमिति चेत् । तत्साधनत्वे सतीति साध्याविशिष्टं विशेषणम् । स्वभावतोनेदमिष्टं कर्त्तव्यञ्च, ततो नूनमिष्टसाधनमिति साधनार्थ इति चेत् । न । स्वभावतोनेदमिष्टमित्यसिद्धेः । अनन्योद्देशप्रवृत्तकृतिव्याप्तत्वात । अन्यथा तदसिद्धेः । ततोव्याघातादन्यतरापाय इति ।

अस्तु नित्यनिषेधापूर्व्वयोरलाभः, किं नश्छिन्नमिति चेत् । किं नश्छिन्नं, यदा कामाधिकारेऽपि तदलाभः । न हि लिङा कार्य्यं स्वर्गसाधनमुक्तम् । नापि स्वर्गकामपदसमभिव्याहारान्यथाऽनुपपत्त्या तल्लब्धं, ब्राह्मणत्वादिवदधिकार्य्यवच्छेदमात्रेणैवोपपत्तेः ।

न चेदमनुमानं; यस्य यदिच्छातो यत्कर्त्तव्यं, त-

**त्तस्येष्टसाधनमिति। अन्येच्छया स्वाभाविककर्त्तव्यत्वासिद्धेः। तादिच्छयैव तत्कर्त्तव्यतायाः सुखेनानैकान्तिकत्वात्। औपाधिककर्त्तव्यतायाश्चेष्टसाधनत्वमप्रतीत्य प्रत्येतुमशक्यत्वात्॥**

न चेति। त्वन्मये इति शेषः। तथाच तवापासिद्धान्त इति भावः। बीजाभावं स्पष्टयति। तद्धीति। तत् फलम्। विधित्वं कार्यत्वम्। तत् फलजनकत्वं विनाऽनुपपन्नं फलं कल्पयतीत्यर्थः। लोकवदिति। यथा लोके कार्यत्वं पाकादेरिष्टसाधनत्वेन लिङ्गेनानुमीयते इति कार्यत्वमिष्टं फलं प्रतीत्यैव प्रतीयते, तथा वेदेऽपीत्यर्थः। उपेयरूपत्वादिति। त्वन्मये अपूर्वस्यैव स्वतः काम्यतयाऽनन्योद्देशक्रतिव्याप्यत्वादित्यर्थः। तथाच फलजनकत्वं विनाऽपि फलस्येवापूर्वस्य कार्यत्वमुपलभ्यमानं न फलकल्पकमिति भाव। यत इति। यत्रापि स्वर्गः फलं श्रूयते, तत्राप्यपूर्वस्यैव स्वतः प्रयोजनता स्वर्गपर्यन्तं व्याप्नोति। न त्वपूर्वं स्वर्गसाधनमिति धीः, प्रधानस्य गुणत्वानुपपत्तेरिति तव दर्शनादित्यर्थः।

एतच्च विरोधोद्भावनमात्रम्। वस्तुतोऽपूर्वं न स्वतः प्रयोजनं, लोके तथाऽनवगमात्। वेदेऽपि काम्यस्थले काम्यसाधनस्यैवापूर्वस्य गौणप्रयोजनस्य लिङाऽभिधानम्। काम्यसाधनताज्ञानं विना कामिकार्यत्वस्य बोधयितुमशक्यत्वात्। न तु स्वतः प्रयोजनत्वेन, तत्रासामर्थ्यादनुपयोगाच्च। प्रवृत्तेर्भोजनादाविव लोकवल्लप्तकाम्यसाधनताज्ञानात् कार्यताज्ञानाद्वा गौणप्रयोजकत्वेनैवोपपत्तेः। अथ नित्ये लोकवेदावगतगौणमुख्यप्रयोजनाभावे सति लिङ्ग्वापूर्वस्य स्वतः प्रयोजनत्वं बोधयति, तेन विना प्रवृत्तिपरत्वानिर्वाहादिति चेत्। न। निरुपधीच्छाविषयत्वं हि स्वतः प्रयोजनत्वमपूर्वस्य लिङा बोधनीयं, न चापूर्वस्य तादृशेच्छाविषयत्वं क्वचिदपि सिद्धमिति भावः।

शब्दबलेनेति। यत्र कार्यताधीर्लैङ्गिकी, तत्र सा लिङ्गमिष्टसाधनत्वमपेक्षते, वेदे तु कार्यताधीर्लिङ्गेन ना जनयतीति न तत्र सा तदपेक्षतेत्यर्थः। यदि चापूर्वं न स्वतः कार्यमिति तत्रापि सा तदपे-

क्षेत, तदेष्टसाधनत्वज्ञापकस्यान्यस्याभावाल्लिङ्गदेव तद्बोधयेत् । तथाच लोकवल्लिङ्गादेव कार्य्यताधीसम्भवान्न लिङस्तत्र शक्तिः कल्प्येतेत्याह । अन्यथेति । साध्याविशिष्टमिति । इष्टसाधनत्वस्यैव साध्यत्वादित्यर्थः । स्वभावत इति । सोपाधीच्छाविषयत्वे सति कर्त्तव्यत्वेनापूर्वं फलसाधनमित्यनुमेयमित्यर्थः । असिद्धेरिति । त्वन्मतेऽपूर्वस्यैव स्वतः काम्यतया विशेषणासिद्धो हेतुरित्यर्थः । असिद्धिं स्पष्टयति । अन्यथेति । उद्देश्यफलान्तरसद्भावे नित्यनिषेधापूर्वत्वासिद्धेरित्यर्थः । तत इति । अपूर्वस्य स्वभावत इष्टत्वे न काम्यसाधनत्वं, तथात्वे वाऽनन्योद्देशप्रवृत्तकृतिव्याप्यत्वरूपं स्वभावत इष्टत्वं नेत्येकतरसत्त्वमन्यतरसत्त्वविरुद्धमित्यर्थः ।

तदलाभोऽपूर्वालाभः । किं निरपेक्षा लिङेव स्वर्गसाधनतामाह, येन तत्साधनं स्थिरमपूर्वं शब्दबोध्यं, स्वर्गकामपदसमभिव्याहृता वा ? आद्ये, न हानि । तथा सति लौकिकी लिङनार्थिका स्यात् । वेदेऽप्यनन्योद्देश्यकृतिव्याप्यत्वरूपस्य कार्य्यत्वस्य स्वर्गसाधनत्वविरोधइति भावः । द्वितीयमाशङ्क्यान्यथासिद्ध्या निराकरोति । नापीति । यथा यस्य ब्राह्मण्यमस्ति तस्य कार्य्यमिति धीः, तथा यस्य स्वर्गकामनाऽस्ति तत्सम्बन्धि कार्य्यमिति शाब्दी धीः, न तु स्वर्गोद्देशप्रवृत्तकृतिसाध्यं कार्य्यमिति । तथाच न स्थायिनोऽपूर्वस्य लाभ इत्यर्थः ।

अनुमानादपूर्वलाभोऽस्त्विति मतमाशङ्क्य निराकरोति । न चेदमिति । यस्येति । काम्यासाधने कामिनः कर्त्तव्यताज्ञानाभावाद्यामिरित्यर्थः । किमन्येच्छया कर्त्तव्यत्वं, स्वभावतो वा, ? आद्ये, अन्येच्छयेति । अन्येच्छया कर्त्तव्यत्वेऽनन्योद्देशप्रवृत्तकृतिसाध्यत्वं भज्येतेत्यर्थः । अन्त्ये, तदिति । आद्ये दूषणान्तरमाह । औपाधिकेति ।

अत्र स्वाभाविकत्वौपाधिकत्वरूपविशेषाविवक्षायां कर्त्तव्यत्वमात्रं विवक्ष्यते । तच्च शब्देनान्येच्छोरेव बोध्यते इति पूर्वानुमानमदुष्टमेवेत्याह—

**किमनया विशेषचिन्तया । प्रतीयते तावच्छब्दादन्यादिच्छतोऽन्यत्कार्यमित्येतावतैवानुमानमिति चेत्* । नन्वन्वितमभिधानीयं, योग्यञ्चान्वीयते । अ-**

न्यादिच्छतश्चान्यत् कर्त्तव्यमन्वयायोग्यं, तत्कथमभिधीयताम् । तत एव तत्साधनत्वसिद्धिरिति चेत् । एवं तर्हीष्टसाधनतैकार्थसमवायिकर्त्तव्यत्वाभिधानादनुमानानवकाशः । न चान्विताभिधानेऽपि तत्साधनत्वसिद्धिः । अधिकार्यवच्छेदमात्रेणाप्यन्वययोग्यतोपपत्तेः ।

न च कार्यत्वमपूर्वे सम्भवति । तद्धि कृतिव्याप्यता चेत्, श्रीहादिष्वेव । सिद्धत्वात् । कृतिफलत्वाचेत्, यागस्यैव । ततस्तस्यैवाहत्योत्पत्तेः । कृत्युद्देश्यता चेत्, स्वर्गस्यैव । निसर्गसुन्दरत्वात् । न त्वपूर्वस्य । तद्विपरीतत्वात् । स्तनपानादियदौपाधीकीति चेत् । साऽपि यागस्यैव । स्वर्गस्य साध्यत्वस्थितौ यागस्यैव साधनत्वेनान्वयात् ।

कालव्यवधानान्नैतन्निर्व्वहतीति चेत् यथा निर्व्वहति, श्रुतानुरोधेन तथा कल्प्यताम् । व्यापारद्वारा कथञ्चित् स्यात् । न तु भिन्नकालयोर्व्यापारव्यापारिभावः । कारणत्वञ्च व्यापारेण युज्यते । अव्यवधानेनपूर्व्वकालनियमश्च तत्त्वम् । अन्यथाऽतिप्रसङ्गादिति चेत् । न । पूर्व्वभावनियममात्रस्य कारणत्वात् । कार्य्यानुगुणावान्तरकार्य्यस्यैव व्यापारत्वात् । कृषिचिकित्सादौ बहुलं तथा व्यवहारात् । लाक्षणिकोऽसाविति चेत् । न । मुख्यार्थत्वे विरोधाभावात् ॥

किमनयेति ॥ इष्टसाधनताऽभिधानं विनाऽन्यदिच्छतोऽन्यत् कर्त्तव्यतयोऽन्यतया नान्वेतुमर्हतीत्याह । नान्विति । काम्यभिन्नस्य कामिकार्य्यस्य काम्यसाधनस्यैवान्वययोग्यत्वादित्यर्थः । तत एवे-

ति । शब्दादेवेष्टसाधनत्वासिद्धिरित्यर्थः ।

अस्तु वा अन्यदिच्छतोऽन्यत् कर्त्तव्यमन्वययोग्यं,तथापि नेष्टसाधनत्वमनुमातुं शक्यते, ब्राह्मणत्वस्येव स्वर्गकामत्वस्याधिकारितावच्छेदकत्वेनाप्यन्वययोग्यतोपपत्तेरित्याह । न चान्वितेति । वस्तुतः तवापूर्वस्यैव स्वतः काम्यसाधनत्वं विरुद्धमिति भावः ।

कार्य्यत्वमपूर्वस्य विकल्प्य निराकरोति । न चेति । तद्धीति । कृतिजन्यव्यापाराश्रयत्वमित्यर्थः । न ह्यसिद्धस्य व्यापारभागित्वमिति भावः । कृतिफलत्वं कृत्यनन्तरभावित्वमिति भावः । कृत्युद्देश्यत्वमनन्योद्देशकृतिव्याप्यत्वमित्यर्थः । तद्विपरीतत्वादिति । सुखदुःखाभावयोरेव स्वतः काम्यत्वादित्यर्थः । न च लिङैव तद्बोध्यते, वस्तुसतएव बोध्यत्वात् । न चापूर्व्वस्य निरुपाधीच्छाविषयत्वमस्ति, यल्लिङा बोध्येतेत्युक्तमिति भावः । साऽपीति औपाधिकीष्टसाधनता यागस्य स्वर्गसाधनतयाऽस्तीति कृतिसाध्यत्वमप्यौपाधिकमिति तत्परित्यागे नापूर्व्वसिद्धिरित्यर्थः ।

यागस्याशुतरविनाशित्वात् स्वर्गस्य च कालान्तरभावित्वात् यागस्य स्वर्गसाधनत्वं न सम्भवतीत्याह । कालेति । यागस्य प्रतीतस्वर्गसाधनताऽन्यथानुपपत्त्या फलसमयपर्यन्तस्थायी व्यापारः कल्प्यते इत्याह । यथेति ।

ननु साधनताप्रतीतिरेव योग्यताज्ञानाभावान्न सम्भवति । यथाहि । स्वर्गसाधनताज्ञानं यागस्य भवत्साक्षात्साधनताविषयकं भवेत् परम्परासाधनताविषयकं वा, एतदुभयोदासीनसाधनताविषयकं वा ? नाद्यः, आशुतरविनाशित्वेन क्रियायाः कालान्तरभाविस्वर्गाव्यवहितपूर्व्वसमयावृत्तित्वात् । न द्वितीयः, परम्पराघटकस्यानुपस्थितेः ।

अथास्तु तृतीयः । तथाहि । साक्षात्परम्परोदासीनसाधनतामात्रं यागस्य स्वर्गं प्रति नायोग्यम् । न च साक्षात्परम्पराविशेषद्वयं विना सामान्यं नास्त्येवेति वाच्यम् । साक्षात्परम्पराभ्यां विशेषणानुपपत्तेः । न च विशेषद्वयबाधे सामन्यमपि बाधितं, परम्परासाधनत्वस्याबाधनात् । बाधो हि विपरीतप्रमा । न च स्वर्गे यागेन परम्परासाधनमिति प्रमा नास्ति । न च योग्यानुपलब्ध्या परम्पराघटकबाधः, संस्कारवदयोग्यस्यापि तस्य सम्भवात् । अन्यथा वाच्येऽ-

प्ययपूर्व्वे क्रिया कामिकार्य्या न स्यात्, काम्यासाधनत्वात्। न हि य-दयोग्यं तत्पश्चाद् योग्यम्। तस्मात् स्वर्गसाधनं याग इति सामान्यतः परम्परासाधनत्वमनुलिख्य वस्तुगत्या परम्परासाधनविषयकं ज्ञानमुत्पद्यमानं नायोग्यतया परिभवितुं शक्यमिति।

मैवम्। तथाहि। स्वर्गं प्रति यागो न साक्षात्साधनमिति ज्ञानानन्तरं स्वर्गसाधनं याग इति सामान्यज्ञानं भवत् परम्परासाधनताप्रकारकं स्यात्। एकविशेषबाधे शाब्दज्ञानस्य तदितरविशेषप्रकारकत्वनियमात्। यथा छिद्रबाधे घटपदजन्यं घटज्ञानं छिद्रेतरत्वप्रकारकम्। न च परम्पराघटकानुपस्थित्या प्रकृते तथा घटते।

तन्न। एतादृशनियमे मानाभावात्। न हि छिद्रबाधानन्तरं घटपदेन छिद्रेतरत्वेन ज्ञानं जन्यते, किन्तु योग्यतया छिद्रं विहाय यद्वस्तुगत्या छिद्रेतरत् तस्य घटत्वेन ज्ञानम्। न च छिद्रेतरत्वेन ज्ञानं सम्भवत्यपि, तस्याशक्यत्वेन घटपदादुपस्थित्यभावात् न च घटपदात्तथैवानुभव आनुभविकत्वेनोभयसिद्धः, येन लक्षणयाऽपि तथा निर्वाह्येत। न च लक्षणाऽपि सा हि जहत्स्वार्था, अजहत्स्वार्था वा? नाद्या, घटाननुभवप्रसङ्गात्। नान्त्या, शक्यलक्ष्यसाधारणैकरूपाभावात्। एवं सर्व्वत्र सामान्यशब्दस्य विशेषपरत्वे द्रष्टव्यम्।

अथ छिद्रेतरतया योग्यतावधारणेन शब्दानुभवात् पूर्वं नियमेनोपस्थितिः संस्कारादेव। न च विभक्तीनां प्रकृत्यर्थानुगतस्वार्थान्वयबोधकत्वव्युत्पत्तेस्तत्र विभक्त्यर्थेनान्वीयेतेति वाच्यम्। प्रकृत्यर्थोहि प्रकृतिप्रतिपाद्यः, स च प्रकृतेऽप्यस्ति। अन्यथा पाचकमानयेत्यत्र पाककर्त्तरि विभक्त्यर्थकर्मताऽन्वयानुपपत्तिः, तस्याशक्यत्वात्। तथा च संस्कारोपस्थितं छिद्रेतरत्वमादाय शाब्दान्वयबोधः स्यात्।

मैवम्। शब्दानुपस्थितस्य शब्देनान्वयबोधाजननात्। एतच्च शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्य्यते इत्युपपादयद्भिरस्माभिर्घ्राणादिसूत्रे प्रपञ्चितमिति नेहोपपाद्यते। संस्कारस्यानियतोद्बोधतया नियमेन तदुपस्थितेरभावाच्च। फलस्योभयासिद्धतया तद्बलेनापि नियतोपस्थितेरभावात्। तथापि सामान्यभानस्य विशेषभाननियतत्वाद् विशेषाभाने कथं सामान्यं भासते इति चेत्। न। परम्परासाधनत्वस्य परम्पराघटकानुपस्थित्याऽभानेऽपि वस्तुतः परम्परा-

साधनस्य भानात् ।

ननु काम्यादन्यत् काम्याव्यवहितसाधनतयाऽवगतमेव कर्त्तव्यतया वेति । न च यागस्य स्वर्गाव्यवहितसाधनता सम्भवति । न च तृप्तिकामस्य पाके प्रवृत्तेर्व्यभिचारः, ओदनकामस्य तत्र प्रवृत्तेः। तृप्तिकामना च तृप्तिसाधनगतत्साधनपरम्पराकामनोपयोगिनी, न तु साक्षात् । अन्यथा साधनसाधने प्रवृत्त्यभावापत्तेः ।

मैवम् । काम्यसाधनत्वज्ञानस्यैव प्रवर्त्तकत्वात्, लाघवात् । न च तृप्तिकामस्य सिद्धौदनस्य पाके प्रवृत्तिप्रसङ्गः । गुरूपायत्वात् । इष्टोत्पत्त्यनान्तरीयकदुःखजनकत्वज्ञानस्य प्रतिबन्धकत्वाच्च । तस्मात् प्रतीता स्वर्गसाधनता व्यापारं विनाऽनुपपद्यमाना व्यापारमपूर्वं कल्पयति ।

ननु व्यापारेण तन्निर्वाहो न तज्जननात्, उत्तरवर्त्तित्वेन व्यापारस्य तत्रासामर्थ्यात् । न ज्ञापनात्, लिङ्गस्य तज्ज्ञापनात् । न च चिरध्वस्तं कारणं व्यापारव्याप्तं, विपक्षे बाधकाभावात् । प्रायश्चित्तस्य च फलप्रतिबन्धकत्वं स्यात् । तस्मात् पापान्मुच्यते इति फलश्रवणस्य च निषिद्धक्रियातः फलभागी न भवतीत्यर्थः । न च मुख्ये बाधकाभावः, उपस्थितत्वेन विहितनिषिद्धक्रियायामेव धर्माधर्मशक्तिग्रहस्य बाधकत्वात् ।

मैवम् । चिरध्वस्तस्य व्यापारसत्त्वे कारणत्वमिति निरुपाध्यन्वयव्यतिरेकाभ्यां व्याप्त्यवधारणात् । न चाप्रयोजकत्वं, यागो यदि चिरध्वस्तत्वे सति सव्यापारो न स्यात्, स्वर्गसाधनं न स्याद्धटवदिति विपक्षबाधकात् । न चात्र कारणताग्राहकाभाव उपाधिः, तेनापि समं व्याप्त्यवधारणेन तस्याप्यापादनात् ।

तथापि देवताप्रीतिर्यागव्यापारोऽस्तु । न च तत्र मानाभावः, यजिधातोः पूजार्थतया तस्याश्चाराध्यप्रीतिहेतुक्रियात्वात् । तथाच यागस्य देवताप्रीतिसाधनत्वेन कालान्तरभावि स्वर्गं प्रति तद्द्वारा साधनतोपपत्स्यते । प्रीतेः क्षणिकत्वेऽपि तदनुभवजनितसंस्कारद्वारा तत्सम्भवात् ।

अत्राहुः । देवतोद्देशेन द्रव्यत्यागेन देवताप्रीतिर्जन्यते इत्यत्र मानाभावः यज देवपूजायामिति शाब्दिकस्मृतिः, स्मृतित्वादेव न स्वतः प्रमाणम् । तन्मूलञ्च मानान्तरं नास्त्येव । न वा स्वर्गस्य प्रीतदे-

वतासाध्यत्वे मानम् । वस्तुतो लाघवात् कर्तृगतफलावसानिकव्यापारस्य कल्पनाच्च देवताप्रीतिर्व्यापारः ॥ न च स्वर्गभागिदेहान्तरमेव तद्व्यापारः, प्रलये विच्छेदेऽपि तद्व्यापारानुवृत्तेः । शरीरस्य च कार्य्यद्रव्यतया अभावात् । नापि ध्वंसएव तद्व्यापारः, तस्यानन्त्येऽपि स्वभावात् सावधिफलजनकत्वमिति वाच्यम् । प्रतियोगिध्वंसयोरेकत्राजनकत्वादिति संक्षेपः ।

शङ्कते । व्यापारेति । न च प्रकृते तथेति शेषः । कारणस्यावान्तरव्यापारयोगः, यागश्च न स्वर्गकरणं, कार्य्याव्यवहितप्राक्कालसत्त्वस्य कारणत्वादित्यर्थः । अत्राव्यवहितत्वमतन्त्रं गौरवात् । अतएव न सहभावेन कारणत्वम् । न च विनश्यदवस्थसमवायिनः कारणत्वापत्तिः, तावता समवायिकारणस्यैव तथात्वादिति परिहरति । पूर्वभावेति । कार्य्येति । यज्जन्यं सज्जन्यजनकं, सएव तस्यव्यापार इत्यर्थः । कृषीति । यथा माघमासीयभूकर्षणस्य पाकजपरम्पराव्यापारद्वारा हेमन्तभाविसस्यजनकत्वम् । यथा वा दशमूलीकषायपानस्य धातुसाम्यद्वारा भाविज्वरशान्तिजनकत्वमित्यर्थः ॥

व्यवहितस्य कारणत्वेऽतिप्रसङ्गमाह —

अस्तु तर्हि पुत्रेण हते ब्रह्मणि चिरध्वस्तस्य पितुस्तमवान्तरव्यापारीकृत्य कर्तृत्वम् । तथाच लोकयात्राविप्लव इति चेत् । न । सत्यपि सुते कदाचित्तदकरणात् तस्मिन्नसत्यपि कदाचित् करणादनिर्वाहकतया तस्य व्यापारत्वायोगात् । यं जनयित्वैव हि यं प्रति यस्य पूर्वभावनिर्वाहः, सएव तं प्रति तस्य व्यापारोनापरः । यथाऽनुभवस्य स्मरणं प्रति संस्कारः । तस्य ह्यन्वयव्यतिरेकानुविधाने सिद्धे तदन्यथाऽनुपपत्त्या संस्कारः कल्प्यते, न त्वन्यथा । तथेहापि । न चेदेवं, तवापि ब्रह्मभिदुरशरविमोकसमसमयहतस्य हन्तृत्वं न स्यात् । स्याच स्वनिवेशनशयानस्य तत्पितुरिति । एतेनोभयं वेति निरस्तम् ।

अस्तु तर्हि क्रियाधर्म्म एव कार्यत्वं विधिः । सर्वो हि कर्त्तव्यमेतादिति प्रत्येति । ततः कुर्यामिति सङ्कल्प्य प्रवर्त्तते इति चेत् । न । कर्त्तव्यं मयेति कृत्यध्यवसायार्थो वा स्यात्, कर्त्तव्यं मयेत्युचितार्थो वा स्यात् ? तत्र प्रथमः सङ्कल्पान्न भिद्यते । व्यवहितकार्यसङ्कल्पो हि कर्त्तव्योमयेति, सन्निहितकार्यसङ्कल्पस्तु कुर्यामिति । स च न लिङर्थः । सत्तामात्रेण प्रवर्त्तनादित्युक्तम् । तदेतत् कर्त्तव्यतायां जातायां प्रवर्त्तते इति वस्तुस्थितौ भ्रान्तैर्ज्ञातायामिति गृहीतम् ।

औचित्यन्तु क्रियाधर्म्मः प्रागभाववत्त्वं, तस्मिन् सति शक्यत्वं वा, तस्मिन् सति कर्त्तारं प्रत्युपकारकत्वं वा ? प्रथमे कुतश्चिदपि न निवर्त्तेत । द्वितीये दुःखेऽपि तथाविधे प्रवर्त्तेत । तृतीये तु वक्ष्यते ।

अस्तु तर्हि करणधर्म्मः । न । करणं हि शब्दः, तद्धर्म्मोऽभिधा वा स्यात्, तदर्थो भावनादिर्वा, तद्धर्म्मइष्टसाधनता वा ? न प्रथमः ।

**असत्त्वादप्रवृत्तेश्च नाभिधाऽपि गरीयसी ।**
**बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः ॥१३॥**

अस्त्विति ॥ येन विना यत्कारणत्वं न निर्व्वहति तस्य स व्यापारः, न च पितुः कारणत्वं पुत्रं विना न निर्व्वहतीति न स व्यापार इत्याह । सत्यपीति । तदेव स्पष्टयति । यं जनयित्वैवेति । यदि च कार्य्यसमानकालस्यैव कारणत्वं, तदा तवाप्यनिष्टमित्याह । न चेदेवमिति । उभयं वेति । कार्यत्वमपूर्व्यत्वञ्च लिङः प्रवृत्तिनिमित्तमित्यर्थः । कृत्यध्यवसायः, कृत्यनुकूलेच्छा । उचितार्थोऽर्हार्थः । तत्रेच कृत्यविधानादिति भावः । व्यवहितेति । प्रवृत्त्यपेक्षयेति शेषः । स चेति, उभयरूपोऽपि सङ्कल्पः ।

तस्याज्ञातस्यैव प्रवृत्तिहेतुत्वेन प्रवर्त्तकज्ञानाविषयत्वादित्यर्थः। सङ्कल्पविधिवादिनमुपहसति। तदेतदिति। शक्यत्वं, कृतिसाधत्वमित्यर्थः। कुतश्चिदिति। अनिष्टादपीत्यर्थः। तृतीये इति। इष्टसाधनार्थत्वनिरासेनेत्यर्थः। तद्धर्मोऽभिधा वेति। वाक्यार्थज्ञानानुकूला भावना—शब्दव्यापारादिपदवाच्या अभिधा शब्दधर्मो वा लिङर्थः। तदाहुर्भट्टपादाः।

"अभिधां भावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते"—इति।

तदर्थो भावनादिर्वेत्यत्र करणमित्यनुषञ्जनीयम्। लिङर्थोभावादिः प्रयत्नादिः करणं, तद्धर्म इष्टसाधनता वेत्यर्थः।

पराभिमतशब्दधर्मस्वरूपाभिधायां मानाभावादित्याह। असत्त्वादिति। तत्सत्त्वेऽपि पदान्तरेण तदुपस्थितौ ततोऽपि न प्रवृत्तिरित्याह। अप्रवृत्तश्चेति। सर्वत्रान्यत्र पक्षेषु बाधकसत्त्वात् परिशेषेणाभिधा लिङर्थ इत्यपि नास्ति, तत्रापि बाधकसत्त्वादित्याह।

सङ्गतिप्रतिसन्धानाधिकायां तस्यां प्रमाणाभावात्। अन्यसमवेतस्यापूर्ववदन्यव्यापारत्वेनाप्युपपत्तेः। विषयतयाऽपि च स्वव्यापारं प्रति लिङ्गवद्धेतुभावाविरोधात्। अधिकत्वेऽपि ततोऽप्रवृत्तेः। बालानां तदभावेऽपि तद्भावात्। शब्दान्तरेण तत्श्राविणामप्यप्रवृत्तेः।

न च विलक्षणैव सा लिङोविषयः। तद्वैलक्षण्यं प्रतीतं प्रति चेत्, अर्थविशेषोऽपि स्यात्। प्रवृत्तिमात्रं प्रति चेत्, अभिधासमवेन तादिति कुतः? तत्सन्निधानादिति चेत्। न। अनियमात्। अन्यस्य सर्वस्य निषेधादिति चेत्। न। प्रवृत्तिहेतुत्वनिषेधस्य तुल्यत्वात्। तत्सन्निधिनिषेधस्य चाशक्यत्वात्। शाब्दैकवेद्यत्वे चाव्युत्पत्तेः।

प्रवृत्त्यन्यथाऽनुपपत्तिसिद्धे व्युत्पत्तिरित्यपि वार्त्तम् । न हि प्रवृत्तिहेतुः कश्चिदस्तीति प्रवर्त्तते । इष्टसाधनता तु स्यात् । सर्वो हि मया क्रियमाणमेतन्मतं समीहितं साधयिष्यतीति प्रतिसन्धत्ते, तत इच्छति कुर्यामिति, ततः करोतीति सर्वानुभवसिद्धम् ।

तदयं व्युत्पित्सुर्यज्ज्ञानात् प्रयत्नजननीमिच्छामवाप्तवान्, तज्ज्ञानमेव लिङ्गश्राविणः प्रवृत्तिकारणमनुमिनोति ।

बाधकस्येति ।

ननु शब्दस्य वाक्यार्थधीकारणत्वात् तस्य व्यापारेण भाव्यमवश्यमित्यभिधैव तद्व्यापारः । किञ्च, पदानां प्रत्येकमर्थज्ञानाजनकत्वत्वादाशुविनाशितया क्रमभावितया च तन्मूलकस्याभावादर्थज्ञानानुपपत्त्या अभिधा कल्प्यते इत्यत आह । सङ्गतीति । सङ्गतीति । सङ्गतिस्मृतिरेव पदस्यावान्तरव्यापारः, एकस्मृतिविषयानुपूर्वीविशेषविशिष्टपदमालेव पदार्थस्मृतिव्यापारा वाक्यार्थधीकरणमिति न तत्र मानमित्यर्थः ।

ननु सङ्गतिस्मृतिर्न शब्दव्यापारः, व्यापारिणं विहायान्यत्रात्मनि तत्समवायात्, ततो यः शब्दसम्बन्धस्तद्व्यापारः साऽभिधा स्यादित्यतआह । अन्येति । यथाऽऽत्मसमवेतमपूर्वं यागादेः करणस्य व्यापारः, तथा सङ्गतिस्मृतिरपि तादृशी शब्दव्यापार इत्यर्थः । अतएव, यद्व्यापारि कर्तृ तदेव करणं, यथा पाककरणानि काष्ठानि ज्वलनावान्तरव्यापारकर्तॄणि, न च स्वविषयज्ञाने शब्दः कर्त्ता किन्तु कर्मेत्यपास्तम् । कर्तृपदस्य मुख्यार्थतायामचेतनस्य व्यापारासम्भवात्, हेतुमात्रविवक्षायाञ्च प्रकृतेऽप्यदोषादिति भावः ।

ननु व्यापारी व्यापारकारणं भवति, न च सङ्गतिस्मृतौ पदं कारणम् । अतः शब्दजन्याभिधा मन्तव्येत्यत आह । विषयतायामपीति । यथा लिङ्गस्य स्वविषयपरामर्शे विषयतया हेतुत्वं, तथा शब्दस्यापि सङ्गतिस्मृतावित्यर्थः । अस्मन्मते स्मृतेर्विषयाजन्यत्वेऽपि पर-

मतेनेदमुक्तम् । अस्तु वा शब्दव्यापारोऽभिधा लिङ्वाच्या, तथापि नासौ प्रवृत्तिहेतुः अपुरुषार्थत्वादित्याह । अधिकत्वेऽपीति । अभिधायामव्युत्पन्नानामभिधाज्ञानाभावेऽपि प्रवृत्तिसत्त्वादित्याह । बालानामिति । अभिधादिपदैरभिधां ज्ञातवतोऽप्यप्रवृत्तेरित्याह । शब्दान्तरेणेति ।

अथाभिधादिपदात्तत्सामान्यज्ञानेऽपि न प्रवृत्तिः । लिङभिधेयविलक्षणाभिधाज्ञानस्य प्रवर्त्तकस्य ततोऽनुत्पादात्, अतएव नाख्यातान्तरेण तज्ज्ञानेऽपि प्रवृत्तिः, अत्राह । न चेति । प्रतिपत्ति प्रतीति । प्रतिपत्तिविशेषकमित्यर्थः । अर्थविशेषोऽपीति । अर्थविशेषं विना बुद्धिविशेषस्यानुत्पत्तेरित्यर्थः । यदि प्रवर्त्तकज्ञानविशेषादेव सोऽर्थः प्रतीयते, तदा लोके यत्प्रतीयमानं प्रवर्त्तकत्वेन ज्ञातं तत् लिङा वाच्यम् । न चाभिधायां तत्सम्भवतीति भावः ।

अथाभिधाज्ञानमात्रस्याप्रवर्त्तकत्वात् प्रवृत्त्यैव तद्वैलक्षण्यमनुमेयं, तत्राह । प्रवृत्तिमात्रमिति । तदिति । अभिधायाः सन्निहितत्वात्तद्वैलक्षण्यं प्रवर्त्तकमित्यर्थः । नानियमादिति । वीक्ष्सन्निधानं धात्वर्थे इष्टसाधनत्वे चास्तीत्यर्थः । प्रवृत्तिहेतुत्वस्य निषेधः प्रमाणान्तरात्, विधिवादसन्निधेर्वा ? आद्ये, प्रवृत्तिहेतुत्वेति । अन्त्ये, तत्सन्निधीति । यथाऽभिधायां विधिसन्निधिर्निषेधोऽशक्यः, तथा धात्वर्थादावपीत्यर्थः ।

ननु मानान्तरादभिधाज्ञानेऽपि न प्रवृत्तिः, लिङादिपदैकवेद्याभिधाज्ञानस्य प्रवर्त्तकत्वादित्यत आह । शब्दैकेति । एवं तत्र लिङादिशक्तिग्रहएव न स्यात्, मानान्तरेण तदनुपस्थितेरित्यर्थः । न हीति । प्रवृत्त्यन्यथानुपपत्त्या हि तद्धेतुः कश्चिदित्येव ज्ञानं स्यात्, न च तत्प्रवर्त्तकमित्यर्थः । द्वितीय पक्षमाह । इष्टसाधनता त्विति । करणधर्मो विधिरिति शेषः । तदुपपादयति सर्वो हीति मयेत्यादिनाऽसाध्ये कृत्यसाध्ये स्वकृत्यसाध्ये च प्रवृत्तिनिवारिता ।

तदयमिति । ननु कार्य्यत्वमेव विधिः । तथाहि । ज्ञानस्य कृताबुत्पाद्यायां चिकीर्षाऽनितरेके न कर्त्तव्यम् । सा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयेच्छा । पाकं कृत्या साधयामीति तदनुभवात् । पाकं कुर्य्यामित्यस्य पाकं कृत्या साधयामीति विवरणाच्च । सा स्वकृतिसाध्यताज्ञानसाध्या । इच्छायाः स्वजनकज्ञानसमानप्रकारकत्व-

नियमात् । अत एव स्वकृतिसाध्ये प्रवर्त्तते, न त्विष्टसाधनेऽपि स्वकृत्यसाध्ये ।

अथ कृत्या साध्येऽपि विषभक्षणादावप्रवृत्तेरिष्टसाधनत्वमादाय विधिः । न च तत्रानिष्टसाधनताज्ञानं प्रतिबन्धकम् । प्रवृत्तौ तदभावस्य हेतुत्वे गौरवापत्तेः । तद्वरं लाघवादिष्टसाधनत्वं विषयतावच्छेदकमस्तु । न च, प्रवृत्तेः पूर्वमनिष्टसाधनताज्ञानविरह उभयसिद्धः, इष्टसाधनताज्ञानञ्च सन्दिग्धम्, अतो युगपदुपस्थित्यभावान्न लाघवावतार इति वाच्यम् । त्वयाऽपि प्रवृत्तेः पूर्वमिष्टसाधनताज्ञानविनियोगस्वीकारात् । यत्र शब्दादनुमानाद्वा तदधिगतं, तत्र तदभावाच्च । तस्माद्विषभक्षणादौ वृष्ट्यादौ च प्रत्येकं व्यभिचारात् कृतिसाध्यत्वे सतीष्टसाधनत्वं विधिरिति ।

न । विषभक्षणादौ स्वकृतिसाध्यत्वाभावात । न हि कश्चिद्विषभक्षणं चिकीर्षति ततः करोतीति दृश्यते । जीवनयोनिकृतिसाध्यश्च तन्न भवत्येव । न चान्या कृतिरस्ति ।

अथेष्टसाधनताभ्रमानन्तरं विषभक्षणमपि चिकीर्षाजन्यकृतिसाध्यम्, अतो विशेषदर्शनेऽपि तत्र प्रवर्त्तेतेति चेत् । न । द्विधा हि कृतिरनुभूयते: बलवदनिष्टजनिका यथा विषभक्षणादौ तदजनिका च यथा पाकादौ । तदिह बलवदनिष्टाजनककृतिसाध्यत्वं विवक्षितम् । न च विषभक्षणे तदस्ति ।

अतएव तत्र प्रथममिष्टसाधनतया तथाविधकृतिसाध्यत्वमविद्यमानमवगत्य प्रवर्त्तते, प्रवृत्त्यनन्तरञ्च बलवदनिष्टहेतुकृतिसाध्यत्वं विरोधि तत्रावगतमिति न प्रवर्त्तते ।

तथाभूतकृतिसाध्यत्वं पूर्वानुभूतं स्मृत्वा प्रवर्त्तेतेति चेत् । न । विशेषदर्शनेन भ्रमाहितसंस्कारोन्मूलनात् । अन्यथेष्टसाधनतास्मरणेऽप्यप्रतीकारात् । न चैवं श्रमेऽपि प्रवर्त्तेत, स्वेच्छाजन्यकृतिसाध्यस्य विवक्षितत्वात् । श्रमस्य च नियमतोऽन्येच्छाधीनकृतिसाध्यत्वं, दुःखत्वेन तत्रेच्छाविरहात् । अतएव स नान्तरीयक इत्युच्यते । न चैवमिच्छाज्ञानस्य प्रवर्त्तकत्वप्रसङ्गः, कृतौ परिचायकमात्रत्वात ।

यद्वा, कृतौ स्वरूपसतीच्छा जनिका, इच्छायान्तु तज्ज्ञानं जनकमस्तु, को विरोधः । न हि यदेकत्र स्वरूपतो हेतुस्तज्ज्ञानमन्यत्र

न जनकम् । एवं चिकीर्षाहेतुतया कृतिसाध्यताज्ञाने व्यवस्थिते विषभक्षणादौ व्यावर्त्तक कृतिवृत्ति बलवदनिष्टाजनकचिकीर्षाधीनत्वमेव, न त्विष्टसाधनत्वम् । कृतिवृत्तिधर्म्यापेक्षया वहिरङ्गत्वात् । जीवनयोनिकृतिजन्यप्राणादिसञ्चारनिवृत्त्यर्थमावश्यकत्वात् । भोगचिकीर्षायां व्यभिचाराच्च ।

न चोपचिकीर्षेष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् वृष्टीच्छावदिति वाच्यम् । साध्यत्वसाधनत्वयोर्विरोधेनैकत्र ज्ञातुमशक्यत्वात् । असिद्धतां सिद्धताञ्चादाय तयोर्व्यवस्थितेः । न च यद्वस्तुतः कृतिसाध्यं तदिष्टसाधनमिति ज्ञायते इति युक्तम् । कृतिसाध्यतोत्तीर्णज्ञानात् चिकीर्षाऽनुत्पत्तेः । अपि च, साधनत्वस्य सिद्धमात्रधर्म्मत्वात् साधनत्वज्ञानमिच्छाविरोधि । न हि कश्चित्कृतिसिद्धमिच्छति । अतोऽसुन्दरे वृष्ट्यादौ चेच्छा तत्साध्येष्टज्ञानात् ।

अथ तादृशकृतिसाध्यत्वे कृतिर्न विशेषणम्, असत्त्वात् । सत्त्वे वा, कृतौ सत्यां कृतिसाध्यताज्ञानं, तथा ज्ञाने च कृतिरित्यन्योन्याश्रयः । नोपलक्षणम्, अतिप्रसक्तोपलक्ष्याभावादिति चेत् । न । ज्ञाने विषयतया कृतेर्विशेषणत्वात् । साध्ये च प्रवृत्तिविषये परिचायकतयोपलक्षणत्वात् । अन्यथेष्टसाधनतापक्षेऽपीष्टस्य तथाविधविकिल्पग्रासात् ।

ननु तादृशकृतिसाध्यत्वज्ञानाच्चिकीर्षा ततः कृतिः कृतौ सत्यां प्रत्यक्षेण कृतिसाध्यताज्ञानमित्यन्योन्याश्रयात् । कृतिसाध्यतोत्तीर्णे चिकिर्षाकृत्योरसम्भवाच्च । नानुमानात् । कृतक्रियमाणयोः पक्षत्वे कृतिसाध्यतोत्तीर्णत्वेन बाधात्, भाविपक्षत्वे चाश्रयासिद्धेः ।

उच्यते । पाको मत्कृतिविशेषसाध्यः मत्कृतिं विनाऽसत्त्वे सति मदिष्टसाधनत्वात् मद्भोजनवत् । यस्य यदिष्टसाधनं यदा यत्कृतिं विना न सिध्यति, तत् तदा तत्कृतिविशेषसाध्यमिति व्याप्तेः । असिद्धस्येष्टसाधनत्वाभावात् ।

न च पक्षानुपपत्तिः, पाके कृतिसाध्यत्वं हि सिध्यत् सिद्धे बाधादनागतं पाकमादाय सिध्यति, पक्षतावच्छेदकधर्मसामानाधिकरण्यं साध्यमानस्य हेतुना सिध्यतीत्यनुमाने क्लृप्तत्वात् । यथा प्रसिद्धवह्निबाधेऽपि बह्निमात्रं न बाधितमित्यप्रसिद्धोऽपि वह्निः सिध्यति, तथा प्रसिद्धपाके कृतिसाध्यत्वबाधेऽपि पाकमात्रे न बाधित-

मित्यप्रसिद्धं पाकमादाय सिध्यति । अप्रसिद्धयोः पक्षसाध्ययोः सिद्धावविशेषात् ।

तथापि प्राथमिकत्वादावश्यकत्वाच्च लिङ्गज्ञानमेव प्रवर्त्तकमस्तु । न च लाघवात् कृतिसाध्यत्वं तथा, तदा कृतिसाध्यत्वानुमितौ मानाभावेन युगपदुपस्थित्यभावादिति चेत् । न । लिङ्गज्ञाने कृतिसाध्यत्वाप्रकाशे तत्प्रकारकचिकीर्षायां तस्याहेतुत्वात् ।

ननु कृतिसाध्यत्वस्य विधित्वे न कलञ्जं भक्षयेदित्यत्र विध्यर्थनिषेधानुपपत्तिः । कलञ्जभक्षणं न कृतिसाध्यमित्यस्यायोग्यत्वात् । न । तत्रापूर्वस्य लिङर्थत्वेन कलञ्जभक्षणप्रवृत्तं प्रति कलञ्जभक्षणाभावविषयकापूर्वस्य कृतिसाध्यत्वेन बोधनात् । न चानादित्वेन प्रागभावो न साध्यः, भक्षणप्रवृत्तस्य हि भक्षणप्रागभावस्तत्कृतिं विनोत्तरकाले न भवति तत्कृत्या तु भवतीत्यन्वयव्यतिरेकाभ्यां तत्कृतिसाध्यत्वानुभूयते । न हि कृत्यनन्तरक्षणे घटस्वरूपं कृत्यधीनमित्यतोऽन्यत् कृतिसाध्यत्वं घटे । इयांस्तु विशेषः । क्वचित् कृत्यधीनः प्राक्कालयोगः क्वचिदुत्तरकालयोग इत्युभयोरपि योगक्षेमयोः कृतिसाध्यत्वमानुभविकम् । अतएवेदं मत्तोभूतमिति व्यवहारः ।

ननु कृतौ नष्टायां सन्नपि धर्मी न कार्य्यः, तथा सति कथमपूर्वं कार्य्यं कामिनोऽन्वयः ? आशुविनाशितया क्रियातुल्यत्वात् । मैवम् । यद्वृत्ति काम्यसाधनत्वं तत्र कार्य्यताबुद्धिः प्रयोजिका, न तु कार्य्यताविशिष्टस्य काम्यसाधनताविशिष्टतेति व्याप्तिः । तस्मात् कृतिसाध्यत्वमेव विधिः ।

अत्रोच्यते । कृतिसाध्यताज्ञानस्य प्रवर्त्तकत्वे तृप्तोऽपि भोजने प्रवर्त्तेत । तथा विशेषदर्शनेऽपि चैत्यवन्दनादौ ।

अथ स्वविशेषणवत्ताप्रतिसन्धानजन्यं कार्य्यताज्ञानं प्रवर्त्तकम् । तथाहि । काम्ये पुरुषविशेषणं कामना, ततः काम्यसाधने यागपाकादौ कार्यताज्ञानम् । नित्ये च कालशौचादि स्वविशेषणम् । तृप्तस्य तृप्तौ कामनाविरहेणेष्टसाधनताज्ञानाभावात् न तथा बोधः । विशेषदर्शने च भ्रमदशायामिव चैत्यवन्दने नेष्टसाधनताज्ञानं, येन तज्जन्यकार्यताबोधात् प्रवर्त्तेत ।

मैवम् । कृतिसाध्यत्वज्ञाने लाघवाद्विषयतयेष्टसाधनत्वस्यैवावच्छेदकत्वात् । न तु स्वविशेषणवत्ताप्रतिसन्धाजन्यत्वं तत्र विशेष,

णं, गौरवात्। न च साध्यत्वसाधनत्वयोर्विरोधः, निर्विशेषितयोस्तयोरविरोधात्। तदा साध्यत्वसाधनत्वयोरेव विरोधात्। तथात्वस्य चानभ्युपगमात्। अन्यथा साध्यत्वसाधनत्वयोरन्यतरमेव स्यात् पाके, न तु समयभेदादुभयम्। तस्मात् समयभेदमादाय साध्यत्वसाधनत्वयोर्ज्ञानमबाधितम्। न चैवं गौरवं, समयभेदस्य प्रवृत्तावनुपयोगात्, ज्ञानोत्पत्तावेव तदुपक्षयात्।

कथं वा इष्टसाधनत्वेन कार्यत्वानुमानं, पक्षे साध्यसाधनयोरन्यतरसत्त्वे बाधासिद्ध्योरन्यतरप्रसङ्गात्। समयभेदेन तयोरविरोधइति तु तुल्यम्। अपि च, स्वविशेषणवत्ताज्ञानजन्यकार्यताज्ञानाभावात् कथं सुखे चिकीर्षा ?

अथोपायचिकीर्षायां तद्धेतुः। इच्छाकारणसुखज्ञाने कृतिसाध्यत्वं यदा विषयः, तदा सुखे चिकीर्षा, नो चेदिच्छामात्रमित्युभयं चिकीर्षाहेतुः। तर्हीच्छाहेतुज्ञाने कृतिसाध्यत्वं यदा भासते, तदा चिकीर्षा, नो चेदिच्छामात्रमित्यनुगतमेव सुखतदुपायचिकीर्षाहेतुरस्तु, लाघवात्। सुखत्वज्ञानवदिष्टसाधनत्वज्ञानस्यापि इच्छाहेतुत्वात्। अतएव पाकादाविष्टसाधनताज्ञाने कृतिसाध्यत्वं विषयइति चिकीर्षा, वृष्ट्यादाविष्टसाधनताज्ञाने तु न तद्विषय इतीच्छामात्रम्। सुखचिकीर्षायामिच्छाकारणज्ञाने कृतिसाध्यताविषयके चिकीर्षाहेतुत्वावधारणात्।

परमार्थतस्तु, दैवाधीनवृष्ट्यादौ स्वतोऽसुन्दरविषयेच्छामात्रं प्रतीष्टसाधनताज्ञानं कारणं क्लृप्तम्। अतः पाकादिचिकीर्षाऽपि तज्जन्या। न हि यज्जातीयं प्रति यत्कारणं गृहीतं, तदतिपत्य तद्भवति। न च चिकीर्षान्यत्वे सत्युपायेच्छात्वं तत्र तन्त्रं, गौरवात्। न च साधनत्वज्ञानमिच्छाविरोधि, निर्विशेषितयोः सिद्धत्वासिद्धत्वयोरविरोधेनेच्छासाधनत्वयोरविरोधात्।

यत्तु तत्साध्येष्टज्ञानाद्वृष्ट्यादाविच्छेत्युक्तम्। तन्न। असिद्धावस्थावतोवृष्ट्यादेरिष्टानुत्पत्तेस्तस्यावश्यं सिद्धत्वमवगन्तव्यम्, इच्छानुरोधाच्चासिद्धत्वमिति तत्रापि विरोधात्। वृष्टिसाधनत्वमादायैवेष्टसाध्यत्वग्रहाच्च। एवञ्चेष्टसाधनतामात्रज्ञानात् कृतिसाध्यताप्रकारिकेच्छानोत्पत्तुमर्हति, न चातिप्रसङ्गनिवृत्तिरिति कृतिसाध्यत्वमपि तत्र विषयतयाऽवच्छेदकमस्तु।

ननु कृताविच्छा चिकीर्षा, सनः प्रकृत्यर्थगोचरेच्छावाचित्वात्। न च कृतिविषयपाकादिविषये कृतिसाध्यत्वप्रकारकेच्छावाचित्वम्। तथाच कृताविष्टसाधनताज्ञानादिच्छा, वृष्ट्यादौ तथा कल्पनात्। यदा कृताविच्छा, तदा सैव चिकीर्षा, अन्यत्रेच्छामात्रम्। न तु कृतिसाध्यताज्ञानात्। कृतौ कृतिसाध्यत्वाभावात्।

अथ पाकं कृत्वा साधयामीतीच्छा अनुभवसिद्धा। सा च कृतिसाध्यताज्ञानात्। सा च चिकीर्षापदाप्रतिपाद्याऽपि कृतिहेतुः, समानविषयकत्वात्। न तु कृतीच्छा कृतिहेतुः, कृतिविषयाविषयत्वादिति चेत्। अस्ति तावत् पाककृताविच्छा वृष्टीच्छावत्, अस्ति च कृतिसाध्यत्वप्रकारिका तत्रेच्छा। तथापि कृतीच्छैव कृतिहेतुर्लाघवात्, न तु कृतिसाध्यत्वप्रकारिकेच्छा, गौरवात्। न चावगतिप्रवृत्त्योः समानविषयत्वमुभयसिद्धं, तस्यैव विचार्यत्वात्। कथन्तर्हि पाकं कृत्वा साधयामीतीच्छा? येन रूपेण यस्येष्टसाधनत्वं तेन रूपेण तत्रेच्छासत्त्वात्। यथा स्वकेदारवृष्टित्वेनेष्टसाधनत्वात्तथैवेच्छा, तथा कृतिसाध्यत्वेन पाकस्येष्टसाधनत्वात् तथैवेच्छासत्त्वात्। अन्यथा तत्तदुपायसाध्यत्वेनेच्छा तत्तदुपायसाध्यत्वप्रकारकज्ञानात् स्यादित्यनन्तकारणकल्पनापत्तिः। मम तूपायेच्छायामिष्टसाधनत्वज्ञानमेव हेतुः। अतएवैकप्रत्ययाभिधेयत्वप्रत्यासत्तेरन्तरङ्गतया विधिप्रत्ययाभिधेयेष्टसाधनत्वस्य कृतावेवान्वयो न प्रकृत्यर्थे। तथैव चिकीर्षाहेतुज्ञानजनकत्वात्। प्रकृत्यर्थस्य च कृतौ विधेयत्वेनान्वयः।

**ततश्च कर्त्तव्यतैकार्थसमवायिनी इष्टसाधनता लिङर्थ इत्यवधारयाति। न च वाच्यमेवञ्चेत् वरं कर्त्तव्यैतवास्तु, अवश्याभ्युपगमनीयत्वात्; कृतमिष्टसाधनतयेति। यथा हि नेष्टसाधनतामात्रं प्रतीत्य प्रवर्त्तते, असाध्येषु व्यभिचारात्। तथा प्रयत्नविषयसमवायिनीमिष्टसाधनतामधिगम्याधिकारी प्रवर्त्तते इत्यनुभवः॥**

उच्यते। पाकस्य वह्निसाध्यत्वेन कृतिसाध्यत्वेन वा नेष्टसाधन-

त्वं, गौरवात्। किन्तु पाकत्वेन। स च कृतिं विना नेत्यन्यदेतत्। कथं तर्हि वह्निना साधयामीतीच्छा। इष्टसाधनत्वेन ज्ञाते यत्र यत्साध्यत्वं ज्ञायते, तत्र तत्साध्यत्वेनेच्छासत्त्वात्। यथा हीष्टसाधनत्वेन ज्ञाते वह्निसाध्यत्वज्ञानाद्वह्निना पाकं साधयामीतीच्छा, तथा कृतिसाध्यत्वेन ज्ञाते पाके इष्टसाधनत्वज्ञानात् कृत्या साधयामीतीच्छा। तथाचेष्टसाधनत्वेन कृतिसाध्यत्वेन च ज्ञाते कृतिसाध्यत्वप्रकारिकेच्छा न त्विष्टसाधनताज्ञानमात्रादिति कृतिसाध्येष्टसाधनता विधिः। नित्ये च स्नानादौ यथेष्टसाधनताज्ञाने सत्यपि न नित्यताक्षतिः, तथा निपुणतरमुपपादितं द्वितीयाध्यायप्रकाशे इति संक्षेपः॥

तत्र विषयो धातुना भावनाऽऽख्यामात्रेण, शेषन्तु तद्विशेषेण लिङा इत्येवमिष्टाभ्युपायतायामभिगतायामन्वयबलात् तद्विषयस्येष्टसाधनत्वावगतिरिति कर्त्तव्यतैकार्थसमवायिनीष्टाभ्युपायता लिङः प्रवृत्तिनिमित्तमित्युक्तम्।

तत्रेति॥ पचतीत्यादौ भावनाविषयः पाकादिर्धातुनोच्यते, भावना त्वाख्यातेनेत्यर्थः। शेषमिति। यजेतेत्यादौ लिङा भावनाविषयस्य यागादेरिष्टसाधनत्वमुच्यते इत्यर्थः। अन्वयबलादिति। प्रकृतिसमभिव्याहारादित्यर्थः। तद्विषयस्येति। इष्टसाधनीभूतस्य भावनाविषयस्येत्यर्थः। भावनाया इष्टसाधनतया तत्कारणकोटियागोऽपि तथेति भावः। कर्त्तव्यतैकेति। यद्यपि पूर्वं तदर्थो भावनादिस्तत्कर्मइष्टसाधनता वेत्यनेन भावनाधर्म एवेष्टसाधनत्वं लिङर्थ इति विकल्पितम्, अधुना च भाव्यस्योच्यते इति विरोधः, तथापि तत्रादिपदेन भाव्यस्याप्यभिधानाददोषः।

करणस्येष्टसाधनताऽभिधाने ज्योतिष्टोमेनेति तृतीयया न भवितव्यमिति तु देश्यमवैयाकरणस्यावधीरणीयमेव। तत्सङ्ख्याऽभिधानं हि तदभिधानमाख्यातेन। न च तत् प्रकृते। न च यागेष्टसाधनताऽभिधानं लिङा, किन्त्वन्वयबलात्तल्लाभ इत्युक्तम्।

नन यदीष्टसाधनता लिङर्थः, तदा ज्योतिष्टोमेन यजेतेत्यादौ तृतीया न स्यात्, यागकरणत्वस्य लिङैवाभिधानादित्यत आह। करणस्येति। लिङ्आख्यातेन यागसंख्याभिधानरूपं तदभिधानं वाच्यम्, न चैवमिहास्तीत्याह। तत्संख्येति। यजेतेत्यत्र हि न करणे लकारो येन तद्गतसंख्यामभिदध्यात्, किन्तु कर्त्तरीति तत्संख्याऽभिधाने तृतीयोपयोगः, तृतीयातोऽपि लब्धे करणत्वे नेह तात्पर्य्यमित्यर्थः। लिङा चेष्टसाधनतामात्राभिधानेऽपि न यागस्य तदभिधानमित्याह। न चेति। यद्यप्येवमप्यभिधानमस्ति, तथापि वाक्यार्थतया न पदार्थतया, तथाऽनभिधानञ्चानभिहित इति सूत्रे विवक्षितमित्येके। लिङ्कृत्तद्धितैः परिसंख्यान नियामकमित्यन्ये॥

यत्तु सिद्धापदेशादपि प्रतीयते इष्टसाधनता, न चातः सङ्कल्पात्मा प्रवृत्तिरस्तीति देश्यम्। तत्र समुत्कटफलाभिलाषस्य समर्थस्य तत्साधनताऽवगमेऽपि प्रवृत्तिरिति कः प्रतीयात्। सर्वपक्षसमानश्चैतत् समानपरीहारश्चेति किन्तेन।

अत्राभिधीयते। अस्तु प्रयत्नविषयसमवायिनीष्टसाधनता प्रवृत्तिहेतुः, तथापि नासौ लिङर्थः, सन्देहात्। सा हि किं साक्षादेव लिङा ऽवगम्यते, स्तनपानादावनुमानादिव बालेन; किं वा तत्प्रतिपादितात् कुतश्चिदर्थादनुमीयते, चेष्टाविशेषानुमितादिवाभिप्रायविशेषात् समयाभिज्ञेनेति सन्दिह्यते। एवञ्च सति सा नाभिधीयते इत्येव निर्णयः॥

हेतुत्वादनुमानाच्च मध्यमादौ वियोगतः॥
अन्यत्र क्लृप्तसामर्थ्यान्निषेधानुपपत्तितः॥ १॥

तथाहि। अग्निकामो दारुणी मथ्नीयादिति श्रुत्वा कुत इत्युक्ते वक्तारो वदन्ति, यतस्तन्मन्थनादग्निर-

रस्य सिध्यतीति । तरति ब्रह्महत्यां योऽश्वमेधेन यजते इत्यादाविष्टाभ्युपायतायामेवावगतायामनुमिमते तान्त्रिकाः, यदश्वमेधेन यजेत मृत्युब्रह्महत्यातरणकामइत्यादिविधिम् । निन्दया च निषेधम् । तत् यथा ।

अन्धं तमः प्रविशन्ति ये के चात्महनोजनाः—

इत्यतो नात्मानं हन्यादिति । कुर्य्याः कुर्य्यामित्यत्र विधिविहितैव लिङ् नेष्टाभ्युपायतामाह, किन्तु वक्तृसङ्कल्पम् न हीष्टधाभ्युपायोममायमिति कुर्य्यामिति पदार्थः, किन्तु तत्प्रतिपत्तेरनन्तरं योऽस्य सङ्कल्पः—

कुर्य्यामिति, सएव । सर्व्वत्र चान्यत्र वक्तुरेवेच्छाऽभिधीयते लिङित्यवधृतम् । तथाऽऽज्ञाऽध्येषणाऽनुज्ञासंप्रश्नप्रार्थनाऽऽशंसालिङि नान्यत् चकास्ति ।

यां वक्तुरिच्छामननुविदधानस्तत्क्षोभाद्विभेति, सा आज्ञा । या तु श्रोतुः पूजासम्मानव्यञ्जिका, सा अध्येषणा । वारणाभावव्यञ्जिका अनुज्ञा । अभिधानप्रयोजना संप्रश्नः । लाभेच्छा प्रार्थना । शुभाशंसनमाशीरिति ।

न च विधिविकल्पेषु निषेधउपपद्यते । तथाहि । यदाऽभिधा विधिः, तदा न हन्यात् हननभावना नाभिधीयते इति वाक्यर्थोव्याघातान्निरस्तः । यदा कालत्रयापरामृष्टा भावना, तदा नेति संबन्धोऽस्यभावोमित्था । यदा कार्यं, तदा न हन्यात् न हननं कार्यमित्यनुभवविरुद्धम् । क्रियतएव यतः । न हननेन

कार्यं हननकारणकं कार्यं नास्तीत्यर्थ इत्यपि नास्ति। दुःखनिवृत्तिसुखाप्त्योरन्यतरस्य तत्र सद्भावात् । हननकारणकमदृष्टं नास्तीत्यर्थ इति तु निरातङ्कं दृष्टार्थिनं प्रवर्त्तयेदेवेति साधु शास्त्रार्थः। अहननेनापूर्वं भावयेदिति त्वशक्यम् । कारणस्यानादित्वेन कार्यस्यापि तथाभावप्रसङ्गात् । भावनायाश्च तदविषयत्वात् । अहननसङ्कल्पेनेति यावज्जीवमविच्छिन्नतत्सङ्कल्पः स्यात् । सकृत् कृत्वैव वा निवृत्तिः । पश्चाद्धन्यादेवाविरोधात् । सम्पादितोऽनेन नियोगार्थः ।

यावद् यावद्धननसङ्कल्पवान् तावत्तावद्विपरीतसङ्कल्पेनापूर्वं भावयेदिति वाक्यार्थः, तथाभूतस्याधिकारित्वादित्यपि वार्त्तम् । तदश्रुतेः । प्रसक्तं हि प्रति षिध्यते नाप्रसक्तमिति चेत् । न वै किञ्चिदिह प्रतिषिध्यते । तदभावः प्रतिपाद्यते इति निषेधार्थः । हननकरणकमपूर्वं वाक्यार्थः ॥

किञ्च । न हन्यादिति अहननेनापूर्वस्य कर्त्तव्यताप्रत्ययोजातोवेदात् । जातश्च हननक्रियायां रागात् । निष्फलाच्च कार्यादपेक्षितफलं गरीय इति न्यायेन हन्यादेवेत्यहो वेदव्याख्याकौशलमास्तिक्याभिमानिनोमीमांसकदुर्दुरूढस्य ।

यत्त्विति । यागः स्वर्गसाधनमिति सिद्धार्थवाक्यादिष्टसाधनत्वज्ञानेऽपि न प्रवृत्तिरिति नायं विधिरित्यसिद्धं, ततोऽपि स्वर्गकामस्य तत्साधनताज्ञानवतः प्रवृत्तेरित्यर्थः । अन्येषामपि विधीनां सिद्धार्थान् प्रतीताथप्रवृत्त्या न ते विधयः स्युरित्याह । सर्वपक्षेति । एतद्दूषणमित्यर्थः । एवमिष्टसाधनतां विधिं व्युत्पाद्य स्वसिद्धान्तेन

निराकर्तुं सन्देहे तावदाह । अस्त्विति । स्तनपानादाविति । यथा स्तनपानादेरिष्टसाधनत्वं साक्षादेव पानादवगम्यते इत्यर्थः । तत्प्रतिपादयति । लिङा बोधितादाप्ताभिप्रायादिष्टसाधनत्वमनुमीयते, ततः प्रवृत्तिरित्यर्थः । समयश्चेच्छाविशेषः सङ्केतः । एवञ्चेति । इष्टसाधनता न लिङाऽभिधीयते, किन्त्वाप्ताभिप्रायविषयत्वेनानुमीयते इत्यर्थः ॥

तदुपपादयति—

हेतुत्वादिति ॥ अनुमानादिति ॥ विधेरिति शेषः । मध्यमादाविति । मध्यमपुरुषोत्तमपुरुषलिङ्इष्टसाधनतावियोगादित्यर्थः । अन्यत्रेति । आज्ञाऽध्येषणादौ लिङ्इच्छाविषयत्वकल्पनात् लिङ्मात्रस्य तथौचित्यादित्यर्थः । निषेधेति । सर्वत्र विधिप्रकारेषु न हन्यादिति निषेधानुपपत्तेरित्यर्थः ॥

हेतुत्वादिति व्याचष्टे । अग्निकाम इति । लिङेवेष्टसाधनत्व-भिधाने यतस्तन्मथतादिति हेत्वभिधाने व्यर्थमित्यर्थः । अनुमानादिति विवृणोति । तत्तीति । लिङ्ष्टसाधनताऽभिधाने विधेरनुमानं व्यर्थः, तदर्थस्य वाक्यादेव प्रतीतेरिति तदन्य नव लिङर्थ इत्यर्थः । मध्यमादाविति व्याचष्टे । कुर्य्या इति । तवेदमिष्टसाधनमतः कुर्याः, ममेदमिष्टसाधनमतः कुर्यामिति व्यवहारान्मध्यमपुरुषादौ सङ्कल्प एव लिङर्थः इत्यर्थः । अन्यत्र कल्पसामर्थ्यादिति विवृणोति । सर्वत्रेति । अन्तिमं हेतु व्याचष्टे । न चेति ॥

हन्यादिति निषेधेन सह हननान्वये हननाभावविषया भावना तदर्थः स्यात् । तत्र च विधिवैयर्थ्य, हननप्रागभावात्यन्ताभावयोरसाध्यत्वात् । हननभावना नास्तीत्यन्वयस्तु न सम्भवति, बाधात् । ततोहननविषयभावनाऽभिप्रायानिषेधोवाच्यः । तत्राह । व्यापारादिति । अभिधाविधिवादिनां हन्यादिति इदं हननभावनाऽभिप्रायकमेवेति तन्निषेधे व्याघात इत्यर्थः । यद्यपि भट्टानामभिधान सङ्केतः किन्तु शक्यनिष्ठं धर्मान्तरं, तथापि सिद्धसिद्धिव्याघाताभ्यां तन्निषेधो न शक्य इति भावः ।

यदा कालत्रयापरामृष्टा भावनेत्यत्र विधिरित्यनुषज्यते । एवमुत्तरत्र । कदाचिद्धननभावनायाः सत्त्वात्तन्निषेधस्यात्यन्ताभावरूपत्वं नास्तीत्याह । तदा नेतीति । कार्यताविधिपक्षे निषेधानुपपत्तिमाह ।

यदा कार्यमिति । यथाख्यातेन नञन्वयः, तदा हनने कृतिसाध्यत्व-कृत्युद्देश्यत्वयोरुभयोरपि सत्त्वान्निषेधोबाधित इत्यर्थः । हननस्य कार्यमाह । दु खनिवृत्तीति ।

निगतङ्केति । अत्र किं सुकृतापूर्वस्य निषेधः, दुरितापूर्वस्य वा ? आद्ये धर्मानुत्पादेऽप्यधर्मोत्पादकमानाभावाद्दृष्टफलार्थी हनेन प्रवर्त्तेत । अन्त्ये च सुतरां प्रवृत्तिः स्यादित्य । अथ नञा धात्वर्थान्वयः, तत्राह । अहननेनेति । कारणस्येति । हननप्रागभावस्यानादित्वादनाद्यपूर्वं स्यादित्यर्थः । ननु हननप्रागभावविषया भावनाऽपूर्वमुत्पादयिष्यतीत्यत आह । भावनायाश्चेति । प्रागभावस्तदा भावनाविषयः स्यात्, यदि तत्स्वरूपं भावनासाध्य स्यात्, न चैवमित्यर्थः।

सङ्कल्पविधिपक्षे निषेधानुपपत्तिमाह । अहननेति । सर्वदा किमहननसङ्कल्पेनापूर्वं भावयेदित्यर्थः, यथा तदाचित्ता ? आद्ये, यावज्जीवमिति । अन्त्ये, सकृदिति । नियोगार्थोविध्यर्थः । विपरीतेति । अहननसङ्कल्पेनेत्यर्थः । तथाभूतस्येति । प्रवृत्तिमतएव निषेधापूर्वेऽधिकारादित्यर्थः । तदश्रुतेरिति । हननसङ्कल्पवतोविपरीतसङ्कल्पकर्त्वाश्रुतेरित्यर्थः । ननु प्रसक्तं हननं निषेध्यं, प्रसङ्गश्च तत्करणसङ्कल्पएव, इच्छायाएवात्यप्रवृत्तित्वादित्यश्रुतमपि तल्लभ्यते इत्याह । प्रसक्तमिति । नात्र हननं निषिध्यते, किन्तु हननाभावसङ्कल्पकारणकमपूर्वं विधीयते इत्याह । न वै किञ्चिदिति ॥

किञ्चेति ॥ अपूर्ववाच्यत्वेऽपि, न कलञ्जं भक्षयेदित्यादितः कलञ्जभक्षणाभावविषयकमपूर्वमवगम्यापि तदभावे न प्रवर्त्तेत । तथाहि। कलञ्जभक्षणे रागादस्य कर्त्तव्यताबुद्धिर्जाता, शब्दाच्च भक्षणाभावे । निःफलाच्च कार्यात् सफलं गरीय इति न्यायेन सुखहेतौ भक्षणएव प्रवर्त्तेत, न तदभावे, तस्य निःफलत्वात् । न च निषेधापूर्वमेव फलं तस्य सुखदुःखाभावान्यतया एकत्वेन तदजनकतया च गौणमुख्यप्रयोजनत्वाभावात् ।

**इष्टसाधनतापक्षेऽपि न हन्यात् न हननभावना इष्टाभ्युपाय इति वाक्यार्थः । तथाचानिष्टसाधनत्वं कुतोलभ्यते । न हीष्टसाधने यन्न भवति तदवश्यमनिष्टसाधनं इष्टमुपेक्षणीयस्यापि भावात् ।**

यत् रागादिप्रसक्तं प्रतिषिध्यते तदवश्यमनिष्ट-साधनं दृष्टम्। यथा सविषमन्नं न भुञ्जीथा इति। तेन वेदेऽप्यनुमास्यते इत्यपि न साधीयः। प्रतिषेधार्थस्यैव चिन्त्यमानत्वात्।

न हि कर्त्तव्यत्वस्येष्टसाधनत्वस्य भावनाया वा-अभावः प्रतिपादयितुं शक्यते। लौकिकानां लौकिक-प्रमाणसिद्धत्वात्। तथापि प्रतिपाद्यते तावदिति चे-त्। न। पाषण्डागमनिषेधनानैकान्तात्। नासौ प्रमा-णमितिचेत्। न। अर्थविपर्य्ययप्रतिपादनाविशेषेऽस्या-पि तथाभावात्।

तात्पर्य्यतः प्रामाण्यमिति चेत्। न। विधिनिषे-धयोरनन्यपरत्वात्। न विधौ परः शब्दार्थ इति वच-नात्। तथापि निषेधे तथा भविष्यतीति चेत्। न। अविनाभावतदुद्देशप्रवृत्त्योरभावात्। नाप्यसुरामि-थ्यादिवदस्य नञो विरोधिवचनत्वम्। क्रियासङ्गत-त्वात्। असमस्तत्वाच्च॥

तस्माद्,

निधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः॥
अभिधेयोऽनुमेया तु कर्त्तरिष्टाभ्युपायता॥ १५॥

तत्र स्वयङ्कर्तृकक्रियेच्छाऽभिधानं कुर्य्यामिति। सम्बोध्यकर्तृकाक्रियेच्छाऽभिधानं कुर्य्या इति। शेष-कर्तृकक्रियेच्छाऽभिधानं कुर्वीतेति। तथाचाग्निकामो दारुणी मथ्नीयादित्यस्य लौकिकवाक्यस्यायमर्थः स-म्पद्यते अग्निकामस्य दारुमथने प्रवृत्तिर्ममेष्टेति। ततः श्रोताऽनुमिनोति, नूनं दारुमथनयत्नोऽग्नेरुपायइति।

**यद्विषयो हि प्रयत्नोऽयस्यासेनेष्यते, स तस्यापेक्षितहे-तुः । तथा तेनावगतश्च, यथा ममैव पुत्रादेर्भोजनवि-षय इति व्याप्तेः ।**

अथ प्रवृत्तिमतोनिवृत्तिनियोगाधिकार इति यदा भक्षणे प्रवृत्ति-स्तदा तन्निषेधे शब्दकार्यज्ञानात्तद्विपरीतप्रयत्ने जनिते रागाच्च क्रियो-त्पत्तिः, तेनैव प्रतिबन्धादिति चेत् । निवृत्तिकार्यताज्ञानेऽपि निष्फ-लत्वे निवृत्तौ प्रयत्न एव नोत्पद्यते, यस्य प्रतिबन्धकता स्यात् । न च शास्त्रस्थस्य शास्त्रजकर्त्तव्यताज्ञानं बलवदिति वाच्यम् । तस्य सफलविषयत्वादेवास्य च निष्फलविषयत्वात् । अथ कलञ्जभक्षण-स्य निन्दार्थवादेन बलवदनिष्टसाधनत्वज्ञानात् तद्भक्षणे न प्रवर्त्तते इति चेत् । एवमपि कलञ्जभक्षणे न प्रवर्त्ततां, तदभावेऽपि निष्प्रयो-जनत्वेनाप्रवृत्तौ किमायातमित्यर्थः ।

तथाचेति । वस्तुतः शत्रुहननभावनायाः कलञ्जभक्षणभावनाया-श्चेष्टसाधनत्वमस्त्येवेति भावः । अत एव वक्ष्यति न हीति । अत्य-न्तासत्यपि ह्यर्थे ज्ञानमर्थे शब्दः करोति हीति न्यायेनाह । तथापीति । प्रसक्तैव हिंसा यागादिविषया पाषण्डेन प्रतिषिध्यते, न च सा अ-निष्टसाधनमिति व्यभिचार इत्याह । पाषण्डेति । नासाविति । प्रमाणत्वेन हेतुर्विशेष्य इत्यर्थः । प्रमाणबाधितार्थविषयत्वेन पाष-ण्डागमस्येव न हन्यादित्यस्याप्यप्रमाणत्वादित्याह । अर्थेति ।

ननु गङ्गायां घोष इत्यस्येव न हन्यादित्यस्याप्यर्थान्तरे निषिध्य-मानानिष्टसाधनत्वरूपे तात्पर्यात्तद्बोधकत्वं स्यादित्याह । तात्पर्येत इति । अर्थवादवचनानामन्यत्र विधौ तात्पर्यं न तु विधिवचनस्ये-त्यभ्युपगमात् तदनुरोधेनान्यत्र लक्षणा युक्ता न तु तत्रैवेत्याह । न विधाविति । भावविधावेव तथा न तु निषेधविधावपीत्याह । तथा-पीति । यत्र लक्षणीयार्थेनाविनाभावस्तदुद्देशेन प्रयोगश्च तत्रैव लक्ष-णा, न च न हन्यादिति वाक्यमन्यपरत्वेन प्रयुक्तं, न वाऽनिष्टसाध-नत्वेनाविनाभाव इत्याह । अविनाभावेति । ननु यथा असुरादिपदे न निषेधो नञर्थः किन्तु तदन्यद्विरोधि, तथाऽत्रेष्टसाधनविरोध्यनिष्ट-साधनमर्थः स्यादित्यत आह । नापीति । क्रियासङ्गतस्य नञः प्रस-ज्यप्रतिषेधवाचकत्वात् समास एव तस्य पर्युदासवृत्त्या तदितरवि-

रोधिपरत्वादित्यर्थः ॥

नियोक्तृधर्मो वेत्यभिमतं पक्षमुपसंहरति—

विधिरिति ॥ प्रवृत्त्यादावित्यादिपदान्निवृत्तिः । विषयसप्तमीयम् । तेन प्रवृत्तिनिवृत्तिविषय आप्ताभिप्रायो लिङर्थ इत्यर्थः । प्रवर्त्तकमिष्टसाधनताज्ञानमेव. लिङर्थस्त्वाप्ताभिप्रायो लाघवादिति भावः । वक्त्रभिप्रायस्य विधित्वे कुर्यामित्यादावर्थभेदमानुभविकमुपपादयति । तत्रेति ॥

स्वर्गकामो यजेतेत्यस्य स्वर्गकामकृतिसाध्यतया यागो यागयत्नो वा आप्तेष्ट इत्यर्थः । ततो यो व्यापारो यस्य कृतिसाध्यतया यद्व्यापारविषयः प्रयत्नो वा यस्याप्तेनेष्यते, स तस्य बलवदनिष्टाननुबन्धीष्टसाधनमिति व्याप्तिग्रहाद् यागस्येष्टसाधनत्वमनुमिनोति । तथाहि । यागो मदिष्टसाधनं मत्प्रयत्नविषयतया मदाप्तेष्यमाणत्वात् । यथा मत्पित्रा मत्प्रयत्नविषयतया इष्यमाणं भोजनं मदिष्टसाधनम् । न कलञ्जं भक्षयेदित्यस्य कलञ्जभक्षणं मम बलवदनिष्टसाधनं मदिष्टसाधनत्वे सत्यपि मदाप्तेन मत्प्रयत्नविषयतयाऽनिष्यमाणत्वात् । यथा मत्पित्रा मत्प्रयत्नविषयतयाऽनिष्यमाणं मधुविषसम्पृक्तान्नभोजनं ममानिष्टसाधनम् ॥

लिङादीनां साक्षात् प्रवर्त्तकज्ञानजनकत्वे बाधकाभावान्न परम्पराजनकत्वमिति न वाच्यम् । अनन्यलभ्यस्य शब्दार्थस्यानियमे कर्त्रादेरिवान्यलभ्यत्वस्य हेतुत्वादित्यादेश्च बाधकत्वात् । त्वयाऽपि स्वकृतिसाध्येष्टसाधनतामन्तराऽनुमापयता शब्दस्य साक्षात् प्रवर्त्तकत्वानङ्गीकाराच्चेति भावः ॥

विषं न भक्षयेदित्यस्य तु विषभक्षणगोचरा प्रवृत्तिर्मम नेष्टा इत्यर्थः । ततोऽपि श्रोताऽनुमिनोति, नूनं विषभक्षणभावना अनिष्टसाधनम् । यद्विषयो हि प्रयत्नः कर्त्तुरभिमतसाधको ऽप्याप्तेन नेष्यते, स ततोऽधिकतरानर्थहेतुः, तथा तेनावगतश्च, यथा ममैव पुत्रादेः क्रीडाकर्दमविषभक्षणादिविषय इति व्याप्तेः ।

लौकिक एव वाक्ये अयं प्रकारः कदाचिद्बुद्धिमधिरोहति न तु वैदिकेषु, तेषु पुरुषस्य निरस्तत्वात् इति चेत् । न । निरासहेतोरभावात् । तदस्तित्वेऽपि प्रमाणं नास्तीति चेत् । मा भूदन्यत्, विधिरेव तावद्गर्भ इव पुंयोगे प्रमाणं श्रुतिकुमार्य्याः किमत्र क्रियताम् । लिङो वा लौकिकार्थातिक्रमे यएव लौकिकास्तएव वैदिकास्तएव चैषामर्था इति विप्लवेत । तथा च जयगडदशादिवदनर्थकत्वप्रसङ्ग इति भव सुस्थः ।

स्यादेतत् । तथापि वक्तॄणामुपाध्यायानामेवाभिप्रायो वेदे विधिरस्तु कृतं स्वतन्त्रेण वक्त्रा परमेश्वरेणेति चेत् । न । तेषामनुवक्तृतयाऽभ्यासाभिप्रायमात्रेण प्रवृत्तेः शुकादिवत् तथाविधाभिप्रायाभावात् । भावे वा न राजशासनानुवादिनोऽभिप्राय आज्ञा, किं नाम राज्ञ एवेति लौकिकोऽनुभवः ।

विधिरेवेति ॥ नन्वेवमन्योन्याश्रयः न वा लाघवं तात्पर्यगौरवात्, ईश्वराद्यनन्तकल्पनापत्तेश्च । मैवम् । लोके आप्ताभिप्राये लिङः शक्तिग्रहाद्वेदे परिशेषादीश्वराभिप्राये पर्यवसानात् । न तु तत्रैव शक्तिः । यथा तवैव कार्यशक्तस्य लिङादेरपूर्वे पर्यवसानम् । फलमुखञ्च गौरवं न दोषाय । शक्तिग्रहकाले मिथ्यासिद्धिपराहतत्वात्, ईश्वरे मानान्तरोपदर्शनाच्चेति भावः ॥

एतदेवाभिप्रेत्याह ॥ यएवेति ॥ लोकदृष्टा एव पदार्था वेदे प्रत्यभिज्ञायमानाः कथमन्य इत्यर्थः । अनर्थकत्वेति । गृहीतसङ्गतेर्लौकिकपदादन्यत्वेनागृहीतसङ्गतित्वादित्यर्थः । तेषामिति । उपाध्यायवंशानामतीन्द्रियार्थज्ञानाभावात्तत्रेच्छा न सम्भवतीति शुकादीनामिव तावत्पदज्ञानात् विवक्षातश्चोच्चारयितृत्वमात्रमित्यर्थः ।

श्रुतेः खल्वपि—

कृत्स्नएव हि वेदोऽयं परमेश्वरगोचरः ।

**स्वार्थद्वारैव तात्पर्य्यं तस्य स्वर्गादिवद्विधौ ॥१६॥**

न सन्त्येव हि वेदभागा यत्र परमेश्वरो न गीयते । तथाहि । स्रष्टृत्वेन पुरुषसूक्तेषु, विभूत्या रुद्रेषु, शब्दब्रह्मत्वेन मण्डलब्राह्मणेषु, प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चतयोपनिषत्सु, यज्ञपुरुषत्वेन मन्त्रविधिषु, देहाविर्भावैरुपाख्यानेषु, उपास्यत्वेन च सर्वत्रेति ॥

सिद्धार्थतया न ते प्रमाणमिति चेत् । न । तद्धेतोः कारणदोषशङ्कानिरासस्य भाव्यभूतार्थसाधारणत्वात् । अन्यत्रामीषां तात्पर्यमिति चेत् । स्वार्थप्रतिपादनद्वारा, शब्दमात्रतया वा ? प्रथमे स्वार्थेऽपि प्रामाण्यमेषितव्यम् । तस्यार्थस्यानन्यप्रमाणकत्वात् । अतएव तत्र तस्य स्मारकत्वमित्यपि मिथ्या ।

तत्प्रतिपादकत्वेऽपि न तत्र तात्पर्यमिति चेत् ।

स्वार्थद्वारैवेति । मुख्यार्थाबाधात्तत्रैव श्रुतेस्तात्पर्यमिति नान्यपरत्वमित्यर्थः ।

सिद्धार्थतयेति ॥ इदमत्राभिसंहितम् । व्यवहारत एवाद्या व्युत्पत्तिरुपायान्तरस्य व्युत्पत्त्यधीनत्वात् । तथाहि । प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो व्युत्पित्सुः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयाद्यनुविधानादुपस्थितत्वाच्च प्रयोज्यप्रवृत्तिमेव प्रयोजनमवधारयति ।

तच्च तदनुकूलव्यापारं विनाऽनुपपद्यमानं कार्यताज्ञानमेव व्यापारं कल्पयति । स्वप्रवृत्तौ तस्यैव कारणत्वनिश्चयात् । एवञ्च तत्र शब्दस्य हेतुत्वमवधार्य तत्रैव शक्तिं कल्पयति, उपस्थितत्वात् । पश्चादावापोद्वापाभ्यां क्रियाकारकपदानां कार्यान्विततत्तदर्थेषु शक्तिं गृह्णाति प्रथमं सामान्यतस्तत्रैव शक्तिग्रहादिति कार्यान्वित एव पदानां शक्तिरिति सिद्धार्थः शब्दो न प्रमाणम् ।

अथाकाङ्क्षादेस्त्वयाऽपि वाक्यार्थज्ञानहेतुत्वोपगमात् तत एव

कार्यपदसमभिव्याहारात् कार्यत्वज्ञानसम्भवेनान्यलभ्यत्वान्न कार्यांशेऽपि शक्तिः । परम्परयाऽपि शब्दस्य कार्यत्वज्ञानानुकूलत्वादर्थापत्तेः परिक्षयात् । किञ्च, कार्यत्ववाचिलिङादीनामाकाङ्क्षाद्युपेतपदार्थान्वितस्वार्थबोधकत्वस्यावश्यकत्वात् पदान्तराणामपि तथात्वमस्तु लाघवात् ।

मैवम् । पदानां कार्यान्वितज्ञाने साक्षात्त्वस्यौत्सर्गिकत्वेन तथैव हेतुत्वस्य न्याय्यत्वात् । अन्वितपदार्थज्ञाने च हेतुत्वे परम्पराया अन्याय्यत्वात् । अर्थापत्तेः साक्षादुपपादकविषयत्वेन साक्षादुपपादके कार्यान्वितज्ञाने पदानां शक्तिकल्पनात् । लिङादीनां शक्तेरकल्पनादन्यलभ्यत्वतर्कस्याप्यभावात् । आद्यव्युत्पत्तेर्विचार्यत्वात् । न च कार्यवाचिलिङादीनां व्यभिचारः । कार्यत्वविशिष्टज्ञानजनकत्वं हि सर्वपदानाम् । तच्च कार्यान्वितस्वार्थप्रतिपादकतया इतरान्वितस्वार्थकार्यप्रतिपादकतया वेति न कश्चिद्विशेषः ।

अथ सिद्धार्थेऽपि व्युत्पत्तिः सम्भवति । तथाहि । उपलब्धचैत्रपुत्रजन्मा बालस्तादृशेनैव वार्त्ताहारेण समं चैत्रसमीपं गतः 'चैत्र, पुत्रस्ते जातः,'—इति वार्त्ताहारवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं पश्यन् श्रोतुर्हर्षमनुमिनोति । हर्षाच्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति, उपस्थितत्वादुपपादकत्वादन्योपस्थितौ गौरवाच्च तत्र वाक्यस्य कारणतां कल्पयति लाघवात् ।

मैवम् । हर्षहेतूनां बहूनां सम्भवात् हर्षेणापि लिङ्गेन पुत्रजन्मज्ञानस्य बालेनानुमातुमशक्यत्वात् प्रियान्तरज्ञानस्य परिशेषयितुमशक्यत्वात् । अतएव विधिशेषीभूतार्थवादानां स्वर्गादिपदशक्तिग्राहकाणाञ्च प्रवृत्तिपरत्वेन परम्परया कार्यान्वयात् कार्यान्वितस्वार्थबोधकत्वमिति ।

तद्धेतोरिति । साध्यार्थानामिव सिद्धार्थानामपि वक्तृदोषनिबन्धनाप्रामाण्यनिरासादित्यर्थः । अन्यत्रेति । कार्ये तदन्विते च शब्दशक्तेरवधारणात् सिद्धार्थानामपि तत्रैव तात्पर्यमिति न मुख्येऽर्थे प्रामाण्यमित्यर्थः । स्वार्थेति । कार्ये तेषां तात्पर्यं किं प्रतिपाद्यमानसिद्धार्थान्वयपुरस्कारेण, किं वा स्वार्थमप्रतिपाद्येत्यर्थः ।

प्रथमे इति । अबाधितं पदसमन्वयलभ्यमर्थमादायैव तेषां कार्यपरत्वात् स्वार्थेऽपि प्रामाण्यमवर्जनीयमित्यर्थः ।

**स्वार्थापरित्यागे ज्योतिःशास्त्रवदन्यत्रापि तात्पर्ये को दोषः। अन्यथा स्वर्गनरकव्रात्यश्रोत्रियादिस्वरूपप्रतिपादकानामप्रामाण्ये बहु विप्लवेत। तत्राबाधनान्नथेति चेत्। तुल्यम्।**

**न तादृगर्थः क्वचित् दृष्ट इति चेत्। स्वर्गादयोऽपि तथा। तन्मिथ्यात्वे तदर्थिनामप्रवृत्तौ विधानानर्थक्यप्रसङ्ग इति चेत्। इहापि तदुपासनाविधानानर्थक्यप्रसङ्गः। तन्मिथ्यात्वे हि सालोक्यसायुज्यादिफलमिथ्यात्वे कः प्रेक्षावांस्तमुपासीतेति तुल्यमिति॥**

ज्योतिःशास्त्रवदिति। यथा ज्योतिःशास्त्रस्य वेदाङ्गस्य दर्शादिकालं स्वार्थमादायैव दर्शादियागविधौ तात्पर्यं, तथा सिद्धार्थवादानामपि स्वार्थं प्रतिपादयतामेव कार्ये प्रामाण्यमित्यर्थः। अन्यथेति। यदि स्वार्थमप्रतिपाद्यैवान्यपरत्वमिति द्वितीयः कल्प इत्यर्थः। तादृश इति। वेदान्तबोध्यानित्यज्ञानादिरूप इत्यर्थः। इहापीति। ईश्वराभावे ईश्वरमुपासीतेत्यादिविधेरानर्थक्यप्रसङ्ग इत्यर्थः। सालोक्यं, समानलोकता। सायुज्यं, सार्वज्ञ्याणिमादिकम्। आदिपदात् सारूप्यादि।

अत्रापीदमभिप्रेतम्। यद्यर्थापत्त्या साक्षादुपपादक एव पदानां शक्तिः, तदा घटानयनकार्यताज्ञान एव पदशक्तिप्रसङ्गः। घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनप्रवृत्त्या घटानयनकार्यताज्ञानस्यैवानुमानात्। न तु कार्यान्वितज्ञानस्य, प्रवृत्तिविशेषे तस्याहेतुत्वात्।

अथ घटानयनक्रियायां प्रथमं क्रियात्वज्ञानात्प्रवृत्तिमात्रानुमानं, तेन च कार्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य कारणतां गृहीत्वा शक्तिं कल्पयति, तदुत्तरं विशेषयोः कार्यकारणभावग्रह इति चेत्।

न। प्रथमं प्रवृत्तिमात्रकार्यान्वितज्ञानमात्रयोरनुमानं भवति क्रमेणेत्यत्र मानाभावात्। घटादिपदशक्तिग्रहस्य तेन विनाऽपि सम्भवात्। न च सामान्ययोः कार्यकारणभावग्रहो विशेषयोरन्यथान्वज्ञाने

हेतुरिति वाच्यम् । विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् । विशेषयोः कार्यकारणभावज्ञानात् सामान्ययोरपि तथात्वमनुमापयतीति चेत् । तर्हि विशेषयोः कार्यकारणभावज्ञानं प्राथमिकमिति तन्मूलकः पदविशेषग्रह एव स्यात् । निष्प्रयोजनत्वेनान्तराऽनुमितौ मानाभावात् ।

किञ्च, ममेदं कार्यमिति ज्ञानं साक्षादुपपादकं प्रवृत्त्या स्वकारणत्वेनानुमितम् । अतस्तत्र शक्तिं गृह्णीयात् । साक्षादुपपादकविषयत्वात् कल्पनायाः । न त्विदं कार्यमिति ज्ञानं, तस्य साक्षादुपपादकोपपादकत्वात् । अथेदं कार्यमिति ज्ञानशक्त्यैव परम्परयाऽनुमानद्वारा ममेदं कार्यमिति ज्ञानसम्भवादन्यलभ्यत्वे न तत्र शक्तिकल्पनमिति तुल्यम् ।

अपि च । अस्तु प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात् कारणताबोधात्तत्र शक्तिग्रहः, तथाप्यावापोद्वापाभ्यां पदविशेषस्येतरान्वितस्वार्थज्ञाने शक्तिं कल्पयति, लाघवात् । न तु कार्यत्वांशे, गौरवादन्यलभ्यत्वाच्च । अन्यथासिद्धिमपश्यतो हि बालस्य पूर्वं तत्सम्भवेऽपि पश्चाद्गौरवान्यलभ्यत्वतर्कसहकृतमानेन तद्बाधैवोचिता ।

न च प्रवृत्तिहेतुतयोपस्थितं कार्यान्वितज्ञानं हित्वा कल्पयित्वाऽन्वितज्ञानं तत्र शक्तिकल्पनमयुक्तमुभयथा गौरवादिति वाच्यम् । कार्यान्वितज्ञानेऽन्वितज्ञानस्यापि सत्त्वात् । तद्विशेषत्वात्तस्य । तथात्वेऽपि तदुपस्थितावन्वितज्ञानत्वं न विषय इति तदुपस्थित्यन्तरं कल्प्यमिति चेत् । न । कार्यान्वितज्ञाने अन्वितज्ञानं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् । विशिष्टज्ञानस्य विशेष्यविषयत्वनियमात् । अन्यथा अन्यज्जातिज्ञानमन्यच्च जातिविशिष्टव्यक्तिज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं क्वापि नोपस्थितमिति न तव जातिरेव पदार्थः स्यात् ।

यच्च हर्षहेतूनां बहूनां सम्भवादित्युक्तम् । तन्न । स्वतो गृहीतहर्षहेतुस्तनपानादेर्बाधावतारादन्यस्य हर्षहेतोरग्रहात् । अत उपस्थितत्वादुपपादकत्वाच्च पुत्रजन्मज्ञानमेव हर्षहेतुतया कल्पयति । न चान्यदपि प्रियं हर्षहेतुर्भविष्यतीति शङ्कया कथमेवमिति वाच्यम् । कार्यान्वितज्ञानेऽपि शक्तिग्रहानापत्तेः । प्रयोज्यज्ञानहेतूनां बहुत्वात् । अनन्यथासिद्धशब्दार्थविधानञ्च तुल्यमिति संक्षेपः ॥

वाक्यादपि। संसर्गभेदप्रतिपादकत्वं अत्र वाक्यत्वमभिप्रेतम्। तथाच यत्पदकदम्बकं यत्संसर्गभेदप्रतिपादकं, तत् तदनपेक्षसंसर्गज्ञानपूर्वकं, यथा लौकिकं, तथाच वैदिकामिति प्रयोगः। विपक्षे च बाधकमुक्तम्।

• सङ्ख्याविशेषादपि—

स्याममुवं भविष्यामीत्यादिसङ्ख्या च वक्तृगा।
समाख्याऽपि न शाखानामाद्यप्रवचनादृते ॥१७॥

कार्यतया हि प्राक् सङ्ख्योक्ता, सम्प्रति तु प्रतिपाद्यतयोच्यते। तथाह्युत्तमपुरुषाभिहिता सङ्ख्या वक्तारमन्वेतीति सुप्रसिद्धम्। अस्ति च तत्प्रयोगः प्रायशो वेदे। ततस्तदभिहितया तयाऽपि स एवानुगन्तव्यः। अन्यथाऽनन्वयप्रसङ्गात्।

अथवा। समाख्याविशेषः सङ्ख्याविशेष उच्यते। काठकं कालापकमित्यादयोहि समाख्याविशेषाः शाखाविशेषाणामनुस्मर्य्यन्ते। ते च न प्रवचनमात्रनिबन्धनाः प्रवक्तॄणामनन्तत्वात्। नापि प्रकृष्टवचननिमित्ताः। उपाध्यायेभ्योऽपि प्रकर्षे प्रत्युतान्यथाकरणदोषात्। तत्पाठानुकरणे च प्रकर्षाभावात्। कतिचनादौ संसारे प्रकृष्टाः प्रवक्तार इति को नियामकइति। नाप्याद्यस्य वक्तुः समाख्येति युक्तम्। भवद्भिस्तदनभ्युपगमात्। अभ्युपगमे वा स एवास्माकं वेदकारइति वृथा विप्रतिपत्तिः।

यत्पदकदम्बकामिति ॥ एतद्वेदवाक्यसमानकालोत्पत्तिकज्ञानाजन्यमिदं वेदवाक्यं समानविषयकज्ञानजन्यं वाक्यत्वात् लौकिकवाक्यवदित्यत्र तात्पर्यम्। विपक्षे चेति। पुरुषगुणाभावे तज्जन्यप्रा-

शोभनवर्णाचाराथितृत्वं प्रकर्षः, तत्राह कति चेति । न च ब्राह्मणत्व-व्याप्यं कठत्वादि क्षत्रिये सम्भवतीत्याह । न चेति । ननु क्षत्रिया-द्यधीयमानाऽपि शाखा कठादिपदवाच्येत्यत आह । न च कठा इति। प्रागेवमिति । पूर्वं कठैः स्वशाखैवाधीता, अधुना शाखान्तराध्यय-नरूपो विप्लव इत्यर्थः । विप्लव एवेति । कठत्वादिशाखाव्याप्यजाति-विप्लवः कठादिसमाख्या व्यवस्थाव्यतिरेकश्चेत्यर्थः । तस्मादिति । कठादिशरीरमधिष्ठाय सर्गादावीश्वरेण या शाखा कृता, सा तत्स-माख्येति परिशेष इत्यर्थः । अत्र अनित्यज्ञानवद्वक्तृकवाक्यावाचका-नि श्रौतकठपदादीनि किञ्चित्प्रवक्तृकवाक्यवाचकानि वाक्यवाच-कपदत्वात् मन्वादिसंहितापदवदिति मानमभिप्रेतम् ।

इयता प्रबन्धेन मननरूपां प्रतिज्ञातामुपासनां निर्वाह्य न ताव-न्मात्रान्मोक्षोऽनुमितिरूपविशेषदर्शनस्य प्रत्यक्षभ्रमानुच्छेदकत्वात्, अपि तु प्रत्यक्षरूपं तत्तद्धेतुरिति दर्शयितुमाह—

**स्यादेतत् । ब्राह्मणत्वे सत्यवान्तरजातिभेदा एव कठत्वादयः । तदध्येया तदनुष्ठेयार्था च शाखा तत्स-माख्यया व्यपदिश्यते इति किमनुपपन्नम् । न । क्ष-त्रियादेरपि तत्रैवाधिकारात् । न च यो ब्राह्मणस्य विशेषः, स क्षत्रियादौ सम्भवति । न च क्षत्रिया-देरन्यो वेद इत्यस्ति । न च कठाः काठकमेवाधीयते तदर्थमेवानुतिष्ठन्तीति नियमः । शाखासञ्चारस्यापि प्रायशो दर्शनात् । प्रागेवायं नियम आसीदिदानीमयं विप्लवते इति चेत् । विप्लव एव तर्हि सर्वदा, कठा-द्यवान्तरजातिविप्लवादित्यगतिरेवेयम् । तस्मादाद्य-प्रवक्तृवचननिमित्त एवायं समाख्याविशेषसम्बन्ध-इत्येव साधिवति ॥**

**स एवं भगवान् श्रुतोऽनुमितश्च, कैश्चित् साक्षा-दपि दृश्यते प्रमेयत्वादेर्घटवत् ॥ ननु तत्सामग्रीरहि-**

तः कथं द्रष्टव्यः । सा हि बहिरिन्द्रियगर्भा मनोगर्भा वा तत्र न सम्भवति । चक्षुरादेर्नियतविषयत्वात् । मनसो बहिरस्वातन्त्र्यात् । तदुक्तं, हेत्वभावे फलाभावादित्यादि ॥

न । कार्यैकव्यङ्ग्यायाः सामग्र्या निषेद्धुमशक्यत्वात् ।

स एवमिति ॥ अत्र प्रत्यक्षसामग्रीमुपाधिमाह । नन्विति । सामग्र्या अतीन्द्रियतया योग्यानुपलम्भेन निषेधोऽपास्तः । न च तस्याः कार्यव्यङ्ग्यतया तदभावादेवाभाव इति वाच्यम् । कार्यस्यापि पुरुषान्तरप्रत्यक्षज्ञानत्वेन योग्यव्यतिरेकत्वात् । साधनव्यापकतया स नोपाधिरित्याह । कार्यैकेति । अथ प्रत्यक्षहेतुयावद्विशेषाभावादयोग्याया अपि सामग्र्या अभाव उन्नेयः । तत्र । यथा स्वप्नज्ञाने सहकारिविशेषान्मनसो बहिः स्वातन्त्र्यं, तथा प्रकृतेऽपि योगजधर्मात्तस्य तथात्वमित्याह ।

अपि च । दृश्यते तावद्बहिरिन्द्रियोपरमेऽपि असन्निहितदेशकालार्थसाक्षात्कारः स्वप्ने । न च स्मृतिरेवासौ परोक्षसी । स्मरामि स्मृतं वेति स्वप्नानुसन्धानाभावात् । पश्यामि दृष्टमित्यनुव्यवसायात् । न चारोपितं तत्रानुभवत्वम् । अबाधनात् । अननुभूतस्यापि स्वशिरश्छेदनादेरवभासनाच्च ।

स्मृतिविपर्यासोऽसाविति चेत् । यदि स्मृतिविषये विपर्यास इत्यर्थः, तदाऽनुमन्यामहे । अथ स्मृतावेवानुभवत्वविपर्यासः,—इति, तदा प्रागेव निरस्तः । न च सम्भवत्यपि । न ह्यन्येनाकारेणाध्यवसितोऽन्येन ज्ञानावच्छेदकतयाऽध्यवसीयते । तथा च स घट इत्युत्पन्नायां स्मृतौ भ्राम्यतस्तं घटमनुभवामीति स्यात्, न त्विमं घटमिति । न ह्ययं घट इति स्मृतेराकारः ।

तस्मादनुभव एवासौ स्वीकर्त्तव्यः ।

अस्ति च स्वप्नानुभवस्यापि कस्य चित् सत्यत्वं, संवादात् । नच काकतालीयमपि न निर्निमित्तम् । सर्वस्वप्नज्ञानानामपि तथात्वप्रसङ्गात् । हेतुश्चात्र धर्म एव । स च कर्म्मजवत् योगजोऽपि योगविधेरवसेयः । कर्मयोगविध्योस्तुल्ययोगक्षेमत्वात् ।

तस्मात् योगिनामनुभवो धर्मजत्वात् प्रमा, साक्षात्कारित्वात् प्रत्यक्षफलं, धर्मा[illegible]भावनामात्रप्रभवस्तु न प्रमे[illegible] [illegible] सर्वाविरुद्धोऽसि[illegible]: ।

तथापि विपक्षे किं बाधकमिति चेत् । "[illegible] ब्रह्मणी वेदितव्ये" इत्यादियोगविधिवैयर्थ्यप्रसङ्गः अशक्यानुष्ठानोपायोपदेशकत्वात् । न चासाक्षात्कारिज्ञानविधानमेतत् । अर्थज्ञानावधिनाऽध्ययनविधिनैव तस्य गतार्थत्वात् इति । एतेन परमाणवादयो व्याख्याता इति ॥

अपि चेति । परीयस्त्वम्, असन्दिग्धविपयत्वम् । स्मृतिविपर्यासः, विपर्यस्ता स्मृतिः । प्रागेवेति । अनुभवत्वस्यावापनादित्यर्थः । न च स्मरभवत्यपि इत्यत्र स्मृतावनुभवत्वविपर्यासि इत्यनुपञ्जनीयम् । यदि स घट इति स्मृतावनुभवत्वारोपः, तदा तं घटमनुभवामीति स्यात्, न तु इमं घटमनुभवामीत्याह । न हीति । ननु प्रमायामेव मनसोबहिरस्वातन्त्र्यं स्वप्नज्ञानं त्वप्रमा इत्यत आह । अस्ति चेति । तथापि साक्षात्कारो भ्रमो वासनाप्रभवत्वात् कामातुरकामिनीसाक्षात्कारवदित्याशङ्क्य तत्प्रमात्वमुपपादयति । स चेति । अर्थज्ञानावधिनेति । स्वाध्यायोऽध्येतव्य इति विधेः परिशेषादर्थज्ञानफलसिद्धावर्थज्ञानावधित्वं सिद्धमिति भावः ॥ एतेनेति ॥ परमाणवादयोऽपि प्रमेयत्वात् प्रत्यक्षा इत्यर्थः ॥

तदेनमेवम्भूतमधिकृत्य श्रूयते। "न द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति। "एकमेवाद्वितीय"मिति। "पश्यत्यचक्षुः स शृणोत्यकर्ण" इति। "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चे"ति। "यज्ञेन यज्ञमयजन्त देवा" इति। "यज्ञा वै देवा इति। "यज्ञोवै विष्णु"रित्यादि। स्मर्यते च,—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज,—इति।
मदर्थं कर्म कौन्तेय, मुक्तसङ्गः समाचर,—इति।
यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः,—इति।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते,—इत्यादि।

अनुशिष्यते च साङ्ख्यप्रवचने ईश्वरप्रणिधानम्। तामिमं ज्योतिष्टोमादिभिरिष्टैः प्रासादादिना पूर्त्तेन शीतातपसहनादिना तपसा अहिंसादिभिर्यमैः शौचसन्तोषादिभिर्नियमैः आसनप्राणायामादिना योगेन महर्षयोऽपि विविदिषन्ति। तस्मिन् ज्ञाते सर्वमिदं ज्ञातं भवतीत्येवं विज्ञाय श्रन्वैकतानस्तत्परो भवेत्। यत्रेदं गीयते,—

मन्मनाभव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति; इति।

एकमेवेति। ईश्वराख्यं ब्रह्म एकमेव न द्वितीयमित्यर्थः। मदर्थमित्यनेन ईश्वराराधनार्थतां कर्मणो दर्शयता न ज्ञानकर्मणोस्तुल्यकक्षतया समुच्चय इत्यभिप्रेतम्। अनुशिष्यते, उपदिश्यते इत्यर्थः। ईश्वरोऽवश्यं ज्ञेयो महर्षीणामपि तज्ज्ञाने यत्नवत्त्वादित्याह। तामिम-

मिति । ईश्वरवेदनस्य फलमाह । तस्मिन्निति । मयि परमेश्वरे मनः संयुज्येत्यर्थः । योगजेश्वरसाक्षात्कारस्य फलमाह । शान्तिमृच्छतीति । मोक्षं प्राप्नोतीत्यर्थः ।

यस्त्वेवं निर्दोषन्यायावगमितं कुतर्काभ्यासान्न प्रत्येति, तं प्रत्याह ।

**इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते**
**येषां नास्पदमादधासि हृदये ते शैलसाराशयाः ।**
**किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः**
**काले कारुणिक, त्वयैव कृपया ते भावनीया नराः॥१८॥**

इत्येवमिति । इतिशब्दः स्वरूपार्थः । एवंशब्दश्च प्रकारार्थः । नीतिर्न्यायः । शैलसारः पाषाणं, लोहं वा । तद्वदाशयो येषां, ते तथा। युक्तिप्रतिसन्धानानाश्रयहृदया इत्यर्थः । प्रस्तुते ईश्वरे, विप्रतीपविधयः प्रतिकूलप्रकाराः । तादृशा अप्युच्चैरत्यर्थं काले कदाचित् भवच्चिन्तका इति योजना । भावनीया वासनीयाः शङ्काकलङ्कशून्याः कर्त्तव्या इत्यर्थः ।

अस्माकं त्वश्रद्धा नास्तीत्याह ।

**अस्माकन्तु निसर्गसुन्दर, चिराच्चेतो निमग्नं त्वयी**
**त्यद्धाऽऽनन्दनिधे, तथापि तरलं नाद्यापि सन्तृप्यते ।**
**तन्नाथ, त्वरितं विधेहि करुणां येन त्वदेकाग्रतां**
**याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः॥१९॥**

अस्माकं त्विति । यद्यपि त्वयि चेतोनिमग्नमित्यद्धा तत्त्वम्, तथापि तरलं मनो नाद्यापि सन्तृप्यते तृप्तं भवति । तृपेः क्वचित् सकर्मकत्वात् कर्मकर्त्तरि रूपम् । त्वदेकाग्रतां त्वत्प्रवणताम् । याम्या यमदेवताकाः । यातना नरकपीडाः ।

**इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री-**
**र्यद्वासयेदपि च दक्षिणवामकौ द्वौ ।**

**नो वा ततः किममरेशगुरोर्गुरुस्तु**
**प्रीतोऽस्त्वनेन पदपीठसमर्पितेन ॥ २० ॥**

**॥ ० ॥ इति न्यायाचार्यपदाङ्कितमहामहोपाध्याय-**
**श्रीमदुदयनविरचितं न्यायकुसुमाञ्जलिप्रकरणं**
**समाप्तम् ॥ ० ॥**

**ॐ तत्सत् । ब्रह्मार्पणं भवतु । शुभमस्तु । श्रीरस्तु ॥**

इत्येष इति । इतिः समाप्तौ । एष नीतिकुसुमाञ्जलिर्दक्षिणवामकौ द्वौ यदि वासयेत् सानन्दौ कुर्यात्, न वा वासयेत्, ततः किमस्माकम् । यद्वा । यद्वासयेदित्यत्र प्रोक्तएव यदि ब्रूयात् माऽस्मान् वासयतीति, तं प्रत्याह । न वा इति । वासयेदित्यनेन सम्बन्धः । ततः किं, तद्वासनायाः फलं न किञ्चिदित्यर्थः । पदमेव पीठं, तत्र न्यायकुसुमाञ्जलेर्यत् समर्पणं, तेन भगवान् प्रीतोऽस्तु ।

यस्तर्कतन्त्रशतपत्रसहस्ररश्मि-
र्गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्यात्मजोऽतिविषमं कुसुमाञ्जलिं तं
प्राकाशयत्कृतिमुदे बुधवर्द्धमानः ॥ ० ॥

इति महामहोपाध्यायश्रीवर्द्धमानविरचितो न्यायकुसुमाञ्जलिप्रकाशः समाप्तः ॥ ० ॥

श्रीगणेशायनमः ।

## अथ मकरन्दे चतुर्थस्तवकः ॥ ४ ॥

ननु पराधिगतेऽप्यर्थे परस्य प्रमोत्पत्तेरनधिगतार्थगन्तृत्वं तत्राव्याप्तमत आह फलेति । उत्तरकालीनस्वज्ञानमादायाव्याप्तेराह कालिकान्तम् । एतावता किमित्यत आह वेद इति । यद्यप्येवं भट्टस्य स्वतोऽसिद्धिः, तथाप्येवमप्रमाऽनुभवमूलको वेदः स्यात् तथाच्चाप्रमाणं स्यादिति तर्कविधयैतद्द्रष्टव्यम् । २ १३.

प्रमाणेति प्रमालक्षणमित्यर्थः ॥

नन्वेवमनुभवोऽपि प्रमा न स्यात्, तस्यापि विशेषणज्ञानादिसापेक्षत्वादित्यत आह स्वकारणीभूतेति । एतच्च धारावाहिके तादृशपूर्वज्ञानयाथार्थ्यापेक्षयाथार्थ्यतया उत्तरकालेऽतिव्याप्तिवारणायान्यूनानतिरिक्तविषयकत्वेन कारणत्वं विवक्षितम् । तस्य च विशेषणमात्रविषयतया नथात्वमिति नोक्तदोषः । न च तत्सापेक्षमेव याथार्थ्यं तस्येति वाच्यम् । तत्सापेक्षत्वं हि तन्नियतत्वम् । तच्च तत्रापि । स्मृतावपि तदेव तत् । लिङ्गज्ञानयाथार्थ्यापेक्षित्वमादायातिव्याप्तिवारणायान्यूनेति । वस्तुतः पूर्वोक्तातिव्याप्तिवारणार्थमपि तत् । अनतिरिक्तपदं चिन्त्यम् । अतएव परिमले नास्तीति । किञ्च स्मृतावपि पूर्वानुभवस्यान्यूनविषतयैव जनकत्वम् । अतिरिक्तविषयानुभवादपि तदंशे संस्कारानुद्बोधे स्मृतिदर्शनात् । एवञ्च वक्तृवाक्यार्थज्ञानयाथार्थ्यापेक्षित्वमादाय शाब्दानुभवेऽतिव्याप्तिरित्यपि चिन्त्यम् ।

अन्यथेति । यद्यपि विशेषणज्ञानत्वेनैव हेतुत्वात् तथापि क्रमासम्भवः, तथापि फलबलेन तत्तद्विशेषणज्ञानत्वेन विशेषसामग्रीत्वमिति क्रमइति भावः । न च स्वरूपसत्क्रमिकक्षणोत्पत्तिकत्वेन क्रमः, सामग्रीतौल्ये तदेव नेत्याशयात् ॥ २. २७.

तृतीयक्षण इति । सन्निकर्षापेक्षया । एवञ्च विनश्यदवस्थप्रथमज्ञानाधारत्वेनार्थान्तरप्रसङ्गनिरासाय मध्ये उत्पत्तीति । व्यासङ्गनिरासाय मध्ये उत्पत्तीति । व्यासङ्गाधारक्षणे व्यभिचारवारणाय ३. ७.

अव्यासक्तेति। यद्यपि तदा ज्ञानमुत्पद्यत एव, तथापि तदिन्द्रियार्थसन्निकर्षजज्ञानाभावाद् व्यभिचारः।

यद्यप्येवं व्यासङ्गाभावस्यापि हेतुत्वाद् यावन्सहकारीत्यादिविशेषणाभावादेव न व्यभिचार इति तद्वैयर्थ्यम्। अन्यथा तदा ज्ञानोत्पत्त्यवश्यम्भावापत्तेः। तथापि तदतिरिक्तयावत्सहकारिविवक्षापक्षे तद् द्रष्टव्यम्। प्रतिबन्धकाभावकारणतावच्छेदकत्ववादिमतेनेदमित्यन्ये। आलोकादिकिञ्चित्सहकारिविरहदशायां व्यभिचारादाह यावदिति। साकल्यसमवधाने इत्यर्थः। सन्निकर्षोत्पत्त्याधारक्षणे व्यभिचारादाह अनाद्येति क्षणविशेषणम्। इन्द्रियपदं तदिन्द्रियपरम्। अतोनेन्द्रियान्तरसन्निकर्षमादाय व्यभिचारः। ज्ञानोत्पत्त्यनाधारेन्द्रियेऽव्यभिचारादाह क्षणेति।

४. २. अभावत्वे चेति। अभावात्मनः घटाभावाभावस्य वैशिष्ट्यसम्बन्धे न सत्त्वं स्यात्, वैशिष्ट्यस्यैकत्वाभ्युपगमादित्यर्थः। अधिकं प्रत्यक्षप्रकाशे।

५. १०. तथापीति। यद्यपि जनकागोचरत्वमत्रापि तुल्यं, तथाप्यनुपदमेवाशङ्क्य परिहरिष्यतीति ध्येयम्।

६. १९. तदाऽन्यूनानतिरिक्तेति। एतच्च प्रागेव विवृतप्रायम्। नन्वापादकस्य प्रामाण्यस्य वैकल्यादिच्छादिकं नान्वयदृष्टान्तः। व्यतिरेकदृष्टान्तोऽपि न स्यात्। तादृशानुभवव्याप्तप्रामाण्यवत्त्वस्यापाद्यव्यतिरेकस्य व्याप्यत्वाभिमतवैकल्यादिति चेत्। मैवम्। आपाद्ये प्रामाण्यपदद्वयस्य यथार्थत्वमात्रपरत्वात्, आपादके च यथार्थानुभवपरत्वात्। एवञ्चेच्छादेरापाद्यव्यतिरेकस्य व्याप्यस्यापाद्यव्यतिरेकस्य व्यापकस्य च सत्त्वाद्व्यतिरेकदृष्टान्तत्वमिति।

७. ११. विशेष्यस्येति। अतीतादिविशेष्यकस्यानुभवस्येत्यर्थः।

अतीतानुभवविशिष्ट इति। यद्यप्येवं पौर्वापर्य्यमात्रं सिध्यति, न तु कार्य्यकारणभावः। अन्यथा योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यादावपि तथा स्यात्। तथाप्यननुभूते स्मरणाभावादन्वयव्यतिरेकादिसहकृतमनसा तद्ग्रह इति भावः।

९. १६. तद्विषयेति। न चोत्तरकालत्वं व्यवहितकालत्वं विवक्षितमिति वाच्यम्। मासाद्यनन्तरं तद्विषयज्ञानस्याप्यप्रमात्वव्यवहारादिति भावः। यद्यपि शुद्धिमात्रस्येत्यादिना निरासोऽयं शङ्का, तथापि मूले

तदनिरासात्तत्र तदविरोध इति भावः ।

नन्विति । ननु कार्य्यत्वानैकान्तिकोद्भावनस्य नायमवसरः । न च ज्ञाततामादायागृहीतग्राहित्वमुपपादयितुं तत्साधनमेवेदमिति वाच्यम् । पूर्वनिरस्तत्वात् । न च तदभिज्ञानमित्यादिना तदुत्पत्त्यसम्भवोपन्यासस्य विरुद्धत्वापाताच्च । इति चेत् । मैवम् । यथार्थानुभवत्वादिकं प्रामाण्यं ज्ञानस्य स्वविषये स्यात्, विषयता च नियामकं विनाऽनुपपन्ना, ज्ञाततायास्तथात्वे कार्य्यत्वानैकान्तिकत्वापत्त्या तदुपादानज्ञानजन्यत्वमवश्यं वाच्यम् । तच्च तदुत्पत्तेः प्राक् तद्विषयत्वाभावादसम्भवीति न प्रामाण्यव्यवस्थितिरिति तटस्थशङ्कापरत्वेनास्य सङ्गतत्वात् ।

ननु चैत्रो गच्छतीत्यत्र परसमवेतगमनक्रियायाः फलमुत्तरदेशसंयोगवत् पूर्वदेशविभागोऽपीति पूर्वदेशेऽतिव्याप्तिरित्यत उक्तं, धात्वर्थतावच्छेदकेति फलविशेषणम् । उत्तरसंयोगावच्छिन्नस्पन्दस्य धात्वर्थत्वाद्विभागो न तथेत्याहुः । घटं जानाति चैत्र इत्यत्र ज्ञानक्रियाफलमिच्छादि, तच्छालितयाऽऽत्मन्यतिव्याप्तिरित्यत उक्तं परेति । न चाभावो घटमाश्रयते इत्यादावव्याप्तिः, आश्रयणक्रियाया अभावे समवेतत्वाभावादिति वाच्यम् । परसमवेतपदस्य सम्बन्धपरत्वात् ।

अतिरिक्तेति । ज्ञाततायामित्यर्थः । १२. २२.

तस्येति । नचैवं प्रत्यक्षमपि कथं स्यादिति वाच्यम् । पूर्ववर्त्तितामात्रेणैव तस्य तद्धेतुत्वात् । समवायिकारणमात्रस्यैव कार्यसमानकालत्वनियमादिति भावः ।

अप्रयोजकत्वादित्युपलक्षणम् । पक्षधर्मावच्छिन्नसाध्यव्यापकमपेक्षाबुद्धित्वमुपाधिरित्यपि द्रष्टव्यम् ।

अन्यथेति । यदि सम्बन्धं विना विशिष्टधीः, तदेत्यर्थः । १३. २४.

अस्तु वा स्मरणं, तथापि तदन्यथाऽनुपपत्त्या नानुभवसिद्धिः, तत्कारणेनान्यथासिद्धेरित्याह अत्रापीति ।

परेषामिति । तथाच तन्मते ज्ञानहेतुना तदन्यथासिद्धिः स्यादेवेति भावः । १६. १६.

तथापीति । अत्र व्यतिरेकपदं प्रागभावपरम् । अन्यथा ज्ञाननाशेऽपीच्छासत्त्वान्नियमभङ्गापत्तेः । १६. १८.

१८. २६. वर्त्तमानतेति । प्रथमक्षणावच्छिन्नता भासते इत्यर्थः ।
तत्क्षणेति । प्रथमक्षणनाशोऽपीत्यर्थः । तथाविधं, प्रथमक्षणावच्छिन्नमित्यर्थः । पाकरक्ते श्यामोऽयमितिवदिति भावः ।

१९. ३. स्वप्रकाशत्वासिद्धाविति। सिद्धौ वा तत्रैवानैकान्तिकमिति भावः।

१९. १२. अन्यविषयकेति । न च रजतज्ञानस्यापि शुक्तिविषयत्वान्नान्यविषयकत्वमिति वाच्यम् । परमतेऽन्यथाख्यात्यनभ्युपगमेनातथात्वात् । तथाच शुक्त्यविषयकरजतस्मरणस्य शुक्तिनिष्ठज्ञाततजनकतया यथा भ्रान्तत्वं, तथा प्रकृतेऽपि स्यादिति भावः । न च ज्ञानस्य स्वविषयज्ञाततताजननेऽतिप्रसङ्ग इति वाच्यम् । भेदाग्रहादेर्नियामकत्वादन्यथा व्यवहारजननेऽपि तदापत्तेरित्याशयः ।

१९. १६. सा च ज्ञानस्येति । यद्यपि ज्ञानस्यातीतक्षणोपलक्षितविषयता न पूर्वपक्षिता, किन्तु ज्ञाततताया अतीतज्ञानोपलक्षितायाः क्षणान्तरेऽनुवृत्तिः, तत्र च ज्ञानस्य वर्त्तमानार्थता न स्यादित्युत्तरमसङ्गतम् , तथापि ज्ञानस्य ज्ञाततागोचरस्यातीतक्षणोपलक्षितज्ञाततताविषयतायां वर्त्तमानार्थता न स्यादित्यर्थो बोध्यः । न चातीतक्षणस्योपलक्षणत्वमेव ज्ञाततायाश्च वर्त्तमानत्वमेवेति कथं वर्त्तमानार्थता, तज्ज्ञानस्य स्यादिति वाच्यम् । निराश्रयज्ञाततताया ज्ञानागोचरत्वे ज्ञाततायामुपलक्षणस्यापि क्षणस्य ज्ञाने विशेषणत्वाभ्युपगमात् । वस्तुतो वर्त्तमानार्थता वर्त्तमानाश्रयता प्रकाशस्य ज्ञाततया न स्यादिति मूलार्थः प्रतिभाति । अतएवान्यथा ज्ञानस्यापीति फक्किका सङ्गच्छते । न हीत्यादिफक्किकायामपि प्रकाशपदं ज्ञाततापरमेवान्यथा तद्वैयर्थ्यापत्तेः । प्रकाशेनाश्रीयत इत्यग्रिमफक्किकायामपि तथैवेति तदनुसारेण सर्वं योज्यमिति युक्तमुत्पश्यामः ।

१९. २२. तज्जनकेति । तद्विषयज्ञानस्येत्यर्थः । तेन नोत्तरविरोधः । ननूक्तं वर्त्तमानज्ञाततासम्बन्धमात्रेणैव वर्त्तमानाभत्वमित्यत आह ज्ञाततायाश्चेति । यदि च स्थूलकालाश्रयत्वान्न तस्याः क्षणिकत्वं, तदा ज्ञानस्यापि न स्यादित्याकरएव स्फुटम् . तथात्वे चेति यदि स्ववर्त्तमानतया वर्त्तमानाभत्वमित्यर्थः । एवञ्चेति वर्त्तमानज्ञाततासम्बन्धस्यापि तदानीमभावादिति भावः।

२२. ४. उद्भवत्वाभावादिति। प्राचीनमते।

,, १९. निर्विकल्पकेति । तज्जन्याग्रिमविशिष्टज्ञानस्यैव तत्र मानत्वान्न पूर्वदोष इति भावः । ननु सामग्रीबलात्प्रत्यक्षं सम्भवत्येवेत्यत आह अ-

नुमिनोमीति ॥ क्वचित् प्रत्यक्षस्य सम्भवेऽपि तत्रानुमितित्वस्य बाधादनुमित्यन्तरस्य सिद्धसाधनेनानुत्पादात्तत्रासम्भवएवेत्यर्थः । व्यवसायनाशक्षणे तद्विशेष्यकं न ज्ञानं, किन्त्वर्थविशेष्यकमेव । तथाच विशेष्यस्य स्वसमयवर्त्तितया प्रत्यक्षहेतुत्वेऽपि न दोष इत्याशयेनाह यद्वेति ॥ विशेष्यांशे इति । तथाच सविकल्पकतया तस्ययोग्यत्वात्तत्रैव ज्ञानत्वविशिष्टधीस्तदात्मकस्यैव ज्ञानत्वरूपविशेषणज्ञानस्य पूर्वं सत्त्वादिति भावः । अतएवाह अनुमिनोमीत्यादाविति ।

योगजधर्म्माजन्येति । अत्र सामान्यलक्षणप्रत्यासत्त्यजन्येत्यपि- २४. ४. विशेषणं बोध्यम् । न च विनिगमकेति । इन्द्रियजन्यतया प्रत्यक्षत्वं २६. १७. संस्कारजन्यतया स्मृतित्वं वेत्यत्र विनिगमकाभाव इत्यर्थः । आशुविनाशीति धर्म्मादौ व्यभिचारवारणार्थमिदम् । अन्त्यशब्दस्याप्रत्यक्षत्वपक्षे तत्र व्यभिचारादाह आत्मेति । आत्ममनोभिन्नत्वे व्यभिचारादाह विशेषेति । न च निर्विकल्पकजीवनयोनियत्नयो र्व्यभिचारः, मानसप्रत्यक्षजातीयत्वस्य साध्यत्वात् । वस्तुतस्तु तदन्यत्वेन विशेषणात्र व्यभिचार इति ।

निर्व्यापारत्वेनेति । प्रमाऽनुकूलव्यापारशून्यतया तदकारकतया इत्यर्थः । यद्यपि कूटलिङ्गादिस्थलेऽनुमितिप्रमाकरणत्वं तस्येष्यतएव, तथापि स्वप्रमां प्रति न तथात्वमिति भावः ।

न च क्रियात्वेति । क्रियासम्बन्धं विना कारकत्वाभावात्तद्विशेष- २७. ९. प्रमातृत्वाद्यसम्भव इत्यर्थः । स्वप्रमामिति । स्वसमानाधिकरणप्रमामित्यर्थः । यदीश्वरस्येति । यद्यपि पूर्वं तज्ज्ञानस्य न प्रामाण्यमित्युक्तं न तु तस्य, तथापि तुल्यन्यायतया तदप्युक्तप्रायमेवेति भावः ।

तदनुकूलेति तदुपादानगोचरतदनुकूलज्ञानेच्छाकृतिमत्त्वलक्षणमित्यर्थः । अस्मदादीनामिति जन्यात्मविशेषगुणमात्रस्यैवेश्वरकर्तृकत्वेनाभ्युपगमादिति भावः ।

साक्षात्कारवति शिवे । प्रत्यक्षज्ञानवति स्वस्मिन् इत्यर्थः । २९. १६.

इति महामहोपाध्यायदेवदत्तात्मज-श्रीरुचिदत्तोपाध्याय-विरचिते कुसुमाञ्जलिमकरन्दे चतुर्थः स्तवकः ।

श्रीगणेशायनमः ।

## अथ मकरन्दे पञ्चमः स्तबकः ॥ ५ ॥

सन्देहविषयत्वं वा पक्षइति। पाठे पक्षपदं पक्षतावच्छेदकपरम्। २. १४.
अपक्षत्वेनेति प्रतिज्ञाविषयस्यैव पक्षत्वमित्यभिमानः । ननु प्रथम-
मङ्कुरे तदनुमाय क्षितौ तदनुमेयमित्यतआह अनुमानान्तरस्येति ।
रागवनइति चिकीर्षावतइत्यर्थः ।

ननु ज्ञानेच्छाकृतिसमानकालीनसर्गान्तरीयादृष्टजनकसामग्र्यै-
वादृष्टद्वारा द्व्यणुकजनकतयाऽर्थान्तरमतआह अदृष्टसामग्रीजन्यत्वे
चेति । न चादृष्टमाधिकं कारणमिति न तदापत्तिरिति वाच्यम् । त-
थात्वे क्षित्यादेरदृष्टविशेषत्वापत्तेः । यथा शिंशपावृक्षविशेषइत्याश-
यात् । लाघवाददृष्टसामग्रीजन्यत्वस्यैवादृष्टत्वप्रयोजकत्वाच्च । तथा
चादृष्टसामग्री अदृष्टप्रागभावादिघटिता नान्यत्र जनिकेति भावः ।

सम्प्रदायमते उक्तसन्दिग्धानैकान्तिकभियाऽनुगतं पक्षतावच्छे-
दकमाह अदृष्टाद्वारकेति । तत्रोपादानपदं स्वोपादानपरम् । तथा च ७. ३३.
स्वोपादानगोचरजन्यकृतिजन्या घटादयः प्रसिद्धाः, तदन्यत्वं पक्ष-
तावच्छेदकम् । एतेन उपादानपदं यदि यत्किञ्चिदुपादानपरं तदा
अदृष्टद्वारकरूपाद्युपादानमृदङ्गादिगोचरास्मदादिकृतिजन्यानां श-
ब्दादीनां पक्षता न स्यात्, क्षित्याद्युपादानपरत्वेऽप्रसिद्धिरित्यपा-
स्तम् । नन्वेवमदृष्टाद्वारकेति व्यर्थं अदृष्टद्वारककृतिमादाय प्रकृते दो-
षास्पर्शनादिति चेत् । अत्राहुः । कालीशरीरे यद्गौरं रूपमुत्पन्नं, तत्
कालीशरीरगोचरतपश्चरणादिकृत्या जन्यते । सा च कृतिरदृष्टद्वारि-
कातद्रूपोपादानकालीशरीरगोचरा चेति तद्रूपेऽव्याप्तिवारणाय तद्वि-
शेषणमिति । केचित्तु ऐहिकपुष्टशरीरकामनया कामनातीर्थस्नाना-
नन्तरं चिरादृष्यदिहैव पुष्टं शरीरमुत्पद्यते, तच्च शरीरान्तरवदस्मदा-
दिकर्तृकम् । तथा च प्रयागस्नानानुकूल—शरीरावयवगोचरकृत्या-
ऽदृष्टद्वारा जनिते पुष्टशरीरेऽव्याप्तिवारणाय तदित्याहुः । साध्येऽप्यु-
पादानगोचरत्वेन जनकता विवक्षिता । तेन मृदङ्गगोचरकृतिजन्य-
त्वमादाय न शब्दाद्यंशे सिद्धसाधनम् । एवञ्च कालीरूपाद्यंशे सि-

ऽसाधनवारणाय तत्राहष्टेत्यादिविशेषणमित्यवधेयम्। शेषं प्रपञ्चितमनुमानप्रकाशेऽनुसन्धेयम्।

पक्षसमे सन्दिग्धानैकान्तिकं न दोषइत्यनुपदवक्ष्यमाणावष्टम्भा-
३३. ११. दभ्युपगमवादेनाह यदि चेति। तमादाय समूहालम्बनानुमिताविव्यर्थः।

अनुमित्योरिति एतच्च पराभ्युपगमरीत्योक्तं, पक्षभेदमाश्रित्य भेदारोपाद्वा। वस्तुत एकैव समूहालम्बनाऽनुमितिरिति ध्येयम्।

ननूपादानप्रत्यक्षं विनाऽपि शब्दार्थप्रवृत्तेर्व्यभिचारइत्यत आह
३४. ८. प्रवृत्तिविषयेति। न ह्युपादानप्रत्यक्षत्वेन हेतुत्वं ब्रूमः, किन्तु प्रवृत्तिविधेयप्रत्यक्षत्वेनेति न व्यभिचारइत्यर्थः।

यः स्पन्दइत्याद्यनुमानप्रकाशे द्रष्टव्यम्।

११. २५. असमवायीति असमवायिपदं प्रकृताभिप्रायेण स्वरूपनिर्वचनम्। यद्यप्यङ्गुलीतरुसंयोगासमवायिकारणके शरीरतरुसंयोगेऽङ्गुली न कारणमिति व्यभिचारः, तथापि क्रियायामेवेत्याशयइत्यन्ये। तत्राप्यङ्गुली कारणमित्येके।

सन्दिग्धव्यतिरेकित्वमप्रयोजकत्वम्।

ननु कर्तृव्यापकराहितत्वादित्यत्र कुतोविशेषणासामर्थ्यमित्यत
३८. १०. आह सामान्यतइति। असमर्थविशेषणतयेति असिद्धमित्यनुषज्यते।

शरीरजन्यत्वाश्रयमात्रप्रतियोगिकयावदन्योन्याभावहेतुत्वे वैयर्थ्येऽपि शरीरजन्यत्वात्यन्ताभावेऽखण्डे न वैयर्थ्यं, शरीरं विना तस्याज्ञानेन तत्र व्याप्तेरग्रहादित्याह यद्वेति। येन विशेषणेन विनेति यद्यप्येवमपि नीलधूमादौ व्यभिचाराभावविशिष्टसहचारादिरूपव्याप्तेः सत्त्वात् कथं व्याप्यत्वासिद्धिः,तथाप्यनुमानप्रकाशोक्तमनुसन्धेयम्। यन्निष्ठेति यद्विशेष्यतावच्छेदकविशिष्टनिष्ठेत्यर्थः। अभावनिष्ठव्याप्तौ अभावत्वरूपविशेष्यतावच्छेदकविशिष्टनिष्ठव्याप्तावित्यर्थः। न शरीरेति अभावत्वावच्छिन्ने जन्यत्वाभावे शरीरं विनैवाकर्तृकत्वनिरूपितव्याप्तिग्रहान्न तद्विशिष्टे व्याप्तिरित्यर्थः। नन्वेवं जन्यत्वाभावोऽपि तद्व्याप्यो न स्यात् सकारणकत्वाभावादौ जन्यत्वविशेषणं
३९. २५. विनाऽपि अभावत्वावच्छिन्ननिष्ठव्याप्तेर्ग्रहादित्यनुशयादाह।अस्मत्पितृचरणास्त्विति। सामान्यलक्षणाऽनङ्गीकारेण तन्मते भिन्नविषयत्वं बोध्यम्। वस्तुतस्तु स्थापनानुमानस्य तर्कसचिवत्वादस्य च तद्-

भावाद् व्यर्थविशेषणत्वादिदोषाच्च न्यूनबलत्वमिति न सत्प्रतिपक्ष इति भावः ।

तस्येति । गोत्वाद्येकभावाभावसाधकत्वविषयत्वेन त्वया समाधेयत्वादित्यर्थः । रूपरसवत् कर्त्तरीति । यद्यपि शरीरित्वाशरीरित्वयोस्तथा न सहोपलम्भः, तथापि कर्तृजातीय तथोपलम्भएव सहोपलम्भोबोध्यः । यद्वा कर्तृत्वाशरीरित्वयोः सहोपलम्भो बोध्यः । यो मिथो धर्मीति । शरीरिकर्तृत्वाशरीरिकर्तृत्वयोरिति शेषः । न च कर्तृत्वाशरीरित्वयोः प्रत्यक्षविरोधात्तथापि कथं समावेश इतिवाच्यम् । तस्य प्रसिद्धमात्रविषयकत्वेन पक्षधर्म्मताबललभ्यकर्त्तरि तदुभयसिद्धौ विरोधाभावात् । अन्यथा अवयवो महानेवेत्यादिधीविरोधात् परमाण्वादेरसिद्धिप्रसङ्गादिति भावः । तत्सामान्यानङ्गीकार इति । न च घटत्वादीनां प्रत्येकं साध्यव्यापकत्वं, शरीरजन्यतावच्छेदकरूपवत्त्वस्य विवक्षितत्वात् । तावदन्यतमवत्त्वं तथेत्यप्याहुः । केचित्तु तदनङ्गीकारात्तस्यानुपाधित्वेऽपि घटत्वादिकमेव कर्तृजन्यतावच्छेदकमस्तु न तु जन्यत्वमित्यप्रयोजकमेवास्त्विति तात्पर्यमित्याहुः ।

इत्याशयमविज्ञानिति इति शङ्कते इत्यन्वयः ।

तेषाञ्चेति । घटत्वादीनामित्यर्थः । यद्यपि विवक्षितोपाधौ नाऽयं दोषः तथापि यथाश्रुताभिप्रायेणेदम् । विपक्षबाधकेन च हेतौ साध्यव्यापकतया नायमुपाधिरित्यत्र तात्पर्य्यम् । रूपारम्भकमनतिप्रयोजकं बोध्यम् ।साधनव्यापकत्वादिति।ननु चेष्टाश्रयजन्यत्वमुपाधिरस्तु,तथा च नोक्तदोषः। न चादृष्टद्वारा क्षित्यादौ शरीरजन्यत्वादिदमपि साधनऽव्यापकमेवेति वाच्यम् । अदृष्टाद्वारकत्वस्यापि तद्विशेषणत्वादिति चेत । न, विपक्षबाधकेन हेतोः साध्यव्याप्यतया तदव्यापकत्वेनानुपाधित्वात् । ननु कारणान्तरसत्त्वे कथमाकस्मिकत्वमित्यत आह कारणान्तरस्येति । कारणविशेषउपादानादिः । शरीरव्यापारे शरीरानपेक्षत्वमसम्भवीत्यत आह । क्रियायामिति ।

ज्ञानानित्यत्वमिति । अनित्यज्ञानवत्त्वमित्यर्थः । अर्थाश्रयत्वं, अर्थप्रयोज्यभोगाश्रयत्वमित्यर्थः । तथेति । स्वव्यापारे साक्षात्प्रयत्नाधिष्ठेयापेक्षत्वमेव परम्पराधिष्ठेयत्वमिति साध्याविशेषइत्यर्थः । यदव- च्छिन्ने आत्मनि ऐन्द्रियकार्थज्ञानेन प्रयत्नो भोगश्च जनयितव्यस्तस्यै-

| | |
|---|---|
| ३९. ३०. | तस्येति |
| ४०. २. | रूपरसवत् |
| ४०. ३. | यो मिथो |
| ४०. ८. | न च घटत्वादीनां |
| ४०. २२. | तेषाञ्चेति |
| ४१. २८. | ननु चेष्टाश्रय |
| ४२. १५. | कारणान्तरस्येति |
| ४८. ८. | ज्ञानानित्यत्वमिति |
| ४८. १३. | तथेति |

वेन्द्रियाश्रयत्वमित्यर्थः । यद्यपि भोगान्तर्भावेन न मूलार्थस्तथापि तात्पर्यार्थोऽयमिति भावः ।

तदनपेक्षत्वादित्यत्र तत्पदेनोभयपरामर्शाद्धेतुद्वये तात्पर्यमित्याह
४८. १६ स्वव्यापार इति । एवञ्च त्रयमिति मूलस्य चतुष्टयमिति तात्पर्यम् ।
४८. २२. क्षित्यादिकमिति । यद्यपि यथाश्रुते न साध्याविशेष उपाधिभेदात्, तथापि चेतनाधिष्ठानप्रयत्नद्वारैवेति प्रयत्नानधिष्ठितहेतुकत्वमेव साध्यमभिप्रेतम् । यद्वा साध्याविशेषउक्तः । यद्वा साध्यवद्धेतुरप्यसिद्धइति साध्यसमः । ननु सर्वविषयत्वमेव तस्यासिद्धमिति पटादि-
४९. ४. विषयत्वासिद्धेस्तदुपादानाधिष्ठानं न स्यादित्यतआह पटाकाशेति । वस्तुतो नियतविषयता कारणाधीनेति नित्यतयैव सर्वविषयत्वमिति भावः । तदिदमाह नित्यतयेति ।

ननूदासीनो निष्प्रयत्नइत्यनर्थानन्तरम् । तथाच प्रयत्नाभावेऽपी-
,, १२. ति व्यर्थमतआह कारणानीति । प्रयत्नाभावलाभार्थमाह उदासीनबुद्धेरिति । पूर्वोक्तव्याख्यानेन तल्लाभेऽपि प्रयत्नाजनकबुद्धेरिति कर्मधारयात्तदर्थपर्य्यवसाने तल्लाभइत्यर्थः । पौनरुक्त्यभ्रमं निवारयति
,, १८. दुःखहेतुश्चेति । एतच्च कारकत्वद्योतनार्थम् । यदा त्विति । यदि कृतिजन्यत्वमेव साध्यमित्यर्थः । एवञ्च बुद्धिमत्पूर्वकत्वस्याप्राधान्यमनुपादानमेवेति बोध्यम् । यद्यपि विशिष्टाविशिष्टभेदादुपाधित्वं सम्भवति, तथापि व्याप्यं व्यापककोटावनिवेशयन एव व्याप्तिग्राहकत्वमिति मते साध्यव्यापकत्वाग्रहादुपाधित्वमिति भावः । वस्तुतो हेतौ विपक्षबाधकसम्भवादत्र च तदभावाच्च तथात्वमिति ।

५०. ११. प्रयत्नानित्यत्वस्येति । तथा च प्रयत्नादेव बुद्धिसिद्धिरिति भावः। वस्तुतस्तु समूहालम्बनरूपैवानुमितिर्न तु प्रयत्नात्तत्सिद्धिरित्येक-
,, १६. दैव त्रितयजन्यत्वं सिद्ध्यतीत्याह कार्य्यत्वादिति । ज्ञानाद्येकेति । प्रत्येकव्याप्तिभिरिति शेषः ।

५३. २४. अयोग्यस्यापीति । उद्भूतस्पर्शवेगशून्यवायोरित्यर्थः । आलोका-
५४. १. त्मकस्येति । आलोकवतइत्यर्थः । तथाच पाकेन जाठर्य्यवह्निः कम्पेन पवनो नानुमीयेतेत्यर्थः । पूर्वोक्तयोरिति । यद्यपि पवनः स्तिमितएव पूर्वोक्तः स च न कम्पानुमेयस्तथापि कम्पमारुतवच्चेत्यनेन कम्पजनकवायोरपि पूर्वोक्तत्वमिति भावः । दहनस्तु धूमाग्निवदित्यनेनोक्तो न बोध्यः, किन्तु जाठर्य्यएव उदाहरणस्थलएवेति जाठर्यलाभा

पूर्वोक्तयोरित्यर्थइति व्याख्यातमिति ध्येयम् । धूमोत्पत्तिनिश्चयइति पाठे धूमपदेनैव पाक उपलक्षितः । तस्यैव आठर्य्यवह्निसाधकत्वादुपक्रान्तत्वाच्चेति । तेनापि आठर्य्यवह्निसिद्धिर्न स्यादित्यर्थः ।

उष्ममात्रात्चेति यदि पाठस्तदा उष्मपदं वायुपरमेवेति बोध्यम् । ५४. १४. दोषान्तरमाह प्रकृतादिति शुक्लत्वस्येति । यद्यपि शुक्लत्वस्य योग्यसंस्थानव्यङ्ग्यत्ववदात्मनोऽपि योग्योपाधिसत्त्वनियमः । यदि च तत्संसारिमात्रविश्रान्तं तदा तदपि योग्यशुक्लविश्रान्तमिति अयोग्यस्य न बाधः प्रत्यक्षेणापि, तथापि विपक्षबाधकाभावएव मूलम् । अन्यथा पशुत्वस्य केवलान्वयित्वापत्तेः । तस्य च त्वयाऽनभ्युपगमादिति भावः । नन्वेवमपि तर्कोपदर्शनमात्रमर्हं न तु न्यायोपदर्शनमित्यत आह यद्वेति । अनेनोभयोः समानविषयत्वप्रतिपादनात् निगेधमाह इत्यर्थः । मूलोक्तस्य तस्य व्योमादौ व्यभिचा[illegible]परितुष्यन् स्वयं तर्कोपकार्य्यमानमाह स्वर्गाद्यकालीनेति । अतएवाह ५४. २१. ५६. १०. विशेषणा[illegible]ति । अतएव चेष्टात्वस्योपाधित्वशङ्काऽपीति भावः । साधनव्यापकत्वादिति । न च कर्म्ममात्रस्य तत्प्रयत्नजन्यत्वेऽपि तत्संयोगसमवायिकारणत्वे मानाभाव इति वाच्यम् । यः स्पन्द इत्यादिप्रागुक्तव्याप्तिस्तथात्वादिति भावः । मृतशरीरे क्रियैव कथमित्यत आह वाय्वादिनेति । तन्नोदनादिनेति भावः । इदमपीत्युपलक्षणं, ५६. २२. ५७. १. त्वन्मतेनेत्यपि द्रष्टव्यम् । मन्मते ततएव साध्यापत्तेरिष्टत्वात् त्वन्मतइति । यद्यपि सत्यन्तं शरीरगर्भोपाधिविशेषणमिति ज्वलनक्रियायां तदभावादत्रोक्तिसंभवाभावस्तथापि तदगर्भतायामिदं, तद्गर्भत्वेऽन्योन्याश्रय इति विकल्प्य दूषणे तात्पर्य्यम् ।

ननु साक्षात् परम्परया वेति न समुच्चयः, एकत्रोभयथाऽधिष्ठानाभावात् । प्रत्येकगर्भसाध्ये च व्यभिचारइत्यतआह प्रयत्नप्रतिबद्धपतनामिति । एतेन मूले व्यर्थविशेषणमपि सूचितम् । मुख्यार्थेत- ५९. २०. यति शेष इति। धारकप्रयत्नात्तदाश्रयाच्च भेदसिद्धावद्वैतनिरासे [illegible]दिदेवतानां परस्परभेदप्रतिपादकागमा मुख्यार्थाएवेत्यर्थः । अतएव इति ज्ञानादिमता ईश्वरेण संयोगः सम्बन्धः साक्षात्परम्परासाधारणइत्यर्थः । वक्ष्यते इति यो लोकत्रयमाविश्येत्यत्राविशपद[illegible]नावसरे मूलएव । अतएवेति। प्रपञ्चान्वयव्यतिरेकानुविधानेन स्थ- ५९. [illegible] तिं प्रति तद्धेतुत्वादेवेत्यर्थः । नन्वदृष्टद्वारा अस्मदादिनाप्यत्वेनाथो-

६०. ६. न्तरमित्यनुशयादाह स्वजनकेति । स्वजनकप्रयत्नेन समानकालीनं चरमकारणं यस्य नाशस्य, तत्प्रतियोगीत्यर्थः । अदृष्टद्वारकप्रयत्नस्यापि कालादिकारणसमानकालीनतयाऽर्थान्तरतादवस्थ्यमत उक्तं, चरमेति । कालीनादिसमानकालीनत्वमादायार्थान्तरत्वमतआह प्रयत्नेति । उदासीनप्रयत्नासिद्ध्याऽर्थान्तरमतउक्तं, स्वजनकेति । केचित्तु उदासीनसिद्धावप्रयोजकत्वमिति विपक्षबाधकसूचनाय तदित्याहुः । स्वपदं चरमकारणपरं ध्वंसपरं वा । न चैवं साध्याप्रसिद्धिः, अस्मदादिप्रयत्नस्यैव दृष्टान्तत्वात् । तन्नाशचरमकारणस्य स्वविषयकसाक्षात्कारस्य स्वजनकप्रयत्नेन विषयीभूतेन समानकालत्वात् । यत्नध्वंसकारणयत्नसमानकालीनस्वसाक्षात्कारहेतुकनाशप्रतियोगित्वाच्च । पटादिश्च पक्षसम इति न तेषु व्यभिचारः ।

६३. १. पित्रादिरितिव्यवहारयितृत्वादिति भावः । ननु मूले कारणपदवैयर्थ्यं, अदृष्टादिजन्यत्वमादायार्थान्तरं, मनसि व्यभिचारश्चेत्यन्यथा

६४. १८. व्याचष्टे प्रमात्वप्रयोजकेति । एतच्च विपक्षबाधकसूचनाय, न तु साध्ये प्रविष्टम् । अतएवाग्रिमसाध्ये नोपात्तम् । अध्यापकत्वमादायार्थान्तरमित्यरुचेराह यथार्थेति । न चात्रापि दोषतादवस्थ्यम्, अस्मदादेरनुवक्तृतया वक्तृत्वाभावात् । स्वतन्त्रवक्तृपरत्वाद्वा ।

न चाप्रयोजकत्वम्, अन्यथा दुःखित्वमसंसारिवृत्ति धर्म्मत्वादित्यादिकमपि स्यादिति वाच्यम् । ईश्वरप्रतिपादकागमादेर्विपक्ष-

६५. १ बाधकस्य सत्त्वात्तत्र च तदभावात् । न चास्मदादीतिननु तस्य पक्षत्वात् पक्षसमत्वाद्वा कथं तत्र व्यभिचारः । अन्यथा वेदज्ञानाजन्येत्यादिसिद्धान्ते का गतिः । यदि चाजन्यज्ञानमादाय तत्र साध्यसत्त्वमिति व्यतिरेकित्वमविकलं, तदाश्रयपुरुषमादाय प्रकृतेऽपि तथेति तुल्यमिति चेत् । न असंसारिपुरुषप्रणीतत्वं तत्कण्ठताल्वाद्युच्चरितत्वमभिप्रेत्य व्यभिचारदर्शनात् । एतदभिप्रायेणैव मूले मन्वादिवाक्ये व्यभिचारोद्भावनम् । अन्यथा तस्यापि सर्वज्ञप्रणीत

६५. २. त्वेन तदभावात् । अन्यथा तु चिन्त्यम् । वेदज्ञानाजन्येति । अप्रसिद्धिवारणाय वेदज्ञानेति विशेषणम् । अस्मदाद्युच्चरितवेदस्यापि पक्षत्वादजन्यज्ञानमादाय साध्यसत्त्वात्तत्र न व्यभिचारः । न चैवं वेदत्वहेतुत्वपक्षे व्यर्थविशेषणत्वम् । अखण्डाभावतया व्याप्तिग्रहे तदभावात् । वस्तुतस्तथा सति व्यतिरेकिणि व्यर्थविशेषणत्वं नोद्भा-

ध्येत । न चेष्टापत्तिः, कथकसम्प्रदायविरोधात् । नीलधूमस्यापि व्यतिरेकितया गमकत्वापत्तेः । यदि च व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति मतं, तदा प्रकृतेऽपि तुल्यमिति पूर्वास्वरसादेवान्वयतो वेति कल्पान्तरमिति । समुदायस्येति पदवाक्यसमुदायविशेषो वेदः पक्षः, तत्र विशिष्टैकार्थप्रतिपादकत्वरूपस्य वाक्यत्वस्य समुदाये विरहादसिद्धिरित्यर्थः । ननु समुदितानि पदान्येव समुदायः, अतिरिक्तस्यानभ्युपगमात् । तत्र च प्रतिपादकत्वसत्त्वाद्वाक्यत्वमप्रत्यूहमेव । अन्यथा वाक्यत्वमप्रसिद्धमेव स्यात् । प्रत्येकपदे वाक्यत्वाभावात् । समुदायस्याप्रतिपादकत्वात् । यदि च नैवं, तदा प्रमाणत्वस्यापि प्रतिपादकगर्भतया तद्गर्भसिद्धान्तलक्षणमपि भज्येतेति चिन्त्यम् । शब्दतदुपजीवीति शब्दप्रकाशे विपञ्चितम् । स्मृत्यादाविति आद्यस्मृत्यादावित्यर्थः । एतदपि तज्जातीयत्वस्याभेदगर्भत्वविवक्षायामन्यथा सिद्धान्तेऽप्यगतेरिति ध्येयम् । प्रमाणतावच्छेदकेति न चावच्छेदकत्वं यद्यन्यूनानतिरिक्तवृत्तित्वं, तदाऽसिद्धिः, अनतिरिक्तवृत्तित्वमात्रञ्चेत्तदा पठ्यमानवेदत्वादौ व्यभिचार इति वाच्यम् । स्वसमानानुपूर्वीकसकलवाक्यवृत्तिधर्मत्वादित्यत्र तात्पर्यात् । न च विशेष्यभागस्यैव व्याप्यत्वं तावन्मात्रञ्च स्वरूपासिद्धमिति वाच्यम् । अखण्डाभाववदखण्डोपाधौ न व्यर्थत्वमिति मतेनोक्तत्वात् । यन्निष्ठा यन्निरूपितेति न्यायात् । अतएव प्रमेयत्वादेः शास्त्रे हेतुत्वेनाभिधानं प्रयोजनाभावान्नान्यत्र विशेषणप्रक्षेपः । अन्यथा अखण्डाभावे का गतिः । तत्रापि प्रतियोगिकोटावनेकविशेषणप्रक्षेपसंभवात् । अतएव भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्ति सकलभोगाधिकरणवृत्तित्वादित्यत्र भोगाधिकरणपदं सार्थकम् । यत्तु व्याप्त्याश्रयसंकोचकविशेषणस्य व्यर्थत्वं यथा नीलधूमे, न तु विकाशकस्य, यन्निष्ठा यन्निरूपिता इति न्यायेन तद्विशेषणं विना तन्निष्ठव्याप्तेरग्रहात् । प्रकृते च विशेष्यभागस्य न्यूनवृत्तित्वविशिष्टस्याधिकवृत्तित्वमिति तस्य विकाशकत्वमिति । तत् प्रमादविजृम्भितम् । व्याप्त्याश्रयस्यैवंविकाशेऽपि व्याप्त्याश्रयविकाशाभावात् तद्घटितोपाधेरेकत्वात् । न च व्याप्त्याश्रयविकाशस्यापि न व्यर्थत्वं, तत्र यन्निष्ठेत्यादिन्यायस्याप्यसम्भवेन मानाभावादिति । अन्यथा धूमालोकान्यतरत्वादावपि व्यर्थविशेषणत्वं न स्यात् । आलोकादिपद-

६५. ६.

६५. ११.

६५. २६.

स्यायोगोलकादिव्याप्याश्रयविकाशत्वात्।

६६. ९. आकस्मिकश्च तत्र बीजञ्चेति व्याहतमतआह इष्टेति।

६६. १९. साध्यादभिन्नत्वे इति। यद्यप्यत्र नाभेदः, उपाधिभेदस्य स्फुटत्वात्। किञ्च पौरुषेयत्वस्य सुगतागमादावपि सत्त्वादन्यथा वाक्यत्वस्य तत्र व्यभिचारापत्तेरिदञ्च तद्व्याप्तमिति सर्वथा भेदएव, तथाप्येतद्स्वरसादेव दोषान्तरदानमिति ब्रूमः। अन्यथा तु चिन्त्यम्।

६६. २१. शब्देतरेति।शब्दतदुपजीविप्रमाणेतरप्रमाणगोचरार्थत्वमित्यर्थः।

६८. ८. यदि चेति। अत्रेदं चिन्त्यम्। तदस्वीकारे दृष्टान्तान्तरं कर्तुमर्हेति, न तु हेत्वन्तरम्। मनःपरिमाणदृष्टान्तत्वेन प्रथमहेतावप्युपपत्तेः। तस्मात् द्व्यणुकपरिमाणपक्षके प्रथमस्यासिद्धत्वमाशङ्क्य तदभिप्रायेण हेत्वन्तरम्। तत्र च प्रथमहेत्ववष्टम्भात् परमाणुपरिमाणमेव दृष्टान्तोमनःपरिमाणं वेति मूलतात्पर्य्यं प्रतिभातीति।

६६. ११. तयोरपीति। स्वरूपयोग्यत्वादित्यर्थः। यद्वा, अनारम्भके तत्र मानाभावात् तयोरपि कदाचिदारम्भकत्वादित्यर्थः।

द्व्यणुकादीनामारम्भकत्वनियमे चावयवपरिमाणतया तत्परिमा-

६६. १२. णस्यापि जनकत्वमेवेति न दृष्टान्तत्वमित्याह अवयवेति।

यदि च तादृशस्यापि नित्यपरिमाणत्वेनैवाजनकत्वमिति दृष्टा-

६६. १३. न्तत्वं, तत्राह अन्यथेति। यद्यप्येतद्दूषणं मनःपरिमाणदृष्टान्तत्वपक्षेऽपि, तथापि तदग्रे परिहरिष्यतीति ध्येयम।

६६. २४. किमणुत्वमिति। एवकारोऽत्र भिन्नक्रमः। तेन किमणुत्वमेव महत्त्वं जनयतीत्यर्थः। तथा च महता महदनारम्भप्रसङ्गादिति घटते। मूलस्वरसोऽप्येवमेवेति केचित्। तृणारणिमणिवत् कार्य्यभेदान्न व्य-

६६. २९. भिचारः, अन्यथा सङ्ख्याहेतुत्वपक्षे का गतिरित्याह नन्विति।

६६. २८. यदि नेति। यद्यपि सङ्ख्याकारणत्वपक्षेऽपि तत्र प्रसङ्गस्तुल्यः, तथापि परमाणुभिन्नार्थकस्य द्व्यणुकाभ्यां त्र्यणुकस्यारम्भप्रसङ्गो बोध्यः। परिमाणद्वयत्वादिना कारणत्वे द्वित्वादेरवायद्वयकस्य कारणत्वात्। परमाणुभिस्तु महदारम्भे बाधकं वक्ष्यतीति। ननु यथा नित्यपरिमाणत्वादिना तत्र जनकं, तथा नित्यवृत्तिसंख्यात्वादिना बहुत्वसंख्याऽपि जनिका न स्यात्। न च द्व्यणुकस्य महत्त्वप्रसङ्गः, कार्य्यस्य महतः कार्य्यद्रव्यारभ्यत्वानियमादित्याशयेनाह अत्रेदं

६६. १४. तत्त्वमिति।

न त्विति । यद्यपि महतः कार्यस्य कार्यद्रव्यारभ्यत्वनियमादेव न ६९. १५.
द्व्यणुके महत्त्वापत्तिः, तथापि नित्यस्य तस्य स्वरूपयोग्यत्वे फलाव-
श्यम्भावापत्तिरित्यत्र तात्पर्यम् ।

महत्त्वविशेषे इति प्रचयशून्यावयवद्व्यारब्धघटादिमहत्त्वे व्य- ६९. १८.
भिचारादित्यर्थः ।

अणुवृत्तिद्वित्ववत्त्वाद्वेति अत्राणुवृत्तिपदं स्फुटार्थम् । ७०. ३०.

अवयववृत्तिबहुत्वादिति अत्रापि वृत्त्यन्तं स्फुटार्थम् । अन्यत्रापि ७०. ४०.
बहुत्वस्य तज्जनकत्वानभ्युपगमादित्येके । अवयवपदमणुपरं तुल्यप-
रिमाणाधिकसंख्यारब्धे महत्त्वोत्कर्षेण तस्य तज्जनकत्वे व्यभिचारा-
दित्यन्ये ।

आश्रयासिद्ध्यादिपरिहारार्थं परिमाणं पक्षयति अथेति । ७०. १०.

प्रसिद्धेति एतच्च सामान्यलक्षणाभ्युपगन्तृमते दूषणम् । स्वमते ७०. १२.
त्वप्रयोजकत्वमित्यत्र तात्पर्यम् ।

साम्प्रदायिकास्त्विति न चेश्वरासिद्धिदशायां द्वित्वस्य कल्प- ७०. १५.
नीयतया धर्मिकल्पनात इति न्यायेन परिमाणमेव विषयीकरोतीति
वाच्यम् । मानान्तरेणेश्वरस्य साधितत्वात् तदवष्टम्भेनेदमित्येके ।
अत्र कल्पेऽस्वरस एवायमित्यन्ये ।

परमाणोरणुतरत्वात् तत्परिमाणेऽपि सजातीयनिरूपितोत्कर्षा-
श्रयत्वमस्त्येवेत्यस्वरसादाह इत्याहुरिति । ७०. १९.

उभयहेतुत्वे गौरवमित्यस्वरसमाविष्करोति ऋजवस्त्विति । ७०. २०.

निमित्तान्तरमदृष्टादि ।

वेदसमानविषयकेत्यादि अत्र वेदपदं स्वपरं, तेन लौकिकप्रशं- ७०. ३०.
सावाक्ये न व्यभिचारः । अध्यापकतात्पर्यविषयत्वेनार्थान्तरमत
उक्तं, तात्पर्यापूर्वकेति तात्पर्यविशेषणम् । तात्पर्यविषयकाणीत्यत्र
तात्पर्यविषयोविषयोयस्येति मध्यपदलोपी समास इत्याहुः । न च
हेतौ सतात्पर्यकपदं व्यर्थम्, ईश्वरतात्पर्यमादाय वाक्यमात्रस्य प-
क्षसमत्वेन व्यभिचाराभावादिति वाच्यम् । बाधितार्थके तत्तात्पर्या-
भावेन व्यभिचारसम्भवात् ।

स चेतीति तथा च धृत्यादेरित्यनेन वेदधारकत्वादिकमुक्तमिति ७९. ५.
तदाश्रयेश्वरसिद्धिरिति भावः ।

एकदेशदर्शीति नन्वीश्वरव्याख्यानमादाय तस्यापि पक्षसमतया ७९. ९.

कथमनैकान्तिकम् । अन्यथा तादृशस्थले कदाचिदनुष्ठानुमतिचल-नस्यापि सम्भवेन तत्पदोपादानेऽपि व्यभिचारापत्तेरिति चिन्त्यम् ।

७९. १९. धृत्यादेरित्याभिप्रायेणाह वेदा इति ।

८२. १३. स्पन्द इति यद्यपि स्पन्दो न पुरुषधर्मस्तथापि तदवच्छिन्नशरीरे स्पन्द इति तथोक्तम् । तत्र न प्रथम इति मूलं कर्तृधर्मोनेति कारिकया गतार्थमिति यद्यपि, तथापि स्पन्दादित्रिके प्रथमः स्पन्दोनेत्यर्थः। उपसंहारश्च कर्तृधर्मोनेत्येके ।

८५. ९. काष्ठेनौदनं पचतीति वदिति यद्यपि काष्ठकरणकः पाक ओदनानुकूल इत्यन्वयसम्भवात् प्रयोगेऽपि पाकेन पचतीति न प्रयोगप्रसङ्गः, पाके पाककरणत्वानन्वयात् तथापि पाकं करोतीति विवरणं न स्यादित्यत्रैव तात्पर्यम् । यद्वा, एतदस्वरसादेव स्वयं हेत्वन्तरमाह कर्मान्वयानुपपत्तेश्चेति चैत्रओदनं पचतीति शेषः । परिमलस्तु एवं पाकस्य साध्यता न प्रतीयेत किन्तु सिद्धता, ततः पाकसिद्धताज्ञापकप्रयोगोपलक्षणपरं पाकेनेत्युक्तमिति ।

८५. १९. अतएवेति यत्नपदपर्यायतापत्तेरित्यर्थः ।

८५. २२. नन्वत्रेष्टापत्तावपि न क्षतिरित्याशङ्क्य गौरवापत्तेरिति । व्यापारस्य सामान्यतया लघुत्वमित्यभिमानेनेदम् ।

८७. ११. नन्वेवमिति यद्यपि द्वयवाच्यतयैव यत्नपदपर्यायतानिरासस्तथापि पूर्वापरीभूतत्वप्रकारकप्रतीतिमभ्युपेत्य तदाख्यातपदवाच्यमित्युक्तमिति ध्येयम् ।

८८. ५. अक्षादिपदवैधर्म्येणेति विनिगमकाभावात्तत्रोभयत्र शक्त्या नानार्थत्वमत्र चैकत्रैव निरुपाधिप्रयोग इत्यपरत्र लक्षणा । अन्यथा गङ्गादिपदस्यापि तीरादौ लक्षणा न स्यादित्यर्थः ।

ननु कर्त्ताऽप्यनुपस्थितः कथमाक्षेपहेतुः स्यादत आह आख्या-

९०. २३. तवाच्यतेति ।

९०. २८. पचतीत्यादाविवेतितथाच तत्रापि तदाक्षेप आवश्यक इति भावः।

९२. २५. अन्यथा तत्रापि यत्नकाले पचतीत्यादि न स्यादिति । यद्यपि व्यापारत्वेन यत्नस्यापि शक्यत्वात्तत्काले पचतीति स्यादेव, तथापि तेनापि रूपेण यदि यत्नो न शक्यस्तदेदं दूषणं बोध्यम् । अपरं शब्दप्रकाशे प्रपञ्चितम् ।

९६. ९. मुख्यं वेत्यादिनैवेत्यर्थ इति ननु तत्र कारके कर्त्तुः प्रथमं देश-

नादस्तु तथा, प्रकृते तु न तस्य न्यायस्यावतारः कर्मणः प्रथममदेशनादिति चेन्न । यथा कारकेषु प्रथमं देशनात् कर्तुर्मुख्यत्वं तथोद्देश्यतया कर्मणोमुख्यत्वमित्याशयादित्याहुः ।

यद्भावनेति । भावनाविशेष्यस्य कर्त्तुः कर्मणोवा प्रथमान्तपदेनोपस्थाप्यत्वमेवाक्षेपलभ्यत्वमिति भावः । ९६. २७.

भावनाविशिष्टेति सजातीयव्यापारमभिप्रेत्य । ९७. २५.

ननु भावनासमवायोनपदार्थः किन्तु तदन्वय इति तस्यान्वयप्रतियोगित्वाभावान्निराकाङ्क्षत्वेऽप्यदोष इत्यरुचेराह यद्वेति । ९८. २.

भावनान्तरेति तथा च शुद्धप्रातिपदिकार्थमात्राकाङ्क्षैवेति भावः। ९८. ३.

तृतीययेति कर्तृकरणयोस्तृतीयेति कर्तृत्वे तृतीयाऽनुशासनादिति भावः । ९९. ६.

ननु अत्राक्षिप्तेन चैत्रादिना भावनाऽन्वयः, अन्यथा तदनन्वयइष्टएवेत्यरुचेराह यत्र वेति । ९९. १६.

यत्नविशेष्य इति आख्याततात्पर्यविषयीभूतार्थविशेष्ये इत्यर्थः । ९९. २४.
अतएवाह अचेतनेऽपीति ।

तद्धर्मिणोरिति कर्त्तृत्वकर्मत्वधर्म्मिणोः कर्त्तृकर्म्मणोरित्यर्थः । १०. १०.

इत्याहुरित्यस्वरसोद्भावनम् । तद्बीजन्तु, तथाप्याश्रयत्वमात्रमनन्यलभ्यतया लकारवाच्यं, परसमवेतक्रियाफलशालित्वं हि कर्म्मत्वमिति चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयत्वमेव तस्य कर्म्मत्वं वाच्यम् । तत्र तृतीयया यत्नस्य धातुना फलावच्छिन्नव्यापारस्याभिधानेऽपरस्यानन्यलभ्यत्वादिति ।

द्वितीयाया इति तथाच भाव्यतया चैत्रस्योपस्थितेस्तथात्वेन कर्तृं नापेक्षते, किन्तु भावकत्वेनैव। तन्न विपर्य्ययादयुक्तमिति भावः। १०१. ८.

यत्नस्येति यद्यपि यत्नस्य लिङर्थत्वे तज्ज्ञानं प्रवर्त्तकमिति न स्वात्मनि वृत्तिविरोधोदोषः, तथापि प्रवृत्तिहेतौ सङ्कल्पे शक्तेरित्युक्तत्वात् तद्दूषणे तात्पर्य्यम् । १०३.१५.

न वा तत्साधनमिति यद्यपि परम्परया तत्साधनत्वं वक्ष्यति, तथापि साक्षान्न तथेत्यापातत इदम् । यद्वा, कुम्भकारपितृवदन्यथासिद्धतया न साधनमिति भावः । १०५.१०.

न चेति तथाच सङ्कल्पविषयः सङ्कल्पे न भवत्येवेति भावः । १०५.११.

एवं कार्य्यत्वमिति स्वभावादिति भावः । तमेवाह सम्बन्धित्वे- १०८.१६.

ति । प्रागुक्तेति उपलक्षितस्येत्यादिना प्रागुक्तेत्यर्थः ।

१०९.११. स्थायिकार्यत्वमेवेति । अपूर्वनिष्ठमिति शेषः । यद्वा, अपूर्वत्वमेवानेनोपलक्षितम् । अतएव किञ्चेत्यादिना तदेव दूषयतीति भावः ।

११०.१७. कार्य्यत्वमात्रमित्युपलक्षणं, न क्रियासाधारणं कार्य्यमात्रमभेदश्चान्वयः । न हि यत्प्रयुक्तानुपपत्त्या यत्कल्पनं तदेव तस्य विषयइत्यभ्युपगमादित्यपि द्रष्टव्यम् ।

११०.६०. कार्य्यमात्रशक्तस्येति । न च स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणेति नियमइति वाच्यम् । अप्रयोजकत्वात् । अएव नीलादिपदस्य तद्वति लक्षणाऽभ्युपगमइति भावः । अधिकं शब्दप्रकाशे द्रष्टव्यम् ।

११४. ५. त्वन्नये इति त्वया निष्फलत्वेनाभ्युपगमादिति भावः । न त्विति । न त्वपूर्वं स्वर्गसाधनमिति तत्र गौणप्रयोजनत्वधीरित्यर्थः ।

११४.१४. (मार्जिन: ११४.१४.)

११४.१४. प्रधानस्येति तथा चापूर्वं स्वतः प्रयोजनमेव न तु गौणप्रयोजनमिति भावः । अत्र मते अस्वरसमुद्भावयति । एतच्चेति परं प्रत्यपसिद्धान्तोद्भावनमात्रमित्यर्थः ।यदि चेति स्वतः काम्यत्वे इष्टसाधनत्वाभावाच्च तदपेक्षेति भावः ।

(मार्जिन: ११४.१६., ११४.२९.)

११७. ८. कृतिजन्यत्वमपूर्वस्यापीत्यन्यथा व्याचष्टे कृत्यनन्तरेति । कृत्यव्यहितानन्तरेत्यर्थः । यद्यपि तत्रापि किञ्चिद्व्यवधानं, तथाप्यपूर्वापेक्षया अव्यवधानमस्त्येवेति भावः ।

११८.२०. प्रकृत्यर्थोहीति यद्यपि संस्कारस्योपस्थापकत्वमुक्तं न तु प्रकृतेः । शक्तिलक्षणयोरभावे तदुपस्थापकत्वस्यासम्भवाच्च । अतएव शब्दानुपस्थितस्येति सिद्धान्ते वक्ष्यति । तथापि प्रकृतिप्रतिपाद्यत्वं प्रकृतितात्पर्य्यविषयत्वमित्येके । तन्मते औपादानिकी तदुपस्थितिः, तत्र प्रकृतेरपि तेन हेतुनाभ्युपगमात् तथोक्तमित्यन्ये ।

११८.२१. अन्यथेति यदि वृत्त्युपस्थितस्यैव विभक्त्यर्थान्वयस्तदेत्यर्थः । अशक्यत्वादित्युपलक्षणम् । अलक्ष्यत्वाच्चेत्यपि द्रष्टव्यम् । शब्दानुपस्थितस्येति वृत्त्येति शेषः ।

नन्वेवमपूर्वानभ्युपगमे प्रायश्चित्तविधिवैफल्यमित्यत आह प्राय-

११९.१४. श्चित्तस्य च फलप्रतिबन्धकत्वं स्यादिति ।

१२२. ९. करणमित्यनुपञ्जनीयमिति यदि हि धर्म्मविकल्पएवायमपि स्यात्, तदाऽस्य पृथगदोपात् न्यूनत्वापत्तिः । करणविकल्पे च शब्दः । प्रयत्नादिश्च करणत्वेन विकल्पितः, तद्धर्म्मश्चाभिधा इष्टसाधनता

घेति विकल्पद्वयं पर्य्यवस्यति । तच्च दूषितमेव । किञ्च, धर्म्मविकल्प पक्षे प्रयत्नादेः शब्दधर्म्मत्वाभावाद्विरोध इति भावः ।

स्वविषयज्ञाने, सङ्केतिग्रहरूपशब्दव्यापारतया अभिहिते इत्यर्थः । १२३.२२.
प्रकृतेऽपीति विषयतया कथञ्चित् लिङ्गवद्धेतुत्वादिति मूलएवोक्तत्वादित्यर्थः ।

तदेव दर्शयितुं शङ्कते नन्विति । १२३.२५.

अपुरुषार्थत्वादिति पुरुषार्थसुखादिप्रतिसन्धानं विना प्रवृत्त्यभावादिति भावः । १२४.२.

यत्प्रतीयमानमिति इष्टसाधनत्वादिकमित्यर्थः । १२४.११.

ननु चिकीर्षाजकृतिसाध्यत्वाभावेऽपि जीवनयोनिकृतिसाध्यत्वं स्यादित्यत आह जीवनेति । १२५.१३.

इच्छायान्त्विति । चिकीर्षायामित्यर्थः । तथाचेच्छाज्ञानस्य प्रवर्त्तकत्वप्रसङ्गोवारितएव, कृतौ स्वरूपसदिच्छायाएव हेतुत्वाभ्युपगमादिति भावः । वस्तुतश्चिकीर्षाहेतुज्ञानस्यैव प्रवर्त्तकत्वमितीच्छाज्ञानस्य चिकीर्षाहेतुत्वे प्रवर्त्तकत्वापत्तिरिति प्रथमकल्पएव साधुरिति । १२५.३०.

यद्यपि बलवदनिष्टाजनकत्वं कृतौ विशेषणीकृतं प्राक, तथापि चिकीर्षाविशेषणत्वेऽपि न दोषइत्याशयवानाह बलवदनिष्टाजनकचिकीर्षाधीनत्वमिति । वस्तुतो बलवदनिष्टाजनकत्वे सति चिकीर्षाधीनत्वमित्यर्थः । तथाच न पूर्व्वविरोधः, क्वचित्तु बलवदनिष्टाजनकचिकीर्षाजन्ययत्नचिकीर्षाधीनत्वमिति पाठः । तत्र बलवदनिष्टाजनकचिकीर्षाजन्ययत्ने यच्चिकीर्षाधीनत्वमुक्तरूपं, तदेव विशेषणमिति योजनया तादृशार्थलाभ इत्याहुः ।

ननु यागस्येव कृतेरपीष्टसाधनत्वं धर्मइति तुल्यमेवान्तरङ्गत्वमत आह जीवनयोनिजेति । यद्यपि तद्व्यावर्त्तकं चिकीर्षाधीनत्वमात्रं न तु बलवदनिष्टाजनकत्वमपि, तथापि मधुविषसंपृक्तान्नभोजनव्यावृत्त्यर्थं तदावश्यकमिति भावः । १२६.४.

भोगेति तस्य स्वतः पुरुषार्थत्वेनेष्टसाधनत्वाभावादित्यर्थः ।

वस्तुत इति यदा कदापीत्यर्थः । १[illegible]

कृतिसाध्यतोत्तीर्णेति सिद्धत्वज्ञानादित्यर्थः । अन्यथा साधनत्वस्यैवाग्रहादिति भावः । शेषं शब्दप्रकाशे प्रपञ्चितमनुसन्धेयम् ।

१२७.१६. अतएवेदं मत्तोऽभूतमित्यत्राकारप्रश्लेषः, अभवनस्य प्रागभाव-रूपत्वादित्यर्थः । अतएव क्वचित् मत्तो न भूतमित्येव पाठः ।

१३०.१९. भावनाया इष्टसाधनतयेति यद्यपि भावनाकारणं न यागः प्रत्युत भावनैव यागजनिका, तथापि तत्कारणेत्यत्र बहुव्रीहिः, कारणपदेन विषयविवक्षा चेति भावः ।

१३०.२२. तत्रादिपदेनेति न च तदर्थइत्यस्य पूर्वं लिङर्थइति विवरणाद्-यागस्य च लिङर्थत्वाभावाद्विरोध इति वाच्यम् । लिङर्थत्वेन त-स्यापि विकल्पे दोषाभिधाने दोषाभावादित्यर्थः । तदर्थइत्यत्र तच्छ-ब्देन शब्दस्यैव विवक्षा, उपस्थितत्वात् । न लिङः, अनुपस्थितत्वा-त् । प्रकाशे च लिङर्थइति विवरणं भावनामात्राभिप्रायेणेत्याहुः ।

१३१. ६. तृतीयोपयोगइति तृतीयासम्भवइत्यर्थः । कारणसङ्ख्याया अन-भिहितत्वादिति भावः ।

नन्वेवं तृतीयया कारणत्वस्याभिधानात् लिङाऽपि च तदभि-धाने पौनरुक्त्यमित्यत आह तृतीयातोऽपीति । गौरवादुक्तदोषाच्चेति भावः । वाजपेयाधिकरणन्यायात् कर्मनामधेयतया तृतीयायाः प्रथमं मूकत्वादित्यन्ये ।

परिसङ्ख्यानमित्यभिधानपर्य्यायएव अन्यस्य दुर्वचत्वादित्यनु-

१३१.१०. शयमाविष्करोति इत्यन्ये इति ।

१३४.२६. यद्यपीति तथाच नोक्तव्याघातः, वाच्यवाचकभावसम्बन्धात्म-काभिधापक्षएव तत्सम्भवादिति भावः ।

१३५.१२. यावज्जीवमिति न च तत्सम्भवति, सुषुप्त्यादिदशायां तद्विच्छे-दादिति भावः ।

ननु प्रवृत्तिमतोनिवृत्तिनियोगाधिकारात् प्रसङ्गः प्रवृत्तिः न तु

१३५.१७. सङ्कल्पइत्यत आह इच्छायाएवेति । आद्या प्रवृत्तिरिच्छैवेत्यभिधाना-दिति भावः ।

अत एव न हि कर्त्तव्यत्वस्येष्टसाधनत्वस्य वा अभावः प्रतिपा-

१३७.१४. दयितुं शक्यते इति वक्ष्यतीत्याह न हीति ।

१३७.१०. समासएवेति यद्यपि न घटः पटइत्यादौ व्यासेऽपि पर्युदासवृ-त्त्या तदितरपरत्वमस्त्येव, तथापि शब्दप्रकाशोक्तमनुसन्धेयम् ।

यागोमादिष्टसाधनमित्याद्यनुमानं शब्दप्रकाशे विपञ्चितमनुस-न्धेयम् ।

हेतुत्वादित्यादेश्चेति हेतुत्वादनुमानाच्चेत्यादेश्चेत्यर्थः । १३८.२०.

साक्षात्त्वस्यौत्सर्गिकत्वेनेति यथा च कार्यान्वितव्युत्पत्त्या साक्षात् कार्यान्वितज्ञानं नान्वितव्युत्पत्त्या, तथा शब्दप्रकाशे अनुसन्धेयम् । १४१.६.

ननु सायुज्यं संयोगः, स च परमेश्वरेण शरीरस्य सर्वदा अयत्नासिद्ध एव, आत्मनस्तु न कदाऽपीत्यन्यथा व्याचष्टे सायुज्यमिति । १४२.१६.

एतद्वेदवाक्येति समानकालपदेन स्थूलकालोपाधेर्विवक्षणात् पूर्वकाल एव विवक्षितः । समानकालोत्पत्तिकस्य जनकत्वासम्भवेन तदादायार्थान्तरादिशङ्काऽनवकाशात्। एवञ्चाध्यापकादिज्ञानजन्यत्वेनार्थान्तरवारणायाजन्यान्तम् । न चैवमप्यसिद्धिः तादृशपदज्ञानादिजन्यत्वादिति वाच्यम् । समानविषयत्वेनापि ज्ञानविशेषणात् । न चैवमपि वाक्यार्थं ज्ञात्वा अस्मदादिनैवोच्चरिते इदानीन्तनवेदे दोषतादवस्थ्यमिति वाच्यम् । तद्भिन्नवेदस्यैव पक्षत्वादित्याहुः । यद्यपि सोत्पत्तिकतादृशज्ञानाजन्यत्वविशेषणादेव पक्षधर्मताबलादजन्यज्ञानसिद्धाविष्टसिद्धिः, तथाप्यन्यकालोत्पत्तिकस्य जनकत्वशङ्कैव नेति स्वरूपतानिर्वचनपरं तदिति मन्तव्यम् । न च शुकादिवाक्ये व्यभिचारः, तस्यापि पक्षसमत्वादिति भावः । १४४.२४.

वक्तरीति न च वक्तृत्वानुवक्तृत्वयोर्भेदादनुवक्ता न वक्तेति न तद्विशेषणमर्थवदिति वाच्यम् । वक्तृत्वं हि वचनकर्तृत्वं, तच्च तत्रापि । आगन्तुकेति तथा च कठादिशरीरमधिष्ठायाद्यवक्तुरीश्वरस्यैव तत्तत्समाख्याविशेषे निबन्धनत्वमिति भावः ।

व्यवस्थाव्यतिरेक इति नियमगर्भस्योक्तानियामकस्यासिद्धेरिति भावः ।

अनित्यज्ञानवदिति तन्मते अपौरुषेयत्वात् अस्मन्मते नित्यज्ञानवद्वक्तृकत्वादुभयसिद्धविशेषणमिति वोध्यम् । शेषं सुबोधम् ।

इति महामहोपाध्यायदेवदत्तात्मजश्रीरुचिदत्तोपाध्यायविरचितः कुसुमाञ्जलिप्रकाशमकरन्दः समाप्तः ।

---